This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google books

https://books.google.com

(8700 E 1 (6))

Indian Institute, Oxford.

86 F 9/6.

Per. 10 d. 42.

Digitized by Google

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

VOL. VI.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1884.

Digitized by Google

Digitized by Google

INDEX TO VOLUME VI. NEW SERIES.

Akáṅḍatáṅḍava of Paribhá-sheṅduśekhara,	541, 613.
Chit Sukhí,	1, 83, 113, 206, 289, 381, 439, 503.
Kaivalyaratnam,	57, 143, 169, 225, 281.
Khanḍanakhanḍakhádyam,	633.
Mádhavíya Dhátuvṛittih,	17, 151, 233, 320, 373, 469, 519, 577, 649.
Pañchadaśí with translation,	35, 98, 259, 489, 595.
Saṃkshepśárírakam,	47, 75, 159, 197, 242, 334, 353, 419, 527, 476, 665.
Śrautapádarthanirvachanam,	9, 65, 553, 585, 657.
Vedántaparibhášhá with translation,	33, 91, 217, 328.
Vicháramádhukarí,	273, 310, 361, 410.
Yogavártikam,	24, 106, 129, 178, 249, 297, 337, 393, 449, 505, 561, 617.

Digitized by Google

Digitized by Google

॥ अथ चित्सुखी ॥

॥ तत्र द्वितीयपरिच्छेदावशेषः ॥

(*Continued from page* 634. VOL. V.)

न तृतीयः, पृथक्क्रियावत्त्वस्योभयोरिष्टत्वात्, "एकद्रव्यं कर्मे"ति सूत्राच्च ।

न चतुर्थः, चलाचलयोरपि घटहिमाचलयोः परस्परसंयोगविभागानधिकरणत्वात् ।

अवयवावरणेऽप्यवयविनोऽनावरणे पूर्ववत् कृत्स्नः प्रतीतः स्यादिति चेत्, सत्यम्, कृत्स्नः प्रतीयत एव, तस्यैकत्वात् ।

तथात्वे द्विहस्तैकहस्तत्वादि किमिति न प्रतीयत इति चेत्, तदुचितावयवसंनिकर्षस्य तत्प्रतीतिहेतोरभावात्, एकत्वं तु महारजनादेरेव द्रवद्रव्यान्तरस्य नावयविनः, नाप्यवयवानामिति दूरनिरस्तो विरुद्धधर्मसंसर्गः। तथापि तत्संयोगाद्रक्तिमप्रतीतिः सर्वत्र किं न स्यादिति चेत्, न, संयोगस्याव्याप्यवृत्तित्वात् ।

नन्ववयवेषु वर्तमानोऽवयवी किं वा कार्त्स्न्येन वर्तेत उतैकदेशेन ।

नाद्यः, शृङ्गेणापि स्तनकार्यकरणप्रसङ्गात्, अवयविनः कार्यणान्वयात्, युगपदनेकत्र वृत्तावनेकवृत्तिरूपादिवदनेकत्वप्रसङ्गाच्च ।

नापि द्वितीयः, आरम्भकावयवव्यतिरिक्तैकदेशाभावात्, भावे वानन्तावयवतया मेरुसर्षपयोस्तुल्यपरिमाणतापत्तेः ।

अवयवावयविनोर्दूरविप्रकर्षप्रसङ्गाच्चेति चेत्, मैवम्, विकल्पस्यानवसरदुःस्थत्वात्, नह्येकस्मिन्नेवावयविनि समस्तोऽसमस्तो वेति विकल्पः कल्पते, बहूनां हि समस्तताऽसमस्तता वा संभवेत् ।

किंच. अयं वृत्तिविकल्पः स्वसिद्धां व्याप्तिमवलम्ब्योत्तिष्ठत्युत परसिद्धाम् ।

नाद्यः, सौगतैः सर्वस्य क्षणिकत्वेनाश्रयाश्रयिभावानभ्युपगमात्, वेदान्तिभिरपि कार्यस्य कारणे कल्पितत्वमभ्युपगच्छद्भिर्वृत्तेरनभ्युपगमात् ।

Digitized by Google

नापि द्वितीयः, तेनाप्यनङ्गीकारात्, यद्वर्तते तत् संयोगेन समवायेन वा वर्तत इति हि परोऽङ्गीकरोति न तु कार्त्स्न्यैकदेशाभ्याम् ।

अस्तु वा कार्त्स्न्येन वृत्तिस्तथापि न शृङ्गेण स्तनकार्यकरणप्रसङ्गः, तत्तदवयवविशिष्टस्यैवावयविनस्तत्तत्कार्यप्रसवसमर्थत्वात्, सर्वश्चायं प्रसङ्गहेतुराश्रयासिद्धोऽवयविनोऽनङ्गीकारात्, अङ्गीकारे वा धर्मिग्राहकप्रमाणबाधः ।

परसिद्धेन परस्यानिष्टापादनमिति चेत्, न, परस्य प्रमाणतः सिद्धावसिद्धौ च पूर्वोक्तदोषद्वयानतिवृत्तेः ।

अस्त्येवेतरस्यापि कल्पनाकल्पितो धर्मीति चेत्, न, कल्पनायाः सर्वत्राव्याहतप्रसरतयाऽऽश्रयासिद्ध्यादिदोषप्रमोषप्रसङ्गात्, तदेवं परमाणूनामेव द्व्यणुकादिक्रमेण निश्चितनिखिलजगत्कारणतोपपत्तौ न ब्रह्मणस्तत्कारणत्वकल्पनावकाश इति ।

अत्रोच्यते ।

अर्थान्तरत्वादाद्यस्य परस्योपाधिमत्त्वतः ।
अन्यथाभासतुल्यत्वात् प्रतिसाधनरोधनात् ॥ ३८ ॥

यत् तावन्महत्त्वापकर्षतारतम्यभावस्य क्वचिद्विश्रान्तिसाधनं तदर्थान्तरम्, त्रसरेणुष्वेव तस्य विश्रान्तेः ।

न च चाक्षुषद्रव्यत्वान्महत्त्वे सति क्रियावत्त्वाद्वा तेषामपि सावयवत्वानुमानात् तत्र विश्रान्त्यनुपपत्तिः, आद्यस्य योगिचक्षुर्गोचरेषु परमाणुष्वनैकान्तिकत्वात् ।

न चास्मदादीति विशेषणोपादानाददोषः, परमाणूनामिदानीमेव साधनीयतया तद्व्यावृत्त्यर्थं विशेषणस्य वैयर्थ्यात् ।

द्वितीयेऽपि महत्त्वे सतीति विशेषणस्य परमाण्वसिद्धौ वैयर्थ्यात् ।

यत्तु पृथिवीत्वस्य नित्यवृत्तित्वानुमानं तत्र पृथिवीव्यतिरिक्ताधेयत्वमुपाधिः, सत्ताया अपि नित्यवृत्तित्वानङ्गीकारात्, साध्यविकलश्च दृष्टान्तः, अयं घट एतदतिरिक्तानित्यमूर्तातिरिक्तमूर्तान्य इत्यनुमानमाभास-

Digitized by Google

समानम्, अयं घट एतद्व्यतिरिक्तानित्यसावयवान्यो मेयत्वाद्वित्यपि प्रयोगस्य सुवचत्वात्, पृथिवीत्वमनित्यमात्रवृत्ति पृथिवीमात्रवृत्तित्वाद्घटत्ववदिति प्रतिप्रयोगसंभवाच्च ।

न च पृथिवीनिष्ठात्यन्ताभावाप्रतियोगिजात्यन्यत्वमुपाधिः, व्यतिरेकव्याप्त्यसिद्धेः, साध्याव्यापकत्वात् सत्ताद्रव्यत्वयोरपि नित्यद्रव्यवृत्तित्वासंप्रतिपत्तेः ।

न च निरवयवेषु परमाणुषु संयोगसंभवो येनासमवायिकारणसंपत्त्या द्रव्यारम्भः संभाव्येत, परमाणुपक्षीकारासंभवेऽपि संयोगित्वं सावयवमात्रवृत्ति संयोगिमात्रवृत्तित्वाद्घटत्ववदिति प्रयोगोपपत्तेः ।

न च द्रव्यत्वेन संयोगित्वानुमानम्, उभयवादिसिद्धस्य धर्मिणोऽभावात् ।

न च संयोगित्वं निरवयववृत्ति, संयोगिनिष्ठात्यन्ताभावाप्रतियोगित्वान्मेयत्ववदिति सप्रतिसाधनता, संयोगिव्यापिनि सावयवत्वधर्मे परस्यानैकान्त्यात् ।

न च द्वितीयसंयोगानुपपत्तिरदोषः, पार्थिवाप्यपरमाण्वोः संयुक्तयोः सजातीयाण्वन्तरसंयोगाद् द्व्यणुकोत्पत्तौ द्वितीयसंयोगस्यावश्याभ्युपेयत्वात्, कारणाकारणसंयोगेन कार्याकार्यसंयोगस्येष्टत्वाच्च ।

न चावयवी कश्चित् संभवति यः परमाणुभिरारभ्यते ।

न च स्थूलनीलावभासो बाह्ये प्रमेत्यनुमानात् तत्सिद्धिः, यावद्गवयवानामवयव्यारम्भकताभ्युपेयते तेषामेवैकस्थूलनीलावभासगोचरत्वोपपत्तेरर्थान्तरत्वात् ।

न चानेकेषामेकप्रत्ययाविषयत्वानुपपत्तिः, एकप्रावरणाद्यर्थक्रियाहेतुत्वोपाधौ बहूनामपि तन्तूनामेकप्रत्ययविषयत्वोपपत्तेः, दृश्यते हि बहूनामपि वर्णानामेकार्थप्रतिपत्तिहेतुत्वोपाधावेकं पदमिति बुद्धिगोचरता, कम्पाकम्पावरणानावरणरक्तारक्तत्वलक्षणविरुद्धधर्मसंसर्गात्, अवयविन एकत्वानुपपत्तेश्च ।

न चावयवानां तथात्वेऽप्यवयविनोऽतथात्वम्, तथात्वे सति युतसिद्धिप्रसङ्गात् ।

न च युतसिद्धेरनिरुक्तिः, घटपटयोरिव द्रव्ययोः समवायायोग्यत्वस्य युतसिद्धिपदेनाभिलापात् ।

न च युतसिद्धत्वे भागभागिव्यवहारगोचरत्वानुपपत्तिः, पदवाक्यादिवदुपपत्तेः ।

यत्तूक्तम्, नावयविनोऽवयवानां वा रक्तत्वं किंतु महारजनादिद्रव्यस्यैव, तत्संयोगस्याव्याप्यवृत्तित्वादेव रक्तारक्तत्वव्यवहारविभागश्च सिध्यतीति तदसत्, अव्याप्यवृत्तित्वस्यानिरुक्तेः ।

तत् किं प्रदेशवृत्तित्वमुत स्वात्यन्ताभावसमानाधिकरणत्वम् ।

नाद्यः, आरम्भकप्रदेशातिरेकेणावयविनः प्रदेशान्तराभावात्, प्रदेशवृत्तित्वे च संयोगस्यावयविनः सर्वत्र संयोगानधिकरणत्वप्रसङ्गात्, प्रदेशतद्वतोर्भिन्नत्वात् ।

न द्वितीयः, भावस्य स्वात्यन्ताभावसमानाधिकरणत्वे भावाभावविरोधोच्छेदप्रसङ्गात्, प्रतियोगिसमानदेशकालत्वेऽत्यन्ताभावस्यान्योन्याभावत्वप्रसङ्गाच्च ।

न च नेदमिह नेदमिदमिति विलक्षणबुद्धिवेद्यत्वाद्भेदः, असति प्रमेयवैलक्षण्ये बुद्धिवैलक्षण्यासंभवात् ।

न च प्रतियोगिनिष्ठानिष्ठत्वेन विशेषः, तस्याभावप्रकरण एवापाकरणात् ।

किंच अवयवेष्ववयवी व्यासज्य वर्तते यथा द्वित्वादि, किं वा प्रत्येकं परिसमाप्य, यथापराभिमता जातिः ।

आद्ये बहुत्वसंख्यादिवदेव समस्तावयवानामग्रहे न गृह्यते ।

द्वितीये जातिवदेव पट इति प्रत्ययः प्रत्यवयवं स्यात्, तस्यैव च कार्यान्वयत्वात्कूर्चेणापि स्तनकार्यकरणप्रसङ्गः ।

स्तनाद्यवयवविशिष्टस्यैव तत्तत्कार्यकरणत्वान्नातिप्रसङ्ग इत्यपि न वाच्यम्, यादृशसंस्थानेष्ववयवेष्ववयवी समवेत इष्यते तेषामेव तत्तत्कार्यकरणत्वोपपत्तेरवयविनो वैयर्थ्यप्रसङ्गात् ।

किंच अवयविनः प्रत्यवयवं परिसमाप्य वृत्तौ कतिपयावयवनाशेऽपि जातिवदसाववतिष्ठेत ।

समवायिकारणमन्तरेण कथमवस्थानमिति चेत्,तर्हि प्रत्यवयवं परिसमाप्य वृत्तावपि सकलसमवायिकारणसहित एवावतिष्ठेत, तथा च खण्डेऽपि स्तनकार्यकरणप्रसङ्गः पूर्वोक्त एवानुवर्तते, तत्तदवयवविशिष्टस्यैव तत्र तत्र भावात्, प्रत्यवयवं निखिलावयवोपलम्भश्च स्यात्, तदित्थं वृत्तिविकल्पस्य परसिद्धव्याप्त्युपजीवित्वात् स्वसिद्धां परसिद्धां वेति विकल्पोऽनवसरदुस्थ एव ।

न च सर्वस्यास्य प्रकृतस्यावयविनः प्रमाणसिद्धावसिद्धौ च धर्मिग्राहकप्रमाणबाधाश्रयासिद्धिदोषौ, यतः,

प्रमितत्वस्य वैयर्थ्यात् सिद्धस्यैवाश्रयत्वतः ।
देहात्मतावन्नियमाल्लक्षणैश्च व्यवस्थितेः ॥ ३९ ॥

प्रसिद्धतामात्रेणाश्रयत्वोपपत्तौ प्रमाणविशेषणवैयर्थ्यात् ।

न चैवमवयविनः शशविषाणतुल्यता, अपरोक्षप्रतीतिगोचरत्वेनार्थक्रियाकारितया च तद्विलक्षण्यात् ।

न च कल्पनाकोशस्य निरङ्कुशप्रसरतयातिप्रसङ्गः, देहात्मभाववत् प्रतिनियमोपपत्तेः, नहि देहादावात्मभावः कल्प्यत इति घटादावपि कल्प्यते ।

न च कल्पितोऽपि सोऽर्थक्रियाकारीति भवति शुक्तिरजताद्यर्थक्रियाकारि, एवमनभ्युपगमे कथायामप्रवृत्तिरेव स्यात्, उभाभ्यां धर्मिणः प्रमाणसिद्धत्वेनानङ्गीकारात्, तत्रापि प्रतिपक्षस्य प्रमितावप्रमितौ च निषेधानुपपत्तेश्च, उभयवादिसंप्रतिपन्नलक्षणैरेव धर्मिहेतुदृष्टान्ततदाभासव्यवस्थोपपत्तौ सत्यत्वानङ्गीकारेऽप्यतिप्रसङ्गाप्रसङ्गात्, एकस्यानेकवृत्तेरवयविनो निरासेनैव संयोगविभागद्वित्वद्विपृथक्त्वसामान्यादयोऽपि परास्ता वेदितव्याः, संयोगादिस्वरूपानिरुक्तेश्च, तथाहि, किमप्राप्त्योः प्राप्तिः संयोगः अनित्यः संबन्धो वा जन्यत्वविशेषितो वा अव्याप्यवृत्तित्वविशेषितो

वा द्रव्यासमवायिकारणवृत्तिगुणत्वावान्तरजातीयो वा, सर्वथापि नोपपद्यते ।

अन्योन्यसंश्रयापत्तेरतिव्याप्तिप्रसङ्गतः ।
अव्याप्तेरजसंयोगे द्रव्यत्वाद्यनिरूपणात् ॥ ४० ॥

न तावदाद्यः, अप्राप्तिशब्देन संयोगाभावविवक्षायामात्माश्रयत्वात्, संबन्धाभावविवक्षायां तन्तुपटयोः संबन्धेऽतिव्याप्तेः, नहि पटोत्पत्तेः प्राक् पटस्य तन्तुभिः संबन्धोऽस्ति, संबन्धिनः पटस्यैवाभावात् ।

समवायस्य नित्यत्वादसत्यपि संबन्धिनि स भवतीति चेत्, तर्हि पटस्य कारणेषु तन्तुषु सदा समवायात् प्रागपि सत्त्वप्रसङ्गः, तथा तत्त्वादीनामपि कारणानामिति न किंचित् कादाचित्कं स्यात् ।

अथापि कार्यविशेषितः प्राङ्नास्तीति चेत्, तर्ह्यप्राप्त्योः प्राप्तिरिति सोऽपि संयोगः स्यात् ।

अप्राप्तयोः सतोरिति विशेषणाददोष इति चेत्, न, सदसतोः संबन्धासंभवेन सिद्धस्यैव पटस्य समवाय इत्यवश्याभ्युपेयत्वात् पूर्वदोषानतिवृत्तेः, अजसंयोगेऽव्याप्तेश्च ।

स एव नास्तीति चेत्, न, आकाशादिकमात्मना संयुज्यते संयोगित्वाद् घटवदिति प्रमाणसिद्धत्वात् ।

न च मूर्तत्वादिरत्रोपाधिरस्ति, व्यतिरेकासिद्धेः, यदमूर्तं तदात्मना न संयुज्यते यथा रूपमिति व्यतिरेकः, तत्र चासंयोगित्वस्यैवोपाधितया व्यतिरेकासिद्धेः, मूर्तत्वं ह्यवच्छिन्नपरिमाणाधिकरणत्वम्, ततश्च परिमाणाधिकरणत्वेनैव व्याप्तिसिद्धेरवच्छिन्नविशेषणस्य पक्षमात्रव्यावृत्तिप्रयोजनस्य पक्षेतरता ।

अत एव न द्वितीयतृतीयौ. अजसंयोगाव्याप्तेः, क्रियादिजन्यस्वस्वामिसंबन्धादिष्वतिव्याप्तेश्च, तेषां जन्यत्वादनित्यत्वाच्च ।

नैते संबन्धाः, स्वत्वस्वामित्वादीनां द्विष्ठत्वाभावादिति चेत्, तत् किमिदानीं विशेषणविशेष्यभावोऽपि न संबन्धः, तथा च सुव्याहृतम्, विशेषणविशेष्यसंबन्धादभावसमवाययोर्ग्रहणमिति ।

अपिच. एवं समवायोऽपि संबन्धो न स्यात्, घटः पटेन संयुक्तः पटश्च घटेनेति तन्तुषु पटः समवेतः पटे च तन्तवः समवेता इति तुल्यरूपव्यवहाराभावात् ।

तन्तुपटौ संबद्धावित्यस्त्येव व्यवहार इति चेत्, समं समाधानम्, स्वस्वामिनो संबद्धाविति व्यवहारात् ।

नापि चतुर्थः, अजसंयोगाव्याप्तेः, नहि निरवयवेषु नित्येषु सन्ति प्रदेशाः, यानव्याप्यायमेकदेशे वर्तेत ।

नापि पञ्चमः, द्रव्यस्यासमवायिकारणस्य गुणानां जातेश्चानिरुक्तो तद्विशेषितलक्षणासिद्धेः ।

अपिच,

संयोगस्यापृथक्त्वेऽपि व्याहारव्यवहारयोः ।
समवाय इवोत्थानाद्यथा सामान्यकल्पना ॥ ४१ ॥

यथा तत्तत्संबन्धिनिरूपणाधीननिरूपणोऽपि समवायस्तत्र तत्रैको नित्यश्च, संयोगोऽपि तथा किं न स्यात्, तद्वद्व्याहारव्यवहारयोः समवायवदुपपत्तेः,तेन जातेरसंभवाद्गुणत्वावान्तरजातीय इतीदं लक्षणमेव न संभवति ।

नन्वन्यतरकर्मणोभयकर्मणा संयोगेन वा संयोगस्य जन्म, तथा च नित्यात् कारणत्रितयजन्यत्वं व्यावर्तमानं तस्य संयोगत्वमपि व्यावर्तयति, तत् कथमजसंयोगसिद्धिरिति चेत्, हन्त तर्हि कारणबहुत्वात् कारणमहत्त्वात् प्रचयविशेषाच्च महदिति महत्त्वस्य कारणत्रितयजन्यत्वेन व्याप्तत्वादात्मादिषु तद्व्यावर्तमानं महत्त्वमपि व्यावर्तयेत्, तथा संयोगे संबन्धत्वमनित्यत्वेन व्याप्तमिति समवायस्यापि संबन्धस्य नित्यता न स्यात्, ज्ञानस्य चास्मदादिषु शरीरेन्द्रियादिसाधनाधीनत्वादीश्वरे तद्विरहिणि तद् व्यावर्ततेति भवतैव स्वसमयः सकलोऽपि व्याकुलीकृतः स्यात् ।

अथ कारणनिवृत्त्या कार्यस्य निवृत्तिर्न नित्यस्याव्यापकनिवृत्तावव्याप्यनिवृत्तेरयोगादित्युच्येत, तदितोऽपि दीयतां दृष्टिः, तस्माच्च संयोगः संभवी ।

नापि विभागः, स हि प्राप्तिपूर्विका अप्राप्तिः किं वा संयोगविरोधी गुणः अथवा संयोगानृत्त्यनित्यमात्रवृत्तिद्विवृत्तिवृत्तिगुणत्वावान्तरजातीयः, सर्वथापि न घटते ।

आत्माश्रयादतिव्याप्तेरयोगाद्व्यभिचारतः ।
विशेषणाप्रसिद्धेश्च न विभागः प्रसिध्यति ॥ ४२ ॥

तत्र न तावदाद्यः, विकल्पासहत्वात्, अप्राप्तिशब्देन विभागोऽभिलाप्यते किं वा संबन्धाभावः, विभागाभिधाने स्वात्माश्रयत्वम्, उत्तरत्र संयोगप्रध्वंसेऽतिव्याप्तिः ।

न द्वितीयः, विरोधिशब्देन सहानवस्थाभिधाने लक्षणस्यासंभवित्वात्, वध्यघातकयोरेकाश्रयत्वस्य स्वेनैवाभ्युपगमात्, निवर्तकत्वविवक्षायां च तन्निवर्तकादृष्टेश्वरेच्छादावतिव्याप्तिः ।

समानाधिकरणो निवर्तको गुणो विवक्षित इति चेत्, न, आत्ममनःसंयोगनिवर्तकादृष्टेऽतिव्याप्तेः ।

कर्मजन्यत्वे सतीति विशेषणाददोष इति चेत्, न, तस्यापि तीर्थयात्रादिकर्मजन्यत्वात् ।

कर्मसमानाधिकरणः संयोगविरोधी गुणो विभाग इति चेत्, न, संयोगविभागयोरसिद्धौ कर्मणोऽप्यसिद्धेः, संयोगविभागासमवायि कारणं कर्मेति कर्मलक्षणाङ्गीकारात्, संयोगस्य चासिद्धौ तद्विरोधित्वस्य चाप्यसिद्धेः, कर्मण एव च पूर्वसंयोगनाशकत्वोपपत्तौ विभागाभ्युपगमवैयर्थ्याच्च ।

कथं तज्जनकस्य तन्निवर्तकत्वमिति चेत्, मैवम्, प्राचीनकर्मजनितसंयोगस्योत्तरकर्मणा निवृत्तेः ।

नाङ्गुलिकर्मणस्तरुसंयोगनाशकत्वम्, व्यधिकरणत्वात्, व्यधिकरणस्य निवर्तकतायामतिप्रसङ्गादिति चेत्, न, स्वाश्रयाश्रितसंयोगस्यैव नाशकत्वेनातिप्रसङ्गाभावात् ।

विरोधिनः समानाधिकरणस्यैव नाशकत्वोपपत्तावसति बाधके यावत्संयोगवृत्तिसामानाधिकरण्यस्य संकोचोऽनुपपन्न इति चेत्, न, उभयवादिसिद्धकर्मण एवान्वयव्यतिरेकवतस्तन्नाशकत्वोपपत्तौ गुणान्तरकल्पनागौरवस्यैव बाधकत्वात्।

न च विभक्तप्रत्ययादेव तत्सिद्धौ कल्पनैव नास्तीति वाच्यम्, हिमवद्विन्ध्ययोरिव संयोगाभावमात्रादेव विभक्तप्रत्ययोपपत्तेः।

(शेषमग्रे)

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम्।

१ इष्टप्रकरणम्।

(Continued from page 658. Vol. V.)

५०० विपरिहरन्ति हवींषि स्रुवश्च। पुरोडाशं धानानामग्रेण नीत्वोत्तरतः सादयति। करम्भं धानानां पश्चान्नीत्वा दक्षिणतः सादयति। धाना यथास्थिता भवन्ति। जुहूमुपभृतोऽग्रेण नीत्वोत्तरतः सादयति। ध्रुवामुपभृतः पश्चान्नीत्वा दक्षिणतः सादयति। उपभृत्तत्रैव तिष्ठति। वेदिं परिश्रित्योत्तरतो द्वारं कृत्वा परिक्रामिणमाह। अनेनोदकुम्भेन सन्ततया धारया त्रिरपसलैः परिषिञ्चन्परी३हीति। आग्नीध्रः प्राचीनावीतं कृत्वा कुम्भयोरेकमादायापसलैर्वेदिं त्रिः परिषिञ्चन्पर्येति। कुम्भं यथास्थानं निधाय यज्ञोपवीतं कृत्वा पुनर्वेदिं त्रिः प्रदक्षिणं पर्येति। पुनः प्राचीनावीत्यध्वर्युर्जुह्वामुपस्तीर्य सोमाय पितृमतेऽनुस्वा३धेत्युपोत्तमं प्लुतं कृत्वा प्रेष्यति। पूर्वार्धात्पुरोडाशस्यावद्यति। तथा धानानामवद्यति। धानोपस्थानमन्त्रे

धानापरपदानां बहुवचनान्तता । अभिमर्शनमन्त्रे ऽपि तथैव । पूर्वार्धात्करम्भस्यावद्यति । अथैतेषां त्रयाणां सकृदवदानमभिघार्य क्रमेण प्रत्यनक्ति । तत्र मन्त्रे धानापरपदानां बहुवचनान्तता । अत्याक्रम्योत्तरतो दक्षिणामुखस्तिष्ठन्नो३ स्वा३धेत्याश्रावयति । आग्नीध्रो दक्षिणतस्तिष्ठन्नस्तु स्वा३धेति प्रत्याश्रावयति । याज्याप्रैषः सोमं पितृमन्तं स्वधा कुर्विति । स्वा३धा नम इति होत्रा वषट्कृते जुहोति । सोमस्य पितृमतो ऽहं देवयज्ययान्नादो भूयासमिति यजमानो ऽनुमन्त्रयते । अध्वर्युः पितृभ्यो बर्हिषद्भ्यो धानानां मध्यार्धादवद्यति । तथा करम्भस्य ततस्तथैव पुरोडाशस्य । वृत्रहेति यजमानस्यानुमन्त्रणे विशेषः । पितृभ्यो ऽग्निष्वात्तेभ्यो ऽपरार्धात्करम्भस्यावद्यति । ततस्तथैव पुरोडाशस्य । तथैव धानानाम् । वृत्रहेत्यनुमन्त्रणं यजमानस्य । सर्वेषान्नाद इत्यनुमन्त्रणमित्यन्ये । स्विष्टकृदर्थे पुरोडाशस्य दक्षिणार्धादवद्यति । तथा धानानां करम्भस्य च । द्विरभिघारयति न प्रत्यनक्ति । भर्जनमेक्षणमिषुशलाकां चादायोदङ्ङत्याक्रामति । अग्निं कव्यवाहनं स्विष्टकृतं स्वधा कुरु इति स्विष्टकृद्याज्याप्रैषः । पूर्वा आहुतीरतिहाय दक्षिणार्धपूर्वार्धे जुहोति । यजमानो ऽग्नये कव्यवाहनाय स्विष्टकृत इदं न मम । अग्नेः कव्यवाहनस्य स्विष्टकृतो ऽहं देवयज्ययायुष्मान्यज्ञेन प्रतिष्ठां गमेयमित्याह । अध्वर्युर्भर्जनमेक्षणमिषुशलाकां चानुप्रहृत्य संस्रावेणाभिजुहोति । संचालननिनयनान्ते सर्वे यज्ञोपवीतिनो भवन्ति । पूर्ववद्द्विःपरिक्रामन्ति । पुरोडाशमाहृत्य दक्षिणतः सादयति । उत्तरतः करम्भम् । दक्षिणतो जुहूम् । उत्तरतो ध्रुवाम् । ब्रह्मयजमानौ

दक्षिणत उपविशत: । उत्तरतो ऽध्वर्युराग्नीध्रश्च । चतुर्थी
करणं नास्ति । इडां यजमानपञ्चमा जिघ्रेण भक्षयित्वा
बर्हिषि प्रक्षिपन्ति । हविरुच्छिष्टमुद्वास्य प्राचीनावीतानि
कुर्वते । यजमानः पुरोडाशं धानाः करम्भं च पात्र्यां
निधाय मिश्रयित्वा त्रीन् पिण्डान् कृत्वा दक्षिणश्रोणिदक्षिणां-
सोत्तरांसेषु अपसव्यमुद्धृत्यावोक्ष्य तेषु पर्योषमान्निधायाद्भिर्मा-
र्जयति । मार्जयन्तां पितरः । मार्जयन्तां पितामहाः । मार्ज-
यन्तां प्रपितामहा इति मन्त्रैः क्रमेण । तेषु क्रमेणैकैकं पिण्डं
ददाति । एतत्ते ततामुकशर्मन्ये च त्वामन्विति प्रथमम् । त-
तपदस्थाने पितामह पदघटितेन द्वितीयम् । प्रपितामहपद-
घटितेन तृतीयम् । एषा युष्माकमियमस्माकमिमां वयं जीवा-
जीवन्तो ऽनुसंचरन्तो भूयास्मेतिमंत्रेणोत्तरस्यां श्रोण्यां लेपं निमा-
र्ष्टि । इदं प्रतिपिण्डं सर्वान्ते वा । अत्र पितरो यथाभाग-
मन्दध्वमिति वदति । सर्वे गार्हपत्याहवनीययोरन्तरेणोदञ्चो-
निष्क्रम्य यज्ञोपवीतानि कृत्वाहवनीयमुपतिष्ठन्ते सुसंदृशमित्यृ-
चा प्रणवान्तया । स च प्रणवो यावदुच्छ्वासप्रतिबन्धसामर्थ्यं
स्यात्तावत्प्रयोक्तव्यः । अक्षन्नमीमदन्तेत्यृचा तथैव गार्हपत्य-
मुपतिष्ठन्ते । प्राचीनावीतानि कृत्वा दक्षिणाग्निमभिप्रपद्यन्ते ।
अत्र पितरो ऽमीमदन्तेत्यादिमन्त्रेण । तं प्राप्योपतिष्ठन्ते परेतन
पितर इत्यृचा प्रणवान्तया पूर्ववत् । अथाध्वर्युः पूर्ववद्वनेनो-
दकरम्भेणेत्यादिप्रैषमाह । तत आग्नीध्रः परिषेचनादिपुनः पर्यं-
तीत्यन्तं पूर्ववत्करोति । यजमानो मार्जयन्तां पितर इत्यादि-
मन्त्रैः पूर्ववन्मार्जयति । पितरस्तृप्यन्त्विति मन्त्रेण पिण्डसमीपे
कशिपूपबर्हणे निदधाति । आञ्जतां पितर इत्यादिमन्त्रैः

प्रत्येकं पिण्डदानक्रमेण पिण्डानाञ्जनेनाङ्क्ते । अभ्यञ्जतां पितर इत्यादिमन्त्रैः पिण्डांस्तथैवाभ्यङ्क्ते । एतानि वः पितरो वासांसीत्यादिभिस्त्रिभिर्मन्त्रैः प्रत्येकं पिण्डदानक्रमेण विभज्य त्रेधा कृतां दशां वस्त्रस्थाने ददाति । आञ्जनादिषु द्वितीयतृतीयमन्त्रयोः पितृपदस्थाने पितामहप्रपितामहपदे भवतः । ततः षड्भिर्नमस्कारैरुपतिष्ठते । नमो वः पितरो रसाय पितरो नमो वो य एतस्मिन् लोके स्थेत्यादयः षण्मन्त्राः षण्नमस्कारा इत्युच्यन्ते ॥

५०८ वीरं मे दत्तेत्यादिर्मन्त्रस्तस्य द्वितीयतृतीयपादयोर्मध्ये पितर इत्यस्य पितामहा इत्यस्य प्रपितामहा इत्यूहपदस्य क्रमेण प्रवेशे मन्त्रत्रयं संपद्यते । तेन मन्त्रत्रयेण वीरं याचते । उत्तिष्ठत पितरः प्रेतेत्यृचा पितॄनुत्थापयति । यन्तु पितरो यथालोकमित्यृचा पितॄन्मनसा स्वस्थाने निवेशयति । मनो ऽन्वाहुवामह इत्यृक्त्रयेण पितॄननुगतं मन आहूयते । ततः पिण्डान् पर्वशृन्तैः सहाग्नावनुप्रहरति परिश्रयणमपनीय यज्ञोपवीतिनः सर्वे भवन्ति । देवो यज यजेत्यनुयाजप्रैषे विशेषः । इषिता दैव्याः पित्र्या होतार इति सूक्तवाकप्रैषे विशेषः । प्रस्तरप्रहरणानुमन्त्रणे देवतामित्यस्यानन्तरं पितॄनित्यस्य प्रक्षेपः । अत्र ऋत्विङ्नामग्रहणनिषेधात्प्रकृतिप्राप्तस्याग्नीदिति संबोधनस्याभावात्केवलं तृणं प्रदर्शयन्नाग्नीध्रमीक्षते । परिधेरेकत्वात्प्राकृतपरिधिद्वयप्रहरणमन्त्रे इतमित्यस्य स्थाने इहीत्येकवचनम् । प्रहरणानुमन्त्रणे देवतास्वित्यस्यानन्तरं पितृष्विति प्रयोक्तव्यम् । पत्नीसंयाजानां निषेधः । दक्षिणाग्नौ प्रायश्चि-

Digitized by Google

न्तफलीकरणहोमौ हुत्वा ध्रुवामाप्याययति । यजमानः । स्वभागं जिघ्रेण भक्षयति । अध्वर्युः प्रायश्चित्तानि हुत्वा समिष्टयजुर्जुहोति । प्रणीतानिनयनान्ते सर्वं ब्राह्मणतर्पणान्तं याजमानं कर्म । तत्राशीर्मन्त्रेषु नामयज्ञवर्णनिषेधाद्दाशिषमाशासे तन्तवे इत्येव ब्रूयात् । नात्र व्रतविसर्गः । प्राचीनावीतानि कृत्वा करिपूपब्रह्माणादीनि द्वे द्वे उद्वासयन्ति । यज्ञोपवीतिनः प्रजापते न त्वदित्यृचा गार्हपत्यमुपतिष्ठन्ते । यदन्तरिक्षं पृथिवीमित्यृचं जपन्ति । सर्वाग्निप्रणयने तु यथास्थानमग्निमानयन्ति । एतावत्सपरिकरं कर्म साकमेधपर्वान्तर्गतं पितृदेवताकत्वान्महापितृयज्ञः पित्र्येष्टिरिति चोच्यते ॥

४०६ एतदनन्तरं प्रतिप्रस्थाता त्र्यम्बकाननभिघारितान्पुरोडाशानुद्वास्य शरावे प्रक्षिप्य कपालान्युद्वासयति । अध्वर्युर्नीललोहिते सूत्रे तथा त्र्ययाणां पलाशपर्णानामन्तिमं पर्णं तथा ग्रामसमीपस्थद्विजगृहाद्दक्षिणाग्नेर्वा एकमुल्मुकं दर्भानुदपात्रं चादाय । यावन्तो गृह्याः स्मेत्यादिमन्त्रेण सर्वे गार्हपत्यमुपतिष्ठन्ते । उदङ्मुखाः किंचित्स्वगृहाद्बहिर्गत्वा चतुष्पथं प्राप्य तत्रोपलिप्योल्मुकं समाधाय ज्वलयित्वा परिस्तीर्यान्तिमे पलाशपर्णे सर्वेषां त्र्यम्बकाणामुत्तरार्धात्सकृत्सकृदवदायोपस्तरणाभिघारणे एक एव रुद्रो न द्वितीयायेत्यादिमन्त्रेण तिष्ठन् जुहोति । रुद्रायाम्बिकायाश्चेदं न ममेति यजमानस्य त्यागः । अन्तिमपर्णं द्वेष्यगोष्ठे आखुवटे* वा न्यस्यति । त्र्यम्बकाणामेकैकं प्रतिपुरुषं प्रयच्छति । द्वौ यजमानाय । सर्वे दक्षिणानूरूनुप-

* आखुवटो मूषकबिलम् ।

घ्राणास्त्र्यम्बकं यजामह इत्यृचाग्निं प्रदक्षिणं परियन्ति । उत्तरतः स्थित्वा भगाय स्वेति मन्त्रेण पुरोडाशान् हस्ताभ्यामूर्ध्वं गृह्णन्ति । एवं प्रदक्षिणागमनादि त्रिः कुर्वन्ति । पतिकामा कन्या तु सव्यमूरुमपघ्नानाऽपसव्यं पर्येति । पुष्टिवर्धनपदस्थाने पतिवेदनपदं तथा चतुर्थपादस्थाने इतो मुक्षीय मा पतेरिति च विशेषः । ततोऽध्वर्युः सर्वान्पुरोडाशान्प्रजया त्वा पशुभिरित्यादिमन्त्रेण यजमानस्याञ्जलावावपति । अनेनैव मन्त्रेण यजमानः पत्न्यञ्जलावावपति । स्त्री भगकामाय । दुहितुरञ्जलौ-भगेन त्वा संसृजामीत्यादिमन्त्रेणावपति । अध्वर्युः सर्वान् पुरोडाशान् गृहीत्वा तृणनिर्मिते मूते प्रक्षिप्य नीललोहिताभ्यां सूत्राभ्यां त्रिविधं बध्वा तत्प्रदेश एव शुष्के स्थाणावर्धच्छिन्ने वृक्षस्य शुष्कशाखायां वा मूतं तूष्णीं बध्नाति । सर्वे मूतं प्रेक्षमाणादेवमुपतिष्ठन्ते एष ते रुद्रभाग इत्यादिमन्त्रेण प्रणवान्तेन । यावदुच्छ्वासं प्रणवोच्चारणम् । आत्मनो मूतस्य च मध्ये दीर्घधाराकूपेणोदकं निनीयोदपात्रं तत्रैव परास्यानवेक्षमाणा आयान्ति । हस्तपादान्प्रक्षाल्य यथागतमागत्य महाहविः प्रणीतेष्वेवाग्निषु अन्वाधानादिकं कृत्वा आदित्यं चरुं निर्वपति । सप्तदश सामिधेन्यः । अꣳहसो मुच्येयमिति यजमानस्यानुमन्त्रणम् । अन्वाहार्यमासाद्य तिस्रो गा दक्षिणां ददाति । इदानीं व्रतविसर्गः इयं प्रसिद्धेष्टिरादित्येष्टिरिति चोच्यते ॥

५१० निर्वनादि वैश्वदेववत् । मन्त्रविशेषः । य इमां महीं पृथिवीमित्यादीनि षड्वाक्यानि पठित्वाऽग्निस्तिग्मेनेत्यादिवाक्यानि पूर्ववत् । इदं सर्वं तृतीयं साकमेधपर्वेत्युच्यते ॥

Digitized by Google

॥११ अथ शुनासीरीयनामकं चतुर्थं पर्व । यजमानः शुनासीरीयहविर्भिर्यक्ष्य इति संकल्पयति । आग्नेयो ऽष्टाकपालः पुरोडाशः । सौम्यश्चरुः । सावित्रो द्वादशकपालः पुरोडाशः । सारस्वतश्चरुः । पौष्णश्चरुः ऐन्द्राग्नो द्वादश कपालः पुरोडाशः । वैश्वदेवश्चरुः । इन्द्राय शुनासीराय द्वादशकपालः पुरोडाशः । वायव्यं पयः । सौर्य एककपालः पुरोडाशः । सविता सूर्यश्चोपांशु । शाखाहरणं कृत्वा वैश्वदेववदिध्माबर्हिः सन्नहनादि करोति । न सायंदोहः । पूर्वेद्युरन्वाधानम् । पात्रासादने विशेषः । पञ्चचत्वारिंशत्कपालानि पञ्च चरुस्थाल्यस्तावन्ति मेक्षणानि च । तन्दुलप्रक्षालननिनयनान्ते प्रातर्दोहः । तत्र प्राकृतमन्त्रेषु प्राकृतदेवतास्थाने वायुपदं बोध्यम् । इन्द्राय शुनासीराय कपालोपधानानन्तरं पयःस्थालीमुपधाय तस्यां प्रातर्दोहमानीय मेक्षणेनालोड्य श्रपयति । तदुत्तरतः सूर्यायैकं कपालमुपदधाति । अग्नीदितस्त्रिर्हरेत्यन्तं वैश्वदेववत् । उत्तरवेदेर्विकल्पः । तत्पक्षे ऽथ याचति स्फ्यमुदपात्रमित्यादि महाहविर्वत् । पञ्चविधं बर्हिः तदभावपक्षे ब्रह्मन्नुत्तरमित्यादि वैश्वदेववद्वाजिनवर्जम् । इन्द्रियाव्यन्नाद इति शुनासीरीययागानुमन्त्रणम् रत्नभागिति वायोः । सुदृशीक इति सूर्यस्य । अध्वर्युरेककपालं सकृद्गृहीतेनाभिजुहोति संᳫसर्पो ऽसीत्यादिमन्त्रेण । यजमानः सᳫसर्पायाᳫहस्पत्यायेदं न ममेति त्यक्त्वान्वाहार्यमासाद्य द्वादशगवं सीरं प्रथमजं वत्सं वा दक्षिणां ददाति । प्रतिग्रहमन्त्रे ऋत्विजां ब्रह्मणे द्वादशगवं सीरमिति विशेषः । निवर्तनादि वैश्वदेववत् । मन्त्रे विशेषः । एकं मासमुदसृजदित्यादीनि द्वादशवाक्यानि पठित्वा ऽग्नि-

Digitized by Google

स्तिग्मेनेत्यादि वैश्वदेववत् । अनुवत्सरीणाऽऽस्वस्तिमाशास्ते इति विशेषः ॥ इदं चतुर्थं शुनासीरीयपर्वेत्युच्यते ॥

५१२ अथ सवनेष्टिः । आग्नेयो ऽष्टाकपालः पुरोडाशः । ऐन्द्राग्न एकादशकपालः । वैश्वदेवो द्वादशकपालः । सर्वं प्रकृतिवत् ॥ इयं सवनेष्टिरित्युच्यते ॥

५१३ काम्या इष्टीः करिष्यमाणो यजमानः पूर्वं संवत्सरं द्वादशाहं वा जपादिभिः पूतः पयोव्रती ब्रह्मचारी भवति । ऋत्विजो ऽपि पयोव्रतरहितनियमान् कुर्वन्ति । एते धर्माः काम्येष्टिप्राङ्नियमा इत्युच्यन्ते ॥

५१४ यासां कालविशेषो नोपदिष्टस्तासां काम्यानां पर्वणि शुक्लपक्षे देवनक्षत्रे प्रयोगः । नैमित्तिकेष्टीनां तु निमित्तानन्तरमेव । यजमानः प्रजाकामः प्रजाकामेष्ट्यायक्ष्ये इति संकल्पयति । सद्यस्काला इयमिष्टिः । ऐन्द्राग्नो व्रीहिमय एकादश कपालः पुरोडाशः । सप्तदशसामिधेन्यः । पौर्णमासतन्त्रम् । अध्वर्युः पाणिसंमर्शनानन्तरं गार्हपत्ये स्मार्तवदाज्यं संस्कृत्याहवनीये चतुर्होतृकूष्माण्डसारस्वतहोमं करोति । प्रधानमुपांशु । अन्वाहार्यमासाद्य वासो दक्षिणां ददाति । पुनरालम्भवर्जं सर्वं प्रकृतिवत् । वार्षघ्रावाज्यभागौ शुक्लपक्षे । वृधन्वन्तावपरपक्षे । अथ वा आग्नीषोमविकारे वार्षघ्नौ । ऐन्द्रसान्नाय्यविकारे तु वृधन्वन्तौ इत्यापस्तम्बसूत्रम् । उभावामिन्द्राग्नी आहुवध्या इति प्रधानस्य पुरोनुवाक्या । अश्रवं हि भूरि दावत्तरावामिति याज्या । अबोध्यग्निः समिधा जनानामिति स्विष्टकृतो ऽनुवाक्या । अवोचाम कवये मेध्यायेति याज्या । अन्यत्सर्वं होत्रं प्रकृतिवत् । इयं प्रजाकामेष्टिरित्युच्यते (शेषमग्रे)

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 651. VOL. V.)

कपि चलने ॥ कम्पते । चकम्पे । कम्पितेत्यादि । कम्पयति । निगरणचलनेनेति नित्यं परस्मैपदम् । कम्प्रः । नमिकम्पिस्म्यजसकमहिंसदीपो र इति ताच्छीलादौ रः । वा सरूपविधिना अनुदात्तेत इति वा चलनशब्देति वा युचि कम्पनः । ननु पदेरनुदात्तेत्त्वादेव युचि सिद्धे जुचङ्क्रम्यादिना पुनर्युज्विधानेन ताच्छीलिकेषु वासरूपविधिर्नेति ज्ञापितम् । अन्यथा लषपतपदेत्युकञा अनुदात्तेल्लक्षणयुचः समावेशे सिद्धे पुनस्तद्विधानमनर्थकं स्यात् । नैतदस्ति । सूददीपेतियुज्निषेधादस्यानित्यत्वज्ञापनात्, नित्ये हि नमिकम्पीत्यादिना विशेषविहितेन रप्रत्ययेन युचो बाधस्य सिद्धत्वात् किं तन्निषेधेन । विकपितः । विकृतशरीर इत्यर्थः । लगिकम्प्योरुपतापशरीरयोरिति नलोपः । कपिः । कटिकम्प्योर्नलोपश्चेतीन्प्रत्यये नलोपः । कपेर्भावकर्मणि कापेयम् । 'कपिज्ञात्योर्ढगिति' ढक् । वृषो धर्मस्तस्याकपिः अकम्पिता, वृषाकपिः विष्णुः रुद्रश्च । वृषाकपायी । श्री गौरी च । वृषाकपीत्यादिना पुंयोगलक्षणे ङीपि अन्त्यस्यैकारः । कपिलः । कपेश्चेतीलच्प्रत्ययः बाहुलकादत एव निर्देशाद्वा नलोपः । कबलः कम्बलः, बाहुलकात् कलप्रत्ययः पकारस्य बकारः पक्षे नलोपश्च । कम्बल्यमूर्णापलशतम् । कम्बलाय हितमिति विषये 'कम्बलाच्च संज्ञाया'मिति यत् । द्वाभ्यां कम्बल्याभ्यां क्रीता शाटी द्विकम्बल्या । 'तद्धितार्थोत्तरपदसमाहारे चे'ति तद्धितार्थे समासे 'द्विगुश्चे'ति द्विगुत्वे 'प्राग्वतेष्ठञि'ति प्राग्वतीयेष्वर्थेषु विहितस्य ठञोऽ'ध्यर्द्धपूर्वद्विगोर्लुगसंज्ञाया'मिति लुक् । अत्र 'द्विगो' रिति प्राप्तस्य ङीपो'ऽपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि' इति निषेधः । अपरिमाणान्तात्परिमाणत्वेपि बिस्ताद्यन्ताच्च द्विगोस्तद्धितलुकि सति ङीब्नेति सूत्रार्थः । पाण्डुकम्बलेन परिवृतो रथः पाण्डुकम्बली । 'पाण्डुकम्बलादिनि'रिति पाण्डुकम्बलशब्दात्तृतीयान्तात् परिवृतो रथ इत्यर्थे इनिः । येन तत्परिवृतं तत्तस्यास्ति इति मत्वर्थीयेन सिद्धे इदं वचनं ठनो निवृत्त्यर्थम् ॥ १७० ॥

Digitized by Google

रबि लबि अबि शब्दे ॥ रम्बते । ररम्बे । रम्बिता । रिरम्बिषते । रार-म्ब्यते । रारम्बीति । रारम्प्र । अरारन् । हे इति रम्बतइति हेरम्बः । लम्बत-इत्यादि । अम्बते । आनम्बे । अम्बिबिषते । अम्बयति । आम्बिबत् । त्रीण्यम्ब-कानि चक्षूंषि अस्येति त्र्यम्बकः, त्रयाणां लोकानामम्बः पितेत्यागमविदः । द्यौर्भूमिरापस्तिस्रोऽम्बा अस्य इति भारतम् । अम्बः त्रयः शब्दा अकारो-कारमकाराः प्रतिपादका अस्येति भट्टभास्करः, स एव सृष्टिस्थितिसंहारविष-यास्तिस्रो वा शक्तयोऽस्येति च । अम्बरीषम् । भ्राष्टमम्बरीषमिति निपात्यते । अम्बा । हे अम्ब । अम्बार्थनद्योरिति ह्रस्वः सम्बुद्धौ ॥ ३७३ ॥

लबि अवस्रंसने च ॥ नञि लम्बेर्नलोपश्चेति नञ्युपपदे उकारप्र-त्ययो नलोपश्च णिद्वद्भावात् वृद्धिश्च ॥

कबृ वर्णे ॥ कबते । चकबे । कबिता । चिकबिषते । चाकब्यते । चाक-प्ति । कावयति । अचकाबत् । कबरः । बाहुलकादरः । कबरी । जानपदे-त्यादीना केशवेशे ङीष्, अन्यत्र कबरा । कर्बुरः । बाहुलकादुरः प्रत्ययो रे-फोपजनश्च ॥ ३७४ ॥

क्लीबृ अधार्ष्ट्ये ॥ क्लीबते । चिक्लीबे । क्लीबिता । क्लीबयति । अचिक्ली-बत् । क्लीब इवाचरति क्लीबते । आचारेऽवगल्भक्लीबेति क्विप्, तत्सन्नियोगेन चैषामकारस्यानुदात्तता ऽनुनासिकताप्रतिज्ञानादनुदात्तेत्त्वात्तङिति होडतौ प्रतिपादितम् । क्विब्भावे 'उपमानादाचार'इति क्यङि क्लीबायते ॥ ३७५ ॥

क्षीबृ मदे ॥ क्षीबते । चिक्षीबे । क्षीबिता । क्षीबयति । अचिक्षी-बत् । क्षीबः । अनुपसर्गात्फुल्लक्षीबेति निष्ठायामिड्भावस्तलोपश्च, इच्छ-ब्दलोपो वा निपात्यते ॥ ३७६ ॥

शीभृ कत्थने ॥ शीभते । शिशीभे । शीभिता । शिशीभिषते । शेशी-भ्यते । शेशीब्धि । झषस्तथोर्धोऽध इति तकारस्य धकारे 'झलां जश् झशी'ति भकारस्य बकारः । शीभयति । अशिशीभत् । शीभरः । बाहुलकादरः ॥ ३७७ ॥

चीभृ च । चीभतइत्यादि ॥ ३७८ ॥

रेभृ शब्दे ॥ रेभते । अरेभतेत्यादि । विरिब्धः । क्षुब्धस्वान्तेत्यादिना स्वरे निष्ठायामिड्भावे उपधाह्रस्वत्वं च निपात्यते । अन्यत्र रेभितः ।

Digitized by Google

अभिरभी च क्क चित्पठ्येते। अम्भते रम्भतइत्यादि। अम्भः। असुन्। अम्भसो-पत्यं आम्भिः। 'अम्भसः सलोपश्चे'ति बाह्वादिपाठादिञि सलोपः॥ ३७९॥

ष्टभि स्कभि प्रतिबन्धे॥ स्तम्भते। तस्तम्भे। लयः शेषः। स्तम्भिता। तिस्तम्भिषते। स्तौतिण्योरेवेत्यषत्वम्। षोपदेशफलं ण्यन्तात्सनि तिष्टम्भयिषतीति षत्वम्। उत्तम्भते। उत्तम्भिता। उत्तम्भितः। 'उदः स्थास्तम्भोः पूर्वस्येति' उदः परयोरनयोः सकारस्थाने पूर्वस्य सवर्णो इति तकारः। स्तम्भेरित्यादावुपसर्गात्परस्य सत्वविधौ स्तम्भुस्तुम्भ्विति प्रति-पदोक्तस्यैव ग्रहणं स्तम्भेः, न त्वस्य लाक्षणिकस्येति विस्तम्भइत्यादौ न षत्वम्। उदः स्थास्तम्भोरित्यत्र तु नायं न्यायः यतस्तम्भुरूपमुभयोरपि लाक्षणिकम्। अत्र स्वामिमैत्रेयौ ष्टभेष्टकारमेकीयमतेनोपदेशिकमाहतुः। तत्र ष्टम्भते विष्टम्भतइत्यादौ सर्वत्र ष्टुत्वेन षत्वे लिडादावभ्यासे टकारस्य शेषे तष्टम्भइत्यादि भवति। स्कम्भते। चस्कम्भे। स्कम्भितः। स्कभितः। यसितस्कभितेति निपातनं तु छन्दसि॥ 'वेः स्कभ्नातेर्नित्य-मि'ति षत्वं श्नानिर्देशात् सौत्रस्यैव नास्येति विस्कम्भतइति भवति। स्तम्भु स्तुम्भु स्कम्भु स्कुम्भु इति सौत्राश्चत्वारो धातवस्ते च 'स्तम्भुस्तुम्भु-स्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्चे'ति वा श्नाश्नुविकरणा इति तत्रोदाहियते। स्तोभतइत्यर्थे स्तम्भार्थे॥ ३८१॥

जभी जृभि गात्रविनामे॥ जभीत्येके, जञ्भमिति मैत्रेयः। अयमेव पाठः प्रायेण वृत्तिकारस्य संमतः। यदाह। 'रधिजभोरचि'इत्यत्र आज-ग्रहणप्रत्युदाहरणे जञ्भमिति अनीदित्त्वे इटा भाञ्भमिति कथमेवमुदाहरे-त्। जम्भते। जजम्भे। जम्भिता। जम्भिष्यते। जम्भताम्। अजम्भत। जम्भेत। जम्भिषीष्ट। अजम्भिष्ट। अजम्भिष्यत। जिजम्भिषते। 'रधिजभोरचि' इति अजादौ प्रत्यये नुम्। जञ्जभ्यते। 'लुपसदचरजपजभदहदशगृभ्यो भाव-गर्हायामि'ति यङ्। भावो धात्वर्थः तस्य गर्हा भावगर्हा। अयं च यङ् पूर्वसू-त्राविन्यग्रहणानुवृत्त्या तक्रकौण्डिन्यन्यायेन वा क्रियासमभिहारयङो बाधक इति भाष्यादौ स्थितम्। 'जपजभदहदशभञ्जपशां चे'ति अभ्यासस्य यङि यङ्लुकि च नुगागमः। इदं च नुग्ग्रहणं अनुस्वारोपलक्षणार्थं 'नुगतोनुनासि-

Digitized by Google

कान्तस्ये'ति अत्रान्तग्रहणात् तद्धि तदन्तविधिनाप्यनुनासिकान्तस्य धातोरभ्यासस्य नुगि सिद्धे तदन्तस्य यत्कार्यं तदन्यथा स्यादिति । न च नुक्रोन्त्यत्वे किं चित्कार्यमस्ति अस्ति चानुस्वारस्य 'वा पदान्तस्ये'ति परसवर्णविकल्पः । कर्तुः क्यङ् सेतिवदनुनासिकेत्यविभक्तिको निर्देशः । तेन जञ्जभ्यते इत्यत्रानुस्वारस्यापि पक्षे श्रवणं भवति । जञ्जभीति । जञ्जब्धि जञ्जब्धः । जञ्जम्भतीत्यादि । 'रधिजभोरची'त्यत्र प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणमिति अजादौ नुमागमः । जम्भयति । अजजम्भत् । जम्भो दन्तविशेषो ऽभ्यवहार्ये च शोभनो जम्भोऽस्यास्तीति सुजम्भा ॥ 'जम्भा सुहरिततृणसोमेभ्य' इति स्वाद्यादेर्जम्भात् बहुव्रीहेरनिचि 'सर्वनामस्थाने चासंबुद्धावि'ति नान्तस्योपधाया दीर्घः । पदत्वे 'न लोपः प्रातिपदिकान्तस्ये'ति नलोपः । भसंज्ञायां 'अल्लोपोन'इत्यल्लोपः । सुजम्भ इत्यादि । ङौ तु 'विभाषा ङिश्योरि'ति विकल्पित इति सुजम्भि सुजम्भनीति भवतः । संबुद्धौ 'न ङिसंबुद्ध्योरि'ति नलोपनिषेधः । नपुंसके तु वा नपुंसकानामिति पक्षे न लोपः अन्यत्र तु नित्यः दीर्घस्तु न भवति असर्वनामस्थानत्वात् । शौ सर्वनामस्थानपरत्वात् सुजम्भानीति 'विभाषा ङिश्योरि'ति श्याःमल्लोपविकल्पनात् सुजम्भी सुजम्भनी इति भवतः । स्त्रियामृन्नेभ्य इति ङीपो 'ऽनो बहुव्रीहेरि'ति निषिद्धत्वात् पुंसीव रूपम् । यदा तु 'डाबुभाभ्यामन्यतरस्या'मन्नन्तात्प्रातिपदिकादनन्ताद्बहुव्रीहेश्च डाबिति डाप्तदा डित्वाट्टिलोपे सुजम्भा सुजम्भे इत्यादि । प्रतिषेधस्य डापः श्रवणस्य च वचनद्वयप्रामाण्यादेव सिद्धौ अन्यतरस्यांग्रहणेन भिन्नेन योगेन ङीपोऽभ्यनुज्ञानात् सुजम्भीत्याद्यपि भवति । अत्र च योगे 'अनो बहुव्रीहेरि'त्येवानुवर्तते न तु मन इति सीमादेः प्रातिपदिकाद् ङीबभावः । सुजम्भीत्यादौ तु अन्नन्तबहुव्रीहित्वाद्भवत्येव । सुपर्वा सुशर्मेत्यादौ तु 'अन उपधालोपिनोऽन्यतरस्यामि'ति नियमान्न भवति । सिद्धे सत्यारभ्यमाणोऽयं नियमार्थः । यदन्यतरस्यां ङीब्विधानं तदुपधालोपिन एवेति, अत्र ह्यल्लोपो 'न संयोगाद्वमन्तादि'ति निषिद्ध्यते । वमन्तात् संयोगात् भसंज्ञानिमित्ते प्रत्यये परे ऽल्लोपो नेति सूत्रार्थः । जम्भा सुहरिततृणेत्यत्र जम्भेति भाविन

समासान्तेन निर्देशात्समासार्थे तदुत्तरपदादकृते एव समासे समासान्ता इत्ययं पक्षो ज्ञाप्यते । तेन द्विपुरीत्यादि सिद्धति । यदि ह्यत्र ऋक्पूरब्धूरित्यकारः समासे कृते स्यात् तदा समासस्य अकारान्तोत्तरपदत्वाभावात् 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्यत इति' स्त्रीलिङ्गता न स्यात् । जृम्भते । जृम्भितेत्यादि । यङ्लुको रीगृत्वत इति वचनाद्रूपविशेषा भवन्ति । जरीजृम्भ्यते । जरीजृम्भीति । इत्यादि । जृम्भयति । अजजृम्भत् । जृम्भति विनाशनार्थे चुरादौ । भाषार्थोऽयं परस्मैपदिष्वपि इति केचित् ॥३८३॥

शल्भ कत्थने ॥ शल्भते । शशल्भे । शल्भितेत्यादि ॥ ३८४ ॥

वल्भ भोजने ॥ दन्त्योष्ठ्यादिः । वल्भते । णौ निगरणार्थत्वात् नित्यं परस्मैपदम् । वल्भयति ॥ ३८५ ॥

गल्भ धार्ष्ट्ये ॥ गल्भते । प्रगल्भः । अवगल्भ इवाचरति अवगल्भते । आचारे ऽवगल्भेति क्विप् तत्संनियोगेनाकारस्यानुदात्तत्वानुनासिकत्वप्रतिज्ञानात्प्रागेवोक्तमित्यनुदात्तत्वात्तङ् क्विपोऽभावे क्यङि अवगल्भायते । अवगल्भेति विशिष्टग्रहणादनुपसृष्टादन्योपसृष्टाच्चाचारक्विपि गल्भति । प्रगल्भतीति भवति ॥ ३८६ ॥

श्रम्भु प्रमादे ॥ तालव्योष्मादिः एवं काश्यपः । दन्त्यादिरिति चन्द्रः । स्वामी चैवं पठित्वा मतान्तरेण स्रन्सेति दन्त्यान्तमप्याह ॥ मैत्रेयस्य त्वयमेव पक्षः । यदाह स संयोगान्तसाधर्म्येण सान्तोप्यत्र निर्दिश्यते । कुताद्वावप्ययं पठिष्यते । तस्यैव च ध्वन्सुसाहचर्याच्चीगित्याहुः । दत्वे पुनः साहचर्यमिच्छतीति । दैवेप्येवमेवोक्तम् । तत्र तावदयं पक्षो वृत्तिकृद्व्याख्यातृणामनभिमत इव प्रतीयते यद्वृत्त्वसूत्रे उभयोर्ग्रहणं नीक्सूत्रे नास्येति चाहुः । सति ह्येवमवश्यवक्तव्यं, तथैव स्वामिचन्द्रयोरपि पाठोनभिमत इव । यत्तु 'वै कवलसकत्थश्रम्भ' इत्यत्र श्रम्भु विश्वास इति वदन्नमुं नोपाददते वृत्तिकारो ऽग्रहणे कारणं चाचष्ट । तथा व्याख्यातृतोपि न वृत्तिकारवचनमुपलक्षणमाचक्षता नान्यग्रहणे कारणम् । श्रम्भते । शश्रम्भे । श्रम्भिता । श्रम्भित्वा । श्रब्ध्वा । उदित्त्वाद्विकल्पः 'न क्त्वा सेडि' त्यकित्त्वाच्चलोपाभावः । श्रब्धः । 'यस्य विभाषे' त्यनिट्त्वम् ॥ ३८७ ॥

Digitized by Google

ष्टुभु स्तम्भे ॥ स्तोभते । तुष्टुभे । स्तोभितेत्यादि । तुस्तुभिषते । तुस्तोभिषते । स्तुभित्वा । स्तोभित्वा । रलो व्युपधादिति वा कित्वम् । उदित्वात्पक्षे क्त्वायामिडभावे 'निष्ठे'ति निष्ठायां 'यस्य विभाषे'ति स्तुब्धम्, सनि, स्तौतिण्योरेवेत्यषत्वं निष्टोभिता । निष्टोब्धा । उपसर्गात्सुनोतीत्यादिना 'प्राक् सितादड्व्यवायेपी'ति च षत्वं, नितुस्तोभिषते इत्यत्राभ्यासेन व्यवायाद् स्यादित्वाच्च स्तौतिण्योरेवेति नियम एवात्रावतिष्ठते । अनुष्टुप् । पूर्ववत् षत्वं, त्रिष्टुप् 'सुषामादिषु चे'ति षत्वम् । अनुष्टबेवानुष्टुभम् । एवं त्रैष्टुभं, छन्दसः प्रत्ययविधाने नपुंसके स्वार्थउपसंख्यानमिति स्वार्थे उत्सादिभ्यः प्रागदीव्यतीयोण्, स्वार्थेपि प्राग्दीव्यतीयः । तिप्यादय उदात्ता अनुदात्तेतः तिपिवर्जम् ॥ ३८८ ॥

गुपू रक्षणे ॥ एतदादयः शुम्भान्ता उदात्ता उदात्तेतः ॥ 'गुपूधूपविच्छिपणिपनिभ्य आय': इत्यायः स्वार्थे । 'आयादय आर्द्धधातुके वे'ति आर्द्धधातुके विषये विकल्पेनायमुत्पाद्यते । तस्मिन् लघूपधगुणः, आयादय आय ईयङ्णिङः । 'सनाद्यन्ता धातव' इति धातुत्वं, गोपायति । गोपायां चकार । कास्प्रत्ययादित्याम् । गोपायिता । गोपायिष्यति । गोपायतु । अगोपायत् । गोपायेत् । आशिषि गोपाय्यात् । अगोपायीत् । अगोपायिष्टाम् । अगोपायिष्यत् । जुगोपायिषति । गोपाययति । अजुगोपायत् । सर्वत्रार्द्धधातुके अतो लोपः । अत एवाग्लोपित्वात् णौ चङीति ह्रस्वाभावः । गोपाय्यम् 'अचो यत्' गोपायितः । गोपायित्वा । गोपाया । 'अ प्रत्ययादि'त्यकारः । आयाभावे जुगोप । जुगुपतुः । जुगोपिथ । जुगोप्थ । जुगुपिव । जुगुप्व । ऊदित्वादिड्विकल्पः । यावत् कश्चिदिडभावः प्रतिषेधनिबन्धनो वा विकल्पनिबन्धनो वा सर्वः क्रादिसूत्रेण नियम्यतइति मैत्रेयः सेधतावाह । तन्मते नित्यमिटा भाव्यम् । क्रादिनियमः प्रतिषेधविषय इति वादिनां हरदत्तादीनां विकल्प एव । आयादीनामुत्पत्तिविकल्प इत्युक्तेर्निवृत्तिविकल्पे हि प्रत्ययलक्षणेन प्रत्ययान्तत्वात् धातुत्वात् गोपायां चकारेति स्यात् । गोपिता । गोप्ता । गोपिष्यति । गोप्स्यति । गुप्यात् 'क्ङिदाशिषी'ति कित्वाच्च गुणः । अगोप्सीत् । अगोपीत् । अगोपिष्यत् । अगोप्स्यत् । जुगुप्सति । जुगुपिषति । जुगोपिषति ।

गुप्त्वा । गुपित्वा । गोपित्वा । रलोऽव्युपधादिति क्त्वासनोः कित्त्वविकल्पः । सनि अनिट्पक्षे 'हलन्ताच्चे'ति कित्त्वम् । जोगुप्यते । आयान्तस्यानेकाच्त्वात् न यङुदाहृतः । आयोत्पत्तिविकल्पस्य यद्यपि प्रयोजनम् । नात्र यङो लुगस्ति यदायादय आर्द्धधातुके वे'ति आर्द्धधातुकव्यक्तेरभिव्यक्तावेवायं विकल्प उच्यते । लुकि हि तेन विषयत्वापहारादार्द्धधातुकव्यक्तेरभिव्यक्तिरिति कथमायाभावः स्यात् । उपपादितश्चायं प्रकारोऽज गतिक्षेपणयोरित्यत्र । गोपयति । अजूगुपत् । गुप्तः । गुप्तिः । तितुत्रेति नेट्, 'यस्य विभाषे'ति नेट उत्पत्तिः । उत्पत्तिविकल्पस्य चेदं प्रयोजनम् । अन्यथा प्रत्ययान्तत्वादकार एव स्यात् । गोप्यम् । ययत् । कुप्यम् । 'राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्या'इति क्यपि गुपेरादिकत्वं निपात्यते । अयं भावार्थो रक्षार्थश्चुरादौ ॥ गुप गोपनइति इहैवाये । गुप व्याकुलत्वइति दिवादौ ॥ ३८९ ॥

धूप संतापे ॥ अस्यापि पूर्ववदायस्तदभावश्च । धूपायति । धूपायां चकार । धूपायितेत्यादि । आयाभावे वलादौ सर्वत्र नित्यमिडस्य विशेषो, रलोऽव्युपधादिति कित्वविकल्पस्याप्यत्र न प्रयोजनम्, अलघूपधत्वात्, आयाभावेपि नास्य क्तिनस्ति गुरुमत्त्वात् । तेन धूपेत्यकार एव भवति, भावार्थोऽयं चुरादौ ॥ ३९० ॥

जल्प जप व्यक्तायां वाचि ॥ जप मानसे च । जल्पति । जजल्प । जल्पितेत्यादि । जल्पाकः । 'जल्पभिक्षकुट्टलुण्टवृङः षाकन्'इति ताच्छीलादौ षाकन् ॥ स्त्रियां जल्पाकी । जल्पति पुत्रो देवदत्तः । जल्पयति पुत्रं देवदत्तं यज्ञदत्तः 'जल्पत्यादीनामुपसंख्यानमि'ति प्रयोज्यस्याशब्दकारकत्वेपि कर्मत्वम् । जपति । जजाप । जेपतुः । जपिता । अजपीत् । अजापीत् । अतो हलादेरिति वा वृद्धिः । जिजपिषति । जञ्जप्यते । लुपसदेत्यादिना भावगर्हायां यङ् । जपजभेत्यादिनाभ्यासस्य नुक्यनुस्वारे परसवर्णविकल्पो जभतिवत् । जञ्जपीति । जञ्जप्ति । जापयति । अजीजपत् । जप्यम् । 'पोरदुपधादि'ति यत् । कर्णेजपः । 'स्तम्बकर्णयोरमिजपोरि'ति यथासंख्यं जपेः कर्णे सुबन्ते उपपदे च हस्तिसूचकयोरिति वचनात् सूचकविषयः, 'तत्पुरुषे कृति बहुल'मिति सप्तम्या अलुक् ।

नञ्ञपूर्वकः । यज्ञजपेति यङन्तात्तच्छीलादावूकप्रत्यये ‘अतो लोपो’ ‘यस्य हल’ इति अतो लोपयलोपौ । जपः । ‘व्यधजपोरनुपसर्ग इ’ति अप् । उपसृष्टात्तु घञि उपजापः । अनयोः कर्मव्यतिहारे न तङस्ति । ‘प्रतिषेधे हसादीनामुपसंख्यानमि’त्युक्तत्वात् ॥ ३९३ ॥

(शेषमग्रे)

॥ श्रीः ॥

॥ योगवार्तिकम् ॥

(Continued from page 642. Vol. V.*)*

वियोजयत्यथान्योन्यं प्रधानपुरुषावुभौ ।

प्रधानपुंसोरनयोरेष संहार ईरितः ॥

इति कौर्मवाक्याच्च । अन्यथा न्यायानुग्रहेण बलवतीभिः प्रकृतिनित्यताश्रुतिभिर्विरोधाच्च । एवमेव प्रकृतिपुरुषयोः पुराणेषु श्रूयमाणोत्पत्तिरन्योन्यसंयोगेनाभिव्यक्तिरेव बोध्या । संयोगलक्षणोत्पत्तिः कथ्यते कर्मजा तयोरिति स्मृतेः । तथा चोक्तम् ।

न घटत उद्भवः प्रकृतिपूरुषयोरजयो-

रुभययुजा भवन्त्यसुभृतो जलबुद्बुदवत् ।

त्वयि त इमे ततो विविधनामगुणैः परमे

सरित इवार्णवे मधुनि लिल्युरशेषरसाः ॥

इति । इदानीं प्रकृत्यादीन् स्वस्वकार्यैरनुमापयितुं पर्वशब्दसूचितमलिङ्गादीनामविरलक्रमं दर्शयति । लिङ्गमात्रमिति । प्रत्यासन्नमव्यवहितकार्यम् । तत्रेति । तद्धि लिङ्गमात्रं तत्रालिङ्गेऽलिङ्गावस्थप्रधानेऽव्यक्तरूपेणाविभक्तमित्यतस्ततो विविच्यते विभक्तं भवति । तत्र हेतुः क्रमेति । क्रमस्य पौर्वापर्यस्य कदाप्यनतिक्रमादित्यर्थः । यदि हि कारणे ह्यनागतावस्थाभिरसतामप्युत्पत्तिः स्यात् तर्हि अविशेषात्सर्वं सर्वत्रोत्पद्येत तथाऽतीतमप्युत्पद्येत । न च प्रागभावः कारणम् । अभावस्यासिद्धेः । किं चा-

Digitized by Google

भावस्य निमित्तकारणत्वाभ्युपगमे तस्यैवोपादानकारणत्वमपि स्यात्, तथा च जितं शून्यवादिभिः । अथाभावस्योपादानत्वं न दृष्टमिति चेत्, तुल्यं निमित्तत्वेपि । अत उपादानतावन्निमित्तत्वमपि नाभावस्य । तस्मात्कार्यजननशक्तिरेवानागतावस्थारूपिणी कार्यरूपेण परिणमतइति । तदनेन भाष्येण सत्कार्यवादः प्रसाधितः । तथेत्याद्यप्येवं व्याख्येयम् । महदादिभिः प्रकृत्याद्यनुमानप्रकारश्च सांख्यसूत्रैरुक्तो ऽस्माभिरपि तद्भाष्ये प्रपञ्चितो विस्तरभयात्तु नेह प्रस्तूयतइति । तथा चोक्तम् । पुरस्तादिति । यथा विशेषेभ्यो ऽन्यान्तरभेदभिन्ना विशेषा जायन्ते तथा पुरस्तादस्यैव सूत्रस्यादावुक्तमित्यर्थः । ननु कथं गुणपर्वणां चतुर्धा विभागः सूत्रकारेण कृतः ब्रह्माण्डस्थावरजङ्गमरूपैः पर्वणामानन्त्यादित्याशङ्क्य ब्रह्माण्डादीनां सर्वेषां विशेषकार्याणां विशेषेष्वेवान्तर्भावमाह । न विशेषेभ्य इति । विशेषेभ्यः परमुत्तरभावि तत्त्वान्तरं तत्त्वभेदः नास्ति अतो विशेषाणां तत्त्वान्तरपरिणामो नास्तीत्यर्थः । अतो ब्रह्माण्डादिकं सर्वं विशेषपर्वण्येव गृहीतमिति भावः । तत्त्वत्वं च द्रव्यत्वं तत्त्वान्तरत्वं च स्वाश्रितद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम् । पञ्चविंशतितत्त्वेषु पञ्चविंशतिजात्यनङ्गीकारे च तत्त्वान्तरत्वं स्वाश्रितद्रव्यविभाजकोपाधिमत्त्वमिति । नन्वेवं तत्त्वभेदात्कथमन्तःकरणस्यैकत्वं तत्रतत्रोक्तं घटतेति । उच्यते । यथा विशेषाख्यपञ्चतत्त्वात्मिकैकैव पृथिवी प्रागुत्पद्यते ततः तस्याः खननमन्थनादिना पार्थिवे जलतैजसी अभिव्यक्तमात्रे भवत एवं तत्त्वत्रयात्मक एवादौ महान् जायते पश्चाच्च तस्याहङ्कारादिर्वृत्तिभेद इति । तर्हि किं विशेषाणां परिणामा एव न सन्ति, नेत्याह । तेषां त्विति । व्याख्यास्यन्तइति । सूत्रकारेणोत्तरपादइति शेषः । स्यादेतत् । महदादिक्रमेणोक्तः सृष्टिप्रकार आकाशादिक्रमबोधकश्रुतिविरोधाद्धेयः अतो तन्मात्राद्यश्रवणेन ते पदार्थाश्च कल्पिताः मन्वादिस्मृतयश्च सांख्यकल्पनानुवादेन धर्मादिपरा एव न प्रकृत्यादिपरा इति न स्मृतिभिरपि प्रकृत्यादिसिद्धिरिति । अत्रोच्यते । गुणत्रयात्मिका प्रकृ-

तिस्तावत् मूलकारणतया मैत्रेयोपनिषदि श्रूयते । यथा । 'तमो वा इदमेक-मास तत्परं स्यात् तत्परेणेरितं विषमत्वं प्रयाति एतद्वै रजसो रूपं तद्रजः सत्त्वीरितं विषमत्वं प्रयाति एतद्वै सत्त्वस्य रूपं तत्सत्त्वमेवेरितं तमसः संप्रास्रवत् तत्सांशोयं यश्चेतामात्रः प्रतिपुरुषं क्षेत्रज्ञः संकल्पाध्य-वसायलिङ्गः प्रजापतिस्तस्य प्रोक्ता अस्यास्तनवो ब्रह्मा रुद्रो विष्णु'रित्या-दि । तथा गर्भोपनिषदि चतुर्विंशतितत्त्वान्यनेन क्रमेणोक्तानि, यथा । 'अष्टौ प्रकृतयः षोडशविकाराः शरीर' इति । तथा प्रश्नोपनिषदि च । 'एवं ह वै-तत्सर्वं परे आत्मनि संप्रतिष्ठते पृथिवी च पृथिवीमात्रा चापश्चापोमात्राश्च तेजश्च तेजोमात्रा च वायुश्च वायुमात्रा चाकाशश्चाकाशमात्रा चे'त्यादिना परमात्मनि सर्वं त्रयोविंशतितत्त्वं तिष्ठति समुद्रे नदनदीव-दित्युक्तम् । अतश्चतुर्विंशतितत्त्वानि प्रत्यक्षश्रुत्या स्मृत्यनुमेयश्रुत्या च सिद्धा-नि । अद्वैतश्रुतिस्तु न तासां बाधिका व्यवहारपरमार्थभेदेन विषयभेदात् । व्यावहारिकाद्वैतश्रुतीनां चाविभागलक्षणाभेदपरताया एव नदीसमुद्रादिदृ-ष्टान्तैरवगमादिति । तेषां च महदादीनां सृष्टिक्रमोपि श्रुतौ पाठक्रमाद-वधार्यते ।

> एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
> खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥

इत्यादिषु । यच्च तैत्तिरीयके वियदादिसृष्टिः श्रूयते तत्र वियतः प्राग्बुद्ध्यादिसृष्टिः पूरणीया स्मृत्यनुमेयश्रुत्येकवाक्यतया छान्दोग्ये वियद्वा-युपूरणवदिति । किं च सांख्योक्तसृष्टिक्रमे स्पष्टैव श्रुतिरस्ति । यथा गोपा-लतापनीये । 'एकमेवाद्वितीयं ब्रह्मासीत् तस्मादव्यक्तमेवाक्षरं तस्मादक्ष-रान्महत् महतो वै अहङ्कारस्तस्मादेवाहङ्कारात् पञ्च तन्मात्राणि तेभ्यो भूतादीनी'ति । वेदान्तसूत्रैरपि बुद्ध्यादिक्रमेणैव सृष्टिरुक्ता तत्र नवीनानां कु-व्याख्या चास्माभिस्तद्भाष्य एवापास्तेति । तदेवं सांख्यशास्त्रे प्रपञ्चितानि चतुर्विंशतितत्त्वानि अत्र संक्षेपतः सूत्रद्वयेनोक्तानि । एतेषां च स्वरूपा-दिकं तत्रैव प्रदर्शितं संक्षेपतस्त्वत्राप्युच्यते । पञ्च भूतान्येकादशेन्द्रियाणि

च प्रसिद्धान्येव तन्मात्राणि भूतानां साक्षात् कारणानि शब्दादिमत्सूक्ष्मद्रव्याणि अतस्तानि सूक्ष्मभूतान्यपि क्व चिदुच्यन्ते । महदहङ्कारौ च मोक्षधर्मे लक्षितौ । यथा ।

हिरण्यगर्भो भगवानेष बुद्धिरिति स्मृतः ।
महानिति च योगेषु विरिञ्चिरिति चाप्युत ॥
धृतं नैकात्मकं येन कृत्स्नं त्रैलोक्यमात्मना ।
तथैव विश्वरूपत्वाद्विश्वरूप इति श्रुतः ॥
एष वै विक्रियापन्नः सृजत्यात्मानमात्मना ।
अहङ्कारं महातेजाः प्रजापतिमहङ्कृतम् ॥

इत्यादि । अत्र चोपासनार्थं शक्तिशक्तिमदभेदेनोपाध्योर्नामादिकमुपाधिमत्त्वेन तयोरुक्तं मनुष्यपश्वादिनामरूपादिवत् । स्मृत्यन्तरेषु सांख्ययोगयोश्चाविवेकतो जडवस्तुन्येव तद्व्यवहारः । ज्ञानैश्वर्यादिरूपमहत्तत्त्वस्याभिमानरूपाहङ्कारस्य चान्तःकरणधर्मत्वादिति । प्रकृतिस्तु त्रयोविंशतितत्त्वकारणानि सत्त्वादिनामकसूक्ष्मद्रव्याणि असंख्यानि गुणशब्दश्च तेषु पुरुषोपकरणत्वात् पुरुषबन्धकत्वाच्च प्रयुज्यते । तच्च गुणत्रयं सुखदुःखमोहधर्मकत्वात् सुखदुःखमोहात्मकमुच्यते । पुरुषाणां सर्वार्थसाधकत्वाद्राजामात्यवत्प्रधानमुच्यते जगदुपादानत्वात्प्रकृतिर्जगन्मोहकत्वाच्च मायेत्युच्यते । वैशेषिकादिभिश्च स्वस्वपरिभाषया परमाण्वज्ञानादिशब्दैश्चोच्यते इति । तदुक्तं वासिष्ठे ।

नामरूपविनिर्मुक्तं यस्मिन् संतिष्ठते जगत् ।
तमाहुः प्रकृतिं के चिन्मायामेके परे त्वणून् ॥

इत्यादिनेति । एषु च त्रयोविंशतितत्त्वानि सर्गादौ स्थूलसूक्ष्मशरीरद्वयरूपेण परिणमन्ते । तत्र स्थूलं पञ्चभूतेभ्यः सूक्ष्मं च शेषेभ्यः तयोश्च सूक्ष्मं काष्ठवह्नेरिवान्याभिव्यञ्जकत्वात् पुरुषस्य लिङ्गशरीरमित्युच्यते तच्चाहङ्कारस्य बुद्धौ प्रवेशात्सप्तदशावयवकं सांख्यशास्त्रे प्रोक्तं 'सप्तदशैकं लिङ्ग'मिति । अत्र एकत्वं समष्ट्यभिप्रायेणोक्तम् । 'व्यक्तिभेदः कर्मविशेषा-

द्वि' त्युत्तरसूत्रेण व्यक्तिरूपस्य एकस्यैव लिङ्गशरीरस्य व्यक्तिभेदवचनात् । अयंच व्यष्टिसमष्टिभावो न वनवृक्षवत् किं तु पितापुत्रवदेव ।

तच्छरीरसमुत्पन्नैः कार्यैस्तैः करणैः सह ।
क्षेत्रज्ञाः समजायन्त गात्रेभ्यस्तस्य धीमतः ॥

इतिमन्वादिवाक्यैर्हिरण्यगर्भस्य शरीरद्वयांशैरेवाखिलपुंसां शरीरद्वयोत्पत्तिरिति सिद्धेः । वनवृक्षयोस्तु नैवं कार्यकारणभावोस्तीति दिक् । सूत्रान्तरमवतारयति । व्याख्यातमिति ।

द्रष्टा दृशिमात्रः शुद्धोपि प्रत्ययानुपश्यः ॥ २० ॥

दृशिरत्र न गुणः किंतु प्रकाशस्वरूपं द्रव्यं
ज्ञानं नैवात्मनो धर्मो न गुणो वा कथं चन ।
ज्ञानस्वरूप एवात्मा नित्यः सर्वगतः शिवः ॥

इत्यादिस्मृतेः । अग्न्यौष्ण्यादिषु च भेदाभेदावेव । औष्ण्याग्रहणेपि चक्षुषाग्निग्रहणात् पुरुषस्तु ज्ञानग्रहणं विना न गृह्यतइति । मात्रशब्देन पूर्वसूत्रोक्तप्रकाशक्रियादिगुणव्यावृत्तिः तेष्वेव च सर्वेषां शेषगुणानामन्तर्भावः शुद्धशब्देन च भूतेन्द्रियात्मकत्वव्यावृत्तिः । शुद्धेपि बुद्धभेदभ्रमोपपादनाय शेषविशेषणम् । अत्र च परिणामित्वपारार्थ्याचेतनत्वादीनि बुद्धेरशुद्धिः तद्राहित्यं च पुरुषस्य शुद्धिरिति भाष्ये व्यक्तीभविष्यति । प्रत्ययानुपश्यः प्रत्ययसमानाकारतापन्नइव सन् बुद्धिवृत्तिसाक्षीत्यर्थः । अनेन विशेषेण द्रष्टरि प्रमाणं चोक्तमिति । शुद्धोपीत्यादिभागस्य फलान्तरं च भाष्यकारो व्याख्यास्यति । दृशिमात्रशब्दार्थमाह । दृक्शक्तिरेवेति । प्रलयमोक्षादौ जीवानां दर्शनाख्यचैतन्यफलोपधानं नास्तीति शक्तिपदोपादानम् । एवशब्दार्थमाह । विशेषणापरामृष्टेति । विशिष्यते व्यावर्त्यन्ते द्रव्यान्तरादेभिरिति विशेषणानि विशेषगुणाः वैशेषिकशास्त्रोक्ताः तैः कालत्रयेप्यसंबद्धा इत्यर्थः । तेन संयोगसंख्यापरिमाणादिसत्त्वेप्यक्षतिः । द्रष्टेति लक्ष्यपदं बुद्धिव्यावृत्ततया व्याचष्टे । स पुरुष इति । संवेदित्या बुद्धेः प्रतिसंवेदी पुरुषः संवेदनमर्थाकारवृत्तिः तस्याः प्रतिसंवेदनं प्रतिध्वनि-

वत्प्रतिबिम्बं यत्र स पुरुष इत्यर्थः। बुद्धेः साक्षीति तु पर्यवसितोऽर्थः। एतेन प्रतिबिम्बरूपयारोपितक्रियया कल्पितं दर्शनकर्तृत्वं द्रष्टृत्वमित्यपि सूचितम्। आत्मनो ज्ञानस्वरूपत्वं च

यथा दीपः प्रकाशात्मा स्वल्पो वा यदि वा महान्।
ज्ञानात्मानं तथा विद्यादात्मानं सर्वजन्तुषु ॥

इत्यादिवाक्यशतानुग्रहेण लाघवतर्कानुग्रहेण चात्मत्वादिरूपव्यतिरेक्यादिलिङ्गैरनुमेयं ज्ञानाश्रयत्वकल्पने धर्मधर्मिभावापन्नवस्तुद्वयकल्पनागौरवात्। अहंज्ञानामीतिप्रत्ययस्तु अहं गौर इति भ्रमशतान्तःपातितया प्रामाण्यशङ्कास्कन्दितत्वेन यथोक्तानुमानापेक्षया दुर्बल इति दिक्। बुद्धिपुरुषयोर्विवेकप्रतिपादनाय तयोरभेदभ्रमोपपादनाय च तयोर्वैरूप्यसारूप्यप्रतिपादकतया क्रमेण शुद्धोपीत्यादिविशेषणद्वयं व्याचष्टे। स न बुद्धेः सरूपो नात्यन्तं विरूप इति। पारमार्थिकसारूप्यस्याभावः शुद्धोपीत्याद्यदलार्थः। प्रतिबिम्बरूपापारमार्थिकसारूप्यं च शेषदलार्थः। तथा च परिणामित्वादिरूपबुद्धिसारूप्याभाव एव शुद्धिः बुद्धिवृत्तिसारूप्यमेव च प्रत्ययानुपश्यत्वमित्यायातम्। सारूप्याभावसारूप्ये क्रमेण प्रतिपादयति। न तावदित्यादिना। कस्मादित्यस्योत्तरं परिणामिनी हि बुद्धिरिति। परिणामित्वे हेतुर्ज्ञाताज्ञातविषयत्वादिति। ज्ञातेत्याद्युक्तं विवृणोति। तस्याश्चेति। तस्या बुद्धेः,श्चो हेतो। गवादिरिति। गोशब्दः शब्दवाची। अतो गवादिघटादिपदाभ्यां धर्मधर्मिसामान्यपरतया धर्मधर्मिरूपाणामशेषाणां बुद्धिविशेषाणां ग्रहणम्। ज्ञातो वृत्तिव्याप्यस्तदन्यश्चाज्ञातः। दर्शयति अनुमापयतीत्यर्थः। अयं भावः। बुद्धिः परिणामिनी स्यात् तदैव कदाचित् बुद्धिः शब्दाद्याकारा भवति कदाचिच्च नेत्युपपद्यते। न च पुरुष इव बुद्धावपरिणामित्वेपि विषयस्य प्रतिबिम्बनमेव विषयाकारतास्तु ततश्च प्रतिबिम्बकादाचित्कत्वेन ज्ञाताज्ञातविषयत्वमुपपद्यतेति वाच्यम्। स्वप्नध्यानादौ विषयासांनिध्येन तत्प्रतिबिम्बासंभवात्, शास्त्रेषु बुद्धौ विषयप्रतिबिम्बवचनं तु तत्समानाकारपरिणाममात्रेणातो बु-

बुद्धेरर्थग्रहणस्यानित्यतया तस्या अर्थाकारपरिणामोऽनुमीयत इति, । बुद्धेः परिणामित्वं दर्शयित्वा तदभावं पुरुषे दर्शयति । सदाज्ञातेति । सदा ज्ञातो विषयो बुद्धिवृत्तिरूपो येन तस्य भावः सदाज्ञातविषयत्वं, परिदीपयति अनुमापयति । यदि हि पुरुषः परिणामी स्यात् तदा ज्ञानापरिणामेन कदाचित्पुरुषस्य विषयो बुद्धिवृत्तिरज्ञातापि तिष्ठेत् ततश्च वर्त्तमानाया अपि घटादिवृत्तेरज्ञानसंभवात् घटादिकं निश्चिनोमि न वेत्यादिसंशयः स्यात् । तथा योग्यानुपलब्ध्या घटादिज्ञानाभावनिश्चयश्च न स्यात् । अज्ञातवृत्तिसत्तासंभवादिति भावः । नन्वेतावता भोक्तुर्ज्ञानं परिणामो मास्तु सुखादिपरिणामाभावस्तु कथं तेनानुमाप्यत इति चेत् । उच्यते । शब्दादिनिश्चयरूपस्य परिणामस्य बुद्धौ सिद्ध्यैव तत्कार्याणाम् इच्छाकृतिसुखदुःखादृष्टसंस्कारादीनां बुद्धिधर्मत्वेनैव सिद्धेः । सामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावे लाघवादिति । ननु न पुरुषस्यापि सदाज्ञातविषयत्वं प्रलयादौ स्वविषयस्य बुद्धिवृत्तेरदर्शनादित्याक्षिपति । कस्मादिति । समाधत्ते । नहीति । नहि पुरुषविषयो बुद्धिवृत्तिरपि शब्दादिवत्स्याच्च तिष्ठेच्च । अथ वा अगृहीता गृहीता च कालभेदेन भवतीत्यर्थः । तथा च स्मर्यते ।

न चिदप्रतिबिम्बास्ति * दृश्याभावादृते किल ।
क्व चिच्चाप्रतिबिम्बेन किलादर्शोऽवतिष्ठते ॥

इति । तथा च प्रलयादौ वृत्त्याख्यविषयाभावादेव तां न पश्यतीति भावः । उपसंहरति । इति सिद्धमिति । परिणामित्ववदेव परार्थत्वापरार्थत्वरूपमपि वैधर्म्यं बुद्धिपुरुषयोर्दर्शयति । किं चेति । बुद्धिः परार्था स्वभिन्नस्य भोगादिसाधनं संहत्यकारित्वात् सहकारिसापेक्षव्यापारकत्वात् । शय्यासनशरीरादिवत्, पुरुषश्च स्वार्थः स्वस्य च भोगादिसाधनम् उक्तहेत्वभावात् यन्नैवं तन्नैवं यथा स एव दृष्टान्त इत्यर्थः । बुद्धेर्हि व्यापारो विषयग्रहणादिरिन्द्रियादिसापेक्षः शय्यादीनामपि शयनादिकार्ये भूम्यादि-

* चप्रतिबिम्बास्तीति पाठान्तरम् ।

सापेक्षं, पुरुषस्य सुखादिप्रकाशनं च व्यापार एव न भवति स्वरूपतो नित्यत्वात् । नापि सुखादिसत्त्वे तत्प्रकाशार्थं पुरुषः सहकारिणमपेक्षत इति भावः । बुद्ध्यादेः परार्थत्वे च श्रुतिः । 'न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवती'त्यादि । अत्र कश्चित् स्वार्थे इति साध्यस्य न परार्थे इत्यर्थमाह । तच्च । भृत्यचेतनस्यापि स्वामिचेतनार्थत्वदर्शनात् । परार्थत्वमेव तु परमात्मार्थत्वमिति चेत् नाचेतनस्वरूपं वैधर्म्यान्तरमाह । तथा सर्वार्थेति । सुखदुःखमोहात्मकांस्त्रिगुणान् सर्वार्थान् गृह्णती बुद्धिरपि तदाकारतया त्रिगुणा सत्त्वादिगुणत्रयमयीत्यनुमीयते । त्रिगुणत्वाच्च पृथिव्यादिवदचेतनेति सिद्धम् । गुणानां तूपद्रष्टा पुरुषो द्रष्टृबुद्धिसान्निध्येन बुद्धिवृत्तिप्रतिबिम्बमात्रतो गुणद्रष्टा भवति न गुणाकारपरिणामेन बुद्धिवदिति अतो न स त्रिगुण,स्ततश्चेतन इति शेषः । उपसंहरति । अत इति । अतो वैधर्म्यत्रयाच्च बुद्धिसरूपः पुरुष इत्यर्थः । एतावता शुद्ध इति व्याख्यातम् । ननु सर्वाभिमाननिवृत्त्यर्थं सामान्यत एव दृग्दृश्यविवेकः प्रतिपादनीयः तत्किमिति बुद्धिपुरुषयोरेव वैधर्म्यं प्रतिपाद्यत इति चेद् न । बुद्धिरेव पुरुषस्य साक्षाद्दृश्या बुद्ध्यारूढतयैवान्येषां दृश्यत्वात् तस्यामेव साक्षादभिमानः तत्संबन्धादेवान्यत्राभिमानात् । मृतदेहे सुषुप्त्यवस्थायां च चैतन्याभावस्य स्पष्टत्वात् । एकैकेन्द्रियघातेऽपि चैतन्योपलब्धेः* इन्द्रियाणामप्यचैतन्यस्य स्पष्टत्वात् । अतो बुद्धिविवेकादेव सर्वाभिमाननिवृत्तिरित्याशयेन बुद्धिवैधर्म्यमेव पुरुषेषु प्रायशः प्रतिपाद्यते । किंच बुद्ध्यतिरिक्तेभ्य आत्मविवेकस्य न्यायवैशेषिकाभ्यामेव सिद्धत्वेन बुद्धितो विवेक एव सांख्ययोगयोरसाधारणं कृत्यमिति । अत्यन्तवैरूप्यं निराकर्त्तुमुत्थापयति । अस्तु तर्हीति । यत इत्यस्य पूर्वेणान्वयः । प्रत्ययानुपश्य इत्येतद्व्याचष्टे । प्रत्ययं बौद्धमिति । बुद्धिवृत्तिमनुपश्यतीत्यर्थः । ननु बुद्धिद्रष्टृत्वेऽपि कथं नात्यन्तं बुद्धिवैरूप्यं तत्राह । तमनुपश्यन्निति । यतस्तमनुपश्यत्यतः पुरुषोऽतदात्मापि परमार्थतो बुद्ध्यसरूपोऽपि तत्सरूप-

* चैतन्योपलब्धेरिन्द्रियाणामिति पाठान्तरम् ।

एव प्रकाशते तदनुकारी भवति स्फटिक इव जपारूप इत्यर्थः । अर्थाकारत्वस्यैवार्थग्रहणरूपतायाः बुद्धिस्थले सिद्धत्वादित्यर्थः । प्रतिबिम्बरूपेण च मिथ्यासारूप्येण न पारमार्थिकासारूप्यविरोधः । यथोक्तयोः सारूप्यवैरूप्ययोः पञ्चशिखाचार्यवाक्यं प्रमाणयति । तथा चोक्तमिति । भोक्तृशक्तिर्बुद्धिवत्परिणामिनी न भवति तथा बुद्धिवत्स्वविषये संक्रान्ता उपरक्तापि न भवति विकारहेतुसंयोगस्यैवोपरागत्वात् बुद्धिविकारप्रतिबिम्बेनैवोपपत्तौ पुरुषस्य विकारकल्पनावैयर्थ्यात् । आभ्यां विशेषणाभ्यां वैरूप्यं दर्शितम् । इदानीं सारूप्यं दर्शयितुं आदौ बुद्धेश्चिद्रूपत्वमुपपादयति । परिणामिन्यर्थ इति । परिणामिनि स्वस्वार्थे विषये बुद्धौ प्रतिबिम्बरूपेण संक्रान्तेवोपरक्तेव सती तद्वृत्तिं विषयाद्याकारामनुपतति चेतनामिव करोति यथा सूर्यो जलेनुपतन् जलं सूर्यमिव करोति तद्वत् । अनेन बुद्धेरूपं दर्शयित्वा पुरुषस्य बुद्धिसारूप्यं दर्शयति । तस्याश्चेति । हिशब्दोवधारणे । तस्या अपि भोक्तृशक्तेर्ज्ञानवृत्तिर्ज्ञानरूपा वृत्तिर्बुद्धिवृत्त्यविशिष्टैवेत्याख्यायते इत्यन्वयः । अत्र हेतुः प्राप्तेति । उपग्रह उपरागः, उक्तरीत्या प्राप्तचैतन्योपरागरूपाया बुद्धिवृत्तेरनुकारिणी प्रतिबिम्बोद्ग्राहिणी तन्मात्रतयेति ज्ञानवृत्तेर्विशेषणम् । तथा च परस्परप्रतिबिम्बात् द्वयोरपि चेतनत्वसुखादिपरिणामकत्वरूपं सारूप्यमित्यर्थः । आख्यायत इत्यनन्तरमितिशब्दः पूरणीयः । तदनेन सूत्रेण जीवेश्वरसाधारण्येनैव चिन्मात्रत्वमुक्तम् । तथा च श्रुतिस्मृती । 'चेतामात्रः प्रतिपुरुषं क्षेत्रज्ञः' ।

ज्ञानमेव परं ब्रह्म ज्ञानं बन्धाय चेष्यते ।
ज्ञानात्मकमिदं विश्वं न ज्ञानाद्विद्यते परम् ॥

(शेषमग्रे)

काशीस्वराजकीयप्रधानपाठशालायां } सांख्ययोगाध्यापकस्तात्याशास्त्र्यपरनामा
पटवर्धनोपाह्वो रामकृष्णशास्त्री ।
ज्योतिषशास्त्राध्यापकः केशवशास्त्री च ।

द्वितीयः परिच्छेदः।

(*Continued from page* 664. Vol. V.)

अथोपमानं निरूप्यते।

सादृश्यप्रमाकरणमुपमानम्। तथाहि नगरेषु दृष्टगोपिण्डस्य पुरुषस्य वनं गतस्य गवयेन्द्रियसन्निकर्षे सति भवति प्रतीतिरयं पिण्डो गोसदृश इति तदनन्तरञ्च भवति निश्चयोऽनेन सदृशी मदीया गौरिति।

तत्रान्वयव्यतिरेकाभ्यां गवयनिष्ठगोसादृश्यज्ञानं करणं गोनिष्ठगवयसादृश्यज्ञानं फलम्।

न चेदं प्रत्यक्षेण सम्भवति गोपिण्डस्य तदेन्द्रियासन्निकर्षात् नाप्यनु-

Comparison (as a source of right knowledge) is now expounded. The process of comparison is the instrumental cause of the right knowledge termed Similarity. To explain:—when a man has taken note of a cow's body in towns and having gone to a forest sees a gayal, his consciousness is expressed in the from—this body (of the gayal) is like that of a cow—, and then follows the conviction, viz, my cow is like this (gayal).

With regard to these two propositions (tatra), it is ascertained by the joint method of concomitance and nonconcomitance * that the instrumental cause consists in the knowledge of the likeness to the cow residing in the gayal; and that the knowledge of the likeness to the gayal residing in the cow is the result (of the instrument of knowledge termed "comparison").

And this result is not gained through immediate presentation, for the cow's body is not in contact with any of his sense-organs (the cow not being in the forest): nor does it come through the inferential process, for the likeness

* The proposition, the cow is like this gayal, follows upon the knowledge that this gayal is like the cow (anvaya). If the latter be unknown, the former is also unknown (vyatireka). Therefore "this gayal is like the cow" is an instrumental cause with regard to "the cow is like this gayal."

मानेन गवयनिष्ठगोसादृश्यस्यातल्लिङ्गत्वात् ।

नापि मदीया गौरेतद्गवयसदृशी एतन्निष्ठसादृश्यप्रतियोगित्वात् यो यत्सादृश्यप्रतियोगी स तत्सदृशः यथा मैत्रनिष्ठसादृश्यप्रतियोगी चैत्रो मैत्रसदृश इत्यनुमानात् तत्सम्भव इति वाच्यम् एवंविधानुमानानवतारेऽप्यनेन सदृशी मदीया गौरिति प्रतीतेरनुभवसिद्धत्वादुपमिनोमीत्यनुव्यवसायाच्च ।

तस्मादुपमानं मानान्तरम् ।

इति परिभाषायामुपमानपरिच्छेदः ।

(शेषमग्रे)

to the cow residing in the gayal cannot be the reason (middle term) by which that (i.e. probandum, viz, the likeness to the gayal residing in the cow, is proved). *

Nor must you maintain that this result is possible from the following inference:—my cow is like this gayal, since it is the counterpart † of its likeness which resides in this gayal: that which is a counterpart of its own likeness to something else is like that something, just as Chaitra, who is the counterpart of his own likeness which resides in Maitra, is like Maitra—because the consciousness that "my cow is like this gayal" is clearly established without any such inference being drawn, and because the secondary cognition takes the form of "I learn through comparison" (and not "I infer") that the cow is like this gayal.

For these reasons we maintain "comparison" as a distinct source of evidence.

A. V.

* If upamána be regarded as only another form of anumána, the sádhya is गोनिष्ठगवयसादृश्यवत्त्वम्; the paksha is मदीया गौः and the linga is गवयनिष्ठसादृश्यवत्त्वम्. But such a linga the Paribháshá rejects as faulty, for the linga ought to be found in the paksha; whereas, in the present case, the likeness to the cow resides in the gayal and not in the cow (or paksha). गोनिष्ठगवयसादृश्यज्ञानं is represented by तत् in अतल्लिङ्गत्वात् of the text.

† यस्य सादृश्यं कुत्रापि वक्तव्यं स प्रतियोगी । यत्रकुत्र सादृश्यं विवक्षितं सोऽनुयोगी ॥

पञ्चदशी ।

अथ पञ्चभूतविवेकः ।

(*Continued from page* 672. Vol. V.)

निस्तत्त्वा कार्यगम्याऽस्य शक्तिर्मायाऽग्निशक्तिवत् ।
नहि शक्तिः क्वचित्कैश्चिद् बुध्यते कार्यतः पुरा ॥ ४७ ॥

न सद्वस्तु सतः शक्तिर्नहि वह्नेः स्वशक्तिता ।
सद्विलक्षणतायां तु शक्तेः किं तत्त्वमुच्यताम् ॥ ४८ ॥

शून्यत्वमिति चेच्छून्यं मायाकार्यमितीरितम् ।
न शून्यं नापि सद्यादृक्तादृक्तत्त्वमिहेष्यताम् ॥ ४९ ॥

नासदासीन्नोसदासीत्तदानीं किन्त्वभूत्तमः ।
सद्योगात्तमसः सत्त्वं न स्वतस्तन्निषेधनात् ॥ ५० ॥

47. Máyá is the power of this existent reality (asya), just as a power belongs to fire: it is inconceivable as reality, and is known through the products (of the power); for a power can in no way be known prior to its effects.

48. The power of the existent reality is not an existent reality, nor is the power of the fire the fire itself. But if you maintain this power (i. e. Máyá) as distinct from the existent reality, you must declare what constitutes the reality of this power.

49. If you reply that non-entity (constitutes Máyá), (we say that) we have shown this blank (non-entity) to be an effect of the inexplicable power, Máyá. Here you must accept the conclusion that this principle is a something inexplicable as either non-entity or existent reality.

50. "Non-entity was not nor entity," but at that time "darkness was." The reality ascribed to darkness is due to the connexion (at that time) between the existent reality and darkness; but is not inherent in darkness, for (independent) reality is not admitted (to darkness).

---

49. See śl: 34.

50. "Sáyana tells us that the Násadíya-súkta exhibits the state of things in which a former world has been dissolved and a later world not yet evolved; the state of retractation, nirasta-samasta-

अत एव द्वितीयत्वं शून्यवन्नहि गण्यते ।
न लोके चैत्रतच्छक्त्योर्जीवितं लिख्यते पृथक् ॥ ५१ ॥

शक्त्याधिक्ये जीवितं चेद्वर्धते तत्र वृद्धिकृत् ।
न शक्तिः किन्तु तत्कार्यं युद्धकृष्यादिकं तथा ॥ ५२ ॥

सर्वथा शक्तिमात्रस्य न पृथग्गणना क्वचित् ।

51. Wherefore this power, Śakti (or Máyá), is not held to be a second entity, nor is (your) blank thus regarded. The life of a man and the life of his power are not, in ordinary language, treated of as distinct.

52. If you reply that a man's life is lengthened in proportion to the abundance of his power (and therefore his life and power are distinct things), we hold that, in this instance, the man's power does not extend his life; but that his life is an effect, as are fighting, ploughing &c., (resulting from his merits or the reverse, which in turn, proceed from action, desire &c.).

53 No where at all is Śakti reckoned as a distinct entity,

---

prapañcha-pralayávasthá. * * * * * * The primary material, múlakáraṇa, of the transmigratory environment was not in that state of retractation a nonentity. It was not a purely chimerical thing, an absurdity, such as the horns of a hare. From such a principle the existing world could not have emanated. It was not entity: it was not a reality like the absolute Ego. The primary material was neither nonentity nor entity, but inexplicable; a thing of which nothing can be intelligibly predicated. * * * * Entitative illusion, máyá, is here called darkness, because it overspreads and conceals the absolute Ego. The evolution of the universe is its emersion out of this darkness or illusion under name and form. The world has thus pre-existed in its material cause, and the teachings of the Naiyáyikas and Vaiśeshikas, that, in the genesis of things a hitherto non-existent thing is brought into existence, is thus discountenanced. * * *

There is an *appearance* of union between the cosmical illusion and the transcendent reality; but this is only for the unreflective, a fact of common sense or unrectified experience. To the reflective, the illusion is unintelligible, the transcendent Self is real."—Gough's Ancient Indian Metaphysics—Calcutta Review. 1876.

शक्तिकार्यं तु नैवास्ति द्वितीयं शङ्क्यते कथम् ॥ ५३ ॥

न कृत्स्नब्रह्मवृत्तिः सा शक्तिः किन्त्वेकदेशभाक् ।
घटशक्तिर्यथा भूमौ स्निग्धमृद्येव वर्तते ॥ ५४ ॥

पादोऽस्य सर्वा भूतानि त्रिपादस्ति स्वयंप्रभः ।
इत्येकदेशवृत्तित्वं मायाया वदति श्रुतिः ॥ ५५ ॥

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ।
इति कृष्णोऽर्जुनायाह जगतस्त्वेकदेशताम् ॥ ५६ ॥

स भूमिं विश्वतो वृत्वा ह्यत्यतिष्ठद्दशाङ्गुलम् ।
विकारावर्ति चात्रास्ति श्रुतिसूत्रकृतोर्वचः ॥ ५७ ॥

and (*at that time*, vide sl. 50) no product of Śakti existed. How then is a doubt to arise in favour of a second (existent reality)?

54. This Śakti does not reside in all and every part of the absolute reality but in one part: just as the power of a jar resides in a portion of the earth which consists of soft clay.

55. Revelation thus declares the localisation of Máyá:—"all created things are one fourth of him; the self-luminous is three fourths."

56. Krishna declares to Arjuna the localisation of the universe thus:—"I continue to support all this world by a single portion of myself."

57. "He having enveloped the earth on all sides remained beyond it by a space of ten fingers*" and "it pervades the effects (which proceed from itself) †":—these are the words of revelation and of a writer of sútras.

---

55. "Portions, quarters, cannot be literally ascribed to the impartite transcendent Self, the "true knowledge, infinite, absolute." They are attributed to Purusha only to indicate the insignificance of all worlds in comparison with the real essence of the impersonal Ego."—Ancient Indian Metaphysics.

56. Bhagavad Gítá. x. 42.

57. * Purusha-súkta.

† Brahma-sútras. IV. 4. 19.

निरंशेऽप्यंशमारोप्य कृत्स्नेंऽशे वेति पृच्छतः ।
तद्भाषयोत्तरं ब्रूते श्रुतिः श्रोतृहितैषिणी ॥ ५८ ॥
सत्तत्त्वमाश्रिता शक्तिः कल्पयेत्सति विक्रियाः ।
वर्णा भित्तिगता भित्तौ चित्रं नानाविधं यथा ॥ ५९ ॥
आद्यो विकार आकाशः सोऽवकाशस्वरूपवान् ।
आकाशोऽस्तीति सत्तत्त्वमाकाशेऽप्यनुगच्छति ॥ ६० ॥
एकस्वभावं सत्तत्त्वमाकाशो द्विस्वभावकः ।
नावकाशः सति व्योम्नि स चैषोऽपि द्वयं स्थितम् ॥ ६१ ॥
यद्वा प्रतिध्वनिर्व्योम्नो गुणो नासौ सतीष्यते ।
व्योम्नि द्वौ सत्ध्वनी तेन सदेकं द्विगुणं वियत् ॥ ६२ ॥
या शक्तिः कल्पयेद्व्योम सा सद्व्योम्नोरभिन्नताम् ।

58. To the man, who asks whether this ascribing of parts to that which is (really) without parts applies to the whole of the absolute reality or to a portion of it (only), revelation, that wishes well to the hearer, replies in the words above.

59. Śakti, when associated with the existent principle, effects the (erroneous) surmisal of modifications in this existent reality; just as colours laid upon a wall produce upon it a variegated picture.

60. The first product is ether, which is in the form of empty space. The principle of reality obtains in ether, as in the deliverance of consciousness:—*ether is.*

61. The principle of reality is a single essence. Ether possesses a two-fold nature. In the existent reality there is no empty space: in ether this (is found), (which, together with the principle of reality that obtains in ether) constitutes the two-fold nature of ether.

62. Or again, echo is a quality of ether and is not heard in the existent reality, In ether there are two attributes, viz, existence and echo. Thus, ether is two-fold; the existent reality is a single essence.

63. Śakti, that inexplicable power, which causes the erroneous surmisal of ether (in the existent reality), identifies

आपाद्य धर्मधर्मित्वं व्यत्ययेनावकल्पयेत् ॥ ६३ ॥
सतो व्योमत्वमापन्नं व्योम्नः सत्तां तु लौकिकाः ॥
तार्किकाश्चावगच्छन्ति मायाया उचितं हि तत् ॥ ६४ ॥
यद्यथा वर्तते तस्य तथात्वं भाति मानतः ।
अन्यथात्वं भ्रमेणेति न्यायोऽयं सार्वलौकिकः ॥ ६५ ॥
एवं श्रुतिविचारात्प्राग्यथा यद्वस्तु भासते ।
विचारेण विपर्येति ततस्तच्चिन्त्यतां वियत् ॥ ६६ ॥
भिन्ने वियत्सती शब्दभेदाद्बुद्धेश्च भेदतः ।
वाय्वादिष्वनुवृत्तं सन्न तु व्योमेति भेदधीः ॥ ६७ ॥
सद्वस्त्वधिकवृत्तित्वाद्धर्मि व्योम्नस्तु धर्मता ।
धिया सतः पृथक्कारे ब्रूहि व्योम किमात्मकम् ॥ ६८ ॥

ether with the existent reality and, by means of an interchange, makes us falsely regard (ether) as a subject, possessing the attribute (existence).

64. Ordinary men and false reasoners assume the nature of ether in place of the existent reality, and existence as an attribute of ether. This erroneous interchange of the existent reality and ether (tat) is the very work of Máyá.

65. When an object is manifested as it really exists, it is said to be rightly known (mánatas); that it should appear to be anything else is due to error:—this is the common rule of the world.

66. Following this rule (evam), let us deliberate upon ether; (since) the existent reality, which appears under a certain form, previous to a study of revelation, is found, after due study, to be an unreal manifestation.

67. Ether and the existent reality are distinct, for sound belongs to ether and not to the existent reality (śabdabhedát) and because our consciousness of the two is distinct. Thus we are conscious of existence as pervading air and the other elements' but are not conscious of ether as pervading these.

68. The existent reality is the subject, since its extension is the greater; and ether is the attribute. But if you postulate ether as an entity distinct from the existent reality, you must declare what ether really is.

अवकाशात्मकं तच्चेदसत्तद्धि चिन्त्यताम् ।
भिन्नं सतोऽसच्चेन्नेति वचि चेद्व्याहतिस्तव ॥ ६९ ॥
भातीति चेद्भातु नाम भूषणं मायिकस्य तत् ।
यदसद्भासमानं तन्मिथ्या स्वप्नगजादिवत् ॥ ७० ॥
जातिव्यक्ती देहिदेहौ गुणद्रव्ये यथा पृथक् ।
वियत्सतोस्तथैवास्तु पार्थक्यं कोऽत्र विस्मयः ॥ ७१ ॥
बुद्धोऽपि भेदो नो चित्ते निरूढिं याति चेत्तदा ।
अनैकाग्र्यात्संशयाद्वा रूढ्यभावोऽस्य ते वद ॥ ७२ ॥
अप्रमत्तो भव ध्यानादाद्येऽन्यस्मिन्विवेचनम् ।

69. If you reply that ether is empty space, then ether must be non-entity, and if you say that that which is not entity is not non-entity, you involve yourself in a contradiction.

70. Ether appears in consciousness, you say; let it thus appear, we reply; to appear is the very nature of a product of Máyá. A non-entity, appearing to be, is false as is the elephant, seen in dreams.

71. As class and individual, personal soul and body, substance and quality are distinct, so grant a distinction between ether and the existent reality: what reason here for your surprise?

72. If you urge that the distinction, though recognised, is not firmly held in the mind, then consider whether it is due to want of concentrating thought or to doubt that this distinction is not firm in your mind.

73. If it be due to the former, concentrate your thoughts

---

70. Ether is not unreal (asat), urges an objector, since it appears in consciousness. The text replies that the presentation in consciousness of unreality is not a self-contradiction. Dreams appear and are false. This inexplicable "how" of things is very Máyá.

71. A doubt is anticipated:—two things being invariably known together cannot be regarded as distinct; therefore, ether, being invariably presented along with the notion of entity (astitá, sc. asti ákášah), cannot be regarded as distinct from reality (sat). Class and individual, the text replies, are not held to be identical, though both are known only together.

कुरु प्रमाणयुक्तिभ्यां ततो दृढतमो भवेत् ॥ ७३ ॥
ध्यानान्मानाद्युक्तितोऽपि दृढे भेदे वियत्सतोः ।
न कदाचिद्वियत्सत्यं सद्वस्तु च्छिद्रवन्न च ॥ ७४ ॥
ज्ञस्य भाति सदा व्योम निस्तत्त्वोल्लेखपूर्वकम् ।
सद्वस्त्वपि विभात्यस्य निश्छिद्रत्वपुरःसरम् ॥ ७५ ॥
वासनायां प्रवृद्धायां वियत्सत्यत्ववादिनम् ।
सन्मात्राबोधयुक्तं च दृष्ट्वा विस्मयते बुधः ॥ ७६ ॥
एवमाकाशमिथ्यात्वे सत्सत्यत्वे च वासिते ।
न्यायेनानेन वाय्वादेः सद्वस्तु प्रविविच्यताम् ॥ ७७ ॥
सद्वस्तुन्येकदेशस्था माया तत्रैकदेशगम् ।
वियत्तत्राप्येकदेशगतो वायुः प्रकल्पितः ॥ ७८ ॥

through contemplation: if to the latter, prove the matter by the criteria of truth and by arguments. Then this distinction will be most firmly grasped.

74. When the distinction between ether and the existent reality has been firmly grounded through contemplation and the criteria of truth and arguments, ether will never appear as the existent reality nor will the existent reality appear as empty space.

75. To the man, who is conscious of this distinction, ether is always present as unreal, as described above; and to him the existent reality also is present as something distinct from empty space.

76. When his impressions of this truth are indelibly stamped upon his mind, the wise man views with surprise another, who holds to the reality of ether and is ignorant of pure existence.

77. Thus the unreality of ether and the reality of the existent principle being established, let the existent reality be examined, by the same method, with reference to air and the other elements.

78. Máyá (is surmised) as conditioning only a part of the existent reality. Ether is of less extent than Máyá and air is surmised to be less extensive than ether.

Digitized by Google

शोषस्पर्शौ गतिर्वेगो वायुधर्मा इमे मताः ।
त्रयः स्वभावाः सन्मायाव्योम्नां ये तेपि वायुगाः ॥ ७९ ॥
वायुरस्तीति सद्भावः सतोवायोपृथक्कृते ।
निस्तत्त्वरूपता मायास्वभावो व्योमगो ध्वनिः ॥ ८० ॥
सतोऽनुवृत्तिः सर्वत्र व्योम्नोनेति पुरेरितम् ।
व्योमानुवृत्तिरधुना कथं न व्याहतं वचः ॥ ८१ ॥
छिद्रानुवृत्तिर्नेतीति पूर्वोक्तिरधुनात्वियम् ।
शब्दानुवृत्तिरेवोक्ता वचसो व्याहतिः कुतः ॥ ८२ ॥
ननु सद्वस्तुपार्थक्यादसत्त्वं चेत्तदा कथम् ।
अव्यक्तमायावैषम्याद् मायामयतापि नो ॥ ८३ ॥
निस्तत्त्वरूपतैवात्र मायात्वस्य प्रयोजिका ।

79. These are the attributes of air; drying power, touch, motion and velocity. The three distinctive attributes, which are supposed to belong to the existent reality and Máyá and ether respectively, also pervade air.

80. The notion of entity in *air is* comes from the existent reality. When air is thought as distinct from the existent reality, the attribute, which attaches to it, viz, that of being inexplicable as entity or non-entity, is the essence of Máyá. The attribute of sound (in air) comes from ether's special attribute (viz, sound).

81. (An objector may urge:—) you have said that the pervasion of the existent reality is universal, but that of ether is not so. Now (you declare for) the pervasion of ether: is not this a contradiction?

82. We reply:—this was what we said, viz, that a vacuity was not pervasive. And now our declaration extends merely to the pervasion of the attribute sound (with regard to the other elements). Where then is the contradiction?

83. A doubt may be stated here: if air be regarded as unreal, since it is different from the existent reality, does it not follow also that the attribute of being composed of Máyá does not belong to air; for the latter is different from Máyá unmanifested (under name and form)?

84. (To this doubt we reply) that to be inexplicable either

सा शक्तिकार्ययोस्तुल्या व्यक्ताव्यक्तत्वभेदिनोः ॥ ८४ ॥

सदसत्त्वविवेकस्य प्रस्तुतत्वात्स चिन्त्यताम् ।

असतोऽवान्तरो भेद आस्तां तच्चिन्तयात्र किम् ॥ ८५ ॥

सद्वस्तु ब्रह्म शिष्टांशो वायुर्मिथ्या यथा वियत् ।

वासयित्वा चिरं वायोर्मिथ्यात्वं मरुतं त्यजेत् ॥ ८६ ॥

चिन्तयेद्वह्निमप्येवं मरुतो न्यूनवर्तिनम् ।

ब्रह्माण्डावरणेष्वेषा न्यूनाधिकविचारणा ॥ ८७ ॥

वायोर्दशांशतो न्यूनो वह्निर्वायौ प्रकल्पितः ।

पुराणोक्तं तारतम्यं दशांशैर्भूतपञ्चके ॥ ८८ ॥

वह्निरुष्णः प्रकाशात्मा पूर्वानुगतिरत्र च ।

as entity or as non-entity is the essential principle of Máyá: that this inexplicability attaches equally to a power and the products (resulting from the power); and these are regarded as distinct, the power being unmanifested, the products being manifested (under name and form.)

85. Since the discrimination of the real and unreal is the point in question, confine your thoughts to it. Grant that there are special points of difference with regard to the unreal (when viewed either as an unmanifested power or as the aggregate of products from a power); but why consider these in this place?

86. Brahma is the existent reality. Air the remaining portion (i. e. the unreal of the preceding verse) is false, like ether. Having been strongly impressed with the unreality of air, a man should extend his thoughts beyond this element.

87. He should regard fire also as unreal (evam), (and) of less extent than air. The question as to the greater or less extension (of the elements) applies to the egg of Brahmá and its coverings.

88. Fire is surmised in air, of less extent than air by ten degrees. This ten-fold progression of the five elements is declared in the Puráṇas.

89. Fire is hot, consisting in light and the pervasion of qualities mentioned above applies to it. *Fire is*:—(thus the

88. c. f. Bhág. Pur. III, 26, 52.

अस्ति वन्हिः अनिस्तत्त्वः शब्दवान्स्पर्शवानपि ॥ ८९ ॥
सन्मायाव्योमवाय्वंशैर्युक्तस्याग्नेर्निजो गुणः ।
रूपं तत्र सतः सर्वमन्यद् बुद्ध्या विविच्यताम् ॥ ९० ॥
सतो विवेचिते वन्हौ मिथ्यात्वे सति वासिते ।
आपो दशांशतो न्यूनाः कल्पिता इति चिन्तयेत् ॥ ९१ ॥
सन्त्यापोऽमूः शून्यतत्त्वाः सशब्दस्पर्शसंयुताः ।
रूपवत्योऽन्यधर्मानुवृत्त्या स्वीयो रसो गुणः ॥ ९२ ॥
सतो विवेचितास्वप्सु तन्मिथ्यात्वे च वासिते ।
भूमिर्दशांशतो न्यूना कल्पिताप्स्विति चिन्तयेत् ॥ ९३ ॥
अस्ति भूस्तत्त्वशून्यास्यां शब्दस्पर्शौ सरूपकौ ।
रसश्च परतो गन्धो नैजः सत्ता विविच्यताम् ॥ ९४ ॥

element of existence, underlying fire, is present to our consciousness) fire is inexplicable either as entity or non-entity : it is possessed of sound and touch.

90. Light (colour, rúpam) is the specific attribute of fire, which is (also) provided with attributes drawn from the existent reality and from the inexplicable Máyá, and from ether and air. With regard to these attributes, we must judge all those other than that of existence (to be unreal).

91. When the conviction has been gained that fire, discriminated from the existent reality, is false, one ought to consider water, surmised to be less extensive (than fire) by ten parts.

92. *Water is;* it shares the nature of Máyá ; it possesses sound, touch and colour :—this is due to the occurrence (in water) of attributes belonging to the other subjects (already mentioned) Its specific attribute is flavour.

93. When convinced that water, discriminated from the existent reality, is unreal, a man ought to consider (elemental) earth as surmised in water, less extensive (than water) by ten parts.

94. (Elemental) *earth is;* it is neither entity nor non-entity; in it are the attributes, sound and touch with colour and flavour, and in addition, its specific attribute smell. Existence (regarded as an attribute) must be discriminated (from these).

पृथक्कृतायां सत्तायां भूमिर्मिथ्याऽवशिष्यते ।
भूमेर्दशांशतो न्यूनं ब्रह्माण्डं भूमिमध्यगम् ॥ ९५ ॥
ब्रह्माण्डमध्ये तिष्ठन्ति भुवनानि चतुर्दश ।
भुवनेषु वसन्त्येषु प्राणिदेहा यथायथम् ॥ ९६ ॥
ब्रह्माण्डलोकदेहेषु सद्वस्तुनि पृथक् कृते ।
असन्तोऽण्डादयो भान्तु तद्भानेऽपीह का क्षतिः ॥ ९७ ॥
भूतभौतिकमायानामसत्त्वेऽत्यन्तबाधिते ।
सद्वस्त्वद्वैतमित्येषा धीर्विपर्येति न क्वचित् ॥ ९८ ॥
सदद्वैतात्पृथग्भूते द्वैते भूम्यादिरूपिणि ।
तत्तदर्थक्रिया लोके यथा दृष्टा तथैव सा ॥ ९९ ॥
सांख्यकाणादबौद्धाद्यैर्जगद्भेदो यथा यथा ।

95. When this (attribute of) existence has been regarded as distinct from the others, the (elemental) earth remains as false. The egg of Brahmá, placed within the elemental earth, is of less extent than the elemental earth by ten parts.

96. Within the egg of Brahmá are the fourteen worlds, and in these worlds dwell the various forms of living bodies.

97. When the existent reality has been discriminated from the living things in the world of Brahmá's egg, the germs and things proceeding from them are (found to be) false. We grant that these are presented to consciousness; (but fail to see) what violence (is done to our monism) by the presentation in consciousness of these things.

98. This knowledge of the unity of the existent reality, which follows upon the conviction that Máyá, the subtile elements and the gross products of these, are false, suffers no contradiction anywhere.

99. When the manifold of sense *(dvaite)*, such as earth and the rest that possess form, are regarded as distinct from the one existent reality, the actions relative to these various objects, are just what they are presented in sense, to be (i. e. they are real from the stand-point of a phenomenal world).

100. The manifold of sense (jagadbheda), which the Sánk-

उत्प्रेक्ष्यतेऽनेकयुक्त्या भवत्वेव तथा तथा ॥ १०० ॥
अवज्ञातं सदद्वैतं निःशङ्कैरन्यवादिभिः ।
एवं का क्षतिरस्माकं तद्द्वैतमवजानताम् ॥ १०१ ॥
द्वैतावज्ञा सुस्थिता चेदद्वैते धीः स्थिरा भवेत् ।
स्थैर्ये तस्याः पुमानेष जीवन्मुक्त इतीर्यते ॥ १०२ ॥
एषा ब्राह्मीस्थितिः पार्थनैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेपि ब्रह्मनिर्वाणमृच्छति ॥ १०३ ॥
सदद्वैतेऽनृतद्वैते यदन्योन्यैक्यवीक्षणम् ।
तस्यान्तकालस्तद्भेदबुद्धिरेव न चेतरः ॥ १०४ ॥
यद्वान्तकालः प्राणस्यवियोगोऽस्तु प्रसिद्धितः ।
तस्मिन्कालेपि न भ्रान्तेर्गतायाः पुनरागमः ॥ १०५ ॥

hyas, Káṇádas, Bauddhas and others demonstrate by numerous arguments, we fully acquiesce in.

101. The (doctrine of the) one existent reality is lightly esteemed by those who fearless (of revelation) differ from us. But even so, what violence is done to our monism? Their dualistic teaching, we must (in turn) disregard.

102. If the disregard for dualism be firmly grounded, the mind will remain firm in the conviction of monism. The man whose mind is thus convinced is termed a jivanmukta (i. e. emancipated while living).

103. "This is the Brahmic state, son of Prithá! He who has obtained it, suffers no more; having remained in it till death, he obtains nirváṇa in the Absolute."

104. The erroneous identification of an unreal duality with the sole existent principle ceases (tasyántakálas) only in the consciousness that these are not identical (i. e. the one alone is true; the many, false). Nor is there any other end to it.

105. Or the "last moment" may be taken in its usual meaning of cessation of life. In this sense also, there is no return of the error, which once has been removed.

---

103. Bhagavad Gítá II. 72.

नीरोग उपविष्टो वा रुग्णो वा विलुठन् भुवि ।
मूर्च्छितो वा त्यजत्वेष प्राणान् भ्रान्तिर्न सर्वथा ॥ १०६ ॥
दिने दिने स्वप्नसुप्त्योरधीते विस्मृतेप्ययम् ।
परेद्युर्नानधीतः स्यात्तद्वद्विद्या न नश्यति ॥ १०७ ॥
प्रमाणोत्पादिता विद्या प्रमाणं प्रबलं विना ।
न नश्यति न वेदान्तात्प्रबलं मानमीक्ष्यते ॥ १०८ ॥
तस्माद्वेदान्तसंसिद्धं सदद्वैतं न बाध्यते ।
अन्तकालेप्यतो भूतविवेकान्निर्वृतिः स्थिता ॥ १०९ ॥
इति पञ्चदश्यां महाभूतविवेकः समाप्तः ।

106. In health, sitting at ease, or sick and rolling on the ground with pain, or in a faint, he (that has true knowledge) may quit his vital breath : error can in no way come (to such an one).

107. Just as a man is not to-morrow as if he were unread, though what has been learnt to-day is forgotten in his dreams and dreamless sleep ; so true knowledge perishes not.

108. Knowledge, founded on evidence is set aside only on stronger conflicting evidence. A more powerful authority than the Vedánta is unknown.

109. Therefore the sole existent reality, established by the Vedánta, is not falsified at the time of death. Thus final emancipation has been shown to come from this inquiry into the elements.

A. V.

(to be continued)

सटीकसंक्षेपशारीरकम् ।

(Continued from page 682. Vol. V.*)*

मू० जातः सुतः सकलवंशविवर्द्धनस्ते
विप्रेति वाक्यसमनन्तरमस्य बुद्धिः ॥
श्रोतुर्मुखाकृतिवशेन तु पुत्रजन्म-
वस्तुन्यवश्यमनुमीयत एव वाले: ॥ ३५९ ॥

टी० ॥ एवं प्रवर्तकवाक्याधीनामेव प्राथमिकीं व्युत्पत्तिमभ्युपेत्य लाघवाद्योग्येतरान्वित एव शब्दार्थो न तु तादृक्कार्यान्वित इत्युक्तमिदानीं सिद्धार्थकवाक्यादपि प्रथमव्युत्पत्तेः संभवाच्च प्रवर्तकवाक्याधीना सा, तत्र च कार्योपस्थित्यभावाच्च कार्यान्वयी सर्वशब्दार्थ इत्याशयेनाह । जातः सुत इति । वाक्यसमनन्तरं वाक्यश्रवणानन्तरम्, अस्य श्रोतुर्विप्रस्य मुखाकृतिर्मुखविकासादिस्तद्वशेन तेनैव लिङ्गेन, तुरवधारणे पुत्रजन्मवस्तुनि पुत्रजन्मरूपवस्तुविषया बुद्धिरनुमीयत इति संबन्धः । पुत्रस्ते जात इति वाक्यश्रवणानन्तरं पितुर्मुखविकासं दृष्ट्वा ज्ञातपुत्रादिपदार्थस्तटस्थोऽयमिदानीमिष्टज्ञानवान्मुखविकासवत्त्वात्संमतवदिति तस्येष्टविषयं ज्ञानमनुमिनोति । तच्चेष्टं वस्तु पुत्रजन्मैवेति पुत्रजन्मवस्तुनीत्युक्तम् । एवं च न सिद्धवाक्यात्परस्मिन् ज्ञानजन्मानुमानं संभवति लिङ्गाभावादित्यसदिति भावः ॥ ३५९ ॥ :: ॥

मू० ॥ भूतार्थनिष्ठवचनादपि शब्दशक्तिः
शक्या ग्रहीतुमुदितेन यथाऽभिधेः ॥
तच्च प्रवर्तकनिवर्तकवाक्यमूल-
शक्तिग्रहैकनियमस्य न हेतुरस्ति ॥ ३६० ॥

टी० ॥ एवमपि कथं पुत्रजन्मादिज्ञानसिद्धिस्तत्राह । भूतार्थनिष्ठेति । उदितेन यथा उक्तेन मुखविकासाद्युपायेन पूर्वोक्तलिङ्गेनेष्टज्ञानानुमानानन्तरं किं तदिष्टमिति जिज्ञासमानः पुत्रस्ते जात इति वक्त्रैव प्रदर्शितेन तत्पदानुलिप्तकुङ्कुमाद्याङ्कितवाससा तर्कयति स्वस्मिन्सुखनिमित्ततयाऽवगतं पुत्रजन्मैव तत्रान्यस्मिन्यथासुखप्रसवादीति निश्चित्येदं पुत्रजन्मज्ञानं कुतोऽस्याभवदिति तत्कारणमालोचयन्प्रस्तुतवाक्यश्रवणानन्तरमेव तज्जन्मदर्शनात्तद्वाक्यमेव पुत्रजन्मज्ञाने निमित्तमिति निश्चित्य सिद्धार्थवाक्यादपि शब्दशक्तिर्ग्रहीतुं शक्यत इति । तत्र लोके । प्रवर्तकनिवर्तकवाक्यं मूलं यस्य शक्तिग्रहस्य स प्रवर्तकनिवर्तकवाक्यमूलशक्तिग्रहः केवलं तन्निष्ठोचरस्य नियमस्य न हेतुरस्तीत्यर्थः ॥ ३६० ॥ :: ॥

Digitized by Google

मू० ॥ सामान्यतः प्रथममेव पदार्थपिण्डो
वाच्योऽस्य वाचकमिदं पदपिण्डरूपम् ॥
इत्याकलय्य पुनरेष विशेषतोऽपि
शब्दार्थसंगतिमवैति जनस्तटस्थः ॥ ॥ ३६१ ॥

टी० ॥ नन्वेवं पुत्राद्यनेकपदार्थसंसर्गरूपवाक्यार्थज्ञानस्य पुत्रादिपदसमुदायात्मकवाक्यजन्यत्वनिश्चयेऽप्यस्य पदस्यास्मिन्नर्थे शक्तिरिति कथं प्रवृत्त्या विना निश्चेतुं शक्यत इत्याशङ्क्याह । सामान्यत इति । संमुग्धाकारेण पदार्थपिण्डः पदार्थसमूहः पदार्थसंसर्ग इति यावत् । अस्य प्रकृतवाक्यस्य । वाचकमस्य वाक्यार्थस्येति शेषः । पुनः सामान्यतो वाक्यात्तदर्थज्ञानयोर्हेतुहेतुमत्त्वग्रहानन्तरम् । एषः व्युत्पित्सुः । विशेषतोऽपि शब्दार्थसङ्गतिं पुत्रादिपदस्य तत्तदर्थविशेषे संगतिम् । अवैति अवगच्छति । सामान्यतोऽर्थसमूहे पदसमूहस्य गृहीतसङ्गतिको हि बालः स्वात्मन्यवगतपुत्रार्थनिष्टसाधनभावः प्रतिपन्नदेवदत्तपुत्रार्तिर्देवदत्त तव पुत्र आर्त्त इति वाक्यश्रवणानन्तरं तस्मिन्नार्तिप्रलिङ्गं मुखादि दृष्ट्वा पूर्ववदनिष्टज्ञानमनुमाय तस्य च वाक्यजन्यत्वं निश्चित्य सुताद्यर्थविशेषे पुत्रादिपदस्य योग्येतरान्विते पृथक्पृथक् संगतिमवगच्छति, अतः प्रथमव्युत्पत्तेः प्रवर्तकवाक्याधीनत्वनियमोक्तिः परस्य भ्रान्तिमूलेति भावः ॥ ३६१ ॥

मू० ॥ काष्ठैः स्थाल्यां पचति विविधैरोदनं पूर्णिकेति
श्रुत्वा बालः सपदि मनुते काष्ठशब्दस्य शक्तिम् ॥
दृष्ट्वा तस्मिन्पचनकरणं प्रज्वलत्काष्ठजातं
न्यायोपायादितरवचसां शक्तिषु प्राक्प्रवीणः ॥ ३६२ ॥

टी० ॥ एवं प्रसिद्धपदसमभिव्याहारादप्यप्रसिद्धपदस्य विनैव कार्यान्वयप्रतीतिं योग्येतरान्विते संगतिग्रहणादपि न शब्दार्थस्य कार्यान्वयित्वनियमः । न च तत्रापि पदान्तरस्य कार्यान्विते प्रथमावगतशक्त्यनुरोधेन कार्यपदाध्याहारोऽस्त्विति वाच्यम् । योग्येतरान्वित एव प्रथमं संगतिग-

होपपादनादित्याशयेनाह। काष्ठैः स्थाल्यामिति। पूर्णिका दासी। इत-रवचसां काष्ठपदव्यतिरिक्तपदानाम्। शक्तिषु भ्रमत्रादिविषयास्वतिशेषः। प्रागेतस्मात्प्रयोगात्पूर्वम्। प्रवीणो निपुणो विद्वान्बालः पूर्णिका विविधैः काष्ठैः स्थाल्यामोदनं पचतीति श्रुत्वा पचनकरणं प्रज्वलत्काष्ठजातं च दृष्ट्वा तस्मिन्काष्ठे न्यायोपायान्न्यायबलेन तत्तदर्थविशेषे स्थाल्यादिपदानां शक्तेर्निश्चयात्परिशेषादिन्यायेन काष्ठशब्दस्य शक्तिं सपदि मनुत इति संबन्धः ॥ ३६२ ॥

मू० ॥ न च किमपि नः कार्यं नाम प्रमाणपथानुगं
यदिह तु पुनर्लिङ्लोडादेरुपैष्यति वाच्यताम् ॥
न खलु तदितो धात्वर्थादेः पृथग्व्यवसीयते
व्रजतु तदिह श्रेयोहेतुर्लिङादिपदार्थताम् ॥ ३६३ ॥

टी० ॥ इदानीं प्रथमव्युत्पत्तेः प्रवर्तकवाक्याधीनत्वनियमेऽपि न कार्यान्विते शक्तिः क्रियातिरिक्तकार्यस्यैव लोकेऽप्रसिद्धत्वादित्याह। न च किमपीति। नः प्रमाणपथानुगमिति संबन्धः। न तावल्लोके धात्वर्थातिरिक्तं कार्यमस्ति। नापि धात्वर्थ एव तत् तस्य धातुनैवाभिहितत्वेन लिङादिनाऽप्यभिधानायोगात्। अनन्यलभ्यस्यैव शब्दार्थत्वात्। न च कार्यत्वाकारेण तस्य लिङर्थत्वमिति वाच्यम्। कार्यत्वस्य कृतिसाध्यतारूपत्वे तस्या अतिप्रसक्तत्वेनाऽप्रवर्तकत्वात् प्रवर्तकाभिधायिलिङर्थत्वायोगात्। तस्मात्कार्यं दुर्निरूपमित्यर्थः। ननु शब्दार्थनिरूपणप्रस्तावे किमिदं कार्यखण्डनं तत्राह। यदिहेति। तुरवधारणे यदेवेत्यर्थः। कार्यस्य लिङर्थत्वं न संभवतीति वक्तुं तदिति न संगतमित्यर्थः। पुनः शब्दोऽलङ्कारार्थः। ननु मयेदं कर्तव्यमिति कार्यमेवानुभूयते इति कथं तदप्रमाणकमित्याशङ्क्य कृतिसाध्यतया धात्वर्थस्तदिच्छा वा तदाकारा चिकीर्षाख्या तथानुभूयते न तदतिरिक्तं किं चिदित्याह। न खल्विति। धात्वर्थः क्रिया आदिपदात् कारकादिग्रहः। कटः कर्तव्यः तृप्तिः कार्येति कारकफलयोरपि कर्तव्यत्वप्र-

तीतेरितः प्रसिद्धाद्धात्वर्थादेः पृथक् न खलु तत्कार्यं व्यवसीयत इत्यन्वयः । ननु कस्तर्हि प्रवर्त्तको यो लिङादिनोच्यते शब्दभावनादेर्बालादिव्यवहाराहेतुत्वेन मध्यमवृद्धप्रवृत्त्यानुमितस्य लिङर्थत्वकल्पनायोगादित्याशङ्क्य सत्यं श्रेयःसाधनत्वमेव ज्ञायमानं बालादिप्रवृत्तौ कारणतया क्लृप्तं प्रवृत्ते लिङाद्यभिधेयं कल्प्यमित्याह । प्रवर्त्त्वित । इह लोके । श्रेयोहेतुरिष्टसाधनम् । भावप्रधानो निर्देशः ॥ ३६३ ॥

मू० ॥ न खलु जगति श्रेयोहेतुप्रतीत्युदयादृते
पुरुषवचनात्क्वापि प्राज्ञः प्रवर्त्तितुमर्हति ॥
पुरुषवचनाच्छ्रेयोहेतुप्रतीत्युदयात्पुन-
स्तदनुवशगो रागोत्पत्तौ ततः स हि चेष्टते ॥ ३६४ ॥

टी० ॥ ननु समिधमाहरेत्याचार्यवचनेन माणवकः प्रवर्त्तते न च तस्य किं चित्तत इष्टं लभ्यते प्रत्युत दुःखमेव महद्भवति तत्कथं श्रेयोहेतुत्वं प्रवर्त्तकं येन तल्लिङर्थो भवेदिति तत्राह । न खलु जगतीति । पुरुषवचनात् आचार्यादिवचनात् । प्राज्ञः प्रेक्षावान् । माणवकस्यापि कलवच्छ्रेयस्करमाचार्याज्ञापालनमदृष्टं वा तादृशमस्त्येव श्रेय इति तत्साधनत्वमेव तत्रापि प्रवर्त्तकं यदि तदुभयार्थी माणवको न स्यात्तर्हि न प्रवर्त्तेतैव । दृश्यन्ते हि दुष्टाः शिष्यास्तथाविधा इति भावः । अस्तु तर्ह्यव्यवधानाद्राग एव प्रवर्तक इत्याशङ्क्याह । पुरुषवचनाच्छ्रेयोहेत्विति । सत्यं चिकीर्षाख्यो धात्वर्थरागः प्रवृत्त्यव्यवहितप्राक्कालेऽस्ति, परं त्वाचार्यादिवचनादिष्टसाधनत्वज्ञानोदयात्पुनः पश्चाद्रागोत्पत्तिः, ततस्तदनुवशगो रागाधीनः स माणवकादिः प्रवर्त्तेत इत्यर्थः । तथा च चिकीर्षाया यन्निमित्तमिष्टसाधनताज्ञानं तदेव बाह्यचेष्टायामपि कारणमित्यर्थः । ननु श्रेयःसाधनत्वमतीतादिसाधारणं कथं प्रवर्त्तकमिति चेन्न । कृतियोग्येष्टसाधनत्वस्य प्रवर्त्तकत्वेनातिप्रसङ्गाभावादित्युक्तत्वादिति ॥ ३६४ ॥

Digitized by Google

मू० ॥ नयनिपुणधीर्बालश्चेष्टां समीक्ष्य समीहितुः
कृततदुचितव्याप्तिज्ञानः पुनर्निज* आत्मनि ।
परतनुगतं श्रेयोहेतुप्रतीत्युदयोत्थितं
चरितविषये रागं तस्य प्रवर्तकमिङ्गति ॥ ३६५ ॥

टी० ॥ एवमिष्टसाधनताज्ञानस्य मतद्वयसंप्रतिपन्नस्य प्रवृत्तिकारणत्वमुपपाद्य तत्र लिङादेः संगतिग्रहं वक्तुं प्रथमं प्रवृत्तिं प्रत्यव्यवहितप्राक्कालीनचिकीर्षानुमानं तद्धेत्विष्टसाधनताज्ञानानुमानं च व्युत्पित्सोराह । नयनिपुणधीरिति । अनुमाने कुशलधीरित्यर्थः । समीहितुः प्रवर्तमानस्य । कृतं तस्यानुमानस्योचितं व्याप्तिज्ञानं येन स कृततदुचितव्याप्तिज्ञानः । निज आत्मनि स्वात्मनि । परस्य प्रवर्तमानस्य तनुगतं श्रेयोहेतुप्रतीत्युदयात्कृतिसाध्येष्टसाधनताज्ञानोत्पत्तेः उत्थानात् तज्ज्ञानादुत्थितमुत्पन्नं चरितविषये तादृशेष्टसाधनतयाऽवगतधात्वर्थे तस्य प्रवर्तमानस्य इङ्गति अनुमिनोति । गामानयेत्यादि लिङादिसमभिव्याहृतं वाक्यं श्रुत्वा प्रवर्तमानवृद्धस्य गवानयनादिचेष्टां दृष्ट्वा बालः पूर्वं स्वात्मनि प्रवृत्तेश्चिकीर्षाजन्यत्वेन व्याप्तिनिश्चयवान् विमता प्रवृत्तिश्चिकीर्षाजन्या प्रेक्षावत्प्रवृत्तित्वान्मदीयभोजनादिप्रवृत्तिवदिति. मध्यमवृद्धे चिकीर्षामनुमाय, सापि वर्णितश्रेयःसाधनताज्ञानजन्या चिकीर्षात्वान्मम भोजनादिचिकीर्षावदिति कृतिसाध्येष्टसाधनताज्ञानं चानुमिनोतीत्यर्थः ॥ ३६५ ॥

मू० ॥ प्रवर्तकोत्थाननिबन्धने ततः
समीहितोपायविशेषवस्तुनि ॥
गिरोऽनुमाय प्रतिपत्तिहेतुतां
विशेषसिद्धौ तु समीहते पुनः ॥ ३६६ ॥

टी० ॥ ततः किं तत्राह । प्रवर्तकोत्थानेति । ततः परतनुगतरागानुमानानन्तरं प्रवर्तकस्य गवानयनादिप्रवृत्तिजनकस्य गवानयनादिकर्त-

* पुरा निज । पा० २ ।

ऽयमिति रागस्योत्थानमुत्पत्तिर्येन तस्य श्रेयः साधनताविशेषज्ञानस्य निब-न्धने विषये समीहितोपायविशेषवस्तुनि कृतिसाध्यत्वविशिष्टेष्टसाधने प्रतिपत्तिहेतुतां गिरो लिङादिमद्वाक्यस्यानुमाय पुनर्विशेषसिद्धौ तु लि-ङादिपदविशेषस्यार्थविशेषे शक्तिसिद्धौ च समीहते वक्ष्यमाणप्रकारेण फ-लवान्भवतीत्यर्थः ॥ ३६६ ॥

मू० ॥ पदान्तरस्यागमनादिहान्यत-
स्तथा पदस्योद्धरणादितो गिरः ॥
विशेषसिद्धिं लभते प्रयत्नवा-
न्पदार्थसंबन्धगतां विचक्षणः ॥ ३६७ ॥

टी० ॥ नन्वेवमपि क्रियाख्यातमात्रस्य तत्र शक्तिः किं वा लिङ्-लोडादेस्तद्विशेषस्यैवेति कथं विवेक्तव्यमित्याशङ्क्य तमेव यत्नविशेषं दर्श-यितुमादौ गवादिपदसाधारणं तद्विवेकोपायमाह । पदान्तरस्येति । अ-न्यतो वाक्यान्तरात्पदस्य प्रयुक्तवाक्ये श्रुतस्य पदस्य इतो गिरः अस्मात् वाक्यादुद्धरणात्त्यागाद्विशेषस्य सिद्धिं निश्चयं लभते । प्रयत्नवान्प्रयुक्तपद-विशेषस्योद्धारे यस्यार्थविशेषस्य ज्ञानं न भवति अन्यत आनीतपदविशेष-ज्ञानाच्च यस्यार्थविशेषस्य ज्ञानं भवति तयोः पदविशेषयोस्तावेवार्थौ भ-वतस्तज्ज्ञानस्य तदन्वयाद्यनुविधानादिति न्यायानुसन्धानयत्नवानित्य-र्थः । अत एव विचक्षणो मेधावी । पदार्थसंबन्धगतां पदतदर्थसंबन्धतच्छ-क्तिविषयां विशेषसिद्धिमिति संबन्धः ॥ ३६७ ॥

मू० ॥ लङादिशब्देऽपगते लिङादौ
प्रत्यागतेऽभीप्सितसाधनत्वम् ॥
प्रतीयते तेन लिङादिशब्द-
स्तदर्थवाचीति स वेत्ति बालः ॥ ३६८ ॥

टी० ॥ उक्तेन सामान्यन्यायेन लिङादिविशेषस्य श्रेयःसाधनता-रूपेऽर्थे संबन्धं साधयति । लङादिशब्द इति । येन गामानयतीति प्रयु-

त्वाद्वाक्यात्तदानयनस्य नेष्टसाधनत्वं प्रतीयते यदा पुनर्लेडादि परित्यज्य तत्रैव वाक्ये आनयेत्यादि विधिपदं प्रयुज्यते तदा तत्प्रतीयते तेन स बालो लिङादिशब्दस्तदर्थवाचीति वेत्तीति संबन्धः । एवं च न लिङा-दिर्लेडादिसाधारणाख्याततत्त्वरूपेण श्रेयःसाधनत्ववाची किं तु लिङ्त्वा-दिनैवेति भावः ॥ ३६८ ॥

मू० ॥ योग्येतरान्वितनया न च वाच्यताऽस्य
कार्यान्वितत्ववपुषा सुतरां न चेष्टा ॥
किं त्वन्वितत्ववपुषा न विशेषणस्य
किं चित्प्रयोजकमिहास्ति निरूपणायाम् ॥ ३६९ ॥

टी० ॥ एवं योग्येतरान्विते गवादिपदानां शक्तिः, कृतियोग्येष्टसा-धनताज्ञानं प्रवर्तकं तत्रैव लिङादेः शक्तिर्न तु कार्ये न वा गवादिपदस्य योग्येतरकार्यान्वये गौरवादित्युक्तम् । नन्वेवमतिलाघवादन्वित एव श-क्तिरस्तु न योग्येतरान्वित इत्याशङ्क्येष्टमेव तदस्माकं सिद्धार्थवादिनामि-त्याह । योग्येतरेति । वाच्यता गवादिपदवाच्यता । अस्य गवादेः । तत्किं का-र्यान्विते शक्तिरिष्टा न तस्यातिगौरवदुष्टत्वादित्याह । कार्यान्वितत्वे-ति । तर्हि किं शुद्धे पदार्थे शक्तिः तदपि न अन्वयप्रतीतेराकस्मिकत्वप्रसङ्गा-दित्याशयेनाकाङ्क्षापूर्वकमाह । किं त्वन्वितत्वेति । नन्वयोग्येनानितरे-णान्वयो न संभवतीति तदपि तत्र विशेषणमिति चेत्सत्यं तेन विना ना-न्वयप्रतीतिरस्ति तथापि शब्दार्थतायां तत्र प्रयोजकं तेन विनाप्यन्वय-मात्रस्य शब्दार्थत्वे तद्विशेषणस्य प्रयोजकत्वेना*निरूपणादित्याशयेना-ह । न विशेषणस्येति । कार्यत्वस्य वा योग्येतरत्वस्य वेत्यर्थः । प्रयो-जकं तदभावे बाधकम् । इह शब्दाभिधेये । ननु यत्किं चिदन्विते गवादौ किं गवादिपदस्य शक्तिरुतानयनादिपदाभिहितान्विते । नाद्यः । वाक्यार्था-

* प्रयोजना । पा० २

नियमप्रसङ्गेन कदा चिद्गामानयेति वाक्यादश्वमानय गां बारयेत्यनुभवप्रसङ्गात् । न द्वितीयः । परस्पराश्रयापत्तेः । आनयनपदेन गोपदाभिहितान्विताभिधाने तदर्थान्वितां गां गोपदमभिदध्यादेवमानयनपदमपीति चेच । गवादिपदेन हि स्वस्वार्थे स्मृतिस्तत्संस्कारोद्बोधो वाधीयत इति वक्तव्यमन्यथा प्रमुष्टसंस्काराणामपि वाक्यार्थानुभवप्रसङ्गात्संस्कारोद्बोध एव पदाधेय इति तत्त्वम् । अन्यथा पदार्थस्मृतिः संस्कारोद्बोधश्च पदजन्याविति गौरवात्स्मृतेराशुविनाशित्वेन तत्तत्पदजन्यपदार्थस्मृतिव्यतिरिक्तसकलपदार्थविषयस्मृत्यन्तरप्रसङ्गाद्वाक्यार्थानुभवसामग्र्या तत्प्रतिबन्धाच्च । संस्कारोद्बोधस्तु यावत्कार्यभावीति नोद्बोधान्तरप्रसङ्गः । पदार्थसंस्कारः पदेनोद्बो॰*ध्यते स आसत्व इत्युच्यते । एवमाकाङ्क्षितयोग्यसंनिहितान्वितं पदान्यभिदधतीति न परस्पराश्रयः । वाक्योत्थानुभवस्यैवेवं विधपदार्थान्वयविषयत्वनियमात्तत्तत्पदोद्बोधितसंस्कारगोचरार्थविशेषनिरूपितान्वयस्य सामान्यान्वयशक्तेरपि पदैरभिधानाद्वाक्यार्थविशेषसिद्धिश्चेति भावः ॥ ३९९ ॥

मू० ॥ यत्के चिदाहुरभिधाय निजान्पदार्था-
नेतावतोपरतवन्ति पदानि तेभ्यः ॥
पश्चाद्विशेषणविशेष्यतया तु तेषां
संसर्गबुद्धिरपराऽवतरिष्यतीति ॥ ३०० ॥

टी० ॥ अभिहितान्वयवादिनां मतमिदानीं दूषयितुमनुवदति । यत्के चिदिति । यदाहुरिति संबन्धः । तदुक्तिमेवाह । अभिधायेति । पदार्थाननन्वितानिति शेषः । एतावता पदार्थमात्राभिधानेन तूपरतवन्ति पर्यवसन्नानि सन्ति न वाक्यार्थानुभवं जनयन्तीत्यर्थः । कथं तर्हि वाक्यार्थबोधस्तेन विना वा कथं श्रोतुः प्रवृत्त्यादिरित्यत आह । तेभ्य इति । पदाभिहितपदार्थेभ्य इत्यर्थः । पश्चात्पदव्यापारोपरमानन्तरम् । तुरवधारणे तेभ्यस्त्वित्यति संबन्धः । तेषां पदार्थानां विशेषणविशेष्यतया संसर्ग-

* पदेन बो । पा॰ २

बुद्धिरिति संबन्धः । अपरा पदजन्यप्रतीतिरन्या । चवतरिष्यति उत्पत्स्यत इत्यर्थः । पदानां हि पदार्थबोधेनैव पर्यवसानमन्यथा विरम्य व्यापारप्रसङ्गात् । पदाभिहिताश्च पदार्था विशेषणविशेष्यतया परस्परसंसृष्टं स्वस्वात्मानं बोधयन्तीति न वाक्यार्थानुभवस्यानुपपत्तिः, न वा श्रोतृप्रवृत्तेः । न चाऽविद्यमानानामतीतादर्थानां कथमनुभावकत्वमिति वाच्यम् । परमते तादृशपदादेरिव ज्ञायमानतयाऽतीतादेरपि ज्ञानकारणत्वोपपत्तेरन्यथा पदेष्वपि तदनुपपत्तेर्दुष्परिहरत्वात्तथा चात्यन्तलाघवाच्छुद्धार्थ एव पदानां शक्तिरिति भावः ॥ ३७० ॥

मू० ॥ तद् दुर्घटं न खलु किं चिदपि प्रमाण-
मस्याः प्रसाधकमुदीरितकल्पनायाः ॥
येनोपलब्धिविषयत्वमुपागतानि
संसृष्टमेव तु पदानि पदार्थमाहुः ॥ ३७१ ॥

टी० ॥ सत्यमनन्वितार्थशक्तावतिलाघवं तथापि शब्दाद्विशिष्टानुभवस्यानुभवादप्रामाणिकीयं त्वत्कल्पनेत्याह । तद् दुर्घटमिति । त्वदुक्तं दुरुपपादमित्यर्थः । कुतस्तत्राह । न खल्विति । कुतो न प्रमाणमिति चेत् । येन पदानामेव संसृष्टार्थबोधकत्वमनुभवसिद्धं तेन त्वदुक्तं विमानमित्याह । येनेति । संसृष्टमेवेति । परस्परमिति शेषः । गवादिपदानि ह्यभियुक्तैर्विशिष्टार्थप्रत्ययोद्देशेनैव प्रयुज्यन्ते तस्यैव श्रोतुः पुरुषार्थजनकत्वात् तदुद्देशेनैव प्रेक्षावता शब्दप्रयोगात् श्रोतारोऽपि ततस्तमेव बुभुत्सन्ते न पदार्थमात्रमिति न पदानां तावतैव पर्यवसानं युक्तमतः किं चिद्गौरवेऽपि प्रामाणिकतया तस्यान्विते पदानां शक्तिस्तयुक्त्याऽनुभवकार्यबलेनैव कल्पनीयेति त्वदुक्ता कल्पना न प्रामाणिकीति भावः ॥ ३७१ ॥

(शेषमग्रे)

काशीस्थराजकीयप्रधानपाठालयाध्यापकेन श्रीद्विवेदहरिनाथशर्मणा ।

Digitized by Google

॥ श्रीः ॥

कैवल्यरत्नम् ।

(*Continued from page* 415. VOL. V.)

वासिष्टलैङ्गोपपुराणे ब्रह्मविद्यासारोद्धारः क्रियते ।

वसिष्टं प्रति श्रीमहादेवः कथयति ।

ईश्वर उवाच ॥

पुरा कल्पान्तरे ब्रह्मन् देवदारुवने शुभे ।
सर्वसिद्धसमाकीर्णे देवदानवसेविते ॥
वापीकूपतडागाद्यैः सरिद्भिः समलंकृते ।
फलमूलसमाकीर्णे पर्वतैश्च समावृते ॥
भृग्वङ्गिरोवसिष्ठाश्च विश्वामित्रश्च गौतमः ।
पुलस्त्यः पुलहश्चापि सुकेशश्च क्रतुस्तथा ॥
मरीचिः कश्यपश्चापि संवर्तः संगवानथ ।
ककुत्स्थः कालभद्रश्च काकोलूकः कथाप्रियः ॥
किरिटी रुद्रभक्तश्च किङ्किणीकिंशुकप्रभुः ।
आदित्यवर्णे आयुष्मनाराध्यो दुरतिक्रमः ॥
दुर्बलो दुन्दुभिर्दुर्गो दूतो दुःशीलवानपि ।
सुमन्तुः कौशिकः कण्वः करुणादिमहर्षयः ।
चत्वारिंशत्सहस्राणि तथैवाष्टसहस्रकम् ॥
तपस्तेपुर्महाप्राज्ञाः कृच्छ्रचान्द्रायणादिभिः ।
यजन्ति यज्ञैर्विविधैरीश्वरं श्रद्धया सह ॥
अहं तेषां मुनीनां तु मायापाशनिवृत्तये ।
आत्मज्ञानप्रदानार्थं देवदारुवनं गतः ॥

कल्याणं वेषमास्थाय मन्मायाशक्तिवैभवात् ।
विष्णुश्च मायया ब्रह्मन् भार्याभून्मम सुन्दरी ॥
तया सह मुने क्रीडां कृत्वा कृत्वा दिगम्बरः ।
वर्णाश्रमसमाचारविनिर्मुक्तस्तया सह ॥
अहं भिक्षाटनं तेषां मन्दिरे कृतवान् द्विज ।
मां दृष्ट्वा मायया नार्यो मोहिता मुनिपुङ्गव ॥
त्यक्तवस्त्रा मुने काश्चित्काश्चित्त्यक्तविभूषणाः ।
काश्चिन्मां वीक्ष्य तिष्ठन्ति काश्चिदालिङ्गनोत्सुकाः ॥
काश्चिन्मां भुङ्क्ष्व भुङ्क्ष्वेति प्रोच्य धावन्ति मां प्रति ।
महर्षीणां सुतास्ते ऽपि मम भार्यां सुशोभनां ॥
दृष्ट्वा मन्मथविद्धाया निर्लज्जा विवशा भृशम् ।
त्यक्तवस्त्रां समालिङ्ग्य भुक्त्यै तां महामुने ॥
केचिन्मोहेन नृत्यन्ति मणिछत्रभ्रूविलासिनः ।
मुने केचित्करोत्येवं कुर्वन्ति परिमोहिताः ॥
एवं नराणां नारीणां कुलं भ्रान्तमभून्मुने ।
तद्दृष्ट्वा मुनयः सर्वे कुपिता मां प्रियां च मे ॥
अतीव परुषं वाक्यं प्रोचुर्मां प्रति सुव्रत ।
शेपुश्च शापैर्मां ब्रह्मन्मायया मम मोहिताः ॥
महामन्त्रैर्महाघोरैरभिचारः कृतो मम ।
तत्सर्वं विफलं ब्रह्मन्नभून्मे चाज्ञया मम ॥
ते संभूय मुनिश्रेष्ठाः मामुपेत्य महामुने ।
पृष्टवन्तो भवान्कस्त्वं किमुद्दिश्य त्वमागतः ॥
इति पृष्टेन तैरुक्तं मया ब्रह्मविदां वर ।
वेदघोषो ऽहमिति प्राज्ञाः पुनर्वक्ष्यामि कारणम् ॥

इदानीं भार्यया सार्द्धं तपश्चर्तुमिहागतः ।
इति मद्वचनं श्रुत्वा मुनयो मुनिपुङ्गव ॥
प्रोचुर्धिक् धिक् महामूढ वस्तोणाच्छाद्य विग्रहम् ।
त्यक्त्वा भार्यां महादुष्टां मोहयन्तीं तपस्विन ॥
इति तेषां वचः श्रुत्वा मम भार्या पतिव्रता ।
न कदा चिद्दृष्टिदोषैर्दुष्टा न ब्रुद्ध्याप्यन्यमिच्छति ॥
इत्युक्त्वा च मया ब्रह्मन् ब्राह्मणा मम मायया ।
संभूयातीव संक्रुष्टाः परुषं वाक्यमब्रुवन् ॥
गच्छ गच्छ महादुष्ट भार्या ते व्यभिचारिणी ।
त्वं च वर्णाश्रमाचारविहीनो बुद्धिपूर्वतः ॥
नान्यमिच्छति भार्या मे इत्यनृतं त्वयेरितम् ।
इत्याकर्ण्य वचस्तेषां सत्यमेवेरितं मया ॥
मद्दृष्ट्या मम भार्येयं मया भिन्ना ह्यविक्रिया ।
रागद्वेषभयक्रोधलोभमोहादिवर्जिता ॥
पुण्यपापविनिर्मुक्ता सर्वदा परमार्थतः ।
अहं च सर्वदा विप्रा वर्णाश्रमविवर्जितः ॥
न कर्त्ता न च भोक्ताहं न च कारयिता तथा ।
धर्माधर्मौ समौ विप्राः सर्वदा परमार्थतः ॥
भवतामात्मविज्ञानमशेषक्लेशनाशनम् ।
नास्ति देहात्मबोधेन कृतं कर्माखिलं सदा ॥
मां च दृष्ट्वा विलोक्यैनां मां च वेदविदां वराः ।
दूषणान्युक्तवन्तस्तु पुण्यं तथास्ति मे सदा ॥
इति मद्वचनं श्रुत्वा मुनयः क्रोधमूर्च्छिताः ।
सर्वे विचार्य संभूय मामेवं पुनरब्रुवन् ॥

अहो विरुद्धं भवता प्रोक्तं चोरेण साहसम् ।
न कर्ता न च भोक्ताहं पुण्यपापविवर्जितः ॥
वर्णाश्रमविनिर्मुक्तस्तपश्चर्तुमिहागतः ।
इत्युक्ता मुनयः सर्वे मायया मम मोहिताः ॥
मोहेश्च मुष्टिभिर्दण्डैस्ताडयांचक्रिरे भृशम् ।
परिभूतेन तैर्ब्रह्मन्मया भिक्षाटनं कृतम् ॥
दृष्ट्वा पूर्वं वसिष्ठस्य भार्यातीव पतिव्रता ।
अरुन्धतीति विख्याता यथा भार्या तवानघ ॥
मां प्रणम्य महाभक्त्या प्रत्युद्गम्य तपस्विनी ।
प्रक्षाल्य पादौ तोयेन दत्वा वन्दनमादरात् ॥
संप्रेक्ष्य शिथिलं देहमभिघातममुं द्विजैः ।
सन्धयामास भैषज्यैः दत्वा भिक्षां यथाबलम् ॥
पुनश्च मां प्रणम्येदमब्रवीद्वचनं सती ।
को भवान् कुत आयातः किमाचारो भवानिति ॥
अहमप्युक्तवानेवं केवलं कृपयानघ ।
नाहं देवो न गन्धर्वो न यक्षो न च राक्षसः ॥
न मनुष्यो न सर्पश्च न पशुर्न च पक्षिराट् ।
न च शब्दो न च स्पर्शो न च रूपरसादयः ॥
नाहं पृथ्वी न सलिलं न च वह्निर्न चानिलः ।
न चाकाशो न देहश्च न च प्राणो न चेन्द्रियम् ॥
न कर्ताहं न भोक्ताहं न वर्णी क्वापि वाश्रमी ।
न च विद्या न चाविद्या न साध्यो ऽहं न साधनम् ॥
न साधको ऽहं कल्याणि सिद्धानां प्रवरोस्म्यहम् ।
नागतोहं महाप्राज्ञो व्योमवत्सर्वगः सदा ॥

तथापि मयतलाद्स्मात्घोराद्बेदमयादहम् ।
आगतो भार्यया सार्द्धमनया धर्मचारिणि ॥
स्वच्छन्दवृत्तिरावासो मम चास्याश्च सुन्दरि ।
त्वं च मामपि विद्धोत्रं मम वाक्यपरिग्रहात् ॥
प्रसन्नो ऽहं तवातीवमापं शुश्रूषया मम ।
इत्युक्त्वा तामहं ब्रह्मन्ननुगृह्य गृहान्तरम् ॥
अगमं भार्यया सार्द्धं भिक्षार्थं मुनिसत्तम ।
गच्छन्तं मुनयो दृष्ट्वा प्रोचुस्तेपरिमोहिताः ॥
तिष्ठ तिष्ठ सदा स्त्रीणां मोहनं पुरुषाधम ।
लिङ्गमेतत्समुत्पाद्य वने ऽस्मिन् भार्यया विना ॥
ततो लिङ्गं समुत्पाद्य तत्रैवान्तर्हितो ऽभवम् ।
मामालिङ्ग्य च मद्भार्यामपश्यन्मुनयो मुने ॥
उत्पातो भूत्तदा सर्वलोकानां च भयङ्करः ।
न तदा राजते सूर्यो न चन्द्रो न च पावकः ॥
भूकम्पश्च समुद्भूतो मन्त्रास्तेषां न भान्ति च ।
एवं संक्षुभिते ऽरण्ये मुनयः संशितव्रत ॥
परस्परं समालोक्य ब्रह्मलोकं समासदुः ।
तस्मिन्दिव्यासनासीनं कोटिसूर्यसमप्रभम् ॥
ब्रह्माणं मुनयो दृष्ट्वा स्तोत्रैः स्तुत्वाभिवाद्य च ।
शपथं चक्रिरे सर्वे मुनयो मुनिपुङ्गव ॥
कश्चित्सभार्यः शान्तात्मा लक्षे विकृतलक्षणः ।
सर्वाश्रमविनिर्मुक्तो देवदारुवनं गतः ॥
मोहयामास सौन्दर्यान्नारीणां कुलमाशु नः ।
तस्य भार्या च सौन्दर्याद्दूषयामास पुत्रकान् ॥

दत्ताः शापाः परं ध्यातास्ते च शापाः पराहताः ।
अभिचारः कृतो ऽस्माभिः सो ऽपि देव पराहतः ॥
अस्माभिर्मुष्टिभिर्दण्डैस्ताडितश्च परात्परः ।
सो ऽपि स्वकार्यमुत्पाद्य लिङ्गं त्यक्त्वा मुनीश्वराः ॥
तथैव भार्यया सार्द्धं क्षणादन्तर्हितो ऽभवत् ।
उत्पाताश्चाभवन् दिव्या वयं भूताश्च शंकर ॥
को ऽयं सभार्यः पुरुषो देवदारुवनं गतः ।
भवन्तमेव शरणं प्रपन्ना वयमीश्वर ॥
कारुण्येन तमस्माकं ब्रूहि सर्वज्ञ शाश्वत ।
एवं विज्ञापितो ब्रह्मा ध्यात्वा मां त्रिपुरान्तकम् ॥
स्तोत्रैः स्तुत्वा पुनर्बुध्वा मुनिभ्यः पर्यभाषत ।
अहो महेश्वरः साक्षात्सर्वलोकैकनायकः ॥
विष्णुना सह संप्राप्तो देवदारुवने बुधाः ।
भाग्यहीना भवन्तो हि दृष्ट्वा हि परिमोहिताः ॥
भवद्भिः किं कृतं कर्म भवद्भिः किं कृतं वृथा ।
जन्मान्तरसहस्रेषु कृतपुण्यफलं द्विजाः ॥
अमुं विसृज्य मां प्राप्ताः वृथा हा मोहवैभवम् ।
यस्माज्जातं जगत्सर्वं यस्मिन्नेव विलीयते ॥
तमागतं शिवं दृष्ट्वा कथं मूर्खैरुपेक्षितम् ।
वातादयो भयाद्यस्य स्वकार्येषु निरन्तरम् ॥
प्रवर्त्तन्ते स ईशानो हा भवद्भिरुपेक्षितः ।
समासाद्य निवर्त्तन्ते विकल्पा मोहसंभवाः ॥
तस्यापचारो मोहेन भो भवद्भिः कृतो द्विजाः ।
कामक्रोधमहालोभविषये यस्य भेषजम् ॥

आगतो वेदकान्ताराद् यो भवद्भिरुपेक्षितः ।
ध्यायन्ति योगिनो नित्यं हृदये यं जितेन्द्रियाः ॥
तमागतं समासाद्य हा भवद्भिरुपेक्षितः ।
यत्प्रसादेन देवानामैश्वर्यमतुलं भवेत् ॥
तमासाद्य महादेवं हा भवद्भिरुपेक्षितः ।
यस्तु सर्वजगत्साक्षी नित्यानन्दो निरञ्जनः ॥
तमागतं स्वयं मूर्खैर्हा भवद्भिरुपेक्षितः ।
एष ब्रह्मैष देवेन्द्र एष एव प्रजापतिः ॥
एष धाता विधाता च सर्वात्मा सर्वेवर्जितः ।
शिवरुद्रमहेशानशंकरब्रह्मसंज्ञितः ॥
अभिधानाभिधेयादिभावहीनो निरास्पदः ।
प्रत्यक्त्वात् सदा स्वस्य भासा सर्वावभासकः ॥
सर्ववस्तुतया साक्षात्स्वयमेव विजृम्भितः ।
पञ्चक्लेशविनिर्मुक्तः श्रीमत्पञ्चाक्षराश्रयः ॥
कृपया केवलं विप्रा अमूर्तो मूर्तिमाश्रितः ।
देवदारुवनं प्राप्तो विष्णुना विश्वयोनिना ॥
तमेव मुक्तिदं बुध्वा व्रजध्वं शरणं बुधाः ।
इतः पूर्वं कृतं कर्म भवद्भिरखिलं वृथा ॥
लिङ्गार्चनं विना तेन मोहितं देवमायया ।
तद्भवद्भिर्यथा दृष्टं लिङ्गं भूमौ निपातितम् ॥
तल्लिङ्गसदृशं लिङ्गं कृत्वा श्रद्धापुरःसरम् ।
पञ्चाक्षरेण मन्त्रेण प्रणवेन सहादरात् ॥
पूजयध्वं सपत्नीकाः स्वपुत्रैरखिलैः सह ।
श्रीकालहस्तिशैलस्य स्थाने सर्वार्थसाधकम् ॥

माघमासे मघर्क्षे तु पर्वयुक्ते द्विजोत्तमाः ।
सुवर्णमुखरी पुण्या नदी यत्र स्थिता सदा ॥
यस्यां गङ्गा मघर्क्षे तु स्नात्वा मुक्ता स्वपापतः ।
यस्यां गोदावरी स्नात्वा विमुक्ता पापपञ्जरात् ॥
यस्यामन्यानि तीर्थानि स्नात्वा मुक्तानि पाप्मभिः ।
तस्यां स्नात्वा मुनिश्रेष्ठा जितक्रोधा जितेन्द्रियाः ॥
श्रीकालहस्तिशैले यं शीघ्रं संसारनाशनम् ।
दृष्ट्वा प्रदक्षिणं कृत्वा प्रणम्य भुवि दण्डवत् ॥
यथाशक्ति धनं दत्वा श्रद्धया शिवयोगिने ।
ब्राह्मणेभ्योऽथ वान्येभ्यो दिनमेकमुपोषिताः ॥
पुनः स्वमाश्रमं गत्वा पूजयध्वं महेश्वरम् ।
देवदेवो महादेवः साम्बः सर्वफलप्रदः ॥
आगमिष्यति तं पूज्य प्रसादात्तस्य सुव्रताः ।
ऐश्वरं परमं ज्ञानं लब्ध्वा वेदान्तवाक्यजम् ॥
छित्वा मायां महानन्दं भजध्वं मोक्षसंज्ञितम् ।
इत्युक्ता मुनयो ब्रह्मन् ब्रह्मणा परमेष्ठिनम् ॥
प्रणम्य दण्डवद्भूमौ ब्राह्मणा गद्गदस्वराः ।
स्तोत्रैः स्तुत्वा महाभक्त्या नमस्कृत्य पुनः पुनः ॥
श्रीकालहस्तिशैलाख्यं स्थानं ते मुनयो गताः ।
माघे मासि मघर्क्षे तु स्वदारैः स्वसुतैः सह ॥
सुवर्णमुखरीं प्राप्य स्नानं तस्यां प्रचक्रिरे ।
पूर्वजन्मसु पापानि तानि तानि महामुने ॥
यानि तानि विनष्टानि स्नाने तस्यां क्षणाद्द्विज ।
पुनर्ब्रह्मद्विजश्रेष्ठाः स्थानेऽस्मिन् परमेश्वरम् ॥ (शेषमग्रे)

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

१ इष्टिप्रकरणम् ।

(Continued from page 16. Vol. VI.)

५१५ धर्मसभायां व्यवहारादिभाषणायेन्द्रियवीर्यप्रतिष्ठार्थमिष्ट्या यक्ष्ये इति संकल्पः । इन्द्राग्नी रोचनादिव इति प्रधानानुवाक्या । श्नथद्वृत्रमिति याज्या । अन्यत्सर्वं प्रजाकामेष्टिवत् । इयमिन्द्रियवीर्यप्रतिष्ठाकामेष्टिरुच्यते ॥

५१६ एतदिष्टिविधानानन्तरं श्रुतौ पौष्णं चरुमनुनिर्वपेतेत्युक्तम् । इन्द्रियवीर्यप्राप्त्यर्थमिष्ट्या यक्ष्य इति संकल्पः । पूषा देवता । चरुर्द्रव्यम् । वयमुत्वापथस्पत इति प्रधानानुवाक्या । पथस्पथः परिपतिं वचस्येति याज्या । पुष्टिमान्पशुमानित्यनुमन्त्रणम् । यत्र विशेषतः संयाज्ये नोक्ते तत्र पूर्वेष्टिगते संयाज्ये भवतः । अन्यत्प्रकृतिवत् । इयमनुनिर्वापपौष्णेष्टिः ॥

५१७ जनसमूहं प्राप्तो यजमानः प्रतिष्ठाकाम इष्ट्या यक्ष्य इति संकल्पयति । क्षेत्रपत्यश्चरुः । क्षेत्रस्य पतिना वयमित्यनुवाक्या । क्षेत्रस्य पते मधुमन्तमूर्मिमिति याज्या । अन्नाद इत्यनुमन्त्रणम् । अन्यत्प्राकृतम् । इयं क्षेत्रपत्येष्टिः ॥

५१८ रक्षोगणपीडानिवृत्त्यर्थममावास्यायां महारात्रे रक्षोहननार्थमिष्ट्या यक्ष्य इति संकल्पयति । अग्नये रक्षोघ्ने ऽष्टाकपालः पुरोडाशः । वस्त्रादिना परितः प्रपणं कृत्वा प्रधानयागः । देवताया यद्विशेषणं स गुण इत्युच्यते ॥

५१९ तथा च प्रकृते ऽग्ने रक्षोहेति विशेषणं गुणस्तस्य विशेष्यविभक्त्यन्तस्य विशेष्योद्देशानन्तरं गुणस्यापि निर्देशः । एवं सर्व-

गुणानाम् । कृणुष्वपाज: प्रसितिमिति पञ्चदशर्च: आद्याभ्यासरहिता: सामिधेन्य: । रक्षोहणं वाजिनमाजिघर्मि इति पुरोनुवाक्याऽग्निर्ज्योतिषा बृहतेति याज्या । अन्नाद इत्यनुमन्त्रणम् । प्राक् स्विष्टकृत: सुवाहुतिमुपजुहोत्यध्वर्युरुत स्वानास इत्यृचा । परिस्तरणं दूरीकृत्य स्विष्टकृदादि । अन्यत्प्राकृतम् । इयं राक्षोघ्नेष्टि: ॥

५२० गोमरणनिवृत्त्यर्थं पुरुषमरणनिवृत्त्यर्थं भयनिवृत्त्यर्थं पूतिगन्धनिवृत्त्यर्थं च पृथगिष्टिसंकल्प: अग्नये सुरभिमते ऽष्टाकपाल: । प्राणेषु सुगन्धान्निक्षिपति । सुगन्धवन्त ऋत्विज: कर्म कुर्वन्ति । अग्निर्होतान्यसीददित्यनुवाक्या । साध्वीमकर्देववीतिमिति याज्या । उक्तमनुमन्त्रणम् । प्राकृतमन्यत् । इयं सुरभिमदिष्टि: ॥

५२१ शेषजातिमरणनिवृत्त्यर्थं संकल्प: । अग्नये क्षामवते ऽष्टाकपाल: । अक्रन्ददग्निस्तनयन्नित्यनुवाक्या । त्वे वसूनि पुर्वणीकेति याज्या । अग्निदेवताकयागे प्रायो ऽन्नाद इत्यनुमन्त्रणम् । गृहदाहनिवृत्तये ऽप्ययमेवेष्टि: । इयं क्षामवदिष्टि: ॥

५२२ प्रतिबन्धकनिवृत्त्या काम्यकर्मफलसिद्ध्यर्थं संकल्प्य । अग्नये कामायाष्टाकपाल: । तुभ्यं ता अङ्गिरस्तमेत्यनुवाक्या । अश्याम तं काममिति याज्या । इयं कामेष्टि: ॥

५२३ सर्वायु: सिद्ध्यर्थं संकल्प: । अग्नय आयुष्मते ऽष्टाकपाल: । इन्द्राय त्रात्रे एकादशकपाल: । आनो अग्ने सुकेतुनेत्यग्नेराज्यभागस्यानुवाक्या । त्वं सोम महेभगमिति सोमस्य । अनयोर्जीवातुपदवत्त्वादिमौ जीवातुमन्तावुच्येते ॥

५२४ आयुष्टे विश्वतो दधदित्यग्नेरायुष्मतो ऽनुवाक्या । आयुर्दा

Digitized by Google

अग्नइति याज्या । त्रातारमिन्द्रमिति त्रातुरिन्द्रस्यानुवाक्या । मा ते अस्यामिति याज्या । उभयवायुष्मानित्यनुमन्त्रणम् । पाहि नो अग्नएकयेति अग्ने त्वं पारयामव्यो अस्मानिति च संयाज्ये । इयमायुष्कामेष्टिः ॥

५२५ भूतिकाम इष्ट्या यक्ष्यइति संकल्पः । अग्नये जातवेदसे ऽष्टाकपालः । तस्मै ते प्रतिहर्यतेत्यनुवाक्या । दिवस्परि प्रथमं जज्ञइति याज्या । भूतिमानित्यनुमन्त्रणम् । इयं भूतिकामेष्टिः ॥

५२६ रुचं कामयमानः संकल्प्य । अग्नये रुक्मवते ऽष्टाकपालः । शुचिः पावकवन्द्य इत्यनुवाक्या । दृशानो रुक्मउर्व्या व्यद्यो-दिति याज्या । इयं रुक्कामेष्टिः ॥

५२७ तेजस्कामः संकल्प्य । अग्नये तेजस्वते ऽष्टाकपालः । आयद्दिवे नृपतिं तेज आनडित्यनुवाक्या । स तेजीयसा मन-सेति याज्या । इयं तेजस्कामेष्टिः ॥

५२८ अन्नकामेष्टिः । अग्नये ऽन्नवते ऽष्टाकपालः । उक्षान्नाय वशा-न्नायेत्यनुवाक्या । वद्याहि सूनो अस्येति याज्या । इयमन्न-कामेष्टिः ॥

५२९ अन्नाद्यकामः संकल्प्य । अग्नये ऽन्नादायाष्टाकपालः । तुभ्यं ता अङ्गिरस्तमेति पुरोनुवाक्या । तं अश्याम तं काममग्नइति याज्या । इयमन्नाद्यकामेष्टिः ॥

५३० अन्नपतित्वकामस्य । अग्नये ऽन्नपतये ऽष्टाकपालः । पूर्वेष्टि-मते याज्यानुवाक्ये । इयं अन्नपतित्वकामेष्टिः ॥

५३१ दीर्घरोगमुक्त्यर्थं संकल्प्य । अग्निः पवमानः अग्निः पावकः अग्निः शुचिः । एतास्तिस्रो देवताः । तुल्यान्यष्टाकपालाः पुरोडाशाः । अन्वाहार्यमासाद्य हिरण्यं दक्षिणां ददाति । अग्न

अग्ने: पवमानस्य अग्न आयूंषि पवस इत्यनुवाक्या । अग्ने पवस्वेति याज्या । अग्ने पावक रोचिषेत्यनुवाक्या । स नः पावकदीदिव अग्नेः पावकस्य इति याज्या । अग्निः शुचिव्रततम इत्यनुवाक्या । उदग्ने अग्नेः शुचेः शुचयस्तवेति याज्या । इयं चिररोगमुक्तिकामेष्टिः ॥

५३२ चक्षुष्कामस्य । चक्षुर्दोषनिवृत्त्यर्थं इष्ट्या यक्ष्ये इति संकल्पः । पूर्वेष्टिवत्सर्वम् । इयं चक्षुष्कामेष्टिः ॥

५३३ पुत्रकामस्य अग्नये पुत्रवते ऽष्टाकपालः । इन्द्राय पुत्रिणे ऽष्टाकपालः । यस्त्वा हृदा कीरिणेति प्रथमस्यानुवाक्या । यस्मै त्वं सुकृते जातवेद इति याज्या । त्वे सुपुत्र शवस इति द्वितीयस्यानुवाक्या । उक्थउक्थे सोम इन्द्रं ममादेति याज्या । स्विष्टकृतो ऽग्निस्तुविश्रवस्तममित्यनुवाक्या । अग्निर्ददाति सत्पतिमिति याज्या । इयं पुत्रकामेष्टिः ॥

५३४ रसकामस्य । अग्नये रसवते ऽजक्षीरे चरुः । अत्र पयसः प्राशयनं नापाम् । अग्ने रसेन तेजसेत्यनुवाक्या । आपो अद्यान्वचारिषमिति याज्या । इयं रसकामेष्टिः ॥

५३५ वसुकामस्य । अग्नये वसुमते ऽष्टाकपालः । वसुर्वसुपतिर्हिकमित्यनुवाक्या । त्वामग्ने वसुपतिं वसूनामिति याज्या । इयं वसुकामेष्टिः ॥

५३६ पतितत्वेन जनैरभिशस्यमानस्येष्टिः । वैश्वानराय द्वादशकपालः । वरुणाय चरुः । दधिक्राव्णश्चरुः । वैश्वानरो न ऊत्ये इत्यनुवाक्या वैश्वानरस्य । त्वमग्ने शोचिषेति याज्या । वरुणस्यावते हेडो वरुणेत्यनुवाक्या । उदुत्तमं वरुणेति याज्या । दधिक्राव्णो अकारिषमिति दधिक्राव्णो ऽनुवाक्या । आदधिक्राः

यवसा पशु कृष्टीरिति याज्या । अन्वाहार्यमासाद्य हिरण्यं दक्षिणा । इयमभिशापनिवृत्तीष्टिः ॥

५३० ग्रामकामस्य । अग्नये वैश्वानराय द्वादशकपालः । मरुद्भ्यः सप्तकपालः । आहवनीयायतनाद् बहिः वैश्वानराय द्वादशकपालान्युपधाय प्रदक्षिणमावृत्य गार्हपत्यस्य पश्चान्मरुद्भ्यः सप्तकपालान्युपदधाति । ततस्त्वग्निना पर्यग्निकरणम् । दक्षिणं परिधिसन्धिं विमुच्य वैश्वानरमुद्रासयति । दक्षिणपरिधिमध्येन वा । पात्रान्तरे मारुतमुद्रास्य गार्हपत्यसमीपे स्थापयति । वेद्यां वैश्वानरमासादयति । सामिधेन्यनुवचनकाले वेद्यां मारुतं सादयति । वैश्वानरयागः पूर्ववत् । द्वैधसूत्रे ऽत्र देवताविपर्यासः । मारुतस्यावदायान्यत्र निधाय वैश्वानरस्यावदायान्यत्र निधाय प्रथमं मारुतस्य यागः । ततो वैश्वानरस्य । अथ वा मारुतस्यावदानादि यागान्तं कृत्वा वैस्वानरस्यावदानादियागः । वैश्वानरस्य वैश्वानरो न ऊत्येत्यनुवाक्या । पृष्टो दिवीति याज्या । मरुतां तु मरुतो यद्व वो दिव इत्यनुवाक्या । याव: शर्म शशमानायेति याज्या । मरुतामनुमन्त्रणं प्रायोर्च्छेध्यासमिति । इयं ग्रामकामेष्टिः ॥

५३८ भिद्यमानद्रव्यप्राप्तिकामस्य । अग्नये वैश्वानराय द्वादशकपालः । वैश्वानरो न ऊत्येत्यनुवाक्या । वैश्वानरस्य सुमतावित्ति याज्या । इयं भिद्यमानद्रव्यप्राप्तिकामेष्टिः ॥

५३९ भिक्षितद्रव्यप्राप्त्यनन्तरं वैश्वानर्या यजेत । प्रतिष्ठाकाम इष्ट्यायक्ष्य इति संकल्पः । पूर्ववदिष्टिः । पशुकामस्य । ऐन्द्रश्चरुः । इन्द्रं वो विश्वतस्परीत्यनुवाक्या । इन्द्रं नरो नेमधितेति याज्या । इयं पशुकामेष्टिः ॥

५४० अथ द्वितीया । इन्द्रायेन्द्रियावते एकादशकपालः । इन्द्रियाणि शतक्रतो इत्यनुवाक्या । अनुते दायिमह इन्द्रियायेति याज्या । इन्द्रियाव्यन्नाद इत्यनुमन्त्रणम् । इयं द्वितीया पशुकामेष्टिः ॥

५४१ ब्रह्मवर्चसकामस्य । इन्द्राय घर्मवते एकादशकपालः । आयस्मिन्त्सप्तेत्यनुवाक्या । आमासु पक्वमिति याज्या । ब्रह्मवर्चसीत्यनुमन्त्रणमिन्द्रायेन्द्रियावते तथा इन्द्रायार्कवते च तथैव । इयं ब्रह्मवर्चसकामेष्टिः ॥

५४२ अन्नकामस्य । इन्द्रायार्कवतएकादशकपालः । इन्द्रमिद्गाथिनो बृहदित्यनुवाक्या । गायन्ति त्वा गायत्रिण इति याज्या । इन्द्रियाव्यन्नाद इत्यनुमन्त्रणम् । इयमन्नकामेष्टिः ॥

५४३ भूतिकामस्य विहविष्का । इन्द्राय घर्मवते एकादशकपालः । पूर्वोक्ता याज्यानुवाक्याः । इन्द्रियाव्यन्नाद इति सर्वेषामनुमन्त्रणम् । इयं भूतिकामेष्टिः ॥

५४४ पापक्षयकामस्य । इन्द्रायांहोमुचे एकादशकपालः । अंहोमुचे प्रभरेमामनीषेत्यनुवाक्या दिदेव यन्मेति याज्या । अंहोमुगित्यनुमन्त्रणम् । इयं पापक्षयकामेष्टिः ॥

५४५ बद्धो वा शत्रुवेष्टितो वा तन्मोक्षार्थं संकल्प्य । इन्द्राय त्रात्रे एकादशकपालः । त्रातारमिन्द्रमवितारमिन्द्रमित्यनुवाक्या । मा ते अस्यां सहसावन्निति याज्या । त्रातइत्यनुमन्त्रणम् । इयं बन्धादिमोक्षकामेष्टिः ॥

५४६ महायज्ञान्वाजपेयादीन्कर्तुमशक्तस्तत्काम इष्टिं संकल्प्य । इन्द्रायार्काश्वमेधवते एकादशकपालः । अमवत्ते रथमित्यनु-

वाक्या । वृष्णो यज्ञ वृषेति याज्या । महायज्ञवानित्यनुमन्त्रणम् । इयं महायज्ञकामेष्टिः ॥

१४७ ग्रामकामस्य द्वितीया । इन्द्रायान्वृजवे एकादशकपालः । अन्व-हमासा अन्वित्यनुवाक्या । अनु ते दायिमह इति याज्या । ग्रामवानित्यनुमन्त्रणम् । द्वितीया ग्रामकामेष्टिः ॥

१४८ दत्तद्रव्यप्राप्तिकामस्य । इन्द्राय प्रदात्रे एकादशकपालः । प्रदातारं हवामह इत्यनुवाक्या । प्रदाता वज्री वृषभ इति याज्या । प्रदातृमानित्यनुमन्त्रणम् । दत्तद्रव्यप्राप्तिकामेष्टिः ॥

१४९ तुल्येभ्यो ऽधिकश्रीकामस्य । इन्द्रायैकादशकपालः । रेवतीर्नः सधमाद इत्यनुवाक्या । प्रोष्वस्मा इति याज्या । अधिकश्रीमा-नित्यनुमन्त्रणम् । अधिकश्रीकामेष्टिः ॥

१५० अध्वरयज्ञज्योतिष्टोमादियज्ञकामस्य । आग्नावैष्णव एकादशक-पालः । अग्नाविष्णू सजोषसेत्यनुवाक्या । अग्नाविष्णू महितद्धामि-ति याज्या । यज्ञवानित्यनुमन्त्रणम् । इयं यज्ञकामेष्टिः ॥

१५१ ब्रह्मवर्चसकामस्य द्वितीया । पुष्यनक्षत्रयुक्तपौर्णमास्यां प्रातर-ग्निहोत्रहोमानन्तरं ब्रह्मवर्चसकाम इष्ट्या यक्ष्ये इति संकल्पय-ति । सोमारुद्रौ देवता । चरुर्द्रव्यम् । श्वेतवत्सायाः श्वेतवर्णा-या गोर्दुग्धं मथितं सदाज्यं भवति । तेनाज्येन हविषः पात्राणां प्रोक्षणं मार्जनं च । अतः प्रोक्षणीपात्रे तदाज्यमेव जलस्थाने आनयति । उन्महतमन्त्रे अप्शब्दस्य स्थाने आज्य-पदस्योहः तद्विशेषणानां क्लीबत्वमेकवचनान्तता ग्राह्या । प्रोक्षणमन्त्रे ऽपि तथैव । द्वैधसूत्रे ऽनुक्रमणकलो स्रुवेण तदाज्यं प्रक्षिप्य तेन जलेन प्रोक्षणमार्जनानि विहितानि प्रोक्षणीरासा-

दयेति प्रैषे प्रोक्षणमासादयेत्यूहः । निनयनमन्त्रे गच्छतेत्यस्य-स्थाने गच्छेतिपदम् । प्रधानयागकाले विहारस्य कटादिभिः परिश्रयणम् । तदपहाय स्विष्टकृदादि । सामिधेनीषु पृथुपाजा इत्यस्याः पूर्वं मनू देववत इति न यजमान रिष्यसीति च द्वे ऋचौ प्रक्षेप्तव्ये तथा च सप्तदश सामिधेन्यः । सोमारुद्राविवृ-हतमित्यनुवाक्या । सोमारुद्रायुवमिति याज्या । ब्रह्मवर्चसीत्य-नुमन्त्रणम् ॥

५५२ भाविदुःस्वप्नत्वाभावकामस्य सोमापौष्णश्चरुः । सोमापूषणा जननेत्यनुवाक्या । इमौ देवौ जायमानाविति याज्या । सुप-मेंत्यनुमन्त्रणम् । इयं दुःस्वप्नत्वाभावेष्टिः ॥

५५३ समाने श्रैष्ठ्यमिच्छन् संकल्प्य । अग्नये वसुमतेऽष्टाकपालः । सोमाय रुद्रवते चरुः । इन्द्राय मरुत्वत एकादशकपालः । वरुणायादित्यवते चरुः । सर्वासां तन्त्रेण युगपत्प्रधानयागः । सर्वा देवताश्चतुर्थ्यन्ता उद्दिश्य अनुब्रूहीति प्रैषः । एवं सर्वत्र । उपस्तीर्य सर्वेषां क्रमेण द्विर्द्विरवदाय युगपद्यजति । पञ्चमे प्रयाजे स्वाहाग्निं वसुमन्तं सोमं रुद्रवन्तमिन्द्रं मरुत्वन्तं वरु-णमादित्यवन्तं स्वाहेति सर्वेषां सकृत्स्वाहाशब्दः । सर्वासामे-कैवाग्निः प्रथमो वसुभिरित्यनुवाक्या । सनो देवो वसुभिरि-ति याज्या । श्रेष्ठ इत्यनुमन्त्रणम् । सप्तदश सामिधेन्यः । वार्त्रघ्नावाज्यभागौ । प्रेद्धो अग्न इमो अग्न इति संयाज्ये । इयं संज्ञानीष्टिरुच्यते ॥

५५४ यो मृत्यो बिभेति स पूर्णायुःप्राप्त्यर्थं संकल्पयत्यायुष्कामः । शतकृष्णलया यक्ष्य इति । प्रजापतिर्देवता । आज्ये हिरण्यनिर्मि-

तण्डुलप्रमाणकृष्णलमयश्चरुर्द्रव्यम् । पात्रासादने पक्वा चरुस्थाली अवहननाद्यभावादुलूखलादेर्नासादनम् । घृतस्यैव प्रणीतापात्रे आनयनम् । घृतं प्रणेष्यामीति प्रैषादि भवति । दारुपात्र्यां कृष्णलान्याप्य प्रकृतिवन्निर्वपति । ध्रुवासीतिमन्त्रेण नवं चरुपात्रमधिश्रित्य तिरःपवित्रे प्रणीताज्यमानीय घर्मोऽस्येत्यादिमन्त्रेण कृष्णलान्याप्य श्रपयति । चरुधर्मेणोद्वास्य वेद्यामासादयति । उपस्तरणाभिधारणे यागकाले न भवतः । चतुर्णां कृष्णलस्थालीगतमेकमवदानम् । तथाज्येन सह एवं द्विरवदाय हवनकाले आज्यमेव जुहोति न कृष्णलानि । तूष्णीमवदानं प्रत्यञ्जनं च । पञ्चावत्तिनां त्रीण्यवदानानि तथा च द्वादश कृष्णलानि संपद्यन्ते । कृष्णलमेकं जुहुयाद्वा । हिरण्यगर्भः समवर्तताग्र इत्यनुवाक्या । प्रजापते न त्वदेतान्यन्य इति याज्या । आयुष्मानित्यनुमन्त्रणम् । चत्वारि कृष्णलानि स्विष्टकृतेऽवद्यति । पञ्चावत्तिनस्त्वष्टौ । इडापात्रे अष्टौ पञ्चावत्तिनो द्वादश । चत्वार्यवान्तरेडायै । प्राशित्रे एकम् । ब्रह्मयजमानभागयोरेकैकम् । सर्वत्राज्येन सह । चतुर्धाकरणं नास्ति । अवत्तानि ब्रह्मणो हस्ते दत्तानि च सर्वाणि समं विभज्य ऋत्विजो गृह्णन्ति । सामान्यदक्षिणाविकल्पः । फलीकरणहोमो न । इयं शतकृष्णलेष्टिः ॥

५६७ हिरण्यलाभकामस्य । आग्नेयोऽष्टाकपालः । सावित्रो द्वादशकपालः । भूम्यै चरुः । अग्नेः सप्रवन्नवीयसेत्यनुवाक्या । निकाव्या वेधसः शश्वत इति याज्या । हिरण्यपाणिमूतय इति सवितुरनुवाक्या । वाममद्य सवितरिति याज्या । भूमेर्बलित्था पर्वतानामित्यनुवाक्या । स्तोमासस्त्वा विचारिणीति याज्या ।

स्वस्तिमानिति सवितुरनुमन्त्रणम् । अन्नाद इत्यग्नेः । हिरण्यवानिति भूमेः । अन्वाहार्यमासाद्य हिरण्यं दक्षिणां ददाति । इयं हिरण्यलाभकामेष्टिः ॥

५५६ हिरण्यलाभे जाते तत्प्रतिष्ठार्थं पुनरेतयेष्ट्या यजते । सा लब्धहिरण्येष्टिरुच्यते ॥

५५७ क्लीबत्वनाशपूर्वकपुंस्त्वकामस्य । सोमाय वाजिने श्यामाकश्चरुः । आप्यायस्व स मे तु तइत्यनुवाक्या । सन्ते पयांसीति याज्या । प्रप्रजया च पशुभिश्च जभिषीयेत्यनुमन्त्रणम् । इयं पुंस्त्वकामेष्टिः ॥

५५८ चक्षुष्कामस्य । अग्नये भ्राजस्वते ऽष्टाकपालः । सौर्यश्चरुः । पूर्ववदग्नेर्भ्राजस्वतो यागः । अग्नीध्रः षडवत्तदानात्पूर्वं इडावत्तचरोर्यजमानाय त्रीन् पिण्डान्प्रतिमन्त्रं प्रयच्छति । उदुत्यं जातवेदसमिति प्रथमम् । सप्त त्वा हरितो रथ इत्यृचा द्वितीयम् । चित्रं देवानामित्यृचा तृतीयम् । यजमानः पिण्डान् प्राश्याचम्येडाभागं प्राश्नाति । उदग्ने शुचयस्तवेत्यग्नेर्भ्राजस्वतो ऽनुवाक्या । विज्योतिषेति याज्या । उदुत्यं जातवेदसमिति सूर्यस्यानुवाक्या । चित्रं देवानामिति याज्या । चक्षुष्मानित्यनुमन्त्रणम् । इयं द्वितीया चक्षुष्कामेष्टिः ॥

५५९ कामसिद्ध्यर्थं या इष्टयो विहितास्ताः काम्येष्टिपदार्थः सिद्धः ।

श्रीपरमेश्वरः प्रसीदतु ॥

॥ शिवम् ॥

Digitized by Google

सटीकसंक्षेपशारीरकम् ।

(*Continued from page* 56. Vol. VI.)

मू० ॥ नासंसृष्टपदार्थबुद्धिपदयोः पूर्वापरत्वप्रमां
मुक्त्वा कारणकार्यताऽवगतये कश्चित्समर्थस्तयोः ॥
पौर्वापर्यमुदीक्ष्य हेतुफलतां सर्वत्र संगृह्णते
नो चेत्सर्वमसंगतं भवति वः सर्वव्यवस्थाहतेः ॥ ३०२ ॥

टी० ॥ ननु शब्दात्परंपरया विशिष्टबोधसंभवेनाऽन्विते शक्तिः कल्पनीया तावतैवाभियुक्तप्रयोगाद्युपपत्तेरित्याशङ्क्य शुद्धपदार्थबोधस्य पदस्य चान्वयव्यतिरेकानवगमाच्च हेतुहेतुमत्ता सिद्ध्यति । न हि गामानयेतिवाक्यप्रयोगे पदार्थस्मृतिः पृथगनुभूयते येन पदस्य तद्धेतुता सिद्ध्येद्वाक्यार्थानुभवस्तु ततोऽनुभूयत इत्यन्वित एव शक्तिर्युक्तेत्याह । नासंसृष्टेति । तयोरसंसृष्टपदार्थबुद्धिपदयोः । नियतपूर्वभावित्वं कारणत्वं तादृशापरकालवृत्तित्वं कार्यत्वं तदेतदुभयं तयोः पूर्वापरत्वज्ञानं विना न संभवतीत्यर्थः । उक्तमेवार्थं सामान्यतोऽन्वयमुखेनाप्याह । पौर्वापर्यमिति । हेतुफलयोरिति शेषः । सर्वत्र दण्डघटादौ । विपक्षे बाधकमाह । नो चेदिति । पूर्वापरत्वज्ञानं विनापि हेतुफलभावग्रहश्चेदित्यर्थः । असाङ्गत्ये हेतुमाह । सर्वव्यवस्थाहतेरिति । दण्डादिः कारणं घटादिः कार्यमित्येवं हेतुहेतुमद्भावस्य व्यवस्थाविलोपप्रसङ्गादित्यर्थः ॥ ३०२ ॥

मू० ॥ पूर्वापरान्वयबलेन हि कारणत्व-
कार्यत्वसंगतिमिह प्रतियन्ति लोके ॥
नो चेद्ववेदनियमो न च तत्र कर्तुं
कार्याणि कारणविशेषमुपाददीरन् ॥ ३०३ ॥

टी० ॥ उक्तार्थं विवृण्वन् कार्यकारणव्यवस्थाऽभावेऽनिष्टं प्रसञ्जयति । पूर्वापरान्वयेति । पूर्वापरकालान्वयावगतिबलेनेत्यर्थः । अनियमः कार्यकारणभावानियमः । तत्रानियमे कार्याणि घटादिरूपाणि कर्तुं

कारणविशेषं दण्डादि कारणं नैव कुलालादय उपाददीरन्नित्यर्थः । अतो वाक्यार्थज्ञानाय प्रयुक्तपदतदर्थस्मृत्योः पौर्वापर्यज्ञानासंभवेन कार्यकारणत्वग्रहासंभवात् पदानां पदार्थमात्रज्ञाने पर्यवसानं कल्पयितुं न युक्तमिति भावः ॥ ३७३ ॥

मू० ॥ पदजातबुद्धिजनिता भवति
व्यतिषक्तबुद्धिरिति तावदिह ॥
न विगानमस्ति भवतामपि चे-
द्व्यवधानकल्पनमकारणकम् ॥ ३७४ ॥

टी० ॥ ननु भवतु पदानां वाक्यार्थज्ञानावृत्ते न पर्यवसानं नचैतावता संसर्गे शक्तिः सिद्ध्यति गौरवात्लाघवेन पदार्थमात्रे क्लृप्तशक्तिकैः पदैः स्वार्थस्मृतिद्वाराकाङ्क्षादिसहकारिबलेन संसर्गज्ञानसंभवात् एवं च शक्तिबलात्पदार्थस्मृतिर्विशिष्टज्ञानं विना पदानामपर्यवसानं संसर्गे च न पदशक्तिरिति त्रितयं सिद्धमिति चेत्तत्राह । पदजातबुद्धीति । पदसमूहबुद्धिजनितेत्यर्थः । व्यतिषक्तबुद्धिरिति । विशिष्टार्थबुद्धिरित्यर्थः । इह लुब्ध्यवहारस्थले । विशिष्टार्थबुद्धिस्तावत् पदजातबुद्धिजनिता भवतीति भवतामपि चेन्न विगानमस्ति तदा पदार्थस्मृतिव्यवधानकल्पनमकारणकमप्रमाणमिति संबन्धः । अयमाशयः । यदि संसर्गज्ञानं पदजन्यं तर्हि कार्यानुरोधेन पदानां तत्र शक्तिरावश्यकी शक्तेः कार्यगेयतया यथा कार्यं कल्प्यत्वात्, अन्यथा पटजननाशक्तात्दण्डादिव पटः पदात्संसर्गज्ञानं न जायेत । न च कारणतारूपा तन्निर्वाहिका शक्तिरन्या दण्डादौ, शब्दे वान्याभिधारूपा शक्तिः सा च न संसर्ग इति वाच्यम् । दण्डादिशक्त्या सदृश्य एव तस्याः स्ववाच्यसंबन्धानपेक्षशब्दवृत्तित्वेनाभिधात्वे संभवति तद्भेदे प्रमाणाभावात् । लाक्षणिकशब्दवृत्तिकारणता तु नैवम् अन्वयव्यतिरेकनियमाद्यनुपपत्तिकल्प्यत्वाविशेषेण च तदभेद एवोचितः । न चैवमपि पदार्थशक्त्यैव परम्परया संसर्गज्ञानमन्यथासिद्धमिति वाच्यम् । यतस्तथा सति वाक्यार्थे तत्रापि मते लक्षणैव स्यात्, शक्त्या परम्परासंबन्धस्यैव लक्षणात्वात् । अन्यथा तीरा-

देरपि तथैव गङ्गादिपदात् ज्ञानमभिप्यति तत्तथैव लुप्येत । तस्मात्संसर्गतत्त्वामनभ्युपगच्छतस्तत्र शक्तिरवश्यं वाच्येति ॥ ३७४ ॥

मू० ॥ व्यतिषक्तबुद्धिजनकं सकलं
पदजातमित्यनुमतं यदि वः ॥
व्यवधानकल्पनविडम्बनया
किमिहाञ्जसैव जनकं भवतु ॥ ३७५ ॥

टी० ॥ नन्वेवमपि व्यवधानकल्पनमकारणकमित्यनुचितं वाक्यार्थबुद्धेः पदार्थविशिष्टबुद्धितया पदार्थज्ञानजन्यत्वात्तस्य च पदाभिहितस्मृत्यन्यस्यासंभवात्, किं च वाक्यार्थज्ञाने पदमेव करणमिति तद्व्यापारतयाऽपि साऽवश्यं वाच्येति चेत्तत्राह । व्यतिषक्तबुद्धीति । व्यवधानकल्पनेव विडम्बना नटना तयेत्यर्थः । अञ्जसा साक्षात्कृत्यैवेति यावत् । न तावन्मध्ये स्मृतिः कल्पनीया गौरवात् । अन्यत्रापि विशिष्टज्ञानस्य विशेषणज्ञानाजन्यतया प्रकृते तदनपेक्षणात् । न चैवमगृहीतशक्तेरपि वाक्यार्थधीप्रसङ्गः । संबन्धज्ञानजन्यसंस्कारस्य पदज्ञानोद्बुद्धस्यान्वयव्यतिरेकाभ्यां हेतुत्वावधारणे नातिप्रसङ्गाभावात् । करणव्यापारोऽप्यवश्यकश्चेत्संस्कारोद्बोध एवास्तु । न चैवं संस्कारजन्यत्वेन वाक्यार्थज्ञानस्य स्मृतित्वं स्यादिति वाच्यम् । समानविषयसंस्कारजन्यस्यैव स्मृतित्वाद्वाक्यार्थज्ञाने च तदभावात् । संस्कारकरणकं च ज्ञानं स्मृतिः, करणता च कारणतैव शक्तिविशेषः, वाक्यार्थज्ञाने च वाक्यमेव करणं न संस्कार इति व्यवधानकल्पनमकारणकमेवेति भावः ॥ ३७५ ॥

मू० ॥ पारम्पर्यं ह्यगतिकगतिं कारणादाश्रयन्ते
नोत्सर्गेण स्फुरति विदुषां यत्र तत्र प्रनाडी ॥
श्रुत्या सोमक्रयमनुगतः साधनत्वेन हित्वा
साक्षाद्भावं ह्यरुणिमगुणः प्रापदेनामशक्तेः ॥ ३७६ ॥

टी० ॥ नन्वेवमपि न तदकारणकं विशकलितपदप्रयोगे हि ततः पदार्थस्मृतिरनुभूयत इति पदस्य स्मारकत्वं क्लृप्तम् । अतः संश्लिष्टपदप्र-

योगेऽपि पदात्साऽवश्यकी, एवं च तत्रैव पदव्यापारः, वाक्यार्थबोधे तु पदार्थानामेवाकाङ्क्षादिमतां हेतुत्वम् न चैवं वाक्यार्थबोधस्याशाब्दत्वापत्तिः पदार्थाख्यमानान्तरमपि प्रसज्येतेति वाच्यम् । परम्परया शब्दजन्येऽपि शब्दस्य तात्पर्येण तच्छाब्दत्वोपपत्तेः । अत एव वृद्धानां तदुद्देशेन शब्दप्रयोगोऽपि न विरुध्यते । पदार्थमानत्वमपि वक्ष्यमाणदृष्टान्ते प्रसिद्धमिति नालौकिकमत्र किं चिदिति चेचेत्याह । पारम्पर्यमिति । यत्र विद्वांसोऽगतिकगतिं मुख्यगतिशून्यानां गतिसदृशं पारम्पर्यमाश्रयन्ते तत्र तेषां विदुषां कारणाद्बलवदनुपपत्तितः सा प्रनाडी स्फुरति न तूत्सर्गेण स्वभावतः स्फुरतीत्यर्थः । यत्र हि यस्य कारणत्वं प्रमितमथ च साक्षान्नोपपद्यते यथा यागस्य स्वर्गं प्रति कारणता तत्रानुपपत्तिबलाद्व्यवधानान्तराभावनिमित्तं परम्पराकारणत्वं पण्डिता आश्रयन्ते यथा मध्येऽपूर्वकल्पनया यागस्य, नैवमिह संसृष्टज्ञाने स्मृत्या विना साक्षात्कारणत्वे शब्दस्य काप्यनुपपत्तिरस्ति विशिष्टज्ञानत्वादिप्रयुक्तानुपपत्तेः परिहृतत्वात् । न चान्ते समूहालम्बनैकस्मृतिविषयतावत्पदेभ्यो मध्ये स्मृतिरनुभूयत इत्युक्तम् । एवं पदानामेव स्वतात्पर्यगोचरविशिष्टज्ञानजनकत्वे संभवति पदार्थाख्यप्रमाणान्तरमपि न कल्पनीयम् । वक्ष्यमाणदृष्टान्तेऽपि न प्रमाणान्तरं संप्रतिपन्नमिति वक्ष्यत इति भावः । साक्षात्प्रमितिकरणत्वासंभवेऽन्यद्वारा तदुपपादनीयमित्यत्र स्वयं दृष्टान्तमाह । अरुण्येति । साधनत्वेन सोमक्रयमनुगतः सोमक्रयेण संबद्धः । साक्षाद्भावं साक्षात्साधनत्वम् । एनां प्रनाडीं प्रापयदशक्तेः शक्त्यभावात् । अरुणिमगुणो हि अरुणयेत्यादिवाक्ये अरुणयेति तृतीयाश्रुत्या सोमक्रयं प्रति साधनत्वेन बोधितः स्वस्यामूर्तत्वेन साक्षात्क्रयसाधनत्वाशक्तेः साक्षात्तद्भावं विहाय द्रव्यावच्छेदद्वारा परम्परया साधनत्वं प्रापदित्यर्थः ॥ ३७६ ॥

मू० ॥ श्वेतिमानमभिपश्यतः पुरः
श्रृण्वतस्तदनु हेषितध्वनिम् ॥
तद्वदश्व खुरमुद्गरस्वनं
श्वेतरूपतुरगोऽस्तीति धीः ॥ ३७७ ॥

Digitized by Google

टी० ॥ यत्तु पदार्थानां मानं लोकसिद्धमिति पूर्वपक्षिणोऽनुभाषणोक्तम् तदिदानीं प्रकृते । श्वेतिमानमिति । श्वेतं रूपमित्यर्थः । पुरः अग्रे । हेषितध्वनिम् अश्वध्वनिम् । अनेनाश्वत्वोपस्थितिरुक्ता । अत्र लोके । खुरमुद्गुरस्वनं खुरस्य तीव्रशब्दम् । अनेन च तस्य धावनं सूचितम् । लोके हि अग्रे दूरतः श्वेतरूपं पश्यतः अश्वध्वनिं खुरशब्दं च श्रुत्वा प्रत्येकमश्वत्वाद्यवगच्छतः श्वेतोऽश्वो गच्छतीति बुद्धिर्जायते, सा न तावत् प्रत्यक्षेण दूरादिदोषेण तस्य तदसमर्थत्वात्, नापि लिङ्गेन विशिष्टार्थव्याप्तलिङ्गाभावात्, न तादृशः शब्दस्तत्रास्ति, ततः क्लृप्तमानान्तरासंभवाच्चक्षुरादिनावगतश्वेतादिरूपपदार्थैरेव श्वेतोऽश्वो धावतीति धीर्यद्भवतीत्यर्थः ॥ ३०७ ॥

मू० ॥ तद्वदत्र पदजातबुद्धिभि-
बोधिताऽखिलपदार्थहेतुकः ॥
सर्वशब्दविषयार्थसंगतेः
प्रत्ययो भवति योग्यतादिभिः ३०८ ॥

टी० ॥ दार्ष्टान्तिकमाह । अत्र वाक्ये पदजातबुद्धिभिः प्रतिपदं क्रमेणोत्पन्नमतिभिर्बोधिता येऽखिलपदार्थास्तद्धेतुकः सर्वेषां गवादिशब्दानां ये प्रतिपाद्यार्थास्तेषां परस्परसंगतेः संसर्गस्य योग्यतादिभिः आकाङ्क्षायोग्यतासन्निधानैः सहकारिभिः प्रत्ययः तद्विषयः प्रत्ययो भवतीत्यर्थः । अतः पदार्थमानत्वं लोकप्रसिद्धमेवास्थितमिति नालौकिकमिति भावः ॥ ३०८ ॥

मू० ॥ नैतत् क्लृप्तनिमित्ततोऽपि घटते संसर्गधीरीदृशी
श्वेतोऽश्वस्त्वरितोऽभिधावतितरामित्यादिकार्योत्थिता ॥
कार्यं क्लृप्तनिबन्धनं यदि भवेन्नास्यापरं कारणं
कल्प्यं तेन पदार्थजातजनिता नैषा मतिर्लिङ्गजा ॥ ३०९ ॥

टी० ॥ सिद्धान्ती प्रत्यक्षादिनैवास्य प्रत्ययस्योपपत्तेर्न तदर्थं मानान्तरं कल्प्यमिति दूषयति । नैतदिति । कुत इत्यत आह । क्लृप्तनिमित्ततोऽपीति । वक्ष्यमाणक्लृप्तप्रमाणात् । ईदृशीत्युक्तमेवाह । श्वेतोऽश्व इति । ननु यथानुमानाद्यवगतं प्रत्यक्षेणाप्यवगच्छन्ति तद्वत्क्लृप्तप्रमाणावगतमपि

पदार्थप्रमाणेनावगच्छन्त्विति तत्राह । कार्यमित्यादिना । क्लृप्तं निबन्धनं कारणं यस्य तत् । यत्र द्वयमपि क्लृप्तं भवति तत्रैकेनावगतमन्येनाप्यवगम्यतां यत्र तु नैवमत्र च क्लृप्तेनैव कार्यं निर्वहति तस्यापरं कारणं न कल्प्यं कार्यस्य तेनैव निराकाङ्क्षत्वात् । ततः किं तत्राह । तेनेति । एषा मतिः श्वेतोऽश्व इत्यादिमतिः । किंप्रमाणजा तर्ह्येषा मतिस्तत्राह । लिङ्गेनेति । लिङ्गेति प्रत्यक्षस्याप्युपलक्षणम् ॥ २७९ ॥

मू० ॥ पादार्थे न पृथक् प्रमाणमपरं नानाप्रमाणोद्भवं
नाप्येतत्फलमत्र पक्षयुगले कल्प्यं निमित्तान्तरम् ॥
क्लृप्तं लिङ्गमतोऽपि निर्वहति चेत्संसर्गधीरीदृशी
पादार्थी न पृथक् प्रमा न च फलं नानाप्रमाणोद्भवम् ॥ २८० ॥

टी० ॥ न पदार्थजातजनितेत्यादि विरुद्धवंसर्हि प्रत्यक्षादिसमुदायादेषा मतिरस्त्वित्याशङ्कामपि निराकरोति । पादार्थमिति । पदार्थसंबन्धि पदार्थे पदार्थसमुदायरूपमिति यावत् । पृथक् प्रत्यक्षादिव्यतिरिक्तम्, अपरं प्रत्येकप्रत्यक्षादिफलादतिरिक्तम्, नानाप्रमाणोद्भवं प्रत्यक्षलिङ्गसमुदायजन्यं एतत्फलं संसर्गज्ञानं श्वेतोऽश्वो धावतीत्येवंरूपा प्रमा । उभयत्र दूषणमाह । अत्रेति । तस्मिन्पक्षद्वय इत्यर्थः । पदार्थसमुदायस्य प्रमाणसमुदायस्य च प्राक् प्रमाणत्वेनाक्लृप्तत्वात्तदुभयप्रमाणत्वमत्रैव कल्पनीयमित्यर्थः । अथ प्रा पृथक्प्रमाणत्वपक्षे नानाप्रमाणफलत्वे च पक्षद्वये निमित्तान्तरं कल्पयन्त इत्यर्थः । तर्ह्यनन्यथासिद्धकार्यबलात्तदन्यतरप्रामाण्यं कल्प्यतामित्याशङ्क्यासिद्धो हेतुरित्याह । क्लृप्तमिति । लिङ्गमिति । प्रमाणान्तरस्याप्युपलक्षणम् । इदमिहाभिप्रेतम् । श्वेतरूपेण सममिन्द्रियसंनिकर्षस्याभावस्येवान्यथा श्वेत इति ज्ञानासंभवात्, अश्वस्यापि श्रवणे चक्षुषो यद्यपि द्वारः प्रतिबन्धकस्तथापि हेषादिना तदनुमाने तद्विशिष्टेन्द्रियेण प्रत्यभिज्ञेव परोक्षापरोक्षरूपा श्वेतोऽश्वो धावतीति धीर्भवितुमर्हति । एवं विभक्तः श्वेतः अश्वः हेषादनुमानसंगतवदिति श्वेतोऽश्व इति विशिष्टज्ञाने, श्वेतोऽश्वो धावति शब्दश्रवणेन नाना देशेषु दृश्यमानस्यापाद-

घटेवदन्तवत्, एवं श्वेतरूपे इत्यादुरमुद्गरस्वनादिकर्तृत्वसामानाधिकरण्या- नुपपत्त्याप्येतादृशी धीर्भवितुमर्हतीति न तदर्थो त्वदुक्तकल्पनेत्याशयेनोप- संहरति । पादार्थीति । पदार्थसमुदायकरणिकेत्यर्थः ॥ ३८० ॥

मू० ॥ नासंसृष्टमतो वदन्ति न च तान्याहुः क्रियासङ्गतं
योग्येनान्वितमेव केवलममून्याहुः स्वमर्थं यतः ॥
एवं सत्यपवर्जितक्रियमलं निष्पन्नरूपं सदा
संसर्गादिविवर्जितं च वदितुं वस्तुस्वरूपं श्रुतिः ॥ ३८१ ॥

टी० ॥ एवं योग्येतरकार्यान्विते योग्येतरान्विते वा न पदानां श- क्तिरनिर्धारत्वात्, नापि केवलपदार्थे वाक्यार्थप्रतीतेराकस्मिकतापत्तेः । के- वलार्थशक्तेभ्य आकाङ्क्षादिसहकृतेभ्यः पदेभ्यो न संसर्गधीजन्माऽशक्तात्का- र्यासम्भवेन तदा कार्यानुरोधेन शब्दशक्तेरपि तत्रावश्यकत्वात्, कारणता- शक्तेरेव स्ववाच्यसम्बन्धानपेक्षशब्दज्ञातत्वेनाभिधाशक्तित्वात् । नापि पद- स्मारितपदार्थानामेवाकाङ्क्षादिवशात्परस्परं स्वसंसृष्टविषयज्ञानकारणता शब्देभ्यः साक्षादेव वाक्यार्थप्रमासम्भवे मध्ये स्मृतिकल्पनायोगाद्वाक्यार्थबो- धस्य शब्दाजन्यत्वेऽशाब्दत्वं च स्यात् । न च परम्परया शब्दमूलत्वेन शाब्द- त्वं धातुरूपादिलिङ्गजानुमितेरपि चाक्षुषत्वापत्तेः, पदार्थाख्यप्रमाणान्तर- कल्पनाप्रसङ्गादपि नेति पक्षाः साधव इत्युक्तमिदानीं लाघवेनाकृतिमात्र- वाचकशब्देन व्यक्तिरिव पदार्थशक्तपदेभ्यो वाक्यार्थो लभ्यतामेवं च न प्रागुक्तो दोषः कोऽप्यत्र प्रसज्यत इत्याशङ्क्याथापि प्रतिपिपादयिषाद्यनुरो- धेन केवलपदार्थशक्तेर्युक्तत्वे स्थितेऽन्वयबोधस्य शब्दलभ्यत्वाचातीवास्मा- कमनिष्टमित्याशयमेतदनिराकरणे द्योतयन्नुपसंहरति । नासंसृष्टमिति । वदन्ति पदानीति शेषः । कार्यान्विते शब्दसङ्गतिं निराकृत्य सिद्धान्विते तत्समर्थनफलमाह । एवं सतीति । सिद्धान्वितस्यापि शब्दार्थत्वसंभवे सतीत्यर्थः । अपवर्जिता परिहृता क्रिया कार्यं यस्मिन्नस्मिन् तदलं समर्थो ॥ ३८१ ॥

मू० ॥ अभिहितघटनाऽथ वाऽन्वितानां-
मभिहितिरस्त्वथ वा न पक्षपातः ॥
क्व चिदपि समयेऽस्ति नः कदाचि-
द्बहुघटनात्मकवस्तुनिष्ठवाक्ये ॥ ३८२ ॥

टी० ॥ एवमभिहितान्वयादि निराकृत्यान्वितमात्रं शब्दार्थ इत्युक्तम् । ननु कोऽयमभिनिवेशस्तवाभिहितान्वयपक्षेऽपि लक्षणयाऽखण्डब्रह्मसिद्धिसंभवात् । तावन्मात्रस्यैव तव मते प्रतिपाद्यत्वादित्याशङ्क्याऽस्तु वा तथेत्याशयेनाह । अभिहितघटनेति । अभिहितानां घटनाऽन्वय इत्यर्थः । पूर्वोक्तनियमकल्पादस्य कल्पान्तरत्वं द्योतयितुम् आद्योऽथ वेति शब्दः, स चादौ योजनीयः, क्व चिदपि समये पक्षपातो नो नास्तीति संबन्धः । नन्वखण्डे ब्रह्मणि नोभयमपि संभवतीति कथं तदङ्गीकार इत्याशङ्क्यान्यत्रैव तदङ्गीकार इत्याह । बहुघटनेति । बहूनामर्थानां घटनात्मकं यद्वस्तु प्रतिपाद्यं तन्निष्ठे वाक्ये गामानयेत्यादिलौकिके ज्योतिष्टोमेन यजेतेत्यादिवैदिके चाभिहितघटनेत्यादिसंबन्धः ॥ ३८२ ॥

मू० ॥ अभिहितघटना न चोपपन्ना
परदृशि नाभिहितिस्तथान्वितानाम् ॥
अनधिकविकलार्थगोचरत्वा-
न्न तदुभयं श्रुतिमस्तके पदानाम् ॥ ३८३ ॥

बहुघटनात्मकेतिविशेषणव्यावर्त्यमाह । अभिहितघटना न चेति । परदृशीति । असङ्गस्वप्रकाशचिदात्मनो निर्देशात्तस्यान्वितत्वेनानन्वितत्वेन वाऽभिधानायोग्यता ध्वनिता । कुतो नेत्यत आह । अनधिकेति । अधिको विकलश्च न भवतीत्यनधिकविकलः तादृशः शुद्धचिद्रूपोऽर्थो गोचरो येषां तेषां भावस्तत्त्वं तस्मादित्यर्थः । अथ वाऽधिकेत्यन्वितत्वं विकलेति केवलत्वम् । यद्यप्यात्मवस्तु केवलं तथाप्यन्वयप्रतियोगितया स्वरूपेण वा नाभिधानयोग्यं स्वप्रकाशत्वादिति विकलोक्त्यभिप्रायो

Digitized by Google

द्रष्टव्यः । उपसंहरति । न तद्दिति । तत्तस्मादुभयम् । अभिहितान्वयोऽन्विताभिधानं च ॥ ३८३ ॥

मू० ॥ अभिहितघटना यदा तदानीं
स्मृतिसमबुद्धियुगं पदे विधत्तः ॥
परदृशि पुनरन्विताभिधाने
पदयुगलात्स्मृतियुग्ममेव पूर्वम् ॥ ३८४ ॥

टी० ॥ ननु पक्षद्वयेऽपि वाक्यस्याखण्डार्थप्रतिपादने किं कश्चिद्विशेषोऽस्तीत्याकाङ्क्षायामस्ति कश्चिदित्याह । अभिहितघटना यदेति । स्मृतिसमबुद्धियुगमिति । अत्रपक्षे हि पदानां पदार्थमात्रबोधे पर्य्यवसानात्सा पदशक्त्यैव लभ्यत इति न स्मृतिः शब्दमात्रकरणकस्य स्मृतित्वायोगात् । किं तु संबन्धावगमकाले प्रसिद्धार्थविषयतयाऽनुवादत्वेन स्मृतिसमेति । पदे तत्त्वंपदे, तस्मिन्पक्षे स्मृतिसममेव बुद्धियुगं परमात्मनि विधत्तः जनयतः । अन्विताभिधाने तु पदानां शक्त्यान्वयप्रतिपादन एव व्यापारात्पदार्थज्ञानं संबन्धिविधयैव पदजमिति न तत्पदकरणकं किं तु प्रसिद्धस्मृतिवत्संस्कारकरणकमेवेति स्मृतिरेवातस्तत्त्वंपदयुगलाद्वाक्यार्थप्रतीतेः पूर्वं स्मृतिद्वयमेव भवतीति विशेष इत्यर्थः । एतच्च परमताङ्गीकारेणोक्तमिति द्रष्टव्यम् । अतः उभयमतानुरोधेन तत्त्वंपदार्थविषया धीः स्मृतिसमा स्मृतिरेव वेति यथा तथाऽस्तु, एतावताऽप्यखण्डार्थनिष्ठता वाक्यस्य न विहन्यतेति भावः ॥ ३८४ ॥ (शेषमग्रे)

काशीस्थराजकीयप्रधानपाठालयाध्यापकेन श्रीद्विवेदहरिनाथशर्म्मणा ।

॥ अथ चित्सुखी ॥

॥ तत्र द्वितीयपरिच्छेदावशेषः ॥

(Continued from page 9. Vol. VI.)

ननु स्फुटद्विगुणदलशब्दात् तदसमवायिकारणतया विभागोऽवगम्यते, स हि न वंशदलद्वयसंयोगनाशापेक्षवंशदलाकाशसंयोगजन्यः संयो-

गजन्यस्य शब्दस्य संयोगनिमित्तकारणतोपलम्भात् भेर्याकाशसंयोगजन्यस्य शब्दस्य भेरीदण्डसंयोगनिमित्तकतावदिति चेत्, न, वायुदलसंयोगनिमित्तकत्वोपपत्तेः ।

न च सर्वत्रातीन्द्रियवायुसंयोगकारणताप्रसङ्गः, भेरीदण्डसंयोगस्यान्वयव्यतिरेकवतः कारणतोपपत्तौ तत्कल्पनानुपपत्तेः, अन्यथा तवापि पलाशादौ शुकशुकशब्दो वेगवदनिलपलाशसंयोगनिमित्तो न स्यात् ।

कर्म संयोगातिरिक्तासमवायिकारणं संयोगातिरिक्तत्वे सत्यसमवायिकारणत्वाद्रूपवदिति मानमनोहरकारोक्तमनुमानं मानमिति चेत्, न, कर्ममात्रपक्षीकारे वेगाख्यसंस्कारजनकतया सिद्धसाधनत्वात्, वेगाजनककर्मपक्षीकारे च सप्रतिसाधनता, कर्म संयोगातिरिक्तद्विष्ठगुणासमवायिकारणत्वात्यन्ताभावाधिकरणं संयोगासमवायिकारणत्वात् संयोगवदिति प्रतिप्रयोगयोगात्, वेदान्तिनं प्रति दृष्टान्तस्य साध्यविकलत्वाच्च, विवर्तवादाश्रयणेन तैः कार्ये गुणान्तरमनभ्युपगच्छद्भिः कारणगुणानां कार्ये गुणासमवायिकारणत्वानङ्गीकारात् ।

नापि तृतीयः, विशेषणाप्रसिद्धेः ।

संयोगस्य निरस्तत्वाद् गुणानामनिरूपणात् ।
जातेश्च दुर्निरूपत्वात् स्यादसंभवि लक्षणम् ॥ ४३ ॥

नापि द्वित्वं संभवति, तत् किमिमौ द्वाविति प्रत्यक्षतः सिध्येतोतानुमानतः, नोभयथापि ।

प्रत्यक्षास्यान्यथासिद्धिः स्यादेकत्वसमुच्चये ।
अनुमाप्याश्रयासिद्धिसाध्यवैकल्यदूषिता ॥ ४४ ॥

इमौ द्वाविति प्रत्यक्षं तावदेकैकसमुच्चयविषयतयाऽप्यन्यथोपपद्यमानं नापरं द्वित्वमवगमयितुमर्हति ।

ननु समुच्चयमात्रविषयमिदं प्रत्यक्षं तद्विशेषविषयं वा ।

नाद्यः, तस्यावैचित्र्ये द्वित्वत्रित्वादिव्यवहारवैचित्र्यविरोधात् ।

नापि द्वितीयः, विकल्पानुपपत्तेः ।

स हि समुच्चितैकभेदाद्वा तद्गतधर्मभेदाद्वा ।

न प्रथमः, एकतायाः सर्वत्र तुल्यत्वात् ।

न चरमः, आरोपितस्य वा पारमार्थिकस्य वा द्वित्वत्रित्वादेरनङ्गीकरणे तद्गतधर्मभेदासिद्धेरिति चेत्, मैवम्, द्वित्वत्रित्वादिजनकापेक्षाबुद्धिविषयेऽपि विकल्पसाम्यात्, अपेक्षाबुद्धेरेकत्वगुणसमुच्चयमात्रविषयत्वे द्वित्वत्रित्वादिसंख्याभेदोत्पादकता न सिध्येत्, समुच्चयस्य सर्वत्राविशेषात् ।

आरोपितद्वित्वत्रित्वादिविशेषितैकत्वसमुच्चयालम्बना बुद्धिर्द्वित्वादिजनिकेति चेत्, न, तथाभूताया एव बुद्धेर्द्वित्वादिव्यवहारजनकत्वोपपत्तौ द्वित्वाद्युत्पादकत्वकल्पनावैयर्थ्यात् ।

आरोपितस्यानारोपपूर्वकत्वनियमाद् द्वित्वादेः क्वचित् सत्यताप्तिरिति चेत्, न, शुक्तिरजतादिसंसर्गवत् क्वचित् सत्यताभावेऽपि भ्रान्तिविषयत्वोपपत्तेः ।

नापि द्वितीयः, द्व्यणुकपरिमाणं जन्यासमवायिकारणजन्यं कार्यत्वात् पटवदित्यनुमानस्याश्रयासिद्धत्वात्, द्व्यणुकतत्परिमाणयोरस्माभिरनङ्गीकारात्, पटस्यापि तन्तुसंयोगासमवायिकारणजन्यत्वासंप्रतिपत्तेर्दृष्टान्तस्य साध्यवैकल्याच्च ।

विवादाध्यासितो बुद्धिजन्यगुणयोराश्रयो द्रव्यत्वादात्मवदिति मानमनोहरोदीरितमनुमानं मानमिति चेत्, न, अर्थान्तरत्वात्, सर्वस्यापि घटपटादेरीश्वरबुद्धिजन्यरूपादिगुणाश्रयत्वात् ।

अनित्यबुद्धिजन्यत्वस्य विवक्षितत्वाददोष इति चेत्, न, घटपटादिगतरूपादेरप्यस्मदादिज्ञानेच्छाप्रयत्नजन्यत्वेन पूर्वदोषानतिवृत्तेः, परमाणूनामेव पक्षीकरणे तेषामस्मदादिप्रत्यक्षागोचरत्वात् ।

तेषु बुद्धिजन्यगुणाधिकरणत्वसाधनेनार्थान्तरतेति चेत्, न, तेषामेवासंमतत्वेनाश्रयासिद्धत्वात्, चेतनत्वस्योपाधित्वाच्च ।

न चेश्वरे साध्यासमव्याप्तिः, तस्यापि त्वन्मते तद्बुद्धिजन्यसंयोगविभागाश्रयत्वात्, निर्गुणात्मवादिनं प्रति दृष्टान्तस्य साध्यविकलत्वाच्च ।

Digitized by Google

अपिच अपेक्षाबुद्धिव्यङ्ग्यत्वे द्वित्वस्य को दोषं पश्यसि येन तज्जन्यतामङ्गीकुरुषे ।

एकत्ववद् द्वित्वस्याप्यपेक्षाबुद्धेः प्रागेव सिद्धौ तत्प्रतीतिसमकालमेव द्वित्वप्रतीतिप्रसक्तिर्दोष इति चेत्, न, व्यञ्जकाभावादेव तदप्रतीत्युपपत्तेः ।

न च समानाश्रयसमानेन्द्रियग्राह्यसमानजातीयगुणानां विचित्रव्यञ्जकव्यङ्ग्यत्वानुपपत्तिः, महत्त्वदीर्घत्वयोरिव तदुपपत्तेः, नहि महत्त्वप्रतीतिर्दैर्घ्यप्रतीतिवद्ध्रस्वमपेक्ष्य जायते, तत्प्रतीतेरणुप्रतियोग्यपेक्षत्वात्, ततो न द्वित्वस्यापेक्षाबुद्धिजन्यतापि ।

न चैकत्वसंख्यासमुच्चयोऽपि द्वित्वम्, एकत्वस्यापि स्वरूपातिरेकेण दुर्निरूपत्वात् ।

न च स्वरूपाणां भिन्नत्वादेकमेकमित्यनुगतप्रत्ययानुपपत्तिः, एकत्वसंख्यास्वीकारेऽपि तस्याः प्रतिद्रव्यं भिन्नतया द्रव्येष्वेकमेकमिति प्रत्ययानुपपत्तेस्तुल्यत्वात्, एकत्वसंख्याविशिष्टतया चैकमिति प्रत्ययविषयत्वे रूपादौ संख्यायां चैकमिति मतेरभावप्रसङ्गाच्च, तत्र स्वरूपत एवैकत्वव्यवहारेऽन्यत्रापि तथाभावप्रसङ्गात्, एकत्वसंख्याविशिष्टे चैकत्वसमवायस्यानवस्थादिदोषादयुक्ततया यादृक्स्वरूपे संख्यासमवायस्तादृशस्यैवैकव्यवहारविषयतोपपत्तौ संख्यास्वीकारवैयर्थ्यात् ।

न चैवं जात्यपलापानिष्टप्रसङ्गः, अद्वैतवादिनामिष्टत्वात् ।

न च प्रमाणं संख्यायामप्येकत्वादिबुद्धयः ।
गुणादिष्वपि तद्भावात् तद्बाधस्यानिरूपणात् ॥ ४५ ॥

न च संख्यायामपि प्रमाणं पश्यामः ।

न चैकत्वादिबुद्धयः प्रमाणम्, संख्याभावेऽपि चतुर्विंशतिर्गुणाः पञ्च कर्माणि द्विविधं सामान्यमित्यादिवदुपपत्तेः ।

न च तत्र गौणः प्रयोगः, मुख्ये बाधानिरूपणात्, नहि निपुणतमयोऽपि निरूपका न चतुर्विंशतिर्गुणा न पञ्च कर्माणीति बाधमध्यवस्यन्ति, तदेवं द्वित्वादिसंख्यायां प्रमाणाभावाद् द्व्यणुकपरिमाणासमवा-

Digitized by Google

यिकारवृत्तिगुणत्वावान्तरजातीया संख्या तादृग्वृत्तिसंख्यात्वावान्तरजातीयं द्वित्वमित्यादि लक्षणमसंभवित्वदोषेण परास्तम् ।

तथा जातिरपि,

प्रत्यक्षादनुमानाद्वा न जातिः सेद्धुमर्हति ।
व्यञ्जकैरन्यथा सिद्धेस्तद्वृत्तेश्चानिरूपणात् ॥ ४६ ॥

न तावद्गौर्गौरित्यभिन्नाकारग्राहि प्रत्यक्षं जातौ प्रमाणम्, विकल्पासहत्वात् ।

तत् किमेकव्यक्तिवद्व्यक्त्यन्तरे गौरित्यवभास उत व्यक्तीनामेकगोस्वभावावभास एकधर्मवत्तयावभासो वा ।

नाद्यः, एकव्यक्तेर्गोस्वभाववद्व्यक्त्यन्तरस्यापि गोस्वभावत्वादेवान्तरेणापि सामान्यमनेकोदकभाजनेष्वयं चन्द्रोऽयं चन्द्र इतिवदवभासोपपत्तेः ।

ननु व्यक्तिमात्रं गौरिति मतिगोचरो गोव्यक्तिर्वा ।

नाद्यः, तुरगादिव्यक्तावपि तत्प्रसङ्गात् ।

नेतरः, जातिस्वीकारापत्तेः, इति चेन्न, सास्नादिमद्व्यक्तेस्तन्मतिगोचरत्वात्, अन्यथा व्यक्तिमात्रस्य गोत्वव्यञ्जकत्वं गोत्वव्यक्तेर्वेति प्रत्यवस्थानस्य जातावपि तुल्यत्वात् ।

नापि द्वितीयः, सर्वत्र गोस्वभावस्यैकस्यानिरूपणात्, निरूपणे वा जातिस्वीकारवैयर्थ्यात् ।

नापि तृतीयः, दण्डी दण्डवानितिवद्गोत्वी गोत्ववानिति प्रत्ययाभावात् ।

सास्नादिमत्त्वधर्मस्यैकस्य सर्वत्र प्रतिभासोऽस्तीति चेत्, कृतं तर्हि जात्या, तत एवानुवृत्तव्यवहारोपपत्तेः ।

किंच जातिं स्वीकुर्वता तद्व्यञ्जकं किंचिद्वाच्यम्,तदपि कुत्र वर्तेत इति पर्यनुयोगे यत्र जातिस्तत्र वर्तत इत्युक्तावन्योन्याश्रयता, उभयोर्वा कुत्र वृत्तिरिति पर्यनुयोगे यदि व्यञ्जकान्तरमभ्युपगच्छेत् तदानवस्था, यदि न तदोभयोरपि वस्तुमात्रवृत्तितया सर्वत्र सर्वा जातिर्वर्ततेति सां-

र्थ्यप्रसङ्गः, यत्र यत् प्रतीयते तत्र तद्वर्तत इति प्रतीतिबलव्यवस्थापकत्वेऽपि व्यञ्जकाङ्गीकारवैयर्थ्यम्, प्रतीतिमात्राच्च तथात्वाङ्गीकारे नभोनीलिमादेरपि तथात्वापातः, अबाधितप्रतीतेर्व्यवस्थापकत्वाङ्गीकारे चेहापि युक्तिबाधस्य सुवचत्वेन तादृशप्रतीतेरपि व्यवस्थापकता ।

किंच[1] जातिस्वीकारवादिनापीयं जातिरियं जातिरित्यनुवृत्तप्रत्ययसिद्धये कश्चिदुपाधिरेष्टव्यः, तथा च सार्वत्रिकः स एवानुवृत्तप्रत्ययनिदानमस्तु, तदलं जातिकल्पनादुर्व्यसनेन, तदेवं न प्रत्यक्षं जातौ क्रमते ।

अस्तु तर्हि गन्धवन्तो[2] गन्धवदगन्धावृत्तिगन्धवद्वृत्त्यवृत्त्यन्यधर्मवन्तः, तथा शैत्यवन्तः शीतवदशीतावृत्तिशीतवद्वृत्त्यवृत्त्यन्यधर्मवन्तः प्रमेयत्वाज्ज्वलनादिवत्, इत्यनुमानैः पृथिवीत्वजलत्वादीनां सिद्धिः ।

विवादाध्यासितानि द्रव्यगुणकर्माणि सामान्यवन्त्यनित्यत्वाद्गोवदित्यनुमानेन सत्तायाश्च सिद्धिरिति चेत्, न, प्रथमप्रयोगेषु तत्तज्जातिव्यञ्जकगन्धवत्त्वशीतवत्त्वादिधर्मैरेवार्थान्तरत्वात्, जात्यनङ्गीकारवादिनं प्रति गोवदिति दृष्टान्तस्य साध्यविकलत्वाच्च ।

किंच सर्वसर्वगता जातिरुत व्यक्तिसर्वगता ।

नाद्यः, विकल्पासहत्वात्, किं सर्वसर्वगतत्वं नाम सर्वत्र संयोगस्तादात्म्यं वा समवायो वा संबन्धान्तरं वा ।

---

१ जातिवादिनाप्युपाधेरनुवृत्तप्रत्ययहेतुत्वाङ्गीकारात्, तस्यैव च सार्वत्रिकत्वात् स एवानुवृत्तप्रत्ययहेतुरस्तु किं जात्येत्याह किंचेति ।

२ गन्धवन्त इति, गन्धवदगन्धयोर्व्यासज्य यो न वर्तते, यश्च गन्धवदेकदेशवृत्तेर्घटत्वादेरन्यः, तादृशधर्मवन्त इत्यर्थः। अत्र गन्धवद्वृत्त्यवृत्त्यन्यधर्मवत्त्वमात्राभिधाने सत्ताद्रव्यत्वयोरपि समस्तगन्धवद्वृत्तितया तदधिकरणत्वेन सिद्धसाधनता, तन्निरासार्थं गन्धवदगन्धावृत्तीति विशेषणम्, तयोश्च गन्धवत्यां पृथिव्यां गन्धरहिते जलादौ च वर्तमानत्वाद्व्युदासः। गन्धवदगन्धावृत्तिधर्मवत्त्वमात्रसाधने घटत्वाद्यधिकरणतया सिद्धसाधनम्, घटत्वादिजातेरपि गन्धवन्मात्रवृत्तितया गन्धवदगन्धावृत्तित्वात्, अत उक्तं गन्धवद्वृत्त्यवृत्त्यन्येति, गन्धवति घटे वृत्तिर्गन्धवति पटेऽवृत्तिश्च यस्य घटत्वादेः स गन्धवद्वृत्त्यवृत्तिः, अगन्धावृत्तिगन्धवद्वृत्त्यवृत्त्यन्यधर्मवन्त इत्यभिधाने प्रमेयत्वहेतोर्जलादिषु व्यभिचारः, तेषामगन्धानामगन्धावृत्तिधर्मवत्त्वाभावात्, अत उक्तं गन्धवदिति, जलादिषु अगन्धावृत्तिधर्मवत्त्वाभावेऽपि गन्धवदगन्धावृत्तिधर्मवत्त्वमस्त्येव, जलत्वादेरगन्धमात्रवृत्तित्वे गन्धवदन्यवृत्तित्वाभावात्, तदधिकरणत्वाच्च जलादीनाम्, तथा च सत्ताद्रव्यत्वातिरिक्तसकलगन्धवद्वृत्तिधर्मसिद्धौ पृथिवीत्वादिसिद्धिरिति तात्पर्यार्थः ।

अद्रव्यत्वान्न संयोगः सांकर्यादेतरावपि ।
पदार्थान्तरतापत्तेर्नान्यसंबन्धसंभवः ॥ ४७ ॥

न तावज्जातेः सर्वव्यक्तिसंयोगः, अद्रव्यत्वात् ।

न तादात्म्यसमवायौ, सर्वव्यक्तिषु सर्वजातीनां तादात्म्ये समवाये वा सर्वस्य सर्वात्मताप्रतीतिप्रसङ्गात् ।

व्यञ्जकाभावान्न तथेति चेत्, न, तादात्म्यसमवायस्वीकारे शाबलेयादिव्यक्तिवदेव तद्व्यञ्जकताया अपि दुर्निवारत्वात् ।

स्वभावभेदात् कस्यचिदेव व्यञ्जकत्वं न सर्वस्येति चेत्, न, सिद्धे प्रमाणतः सर्वत्र संबन्धे स्वभावभेदालम्बनं न तु स्वभाववादपादप्रसारिकयैव वस्तुसिद्धिः, अन्यथास्यैव पवनादावपि रूपसंभेदः, स्वभावभेदादेवाप्रतीतिरित्यनर्गलगर्जनस्य कः प्रतीकारः स्यात् ।

नापि संबन्धान्तरम्, षट्पदार्थातिरिक्तपदार्थान्तरस्वीकारप्रसङ्गात् ।

नापि पिण्डसर्वगता जातिः, उत्पद्यमानघटमुण्डादिपिण्डेषु पिण्डान्तरस्थिताया जातेः संबन्धाभावप्रसङ्गात्, न हि सा पिण्डान्तरादुत्प्लुत्यागत्यानुप्रविशति, निष्क्रियत्वात्, तत्परित्यागे च पूर्वपिण्डे तद्व्यवहाराभावप्रसङ्गात् ।

न चांशाभ्यामुभयत्र वृत्तिः, अनंशत्वात् ।

स्वसामग्रीवशादुपजायमानः पिण्डस्तत्संबन्धाविशिष्ट एवोत्पद्यते-ति चेत्, न, पिण्डोत्पत्तेः प्राक् तत्र तस्या अभावात्, भावे च सर्वगतत्वापत्तेः, तदुक्तं बौद्धैः

"न याति न च तत्रासीदस्ति पश्चान्न चांशवत् ।
जहाति पूर्वं नाधारमहो व्यसनसंततिः" ॥

इति ।

सर्वपिण्डप्रलये च घटत्वादिजातेरुच्छेदप्रसङ्गः ।

संबन्धिविगमेऽपि तस्याः स्वरूपेणावस्थानमिति चेत्, न, आधारविगमेऽप्याधेयावस्थाने रूपादेरपि तथावस्थितेर्गुणत्वभङ्गप्रसङ्गः, तदेतदनूक्तं

तत्संयोगस्य तदनेकावयव [illegible] परमाणुभिः संयोगस-चिवैः समानजातीयैर्द्व्यणुकादिक्रमेण सर्वं कार्यद्रव्यमारभ्यत इति मनोरथमात्रम् ।

किंच ।

परमाणुबहुत्वेन महत्त्वारम्भसंभवात् ।
त्र्यणुके द्व्यणुकारम्भप्रक्रियापि न सिध्यति ॥ ४८ ॥

द्व्यणुकादिप्रक्रमप्रक्रियापि न प्रमाणपथमवतरति, अणुभिरेव त्र्यणुकाद्युत्पत्तेरुपपत्तेः ।

नन्वेवं सति त्र्यणुके महत्त्वं न स्यात्, परमाणुपरिमाणस्य नित्यपरिमाणतयानारम्भकत्वात् ।

अवयवस्य निरवयवेष्वनाशङ्कनीयत्वादिति चेत्, न, कारणबहुत्वादेव त्र्यणुकादौ महत्त्वोपपत्तेः ।

न च परमाणुगतानेकत्वसंख्यानारम्भिका, तद्गतद्वित्वस्यापि द्व्यणुकपरिमाणानारम्भकत्वप्रसङ्गात् ।

नन्वेवमेवानां परमाणूपादानकत्वे कपालशर्करादीनामनारब्धत्वात् परमाणूनां चातीन्द्रियत्वादवयविनाशे न किंचिद् दृश्येतेति चेत्, न, द्व्यणुकारब्धत्वेऽपि प्रसङ्गस्य तुल्यत्वात् ।

त्र्यणुकचतुरणुकादिक्रमेणारम्भाचायं प्रसङ्ग इति चेत्, न, चतुर्भिर्द्व्यणुकैश्चतुरणुकवद् द्व्यणुकसप्तकारब्धकार्यनाशेऽपि प्रसङ्गस्य तुल्यत्वात्, तस्माद् द्व्यणुकसद्भावे न किंचिन्मानमस्ति ।

ननु त्र्यणुकं कार्यद्रव्योपादानकं महत्त्वे सति कार्यत्वाद् घटवत्, तथारम्भकद्रव्यसंख्या [illegible] तरतमभावत्वात् परिमाणतरतमभाववत् ।

न चैकत्वसंख्यायामेव विश्रान्तौ सिद्धसाधनता, तथा सत्येकद्रव्यस्यैव द्रव्यारम्भकत्वप्रसङ्गात् ।

न चैकद्रव्यारब्धं द्रव्यम्, [illegible] द्रव्यसमवायप्रसङ्गात्, [illegible] विभा-[illegible] । ([illegible])

चतुर्थः परिच्छेदः ।

(*Continued from page* 34. VOL. VI.)

अथागमो निरूप्यते ।

यस्य वाक्यस्य तात्पर्य्यविषयीभूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम् । वाक्यजन्ये च ज्ञाने आकाङ्क्षायोग्यतासत्तयस्तात्पर्य्यज्ञानञ्चेति चत्वारि कारणानि ।

तत्र पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षा । क्रियाश्रवणे कारकस्य कारकश्रवणे क्रियायाः करणश्रवणे इतिकर्त्तव्यतायाश्च जिज्ञासाविषयत्वात् ।

अजिज्ञासोरपि वाक्यार्थबोधाद् योग्यत्वमुपात्तं ।

तदवच्छेदकञ्च क्रियात्वकारकत्वादिकमिति नातिव्याप्तिः । अभे-

Verbal evidence is now expounded. A sentence is authoritative, if the relation implied by the meaning (of the sentence) is not falsified by any other source of right knowledge. The four causes of the knowledge resulting from a sentence are expectancy, compatibility, juxtaposition and the intention (of the speaker).

Expectancy * is the capacity inherent in the meanings of words by which one word becomes the object of search, when another has been heard. For, when a word-implying action is heard, a word implying something in relation with that action (sc. a noun) is sought for (*by the hearer*) and *vice versa*; and when a word implying an instrument is heard, the word implying the method of its action is sought for.

Inherent capacity is inserted (in the definition), because a knowledge of the meaning of a sentence accrues to a hearer even when he is not seeking for its meaning.

Relations such as that of verb and object-noun &c. determine expectancy (tad): thus the charge of ultra-pervasiveness does not lie against our definition † In

* The definition of ákáńkshá in the Siddhánta-muktávalí is clearer: आकाङ्क्षां विवृणोति । येन पदेन विना यत्पदस्य अन्वयाननुभावकत्वं तेन पदेन सह तस्याकाङ्क्षेत्यर्थः । क्रियापदं विना कारकपदं नान्वयबोधं जनयति तेन तस्याकाङ्क्षा ॥

† The definition of expectancy is confined to the fulfilment of such relati ns as those noted in the text, and the definition, thus

दान्वये च समानविभक्तिकपदप्रति-
पाद्यत्वं तदवच्छेदकमिति तत्त्वम-
स्यादि वाक्येषु नाव्याप्तिः ।

एतादृशाभिप्रायेणैव बलाबला-
धिकरणे सा वैश्वदेव्यामिक्षा वाजि-
भ्यो वाजिनमित्यत्र वैश्वदेवयागस्या-
मिक्षान्वितत्वेन न वाजिनाकाङ्क्षेत्या-
दिव्यवहारः ।

ननु तत्रापि वाजिनस्य जिज्ञासा-
विषयत्वेऽपि तद्योग्यत्वमस्त्येव प्रदे-
यद्रव्यत्वस्य यागनिरूपितजिज्ञासा-
विषयतावच्छेदकत्वात् इति चेन्न ।

a case where the connexion is one of identity (i.e. when the knowledge, that the things represented by the words are identical, results), the meaning implied by words in the same case (grammatical) is that which determines expectancy (tad): thus our definition is not non-pervasive with reference to such sentences as "that thou art" &c *

With this same view, the text:—"this ámikshá belongs to the vaiśvadeva sacrifice: to the váji's vájina (is offered)" is quoted in a section dealing with the relative weight (of the six proofs of Injunctions). Here, since the vaiśvadeva sacrifice is connected in sense with ámikshá (the substance offered), it has no prospective connexion with vájina: this is the common usage with regard to such texts.

To this it may be objected that although, in the above text, vájina is not what is looked for (by the hearer), it may be quite appositely thus sought for, since the notion of a thing that may be offered constitutes the object of the inquiry regading the sacrifice.

restricted, will not apply, faultily, (nátivyápti) to aśvo gauh &c. (nom: case); because these do not represent the káraka relation of grammarians. तद् in तदवच्छेदकम् stands for योग्यत्वम् or, better, for विषयत्वम् in the definition of expectancy. For *avacchedaka*, vide E. B. Cowell's Kusumáñjali, note. p. 26.

* By this addition the text anticipates the objection that expectancy will not be found in such sentences as "that thou art," since propositions, expressing the identity of subject and predicate, do not contain the kriyá—or káraka-relations.

Digitized by Google

स्वसमानजातीयपदार्थान्वयबोधविरहसहकृतप्रदेयद्रव्यत्वस्यैव तदवच्छेदकत्वेन वाजिनद्रव्यस्य स्वसमानजातीयामिक्षाद्रव्यान्वयबोधसहकृतत्वेन तादृशावच्छेदकत्वाभावात् ।

आमिक्षायान्तु नैवं वाजिनान्वयस्य तदानुपस्थानात् । उदाहरणान्तरेष्वपि दुर्बलत्वप्रयोजकाकाङ्क्षाविरह एवमेव द्रष्टव्यः ।

योग्यता च तात्पर्य्यविषयसंसर्गाबाधः । वह्निना सिञ्चतीत्यादौ तादृशसंसर्गबाधान्न योग्यता । स प्रजापतिरात्मनो वपामुदखिददित्यादावपि तात्पर्य्यविषयभूतपशुप्राशस्त्याबाधाद्योग्यता । तत्त्वमस्यादि

Not so, we reply: for, in as much as what constitutes the object of the inquiry regarding the sacrifice (tadavacchedakatvena) is the notion of a thing that can be offered together with an absence of any knowledge of the connexion between such thing and others of the same class, the substance vájina cannot be the object of such inquiry, because it is accompanied with a knowledge of the substance ámikshá as belonging to the same class with itself.

But such verbal knowledge (evam) does not occur in the case of ámikshá (in the above text), for when this word is heard (tadá), the connexion between it and vájina is not effected. Thus, in other instances also, the absence of expectancy must be regarded as the cause of a word not being taken in connexion with what precedes it (durbalatva).

Compatibility consists in the relation intended (by the speaker) not being destroyed. Thus there is no compatibility in the sentence "he sprinkles with fire", since such relation (viz, that between sprinkling and fire) is falsified (by experience). Compatibility is found however, in such texts as "Prajápati tore out his own entrails", since their is no falsification of the excellence of animal (sacrifice) which is the object intended (by the text). Compatibility is also found in such sentences as "that thou art" &c, since there is no falsification of the identity conveyed in the

वाक्येष्वपि वाच्याभेदबाधेऽपि लक्ष्यस्वरूपाभेदे बाधाभावाद्योग्यता ।

आसत्तिश्चाव्यवधानेन पदजन्यपदार्थोपस्थितिः । मानान्तरोपस्थापितपदार्थस्यान्वयबोधाभावात् पदजन्येति । अतएवाश्रुतस्थले तत्तत्पदाध्याहारः द्वारमित्यादौ पिधेहीत्यादिः । अतएवेषे त्वेत्यादौ छिनद्मीति पदाध्याहारः । अतएव विकृतिषु सूर्य्याय त्वा जुष्टं निर्व्वपामीति पदप्रयोगः ।

पदार्थश्च द्विविधः शक्यो लक्ष्यश्चेति । तत्र शक्तिर्नाम पदानामर्थेषु मुख्या वृत्तिः यथा घटपदस्य पृथुबुध्नोदराकृतिविशिष्टे वस्तुविशेषे वृत्तिः ।

implied meanings (of the words "that" and "thou"), although the identity conveyed in their literal meanings is falsified.

Juxtaposition is the knowledge of the meanings of words resulting from the words (being heard) without any long pause being made (between the several words). (The qualification) "resulting from the words (being heard)" is added, because no knowledge will result of the connexion between the meaning of one word and that of another which has been learnt through one of the other sources of right knowledge. Wherefore, when a word is not heard, such word is supplied, as in the case of *januam* the word *claude* is supplied. In mantras also, such as "For prosperity, thee * * *," the word "I cut" is supplied. Thus too, in the so-called vikṛiti sacrifices, * the word nirvapámi (I offer) is supplied in "Súryáya tva jushṭam"—I offer thee dear to Súrya.

The meanings of words are of two kinds: the one comes from the power of the word (i.e. literal meaning), the other is the implied meaning. The power (of words) is the primary connexion between words and the objects denoted by them: for instance, the primary relation between the word *jar* and a certain hollow object with a broad bottom (is the power of that word). †

* "A mere modification (vikṛiti) on the other hand is that form of sacrifice where there are no direct rules with regard to the subsidiary matters. . ." Arthasamgraha, G. Thibaut's translation p. 14.

† Padártha in padárthántaram may be taken as *thing, object;*

Digitized by Google

सा च शक्तिः पदार्थान्तरं। सिद्धान्ते कारणेषु कार्य्यानुकूलशक्तिमात्रस्य पदार्थान्तरत्वात्।

सा च तत्तत्पदजन्यपदार्थज्ञानरूपकार्य्यानुमेया।

तादृशशक्तिविषयत्वं शक्यत्वं तच्च जातेरेव न व्यक्तेः। व्यक्तीनामानन्त्येन गुरुत्वात्।

कथं तर्हि गवादिपदाद्व्यक्तिभानमितिचेत् जातेर्व्यक्तिसमानसंवित्संवेद्यत्वादिति ब्रूमः।

यद्वा गवादिपदानां व्यक्तौ शक्तिः

And this power is something distinct from the meaning of the word; for it is a settled point with us that all powers, residing in causes (and) producing certain effects are something distinct (from the causes and the effects)

The power of any word (sá) is inferred from its result—(and the result is) the knowledge of the meaning of the word, which in turn results from the (hearing of the) word.

The literal meaning is that which is made known by such power, and this (literal meaning) attaches to the class-notion and not to the individual object; for it would be cumbrous (to maintain the latter proposition), since individuals are endless.

If you ask, by way of objection, how it is that we obtain a knowledge of the individuals through such words as cow &c, we reply, this is possible because the class-notion is obtained in the same act of knowledge as the individual.

Or again * (we may allow that) the power of the word cow and the like attaches to the in-

but the rendering padasya arthah seems to give better sense. Śakti (power) is the primary connecting link between a pada and its meaning: these being termed the sambandhi's. The primary or literal meaning (śakya) results from a knowledge of the Śakti.

* The admission that the link Śakti attaches, potentially (svarúpasatí), to the individual is, apparently, the middle position between the view preceding it in the text and that of the Nyáya. The latter holds that Śakti does not link on to either the class or individual separately, but to the individual as distinguished by this or that class :—जातिविशिष्टाकृतिविशिष्टव्यक्तौ शक्तिरस्तीति।

Digitized by Google

स्वरूपसती न तु ज्ञाता । जातौ तु सा ज्ञाता हेतुः ।

dividual as a relation pure and simple (svarúpasatí), but is not cognised (by us, as thus connecting the word and the individual); whereas it is known by us to attach to the class, and (hence it) is the cause (of the class-notion).

न च व्यक्त्यंशे शक्तिज्ञानमपि कारणं गौरवात् जातिशक्तित्वज्ञाने सति व्यक्तिशक्तित्वज्ञानं विना व्यक्तिधीविलम्बाभावाच्च ।

Moreover, the knowledge that the power (of a word) attaches to an individual is not the cause of the knowledge of the individual, for such surmisal is cumbrous; and because the knowledge of the individual is readily obtained, without the knowledge that the power attaches to the individual, as soon as the knowledge of the power as attaching to the class is obtained.

अतएव न्यायमतेऽप्यन्वयेऽपि शक्तिः स्वरूपसतीति सिद्धान्तः ।

Wherefore, it is a tenet of the Nyáya also that even as regards the connexion between a word and its meaning (anvaye) the power is simply required as really existing (and not the knowledge of its existence.

ज्ञायमानशक्तिविषयत्वमेव वाच्यत्वमिति व्यक्तिरवाच्या ।

The literal meaning is that which comes from a power that is cognised. The individual is not pointed out.

अथवा व्यक्तेर्लक्षणयावगमः । यथा नीलो घटइत्यत्र नीलशब्दस्य नीलगुणविशिष्टे लक्षणा तथा जातिवाचकस्य तद्विशिष्टे लक्षणा ।

Or, to state another opinion, the individual is known through implication: just as in the case of "blue jar," there is the relation of implication between the word blue and an object possessing blue colour, so implication holds between the word expressing the class and the individual possessing that class (tad).

Digitized by Google

तदुक्तम् । अनन्यलभ्यः शब्दार्थ इति । एवं शक्यो निरूपितः ।

अथ लक्ष्यपदार्थो निरूप्यते । तत्र लक्षणाविषयो लक्ष्यः । लक्षणा च द्विविधा केवललक्षणा लक्षितलक्षणा चेति । तत्र शक्यसाक्षात्सम्बन्धः केवललक्षणा यथा गङ्गायां घोष इत्यत्र प्रवाहसाक्षात्सम्बन्धिनि तीरे गङ्गापदस्य केवललक्षणा ।

यत्र शक्यपरम्परासम्बन्धेनार्थान्तरप्रतीतिस्तत्र लक्षितलक्षणा यथा द्विरेफपदस्य रेफद्वययुक्तभ्रमरपदघटितपरम्परासम्बन्धेन मधुकरे वृत्तिः ।

गौण्यपि लक्षितलक्षणैव यथा सिंहो माणवक इत्यत्र सिंहशब्दवाच्यसम्बन्धिशौर्यादिसम्बन्धेन माणवकस्य प्रतीतिः । (शेषमग्रे)

There is a (Mímámsá) maxim that the meaning of a word is that which cannot be known through any other source (e. g. implication &c). Thus literal meaning has been expounded.

The implied meaning of words is now explained. The implied meaning is that which comes from the relation termed lakshaṇá (implication). Implication is of two kinds, simple, and complex. Simple implication is the immediate relation between the literal (and implied meanings of the word). Thus in the sentence "a herdsman dwells on the Gangá," simple implication holds between the word Gangá and the (meaning) *bank*, which is in immediate contact with the stream (praváha being the literal meaning of the word Gangá).

Complex implication occurs where some other meaning is made known through its mediate relation with the literal meaning. Thus implication holds between the word *dvirepha* ("containing two r's") and the meaning *bee* through the further connexion between the meaning *bee* and the word *bhramara* (which word contains two r's and means bee).

Figurative relation also falls under the same head of complex implication. Thus in the "boy is a lion," we understand *boy* in connexion with courage and the like, which qualities are connected with the literal meaning of the word *lion*. A. V.

पञ्चदशी ।

अथ पञ्चकोशविवेकः ।

(*Continued from page* 47. VOL. VI.)

गुहाहितं ब्रह्म यत्तत्पञ्चकोशविवेकतः ।
बोद्धुं शक्यं ततः कोशपञ्चकं प्रविविच्यते ॥ १ ॥
देहादभ्यन्तरः प्राणः प्राणादभ्यन्तरं मनः ।
ततः कर्ता ततो भोक्ता गुहा सेयं परम्परा ॥ २ ॥
पितृभुक्तान्नजाद्वीर्याज्जातोऽन्नेनैव वर्द्धते ।
देहः सोऽन्नमयो नात्मा प्राक् चोर्ध्वं तदभावतः ॥ ३ ॥
पूर्वजन्मन्यसन्नेतज्जन्म संपादयेत्कथम् ।
भाविजन्मन्यसत्कर्म न भुञ्जीतेह सञ्चितम् ॥ ४ ॥

1. The absolute Reality, seated in a cavity, may be known by a discrimination of the five vestures (of migrating souls): wherefore the five vestures are now examined.

2. The vital air (sc. the vesture of the vital airs) is within the gross body (sc. the earthly vesture); the common sensory (sc. the sensorial vesture) is within the vital air (sc. the vesture of the vital airs); the agent (sc. the cognitional vesture) is within the common sensory; the enjoyer * (sc. the beatific vesture) is within the cognitional vesture:—this succession (of vestures) represents the cavity. †

3. The gross body, springing from the germ produced from the food eaten by the parent, is supported by food. This body, made up of food, is not the Self; for it did not exist previous to its production, nor does it exist after its destruction.

4. How could that which was non-existent in a prior state (sc. the gross body of the present time) have brought about the present state of existence? That, which will be non-existent, could not work out, in a future state, the results of actions heaped up during this life.

1. cf. Taittiríya Upanishad, II. 1.

2. †Śaṅkara, *in loco*, explains cavity by mind:—तस्मिन्[illegible] वा बुद्धिगुहा तस्यां निहितं ब्रह्म तद्बुद्ध्या विविक्ततयोपलभ्यत इति ।

* cf. śl. 9.

पूर्णो देहे बलं यच्छन्नक्षाणां यः प्रवर्तकः ।
वायुः प्राणमयो नासावात्मा चैतन्यवर्जनात् ॥ ५ ॥
अहन्तां ममतां देहे गेहादौ च करोति यः ।
कामाद्यवस्थया भ्रान्तो नासावात्मा मनोमयः ॥ ६ ॥
लीना सुप्तौ वपुर्बोधे व्याप्नुयादानखाग्रगा ।
चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभाक् ॥ ७ ॥
कर्तृत्वकरणत्वाभ्यां विक्रियेतान्तरिन्द्रियम् ।
विज्ञानमनसी अन्तर्बहिश्चैते परस्परम् ॥ ८ ॥
काचिदन्तर्मुखा वृत्तिरानन्दप्रतिबिम्बभाक् ।
पुण्यभोगे भोगशान्तौ निद्रारूपेण लीयते ॥ ९ ॥

5. The air, filling the body, giving force to it and stimulating the sense-organs constitutes the vesture of the vital airs. This is not the Self, for it is destitute of intelligence.

6. That which gives the notion of *myself* with reference to this gross body, and of *mine* in regard to houses and like possessions, and is unstable through desire and other passions, is the sensorial vesture. This is not the Self.

7. Mind, associated with the reflection upon it of Intelligence (Chit, Brahma), lost during dreamless sleep and, in the waking state (bodhe), pervading the body to the tips of the nails, is meant by the cognitional vesture. This is not the Self.

8. The internal organ (sc. vijñána, mind, and manas, common sensory) is modified in the form of agent and instrument; and these two, mind and the common sensory, are placed one within the other, respectively.

9. There is a certain modification (of mind), which, while it enjoys the fruit of meritorious actions, deals with internal objects (and) bears upon itself a reflexion of the supreme Bliss, (and) when such enjoyment ceases, it is lost in the form of sleep.

5–8. cf. Vedántasára :—विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः । मनोमय इच्छाशक्तिमान् करणरूपः । प्राणमयः क्रियाशक्तिमान् कार्यरूपः । and "Pandit" Vol : V. p. 609.

Digitized by Google

कादाचित्कत्वतो नात्मा स्यादानन्दमयोऽप्ययम् ।
बिम्बभूतो य आनन्द आत्माऽसौ सर्वदा स्थितेः ॥ १० ॥
ननु देहमुपक्रम्य निद्रानन्दान्तवस्तुषु ।
माभूदात्मत्वमन्यस्तु न कश्चिदनुभूयते ॥ ११ ॥
बाढं निद्रादयः सर्वेऽनुभूयन्ते न चेतरः ।
तथाप्येतेऽनुभूयन्ते येन तं को निवारयेत् ॥ १२ ॥
स्वयमेवानुभूतित्वाद्विद्यते नानुभाव्यता ।
ज्ञातृज्ञानान्तराभावादज्ञेयो न त्वसत्तया ॥ १३ ॥
माधुर्यादिस्वभावानामन्यत्र स्वगुणार्पिणाम् ।
स्वस्मिंस्तदर्पणापेक्षा नो न चाऽस्त्यन्यदर्पकम् ॥ १४ ॥
अर्पकान्तरराहित्येऽप्यस्त्येषां तत्स्वभावता ।
माभूत्तथानुभाव्यत्वं बोधात्मा तु न हीयते ॥ १५ ॥

10. This, the beatific vesture, is also not the Self, for it is temporary. The supreme Bliss (i.e. Brahma), which is reflected (in this vesture), is the Self, since it subsists eternally.

11. Now you may object that, granting Self is not to be identified with any of these things beginning with the gross body and ending with the bliss of dreamless sleep, certainly no other Self is perceived.

12. Quite true! (we rejoin): the bliss of dreamless sleep &c, all these and no other Self are perceived by us; yet, what is to preclude that by which all these are known?

13. This (the Self, the witness of all, sákshí) is not an object of consciousness, for it is consciousness itself. The witness is unperceived, not that it is non-existent, but because no other cogniser and cognition exist by which it should be known.

14. Substances, whose natural attributes are sweetness and the like, yield their own attributes to other substances, nor need the bestowal upon themselves of such qualities. Nor is there any other substance, (themselves apart), that can yield these attributes.

15. Although there be no other yielder (of sweetness than a sweet substance), these (sweet) substances are held to exist. Similarly, while (we grant that) the cogniser is not an object of consciousness, the Self consisting in knowledge is not denied.

Digitized by Google

स्वयंज्योतिर्भवत्येष पुरो ऽस्माद्भासते ऽखिलात् ।
तमेवभान्तमन्वेति तद्भासा भासते जगत् ॥ १६ ॥
येनेदं जानते सर्वं तत्केनान्येन जानताम् ।
विज्ञातारं केन विद्याच्छक्तं वेद्ये तु साधनम् ॥ १७ ॥
स वेत्ति वेद्यं तत्सर्वं नान्यस्तस्यास्ति वेदिता ।
विदिताविदिताभ्यां तत्पृथग्बोधस्वरूपकम् ॥ १८ ॥
बोधेप्यनुभवो यस्य न कथञ्चन जायते ।
तं कथं बोधयेच्छास्त्रं लोष्टं नरसमाकृतिम् ॥ १९ ॥
जिह्वामे ऽस्ति न वेत्युक्तिर्लज्जायै केवलं यथा ।
न बुध्यते मया बोधो बोद्धव्य इति तादृशी ॥ २० ॥
यस्मिन्यस्मिन्नस्ति लोके बोधस्तत्तदुपेक्षणे ।

16. "This spiritual reality is self-luminous. It shines before all this world. The world shines after it as it shines. The world is bright with its light."

17. "By what else can men know that through which they know all this (world)? By what should one know the knower?" An instrument (of knowledge) can apply (śaktam) only to that which is capable of being known.

18. The Self knows all this that can be known. There is no knower of Self. That which is knowledge in its essence is distinct from things known and unknown.

19. How can science teach a man, dull as a clod of earth, in whom a consciousness of his own knowledge even never arises?

20. Have I a tongue or not?—the utterance of these words is simply a disgrace (to one's intelligence). A like disgrace attaches to the man who says:—my knowledge is not known by me: it is yet to be known.

21. We have a knowledge of various objects (loke bodhah). The mere cognition (i.e. pure Intelligence) that remains, when the contents of our knowledge are disregarded, is Brahma:—such is

16. cf. Muṇḍaka Upanishad II. 2, and Kaṭha V. 15.

17. cf. Bṛihadáraṇyaka IV. 4.

यद्बोधमात्रं तद्ब्रह्मेत्येवं धीर्ब्रह्मनिश्चयः ॥ २१ ॥

पञ्चकोशपरित्यागे साक्षिबोधावशेषतः ।

तत्स्वरूपं स एवस्याच्छून्यत्वं तस्य दुर्घटम् ॥ २२ ॥

अस्ति तावत्स्वयं नाम विवादाविषयत्वतः ।

स्वस्मिन्नपि विवादश्चेत्प्रतिवाद्यत्र को भवेत् ॥ २३ ॥

स्वासत्त्वं तु न कस्मैचिद्रोचते विभ्रमं विना ।

अत एव श्रुतिर्बाधं ब्रूते चासत्त्ववादिनः ॥ २४ ॥

असद्ब्रह्मेति चेद्वेद स्वयमेव भवेदसत् ।

अतोऽस्य माभूद्वेद्यत्वं स्वसत्त्वं त्वभ्युपेयताम् ॥ २५ ॥

कीदृक् तर्हीति चेत्पृच्छेदीदृक्ता नास्ति तत्र हि ।

यदनीदृगतादृक् च तत्स्वरूपं विनिश्चिनु ॥ २६ ॥

अक्षाणां विषयस्त्वीदृक् परोक्षस्तादृगुच्यते ।

the consciousness expressive of our certainty of the absolute Reality.

22. Since the Witness remains as pure intelligence after we have discarded the five vestures (as not the Self), it must be the reality (svasvarúpam). To prove the Witness (tasya) to be blank nonentity would be hard.

23. Self indeed is, for it cannot be gainsaid. If the controversy turn upon the Self, who, pray, is to appear against Self?

24. The doctrine that the Self is non-existent commends itself to no man save through error. Revelation, moreover, refutes the man that holds to the unreality of Self.

25. If a man believes Brahma to be non-existent, he himself must be non-existent (for Brahma and Self a reone). Wherefore the reality of Self mnst be maintained, though we admit that it cannot be an object of knowledge.

26. Under what form then does Self exist?—if one were to ask this, we would reply that the notion of this or that mode does not apply to Self. That, which is not like this nor like that, you must regard with certainty as Self in its essence.

27. An object known through the senses is commonly spoken of as "like this" and that which is not presented to consciousness

विषयी नाक्षविषयः स्वत्वान्नास्य परोक्षता ॥ २७ ॥
अवेद्योऽप्यपरोक्षोऽतः स्वप्रकाशो भवत्ययम् ।
सत्यं ज्ञानमनन्तं चेत्यस्तीह ब्रह्मलक्षणम् ॥ २८ ॥
सत्यत्वं बाधराहित्यं जगद्बाधैकसाक्षिणः ।
बाधः किंसाक्षिको ब्रूहि न त्वसाक्षिक इष्यते ॥ २९ ॥
अपनीतेषु मूर्तेषु ह्यमूर्तं शिष्यते वियत् ।
शक्येषु बाधितेष्वन्ते शिष्यते यत्तदेव तत् ॥ ३० ॥
सर्वबाधे न किंचिच्चेद्यन्न किंचित्तदेव तत् ।
भाषा एवात्र भिद्यन्ते निर्बाधं तावदस्ति हि ॥ ३१ ॥
अत एव श्रुतिर्बाध्यं बाधित्वा शेषयत्यदः ।
स एष नेति नेत्यात्मेत्यतद्व्यावृत्तिरूपतः ॥ ३२ ॥

as "like that". The cogniser (vishayí) is not known through the sense-organs; nor is there a non-presentation of Self, for the nature of Self (implies presentation).

28. This Self, though not an object of knowledge, is presented in consciousness; hence it is self-luminous. Brahma is defined as "the reality, the knowledge, the infinite".

29. Reality is incapability of being falsified. (If you declare for a) sublation of the self, which (according to us) is the only witness of the sublation of the phenomenal world (during dreamless sleep, fainting fits and samádhi), you must (also) declare whether such sublation is itself without a witness. On the other hand, to declare for a sublation without a witness of it is not a satisfactory position for yourselves.

30. Just as formless ether remains (pervading the house from which all) figured things (e.g. jars &c.) have been removed; so the Self remains at last, when things that can be falsified have been proved false.

31. If you object that when all is proved false, not any thing will remain, we answer that the consciousness, which the words *not any thing* imply, is that Self (the witness). Here, merely the words vary (sc. we speak of a *witness* and you of a *not any thing remaining*). This absolute consciousness remains without being sublated.

28. Taittiríya Upanishad II. 1.

इदंरूपं तु यद्यावत्तत्त्यक्तुं शक्यतेऽखिलम् ।
अशक्यो ह्यनिदंरूपः स आत्मा बाधवर्जितः ॥ ३३ ॥
सिद्धं ब्रह्मणि सत्यत्वं ज्ञानत्वं तु पुरेरितम् ।
स्वयमेवानुभूतित्वादित्यादिवचनैः स्फुटम् ॥ ३४ ॥
न व्यापित्वाद्देशतोऽन्तो नित्यत्वान्नापि कालतः ।
न वस्तुतोऽपि सार्वात्म्यादानन्त्यं ब्रह्मणि त्रिधा ॥ ३५ ॥
देशकालान्यवस्तूनां कल्पितत्वाच्च मायया ।
न देशादिकृतोऽन्तोऽस्ति ब्रह्मानन्त्यं स्फुटं ततः ॥ ३६ ॥
सत्यं ज्ञानमनन्तं यद्ब्रह्म तद्वस्तु तस्य तत् ।

32. Moreover, revelation, having shown all to be false that is capable of sublation, declares this absolute consciousness to be the residuum, by the exclusion of all that is not Self (atad), as in the text, "Self is not this nor this."

33. All that is known under "this form" (i.e. object-consciousness) can be disregarded (as unessential, unreal, because not permanent). That which is present to consciousness, but not as an object, cannot be thus disregarded. This is the Self which cannot be falsified.

34. Reality has been proved of Brahma. That Brahma is knowledge has been clearly declared above in the words "Svayameva &c (verse 13)".

35. The infinity of Brahma is three-fold. Brahma is not limited as to space, for it is universally extensive; nor as to time, since it is eternal; nor as to matter, for it is the Self (reality) of all things.

36. And since space, time and content are illusorily surmised through inexplicable Máyá, the limits which these determine are not real. Thus the infinity of Brahma has been clearly expounded.

37. Brahma described as "existent, knowledge, infinite," is the (sole) substance. The notions of creator and individual soul

---

32. Bṛihadáraṇyaka IV. 3.

33. cf. "Pandit" Vol: V. p. 667.

35. cf. Śaṅkara on Taittir: Upan: II. 1.

ईश्वरत्वं च जीवत्वमुपाधिद्वयकल्पितम् ॥ ३७ ॥
शक्तिरस्त्यैश्वरी काचित्सर्ववस्तुनियामिका ।
आनन्दमयमारभ्य गूढा सर्वेषु वस्तुषु ॥ ३८ ॥
वस्तुधर्मा नियम्येरन् शक्त्या नैव यदा तदा ।
अन्योन्यधर्मसाङ्कर्याद्विप्लवेत जगत्खलु ॥ ३९ ॥
चिच्छायावेशतः शक्तिश्चेतनेव विभाति सा ।
तच्छक्त्युपाधिसंयोगाद्ब्रह्मैवेश्वरतां व्रजेत् ॥ ४० ॥
कोशोपाधिविवक्षायां याति ब्रह्मैव जीवताम् ।
पितापितामहश्चैकः पुत्रपौत्रौ यथा प्रति ॥ ४१ ॥
पुत्रादेरविवक्षायां न पिता न पितामहः ।
तद्वन्नेशो नापि जीवः शक्तिकोशाविवक्षणे ॥ ४२ ॥

(commonly ascribed) to it are erroneously surmised (by means of Máyá) through two limiting adjuncts.

38. That inexplicable something called Śaktí is the adjunct of the creator, limiting everything. It lies hidden in all that series of things, beginning with the beatific vesture (and ending with Brahmá's egg.).

39. If the attributes of things were not thus restricted by this inexplicable power, the world of sense would certainly be confounded by a mixture of the various attributes (belonging to its objects).

40. And this power (Śakti) appears as if it were itself conscious by the occurrence upon it of a reflexion of absolute Intelligence (chit). The Absolute thus obtains (for us) the notion of creator, through the contact of this power as a limiting condition.

41. The absolute becomes (for us) the individual soul, when we think of the five vestures as its fictitious limitations.

42. Just as the same man may be father and grand-father to his son and grandson, and is neither father nor grand-father when son and grandson are not in mind; so when Śakti and the five vestures are kept out of view, the Absolute is neither creator nor personal soul.

Digitized by Google

य एवं ब्रह्म वेदैष ब्रह्मैव भवति स्वयं ।
ब्रह्मणो नास्ति जन्मातः पुनरेष न जायते ॥ ४३ ॥

इति पञ्चदश्यां पञ्चकोशविवेकः ।

43. He who thus knows Brahma, himself becomes Brahma. The Absolute has no birth, wherefore such a man is not born again.

A. V.

(to be continued)

॥ श्रीः ॥

॥ योगवार्तिकम् ॥

(Continued from page 32. Vol. VI.)

इति । ये तु वैशेषिकादयो ज्ञानाश्रयमात्मानं मन्यन्ते ते श्रुतिस्मृतिविरोधेनोपेक्षणीयाः । किं च लाघवात् प्रतिपुरुषमेकैकमात्रव्यक्ति नित्यज्ञानसिद्धौ तस्याश्रयो गौरवाच्च कल्प्यते जानामीतिप्रत्ययस्य संयोगसंबन्धेनैवोपपत्तेः । यथाहीन्धनं तेजस्वीति प्रत्ययः संयोगसंबन्धेन प्रमा तथैव बुद्धौ ज्ञानाख्यद्रव्यसंयोगसंबन्धेन ज्ञानवत्त्वप्रत्ययः प्रमैव लोकानामहमितिप्रत्यये चावश्यं बुद्धिरपि भासते अनादिमिथ्याज्ञानवासनाख्यदोषस्य प्रतिबन्धे मानाभावात् । अतोऽहं जानामीत्यविदुषां प्रत्ययोऽहमंशे भ्रमो ज्ञानवत्त्वांशे प्रमेत्यावयोः समानमेव । विदुषां तु जानामीति प्रत्ययोऽसिद्ध एव । परमेश्वरस्य सर्वज्ञत्वादिव्यवहारस्तु लोकव्यवहारादिति । अधिकं तु सांख्यभाष्यादौ प्रोक्तमिति दिक् । बुद्ध्यतिरिक्ते द्रष्टरि प्रमाणमाह सूत्रकारः ।

तदर्थ एव दृश्यस्यात्मा ॥ २१ ॥

तस्य पुरुषस्यार्थः प्रयोजने भोगापवर्गावेवार्थः प्रयोजनं यस्य स तथेति मध्यमपदलोपी समासः । भोगापवर्गप्रयोजनकमेव दृश्यस्य स्वरूपं कार्यकारणात्मकं गुणत्रयं न स्वार्थमित्यर्थः । तथा च गुणाः परार्थाः संहत्यकारित्वात् शय्यादिवदित्यनुमानेन बुद्ध्याद्यतिरिक्तस्य पुरुषाख्यस्य परस्य सिद्धिरिति भावः । इदं चानुमानं पूर्वसूत्रे व्याख्यातम् । तदर्थमेव दृश्य-

मित्येतावन्मात्रेणैव निर्वाहेप्यात्मपदं धात्वर्थे दर्शने स्वार्थत्वाभ्ययभ्रमनिरा-साय प्रयुक्तमिति । तदर्थत्वे युक्तिं वदन् सूत्रं व्याचष्टे । दृशिरूपस्येति । यतो दृशिरूपस्य पुरुषस्य यत् कर्मैव कर्म दर्शनं तद्विषयतां गतमेव वस्तु दृश्यं भवति दर्शनं च सर्ववस्तूनां प्रयोजनमिति सर्वसंमतमतस्तदर्थमेव दृश्यस्य गुणादेः स्वरूपं भवति तिष्ठतीत्यर्थः । नहि परप्रयोजनकं वस्तु परप्रयोजनं विना क्षणमपि स्थातुं क्षमते नित्यमनित्यं वा प्रयोजनं विना कस्यापि परार्थस्यावस्थानादर्शनेन पुरुषार्थस्य तत्स्थितिहेतुत्वसिद्धेरिति भावः । अनेन च सूत्रेण चैतन्याधीना सत्ता दृश्यस्य न स्वत इति सिद्धम् । सूत्रान्तरमवतारयितुमुपक्रमते । तत्स्वरूपमिति । ननु दृश्यस्वरूपं यदि परस्य पुरुषस्य रूपेण दर्शनेन निमित्तेन तदर्थं प्रतिलब्धात्मकं लब्धसत्ताकं तर्हि भोगापवर्गार्थतायां भोगापवर्गरूपे पुरुषस्यार्थसमूहे कृते सति पुरुषेण न दृश्यतइति कृत्वा स्वरूपत्यागान्नाशोत्यन्तोच्छेदोस्य गुणादेः प्रसक्त इत्यर्थः । प्रयोजनसमाप्त्या हि प्रयोजनकारि नाश्यतइति धर्माधर्मवासनाचित्तादिस्थले दृष्टं तथा च प्रकृतिनित्यत्वसृष्ट्यादिप्रवाहानुच्छेदनित्येश्वर्यादिसिद्धान्तहानिरिति पूर्वः पक्षः । अत्र सिद्धान्तमाह । न तु विनश्यतीति । पृच्छति । कस्मादिति । अत्र प्रत्युत्तरं सूत्रं पठति ।

कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् ॥ २२ ॥

व्याचष्टे । कृतार्थमिति । बुद्ध्या कृतः समापितोऽर्थो यस्येति कृतार्थमेकं कंचिन्मुक्तपुरुषं प्रति गुणादिकं नष्टं प्रयोजनाकरणात् राज्ञो राज्यभ्रष्टमपि सामान्यतो न नष्टं तस्मिन् कृतार्थे अन्यपुरुषे च तस्य साधारणत्वादित्यर्थः । योजितं सूत्रं तात्पर्यतो व्याचष्टे । कुशलमित्यादिना रूपमितीत्यन्तेन । कुशलं कल्याणमुक्तम् । अकृतोऽर्थो येनेत्यकृतार्थः शेषं व्याख्यातप्रायम् । सोयं सूत्रार्थः श्रुत्याप्यनुगृहीतो, यथा

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्यः ॥

इति । तदनेन सूत्रेण प्रकृतिनित्यत्वं पुरुषबहुत्वं च प्रतिपादितम् ।

Digitized by Google

तथा पुरुषभेदात् प्रकृतेर्बहुत्वं नास्तीत्येवंरूपं प्रकृतेरेकत्वं च प्रतिपादितं विज्ञानवादादिनिरासायेति । नन्वेवं 'यथा घटीकुम्भकमण्डलुस्थमाकाशमेकं बहुधा हि भिन्नम् । तथा सुबाहुः स च काशिपोऽहमन्ये च देहेषु शरीरभेदै'-रित्येवंविधश्रुतिस्मृतिशतोक्तं सर्वात्मनामैक्यं विरुद्धमिति चेन्न । तादृशवाक्यैः प्रकरणभेदेन क्वचिदवैधर्म्यलक्षणाभेदप्रतिपादनात् । सर्वात्मनामवैधर्म्य-ज्ञानेनैवापरिणामितया बुद्ध्याद्यभिमाननिवृत्तितो मोक्षसिद्धेः । क्वचिच्चा-विभागलक्षणाभेदप्रतिपादनात् । ततश्चैकस्यैव परमात्मनो मुख्यात्मता सिध्यतीति । एतच्च सर्वं ब्रह्ममीमांसाभाष्ये श्रुतिभाष्यादिषु च प्रप-ञ्चितमस्माभिः । न पुनस्तादृशवाक्यानां जीवात्मपरमात्माखण्डतापरत्वं संभवति बन्धमोक्षानुपपत्तिरूपसत्तर्कानुग्रहेण बलवद्भिर्भेदग्राहकश्रुतिस्मृति-शतैर्विरोधात् । 'अधिकं तु भेदनिर्देशा'त् । 'अंशो नानाव्यपदेशा'दिति ब्रह्म-मीमांसामारभ्य सर्वदर्शनसूत्रैरतिस्फुटमात्मभेदप्रतिपादनेन भेदस्यैव श्रुत्य-र्थत्वावधारणाच्च । अपि च सर्वात्मनामैक्यमात्रज्ञानान्न संसाराभिमाननिवृ-त्तिः संभवति । एकस्मिन्नेवाकाशेऽवच्छेदभेदेन शब्दतदभाववत् एकस्मिन्ने-वात्मनि अवच्छेदेन संसारासंसारयोः संभवात् । विवेकज्ञानापेक्षणे च तत एवाभिमाननिवृत्तेरैक्यज्ञानस्य न दृष्टद्वारा मोक्षहेतुत्वं स्यात् नाप्यात्मैक्य-ज्ञानात् सर्वात्मब्रह्मोपासनं संभवति । साक्षात् कुक्कुरत्वादिदृष्ट्या ब्रह्मणो निन्दाया एव प्रसङ्गात् । जडवर्गेष्वविभागलक्षणाभेदेनोपासनाया आवश्य-कत्वेन चेतनवर्गेष्वपि तथैवौचित्याच्च । तस्मात् प्रयोजनाभावात् ना-त्माखण्डताप्रतिपादने श्रुतिस्मृत्योस्तात्पर्यम् । अधिकं तु ब्रह्ममीमांसाया-मस्माभिराधुनिकवेदान्तिब्रुवमतखण्डनावसरे प्रतिपादितमिति दिक् । तदेवं विशेषाविशेषेत्यादिसूत्रगणेन द्रष्टुः पुरुषस्य स्वत एव दर्शनशक्तेश्च बुद्धेः कारणरूपेण नित्यत्वे सिद्धे तयोः संयोगः प्रवाहरूपेणानादिरिति शास्त्रेषु व्याख्यातमुपपन्नमित्याह । अतश्चेति । विनाशित्वेपि भावरूपाणां गुणानामनादित्वं न घटेत ततश्च तत् कार्यबुद्धेः ततश्च बुद्धिपुरुषसंयोग-स्येति भावः । बुद्धिपुरुषसंयोगस्य प्रवाहरूपेणानादित्वे पञ्चशिखाचार्यसं-

वावमाह । यथा चोक्तमिति । धर्मिणां गुणानां पुरुषैः सहानादिसंयोगादिति तु गुणनित्यत्वं विना धर्मसामान्यानां बुद्ध्यादीनां संयोगानादित्वं न घटतइति प्रतिपादनाय प्रदर्शितम् । तदेवं प्रकाशप्रवृत्तीत्यादिसूत्रैः पञ्चविंशतितत्त्वान्यत्र संक्षेपतो विवेकेनोक्तानि विस्तरस्तु सांख्यदर्शने द्रष्टव्यः । प्रकृतिपुरुषविवेकस्यैव मुख्यतस्तत्र प्रतिपादनात् अत्र योगस्यैवेति । द्रष्टृदृश्ययोः स्वरूपमुक्तम् इदानीं तत्संयोगस्य स्वरूपप्रदर्शकं सूत्रमुत्थापयति । संयोगस्वरूपेति । द्रष्टृदृश्ययोः संयोगसामान्यं न हेयहेतुः प्रलयमोक्षादिसाधारण्यात् अतः संयोगगतविशेषावधारणायेदं सूत्रं प्रवृत्तइत्यर्थः ।

स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ॥ २३ ॥

स्वशक्तिर्दृश्यं भोग्यतायोग्यत्वात् । स्वामिशक्तिर्द्रष्टा भोक्तृयोग्यत्वात् तयोः स्वरूपोपलब्धौ हेतुर्यः संयोगविशेषः स एव द्रष्टृदृश्यसंयोगोऽत्र हेयहेतुरुक्त इत्यर्थः । विभुना द्रष्टृदृश्यसंयोगसामान्यस्य सार्वकालिकत्वेन हेयाहेतुत्वादिति भावः । स च संयोगविशेषो बुद्धिद्वारकः दृश्यबुद्धिसत्त्वोपाधिरूपः सर्वं धर्मा इति पूर्वभाष्यात् । अतो दृश्यवत्या बुद्ध्या संयोग एवात्र संयोगविशेषः ।

आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ।

इत्येवंविधश्रुत्यादिभ्यो लिङ्गदेहात्मसंयोगादेवात्मनो विषयदर्शनावगमादिति । एतेन भोक्तृभोग्ययोग्यतैव द्रष्टृदृश्ययोरनादिः संबन्धः संयोग इत्यङ्गीकारे पुरुषस्य परिणामित्वापत्तेरिति कस्यचित् प्रलापः सूत्रस्वरसाद्धेयः । तथासति स्वस्वामिभावः संयोग इत्येव सूत्रोचित्यात् संयोगस्यानाद्येकव्यक्तित्वे सत्यागामिसूत्राभ्यामुत्पत्तिविनाशवचनानुपपत्तेश्च चेतनत्वाचेतनत्वातिरिक्तस्य प्रतिनियतस्य योग्यस्य ज्ञानावच्छेदकस्यानिरूपणाच्च । तयोश्च मोक्षकालसाधारण्येन हेयाहेतुत्वात् । यदि च स्वभुक्तवृत्तिवासनावत्त्वं प्रवाहरूपेण च वासनाया अनादित्वं तदेव च संयोग इत्युच्यते । तथापि तादृशसंयोगस्य भाष्यवक्ष्यमाणाविद्यावासनाजन्य

त्वादिकं न घटतेव यथाश्रुतसंयोगत्यागानौचित्यादिकं चेति । यच्चोक्तं संयोगेन परिणामित्वमिति तत्परिणामलक्षणाज्ञानात् संयोगविभागमात्रेणाकाशादौ परिणामव्यवहाराभावेन सामान्यगुणातिरिक्तधर्मोत्पत्तिरेव परिणाम इत्युक्तत्वात् अन्यथा च प्रतिसर्गं प्रकृतिपुरुषयोः संयोगविभागौ श्रुतिस्मृत्योः श्रूयमाणौ विरुध्येताम् । नहि प्रतिसर्गं योग्यतोत्पादविनाशौ घटेतां पुरुषस्य परिणामप्रसङ्गात् । यथाश्रुतसंयोगविभागयोरेवोत्पादादिक्रमौचित्याच्चेति दिक् । सूत्रार्थं विवृणोति । पुरुष इत्यादिना सोपवर्ग इत्यन्तेन । संयुक्त इति । भवतीति शेषः । सूत्रे स्वरूपपदं च विवेकख्यातिपर्यन्तस्य दर्शनसामान्यस्य संयोगजन्यत्वप्रतिपादनायेति । इदानीं विवेकख्यातिरविप्लवा हानोपाय इति तस्य हेतुरविद्येति चागामि सूत्रद्वयार्थोनेनैव सूत्रेणोपपादित इत्येतत्क्रमेण प्रतिपादयति । दर्शनकार्येत्यादिना । कृतकृत्यस्य प्रयोजनाभावेनावस्थानसंभवेन दर्शनरूपकार्यावसानः संयोग इत्यतो दर्शनं द्रष्टृस्वरूपोपलब्धिर्वियोगकारणमर्थादनेन सूत्रेणोक्तमुपपादितं तथा दर्शनमदर्शनस्य प्रतिद्वन्द्वि विरोधीत्यतोऽदर्शनं संयोगहेतुरित्यप्यर्थादुक्तमुपपादितम् । दर्शनादर्शनयोर्विरोधेन विरुद्धयोरेव वियोगसंयोगयोस्तदुभयकार्यत्वौचित्यादित्यर्थः । ननु अदर्शनं संयोगकारणं तर्हि अदर्शनाभावादेव संयोगविनिवृत्त्यात्मको मोक्षो भविष्यति कथं दर्शनमपि मोक्षहेतुरुच्यते इत्याशङ्कायामाह । नात्र दर्शनमिति । अस्मच्छास्त्रे दर्शनं तत्त्वज्ञानं न मोक्षकारणं गौरवात् विरोधादिभिर्व्यवधानेन मोक्षाव्यवहितप्राक्काले ज्ञाने नियमासंभवात् किं तु अदर्शनस्य वक्ष्यमाणरूपस्याभावादेव द्रष्टृदृश्यसंयोगाभावः स एव मोक्ष इत्यर्थः । एतेन मोक्षस्यानिमित्तकतया स्वाभाविकत्वरूपं नित्यत्वं लब्धम् । नन्वेवं विवेकख्यातिरविप्लवा हानोपाय इत्यग्रिमसूत्रविरोधो दर्शनं वियोगस्य कारणमिति स्वोक्तिविरोधश्च तत्राह । दर्शनस्य भाव इति । सुगमम् । उक्तं शास्त्रे । तथा च तत्त्वज्ञानं मोक्षे प्रयोजकमात्रमिति । उत्तरसूत्रेणासाधारणं संयोगहेतुमदर्शनमवधारयितुमुक्तादर्शनं विकल्प्य पृच्छति । किं चेदमिति । किं पुनः

संयोगकारणत्वेनोत्तमदर्शनमित्यर्थः । नामेति वाक्यालङ्कारे । यद्यपि संयोगो दर्शनकार्यमितिसूत्रणाद्दर्शनस्यानुत्पाद एव संयोगहेतुतयात्र प्रसक्तो नान्यः । तथापि तत्समनियततया अन्येषामपि संशयकोटित्वं बोध्यम् । तत्र प्रथमो विकल्पः किं गुणानामिति । गुणानां सत्त्वादीनाम् अधिकारः कार्यारम्भणसामर्थ्यम् । ज्ञानाग्न्यदग्धा कार्यविशेषजननशक्तिरित्यर्थः । ततोऽपि हि संसारहेतुसंयोगविशेषो जायत इति द्वितीयं विकल्पं परित्यज्य सर्वविकल्पेषु बन्धकत्वगुणयोगेनादर्शनशब्दो गौणः । द्वितीयं विकल्पमाह । आहोस्विदिति । अदर्शनमित्यत्र दर्शनशब्दस्य करणसाधनत्वप्रतिपादनाय दृशिरूपस्य स्वामिनो दर्शितविषयस्येति चित्तविशेषणं दृशिस्वरूपाय स्वामिने दर्शितो विषयो येन तस्येत्यर्थः । उक्तमेव विवृणोति । स्वस्मिन्निति । स्वस्मिंश्चित्ते पुरुषार्थरूपेण दृश्ये शब्दादि वृत्तौ सत्त्वपुरुषान्यतावृत्तौ च सति यो दर्शनाभावश्चित्तवृत्त्यभाव इत्यर्थः । मोक्षकालीनं दर्शनाभावं व्यावर्त्तयितुं सत्यन्तम् । संयोगाहेतुतया तु तादृशमदर्शनं नात्र विचारणीयं चित्ते हि पुरुषार्थसत्तायामेवादर्शनं संयोगहेतुर्भवति इति भावः । व्यर्थतया द्वितीयविकल्पस्य विशेष्यभागपरित्यागमात्रेण तृतीयं विकल्पमाह । किमर्थवत्तेति । सत्कार्यसिद्धेर्भाविभोगापवर्गयोरव्यपदेश्ययोः स्वकारणेषु गुणेषु अवस्थानमित्यर्थः । चतुर्थं विकल्पमाह । अथाविद्येति । पञ्चपर्वा अविद्या प्रलयकाले स्वचित्तेन सह गुणेषु लीना वासनारूपेण स्वाश्रयचित्तस्योत्पत्तिबीजमित्यर्थः । तथा चाविद्यावासनैवादर्शनमिति । अयमेव पक्षः सिद्धान्तो भविष्यति । पञ्चमं विकल्पमाह । किं स्थितीति । प्रधाननिष्ठस्य साम्यपरिणामहेतोः स्थितिसंस्कारस्य क्षये सति गतिसंस्कारस्य महदादिरूपविसदृशपरिणामहेतोरभिव्यक्तिरित्यर्थः । तयैव हि प्रकृतिक्षोभद्वारा पुंप्रकृत्योः संयोगो जन्यत इति । तदुभयसंस्कारसद्भावे मतान्तरं प्रमाणयति । यत्रेदमिति । स्थित्यैगत्यै इति तादर्थ्ये चतुर्थ्यौ एवकारौ च तयोः पश्चादध्याहार्यौ स्थित्यैवेतिपाठे तु विशेषणे तृतीया इति । तथा च प्रधानं चेत् स्थितिमात्रेण वर्त्तेत तदा विकाराजनकत्वान्न प्रधानं स्यात् मूलकारणत्वं हि प्रधानत्वमि-

ति । तथा गतिमात्रेण चेद्वर्त्तेत तदा महदादीनामपि प्रकृतिवदेव नित्यत्वापत्त्या किं कस्य मूलं स्यादिति न व्यवहारः संभवत्यत उभयथैव स्थितिगतिभ्यामेव प्रधानस्यावस्थानं प्रधानव्यवहारं लभते कार्यतया न पुनरन्यथेत्यर्थः । न केवलं मूलकारणएवायं स्थितिगत्योः कालभेदेन निर्णायको विचारः किं तु कल्पितेषु विकाररूपेषु कारणभेदेषु महदादिष्वेव चर्चा विचारः समान इति प्रसङ्गादवधारयति नास्तिकानां कुर्वद्रूपतावादमपाकर्तुं कारणान्तरेष्वपीति । स च चर्चा यथा मृदादिकं यदि स्थित्यैव निवृत्त्यैव वर्त्तेत तर्हि कदापि घटानुत्पादनेन कारणत्वहानिः । यदि गत्यैव प्रवृत्त्यैव वर्त्तेत तदा मृद्घटयोर्द्वयोरेव तुल्यकालतया कार्यकारणव्यवस्थानुपपत्तिरतो विकाररूपकारणमपि स्थितिगत्युभयवदेवेति बद्धविकल्पमाह । दर्शनशक्तिरेवेति । पुरुषायात्मानन्दर्शयितुं या क्षमता सा दर्शनशक्तिः सैव चादर्शनमित्यर्थः । इयं च शक्तिर्विवेकख्यात्यनुत्पादरूपा संयोगहेतु, स्तथाचोक्तं सांख्यकारिकया ।

'दृष्टाहमित्युपरमत्यन्ये' ति ।

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।

पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥

इति ।

(शेषमग्रे)

काशीस्वराजकीयप्रधानपाठशालायां { सांख्ययोगाध्यापकस्तात्याशास्त्र्यपरनामा पटवर्धनोपाह्वो रामकृष्णशास्त्री । ज्योतिषशास्त्राध्यापकः केशवशास्त्री च ।

॥ अथ चित्सुखी ॥

॥ तत्र द्वितीयपरिच्छेदावशेषः ॥

(*Continued from page* 90. Vol. VI.)

ततो द्व्यणुकसिद्धौ न परमाणूपादानकत्वं त्र्यणुकस्येति चेत्, न, प्रथमप्रयोगे महदुपादानकत्वस्योपाधित्वात् ।

ननु परिमाणावान्तरसामान्यस्य महत्त्वावान्तरसामान्यव्यतिरिक्तस्य कार्याकार्यवृत्तित्वं महत्त्वे दृष्टम्, अतोऽणुत्वस्यापि कार्याकार्यवृत्तित्वसिद्धौ कार्याणुपरिमाणाधिकरणद्व्यणुकसिद्धिरिति चेत्, न, ह्रस्वत्वदीर्घत्वयोरनैकान्त्यात्, तयोः कार्यैकवृत्तितयाऽकार्यवृत्तित्वानङ्गीकारात् ।

न च तद्व्यतिरिक्तत्वे सतीति विशेषणान्नानैकान्तिकता, तथापि प्रतिसाधनसद्भावात्, तथाहि, अणुत्वं कार्याकार्यवृत्ति न भवति महत्त्वव्यतिरिक्तत्वे सति परिमाणावान्तरजातित्वाद्ध्रस्वत्वादिवदिति भवन्मतम्प्रत्यपि प्रयोगसंभवात्, त्रसरेणुनित्यत्ववादिनं भाट्टं प्रति हेतोर्विशेष्यासिद्धेश्च, द्वितीयप्रयोगे च सिद्धसाधनता, त्रसरेणुयुगलादौ संख्यापकर्षतारतम्यविश्रान्त्युपपत्तेः, तदेवं परमाणुभिरारब्धे त्र्यणुकादौ महत्त्वोपपत्तेर्न द्व्यणुकादिप्रक्रमप्रक्रियासिद्धिः ।

किंच ।

परिमाणस्य सिद्धत्वे तदारम्भविचारणा ।
नाद्यापि सिद्धमेतद्वाऽभावाल्लक्षणमानयोः ॥ ४९ ॥

परिमाणमेव न निरूपणपथमवतरति, कुतस्तदारम्भचिन्ता, तल्लक्षणप्रमाणयोरनिरूपणात् ।

तथाहि, किं मानव्यवहारकारणं परिमाणमुत द्वित्वासमवायिकारणवृत्तिगुणत्वावान्तरजातीयमाहोस्विदसमवायिकारणत्वानधिकरणनित्यवृत्तिगुणत्वावान्तरजातिमत् परिमाणत्वजातिमद्वा ।

नाद्यः, चक्षुरादेरपि मानव्यवहारकारणत्वेन परिमाणत्वप्रसङ्गात् ।

विषयतयेति विशेषणाददोष इति चेत्, न, परिमाणत्वजातेरपि तथात्वापत्तेः । जातिमत्त्वे सतीति चेत्, न, द्रव्येऽपि प्रसङ्गात् ।

परिमाणत्वजातिमत्त्वे सतीति चेत्, न, तावन्मात्रस्यैव लक्षणत्वोपपत्तौ व्यर्थविशेष्यत्वापातात् ।

नापि द्वितीयः, द्वित्वस्य तदसमवायिकारणत्वस्य चानन्तरमेव निरस्तत्वात् ।

किंच विशिष्टजातिमत्त्वं ज्ञाततया तद्व्यवहारकारणं वक्तव्यम्, तच्च किंचिदुपसंग्राहकपुरस्कारेणैव सर्वलक्ष्यव्यक्तिनिष्ठतयाधिगन्तव्यम्, अन्यथा व्यक्त्यन्तरे तथा प्रथाभावेन तद्व्यवहाराभावप्रसङ्गात्, तथा च तेनैवानुगतव्यवहारोपपत्तौ कृतं विलक्षणलक्षणपरीक्षाप्रयासेन ।

नापि तृतीयः, उक्तदोषानुषङ्गात् ।

नापि तुरीयः, जातिव्यञ्जकस्य निर्वक्तुमशक्यत्वात्, शक्यत्वे वा पूर्वोक्तदोषानुवृत्तेश्च ।

तदेवं न लक्षणनिरुक्तिः, नापि प्रमाणम्, नहि मानव्यवहार एव तत्र प्रमाणम्, तस्यानिरुक्तेः ।

तथाहि कोऽयं मानव्यवहारः, किं हस्तवितस्त्यादिव्यवहारः किं वाऽणुमहदादिव्यवहारः, असर्वगतत्वव्यवहारो वा परिमितत्वव्यवहारो वा, सर्वथा नोपपद्यते, अव्याप्तेः, अणुत्वमहत्त्वाद्यसिद्धौ तद्विशेषितव्यवहारासिद्धेः, असर्वगतव्यवहारस्याविभुत्वेनापि संभवात्, परिमितत्वव्यवहारस्य दशपलपरिमितत्वमित्यादौ गुरुत्वेनापि दर्शनात्, यादृगाश्रयेऽणुमहदादिपरिमाणसमवायः परेणाङ्गीक्रियते तादृगाश्रयविशेषादेव तत्तद्व्यवहारोपपत्तौ तदतिरिक्तपरिमाणकल्पनायां कल्पनागौरवाच्च ।

अस्तु तर्ह्यनुमानं मानमनोहरकारोक्तम्, विवादाध्यासितद्विष्ठगुणाः न समवायिकारणानित्यविशेषगुणव्यतिरिक्ता द्विष्ठगुणाश्रयद्रव्यत्वाज्जलाणुवत्, अत्र च जीवाकाशौ पक्षीक्रियेते, तयेश्वरो नित्यविशेषगुणव्यतिरिक्तासमवायिकारणाद्विष्ठगुणाश्रय आत्मत्वाज्जीववदिति चेत् ।

नाद्यस्योपाधिमत्त्वेन साध्यभावान्निदर्शने ।
द्वितीयस्योभयत्रापि प्रतिसाधनरोधनात् ॥ ५० ॥

प्रथमानुमाने मूर्तत्वस्योपाधित्वात् ।

न च पार्थिवपरमाणौ साध्याव्याप्तिः, तत्रापि द्विष्ठगुणा न समवायिकारणानित्यविशेषगुणव्यतिरिक्ता द्विष्ठगुणानां परत्वापरत्ववेगादीनां सद्भावात् ।

न चेश्वरे मूर्तत्वस्योपाधेः साध्याव्याप्तिः, तस्य वेदान्तिभिर्निर्गुणत्वाङ्गीकारात्, द्वितीयप्रयोगेऽपि दृष्टान्तस्य साध्यवैकल्याद् गुणानां नित्यत्वासिद्धावप्रसिद्धविशेषणत्वाच्च ।

सप्रतिसाधनं चेदं प्रयोगद्वयम्, विवादाध्यासितमुक्तसाध्यविशेषितसाधारणगुणाश्रयो न भवत्यमूर्तत्वाद्रूपादिवदिति प्रयोगोपपत्तेः ।

न चाद्रव्यत्वमुपाधिः, तद्व्यतिरेके पृथिव्यादिषु मूर्तत्वस्यैवोपाधित्वात्, तदेवं परिमाणस्यासिद्धेर्न तदारम्भविचारणाप्यवकाशं लभते ।

न च कारणगुणपूर्वकतानियमः, रूपादीनां परिपक्वे लौहित्यस्याकारणगुणपूर्वस्यापि दर्शनात् ।

ननु निवृत्तः श्यामो घटोऽन्योऽन्य एव च लोहितस्तत्रोत्पन्नः, तथाहि, श्यामत्वमाश्रयविनाशादेव नश्यति कार्यगतरूपत्वात् नष्टघटरूपवत्, तथा लौहित्यमाश्रयोत्पत्त्यनन्तरमेवोत्पद्यते कार्यगतरूपत्वात् कार्यलोहितघटरूपवदित्यनुमानतस्तद्भेदसिद्धेः ।

न च विनाशे हेतोरभावः, स्पर्शवद्वेगवदनिलसंवलनबलेन प्रज्वलज्ज्वलनस्य ज्वालाकलापस्यैव घटावयवसंघातविघटनहेतुत्वात्, अन्यथानलावयवानामन्तरनुप्रवेशासंभवेन पिठरजठरसंचारिसलिलोच्छलनतण्डुलविक्लेदनयोरसंभवप्रसङ्गात्, मृदुकठिनतालक्षणविरुद्धधर्मसंसर्गोपलब्धेश्च तद्भेदावगतौ कथं न कारणगुणपूर्वकता रूपादीनामिति चेत्, नैवम् ।

तत्त्वेन प्रत्यभिज्ञानात् तदाधेयानिपाततः ।
संख्याप्रमाणयोरैक्यादन्यथा पाकसंभवात् ॥ ५१ ॥

स एवायं घट इति प्रत्यभिज्ञाप्रत्यक्षविरोधादुपरिस्थितकपालादीनामपातात् तद्देशत्वतत्संख्यतातत्परिमाणतोपलब्धेश्च, अन्तःपाकस्यापि सच्छिद्रत्वादवयविनां स्फटिकान्तरिन्द्रियरश्मिप्रवेशवदुपपत्तेः, अन्यथा सलिलस्यन्दनबहिःशैत्योपलम्भयोरभावप्रसङ्गात्, मृदुकठिनतालक्षणविरुद्धधर्मसंसर्गस्याप्यन्तरेणावयविनाशं छायातपविनिहितपटवदुपपत्तेः ।

न च वेगवद्द्रव्याभिघातमात्रादवयविनाशः, प्रबलपवनाभिमुखनिहितघटादेरपि विनाशापत्तेः, नियतहेतुभावकुलालादिव्यतिरेकेण घटजन्मासिद्धेश्च, अन्यथा शब्दसुखादयोऽप्याश्रयविनाशविनाश्याः कार्यत्वे सति विशेषगुणत्वाद् घटरूपादिवदित्यपि स्यात्, प्रत्यभिज्ञाविरोधस्तु प्रकृतेऽपि समानः ।

न चैवं पिठरकुहरसंचारितण्डुलानामनलसंपर्केऽप्यनाशप्रसङ्गः, परिमाणभेदस्य प्रत्यक्षसिद्धत्वाद्विरोधिप्रत्यभिज्ञाभावाच्च ।

न च स एवायमिति प्रत्यभिज्ञाविरोधः प्रदीपेऽपि तुल्यः, न्यूनाधिकपरिमाणभेदस्य तत्र प्रत्यक्षेणोपलम्भात्, तैलवर्त्यग्निसंयोगानां च प्रतिक्षणं भेदेन सामग्रीभेदाच्च कार्यभेदोपपत्तेः, तत्र प्रत्यभिज्ञायाः सादृश्यविषयतयान्यथा सिद्धेः ।

न चैकत्र प्रत्यभिज्ञाया अन्यथा सिद्धौ सर्वत्र तथाभावः, बाधाबाधाभ्यां तद्व्यवस्थोपपत्तेः, अन्यथातिप्रसङ्गात्, तस्मात् कारणगुणप्रक्रमो न विदुषां परितोषायेति सिद्धम्, कारणत्वानिरुक्तेश्च ।

तथाहि किमिदं कारणत्वम्, किं पूर्वकालभावित्वं किं वा नियतप्राक्कालसत्त्वं सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वं वा, अन्वयव्यतिरेकवज्जातीयत्वं वा सामग्र्येकदेशत्वं वा व्यापारवत्त्वं वा यदभ्युपगमे नित्यसत्त्वासत्त्वयोरन्यतरप्रसक्तिरसह्या ।

नाद्यः, रासभस्यापि धूमादिकारणत्वप्रसङ्गात् ।

न द्वितीयः,

कालस्याहेतुतापत्तेर्नाधिकोऽन्योऽन्यसंश्रयात् ।
स्वात्मवृत्तेरयुक्तत्वान्नियतत्वानिरुक्तितः ॥ ५२ ॥

कालाव्याप्तेः, कालस्य कालान्तराभावात् ।

न चौपाधिकं कालस्य पौर्वापर्यम्, इतरेतराश्रयत्वप्रसङ्गात् ।

कालपौर्वापर्ये उपाधिपौर्वापर्ये तत्पौर्वापर्ये कालस्य तथात्वमित्युपाध्यन्तराधीनमुपाधेः पौर्वापर्यं न तु कालाधीनमिति चेत्, न, युगपदनन्तोपाध्यवस्थानप्रसङ्गात् ।

न चैवमस्त्विति वाच्यम्, प्रमाणाभावात्, व्यवहारस्य मायामयत्वेनोपपत्तेः, कल्पकाभावाच्च, अन्यथा तदुपाधेरेवातीतादिव्यवहारोपपत्तौ कालापलापप्रसङ्गात्, उपाधिभेदेऽपि किंचिदुपाधिविशिष्टस्य कालस्यान्योपाधिविशिष्टे काले न वृत्तिर्येन कालस्य पूर्वकाले भावित्वम्, स्वात्मनि वृत्तिविरोधात्, नहि कुण्डलिनि देवदत्ते स एव दण्डविशिष्टो वर्तते ।

का चेयं नियतिः, किं तस्मिन् सत्येव भावः अनन्यथासिद्धत्वं वा तत्तत्कार्यानुगुणतया प्राक्कालसत्त्वं वा तस्मिन् सति भाव एव वा ।

नाद्यः, रासभस्यापि धूमविशेषं प्रति नियतत्वापत्तेः, स्वसत्तायां सत्यामेव जायमानधूमविशेषं प्रति तस्यापि नियतत्वात् ।

न द्वितीयः, रासभाकाशादेरपि तथात्वापत्तेः ।

स्वकारणसत्त्वेन नित्यविभुतया च तेषां संनिधिर्नत्वनन्यथासिद्ध इति चेत्, तत् किं स्वकारणसंनिधिप्रयुक्तसंनिधीनि बीजधरणीधामसलिलानीत्यकारणान्येवाङ्कुरोत्पत्तौ किं वा शब्दसुखाद्युत्पत्तौ नित्यविभुस्वभावा वियदात्मादयः ।

नापि तृतीयः, प्राक्कालसत्त्वातिरिक्तानुगुणत्वस्यानिरूपणात् ।

न चतुर्थः, बीजादेरकारणत्वप्रसङ्गात्, नहि तस्मिन् सति भाव एवाङ्कुरादेः ।

सहकारिमध्यमध्यासीने तस्मिन् सति भवत्येवेति चेत्, मैवम्, रासभस्यापि कदाचित् सहकारिमध्यमध्यासीनतासंभवात् ।

सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वं कारणत्वमिति तृतीयोऽपि न,

हेतुसाकल्यरूपायां सामग्र्यां तदसंभवात् ।
कारणत्वानिरुक्तौ च सहकार्यनिरूपणात् ॥ ५३ ॥

सामग्र्या अकारणत्वप्रसङ्गात्, तस्याः सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वाभावात्, सहकारिसकलताया एव सामग्रीत्वात् ।

किंच सह करोतीति सहकारी कारणान्तरम्, तथा च कारणत्वस्यैवाद्याप्यनिरुक्तेरात्माश्रयः ।

नापि चतुर्थः,

जातेरहेतुतापत्तेराभासेऽतिप्रसक्तितः ।
गगनादिषु चाव्याप्तेरन्वयादेरयोगतः ॥ ५४ ॥

जातेरकारणत्वप्रसङ्गात्, जातेर्जातिमत्त्वाभावात्, द्रव्यत्वादिना रासभादेरप्यन्वयव्यतिरेकवद्द्रूपादिजातीयत्वेन धूमादिकारणत्वप्रसङ्गात् ।

द्रव्यत्वावान्तरजातीयत्वं विवक्षितमिति चेत्, न, कालाकाशदिशामकारणत्वप्रसङ्गात्, तेषां द्रव्यत्वावान्तरजातिविधुरत्वात् ।

कौ चेमावन्वयव्यतिरेकौ, किं कालत उत देशत उताभाभ्याम्,

आद्ये काले तदभावादव्याप्तिः ।

द्वितीये तु देशे तदभावः ।

न तृतीयोऽपि, उभयोरप्युभयाभावात् ।

सति भावोऽसत्यभाव एव ताविति चेत्, न, तदभावेऽपि तृणारणिमणीनां दहनहेतुत्वाङ्गीकारात्, तेषामेकैकाभावेऽपि दहनदर्शनात् ।

तत्रापि तज्जन्यदहनानामवान्तरजातिभेदान्न व्यभिचार इति चेन्न, जातिभेदे प्रमाणाभावात्, न तावत् प्रत्यक्षं प्रमाणम्, इन्द्रियसंनिकर्षमात्रेण सुनिपुणैरप्यनुपलभ्यमानत्वात् ।

ननु तृणारणिमणिप्रभवत्वज्ञानसंस्कृतेन्द्रियसंनिकर्षाधिगम्योऽयं जातिभेदः, विशिष्टमातृपितृप्रभवत्वज्ञानसंस्कारसचिवलोचनगोचर इव ब्राह्मणत्वमिति चेत्, न, तेषां व्यभिचारादेव जनकत्वासिद्धेः ।

जातिभेदासिद्धतव्यक्तिविशेषं प्रति न तस्य व्यभिचार इति चेन, सिद्धे जातिभेदे जनकत्वसिद्धिस्तत्सिद्धौ च जातिभेदसिद्धिरितीतरेतराश्रयत्वप्रसङ्गात् ।

ननु कार्यविशेषेण तृणादिकारणविशेषप्रभवाणां वह्नीनां वैजात्यानुमानमस्तु, तथाहि प्रदीप एव प्रासादोदरव्यापकं प्रभामण्डलमारभते न तथा ज्वालाजटिलोऽपि वह्निर्नेतरां च कारीष इति कुसुमाञ्जलिकार इति चेन, एकजातीयत्वग्राहिप्रत्यक्षप्रतिहतस्यानुमानस्यानुत्थानात् ।

न च प्रत्यक्षायोग्यं वैजात्यम्, प्रत्यक्षव्यक्तिवृत्तिसामान्यस्याप्रत्यक्षत्वायोगात्, प्रासादोदरव्यापिप्रभामण्डलादिकार्यभेदस्य तत्तत्सहकारिभेदादन्यथोपपत्तेश्च, एकजातीयेऽपि मृदादितत्तत्सहकारिसाहित्येन तत्तद्विजातीयघटशरावादिकार्योपलब्धेः, एकजातीयादपि घटाद्विजातीयानां रूपादीनामुत्पत्तेरभ्युपगमाच्च ।

नापि पञ्चमः, सामग्र्या दुर्निरूपत्वेन तदेकदेशस्यापि दुर्निरूपत्वात्, तथाहि,

अतिव्याप्तेः स्ववृत्तित्वाद्भेदेऽभेदेऽप्यसंभवात् ।
कार्यस्य हेतुभिः सिद्धेर्वृथा साकल्यकल्पना ॥ ५५ ॥

किं वस्तूनां साकल्यं सामग्री किं वा कारणानाम् ।
नाद्यः, अकारणसाकल्येऽपि प्रसङ्गात् ।
द्वितीये कारणत्वस्याव्याप्त्यनिवृत्तेरात्माश्रयः ।
कारणसाकल्यं च कारणानां स्वरूपमतिरिक्तं वा ।
आद्ये व्यस्तेभ्योऽपि कार्यमुत्पद्येत ।

द्वितीये नित्यत्वे साकल्यस्य सदा कार्योत्पादः, अनित्यत्वेऽपि व्यस्तानामेव साकल्यकारणत्वे साकल्यस्यापि सदातनत्वेन कार्यस्यापि सदोत्पादः, समस्तानां हेतुत्वे वात्माश्रयोऽनवस्था वा, साकल्यजनकेभ्य एव च प्रधानकार्योत्पत्तेः किमजागलस्तनायमानेन साकल्येन, एतेन कारणानामन्योन्यवैशिष्ट्यं सामग्रीति प्रत्याख्यातम् ।

न च कारणानां संनिधिः सामग्री, तदनिर्वचनात् ।

न तावदेककालत्वं संनिधिः, काले तदभावात् ।

नाप्येकदेशत्वम्, देशे तदभावात् ।

नोभयम्, उक्तदोषानुषङ्गात् ।

नापि संयोगसमवायौ, तयोरेवाकारणत्वप्रसङ्गात् ।

नाप्येककार्यकारणत्वं संनिधिः, कार्यकारणभावस्यैवाप्रसिद्धेरात्माश्रयात् ।

नापि कारणानां चरमो व्यापारः सामग्री, व्यस्तानां समस्तानां वा तज्जनकत्वे पूर्वोक्तदोषानुषङ्गात् ।

अपि च व्यापारे जनयितव्ये कारकाणि व्यापारवन्ति निर्व्यापाराणि वा ।

आद्येऽनवस्था ।

द्वितीये कार्यमेव प्रधानं तथा कुर्वन्तु कृतमन्तरा व्यापारेण, व्यापारस्य च सव्यापारजनकत्वेऽनवस्था, निर्व्यापारत्वे च कारकाणामेव तथात्वमस्तु किं व्यापारेण ।

यदनन्तरं कार्यं भवत्येव सा सामग्रीति चेत्, न, विभागानन्तरं पूर्वसंयोगनाशस्यावश्योत्पत्तेर्विभागस्यापि तथा सामग्रीत्वप्रसङ्गात्, एवं कर्मणो विभागेऽन्त्यतन्तुसंयोगस्य च पटे तत्त्वप्रसङ्गाच्च ।

नापि षष्ठः ।

व्यापाराव्यापनाद्दात्माश्रयत्वाद्निरुक्तितः ।
समवायेऽस्य हेतुत्वे पूर्वदोषानुषङ्गतः ॥ ५६ ॥

चरमव्यापारस्य व्यापारान्तरविधुरस्याकारणत्वप्रसङ्गात्, तज्जन्यस्तज्जन्यजनको व्यापार इति जनकत्वमन्तर्भाव्य व्यापारनिरुक्तेरात्माश्रयत्वाच्च ।

कारणत्वं च व्यापारसमवायित्वमुत तज्जनकत्वम् ।

नाद्यः, यागादेः स्वर्गाद्यकारणत्वप्रसङ्गात्, ध्वस्तस्य यागादेरपूर्वादिव्यापारासमवायित्वात् ।

नेतरः, आत्माश्रयत्वात् ।

नापि सप्तमः,

असिद्धेः प्रतिबन्धस्य नृशृङ्गादावभावतः ।
सत्त्वे सतीति चायुक्तं दृष्टान्तादेरसिद्धितः ॥ ५७ ॥

निर्हेतुकस्य नित्यसत्त्वासत्त्वाभ्यां प्रतिबन्धासिद्धो नित्यसत्त्वासत्त्वयोरन्यतरप्रसङ्गस्य दुर्वचत्वात्, अहेतुकत्वेऽपि प्रागभावस्य नित्यासत्त्वाभावात्, अविद्यायास्य नित्यसत्त्वाभावाच्च ।

ननु भावत्वे सत्यहेतुकत्वस्य सदातनत्वे व्याप्तिराकाशादो सिद्धेति चेत्, न, अस्या व्याप्तेः स्वभाववादिनं प्रत्यसिद्धेः, भूतचतुष्टयतत्त्ववादिना तेनात्माकाशादीनामनभ्युपगमात्, विपर्ययापर्यवसानाच्च प्रसङ्गस्य, नहि यद्भावत्वे सति सदा सत्त्वानधिकरणं तत् सहेतुकमित्युपसंहारस्थलमस्ति, लोकायतिकं बौद्धं प्रति कार्यकारणभावस्यैवाव्याप्यसिद्धेः ।

ननु विमतं सहेतुकं प्रागभाववत्त्वात् यन्निर्हेतुकं न तत् प्रागभाववत् आत्मवदिति वेदान्तिनं प्रति प्रयोग इति चेत्, न, हेतुशब्दार्थानिरुक्तो सहेतुकत्वस्याप्यसिद्धेरप्रसिद्धविशेषणत्वात्, कारणानिरुक्तो च व्यापारवत् कारणं कारकमिति कारकलक्षणमप्यपास्तम् ।

तथैवं कारणलक्षणं दुर्भणम्, तथा कार्यलक्षणमपि ।

तत् किं कारणाधीनस्वात्मलाभं प्रागभावोपलक्षितसत्तायोगि वा प्रागभावप्रतियोगि वा प्रागभाववद्वा प्रागसत्त्वे सत्युत्तरकालसंबन्धि वा सर्वथा न निरूपणपथमवतरति ।

अनिरुक्तेरतिव्याप्तेरव्याप्तेस्तदसंभवात् ।
अतिप्रसक्तो व्याप्तेर्मतुबर्थानिरूपणात् ॥ ५८ ॥

न तावदाद्यः, कारणस्यानिरुक्तो तदधीनस्वात्मलाभस्याप्यनिरुक्तेः ।

न द्वितीयः, आत्मादीनामपि कार्यत्वप्रसङ्गात्, घटादो सत्ताया एव प्रागभावेनोपलक्षितत्वात्, तस्याश्च तत्र भावात्, स्वप्रागभावोपल-

चितसत्तायोगित्वमिति लक्षणविवक्षायामननुगम एव, सत्ताविरहिणः प्रध्वंसस्याकार्यत्वप्रसङ्गाच्च ।

न तृतीयः, प्रतियोगिशब्देनैकदेशानवस्थानाभिधाने लक्षणस्यासंभवित्वात्, कार्यतत्प्रागभावयोः कारणे वृत्तेः, एककालानवस्थाने तु कालस्यापि कार्यत्वप्रसङ्गात्, कालस्य कालान्तराभावेन प्रागभावेनैकस्मिन् कालेऽनवस्थानात्, घटादेरपि कार्यस्य यत्किंचित्प्रागभावेन सहावस्थानादसंभविदोषस्तदवस्थः, स्वप्रागभावेन सहानवस्थाने चात्मादेरपि कार्यत्वप्रसङ्गः, तेषां प्रागभावाभावेन तेन सहानवस्थानात् ।

न चतुर्थः, मतुबर्थस्याधिकरणार्थतायामात्मादेरपि कार्यत्वप्रसङ्गात्, तेषामपि सुखादिकार्यप्रागभावाधिकरणत्वात्, प्रतियोगिपरत्वे पूर्वदोषानुषङ्गात् ।

न पञ्चमः, उत्तरकालस्याकार्यत्वप्रसङ्गात्, तस्योत्तरकालसंबन्धित्वाभावात् ।

अथ नोत्तरकालः कार्यं नित्यत्वात् तस्येति चेत्, न, प्रागभावस्यापि कार्यत्वप्रसङ्गात्, तस्य प्रागसद्रूपत्वात्, किंचिदपेक्ष्योत्तरकालसंबन्धित्वाच्च ।

प्रागसत्त्वशब्देन प्रागभाववत्ता विवक्षितेति चेत्, न, मतुबर्थानिरूपणात्, कालसंबन्धपदस्य वैयर्थ्यप्रसङ्गाच्च, एतेन नियतोत्तरक्षणवर्ति कार्यमित्यपि परास्तम्, कारणानिरुक्तौ तदपेक्षया नियतोत्तरक्षणवर्तित्वस्यानिरूपणात्, कालानिरूपणाच्च न पूर्वोत्तरक्षणभावः कारणकार्यभावः, तथाहि,

प्रत्यक्षागोचरत्वेन परत्वादेरलिङ्गतः ।
स्वरूपतो निमित्तत्वादुपाधौ निष्फलत्वतः ॥ ५९ ॥
दिवाकरपरिस्पन्दपिण्डसंगतिसंभवात् ।
व्यापिनश्चेतनादेव कथं कालः प्रसिध्यति ॥ ६० ॥

न तावत् काले प्रत्यक्षं प्रमाणम्, द्रव्यग्राहकयोश्चक्षुःस्पर्शनयोस्त-

Digitized by Google

स्मिन् रूपविरहिणि स्पर्शविधुरे चाप्रवृत्तेः, मनसश्च बाह्येन्द्रियनिरपेक्षस्य बहिरप्रवृत्तेरननुभवाच्च ।

नाप्यनुमानम्, तत्प्रतिबद्धलिङ्गाभावात् ।

परापरयौगपद्यायौगपद्यचिरक्षिप्रप्रत्ययाः प्रत्येकं लिङ्गमिति चेत्, न, तेषां निरुपाधिककालनिबन्धनत्वे प्रत्ययवैलक्षण्यानुपपत्तिप्रसङ्गात्, तपनपरिस्पन्दभेदलक्षणोपाधिकवलितकालाधीनत्वे तूपाधिभिरेव तत्सिद्धेः कृतं कालकल्पनया ।

ननु तरणिपरिस्पन्दभेदानां युवस्थविरादिपिण्डैः स्वतः संबन्धासंभवेन दिवसमासादिविशिष्टप्रत्ययजनकत्वायोगात् पिण्डचण्डरोचिःपरिस्पन्दयोः परंपरासंबन्धसंपादकः कालः स्वीकर्तव्यः, स च संबन्धः संयुक्तसंयोगिसमवायात्मा ।

न च तत्र पृथिव्यादिचतुष्टयं हेतुः, तस्य तपनपिण्डाभ्यां नियमेन संसर्गाभावात् ।

न च दिवाकरकरनिकरस्तथा, तदभावे दहननिवातनिध्यादिषु मासाद्यवच्छेदप्रतीतेः ।

न चाकाशात्मानौ तथा विशेषगुणवत्त्वात् पृथिव्यादिवत् ।

न चाव्यापकत्वमुपाधिः, एकस्य व्यापकस्य संबन्धोपनायकत्वे व्यापकान्तरस्य तदहेतुतया व्यतिरेकव्याप्तौ साध्याव्यापकत्वेनानुपाधित्वात्, ततः परिशेषात् पिण्डसंयुक्तः कालस्तपनेनापि संयुज्यमानस्तत्समवेतपरिस्पन्दानां परंपरया पिण्डसंबन्धहेतुः सिद्ध इति लीलावतीकारः, मैवम्, उभयवादिसंप्रतिपन्नात्मनैव वस्तूनामुपाधिसंबन्धसिद्धेरतिरिक्तद्रव्यकल्पनायां कल्पनागौरवप्रसङ्गात् ।

न च विशेषगुणवत्त्वादात्मनः पृथिव्यादिवदुपाधिसंबन्धानुपनायकत्वम्, विशेषगुणवैधुर्येण मनोवदेव भवदभिमतकालेऽप्युपाध्यनुपनायकत्वप्रसङ्गस्य दुर्वारत्वात्, अव्यापकत्वोपाधेस्त्वयैव निवारितत्वात् ।

ननूपाधिसंबन्धोपनायकत्वेनैव कालसिद्धेस्तत्पक्षीकारेण तद्विपर्ययप्रसञ्जने धर्मिग्राहकप्रमाणबाधः, तदसिद्धावाश्रयासिद्धिरिति चेत्, न, प-

त्तिवादिप्रसिद्धतामात्रेणैवाश्रयतोपपत्तेरसकृदुपपादितत्वात्, विशेषगुणविधुरत्वं तरणिपरिस्पन्दसंसर्गोपनायकत्वमिति न भवति विशेषगुणशून्यमात्रवृत्तित्वात्, मनस्त्ववदिति कालवादिनं प्रति प्रकारान्तरेणापि निरुक्तिसंभवाच्च ।

न च परत्वापरत्वगुणासमवायिकारणसंयोगाश्रयतया कालसिद्धिः, परत्वापरत्वयोरेवासिद्धेः ।

न च परापरत्वव्यवहारानुपपत्त्या तत्सिद्धिः, प्रचुराप्रचुरतरणिपरिस्पन्दान्तरितजन्मत्वेनैव तत्सिद्धेः, अन्यथा परत्ववन्मध्यमत्वस्यापि गुणान्तरस्य स्वीकारः स्यादिति भूषणभाषितदूषणप्रसङ्गात् ।

न च तरणिपरिस्पन्दानां प्राचुर्यमल्पत्वं न संख्याभेदो नापि परिमाणविशेषः, निर्गुणे कर्मण्यसंभवात्, इति वाच्यम्, भवन्मते परत्वापरत्वहेतुभूताया अपेक्षाबुद्धेर्यद्विषयनिबन्धनं वैचित्र्यं तस्यैवास्माभिः प्रचुराल्पतरशब्देनाभिलापात् ।

अपेक्षाबुद्धेः स्वभावभेदादेव वैचित्र्यव्यवहारहेतुत्वं न विषयभेदापेक्षयेति चेत्, मैवम्, परापरबुद्ध्योरप्यन्तरेणैव विषयवैचित्र्यं स्वभावभेदादेव, तथाविधव्यवहारहेतुत्वप्रसङ्गात्, तथा नीलपीतादिबुद्धीनामपीति तथा गतानां त्वयैव दत्तः स्वहस्तः स्यात्, तदेवं न कालसद्भावसिद्धिः ।

इन्द्रियानधिगम्यत्वान्नाध्यक्षं नानुमा दिशि ।
वर्णैरर्थान्तरत्वेन साध्यासिद्धिर्निदर्शने ॥ ६१ ॥

एतेन दिगपि व्याख्याता, तस्या अप्यनध्यक्षत्वादलिङ्गत्वाच्च ।

ननु पूर्वापरदक्षिणोत्तरादयो दश प्रत्ययाः सन्ति तत् कथं लिङ्गाभाव इति चेत्, न, तेषां निरुपाधिदिगालम्बनत्वे सर्वत्र सर्वप्रत्ययप्रसङ्गात्, दिशां दशत्वप्रसङ्गे नवैव द्रव्याणीति व्याघाताच्च ।

न चात्मत्वेन संग्रहवद्दिशामपि दिक्त्वेन संग्रहादैक्यम्, मरुद्वि-ज्ञानामपि भिन्नतया तत्कारणत्वाकाशत्वाद्यभावप्रसङ्गात्, आकाशत्वेन संग्रहस्य तत्रापि तुल्यत्वात् ।

न च तथैवास्तु को दोष इति वाच्यम्, आकाशकालदिशामेकैकत्वादवान्तरजात्यभावे पारिभाषिक्यस्तासां संज्ञा आकाशं कालो दिगिति भाष्यविरोधात्, सुरगिरिशिखरपरिभ्रमन्मार्तण्डमण्डलप्रथमसंयोगाद्युपाध्युपधाने तेनैव पूर्वादिप्रत्ययानामन्यथा सिद्धत्वात्, उपहितदिगालम्बनत्वे च परस्पराश्रयत्वात्, पूर्वादिप्रत्ययबलादुपाध्युपहितदिक्सिद्धिः, तत्सिद्धौ च तदालम्बपूर्वापरादिप्रत्ययसिद्धिरिति, लिङ्गान्तरेण तत्सिद्धौ पूर्वापरादिप्रत्ययवैयर्थ्यात्, उपाधीनामादित्यादिगतत्वात् ।

पूर्वापरप्रत्ययालम्बनवस्तुभिः स्वरूपतः प्रत्यासत्तिशून्यानां संबन्धापादकवस्त्वन्तरस्य स्वीकारे दिक्सिद्धिरिति चेत्, न, त्वदभिमतकालेनैव तदुपपत्तेः ।

न च कालकृतपरत्वापरत्ववैलक्षण्यादस्य दिक्कृतत्वम्, दिक्कल्पनान्तरेणैव व्यवहर्तुः स्वेन संयुक्तपृथिव्यादिभिर्हस्तदण्डादिसंयोगानामल्पीयस्त्वभूयस्त्वाभ्यामेव विशिष्टपरापरव्यवहारोपपत्तेः ।

न चाल्पीयस्त्वभूयस्त्वयोः संख्यारूपगुणत्वे परिमाणविशेषत्वे च संयोगाख्यगुणाधिकरणत्वासंभवादनुपपत्तिः, भवदभिमतपरत्वापरत्वसमवायिसंनिकृष्टविप्रकृष्टलक्षणापेक्षाबुद्धिविषयसंयोगाल्पीयस्त्वभूयस्त्वयोरपि तुल्यत्वात् ।

यत्तु दिक्कालयोः प्रसाधनाय प्रमाणमुक्तं लीलावतीकारेण महत्परिमाणवतामाद्यं विशेषगुणशून्यद्रव्याधिकरणमनेकक्रियापरिमाणवत्संबन्धि-कान्तिविषयनिष्ठकार्यत्वात्, अणुत्ववत्, अस्ति हि विशेषगुणशून्यानेकक्रियावत्तानेकाणुपरिमाणनिष्ठतायुक्तजातेः, तथापि विवादाध्यासितानि मूर्तद्रव्याणि गुणपर्यन्तविशेषगुणशून्यानेकद्रव्यसंसर्गीणि द्रव्यत्वादात्मवदिति, तदयुक्तम्, मनसैवापि दिक्काले व्यापकपक्षाद्युपगतस्य बाधेनार्थान्तरत्वात्, वेदान्तिनं प्रति दृष्टान्तस्य साध्यविकलत्वाच्च, मनसो विशेषगुणशून्यत्वे हि तद्गताणुत्वस्य विशेषगुणविधुरद्रव्याधिकरणानेकव्यक्तिवृत्तित्वम्, आत्मनश्च गुणपर्यन्तविशेषगुणशून्यद्रव्यसंसर्गित्वं च भवेत्, तच्च वेदान्तिनं प्रत्यसिद्धम्, मनसोऽपि विशेषगुणकत्वात् ।

न च तत्र मानाभावः, मूर्तत्वस्यैव तत्त्वात् ।

न च विशेषगुणवत्त्वे द्रव्यारम्भकत्वमुपाधिः, घटादिष्वन्त्यावयविषु व्यभिचारात् ।

न च द्रव्यारम्भकवृत्ति द्रव्यत्वावान्तरजातिमत्त्वमुपाधिः, आत्माकाशयोर्व्यभिचारात् ।

न च बाह्येन्द्रियग्राह्यविशेषगुणवत्त्वम्, भवदभिमतात्मनि व्यभिचारात् ।

न वा भूतात्मनोरन्यतरत्वमुपाधिः, वेदान्तिनं प्रति तस्यापि साध्याव्याप्तेः, "कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिरित्येतत् सर्वं मन एवे"ति मनसो विशेषगुणवत्त्वश्रुतेश्च ।

न च कामादीनां निमित्तकारणत्वान्मनसस्तथात्वव्यपदेशः, मुख्ये बाधकाभावात्, निमित्तनैमित्तिकत्वमात्रेण सामानाधिकरण्यश्रवणानुपपत्तेश्च, नहि भवति कुलालो घट इति सामानाधिकरण्यम्, एतेन मानमनोहरप्रयोगोऽप्यपास्तः, विवादाध्यासितं कार्यं विशेषगुणरहितद्रव्याभ्यां जन्यते कार्यत्वादन्तःकरणद्वयसंयोगवदिति, तत्रापि दृष्टान्तस्य साध्यविकलत्वात्, विवादाध्यासितं विशेषगुणरहितद्रव्यैर्जन्यत इति बहुवचनप्रक्षेपेणापि प्रयोगसंभवात्, अतिरिक्तद्रव्यसाधकतयाभाससमानयोगक्षेमत्वाच्च ।

न च दृष्टान्तासिद्धिः, अनेकान्तःकरणाधिकरणापेक्षबुद्धिजन्यबहुत्वस्यैव दृष्टान्ततोपपत्तेः, विवादाध्यासितं विशेषगुणरहितद्रव्याभ्यां न जन्यतेऽन्तःकरणाकार्यत्वादाकाशवदिति सत्प्रतिपक्षत्वाच्च ।

न चाकार्यत्वमुपाधिः, वेदान्तवादिभिराकाशस्यापि कार्यताङ्गीकारात्, तदेवं कालानिरूपणाच्च तत्कृतः पूर्वापरीभावः कार्यकारणभावः, भेदाभेदविकल्पानुपपत्तेश्च, तथाह्यत्यन्तभिन्नयोरश्वमहिषयोरिव नोपादानोपादेयभावः, तथात्यन्ताभेदेऽपि पूर्वसिद्धस्योपादानत्वात्, असिद्धस्य चोपादेयत्वात्, एकत्र युगपत्सिद्धत्वासिद्धत्वविरोधादेव तदनुपपत्तेः ।

अस्तु तर्हि भिन्नाभिन्नयोः कार्यकारणभावः, अत्यन्ताभेदेऽभेदे च तदनुपपत्तेर्दर्शितत्वात्, सामानाधिकरण्यानुपपत्तेश्च, नहि भवति घटः

पट इति सामानाधिकरण्यम्, नापि घटो घट इति, दृश्यते च मृद्घटः शुक्लः पटः॰ गौः शावलेय इति सामानाधिकरण्यम्, ततो भेदसिद्धिरिति चेत्, न ।

भेदेऽप्ययुतसिद्धत्वादुपादानत्वसंभवात् ।
तस्यापि दुर्निरूपत्वात् समवायाद्यसंगतः ॥ ६२ ॥

अन्तरेणापि भेदाभेदौ जन्यजनकयोरयुतसिद्धतयैवोपादानोपादेयतोपपत्तेः, भेदाभेदवादिनाप्ययुतसिद्धतायास्तन्नियामकत्वेनावश्याभ्युपेयत्वात्, नहि यत्रैव कार्यकारणभावस्तत्रैव भेदाभेदाविति शक्यं कल्पयितुम्, अतश्चावश्याभ्युपेयैवायुतसिद्धिरिति तत एवार्थापत्तेरन्यथासिद्धिः ।

न चान्तरेण भेदाभेदावयुतसिद्धिरेव न सिध्यतीति वाच्यम्, अत्यन्तभिन्नयोरप्यात्माकाशयोर्भाट्टैरपीष्टत्वात्, उपादानोपादेयभावानिरूपणाच्च ।

तत् किं समवायित्वे सति कारणत्वमुत कार्यत्वाधारत्वे जन्येनायुतसिद्धत्वे सति जनकत्वं वा द्रव्यत्वविशेषितं वा॰ अहोस्वित् कार्याकारेण परिणतत्वमथवा कार्यविभ्रमाधिष्ठानत्वम् ।

नाद्यः, समवायस्यानङ्गीकरणात्, निराकृतत्वाच्च ।

न द्वितीयः, कुण्डबदरयोराधाराधेयभावेऽपि तददर्शनात् ।

स्वजन्याधारत्वं तदिति चेत्, न, स्वजन्यघटाद्याधारे कुलालादावतिव्याप्तेः, आधारानिरुक्तेश्च ।

न तावदिहेति प्रत्ययविषयत्वम्, तत्रेति प्रत्ययाव्याप्तेः ।

नापि समवायित्वम्, शशे विषाणाभावः कुण्डे बदरमित्यादावव्याप्तेः ।

नापि संयोगित्वम्, गुणादौ तदसंभवात्, संयोगिनोरुभयोरन्योन्याधारत्वप्रसङ्गाच्च ।

नापि पतनप्रतिबन्धकत्वम्, गुणादावव्याप्तेः, अत एव नाधेयापेक्षया महत्परिमाणत्वमपि, करतलनिहितमहत्तरतूलपिण्डादावसंभवाच्च ।

नापि तृतीयः, ज्ञानेच्छादीनां परस्परोपादानत्वप्रसङ्गात्, अस्ति हि तत्र जनकस्य ज्ञानस्य जन्येनेच्छादिनाऽयुतसिद्धत्वम्, आत्मैकाश्रयतया पृथगाश्रयित्वलक्षणायुतसिद्धभावात् ।

नापि चतुर्थः, अर्थविशेषत्वासिद्धेः, नहि द्रव्यमुपादानमित्यभिहिते ऽस्ति कश्चिदर्थातिप्रसङ्गः, येन तन्येनायुतसिद्धत्वमिति पदान्तरमुपादीयेत ।

नापि पञ्चमः, निरवयवेष्वप्यात्माकाशादिष्वव्याप्तेः, नह्यात्माकाशं वा ज्ञानेच्छादिरूपेण शब्दरूपेण वा परिणमते, कार्त्स्न्यैकदेशविकल्पासहत्वात्, तन्त्वादीनामपि पटाद्याकारेण गुणकर्माद्याकारेण वा परिणामादर्शनात्, नहि द्रव्यं गुणः कर्म वा भवति, तदाश्रयत्वात् ।

नापि षष्ठः, प्रपञ्चसत्यत्ववादिभिरनङ्गीकारात्, तदेवमुपादानोपादेयभावानिरूपणाच्च तदन्यथानुपपत्त्या भेदाभेदसिद्धिः ।

नापि सामानाधिकरण्यानुपपत्तिः, विकल्पासहत्वात्, तथाहि किं शाब्दस्य सामानाधिकरण्यानुपपत्तिरुतार्थिकस्य, नोभयथापि ।

युक्तः शब्दनिमित्तानामेकाधिकरणत्वतः ।
शाब्दं न तावद् घटते भेदाभेदप्रसाधकम् ॥ ९३ ॥
धर्माणामेकनिष्ठत्वमात्रेणैवोपपत्तितः ।
अभेदानुभवाभावादार्थं नैवास्य साधकम् ॥ ९४ ॥

शुक्लः पट इत्यादौ शाब्दसामानाधिकरण्यस्य प्रवृत्तिनिमित्तयोरेकाधिकरणसंबन्धादेवोपपत्तेः, धर्मधर्मिभेदाभेदयोरौदासीन्यात्, आर्थिकस्यापि धर्मयोरेकाधिकरणतालक्षणस्य तत एवोपपत्तेः, धर्मधर्मिणोरभेदानुभवस्यासंप्रतिपत्तेश्चासाधकत्वात्, गुणो द्रव्यं कर्म द्रव्यं जातिर्व्यक्तिरिति सामानाधिकरण्यानुभवाभावात्, भिन्नाभिन्नमित्यत्र भिन्नशब्देन स्वरूपभेदस्याभिन्नशब्देन तदभावस्याभिधाने च भावाभावयोर्युगपदेकत्र परस्परविरोधेनासंभवात्, अभेदे च शुक्लः पट इत्यादिषु बुद्धिव्यपदेशयोः पौनरुक्त्यापत्तेः ।

न च भेदस्यापि भावात् सार्थकता, अभेदस्यापि भावे वैयर्थ्यस्यापि संप्रतिपन्नस्य इव दुष्परिहरत्वात्, हेत्वभावे[1] फलाभावादौत्सर्गिकाद्धेतु-

---

[1] ननूभयहेतुसद्भावे कोऽयमापन्नो वैयर्थ्यं स्यादिति तत्र वैयर्थ्यस्याभेदेऽपि विनिगमनायां हेतुमाह हेत्वभावे इति, औत्सर्गिकत्वं खल्विदम्, यद्धेत्वभावे फलाभाव इति, इतरथा तयोः प्रागभावप्रध्वंसादिनोरनिवर्त्यतया नित्यमनुत्पत्तिरेव कार्यस्य स्यात्, तस्मात् तदुभयबाधको हेतुभावे फलाभावोऽपवादः ।

भावे कलभावस्य तदपवादतया बलीयस्त्वात्, अन्योन्याभावतदभावयो-र्भिन्नाभिन्नशब्दाभ्यामभिधाने विरोधे पौनरुक्त्ये पूर्वोक्ते एव पुनरुपापतेते ।

ननु भेदशब्देन स्वरूपभेदस्याभेदशब्देनेतरेतराभावराहित्यस्य चाभि-धानादविरोध इति चेत्, नैवम्, इतरेतराभावस्यैवोच्छेदप्रसङ्गात्, स्वरूप-विभेदे विद्यमानेऽपि तदविरोधितया यदि क्वचिदितरेतराभावः स्यात् तर्ही-तरेतराभावस्यैव निरङ्कुशप्रसरतयेतरेतराभावविरह एव जगति स्यादित्यनु-त्वाद एव भेदाभेदवादिना समर्थितः स्यात्, तदेवं भेदाभेदपक्षेषु कार्यका-रणभावस्य दुर्निरूपत्वात् स्वरूपतो विचारागोचरत्वादनाद्यविद्याविलसितः सकलोऽप्ययं प्रपञ्च इति तद्ग्राहिप्रत्यक्षादिप्रमाणविरोधाभावाद्वेदान्तवाक्यं निरपवादमेवाद्वितीये ब्रह्मण्यपरोक्षं ज्ञानं जनयतीति निरवद्यम् ॥ * ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्यचित्सुख-मुनिविरचितायां तत्त्वप्रदीपिकायां लक्षणभङ्गो नाम द्वितीयः परि-च्छेदः ॥ २ ॥

(शेषमग्रे)

काशीस्थराजकीयप्रधानपाठालयीयसंख्यावान् ।
सांख्याध्यापकवरो वेचनरामोऽस्मि कान्यकुब्जोऽहम् ॥ १ ॥

॥ पं० वेचनराम त्रिपाठी ॥

॥ श्रीः ॥

॥ योगवार्तिकम् ॥

(Continued from page 112. Vol. VI.*)*

तृतीयविकल्पस्यास्य शब्दादिवृत्त्यनुत्पादस्य त्यागादस्य ततो-भेदः । प्रधानस्य दर्शनयत्नो श्रुतिं प्रमाणयति । प्रधानस्येति । कालतु-ल्यकालस्येयं श्रुतिः । अप्रथमं विकल्पमाह । सर्वबोध्येत्यादिनाऽवभासतद्-रूपत्वेन । सर्वबोधे समर्थोऽपि पुरुषः प्रधानप्रवृत्तेः प्राक् न पश्यति इत्येक-मद्वयं कूटस्थनिष्ठमपरं च सर्वकार्याणां कारणउत्पादने समर्थे स्वरूप-तोऽप्यस्ति दृश्यं प्रधानं तदा प्राक् प्रधानप्रवृत्तेः पुरुषेण न दृश्यत इति

दृश्यनिष्ठमदर्शनमित्येवमुभयस्याप्यदर्शनं धर्म इत्येकत्राहुरित्यर्थः । एत-देवाचादर्शनमिति शेषः । ननु जडानामदर्शनात्मकत्वात् कथं तेषामद-र्शनं धर्मः स्यात् अभावस्याधिकरणस्वरूपत्वात् अव्यभिचारेण लाघवादे-कतासिद्धेश्च कथं वा दृशिस्वरूपस्य पुरुषस्यादर्शनं घटते प्रकाशरूपस्या-प्रकाशरूपत्वासंभवात् इत्याशङ्क्य समाधत्ते । तत्रेदमिति । तचादर्शनद्व-यमध्ये इदमेकमदर्शनं दृश्यस्वरूपभूतमपि दृश्यधर्मत्वेन विशिष्टं भवति तत्र हेतुः पुरुषप्रत्ययापेक्षमिति । पुरुषप्रत्ययं बोधमपेक्ष्य तदविषयतयेति यावत् । तथेति । तथा पुरुषस्य निर्धर्मत्वात् सदा प्रकाशरूपत्वाच्चाना-त्मभूतमप्यदर्शनं पुरुषधर्मत्वेनैव लौकिकबुद्ध्यावभासते तत्र हेतुः दृश्यप्रत्य-यापेक्षमिति । दृश्यप्रत्ययमपेक्ष्य दृश्यगोचरप्रत्ययाभावेनेति यावत् । अष्ट-मविकल्पमाह । दर्शनज्ञानमिति । ज्ञानं वासनारूपं तस्यापि दृश्यसंयोग-हेतुत्वात् न तु भोगापवर्गरूपमनागतावस्थं दर्शनमत्रोक्तम् अर्थवत्तया-पौनरुक्त्यादिति । उपसंहरति । इत्येतइति । शास्त्रेष्वेते ऽज्ञानभेदास्ता-न्त्रिकैरुच्यन्तइत्यर्थः । संयोगभेदेन सर्वेषामेवादर्शनानां हेतुत्वं सिद्धान्त-यन्नेव संयोगविशेषहेत्वदर्शनविशेषपरतयोत्तरसूत्रमवतारयति । तत्र विक-ल्पेति । तत्रादर्शने विकल्पबहुत्वं भेदबाहुल्यमेतत्पुरुषसामान्यस्य गुणसा-मान्यस्य च पुरुषार्थहेतुसंयोगसामान्यं प्रति कारणतायां बोध्यम् । यस्तु प्रत्येकचेतनस्य तत्तच्चेतनस्य स्वबुद्धिसंयोगो हेयहेतुः स्वस्वामीत्यादिप्रक्त-नसूत्रेणोक्तः तस्य हेतुरविद्या चतुर्थविकल्परूपमदर्शनमेवेति सूत्रेण सम्ब-न्धयः । प्रत्यक्चेतनस्येतिपाठे स्वस्वबुद्ध्यनुगमशीलचेतनस्येत्यर्थः । अयं भावः । अविद्यानाशयोत्तरमपि जीवन्मुक्तस्य भोगार्थं विषयरूपेण परिणतैर्गुणैः सह संयोग उत्पद्यते अतो नाविद्या गुणपुरुषसंयोगसामान्यं हेतुः किं तु यथोक्तो गुणाधिकारादिरेव स्वबुद्धिसंयोगस्तु जन्मापरनामा अविद्यां विना न भवतीति बुद्धिपुरुषसंयोग एवासाधारण्येनाविद्याहेतुर्भवति सैव च बुद्धि-संयोगद्वारा द्रष्टृदृश्यसंयोगहेतुर्विद्योच्छेद्या च भवतीत्याशयेन सैवोत्तर-सूत्रेण सूच्यते न गुणाधिकारादिः तस्य ज्ञानानुच्छेद्यत्वात् एकस्य पुंसो मुक्तावपि पुरुषान्तरार्थं गुणाधिकारादितादवस्थ्यात् यदेव च पुरुषेण हेतुं

Digitized by Google

च्यते तदेव हेयनिदानमत्र प्रतिपादनीयम् अन्यथा कालकर्मेश्वरादीनामपि हेयहेतुसंयोगकारणतया तेषामप्यत्र प्रतिपाद्यतापत्तेरिति ॥

तस्य हेतुरविद्या ॥ २४ ॥

तस्य द्रष्टृदृश्यसंयोगस्य बुद्धिपुरुषसंयोगद्वारा हेतुरविद्येत्यर्थः । भाष्यकारेण च सूत्रकारतात्पर्याभिप्रायेणैव तस्येत्यस्य बुद्धिसंयोगस्येत्यर्थ उक्तः न तु साक्षादेकद्रष्टृदृश्यसामान्यसंयोगस्यैव पूर्वसूत्रे प्रकृतत्वात् । बुद्धिसंयोगस्येति । अविद्या चात्रानात्मन्यात्मबुद्धिमात्रं तस्य बुद्धिसंयोगहेतुत्वात् अनित्यादौ नित्यादिबुद्धिरूपाणामविद्यानां वक्ष्यमाणाविवेकख्यातिनाश्यत्वानुपपत्तेश्च । सा चाविद्या बुद्धिसंयोगजन्यतया तदव्यवहितप्राक्काले न संभवतीत्यत आह भाष्यकारो, विपर्ययेति । सर्गान्तरीयाविद्यायाः स्वचित्तेन सह निरुद्धायाः प्रधाने या वासना स्थिता तया वासितं प्रधानं तत्पुरुषसंयोगिनीं तादृशीमेव बुद्धिं सृजतीत्यनादित्वान्न दोषः । अविद्यावासनायां बुद्धिपुरुषसंयोगहेतुत्वे युक्तिमाह । विपर्ययेति । विपर्ययज्ञानवासनाबलात् पुरुषख्यातिरूपां कार्यनिष्ठां स्वकर्त्तव्यचरमावधिं न प्राप्नोति बुद्धिरतः स्वाधिकारतया पुनरावर्त्तते पुरुषेण संयुज्यते सा तु बुद्धिः पुरुषान्यताख्यातिपर्यन्ता सती कार्यसमाप्तिं प्राप्नोति परवैराग्योत्पादात् । ततश्च चरिताधिकारा निष्पादितकार्या निवृत्ताविद्या सती संयोगाख्यबन्धस्य कारणाभावात् न पुनः पुरुषेण संयुज्यत इत्यर्थः । तथा चान्वयव्यतिरेकाभ्यां विपर्ययवासनाबुद्धिः पुरुषसंयोगहेतुरिति भावः । पुरुषख्यात्या चित्तस्य निवृत्तिरिति यदुक्तं तत्र नास्तिकाक्षेपं निराचिकीर्षुस्तं प्रदर्शयति । अत्र कश्चिदिति । षण्डकोपाख्यानेन दृष्टान्तेनोद्घाटयति आक्षिपतीत्यर्थः । नपुंसकाख्यानमेवाह । मुग्धयेत्यादिना उत्पादयिष्यतीत्यन्तेन । स षण्डकस्तां भार्याम् । विनष्टमिति । विनष्टं परवैराग्येण निरुद्धं ज्ञानं चित्तनिवृत्तिरूपं मोक्षं करिष्यतीति नास्ति प्रत्याशेत्यर्थः । उपेक्षासूचनाय पूर्वाचार्यमुखेनात्र सिद्धान्तमाह । तत्रेति । ईषदसमाप्त आचार्य आचार्यदेशीयः । उपेक्षणीये प्रत्युत्तरदानमात्रेणाचार्यदेशीयत्वम् । आचार्यस्य वाक्ये प्रोक्तः ।

आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि ।
स्वयमाचरते यस्मादाचार्यस्तेन चोच्यते ॥

इति । नन्विति संबोधने । एतदुक्तं भवति । ज्ञानं न साक्षान्मोक्षहेतुरस्माभिरिष्यते किं तु अविद्याख्यादर्शननिवृत्तितत्कार्यनिरोधयोगद्वारा । तथा च विनष्टमपि ज्ञानं बुद्धिपुरुषवियोगरूपमोक्षव्यापारद्वारा कारणं संभवत्येवेति । ननु यद्ययमाचार्यदेशीयः तर्हि किं बुद्धिचित्तादिनाशकान्तःकरणनिवृत्तिर्मोक्ष एव न भवतीत्याशङ्कायामाह । तत्र चित्तेति । चित्तनिवृत्तिर्मोक्षो भवत्येव किंतु तत्रास्थानएवास्य नास्तिकस्य बुद्धिव्यामोहो व्यर्थ इत्यतोऽत्रापेक्षणीये समाधातृत्वादेवाचार्यदेशीय उक्त इत्यर्थः । तदेवं हेयहेयहेतुरूपं व्यूहद्वयं व्याख्याय तृतीयव्यूहस्य सूत्रमवतारयति । हेयमिति । निमित्तमविद्या ।

तदभावात्संयोगाभावो हानं तद् दृशेः कैवल्यम् ॥ २५ ॥

तस्या अविद्याया अभावाद्विनाशाद्बुद्धिपुरुषसंयोगनिवृत्तिद्वारा द्रष्टृदृश्यसंयोगनिवृत्तिः दुःखहानमित्युच्यते कार्यकारणयोरभेदोपचारात् तस्य पुरुषार्थत्वायोक्तं तद्दृशेः कैवल्यमिति, तदेव च हानं पुरुषस्य कैवल्यमित्यप्युच्यतइत्यर्थः । इममेव सूत्रार्थं भाष्यकारः प्रकारान्तरेणाह । तस्येति । बुद्धिपुरुषसंयोगशब्देन कार्यकारणाभेदात् द्रष्टृदृश्यसंयोगोऽपि ग्राह्यः प्रलयकालीनवियोगव्यावर्तनायात्यन्तिक इति विशेषणं बन्धनोपरमस्य । एतद्धानमिति । पूर्वेण सहान्वेति । तद्दृशेः कैवल्यमित्येतद्व्याचष्टे । तद्दृशेरिति । तद्धानं गुणैः बुद्धिगुणैः दुःखादिभिः पुनरसंयोगः प्रतिबिम्बरूपेणासंबन्ध इत्यर्थः । स एव च दुःखभोगनिवृत्तिरूपः स्वतःपुरुषार्थरूप इति भावः । सूत्रस्य फलितार्थमाह । दुःखेति हानमित्यन्तेन । व्याख्याते कैवल्यशब्दार्थे 'तदा द्रष्टुः स्वरूपेऽवस्थान'मिति गतसूत्रं प्रमाणयति । तदेति । तदा दुःखनिवृत्तौ । अस्य च हानव्यूहस्य चतुर्थपादे विस्तरो भविष्यतीत्यत्र दिङ्मात्रेण स उक्तः । अतः परं हानोपायव्यूहश्चतुर्थपादस्यापि कियत्पर्यन्तं वाच्यस्तत्र चतुर्थव्यूहप्रतिपादनसूत्रमवतारयति । अथेति । दु-

Digitized by Google

द्धिसंयोगनिवृत्तिरेव साक्षाद्दुःखहाने कारणं विवेकख्यातिस्तु बुद्धिसंयोगहेत्वविद्यानिवर्त्तकत्वेन परम्परयेति प्राप्तिकत्वेन सूचितम् ॥

विवेकख्यातिरविप्लवा हानोपायः ॥ २६ ॥

साक्षात्कारनिष्ठारूपत्वलाभायाविप्लवेति विशेषणम् । तत्राविप्लवशब्दात् कथमेतल्लभ्यते इत्याकाङ्क्षायामाह । प्लवते । मिथ्याज्ञानसंस्कारवशात् मिथ्याज्ञानेनान्तरान्तराभिभूयत इत्यर्थः । यदेति । यदा तु साक्षात्कारदशायां सूक्ष्ममिथ्याज्ञानमनागतावस्थं दग्धबीजतुल्यावस्थं तस्य विध्वस्तं बन्ध्यप्रसवं बन्ध्यप्रसवसामर्थ्यं भवति तदा विधूतक्लेशाख्यधूलेर्बुद्धिसत्त्वस्यात एव परवैशारद्ये वैलक्षण्ये अस्यैव विवरणं परस्यां वशीकारसंज्ञायां 'परमाणुपरममहत्त्वान्तोऽस्य वशीकार' इति सूत्रोक्तायामिच्छाऽप्रतिघातरूपायां वर्त्तमानस्य विवेकख्यातिप्रवाहो निर्मलो मिथ्याज्ञानाकलुषितो भवति अतः सा विवेकख्यातिरविप्लवोच्यते । सा परमसाक्षात्काररूपिणी हानोपाय इत्यर्थः । केन द्वारेण हानोपाय इत्याकाङ्क्षायामाह । तत इति । ततो विवेकख्यातेः कारणात् मिथ्याज्ञानस्य सूक्ष्मरूपस्य दग्धबीजताप्राप्तिः । ततश्च पुनरप्रसव इति कृत्वा एष विवेकख्यातिरूपश्चित्तनिवृत्त्यादिरूपमोक्षस्य पन्थाः, अस्य विवरणं हानोपाय इत्यर्थः । नन्वेवं ज्ञानादेव दुःखहानाख्यमोक्षवचनात् असंप्रज्ञातयोगस्य किं प्रयोजनमिति चेन्न । परवैराग्यजासंप्रज्ञातयोगस्याप्यत्र ज्ञानद्वारतया मोक्षहेतुत्वाश्रयणादिति । तस्या विवेकख्यातेरविप्लवाख्यनिष्ठाया लक्षणमाह ।

तस्य सप्तधा प्रान्तभूमिः प्रज्ञा ॥ २७ ॥

तस्य विवेकख्यातिरूपहानोपायस्य प्रान्तभूमिकारूपिणी प्रज्ञा सप्तधेत्यर्थः । तदेतद्व्याचष्टे । तस्येतीति । तच्छब्दोक्तहानोपायस्य स्वरूपाख्यानं प्रत्युदितख्यातेरिति । अन्यथा तस्येतिपुल्लिङ्गानुपपत्तेः । प्रत्याम्नायः परामर्शः । न चात्र प्रत्युदितख्यातेः पुरुषस्य परामर्श इत्यर्थः संभवति पुरुषस्य पूर्वसूत्रेष्वप्रस्तुतत्वात् । सप्तधेत्येतद्व्याख्यातुं गृह्णाति । सप्तधेतीति । अशुद्धीति । अशुद्धिविपर्ययाख्याऽविद्या तत्कार्यपापादिकं चोत्तरसूत्रभाष्यात् सेवा-

त्मरूपो मलस्तदपगमाच्चित्तस्य प्रत्ययान्तराणां विवेकख्यात्यन्येषामनुत्पादे सति परवैराग्यजनिरोधयोगाद्व्युत्थानदशायां सप्ताकारा प्रज्ञा विवेकिनो निष्पन्नज्ञानस्य लिङ्गं भवतीत्यर्थः । एवकारोऽयोगव्यवच्छेदे प्रकारन्यूनता नास्तीत्यर्थः । एकस्या एव प्रज्ञायाः सप्तप्रकारत्वमुदाहरति । तद्यथेत्यादिना । प्रथमं प्रकारमाह । परिज्ञातमिति । परिज्ञातं साक्षात्कृतं मुमुक्षुभिर्हेयं नास्यावशिष्टं पुनर्ज्ञेयमस्तीत्यर्थः । द्वितीयं प्रकारमाह । क्षीणा इति । ततश्च हेयहेतवोऽविद्याकामकर्मादयो विवेकसाक्षात्कारेण मम क्षीणा इत्यादिरर्थः । तृतीयं प्रकारमाह । साक्षात्कृतमिति । ततश्चाविद्यादिक्षयादुत्पन्नेन निरोधसमाधिना हेतुना व्युत्थानकाले दुःखहानरूपो भाविमोक्षो मया साक्षात्कृतः देहपातानन्तरमेतादृशो मे मोक्षो भवितेति सजातीयसाक्षात्कार एव सजातीयान्तरसाक्षात्कारविनाशे परिचितः । असंप्रज्ञातयोगदृष्टान्तेन कैवल्यमपि दृष्टप्रायमिति फलितार्थः । यद्यपि निरोधसमाधौ हानसाक्षात्कारानुपपत्तिर्वृत्त्यभावादिति असंप्रज्ञातकालीनश्च दुःखाभावो योग्यानुपलब्ध्या व्युत्थाने साक्षात्क्रियते, यदि ह्यसंप्रज्ञातेपि दुःखं स्यात् तदानुभूयेत ततश्च सुप्तोत्थानवद्व्युत्थाने स्मर्यतेति । अथ वा निरोधसमाधिना निष्पाद्यं हानं मोक्षो हानगोचरसंप्रज्ञातेन साक्षात्कृतमित्यर्थः । चतुर्थं प्रकारमाह । भावितइति । ततश्च फलनिष्पत्त्या विवेकख्यातिरूपो हानोपायो भावितो निष्पादितः फलनिष्पत्त्यैव साधनस्य सिद्धेरिति । वस्तुतस्तु भावित इत्यादिप्रकारस्य द्वितीयस्थलएव पाठ आञ्जस्येन क्रमोपपत्तेः । एषेति । एषा प्रान्तभूमिप्रज्ञाया विषयो हेयज्ञानसमाप्त्यादिरूपा चतुष्टयी प्रज्ञायाः प्रज्ञाख्यतत्त्वज्ञाननिर्मितात् पुंसां कार्यमुक्तिः कार्याद्विमुक्तिः कर्त्तव्यसमाप्तिः जीवन्मुक्तिरित्यर्थः । इयं परवैराग्यरूपा चित्तनाशस्याद्यभूमिकारूपा । चित्तेति । चित्ताद्विमुक्तिः चित्तविमुक्तिः परममुक्तिः सापि प्रान्तभूमिप्रज्ञाया विषयः त्रिविधा भवति । चित्तविमुक्तिस्तु स्वयमेव भवति न तत्र साधनापेक्षेत्याशयेन पृथगुपन्यासः । तत्राद्यां चित्तविमुक्तिमाह । चरिताधिकारा बुद्धिरिति । समाप्तभोगापवर्गा भवति बुद्धिरित्यर्थः । इयं परवैराग्यरूपा चित्तनाशस्याद्य-

Digitized by Google

भूमिकारूपा । द्वितीयामाह । गुणा इति । बुद्धेर्गुणाः संसारसुखदुःखादयः स्वकारणे सत्त्वादित्रिगुणमयप्रकृतौ लीयमानास्तेन चित्तेन सहात्यन्तलयं गच्छन्ति । तत्र दृष्टान्तो गिरीति । गिरिशिखरकूटात् च्युताः शिलाखण्डावस्थानुमतमा इत्यर्थः । एषा च लिङ्गशरीरस्य विनश्यदवस्था द्वितीयभूमिका । तृतीयामाह । न चैषामिति । न चैषां संस्कारसुखादीनां पुनरुद्भवोस्ति पुरुषार्थसमाप्त्या प्रयोजनाभावात् इत्यत एतस्यामवस्थायां पुरुषो बुद्ध्यादिगुणसंबन्धविशेषशून्यः स्वरूपमात्रज्योतिः निर्विषयकचिज्ज्योतिस्वरूपो ऽमलश्चौपाधिकतमोमालिन्यरहितः केवली केवलेषु मुक्तेष्वविभागी भवतीत्यर्थः । इयं चात्यन्तिकलयनिष्पत्तिरूपा विदेहकैवल्यस्य चरमभूमिका इमां त्रिविधां चित्तभूमिं भाविनीमेव जीवन्मुक्तदशायां विशुद्धचित्तो योगी साक्षात्करोतीति बोध्यम् । तदेवं सप्तविषयत्वात्सप्तप्रकारा प्रज्ञा व्याख्याता । इदानीं सूत्रतात्पर्यार्थमाह । एतां सप्तविधामिति । प्रज्ञावानित्यनुक्त्वा प्रज्ञामनुपश्यतीति निरभिमानताप्रतिपादनायोक्तं, बुद्धिवृत्तिं प्रज्ञां साक्षिभावेनैव जीवन्मुक्तः पश्यति न त्वभिमन्यत इत्याशयः ॥ कुशलः कल्याणो ऽकल्याणबुद्धिपञ्चोपरित्यागादिति । ज्ञानिनो जीवन्मुक्तस्य लक्षणं सूत्रेणोक्तं तत्प्रसङ्गात्स्वयं परममुक्तस्य ततो विशेषमाह । प्रतिप्रसव इति । चित्तस्यात्यन्तं लयेपि कुशल इत्येव भवति चाद्य दुःखादिभिः सत्त्वादिभिश्च कुशलगुणैरत्यन्तवियोगादित्यर्थः । एवकारेण जीवन्मुक्तदशायामपि बाधितमकुशलं तिष्ठतीत्युक्तम् । अत एव चाख्यायत इत्यनेन जीवन्मुक्तावस्थायां गौणं कुशलत्वं व्याख्यायात्र भवतीत्यनेन मुख्यं कुशलत्वमुच्यत इति । यत्तु गीतायां "सर्वारम्भपरित्यागी गुणातीतः स उच्यते" इति ज्ञानिनोपि गुणातीतत्वमुक्तं तद्गुणाभिमानशून्यतामात्रं परमेश्वरस्य निर्गुणत्ववदिति । अतः परं शास्त्रसमाप्तिपर्यन्तं हानोपायव्यूहस्यावशेषविशेषास्तत्प्रसङ्गेनैव च हानव्यूहस्य विशेषाश्च व्याख्येयाः तत्रादौ विवेकख्यात्युपायप्रतिपादकं सूत्रजातमवतारयति । सिद्धेति । सिद्धा निष्पन्ना अविप्लवेति यावत् ।

योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः ॥ २८ ॥

सामान्यतो ज्ञानं श्रवणमननाभ्यामपि भवतीति दीप्तिपदं, दीप्तिश्चात्राश्रुतामतविशेषग्रहणम् । अत्र योगाङ्गानुष्ठानादित्यनेन वक्ष्यमाणयमादीनां योगाङ्गत्वमपि ज्ञानाङ्गतावदेव विवक्षितम् । अन्यथा "तदपि बहिरङ्गं निर्बीजस्ये"त्यागामिसूत्रे योगाङ्गतायां विशेषस्याप्रकृताभिधानताप्रसङ्गात् । ननु योगाङ्गानि योगसाधनानि तानि च पूर्वोक्ततया पुनर्नोक्ताङ्ग्यन्ते इति चेन्न । कथं व्युत्थितचित्तोऽपि योगयुक्तः स्यादित्याविभाष्येणैव दत्तोत्तरप्रायत्वात् ॥ पूर्वपादे ह्युत्तमाधिकारिणाम् अभ्यासवैराग्ये एव योगयोः साधनमुक्तं ततश्च मध्यमाधिकारिणां तपः स्वाध्यायेश्वरप्रणिधानान्यपि केवलानि साधनानि एतत्पादस्यादावुक्तानि । अतः परं मन्दाधिकारिणां यमादीन्यपि योगसाधनानि वक्तव्यानि ज्ञानसाधनप्रसङ्गेनेत्ययोमहाशयम् । यद्यपि ज्ञानमप्यसंप्रज्ञातयोगसाधनतयास्मिन् शास्त्रे प्रतिपादितं तथापि तद्योगसामान्येऽङ्गं न भवति संप्रज्ञाताहेतुत्वात् । अतो योगसामान्यस्य ज्ञानस्य चोभयोरेव तुल्यवदङ्गतयात्र यमादीन्यष्टावेव योगाङ्गतया प्रतिपादयिष्यन्तइति । सूत्रं व्याचष्टे । योगाङ्गानीति । विपर्ययस्येति । योगाङ्गतया विपर्ययशब्देन तत्कार्यं पापादिकमपि ग्राह्यं तस्याप्यशुद्धिरूपत्वात् ।

> ज्ञानमुत्पद्यते पुंसः क्षयात्पापस्य कर्मणः ।
> यथादर्शतले प्रख्ये पश्यन्त्यात्मानमात्मनि ॥

इति स्मृतेः । नाशश्चात्र तनुता । तथातथा तनुत्वमशुद्धिरापद्यमानत्युत्तरवाक्यात् क्लेशतनूकरणार्थश्चेत्युक्तसूत्राच्च । अतो न ज्ञानेनैव क्लेशानामत्यन्तोच्छेद इति सिद्धान्तव्याघातः । अवरोधिनी अनुसारिणी दीप्तिः सूक्ष्मयाहिता । गुणपुरुषेति । गुणास्त्रयः सत्त्वादयः पुरुषश्च जीवेश्वराविस्यर्थः । एतेन जिज्ञासामात्रद्वारा यमनियमान्तर्गतसर्वकर्मणां ज्ञानहेतुत्व

जिज्ञासानन्तरं च कर्मत्यागमनुत्पन्नज्ञानेनापीति वेदान्तिब्रुवाणां मतं दुर्मतं मन्तव्यम् । विपर्ययतानवद्वारा यमनियमान्तर्गतकर्मणां ज्ञानहेतुत्वसिद्धेरिति । अत एव

कर्मणा सहिताज्ज्ञानात् सम्यग्योगोभिजायते ।
ज्ञानं च कर्मसहितं जायते दोषवर्जितम् ॥

इति कौर्मादिषु कर्मणां ज्ञानसाहित्येनानुष्ठानं सिद्धम् । यद्यपि विपर्ययान्तरप्रसञ्चाराख्यप्रतिबन्धनिवृत्तिरूपतया संपन्नातोपि ज्ञानकारणं तथाप्यशुद्धिक्षयद्वारा योगाङ्गानुष्ठानानामेव ज्ञानदीप्तिहेतुत्वमस्ति न-योगस्येत्यङ्गपदोपादानमिति । ननु नानाविधकार्यकारणभावदर्शनात् योगाङ्गान्यशुद्धिक्षयं प्रति ज्ञानं प्रति च कीदृशं कारणमित्याकाङ्क्षायामाह । योगाङ्गानुष्ठानमशुद्धेरिति । अशुद्धेः कारणं वियोगरूपेणातिशयेनेत्यर्थः । अयं भावः । सत एव वस्तुनोतिशयहेतुः कारणमुच्यते असत्कार्यवादस्यानभ्युपगमात् । तथा च सत्येवाशुद्धिर्वियोगाख्येनातीतावस्थारूपेणातिशयेन योगाङ्गानां कार्येति । एवं दृष्टान्तेपि बोध्यम् । विवेकख्यातेस्तु प्राप्तिकारणमिति । प्राप्तिरूपातिशयाधायकतया विवेकख्यातेः कारणमित्यर्थः । प्राप्तिश्चोत्पत्तौ प्रतिबन्धनिवर्त्तनम् । तत्र दृष्टान्तमाह । यथेति । नान्यथाकारणमिति । न वैशेषिकाणामिवोत्पत्तिकारणमस्मन्मते । धर्मादीनां निमित्तकारणानां प्रतिबन्धनिवृत्तिकारणत्वसिद्धान्तादित्याशयः । 'निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवदि'ति सूत्रे चैतत् व्यक्तीभविष्यति । विवेकख्यातेरुत्पत्तौ च चित्तमेव कारणं स्वत एव सर्वार्थग्रहणसामर्थ्यादिति । पृच्छति । कति चैतानीति । उत्तरं, नवैवेत्याहेति । पूर्वाचार्यपद्य इति शेषः । कारिकोक्तानि नव कारणानि । यथोक्तक्रममुदाहरति । तत्रेति । ज्ञानस्य वृत्तिरूपस्योत्पत्तिरूपातिशयेन मनः कारणं संभवति उपादानत्वादित्यर्थः । प्राप्तिकारणं च नोत्पत्तौ साक्षात्कारणं किं तु प्रतिबन्धनिवृत्तिद्वारेति । घटादिषु दण्डादीनि च पूर्वोक्तप्राप्तिकारणमध्य एव प्रवेशनीयानि, उत्पत्तिकारणत्वमुपादानकारणत्वमिति । स्थितीति । भोगापवर्गरूपं पुरुषार्थसामान्यं मनसः स्थितिरूपातिशयेन कारणं भवति पुरुषार्थ-

समाप्तौ मनसः स्वयमेव लयादित्यर्थः । अत्र प्राधान्येनैव मन उदाहृतं पुरुषार्थस्य सर्वभोग्यानामेव स्थितिहेतुत्वादिति । अभिव्यक्तीति । आलोकरूपज्ञानं च रूपस्याभिव्यक्तिरूपातिशयेन कारणमित्यर्थः । अभिव्यक्तिश्च बुद्धिवृत्तिः पौरुषेयबोधश्च तत्र बुद्धिवृत्तौ आलोकः कारणं पौरुषेयबोधे च रूपज्ञानं बुद्धिवृत्तिरूपमितिविभागः । विकारकारणमिति । एकाग्रस्य मनसो विषयान्तरं स्वर्गोचररागादिविकाररूपातिशयेन कारणं भवतीत्यर्थः । प्रत्ययकारणमिति । प्रत्ययः संप्रत्ययः प्रामाण्यनिश्चय इति यावत्, तथा च पर्वते वह्निरस्तीति शब्दादिना यदग्निज्ञानं तस्य संप्रत्ययकारणं पर्वते धूमदर्शनमित्यर्थः । यथाश्रुतेऽग्निज्ञानस्येत्यत्र ज्ञानशब्दवैयर्थ्यात् । आनुमानिकज्ञानस्यापि अभिव्यक्तिमध्यएव प्रवेशाच्च । प्राप्तिकारणमिति । आप्तिः प्राप्तिरित्येक एवार्थः, एतद्व्याख्यातम् । वियोगेति । एतदपि व्याख्यातम् । ननु वियोगकारणे कारणव्यवहार एव नास्तीति चेन्न । मशकार्थोऽयं धूम इत्यादिव्यवहारदर्शनात् । कर्मकार्ययोरेकार्थतयाऽशेषधातुकर्मणामेव कार्यत्वाच्चेति । अन्यत्वकारणमिति । रूपभेदकारणमित्यर्थः । ननु विकारकारणादस्य को भेद इति चेत्, उच्यते । सुवर्णादेः कटकादिरूपतात्यागेन कुण्डलादिरूपतायां यत्कारणं तत्सुवर्णादेर्विकारकारणमुच्यते तदेव च कारणं कटकादेरन्यत्वकारणमुच्यते कटकादिविनाशपूर्वकमन्येषां कुण्डलादीनामुत्पादनात् । अतः कार्यभेदेनैकस्यैव वस्तुनो द्विधाकारणत्वमिति सुवर्णस्येति । सुवर्णपिण्डादेरित्यर्थः । सुवर्णस्य सर्वविकारानुगतत्वेन सुवर्णान्यत्वाकारणत्वात् । अतोऽस्य विकारकारणात् भेदात् सुवर्णपिण्डं कुण्डलंकरोति इत्यादिप्रत्ययश्चास्यां कारणतायां प्रमाणमिति । बाह्यमन्यत्वकारणमुदाहृत्यान्तरमप्यन्यत्वकारणमुदाहरति । एवमेकस्येति । स्त्रीप्रत्ययस्य आकारपरिणतबुद्धिद्रव्यस्य वृत्त्याख्यस्यैकस्यैकजातीयस्य मूढत्वादिधर्माणामन्यत्वे भिन्नत्वे अविद्यादिचतुष्टयं कारणमित्यर्थः । तत्र मोहः कर्त्तव्याकर्त्तव्यशून्यता दुःखत्वसुखत्वे दुःखित्वसुखित्वे माध्यस्थं रागद्वेषमोहशून्यता । धृतिकारणमिति । शरीरमिन्द्रियाणाम् आश्रयविधया धारकं तानि चेन्द्रियाणि तस्य शरीरस्य योगक्षेमनिर्वाहकत्वेन धारकाणि । एवं

पृथिव्यादीनि महाभूतान्याधारतयैव शरीराणां धारकाणि । तानि च परस्परं सर्वेषामिति । तानि च महाभूतान्यन्योन्यं सर्वेषां सर्वाणि धारकाणि आकाशं वायोर्धारकं घनवात्या च छिद्राकाशस्य धारिका छिद्रस्य तत्तन्तस्वात् तदाश्रितत्वाच्च । एवं वायुस्तेजसो धारकः तेजश्चावरणादिरूपमहाभूतान्तर्वर्तिवायूनां धारकमित्यादिरूपेण व्याख्येयं । तथा तैर्यग्योनमानुषदैवतानि च शरीराणि परस्परं धारकाणि आश्रयाश्रयिभावाभावे ऽपि यज्ञकृष्यादिभिरन्योन्यमुपकारकत्वात् । 'देवान् भावयतानेन ते देवा भावयन्तु व' इत्यादिभ्य इत्यर्थः । अथैवं स्थितिकारणात् धृतिकारणस्य कथं भेद इति, उच्यते । कार्यानुप्रवेशाप्रवेशाभ्याम् अवान्तरभेदात् स्थितिहेतुर्हि पुरुषार्थाहारादिर्मतः शरीराद्यविभक्तः सन्नेव तानि स्थापयति धृतिहेतुश्च शरीरादिरिन्द्रियादीननुप्रविश्यैव तानि धारयतीति महान् विशेष इति । उपसंहरति । इत्येवमिति । यथायोग्यमेभिरेव कारणत्वैरविद्याकर्मजीवेश्वरादीनां सर्वकारणत्वप्रतिपादकाः श्रुतिस्मृतयो व्याख्येया इत्याशयवानाह । तानि च यथासंभवमिति । आधुनिकास्तु उत्पाद्यविकार्याप्यसंस्काररूपैश्चतुर्विधकार्यमाहुः । तैस्तु नवानामेव कार्याणां चतुर्धा विभागः कृत इति । प्रकृतमुपसंहरति । योगाङ्गेति । सूत्रान्तरमवतारयति । तत्रेति ।

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि ॥ २९ ॥

पूर्वपादोक्तान्यन्तरङ्गानि अभ्यासवैराग्यश्रद्धाप्राणायामादीन्यस्य पादस्यादावुक्तानि मध्यमसाधनानि तपःस्वाध्यायेश्वरप्रणिधानानि अत्यन्तबहिरङ्गैरनुक्तसाधनैः सह पिण्डीकृत्य योगज्ञानोभयसाधनतयात्रोच्यन्त इत्यपौनरुक्त्यम् । क्रियासाधननिरूपणं तु उत्तममध्यमाधमाधिकारभेदात् । तत्र वैराग्यस्य संतोषे प्रवेशः श्रद्धादीनां च तपआदिषु परिकर्मणां च धारणादिष्विति इति श्रवणमननयोश्च प्रमाणविधयैव ज्ञानहेतुत्वं साक्षादस्तीत्याशयेनाशुद्धिक्षयद्वारकेषु ज्ञानसाधनेषु न ते परिगणिता इति मन्तव्यम् । भाष्ये यथाक्रममेषामनुष्ठानमितिकर्तव्यमिति शेषः । अयं तूत्सर्ग एव

ईश्वरप्रसादाज्जितोत्तरभूमिकस्य नाधरभूमिषु विनियोग इति भाष्ये व्याख्यातत्वात् । अन्यथा बहिरङ्गान्तरङ्गविभागप्रतिपादनवैयर्थ्यापत्तेश्चेति । उत्तरसूत्रजातमवतारयति । स्वरूपं चेति । स्वरूपं च यथाक्रममेवातः परं वक्ष्याम इत्यर्थः ।

तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः ॥ ३० ॥

योगाङ्गभूतां महाव्रतामहिंसां लक्षयति । तत्राहिंसा सर्वथेति । शास्त्रविहितनित्यकर्माविरोधेनेति विशेषणीया शौचादिषु क्षुद्रजन्तुहिंसायाः अपरिहार्यत्वात् । अत एव योगिनां प्राणायामादिकं तत्पापक्षालनाय नित्यतया शास्त्रे विहितमिति । अहिंसाया अविरोधेनैवासत्यादयो यमनियमा अनुष्ठेया इति प्रतिपादनाय तस्याः श्रेष्ठत्वमाह । उत्तरे चेति । तन्मूला इति । सैव मूलं प्रयोजनं येषामिति विग्रहः । अतो हिंसासिद्धिपरतयैव शास्त्रेषु इतरयमनियमाः प्रतिपाद्यन्त इति तत्सिद्धिपरतयैवेत्यस्य विवरणम् । तत्प्रतिपादनायेति सत्यादिभिरहिंसा सिध्यतीति प्रतिपादनायेति तस्यार्थः । तथा तदवदातरूपकरणायाहिंसा निर्मलीकरणायैव योगिभिरुपादीयन्तेऽनुष्ठीयन्ते चेत्यर्थः । शौचतपआदाकरणे च नरकादिना हिंसाध्यन्तरीत्यनीति मन्तव्यम् । तथा चेत्यादि सुगमम् । तथा मोक्षधर्मेषूक्तं

यथा नागपदेऽन्यानि पदानि पदगामिनाम् ।
सर्वाण्येवापि धीयन्ते पदजातानि कौञ्जरे ॥
एवं सर्वमहिंसायां धर्मार्थमपि धीयते ।

इति । सत्यं लक्षयति । सत्यमिति । यथार्थत्वं व्याचष्टे । यथा दृष्टमिति । दर्शनादीनां प्रमात्वमपि विवक्षितं । भ्रान्तावपि वक्ष्यमाणत्वात् । अज्ञाननिमित्तकपापान्तरवत् । भ्रान्तिनिमित्तकासत्यस्यापि पापत्वौचित्यात् । मनश्चेति । मनश्च तथा तात्पर्ययुक्तमित्यर्थः । तेन यदा दृष्टादिविपरीतार्थबोधने तात्पर्यं तदा यथार्थो वाक्सत्यैव भवति यथाश्वत्थामा हत इति युधिष्ठिरवाक्यं, तत्र हि गजविषये वाक्यस्य सत्यत्वेऽपि मनसो न सत्यत्वं दृष्टविपरीतद्रोणपुत्रहनने तात्पर्यादिति । सत्यस्योदाहरणं सामान्यत आह । परत्रेत्यादिना इतीत्यन्तेन । इति-

यद्यात्मार्थं तदा सत्यमिति पूरणीयम् । स्वविनोदाय गीतावाक्यादीनां परप्रतिपत्तिवन्ध्यत्वादावपि नासत्यत्वमित्यतस्तद्व्यावर्त्तनार्थं परत्र स्वबोधसंक्रान्तये इत्युक्तम् । वञ्चिता विपरीतार्थबोधनेच्छया प्रयुक्ता भ्रान्ता भ्रमेण प्रयुक्ता प्रतिपत्तिवन्ध्या अप्रसिद्धपदादिभिर्न बोधजननक्षमेत्यर्थः । यथोक्तसत्यलक्षणे लोकहितत्वमपि विशेषणं देयमित्याह । एषेति । एषा वाक् प्रवृत्ता ब्रह्मणा निर्मिता । अतो यदि च एवमपि यथार्थापि अभिधीयमानोच्चार्यमाणेत्यादिरर्थः । सा च वाक् यथा दस्युभिः सार्थगमनं पृष्टस्य सार्थगमनाभिधानं इत्यादिरूपा पुण्याभासेन पुण्यवत्प्रतीयमानेन तत्र हेतुः पुण्यप्रतिरूपकेणेति पुण्यसदृशेनेत्यर्थः । कष्टं दुःखात्मकं तमो नरकमित्यर्थः । सत्यं यथार्थं ब्रूयादित्यर्थः । अत्र च असत्यनिवृत्तिमात्रं सत्यत्वेन विवक्षितं तस्यैव व्रतसंभवात् अन्यथा ऽसत्यस्य वचनेपि यमभङ्गाच्चेति । अस्तेयं लक्षयितुमभावस्य प्रतियोगिनिरूपणाधीननिरूपणत्वादादौ स्तेयं लक्षयति । स्तेयमिति । प्रतिग्रहव्यावर्त्तनायाशास्त्रपूर्वकमिति । तत्र चौर्येणापि स्वत्वं जायत इत्यवगम्यते । ग्रहणं स्वीकरणं ममेतिबुद्धिमात्रं भ्रमसाधारणमिति तत्प्रतिषेधस्तन्निवृत्तिस्तथाप्यस्पृहामुपलक्षयित्वाह । अस्पृहारूपमिति । ब्रह्मचर्यं लक्षयति । गुप्तेति । गुप्तेन्द्रियस्येति स्वोक्तस्य विवरणमुपस्थस्येति । संयम इत्यत्रोपसर्गेणान्येन्द्रियसाहित्यमुपस्थस्य ग्राह्यं तेनोपस्थस्य विषये सर्वेन्द्रियव्यापारोपरम इति लक्षणम् । तथा चोक्तं दक्षसंहितायाम् ।

ब्रह्मचर्यं सदा रक्षेदष्टधा लक्षणं पृथक् ।
स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणं ॥
संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ।
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ॥

इति । प्रकृष्टमीक्षणं प्रेक्षणं रागपूर्वकं दर्शनमित्यर्थः । अपरिग्रहं लक्षयति । विषयाणामिति । परिग्रहे हिंसादयो अपि दोषास्तेषां दर्शनादिति विशेषणम् । अशक्त्यादिनिमित्तकास्वीकरणेऽतिव्याप्तिनिरासायेति ।

हिंसा चौर्यदारप्रभृतीनां बोध्या उक्तानां यमानां विशेषप्रतिपादकं सूत्रं पूरयित्वा पठति । तेत्त्विति ।

जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम् ॥ ३१ ॥

समयः संकेतो वक्ष्यमाणनियमविशेष इति यावत् । जात्यादिभिश्चतुर्भिरनवच्छिन्नास्ते यमाः सार्वभौमाः सर्वास्ववस्थासु अनुगताः अतो महाव्रतमिति संज्ञिता इत्यर्थः । अन्वर्थसंज्ञायाः फलं च प्रकृष्टयोगिभिरेवमनुष्ठानमिति । मुख्यमहिंसाख्ययममाश्रित्य जात्यवच्छिन्नादीन् व्याचष्टे । तत्राहिंसेति । जातिर्मत्स्यत्वादिः तया परम्परया अविच्छिन्ना मत्स्याद्यतिरिक्तस्याहिंसेत्यर्थः । एवमुत्तरास्वपि परम्परयैवावच्छिन्नत्वं बोध्यं । सैवदेशेति । सैवाहिंसैव एवमुत्तरयोरपि । त्रिभिरुपरतस्येति । साङ्कर्यनिरासायोक्तं । त्रिभिर्जात्याद्यवच्छेदैः परम्परया शून्यस्य पुरुषस्येत्यर्थः । समयावच्छिन्नस्योदाहरणद्वयमाह । देवेति । यथाचेति । यथाचेत्यर्थः । अहिंसाया इवान्येषामपि यमानां जात्याद्यवच्छिन्नत्वमूहनीयमित्याशयः । सूत्रतात्पर्यार्थमाह । एभिरिति । सर्वाभौमशब्दस्यार्थमाह । सर्वभूमिष्विति । सर्वभूमिष्वित्यस्य विवरणं सर्वविषयेष्विति । विषया जात्यादयो यथोक्ताः अस्यापि विवरणं सर्वथैवेत्यादि । ननु कुशसमिदाहरणादिवैधहिंसानामपि परित्यागे नित्यकर्मबाधेन प्रत्यवायापत्तिरिति, मैवम् ।

सर्वाणि भूतानि सुखे रमन्ते सर्वाणि दुःखेषु तथोद्विजन्ति ।
तेषां भयोत्पादनजातखेदः कुर्याच्च कर्माणि हि जातवेदः ॥

इति मोक्षधर्मादिवाक्यैर्जातवेदस्योत्पन्नात्मज्ञानस्य योगिनः काहणिकस्य बाह्यकर्मत्यागानुज्ञया ऽयोगिनामेव बाह्यकर्माकरणे प्रत्यवायात् योगरूपस्यैव नित्यकर्मणो मन्वादिभिर्विहितत्वाच्च । यथा मनौ ।

एतानेके महायज्ञान् यज्ञशास्त्रविदो जनाः ।
अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति ॥

इति । अत एव वसिष्ठेन बाह्याभ्यन्तरकर्मणोर्विकल्प उक्तः ।

बाह्यमाभ्यन्तरं चेति द्विविधं कर्म वैदिकम् ।
तयोरन्यतरत् कुर्यान्नित्यं कर्म यथाविधि ॥

इति। तयोश्चाभ्यन्तरं कर्म हिंसाद्यभावात् ऐकाग्र्यरूपत्वाच्च श्रेष्ठं गीतादिषूक्तम् 'श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतपे'त्यादिना। भाष्यकारस्तु वैधहिंसाया अपि पापहेतुत्वमग्रे प्रतिपादयिष्यति 'शौचादिषु चापरिहार्या हिंसा चाश्रमविहिता वे'ति न तया व्रतलोपः स्वाश्रमधर्माविरोधित्वेन विशेषितत्वादिति ॥

(शेषमग्रे)

काशीस्वराजकीयप्रधानपाठशालायां { सांख्ययोगाध्यापकस्तात्याशास्त्र्यपरनामा पटवर्धनोपाह्वो रामकृष्णशास्त्री । ज्योतिषशास्त्राध्यापकः केशवशास्त्री च ।

कैवल्यरत्नम् ।

(*Continued from page* 64. Vol. VI.)

दृष्ट्वा भूमौ प्रणम्येशं त्रिः कृत्वा तु प्रदक्षिणम् ।
लौकिकैर्वैदिकैस्तोत्रैः स्तुत्वा भक्तिवशाद् द्विजाः ॥
दिनमेकमुपोष्यास्यां स्वाचान्ताः सुसमाहिताः ।
दत्त्वा हि स्वर्णं गां भूमिं फलं मूलं च शक्तितः ॥
श्रीकालहस्तिनाथाय विदुषे ब्राह्मणाय च ।
इह जन्मकृतात्पापाद्विमुक्ताः परमर्षयः ॥
पुनः स्वाश्रममागत्य वसिष्ठमुनिपुङ्गवाः ।
शैलं लिङ्गं समादाय स्वदारैः स्वसुतैः सह ॥
श्रीमत्पञ्चाक्षरेणैव सलारेण समाहिताः ।
पूजयामासुरीशानं कृत्वा पाशुपतं व्रतम् ॥
एवं चिरगते काले तेषां रक्षार्थमादरात् ।
भस्मोद्धूलितसर्वाङ्गस्त्रिपुण्ड्राङ्कितमस्तकः ॥

उमया सहित: शक्त्या मुने विद्यास्वरूपया ।
नग्नो नृत्तक्रियश्चाहं प्रहसंश्च क्व चित् क्व चित् ॥
स्वच्छन्दवृत्तिर्भिक्षार्थं देवदारुवनं गत: ।
मां भिक्षमाणं मुनयश्च दृष्ट्वा स्मृत्वा सरोजासनवाक्यमीश: ।
समागतो ऽयं करुणानिधानमिति ब्रुवन्तो मुनय: प्रणम्य ॥
भक्त्या ममाङ्घ्रिं भवनाशहेतुं समस्तदेवासुरमौलिपुष्पम् ।
प्रगृह्य हस्तैरवशा मुनीन्द्रा: सपुत्रदारा: सलिलार्द्रनेत्रा: ॥
क्षमस्व देवेश कृपालयानिशं कृतं तवास्माभिरनिष्टमातुरै: ।
भवार्णवे मग्नजनाननेकानतीव कष्टाननुगृह्य मोहितान् ॥
इति द्विजेन्द्रा: सह बन्धुबान्धवै: सदारपुत्रैश्च मुनीश्वरेश्वरा: ।
प्रकल्प्य पूजां महतीं प्रचक्रिरे स्वमूर्ध्नि विन्यस्य ममाङ्घ्रिमादरात् ॥
ततो ऽहमास्थाय निजं वपुर्मुने त्रिलोचनं साम्बमवोचमञ्जसा ।
विशुद्धविज्ञानमनन्तमुक्तिदं मुनिभ्य आम्नायवचोभिरादरात् ॥
अणोरणीयानहमेव संततं महानहं विश्वमहं मुनीश्वरा: ।
पुरातनो ऽहं शिव एव केवल: अपाणिपादो ऽहमचक्षुरादिमान् ।
तथापि पश्यामि शृणोमि सुव्रता अहं विजानामि समस्तमात्मना ।
नचास्ति वेत्ता निजबोधरूपतो वेदैरशेषैरहमेव वेद्य: ॥
वेदान्तकृद्वेदविदेव चाहम् न पुण्यपापे मम जन्मनाशौ ।
न देहयुग्मं न च बुद्धिरस्ति न चास्ति वर्णाश्रमता शरीरत: ।
न कर्तृता कर्मफलेषु भोक्तृता न मे सदा कारयितृत्वकल्पना ।
न चास्ति शब्दादि जगन्मये मयि न चास्ति माया मम वेदवित्तमा: ।
स्वयंप्रभ: सर्वजगद्विभासक: असङ्गरूपो ऽहमतीव निश्चित: ।
सुखैकविज्ञानघन: स्वभावत: यथैव दण्डादिषु सर्पकल्पना ।

यथैव शुक्तौ रजतादिकल्पना तथैव मय्यर्पितमात्ममायया ।
समस्तदृश्यं जगदागमेरितम् देहात्मबोधेन समस्तजन्तवः ॥
कुर्वन्ति कर्माणि फलाभिलाषिणः न मे शरीरात्ममतिः स्वभावतः ।
ततो न कर्तव्यमिहास्ति किं च न एको ऽहमाद्यं प्रथमं मुनीन्द्राः ॥
वर्तामि पश्चादपि संभवामि मत्तो न मत्तः पृथगस्ति किं चित् ।
विचार्यमाणे ऽप्यविचार्यमाणे न मे ऽस्ति पूर्वं न परं न चान्तरम् ॥
न बाह्यमप्येव सदा मुनीश्वराः यथा च सिंधुर्हि घनो रसात्मकः ।
तथैव विज्ञानघनो ऽहमास्तिकाः न संति संकल्पविकल्पबुद्धयः ॥
न च प्रमाता प्रमितिः प्रमाणं प्रमेयजातं च सदा विचारतः ।
पृथङ्मतः सुखभूमलक्षणान् न चास्ति हेयं परमार्थतः सदा ॥
तथैव चादेयमपि द्विजोत्तमाः अतो न साध्यं परमात्मतो ऽस्ति मे ।
न साधनं चाविदुषामिव द्विजाः * * *
युष्माकमाहात्म्यमतो ह साक्षी मत्तो न यूयं पृथगागमज्ञाः ॥
तथापि भेदो जलपात्रभेदाद्दिवाकरस्येव शरीरभेदात् ।
नजायते म्रियते चापि नात्मा नायं भूत्वा भविता नापि भूयः ।
अजो नित्यः शाश्वतो ऽयं पुराणः स्वभावतो विमते ब्रह्मभूतः ॥
एवं विजानन्ति न मां पृथग्जनास्तथापि तेषामहमात्मरूपः ।
पुरा विजानन्ति विशुद्धबुद्धयः स्वरूपमाम्नायवचोभिरेव माम् ॥
मुनीश्वराः कर्म विहाय मोक्षदं विशुद्धविज्ञानमवाप्य वाक्यजम् ।
विहाय सर्वात्मकल्पनामिमां शरीरमात्मात्मतया विचिन्त्यताम् ॥
सुखेन वर्तध्वमविद्यया गतं मनुष्यभावं च विहाय देहजम् ।
विहाय संकल्पविकल्पवासनामनुक्रमेणाहमथो महास्तिकाः ॥
सुषुप्त्यवस्था सुखबोधवस्तुनि प्रकल्पिता स्वप्नवदात्मनि द्विजाः ।
तथैव जाग्रत्स्वकमायया गतं ततो विहाय त्रितयं सदामृतम् ॥

Digitized by Google

तुरीयरूपं चितयावभासकं सदा विभातं स्वयमेव मायया ।
अनावृतं वेदविधिं पुरातनं महानुभावैरनुभूयतामिह ॥
क्रियमाणानि कर्माणि ज्ञानप्राप्तेरनन्तरम् ।
न संस्पृशन्ति विद्वांसं पद्मपत्रं यथा जलम् ॥
कर्तारं कर्म बध्नाति कर्तृत्वं विबुधे न च ।
तथापि भाति कर्तृत्वं विदुषो दग्धवस्त्रवत् ॥
एतावता न संबन्धकर्तृत्वं विदुषो भवेत् ।
कर्तृत्वस्य विनष्टत्वान्मुख्यास्याज्ञानहानतः ॥
प्रारब्धकर्म्मणां भोगात् क्षयो न ज्ञानवह्निना ।
विदुषोऽविदुषश्चापि द्विजा एवं श्रुतिस्मृतिः ॥
अनारब्धानि कर्माणि ज्ञानिनो ज्ञानमात्रतः ।
प्रदूयन्ते यथा वन्हौ प्रोततूलं प्रदूयते ॥
अज्ञानाम्भोनिधौ विप्राः निमग्नानां शरीरिणाम् ।
वर्णित्वमाश्रमित्वं च स्वभावादनुवर्त्तते ॥
पुनर्नियोज्यः पुरुषः स्वाध्यायस्य भविष्यति ।
पुनः करोति कर्माणि विवशः पुरमाश्रितः ॥
तेषां फलोपभोगाय म्रियते जायते ऽपि च ।
एवमेव पुनर्विप्राश्चक्रवद् भ्राम्यते जनः ॥
कर्मणामुपभोगेन प्रायश्चित्तेन वा क्षयः ।
ज्ञानन्त्याच्च तथा ज्ञानात् क्षयो नास्त्येह कर्म्मणाम् ॥
अवश्यमनुभोक्तव्यं कृतं कर्मशुभाशुभम् ।
नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि ॥
तस्मान्न कर्मणा मुक्तिर्विना ज्ञानेन सुव्रताः ।
ज्ञानादज्ञानविच्छित्तिर्लोके विद्वा श्रुतावपि ॥

भवन्तः केवलं धर्मं समाश्रित्य विमुक्तये ।
विहाय सांख्यवेदान्तमचिरादेव मुक्तिदम् ॥
अज्ञानाद्भ्रान्त्यथाज्ञानात्कुर्वन्ति सुपरिश्रमम् ।
तस्मादहं मुनिश्रेष्ठाः कृपयैवानया सह ॥
आगतो भवतां देशं भिक्षमाणच्छलेन तु ।
सर्ववेदान्तसर्वस्वं समादाय मुनीश्वराः ॥
युष्मभ्यं कृपया दत्तं मया ज्ञानं विमुक्तिदम् ।
जन्मान्तरसहस्रेषु यज्ञदानादिभिर्द्विजाः ॥
नराणां क्षीणपापानां श्रद्धा मोक्षे प्रजायते ।
यज्ञास्तपांसि दानानि तीर्थसेवा जपो व्रतम् ॥
सर्वं लिङ्गार्चनाद्धीनं फलाय न भवेद् द्विजाः ।
सर्वेषामेव धर्माणां मल्लिङ्गाराधनं परम् ॥
भवद्भिर्नार्चितं लिङ्गं चिरकालमिह द्विजाः ।
तस्मान्मोहो महाञ्जातो युष्माकं मुनयः पुरा ॥
ब्रह्मणो वचनाल्लिङ्गे भवद्भिरहमर्चितः ।
श्रीकालहस्तिनाथो ऽपि दृष्टो युष्माभिरादरात् ॥
तेन पापानि दग्धानि युष्माकं सकलानि च ।
ज्ञानं च वाक्यजं लब्धं भवद्भिः करबिल्ववत् ॥
नास्तिकानां मनुष्याणामज्ञानान्धीकृतात्मनाम् ।
ज्ञानं न रोचते किं चिद्द्वेष एव हि जायते ॥
तस्माद्भवद्भिर्मुनिभिः परीक्ष्य भुवि मानवान् ।
दातव्यं ब्रह्मविज्ञानं इदमाम्नायवाक्यजम् ॥
आम्नायवाक्यजं ज्ञानं ज्ञानमित्युच्यते मया ।
अज्ञानमितरद्विप्राः फलत्से मुक्तिसिद्धये ॥

स्थापयध्वमिमं मार्गं वैदिकं मुनिपुङ्गवाः ।
अन्यथा नोपकाराय भवेज्ज्ञानं ममाज्ञया ॥
अवैदिकानि शास्त्राणि मयैव विहितानि तु ।
मूर्त्यन्तरं समास्थाय मोहनाय द्विजोत्तमाः ॥
महापापवतां नृणां तेषु वाञ्छा विजायते ।
नास्ति तेषां गतिर्विप्राः कल्पकोटिशतैरपि ॥
ततः समस्तैर्युष्माभिर्मार्गोऽयं वैदिकः परः ।
स्थापनीयः सदा भक्त्या हिताय जगतां द्विजाः ॥
इत्येवमुक्ता मुनयः स्वमूर्ध्नि महानिदेशेन ममाङ्घ्रियुग्मम् ।
नत्वा निधायापि समाहितेन चित्तेन मामात्मतयानुभूय ॥
विद्याबलेनैव मम प्रसादात् भद्रं च वेदान्तविचारमार्गम् ।
त्यक्ताभिमाना भुवि सुस्थिरं सदा चक्रुर्हितायाखिलचेतनानाम् ॥
एवं ब्रह्मन्मुनिश्रेष्ठैस्स्थापिते वैदिके विधौ ।
श्रीकालहस्तिशैलाख्यमहं स्थानं गतो मुने ॥
केषांचिन्मुनिपुत्राणां मुनीनां भावितात्मनाम् ।
यथा मयोदितं ज्ञानं श्रुतमप्येभिरा न तत् ॥
ते पुनर्दुःखिताः पुत्राः समालोक्य परस्परम् ।
श्रीकालहस्तिशैलाख्यं गत्वा भक्त्या समाहिताः ॥
सुवर्णमुखरीस्नानं माघमासि मघादिने ।
कृत्वा प्रदक्षिणीकृत्य प्रणम्य परमेश्वरम् ॥
पञ्चाक्षरेण मन्त्रेण भक्त्या संपूज्य नित्यशः ।
वत्सरान्ते पुनस्तस्या नद्याः स्नानं प्रचक्रिरे ॥
श्रीकालहस्तिनाथोऽहं तेषामिष्टप्रसिद्धये ।
उमया मम पुत्राभ्यां नन्दिना च वृषेण च ॥

विष्णुना च विरञ्चेन देवराजेन सुव्रत ।
मद्भक्तैरखिलैः सार्धं नद्यामस्यां मघादिने ॥
पर्वस्पृष्टे मुने माघे मासि स्नातोऽस्मि वै पुनः ।
निवृत्तपापा मद्रूपं परमं परमर्षयः ।
ज्ञातवन्तः पुरा मत्तः श्रुतं स्मृत्वा परोक्षतः ।
पुनस्ते मुनयस्तस्मिन्देशे वेदविदां वर ॥
ज्ञात्वा देशस्य माहात्म्यं प्राश्नन्तानमृषयः ।
एवं विशिष्टदेशेऽस्मिन्यथावत्ति ददाति यः ।
स्वर्णं धान्यमथान्यद्वा स रुद्रो नात्र संशयः ॥
अयं देशो ममाभीष्टो ह्येष्यश्च मुनिसत्तम ।
समन्ताद्योजनं ब्रह्मन्परिरक्षामि सर्वदा ।
अस्मिन्देशे मनुष्याणां मृतानां मुनिसत्तम ।
न भूयो जन्म लोकेऽस्मिन्सत्यं सत्यं न चान्यथा ॥
देशस्यास्य मुनिश्रेष्ठ मनसा वाप्युपद्रवम् ।
उत्पादयन्ति ये मर्त्यास्तेषां पापफलं शृणु ।
रौरवादिषु सर्वेषु क्रमेण मुनिसत्तम ॥
नरकेषु महादुःखमनुभूयानुभूय च ।
कल्पकोटिशतं तेन नराः पापफलेन तु ॥
पैशाचं रूपमास्थाय वर्षाणामयुतं पुनः ।
भूयो विष्ठासु जायन्ते क्रिमिरूपेण दुःखिताः ॥
ये पुनर्मानुषा ब्रह्मन् देशस्यास्यैव रक्षकाः ।
ते पुनर्मरणादूर्ध्वं विमानं हेममद्भुतम् ॥
आरुह्य पुष्पमिश्राद्यैः सह प्रीतास्तपोधनम् ।
इन्द्रलोके चिरं भुक्त्वा प्राजापत्येव सुव्रत ॥

Digitized by Google

विष्णुलोके पुनः साधाक्षिवलोके मया सह ।
सर्वान् भोगान्मुने भुक्त्वा याशिष्णुपदं पुनः ॥
मत्प्रसादाच्च विज्ञानं लब्ध्वा मुक्ता भवन्ति हि ।
अनेन सदृशो देशो नास्ति लोकत्रयेष्वपि ॥
तस्माद्देशमिमं धामात् रचयेच्छ्रद्धया सह ।
इत्येतदुक्तं परमं रहस्यं वसिष्ठवेदान्तमहानिधानम् ॥
श्रद्धाविहीनाय न देयमेतद्भक्ताय देयं भवनाशनाय ।
य इमं पठते ध्यायं शृणुयाद्वा दिने दिने ।
सर्वपापविनिर्मुक्तः सम्यग् ज्ञानं स गच्छति ॥
इत्युपपुराणे वासिष्ठलैङ्गे दशमोऽध्यायः ।
ईश्वरउवाच ॥
पुरा ब्रह्मा जगत् सृष्ट्वा चिरकालं स्वमायया ।
रमयामास विश्वात्मा कामबाणेन पीडितः ॥
तस्यां तेन समुत्पन्नं पुत्राणामयुतत्रयम् ।
ते पुनः सूनवः कामात्प्रसूतास्त्रीकुलं मुने ॥
दूषयामासुरत्यर्थं तेभ्यो जातास्तु राक्षसाः ।
राक्षसैश्च जगत्सर्वं पीडितं क्रोधमूर्च्छितैः ॥
ततः संभूय देवाश्च मुनयः संशितव्रताः ।
ब्रह्माणं भार्यया सार्द्धं क्रीडमानं समागताः ॥
प्रणम्य दण्डवद्भूमौ कृत्वा शिरसि चाञ्जलिम् ।
स्तोत्रैः प्रबोधयामासुः सुप्तं विष्णुमिवोद्धवे ॥
भगवन् भूतभव्येश भवसंसारतारक ।
नमस्तुभ्यं जगन्नाथ नमः कमलसंभव ॥

(शेषमये)

Digitized by Google

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 24. Vol. VI.)

चप सान्त्वने ॥ चपति । चचाप । चेपतुः । चपितेत्यादि जपिवत् । चपो वृव इति मैत्रेयः । वेणुविशेष इति दण्डनाथः । तस्य विकारः । चापम् । 'तालादिभ्यो ऽण्' इति विकारावयवयोरण् ॥ ३९४ ॥

षप समवाये ॥ समवायः संबन्धः सम्यगवबोधो वा । सपतीत्यादि जपिवत् । सिसपिषति । स्तौतिण्योरेवेति षत्वम् । सापयति । असीषपत् । सप्तिः । 'क्तिच्क्तौ च संज्ञाया'मिति क्तिच् । सप्त । सप्यशूभ्यां तुट् चेति कनिन्प्रत्ययः तुडागमश्च । पञ्चशब्दवत् षट्संज्ञा तत्कार्यं च, सप्तानामपत्यं साप्तिः 'बह्वादिभ्यश्चे'तीञि 'नस्तद्धिते' इति टिलोपः । अत्र शाकटायनः क्षीरस्वामी सर्पति चाहुरित्युक्त्वा सचति सचिव इत्यप्याह ॥ ३९५ ॥

रप लप व्यक्तायां वाचि ॥ रपति । लपतीत्यादि जपिवत् । विलापयति पुत्रमित्यत्र जल्पत्यादित्वात्प्रयोज्यस्य कर्मत्वम् । अलीलपत् । अललापत् । काण्यादित्वाद् उपधाह्रस्वविकल्पः । राप्यः । लाप्यः । आसुयुवपिरपिलपित्रपीति ण्यत् । यतोऽपवादः । अत एव जपतिना समानार्थत्वेपि पृथङ्निर्देशः । रिपुः । 'रपेरिच्चोपधाया' इति उप्रत्यय उपधाया इकारः ॥३९७॥

चुप मन्दायां गतौ ॥ चोपयति । चुचोप । चोपिता । चुचुपिषति । चुचोपिषति । चुपित्वा । चोपित्वा । रलो व्युपधादिति कित्त्वविकल्पः । चोचुप्यते । चोचुपीति । चोचोप्ति । चोपयति । अचूचुपत् । चोपनः । चलनार्थत्वाद् युच् । णौ नित्यं परस्मैपदम् । गले चोप्यते गलेचोपकः । 'कृत्यल्युटो बहुल'मिति बहुलवचनाद् ण्यन्तादस्मात्कर्मणि ण्वुल् । 'कर्तृकरणे कृता बहुल'मिति बहुलवचनात् सप्तम्यन्तस्यापि समासः । 'तत्पुरुषे कृति बहुल'मिति अलुक् 'अमूर्द्धमस्तकात्स्वाङ्गादकामे' इति वा उदुपधाद्भावादिकर्मणोर्निष्ठायां वा कित्त्वे चुपितमनेन । चोपितमनेनेत्यादि । चुप्रम् । ऋज्रेन्द्रादौ रकि निपातितः स्वरेणान्तोदात्तः । शपिच्छुपिक्षिपीत्यनि-

टकारिकापाठो द्वितीयश्चेदिति तत्र तौदादिकस्य तुप संस्पर्शनस्यैव ग्रहणं न स्वस्य ॥ ४१८ ॥

तुप तुम्प त्रुप त्रुम्प तुफ तुम्फ त्रुफ त्रुम्फ हिंसार्थाः ॥ तोपतीत्यादि त्रुपिवत्। तुम्पति। तुतुम्पतुः। संयोगान्तत्वाल्लिटो न कित्त्वम्। तुम्पिता। तुम्पिष्यति। तुम्पतु। अतुम्पत्। तुप्यात्। 'किदाशिषी'ति कित्त्वादनिदितामिति नलोपः। अतुम्पीत्। अतुम्पिष्यत्। तुतुम्पिषति। तोतुप्यते। तोतुम्पीति। तोतुम्प्ति। तोतुप्तः। तुम्पयति। अतुतुम्पत्। प्रस्तुम्पति गौः। प्रास्तुम्पत्। गवि कर्त्तरीति सुट्। तुम्पतेस्तुम्पताविति धातुनिर्देशो न तिङन्तानुकरणमिति प्रस्तुम्पः प्रस्तुम्पक इत्यादावपि भवति, प्रतोतुम्पीतीत्यादावत एव श्तिपा निर्देशाच्च भवति। त्रोपति। त्रुम्पति। तोफति, तुम्फति। त्रोफति। त्रुम्फतीत्यादि तुपितुम्फिवत्। तत्रारेफसरेफयोः सानुषङ्गपद्वितीयान्तयोः सेट्त्वाद् 'नोपधात्थफान्ताद्वे'ति कित्त्वविकल्पनात् पक्षे नलोपे त्रुपित्वा। त्रुम्पित्वा। त्रुफित्वा। त्रुम्फित्वा इति भवति। अरेफाणां त्वारस्तुदादावपि। आद्यस्तु चुरादावपि। तत्र स्वर्दनमर्थः ॥ ४१९ ॥

पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ ॥ आद्यः प्रथमान्तः। परौ द्वावपि द्वितीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रेफोपधाः। पर्पति। पपर्प। पर्पितेत्यादि। पर्प्यतेऽनेनेति पर्पः, येन पीठेन पङ्गवश्चरन्ति स उच्यते। हलश्चेति घञ्। पर्पेण चरति, पर्पिकः। 'पर्पादिभ्यष्ठनि'ति तृतीयान्ताच्चरत्यर्थे ष्ठन्। षित्त्वात् स्त्रियां पर्पिकी। रफति। अर्बति। आनर्ब। अर्बिता। पर्बति। लर्बति। बर्बति। मर्बति। कर्बति। खर्बति। गर्बति। शर्बति। सर्बति। असिषर्बत्। चर्बति। अर्बादयो नोपधा इति कौशिकः ॥ ४२० ॥

कुबि आच्छादने ॥ कुम्बतीत्यादि। कुम्बा। गुरुमत्त्वादकारः। 'चिन्तिपूजिकथिकुम्बिचर्चश्चे'त्यङ्विधौ चौरादिकस्य ग्रहणम् ॥ ४२१ ॥

लुबि तुबि अर्दने। लुम्बति। तुम्बतीत्यादि। तुम्बी अलाबूः। चौरादित्वान् ङीष् ॥ ४२२ ॥

चुबि वक्त्रसंयोगे ॥ चुम्बतीत्यादि । लुम्ब्यादयस्त्रयश्चुरादौ ॥ ४२४ ॥

षृभु षृम्भु हिंसार्थौ । अत्र मैत्रेय एवं पठित्वा षिभु षिम्भु इत्येकदेति [illegible]कारस्य स्थाने इकारमप्याह । तरङ्गिण्यां तु ऋकारवन्तौ दन्त्यादौ पठित्वा षोपदेशपर्युदासे सृग्रहणेनानर्थकस्यापि ग्रहणमित्युक्तम् । सर्भति । [illegible] । सर्भिष्यतीत्यादि । सिसर्भिषति । मैत्रेयपाठे [illegible] । [illegible]सृम्भ्यते । सरीसृभीति । सरिसृभीति । [illegible]भीति । सरीसृब्धि । सरिसृब्धि । सर्सृब्धि । सम्भति । असृम्भत् । असीसृभत् । सर्भिता । सिसर्भिषति । तरङ्गिणीमते तु षत्वं न भवति । सर्भित्वा । सृब्ध्वा । उदित्त्वादिड्विकल्पः । सृब्धः । 'यस्य विभाषे'त्यनिट्त्वम् । सृम्भम् । [illegible] सृम्भति । ससृम्भ । सृम्भ्यात् । ससृम्भतुः । [illegible]लोपः क्ङितोः । इकारवत्पाठपक्षे सेभति । सिम्भतीत्यादि ॥ ४२६ ॥

शुभ शुम्भ भाषणे ॥ हिंसायां तु [illegible] पठन्ति । स्वामी तु निरनुषङ्गेन पपाठ । इदमेवार्थमस्यापि मतम् तुदादौ । शोभति । शुम्भतीत्यादि, [illegible] शुम्भतिवत् । [illegible] । [illegible] कः । शुभम् । [illegible] इक् । इमौ [illegible] तुदादौ । निरनुषङ्गस्य[illegible] । [illegible] [illegible] शोभतीति [illegible] । दुर्गस्तु भाषण[illegible]मित्यर्थमाह । एवं धनपालशाकटायनौ । गुप्तस्तु [illegible]शुम्भ[illegible]मित्यर्थमाह ॥ ४२८ ॥

[illegible]नुनासिकान्ताः ॥ घिणि घुणि घृणि ग्रहणे । एतदादयः [illegible] [illegible] अनुदात्तेतः । घिण्णते । जिघिण्णे । घिण्णिता । घिण्णिष्यते । घि[illegible] । [illegible] । घिण्णेत । [illegible] घिण्णिषीष्ट । [illegible] । [illegible] । जिघिण्णिषते । जेघिण्ण्यते । जेघिण्णीति । जेघिण्ठ । [illegible] । [illegible] । [illegible] । [illegible] । घिण्णित्वा । [illegible] नुमि ष्टुत्वम् । [illegible] संयोगान्तलोपस्यासिद्धत्वात् नकारान्त [illegible] । घुण्ण्यते । घुण्ण्यते । जुघुण्णे इत्यादि । [illegible] । [illegible] इति [illegible] । [illegible]ति । [illegible]ति इत्यादि । [illegible] इत्यत्र संयोगान्तलोपस्यासिद्धत्वा[illegible] [illegible], [illegible] न ॥ ४३१ ॥

घुण घूर्ण भ्रमणे ॥ घोणते । जुघुणे । घोणिता । जुघुणिषते । जुघोणिषते । घुणित्वा । घोणित्वा । रलो व्युपधादिति कित्त्वविकल्पः । जेघुण्यते । जोघुणीति । जोघुण्टि । जोघूण्ट इत्यादावनुनासिकान्तत्वात् 'अनुनासिकस्य क्विझलोः क्ङिती'ति दीर्घ उपधायाः । भ्रमिति भ्रमितेर्विशेषणम् । घोणयति । अजूघुणत् । उदुपधाद्भावादिकर्मणोः घुणितमनेनेत्यादि । घोणा । क्रोडादिनिपातनाद्यचि टाप् । कल्याणघोणा । अत्र 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधादि'ति उपसर्जनसंयोगोपधस्वाङ्गान्ताद्बहुव्रीहेर्वा ङीषिति प्राप्तस्य ङीषः 'न क्रोडादिबह्वचः' इति निषेधः । अयं ङीष् क्रोडाद्यन्ताद्बह्वजन्ताच्च नेत्यर्थः । घूर्णत इत्यादि । यङ्लुकि लुङि अजोघूर्ण् । रात्सस्येति नियमात् संयोगान्तलोपाभावः । इमौ तुदादौ परस्मैपदिनौ ॥ ४३३ ॥

पण व्यवहारे स्तुतौ च ॥ ४३४ ॥

पन च ॥ पूर्वार्द्धदेशात् स्तुतावित्यनेनैवायं संबध्यते । शतस्य पणते । शतं पणते । 'व्यवहृपणोः समर्थयो'रिति कर्मणि शेषे षष्ठी । अन्यदा द्वितीयैव । समर्थयोरिति समानार्थयोरित्यर्थः, शकन्ध्वादित्वात् समशब्दाकारस्य पररूपम् । द्यूते क्रयविक्रयव्यवहारे च समानार्थत्वमनयोः । पेणे । पणिता । पणिष्यते । पणताम् । अपणत । पणिषीष्ट । अपणिष्ट । अपणिष्यत । पिपणिषते । पम्पण्यते । 'नुगतोनुनासिकान्तस्ये'ति नुक् । पम्पणीति । पम्पण्टि । पम्पाण्टः । अनुनासिकस्य क्विझलोरिति दीर्घः । अपम्पन् । पाणयति । अपीपणत् । पण्यम् । 'अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेष्वि'ति पणितव्ये व्यवहर्तव्ये निपातितः । अन्यत्र पण्यति पाण्यम् । मूलकपणः । शाकपणः । यः संव्यवहाराय मूलकादीनां परिमितो मुष्टिर्बध्यते स उच्यते । 'नित्यं पणः परिमाणे' इति परिमाणे गम्यमाने अप् प्रत्ययः । अन्यत्र पाणः । व्यावहारिकोप्युन्मानलक्षणपरिमाणयोगात् पण इत्युच्यते स पणः चेद्विवादः स्यादित्यादौ, इदं दास्यामीति पणनमस्य परिच्छेदनात् पणोक्तिः । अध्यर्द्धपण्यम् । द्विपण्यम् । पणपादमाषशतादिति अध्यर्द्धपूर्वात् प्रातिपदिकात् पणाद्यन्ताद् द्विगोश्चार्हीयेष्वर्थेषु यत् । एत्यात्र आपणात इत्यापणः । 'गोचरसंचरवहव्रजव्यजापणनिग

मास्त्वे'त्यधिकरणे घान्तो निपातितः । पणितम् । क्विपि पाण् । अनुनासिक-
स्येति दीर्घः । वणिक् । पणेरिज्यादेश्च व इति इजिप्रत्ययः पकारस्य च
वकारः । वणिजो भावो वाणिज्यम् । 'दूतवणिग्भ्यां चे'ति यत् । यद्यप्ययं
भावकर्माधिकारे तथापि स्वभावाद्भाव एव स्त्रियां च । वाणिज्यमिति
'ब्राह्मणादिभ्यश्चे'त्यनन्तात् वाणिजशब्दात् 'गुणवचनब्राह्मणादिभ्यः कर्म-
णि चे'ति ब्राह्मणादेराकृतिगणत्वात् ष्यञ् । कर्मणि चेति चकारेण भावः
समुच्चीयते । विविधमत्र पणन्त इति विपणिः । इनितीन् । पणसम् ।
फलपर्यायः । अत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहि-
भ्योऽसजित्यसच् । गुपूधूपेत्यायो व्यवहारार्थस्य नेत्युक्तान्युदाहरणानि तद्विष-
याणि । तथा च वृत्तिः स्तुत्यर्थेन पनिना साहचर्यात्तदर्थः पणिः प्रत्यय-
मुत्पादयतीति । एवं न्यासपदमञ्जर्यादिष्वपि । अत एव तरङ्गिण्यामपि ।
न चोपलेभे वणिजां पणायाः इति प्रयुञ्जानो भट्टिर्भ्रान्त इत्युक्तम् । पणा-
यति राजानम् । पणायां चकार । पणायितेत्यादि । आर्द्धधातुकविवक्षाया-
मायानुत्पत्तौ उक्तान्येवोदाहरणानि । गुप्यादिवदायोत्पत्तिविकल्पस्य प्रयो-
जनं पणत इत्यादिसिद्धिः । पणां चकारेत्यादिनिवृत्तिश्च । निवृत्तिविकल्पे हि
प्रत्ययलक्षणेन प्रत्ययान्तादाम् स्यात् । एवमन्यत्रापि प्रयोजनानि गुपिव-
देयानि । अत्र स्वामिकाश्यपसंमताकारवासुदेवादयः पणायत इत्यायान्ता-
दात्मनेपदमुदाहरन्ति । तदसत् । यदस्यानुदात्तत्वं व्यवहारार्थस्याया-
भावात् स्तुत्यर्थस्यार्द्धधातुकआयविकल्पनात् प्रकृतावेव चरितार्थम् । अव-
यवे चाचरितार्थं लिङ्गं समुदायस्य विशेषकं यथा जुगुप्सत इति, स्पष्टं चैवं
गुपूधूपेत्यत्र न्यासपदमञ्जर्यादिषु । अत्र मैत्रेयन्यासे पणतेः सार्वधातुकेऽप्या-
यो विकल्प उक्तः । तथा सुधाकरकाश्यपतरङ्गिणीकाराश्च विच्छेस्तुदादि-
पाठाल्लिङ्गात् सार्वधातुकेऽपि विकल्पमाहुः । नित्ये ह्याये विच्छायतीति
यथापि सिद्ध्यतीति किं तत्र पाठेन, न चास्ति स्वरभेदः । शे कृते प्रत्ययस्व-
रेण तस्योदात्तत्वे धातुर्वर्ज्यमानस्वरेणानुदात्तः, अपि तु आयस्य पित्त्वेनानुदा-
त्तत्वात् धातोरन्त इति धातुरन्तोदात्तः । तत्र 'एकादेश उदात्तेनोदात्त'
इत्युभयथापि विकरणान्तस्योदात्तत्वात् । अनेनैवाभिप्रायेण कुटोः गूर्द इत्यत्र

न्यासे गां विच्छति गोविडित्युक्तम् । नैतत्साधु । विच्छायती विच्छायन्ती, आच्छीनद्योरिति नुम्विकल्पस्य प्रयोजनस्य संभवात् । अपि तु 'शप्श्यनोर्नित्य'मिति नित्यो नुम् स्यात् गुपूधूपविच्छीत्यत्र कैयटपदमञ्जर्यादिष्वप्येवमेव स्थितम् । विच्छ गतावित्यत्रात्रेयमैत्रेयावप्येवमेवाहतुः । तथा देवोऽपि विच्छेरपि शतुर्वा नुम् स्यादिति तुदादितेति । अत्र पुरुषकारे तुदादौ विच्छिः पठ्यते । न तु विच्छायतिरिति विच्छेरेवानन्तरेण शेन भाव्यम् । स चैवं भवन्नायविकल्पस्य कल्पकः स्यादेव । अत्रैवा'यादय आर्द्धधातुके वे'त्यत्र न्यासान्तरम् । आयादयः शपि नित्यमिति भाष्यं चानुकूलम् । नित्ये विच्छेराये शब्ग्रहणं शित उपलक्षणमिति कल्प्यं स्यादिति सुधाकराद्युक्तमेव समर्थितं नायं भाष्यस्यार्थः । तत्र हि परसप्तमीत्वमाश्रित्य सूत्रं दूषयित्वा तत्परिहाय सार्वधातुके नित्यमित्यभिहितम् । तत्राप्यायेनानवकाशेन विकरणानां बाधदोषमुद्भाव्य तत्परिहारायैव यथा पुनरयं सूत्रभेदेन परिहारः । यदि पुनः शपि नित्यमित्युच्येत सिध्यतीत्युक्तं, तेनापि न्यासेन सार्वधातुके नित्यमिति अनेन समानफलेन भाव्यं तच्च शब्ग्रहणस्य शित उपलक्षत्वएव युज्यते, अतश्चोपलक्षणत्वमेष्टव्यम् । तत्तत्र यथान्यासमेवास्तु इति सूत्रमेव विषयसप्तम्याश्रयणेन सिद्धान्तितम् । अत एव च तत्र कैयटेन तौदादिकाद्विच्छेः शेन भाव्यं न तु शपा, एवं तर्हि न्यासभेदोपलक्षणार्थमिदं शिति नित्यमिति न्यासः कर्त्तव्य इत्युक्तम् । यदप्युक्तं पुरुषकारे तुदादिभ्यः श इति हि शो विधीयते न तु विच्छायेः, विच्छेरेव तुदादिषु पाठात्तच्चैतर्द्विच्छेः शविधानमाये नित्ये सति आयान्ताद्भावात्परिक्लिश्यतइति, तदपि सूत्रस्वभावादाये नित्ये सति गुणादिष्वनुबन्धकरणवत् विच्छेः पाठोऽपि समुदायार्थतया युज्यतइति न संकटम् । तथा च हरदत्तः । विच्छिरयं तुदादौ पठ्यते तत्सामर्थ्यादायप्रत्ययान्तादपि शविकरणो भवति न तु शप् । यथा जुगुप्सते इत्यात्मनेपदं तेन विच्छायती विच्छायन्तीति आच्छीनद्योरिति नुम्विकल्पो भवतीति । पनायतीत्यादि । पणिवत् । पनसः । सत्यमित्यादिना असच् ॥ ४३५ ॥

भाम क्रोधे । भामते । बभामे । भामितेत्यादि । बिभामिषति ।

बाभान्ति । बाभामि । बाभान्वः । बाभान्मः । नुगत इति तपरकरणा-
त् यङ्लुकोरभ्यासस्य न नुगागमः । 'म्वोश्चे'ति मकारान्तस्य धातोर्म-
कारस्य नकारो भवति मकारवकारयोः परत इति मकारस्य नकारः । लुङि अबा-
भान् । 'मो नो धातो'रिति नकारः पदस्येति शेषः । एवं क्विपि भान् ।
भामः क्रोधः सोऽस्यास्तीति भामिनी । देवदत्ताय भामतीत्यत्र 'क्रुध-
द्रुहेर्ष्यासूयार्थानां यं प्रति कोप' इति कोपविषयत्वेन देवदत्तस्य संप्र-
दानत्वम् । पर्यायः क्रोधः । अपकारो द्रोहः । अक्षमा ईर्ष्या । गुणेषु दोषा-
विष्करणमसूया ॥ ४२६ ॥

क्षमूष् सहने ॥ क्षमते । चक्षमे । चक्षमिषे । चक्षंसे । चक्षमिध्वे । चक्षन्ध्वे ।
चक्षमिवहे । चक्षण्वहे । चक्षमिमहे । चक्षण्महे । ऊदित्त्वाद्वेट् । क्षन्ताक्ष-
मिता । अनिट्पक्षे 'म्वोश्चे'ति नत्वे ण्वाभ्यामिति णत्वं,
क्षमिष्यते । क्षंस्यते । क्षमताम् । अक्षमत । क्षमेत । आशिषि । क्षमिषीष्ट ।
क्षंसीष्ट । अक्षमिष्ट । अक्षंस्त । अक्षमिष्यत् । अक्षंस्यत् । कर्मादौ । क्षम्य-
ते । अक्षमि । 'नोदात्तोपदेशस्य मान्तस्यानाचमे'रिति चिणि ञ्णिति कृति
च वृद्धिनिषेधः । चिक्षमिषते । चिक्षंसते । चङ्क्षम्यते । चङ्क्षमीति । चङ्क्ष-
न्ति । नुगत इत्यभ्यासस्य नुक् । लुङि इटीति वृद्धिनिषेधात् अचङ्क्षमीत् ।
क्षमयति । अचिक्षमत् । 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्चे'ति अमन्तत्वलक्षणे मित्त्व
'मितां ह्रस्व' इत्युपधाया ह्रस्वः । क्षमित्वा । क्षान्तः । क्षान्त्वा । 'यस्य विभाषे'-
त्यनिट्त्वम् । क्षमः । घञ् । क्षमकः । ण्वुल् । अपराधक्षमः । अपराधक्षमा ।
'षिद्भिदादिभ्योऽङ्' इत्यचोऽपवादोऽङ् । क्षमि हि क्षम्यात् । क्षमा । 'ष्ठिवु-
क्लम्याचमि'ति चिण्वत् क्षिप्रमण् अस्यास्य 'चिण्णमुलोर्दीर्घोऽन्यतर-
स्या'मिति चिण्णमुल्परे णौ मितामुपधाया दीर्घविकल्पनात् अक्षामि । अक्षमि ।
क्षामंक्षामम् । क्षमं क्षममिति भवति । 'आभीक्ष्ण्ये णमुल् च' । अस्मिन् गम्यमाने
समानकर्तृकयोः पूर्वकाले च णमुलिति णमुल् । चकारः क्त्वासमुच्चयार्थः । आ-
भीक्ष्ण्ये द्वे भवत इति द्विर्वचनम् । पौनःपुन्यमाभीक्ष्ण्यम् । स्यादिष्वपि दी-
र्घविकल्पः चिण्वदिट्पक्षे भवति । क्षामिष्यते । क्षमिष्यते । अक्षामिषाताम् ।
अक्षमिषाताम् । क्षामिषीष्ट । क्षमिषीष्ट । क्षामिता । क्षमितेत्यादि । चिण्व

विटोभावे शमयिष्यते । अशमिषाताम् । शामयिषीष्ट । शमयितेति । लुङ्ग्वे-
कवचने चिण्परो णिरिति पक्षे दीर्घो भवति । अशमि,अशामीति । यङ्लुग-
न्तादपि चिण्णमुलोश्चिण्वदिटि च अयं दीर्घविकल्पो द्रष्टव्यः । शंशमि-
मि । अशंशमि । शंशामंशंशामम् । शंशमंशंशमम् । शंशामिष्यते । शंश-
मिष्यते इत्यादि । अत्राप्यचिण्वत्पक्षे शंशमिष्यत इत्यादि । अत्र 'चिण्णमु-
लोरन्यतरस्या'मिति ह्रस्वविकल्पेनापि सिद्धे दीर्घग्रहणं ण्यन्ताद्यङन्ताच्च यो
चिण्णमुल्परे दीर्घतार्थम्, अक्रियमाणेऽस्मिन् णिलोपयलोपयोः परनिमित्तयोः
पूर्वस्य ह्रस्वविकल्पे कर्तव्ये स्थानिवत्त्वाच्च चिण्णमुल्परे णौ मिद्ध्रस्वमन-
न्तरमित्यसौ 'न स्यात्, क्रियमाणे तु दीर्घविधिं प्रति न स्थानिवदिति
स्थानिवत्त्वं निषिध्यते । नन्वेवमपि दीर्घे कर्तव्ये यलोपयोरसिद्धव-
त्रेत्यसिद्धत्वात् व्यवधानं दुर्वारम् । नैतत् । व्याश्रयत्वेनासिद्धत्वाभावात्,
तथा च वामनः, णौ हि णियङोर्लोपः, चिण्णमुल्परे णावहस्येति दीर्घ-
त्वमिति । अयमपि दिवादौ ॥ ४३७ ॥

कमु कान्तौ ॥ 'कमेर्णिङि'ति स्वार्थे णिङ्, अयमार्द्धधातुके विकल्पेनो-
त्पद्यते । अत्राप्युत्पत्तिविकल्पस्य प्रयोजनं गुपिवद् द्रष्टव्यम् । कामयतेर्लिट्या-
म्, कामयाञ्चक्रे । कामयिता । कामयिष्यते । कामयताम् । अकामयत ।
कामयेत । आशिषि कामयिषीष्ट । अचीकमत, णिङ्ग्रहणेऽप्ययमपि गृह्यत इति
णिश्रीति कर्तरि चङ् । 'णेरनिटी'ति णिलोपे णौ चङीति ह्रस्वः । चिकामयि-
षते । कामयति । णिङन्तात्क्त्वो णेरनिटीति लोपः । कामयित्वा । कामना ।
ण्यासश्रन्थेति युच् । मांसकामः । मांसकामा । 'शीलिकामिभक्षिचरिभ्यो ण'
इति अणो ऽपवादो णः । अणि हि सति स्त्रियां ङीप्स्यात् । णिङभावे चकमे ।
कमिता । कमिष्यते । कमिषीष्ट । अचकमत । 'कमेरुपसंख्यान'मिति कर्तरि-
चङ् । अकमिष्यत । चिकमिषते । चङ्क्रम्यते । अत्र यङ्लुङ् नेति गुपू रक्षण इत्यत्र
स्थापितं तत एवागन्तव्यम् । कामयति । 'न कम्यमिचमा'मिति मित्त्वनिषे-
धाद् वृद्धिः । चिण्णमुलोरिति दीर्घविकल्पो मिद्धुचय इत्यस्यामित्त्वात् चिण्ण-
मुल्परेऽपि णौ नित्या वृद्धिः । कामंकाममिति । तथा चिण्वदिटयपि मित्त्वा-
भावात् कामिष्यत इत्याद्येव भवति न तु कमिष्यत इत्यादि । कचित्तु

पक्षे तु गुणायवोः कामयिष्यतइत्यादि । यस्योदित्त्वमणिङ्पक्षे क्त्वाया-मिड्विकल्पार्थं, तेन कमित्वा, कान्त्वेति । निष्ठायां तु 'यस्य विभाषे'ति निषेधात् कान्त इति । कामुकः । लषपतेत्यादिना उकञ् । कामंकामम् । नोदात्तोपदेशस्येति चिण्णि ञिति णिति कृति वृद्धिनिषेधोऽस्य न भवति । मवाद्यमिकमिवमीनामिति पर्युदासात् । कामुकी । जानपदेत्यादिना मैथुनेच्छायां ङीष् । अन्या कामुका । कम्रः । नमिकम्पीत्यादिना रः । कमन इति वासरूपेणानुदात्तेत्त्लक्षणो युच् । कन्तुः कामः । सर्जिद्दृशीत्यादि-नोप्रत्ययस्तुगागमश्च । कन्तुकम् कुमारीक्रीडनकानि चेति कुमारीक्री-डनकार्थादस्मात् कन् । कंसः । वृतृवदिहनिकमिकषिभ्यः स इति सः । कंसाय हितं, कंसीयम् । तस्मै हितमिति विषये 'प्राक् क्रीताच्छ' इति छः । तस्य विकारः कांस्यम् । 'कंसीयपरशव्ययोर्यञञौ लुक्चेति' यथासंख्याद-स्माद्विकारे यञि प्रातिपदिकादित्यधिकारात्ततः परस्य छस्य यतश्च लुक्, यञञोस्तु विधानसामर्थ्यान्न भवति । कंसेन क्रीतं कंसिकम् । 'कंसाट्टिठनि'ति टिठन् प्राग्वतीयेष्वर्थेषु । टित्त्वात् स्त्रियां कंसिकी ॥ घिण्यादय उदात्ता अनुदात्तेतः ॥ ४३८ ॥

(शेषमग्रे)

सटीकसंक्षेपशारीरकम् ।

(Continued from page 83. Vol. VI.)

मू० ॥ स्मृतिसमपदजन्यबुद्धियुग्मा-

त्परदृशि मोहनिवर्तनं परेषाम् ॥

परदृशि पदजस्मृतिद्वये स्या-

त्पदयुगलात्प्रमितेः समुद्भवो नः ॥ १८५ ॥

टी० ॥ एवं तत्त्वंपदजन्यपदार्थबोधे पदद्वये विशेषमुक्त्वाऽखण्ड-वाक्यार्थबोधोत्पत्तौ विशेषमाह । स्मृतिसमपदेति । स्मृतिसमे च ते प-दजन्ये च ते च बुद्धी तयोर्युग्मं तस्मादित्यर्थः । मोहनिवर्तनं साक्षात्कारः तत्त्वंपदजन्यस्मृतिसमतत्पदार्थद्वयज्ञानादेवाऽभिहितान्वयवादिनामात्म-

साक्षात्कारो भवेन्न तु शब्दवितत्तेन तु पदजन्यस्मृतिद्वये सति तत्त्वं-पदाभ्यामेव वाक्यार्थप्रमितेः समुद्भव इति महान्विशेषः । एवं च न इति भवता साक्षात्कारस्योपनिषज्जन्यत्वेन ब्रह्मणः स्वमते चोपनिषद्वत्त्वाभि-हुरिदमेव न्याय्य इति दर्शितम् ॥ ३८५ ॥

मू० ॥ औदासीन्यप्रच्युतिप्रापकेऽर्थे
लिङ्लोडादेर्लोकतो ज्ञातशक्तेः ॥
पुंसो वेदे प्रेरकत्वेन कल्प्या
लिङ्लोडादेर्भावनैवानृतन्त्रे ॥ ३८६ ॥

टी० ॥ एवं लोके शब्दानां कार्यान्विते व्युत्पत्तिबलेन वेदान्तानां सिद्धब्रह्मण्यप्रामाण्यमिति मतं निराकृत्य तत्र तेषां प्रामाण्यं स्थापित-मिदानीं भावनावाक्यार्थवादी स्वमतभावनारूपपुंप्रवृत्तिपर एव सकलोऽपि वेद इत्याशयेन प्रथमं शब्दभावनाया लिङर्थत्वमाचष्टे । औदासीन्येति । औदासीन्यस्य प्रवृत्तिप्रागभावस्य प्रच्युतिरभावः, प्रवृत्तिरिति यावत् । तस्याः प्रापके निमित्तेऽर्थे प्रेरणायामित्यर्थः । लोकतो लोके पुंस औदासी-न्यप्रच्युतिप्रापकेऽर्थे ज्ञातशक्तेर्लिङ्लोडादेर्वेदेऽर्थवत्त्वेन लिङ्लोडादेर्भाव-ना लिङ्लोडादिव्यापाररूपा भावना कल्प्या । कुत इत्यत आह । पुंसः प्रेरकत्वेनेति । लिङ्लोडादेरित्यनुषञ्जनीयं प्रेरकव्यापारः प्रेरणा वेदे च लिङ्लोडादेरेव पुंसां संप्रति प्रेरकत्वात्तद्व्यापार एव भावना तत्र लिङर्थ इत्यर्थः । ननु लोके चेतनानामेव प्रेरकत्वं दृष्टं तत्कथमचेतनलिङादे-स्तदिति तत्राह । अनृतन्त्र इति । अपौरुषेय इत्यर्थः । मामयं प्रेरयती-ति यद्व्यापारं ज्ञात्वा चेतनः प्रवर्तते स व्यापारवान् प्रेरकस्तद्व्यापारश्च प्रेरणा स चापौरुषेये वेदे लिङादिरेव यजेत जुहुयादित्यादितद्व्यापारश्र-वणानन्तरमेव पुरुषस्य प्रवृत्तेः स एव प्रवर्तक इत्यर्थः । एतदुक्तं भवति । माणवक गामानयेत्याचार्यशब्दश्रवणानन्तरं प्रवर्तमानं माणवकं दृष्ट्वा व्यु-त्पित्सुरित्थमनुमिमीते विमता प्रवृत्तिः प्रेरणाज्ञानपूर्विका नपरतरायत्त-प्रवृत्तित्वात् । मम स्तन्यार्थिनो रोदनेन प्रेरिताया मातुस्तनदानप्रवृत्तिव

हिरिति । स्वर्गादिप्रवृत्तिवारणाय नरान्तरेति । तत्र चान्वयव्यतिरेकाभ्यां लिङादेः शक्तिं कल्पयतीति तत्र व्युत्पन्नलिङादेर्वेदे तद्व्यापार एव भावना तदर्थः सिद्ध्यतीति ॥ ३७६ ॥

मू० ॥ आज्ञाद्यर्थः प्रेरकः पौरुषेये
लिङ्लोडादेर्भावना वेदवाक्ये ॥
पुंसोऽभावात्तद्गताज्ञाद्यभावा-
त्पुंसंबन्धात्प्रेरकास्ते हि वाक्ये ॥ ३८० ॥

टी० ॥ ननु किं लोकेऽपि लिङादिव्यापार एव प्रेरणा नेत्याह । आज्ञाद्यर्थ इति । आदिपदेनाभ्यर्थनादिग्रहः । आज्ञादिरूपोऽर्थ इत्यर्थः प्रेर्यते प्रवर्त्यतेऽनेनेति प्रेरकः प्रेरणा लौकिकवाक्यस्य पौरुषेयतयाऽऽचार्यादिपुरुषसंबन्धात्तत्र स एव प्रेरकस्तद्व्यापाररूपाज्ञादिरेव प्रेरणा पुंप्रवृत्तेस्तत एव संभवेन लिङादेस्तत्र प्रेरकत्वाऽयोगादित्यर्थः । एवं च तद्वैविध्यं सिद्ध्यतीत्याशयेनाह । लिङ्लोडादेरिति । ननूक्तव्यवस्थायां किं नियामकमित्याशङ्क्य तयोः संभवासंभवावेव व्यवस्थापकावित्याशयेनाह । पुंसोऽभावादिति । अभावादिति च्छेदः । तद्गतेति । वेदगतेत्यर्थः । ते पुमांसः आज्ञादयो वा । तथा च न लिङादेः प्रेरणा तत्रास्तीति भावः । एवं च प्रेरणात्मनि लिङादिशक्तेर्लोकवेदयोः समत्वाच्च कार्यवादिन इव भावनावादिनो वैयधिकरण्यादिवैषम्यमिति भावः ॥ ३८१ ॥

मू० ॥ लिङ्लोडादिर्भावकस्तच्च भाव्या-
ऽनुष्ठेयेऽर्थे पुंप्रवृत्तिः प्रसिद्धा ॥
लिङ्लोडादेः पुंप्रवृत्त्यंशनिष्ठो
व्यापारो यस्तं विदुर्भावनेति ॥ ३८८ ॥

टी० ॥ ननु भावनायाश्चेतनव्यापारत्वेन प्रसिद्धत्वात्कथं लिङ्लोडादेर्व्यापारो भावनेत्याशङ्क्य सत्यमर्थभावना तथैव शब्दभावना तु ततो विलक्षणा ततस्तत्र भावकादिवैलक्षण्यं युज्यत इत्याशयेन तस्या

Digitized by Google

भावकं भाव्यं चाह । लिङ्लोडादिरिति । भावकः भावनाश्रयस्तत्कर्तेति यावत् । तत्र शब्दभावनायां भाव्या साध्या अनुष्ठेये कृतिसाध्ये अर्थे धात्वर्थे पुंप्रवृत्तिः अर्थभावनारूपा पुरुषप्रवृत्तिः सप्तम्यौ च समानाधिकरणे विषयत्वार्थे । यद्यपि धात्वर्थोऽर्थभावनाया न भाव्यः किं तु करणं तथापि तत्साध्य एव स भाव्यावच्छिन्नायां व्यापाररूपायां तस्यां करणतयान्वेतीति तस्य तत्साध्यत्वानपायादर्थे पुंप्रवृत्तिरित्युक्तम् । प्रसिद्धा धात्वर्थनिष्पत्तिबलात्सिद्धा । तथा च धात्वर्थातिरिक्तार्थभावना नेति शङ्का न कार्येत्यर्थः । ननु क्लेशात्मिकायाः प्रवृत्तेर्भाव्यत्वायोगात्स्वर्गादिरेव भाव्यो वाच्यः स चार्थभावनाया एव भाव्यो न शब्दभावनाया अपीत्याशङ्क्याह । लिङ्लोडादेरिति । पुंप्रवृत्तिरूपो यो भाव्योंऽशः* तन्निष्टस्तत्पर्यवसायी प्रेरणारूपस्य लिङादेर्व्यापारस्य प्रेर्यप्रवृत्तिरूपा सेव भाव्यत्वयोग्येति तन्निष्ठेव शब्दभावनेति भावनावादिनो मन्यन्त इत्यर्थः ॥ ३८८ ॥

मू० ॥ करणमिह लिङादेर्ज्ञानमेवाङ्गभागः
पुनरभिरुचिहेतुर्दृश्यते च प्रशंसा ॥
त्रिभिरयमिह तन्त्रे जैमिनीये न कार्ये
न च भवति विधिर्नः श्रेयसो हेतुरर्थः ॥ ३८९ ॥

टी० ॥ ननु शब्दभावनाया अपि भावनात्वात्त्र्यंशत्वं वाच्यं तत्र प्रवृत्तिर्यद्यपि प्रथमांशः सिद्धस्तथापि तत्करणमितिकर्तव्यता च न सिद्धे । तत्र न तावच्छब्दः करणं तस्य तत्कर्तृत्वात् न च तदतिरिक्तं किं चित्करणमस्ति नापि प्रयाजादिरिव तदितिकर्तव्यता का चिदनुभूयते इत्याशङ्क्य तदुभयमाह । करणमिति । इह शब्दभावनायाम् । लिङादेस्तस्यां गृहीतसंगतिकलिङादेः । अङ्गभाग इतिकर्तव्यता । अभिरुचिहेतुः धात्वर्थानुष्ठानेच्छाहेतुः । प्रशंसा स्तुतिस्तज्ज्ञानमिति यावत् । शब्दभावनाया वाचकत्वेन लिङादिज्ञानानन्तरमेव तच्छ्रावियाणां प्रवृत्तिदर्शनेन तद्धेतुतया

* योंऽशः । पा॰२ ॥

शब्दभावनाया अपि तदानीमेव भावनात्वज्ञानं तत्कारणम् एवमर्थभावार्पितधात्वर्थप्राशस्त्यज्ञानं तत्र हेतुरुत्पादमद्वारा शब्दभावनासाध्यप्रवृत्तेः साहाय्यमाचरतीति तच्चेतिकर्तव्यतेति सा त्र्यंशा सिद्धेत्यर्थः । ननु भवतु शब्दभावनाया एवं त्र्यंशता भावनाज्ञानं कुतो भवेत् लिङादिनेवेत्याह । विधिरिति । प्रवर्त्तकलिङाद्यर्थ इत्यर्थः । अयं भावनारूपः शब्दव्यापारः । तन्त्रे शास्त्रे । नन्वलौकिकजातीयेन किं तेन लोकप्रसिद्धजातीयस्य कार्यस्य श्रेयःसाधनत्वस्य वा लिङाद्यर्थत्वमस्त्वित्याशङ्क्य तस्यापि प्रवर्त्तकव्यापारतया लोकप्रसिद्धजातीयत्वात् परमते चातिप्रसङ्गाच्चेत्याह । न कार्यमित्यादिना । नोऽस्माकं जैमिनीयानां न कार्यं विधिः । लिङाद्यर्थः यागाद्यर्थोऽपि श्रेयःसाधनत्वेन न विधिरित्यर्थः ॥ ३८९ ॥

मू० । विधिरिह गुणभूतः प्रत्ययार्थोऽपि नित्यं
भवति च पुरुषोत्था भावनाऽस्य प्रधानम् ॥
भवति दशलकारप्रत्ययैः साऽभिधेया
विधिविहितलकारैर्भावना शब्दहेतुः । ३९० ।

टी० । नन्वस्या भावनायाः प्रत्ययार्थत्वेन प्राधान्यं वाच्यमेवमर्थभावनाया अपि तद्वाच्यतया प्राधान्यमिति कथं प्राधानद्वयमेकवाक्यार्थः स्यादिति तत्राह । विधिरिति । इहास्मिंस्तन्त्रे प्रत्ययार्थोऽपि लिङाद्यर्थोऽपि विधिः शब्दभावनारूपो गुणभूत एव न प्रधानमित्यर्थः । नित्यं शब्दात्प्रतीतिकालेऽर्थभावनानिष्पादनकाले च, चोऽवधारणे । पुरुषोत्था पुरुषजन्या तद्व्यापाररूपा भावना अर्थभावनेव अस्य विधेरभिधारूपस्य प्रधानं यद्यपि शब्दभावना प्रत्ययाभिधेया यद्यपि चान्यः प्रत्ययार्थः प्रधानं तथापि प्रत्ययार्थतया पुरुषार्थभाव्यतया च प्रधानीभूतार्थभावनां प्रति भावनालिङर्थवादे विधिप्रत्ययार्थौ निर्वर्त्तकतया पुरुषार्थभाव्यतया च गुणभूत एव ततश्च न प्रधानद्वयप्रयुक्तो दोष इत्यर्थः । ननु प्रत्ययस्य शब्दभावनार्थत्वात्कथमर्थभावनार्थत्वमपि अनिमित्तानेकार्थताया अन्याय्यत्वादित्याशङ्क्याह । भवतीति । लडादिदशलकारप्रत्ययैस्तत्स्थानविहित-

लिङादिभिः साऽर्थभावनाऽभिधेया भवति विधिविहितलिङ्लोड्लेड्भिः* शब्दहेतुः शब्दकर्तृका भावना अभिधेया भवतीत्यनुषङ्गः । ओदनं पचतीत्यादिलडादिप्रयोगेऽप्योदनपाकं करोतीत्येवं कृतिप्रतीतेः केवलधातुप्रयोगे च तदभावादित्यन्वय†व्यतिरेकाभ्यां लडादिदशलकाराणामाख्यातत्वसामान्येन तत्र शक्तिर्निश्चीयते लः कर्मणि चेति सूत्रसामर्थ्यादपि तन्निश्चीयते लिङादीनां तु लिङ्त्वसामान्येन प्रत्ययवाचिनामपि विधिनिमन्त्रणादिसूत्रेण विध्यर्थे पुनर्विधानाल्लिङ्त्वाद्याकारेण तदर्थत्वमविरुद्धम् दृश्यते ह्येकस्यापि दीपस्य तेजस्त्वदहनत्वरूपभेदेन तमोऽपहतिपाकनिर्वर्तकत्वं तद्वल्लिङादेरप्युभयार्थत्वमिति भावः ॥ ३९० ॥

मू० ॥ भवति च पुरुषार्थकर्मकेयं
पुरुषनिमित्तकभावना न तद्वत् ॥
भवति तु विधिशब्दकर्तृकान्या
न हि निरवद्यपुमर्थताप्रवृत्तेः ॥ ३९१ ॥

टी० ॥ इदानीमर्थभावनायाः पुरुषार्थभाव्यकत्वमाह । भवति चपुरुषार्थेति । पुरुषेण अभिलषितोऽर्थः स्वर्गादिः कर्म भाव्यं यस्याः सा तथा । पुरुषो निमित्तं कर्ता यस्या भावनायाः सा पुरुषनिमित्तकभावना । भवति चेति चकारेण प्रसङ्गात्तत्र यागादिधात्वर्थः करणं प्रयाजादि चेतिकर्तव्यतेति दर्शितम् । अर्थभावनाया हि समानपदोपात्तमपि यागादि धात्वर्थं स्वतोऽपुरुषार्थं विहाय भिन्नपदोपात्तमपि स्वतः पुरुषेणाभिलषितं स्वर्गाद्येव भाव्यं कल्प्यते अन्यथा विधेः प्रेरकत्वानुपपत्तेरिति सा पुरुषार्थभाव्यनिष्ठैव । एवं समानपदोपात्तो यागादिर्व्यापाररूपायां तस्यां योग्यतया करणत्वेनान्वेति । प्रकरणपाठात् । प्रयाजादिरितिकर्तव्यतयेति त्र्यंशा सेति भावः । शब्दभावना तु न पुरुषार्थभाव्येत्युपसंहरन्नाह । न तद्वदित्यादिना । अन्या शब्दभावना विधिशब्दकर्तृका लिङादिशब्दव्यापारात्मिका ।

* लिङ्लोड्लेडादिभिः । पा० २ ॥
† क्रियाद्यन्वय । पा० २ ॥

ननु शब्दभावनाया अपि परम्परया पुरुषार्थनिष्ठत्वमस्तीत्याशङ्क्य प्रवृत्तेः प्रेषाद्युपायास्तस्याः प्रेर्यव्यापारमात्रे पर्यवसानादिति प्रागुक्तमर्थं स्मारयति । न हि निरवद्येति ॥ ३९१ ॥

मू० ॥ अभिमतपशुपुत्रवृष्टिनाक-

प्रभृतिकभाव्यगता हि भावनेयम् ॥

अनभिमतसुदुष्करातिदुःखां

नयति तु भाव्यपदं प्रवृत्तिमन्या ॥ ३९२ ॥

टी० ॥ भावनयोरुक्तमेव भाव्यवैलक्षण्यं विशदयति । अभिमतेति । नाकः स्वर्गः । प्रभृतिशब्देन ग्रामादि गृह्यते अभिमतपश्वादिभाव्यनिष्ठेयमर्थभावनेत्यर्थः । अनभिमता स्वतोऽनभिलषिता सुदुष्करा बहन्तराया एवं भूता चासावतिदुःखा अत्यन्तं दुःखमिश्रिता तां प्रवृत्तिमिति संबन्धः । भाव्यपदं भाव्यस्थानम् । अन्या शब्दभावना अनभिमतत्वादिविशिष्टां प्रवृत्तिं स्वभाव्यत्वेन कल्पयतीत्यर्थः ॥ ३९२ ॥

मू० ॥ प्रत्ययप्रकृतिशब्दतो बहि-

र्विद्यतेऽभिहितसंगतिश्च नः ॥

प्रत्ययप्रकृतिशब्दयोः पुन-

र्नित्यमन्वितधियो निमित्तता ॥ ३९३ ॥

टी० ॥ नन्वभिहितान्वयवादे यागभावनयोर्भावनयोर्वा कथमुक्त्वान्वय*बोधः स्यान्न हि यागो भावने च पृथक्पृथगभिहिताः येनाकाङ्क्षाद्यनुरोधेन पश्चादन्वयबोधो भवेदित्याशङ्क्याह । प्रत्ययप्रकृतिशब्दत इति । प्रत्ययो लिङ्लोडादिः प्रकृतिर्धातुः प्रकृतिप्रत्ययशब्दाभ्यां बहिरन्यत्रैव चोऽवधारणे अभिहितसंगतिः अभिहितयोः संबन्धः नोऽस्माकं भट्टानां मते प्रकृतिप्रत्ययातिरिक्तयोर्यजेतस्वर्गकामपदयोर्गवादिनयनादिपदयोश्च परस्परनैरपेक्ष्येणोपस्थितयोस्तथैव स्वस्वार्थाभिधानसंभवाद-

---

* कथमन्वय । प्रा॰२ ॥

भिहितयोस्तदर्थयोरन्वयबोध आकाङ्क्षाद्यनुरोधे न भवेत् प्रकृतिप्रत्यययो-स्तु प्रत्येकमप्रयोगान्नियमेन मिलितप्रयोगे मिलितयोरेव तदर्थयोर-भिधानमिति तत्रान्विताभिधानमेवान्यथा तत्राप्याकाङ्क्षादिसान्निध्यम-पेक्ष्येत न च तदस्तीति नोक्तदोष इति तदेतदाह । प्रत्ययप्रकृतीत्यादि-ना । पुनः शब्दो यस्मादर्थे प्रकृतिप्रत्ययशब्दयोर्यस्मादन्वितधियोऽपृथ-गवुद्धेर्निमित्तता विशिष्टैकबुद्ध्युत्पादकता नित्यं सदैवानुभवसिद्धेति शेषः ॥ ३९३ ॥

मू० ॥ भावनाद्वयमतोऽवबोध्यते
धातुवाच्यघटितं लिङादिभिः ।
प्रत्ययार्थगुणवस्तुवाचिनो
धातवः प्रकृतयो हि धातवः ॥ ३९४ ॥

टी० ॥ भावनाद्वयं व्युत्पादितं निगमयति । भावनाद्वयमिति । अत उक्तन्यायात् । धातुवाच्यघटितं धात्वर्थकरणकम् । यद्यप्येकैव भावना धातुवाच्यघटिता तथापि प्राणभृत उपदधातीतिवत् भावनाद्वयं तद्घटि-तमित्युक्तम् । धातुवाच्यघटितत्वमुपपादयति । प्रत्ययार्थेति । प्रकृतिप्रत्ययौ प्राधान्येन प्रत्ययार्थं सह ब्रूत इत्यभियुक्तवचनात्प्रत्ययार्थं प्रति गुणभूता-र्थवाचिनो धातव इति धात्वर्थघटितैव भावनेत्यर्थः । ननु प्रकृत्यर्थस्य प्रत्ययार्थं प्रति गुणत्वे धात्वर्थे किमागतमित्याशङ्क्य धातुरपि प्रकृति-रेवेत्याशयेनाह । प्रकृतय इति । यस्मादुपरि प्रत्ययो विधीयते सा प्र-कृतिः धातोश्च प्रत्ययविधिरिति धातवः प्रकृतय इत्यर्थः । अथ वा । ननु यागेन स्वर्गं भावयेदिति धात्वर्थकरणिकैकैव भावना प्रतीयते न भावनान्तरमतो भावनाद्वयोक्तिर्वाक्यप्रमाणविरुद्धेति तत्राह । भावनाद्व-यमिति । धातुवाच्यघटिततत्प्रतीतिबलादेव तद्गोचरभावनान्तरप्रतीति-रवश्यं वक्तव्या तस्या भाव्यत्वप्रतीतिमन्तरेण धात्वर्थस्य तत्करणत्वेना-न्वयायोगात् । समभिव्याहृतार्थवादार्पितप्राशस्त्यादेर्वाक्यार्थेऽन्वयाय च भावनान्तरप्रतीतिरवश्यं वाच्येति भावः । शेषं पूर्ववत् ॥ ॥ ३९४ ॥

Digitized by Google

मू० । भव्याय भूतमुपदिश्यत इत्यवोचं
पूज्यास्ततः सकलमेव तु वेदशास्त्रम् ।
कार्यप्रधानमिति निश्चिनुमोऽस्मदीये
तन्त्रे च कार्यमुदितः पुरुषप्रयत्नः ॥ ३९५ ॥

टी० ॥ एवं भावनाद्वयं विधिवाक्यप्रतिपाद्यमुपपाद्य तत्रैव सर्वस्य वेदस्य शबरस्वामिवचनेन पर्यवसानमिति दर्शयन्नुपसंहरति । भव्याय भूतमिति । यद्यपि प्रागिदं वचनमुदाहृत्य ब्रह्मणि वेदान्तप्रामाण्याविरोधेन नीतं तथापि भावनावादिनेदानीं तदुपन्यस्तमि ति न दोषः । पूज्याः शबरस्वामिनः । वेद एव शास्त्रं वेदशास्त्रं कार्यमनुष्ठेयभावना प्रधानं यस्य वेदशास्त्रस्य तत् । ननु कार्यं कृतिसाध्यं गुर्वभिमतं किं न स्यात्तत्राह । अस्मदीय इति । पुरुषप्रयत्न इति । अर्थभावनेत्यर्थः । प्रभाकराभिमतकार्यस्याप्रामाणिकत्वाज्जैमिनीयेऽस्मिन्शास्त्रे पुरुषप्रयत्न एव कार्यमुक्तमित्यर्थः ॥ ३९५ ॥

मू० । अभिदधाति करोति च लिङ्पद-
श्रुतिवचःसु निजामपि भावनाम् ।
न च करोति न वक्ति च तां पुन-
र्नरवचःस्विति दुःशकमुच्यते ॥ ३९६ ॥

टी० ॥ इदानीं लोकवेदयोर्लिङादीनां विलक्षणार्थत्वकल्पनमयुक्तं सुतरां वैदिकलिङादीनां स्वकर्तृकव्यापाराभिधायित्वं तस्य दुर्निरूपत्वादपि नैतन्मतं युक्तमिति दूषयति । अभिदधातीति । निजां स्वव्यापाररूपां शब्दभावनामभिदधाति वदति करोति निष्पादयति चार्थभावनामपि शब्देन स्वाविशिष्टव्यापारे स्वस्य वृत्तौ स्वात्मन्यपि वृत्तिप्रसङ्गेन विरोधं द्योतयति । तां स्वव्यापाररूपाम् भावनाम् । नरवचःस्विति । लिङ्पदमित्यनुषञ्जनीयम् । लोके चाज्ञादेरेव लिङर्थत्वेन तत्र शब्दभावनाया अभावाल्लौकिकलिङादिर्न तां करोति न च तामभिधत्त इति विभागकथनं दुःशकं दुरुपपादनमयुक्तमुच्यते इत्यर्थः ॥ ३९६ ॥

Digitized by Google

मू० ॥ वक्तृत्वमेव घटते यदि लिङ्पदस्य
सर्वेष नार्द्धजरतीयमिदं प्रशस्तम् ॥
सामर्थ्यमेकरसमेव यदोपपन्नं
नानारसं न खलु तत्परिकल्पनीयम् ॥ ३६० ॥

टी० ॥ ननु किमिति दुःशकं तदुपपादनादित्याशङ्क्याह । वक्तृत्वमिति । अभिधातृत्वं बोधकत्वमिति यावत् । सर्वत्र प्रत्यक्षादिप्रमाणे लिङादौ च लोके क्लृप्तेन स्वार्थबोधनेनैव वैदिकलिङादीनामपि प्रामाण्यं यदि घटेत तदा यथा कस्याश्चित्स्त्रिया युवत्या एव भर्त्ता प्रयोजनानुसारेणार्द्धशरीरेण जरतीत्वमपीच्छति चेदप्रामाणिकं तच्च सिद्ध्यति तथा तत्तुल्यमिदं प्रवर्तनं न प्रशस्तम् । अन्यत्र प्रमाणेषु तस्यादर्शनेन वैदिकलिङादिष्वपि तदयोगादित्यर्थः । ननु वेदे लिङादेरप्रेरकत्वे कथं पुंसः प्रवृत्तिः स्यात्तत्र प्रेरकान्तराभावादित्याशङ्क्यानुमानादेर्लौकिकलिङादेरिव च स्वप्रवर्त्तकज्ञाने सति पुरुषः स्वेच्छयैव तां करोति । तदाह श्रुतिः । काममय एवायं पुरुषः स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुत इत्याद्या, स्मृतिरपि यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितमिति । तथा च प्रमाणं किमपि न प्रवर्त्तकमित्याशयेनाह । सामर्थ्यमिति । एकरसं प्रत्यक्षादिप्रमाणेन सममेकरूपं स्वप्रमेयज्ञानानुकूलमेव । एकरसमिति प्रेरणानुकूलत्वं वा व्यावर्त्तयति । नानारसं प्रत्यक्षादिविलक्षणं बोधप्रवृत्त्युभयानुकूलत्वम् ॥ ३९० ॥

मू० ॥ श्रेयोहेतुत्ववाची यदि भवति तदा संभवत्येकरूपा
शक्तिस्तस्याभिधाने न तु भवति तदा कारकोऽयं प्रवृत्तेः ॥
श्रेयो हेतुश्च वाच्यः श्रुतिवचसि तदा पौरुषेये च तुल्यः
क्लृप्तश्चासौ न कल्प्यः श्रुतिवचसि यथा भावना लिङ्निबद्धा ॥ ३६८ ॥

(शेषमये)

काश्मीरराजकीयप्रधानपाठालयाध्यापकेन श्रीद्विवेदहरिभाषशर्म्मणा ।

कैवल्यरत्नम् ।

(*Continued from page* 150. Vol. VI.)

नमः सर्वजगत्पीडापरीहाररताय ते ।
नमो देवादिदेवाय देवदेवाय ते नमः ॥
वेदवेद्याय वेदाय नमो वेदार्थदायिने ।
नमः पापवतां नृणां पापनाशनकारिणे ॥
नमो रुद्राय शर्वाय विष्णवे परमेष्ठिने ।
सर्वाय सर्वगोप्त्रे च सर्वातीताय ते नमः ॥
अनया रममाणेन भवता सह विस्मृतम् ।
रक्षणं जगतो देव राक्षसैः पीडिता वयम् ॥
भवन्तं शरणं भीताः प्रपन्ना वयमीश्वर ।
भगवन् कृपयैवास्माननुपालय दुःखितान् ॥
इति विज्ञापितो ब्रह्मा देवैश्च मुनिसत्तमैः ।
पश्चात्कामात्प्रबुद्धो ऽभूच्चिन्तयन्परमेश्वरम् ॥
ततो देवानपि ब्रह्मा विलोक्य मुनिसत्तमान् ।
प्राह गम्भीरया वाचा भवद्भिस्त्यज्यतां भयम् ॥
इत्युक्त्वा मुनिदेवेभ्यो ब्रह्मा सर्वजगत्पतिः ।
पुत्रमुत्पादयामास राक्षसारिं महाबलम् ॥
तेन सर्वे हता ब्रह्मन्राक्षसा लोकबाधकाः ।
पुनर्ब्रह्मन्सुराः सर्वे ऋषयश्च तपोधनाः ॥
प्रवर्तन्ताभयाः स्वे स्वे स्थाने वेदविदां वर ।
एवं समाहिते लोके ब्रह्मा स्वात्मानमात्मना ॥
विलोक्य दूषयामास धिक्त्वां कामेन पीडितम् ।

अहो मोहस्य माहात्म्यं कः पुमाल्लङ्घितुं क्षमः ॥
न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥
इत्थं संचिन्त्य विश्वात्मा ब्रह्मा ब्रह्मविदां वर ।
सात्त्विकं भावमास्थाय सह देव्या समाहितः ॥
श्रीकालहस्तिशैलाख्यं स्थानं गत्वा जितेन्द्रियः ।
जटावल्कलसंयुक्तो भस्मोद्धूलितविग्रहः ॥
रुद्राक्षमालाभरणः त्रिपुण्ड्राङ्कितमस्तकः ।
स्नानं त्रिषवणं कृत्वा सुवर्णमुखरीजले ॥
शाकमूलफलाहारः पादाङ्गुष्ठाग्रतः स्थितः ।
ऊर्ध्वबाहुर्निरालम्बो दृढचित्तश्च निर्भयः ॥
श्रीकालहस्तिशैलेशं ध्यायमानो महामुने ।
श्रीमत्पञ्चाक्षरं मन्त्रं सतारं सर्वदा जपन् ॥
दिव्यं वर्षसहस्रं तु चचार परमं तपः ॥
तस्मिंश्चचार भार्या च तपस्तस्य महात्मनः ॥
ततः प्रीतोभवं ब्रह्मन्न तावत्तपसा तयोः ।
मम भार्या च सुप्रीता ब्रह्मन् गिरिवरात्मजा ॥
पुनर्मां प्रार्थयामास ब्रह्मा देवीं च भार्यया ।
धार्मिकं कृपयोपेतं कृतकृत्यं जितेन्द्रियम् ॥
सम्यग् ज्ञानेन संपूर्णं पुत्रमिच्छामि ईश्वर ।
इत्येवं प्रार्थितो धात्रा सभार्येणाहमव्ययः ॥
सह प्रीतो वरं पुत्रं सम्यग् ज्ञानेन सुव्रतम् ।
ऋभुसंज्ञं विरिञ्चाय दत्तवान् पुत्रमुत्तमम् ॥
ऋभुं पुत्रं पुनर्ब्रह्मा समालिङ्ग्य सभार्यया ।

Digitized by Google

कृतार्थो मत्प्रसादेन जितकामो जगत्पतिः ।
पुनश्च प्रार्थयामास देवं तत्रैव सुव्रत ॥
माघमासे मघर्क्षेयः पुमान्स्नात्वा प्रद्युम्नपुरस्सरम् ।
सुवर्णमुखरीस्नानं कृत्वा दत्वा यथाबलम् ॥
श्रीकालहस्तिनाथाय विदुषे च द्विजातये ।
कृत्वा प्रदक्षिणं भक्त्या देवदेवं पियम्बकम् ॥
अष्टोत्तरशतं ब्रह्मा दिवावर्जितभोजनः ।
स हि पुत्रं ममेशान ह्येवं प्रार्थयते सुतम् ॥
तस्य पुत्रं प्रयच्छ त्वं प्रार्थनेषा ममाव्यय ।
इत्येवं प्रार्थितो धात्रा देवदेवो महेश्वरः ॥
प्राह देवीं समालोक्य ब्रह्माणं मुनिपुङ्गव ।
यः पुमान्माघि मासीयमघर्क्षे कुरुते व्रतम् ॥
माघमासं समारभ्य सोस्मत्पुत्रमवाप्नुयात् ।
एवं भक्त्या व्रतं नारी नरो वा कुरुते तु यः ॥
तस्य दारिद्र्यनाशः स्याद्वत्सरान्मत्प्रसादतः ।
धनार्थी धनमाप्नोति जयार्थी जयमाप्नुयात् ॥
वश्यार्थी वश्यमाप्नोति राज्यार्थी राज्यमाप्नुयात् ।
रोगार्तो मुच्यते रोगान्मोक्षार्थी मोक्षमाप्नुयात् ॥
विद्यार्थी लभते विद्यां सुखार्थी लभते सुखम् ।
अस्मिन्देशे मनुष्याय यस्मै कस्मै ददाति यः ॥
आवासभूमिमन्यद्वा स याति परमां गतिम् ।
अस्मिन्देशे हुतं दत्तं तपः स्वाध्यायकर्म्म च ॥
अणुमात्रमपि ब्रह्मन्मेरुणा सदृशं भवेत् ॥
इत्युक्त्वा ब्रह्मणे ब्रह्मन्महादेवो महेश्वरः ।

तत्रैवान्तर्हितः सोमः सोमार्धकृतशेखरः ।
ब्रह्मा नद्यां पुनः स्नात्वा मुने ऽस्मिन्नग्निकारणे ।
प्रदक्षिणत्रयं कृत्वा स्तुत्वा स्तोत्रैः स्वमार्यया ॥
ब्रह्मलोकमनुप्राप्तो ब्रह्मा देवैः समावृतः ।
ऋभुश्चोत्पन्नविज्ञानो निसर्गादेव सत्तम ॥
दिव्यवर्षायुतं ब्रह्मन् चचार पृथिवीमिमाम् ।
जन्मान्तरकृतात्पापान्नास्तिकाः सर्वजन्तवः ॥
ऋभुं दृष्ट्वापि तत्त्वज्ञमुपेक्षां चक्रिरे भृशम् ।
सो ऽपि स्वात्मनि संतुष्टो निर्द्वन्द्वो निष्परिग्रहः ॥
कृपया परया युक्तो विद्यानुच्छित्तिसिद्धये ।
शिष्यं शिष्यगुणोपेतं प्रार्थयामास सुव्रत ॥
यथा यः प्लवतां याति यथा मासा महज्जरम् ।
एवं मां श्रोतुकामाश्च धातरायान्तु सर्वतः ॥
इत्येवं प्रार्थिते शिष्ये विद्यानुच्छित्तिसिद्धये ।
जन्मान्तरकृतात् पुण्यान्मत्प्रसादाच्च सुव्रत ॥
पुलस्त्य पुत्रो धर्मिष्ठो निदाघाख्यो गृहाश्रमी ।
ऋभुं दृष्ट्वा महाप्रीतः प्रणिपत्यात्मवेदिनम् ॥
भोजयित्वा द्विजं प्राह प्रसादं कुरु मे द्विज ।
इत्युक्तो ब्राह्मणेनासौ निदाघेन मुनीश्वरः ॥
ऋभुः श्रद्धातिरेकेण प्रोवाच ज्ञानमुत्तमम् ।
यस्मादिमानि जायन्ते भूतानि भुवनानि च ॥
येन जातानि जीवन्ति लीयन्ते यत्र च द्विज ।
विजिज्ञासस्व वेदान्तैर्ब्रह्मेति सततं मुदा ॥
तद् ब्रह्मेदं जगत्सृष्ट्वा प्राप्य जीवात्मना जगत् ।

सदुत्परं भवच्छब्दस्य निरुक्तं चापि हि द्विज ।
अनिरुक्तं च विप्रेन्द्र तथा निलय नेतरं ।
विज्ञानं चाभवत्तद्वदविज्ञानं द्विजोत्तम ॥
सत्यानृतं च बहुना किमुक्तेन द्विजोत्तम ।
यदिदं दृश्यते दृष्ट्या श्रूयते श्रवणेन च ॥
गृह्यते मनसा चान्यैस्तत्सर्वं ब्रह्म केवलम् ।
कोशमन्नमयं भातमात्मवत्ता यथैव तम् ॥
स्थूलदेहमिवासत्यमिति विद्धि विलक्षणम् ।
प्राणापानादिभेदेन विभिन्नो भाति ते द्विजाः ।
यो ऽयं प्राणमयः कोशः सो ऽयं मायाविजृम्भितः ॥
संकल्पं च विकल्पं च कुरुते सत्यवत्सदा ।
यो ऽयं मनोमयः कोशः स नास्तीत्यवबुध्यताम् ।
निश्चिनोति सदा यो ऽर्थं निदाघ परमार्थवत् ।
विज्ञानमयकोशो ऽयं स नास्तीत्यवबुध्यताम् ॥
सत्यं ज्ञानमनन्तं यत् ब्रह्मानन्दं श्रुतौ श्रुतम् ।
तद्विद्धि हृदये भातं प्रत्यग्रूपमिति द्विज ॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परात्मनि ॥
वाचा न वदितं यच्च येन वाग्वदति द्विज ।
तद् ब्रह्म त्वं सदा विद्धि न तद् वाग्विषयं न वाक् ॥
मनसा यन्न गृह्येत येन चाहुर्मनो मतम् ।
तद् ब्रह्म त्वं सदा विद्धि न मनश्च मनो मतम् ॥
यच्चक्षुषा न गृह्येत येन चक्षुश्च गृह्यते ।
तद् ब्रह्म त्वं सदा विद्धि नेदं दृष्टाभिवीक्षितम् ॥

Digitized by Google

श्रूयते न सदा विप्र यः श्रोत्रेणेन्द्रियेण तु ।
तद् ब्रह्म त्वं सदा विद्धि नेदं श्रोत्रं शृणु द्विज ॥
यच्च न प्राणिति प्राणं येन प्राणः प्रणीयते ।
तद् ब्रह्म त्वं सदा विद्धि नेदं प्राणविचेष्टितम् ॥
यद्विज्ञातं त्वया विप्र यच्च विज्ञातमात्मना ।
ताभ्यामन्यत्परं विप्र विद्धि वेदान्तवाक्यतः ॥
एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्व्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलश्चेति विद्धि ।
न भाति सूर्यो न च तारकं शशी न भाति विद्युन्न च भाति पावकः ।
प्रकाशमाने परमात्मवस्तुनि प्रभाति सर्वं परमात्मनः सदा ॥
शरीरमेवाशनमत्ति सर्वदा न चात्मतत्त्वं परमार्थदर्शने ।
करोति सर्वंच निदाघ मारुतः शरीरगो नैव पुमानविक्रियः ॥
देहात्मप्रविभागबोधममलं तर्कैः सदा बृंहितं
संन्यासाश्रमशान्तिदान्तिसहितैर्यज्ञादिदग्धैनसैः ।
संपाद्यं श्रुतिमस्तकेषु महता यत्नेन विद्यां विना
कः संसारमविद्ययैव निहितं छित्वा विमुक्तो भवेत् ॥
यज्ज्ञानेन निदाघ दृश्यमखिलं विज्ञातमेतादृशं
मृत्पिण्डेन घटादिवद्भवति तत्सत्यं ततो ऽन्यन्मृषा ।
तत्त्वं विद्धि महाबलेन सततं भक्त्या च मत्सेवया
न त्वं संसरसि श्रुतिश्च सदसीत्युच्चैर्मुदा वक्ति हि ॥
एतावाञ्छ्रुतिमस्तकैरभिहितो यो ऽर्थो निदाघादरा
देतावान्विदितो मया मुनिगणैरन्यैरपि ज्ञानिभिः ।
एतावत्परमेश्वरो वदति मे विष्णुर्विरिञ्चो ऽप्यतः
कारुण्यादहमुक्तवाननितरां विद्धीममर्थं मुदा ॥

इति ब्रह्मसुतो ब्रह्मन् विद्यानुच्छित्तिसिद्धये ।
निदाघायोक्तवांस्तत्त्वं तत्पुनस्तेन विस्मृतम् ॥
निदाघस्याल्पभाग्यस्य न विद्यावासना ऽभवत् ।
प्रतिबन्धकबाहुल्यात्प्रवृत्ता कर्मवासना ॥
अतीते वत्सरे दिव्ये सहस्रे स ऋभुः पुनः ।
निदाघस्य गृहं गत्वा द्वारि केवलवत्स्थितः ॥
निदाघस्तं समालोक्य प्रणिपत्य स्वभार्यया ।
भोजयित्वोपचारेण पृष्टवान् कुत आगतः ॥
क्व गच्छति भवान् तृप्तिर्भोजनादस्ति वा न वा ।
इति पृष्टो निदाघेन स ऋभुः प्राह सत्तम ॥
आकाशवदहं पूर्णो देहपाद्यादिवर्जितः ।
गमनागमने न स्तः क्षुत्पिपासे च मे न हि ॥
त्वद्दृष्ट्या देहसद्भावो गमनागमने तथा ।
क्षुत्पिपासे च मद्दृष्ट्या नास्त्येव परमार्थतः ॥
इति श्रुत्वा निदाघो ऽपि मां स दृष्ट्यावलोकयत् ।
प्राह मिथ्या कथं प्रोक्तं भवता मम संनिधौ ॥
प्रत्यक्षेण विजानामि शरीरं गमनं तथा ।
भोजनं मैथुनं नाशं तवाहं पुरुषाधम ॥
गच्छ गच्छ महादुष्ट सत्यहीन ममायतः ।
सत्यहीना नराः सर्वे पच्यन्ते नरकालये ॥
सत्यहीनैः सहाश्वासः सह वासश्च दर्शनम् ।
नराणां नरकायोक्तं मुनिभिः सूक्ष्मदर्शिभिः ॥
इत्युक्तो ब्रह्मपुत्रश्च निदाघेन मुनीश्वर ।
पुनश्चाहात्मविज्ञानमलभ्यमिति चिन्तयन् ॥

विप्र विप्र निदाघाद्य प्रत्ययं किं ब्रवीषि तत् ।
विमृश्य वद मे विद्वन् सत्यमिष्टं नरोत्तम ॥
इति ब्रह्मसुतेनोक्तो निदाघोऽप्याह पूर्ववत् ।
पुनश्च परया युक्तः कृपया स ऋभुर्मुनिः ॥
निदाघायोक्तवांस्तत्त्वं शिष्यस्नेहादहं तदा ।
यद्यत्प्रकाशते विद्वंस्तत्तद्भानात्मकं न वा ॥
भाद्रूपतः नात्मकं चेत्स्यात्कथं देहादिदर्शनम् ।
यथा भानात्मकं तर्हि प्रत्ययेन न भाति तत् ॥
भानसंबन्धतो भातिमपि विद्वन्न सिध्यति ।
स्वतो भानविहीनस्य कथं भातेन संगतिः ॥
तस्मात्प्रत्ययतो दृष्टं ब्रह्मैवात्र विचारतः ।
अविचारात्मिका ह्येषा प्रतीतिः प्रतिभाति ते ॥
विचारेण विसृज्यैतां ब्रह्म सर्वं विलोकय ।
इत्येवमुक्त्वा स ऋभुर्महात्मा मम प्रसादात्परिलब्धबोधः ।
अनाकुलः स्वात्मनि तुष्टभावो न किंचिदप्याह पुनर्वसिष्ठ ॥
निदाघश्च वचः श्रुत्वा ब्रह्मपुत्रस्य धीमतः ।
प्रदक्षिणत्रयं कृत्वा प्रपात भुवि दण्डवत् ॥
तस्य भार्या मुनिश्रेष्ठं प्रणिपत्य प्रतिव्रता ।
गन्धपुष्पादिभिर्ब्रह्मन्पूजयामास सादरम् ॥
तं निदाघः समालिङ्ग्य पुनश्चाह द्विजोत्तम ।
को भवानिह सर्वज्ञो मम गेहे समागतः ॥
दर्शनात्तव संतुष्टिर्जाता मे महती द्विज ।
इत्युक्तो ब्रह्मविच्छ्रेष्ठो निदाघेनार्द्रमानसः ॥

ऋभुस्तमाह माचार्यः पुरस्तादेव ते ऽनघ ।
इदानीमागतो विद्या मयोक्ता सुस्थिता न वा ॥
इति जिज्ञासया वत्स गमिष्यामि यथेच्छया ।
त्वं च कर्म्म परित्यज्य मदुक्तार्थपरो भव ॥
इत्युक्त्वा मौनमास्थाय ब्रह्मवित्प्रवरो ऽगमत् ।
निदाघश्च तथेत्युक्त्वा प्रणिपत्य द्विजोत्तमम् ॥
अन्वगच्छन्मुनेः कं चिद्दूरं भक्त्या स्वभार्यया ।
एवं ब्रह्मसुतेनोक्तो निदाघो ऽपक्रमानसः ॥
पुनश्च कर्म्मनिष्ठो ऽभूत्सर्वदा मुनिसत्तम ।
पुनः संवत्सरे ऽतीते सहस्रे दैविके ऽनघ ॥
ऋभुर्दत्वा परिज्ञानं निदाघायादरेण तु ।
निर्वाणं परमं ब्रह्मन्प्राप परमामृतम् ॥
निदाघो दग्धपापस्तु विशुद्धहृदयो द्विज ।
ब्रह्मपुत्रोपदेशेन प्रबुद्धः परमात्मनि ॥
बुध्वा मायामयं सर्वं त्यक्त्वा वर्णाश्रमं सदा ।
प्रारब्धकर्म्मणा किं चित्कालं स्थित्वा शरीरके ॥
भुक्त्वा भोग्यनविद्योत्थानाभासानात्मनि स्थितान् ।
तदन्ते विद्यया ऽविद्यां दग्ध्वा मुक्तो ऽभवत्स्वयम् ॥
इत्युक्तं परमहितं जगद्धिताय ह्यत्युक्तं परमपदं महानुभाव ।
प्रत्युक्तं द्विज ऋभुणा विमुक्तये तत्सच्छिष्यं परमसुदा वसिष्ठ भक्त्या ॥

इति श्रीपरमकारुणिकेन परमेश्वरेण भगवन्तं वशिष्ठं प्रति कथिते वाशिष्ठलैङ्गोपपुराणे अध्यात्मविद्या एकादशो ऽध्यायः ॥

स्कन्दोपपुराणे सौरसंहितायां परमाद्वैतसारः प्रदर्श्यते ॥

तत्र प्रथमाध्याये ॥   (शेषमपि)

॥ श्रीः ॥

॥ योगवार्त्तिकम् ॥

(*Continued from page* 143. Vol. VI.)

यमान् व्याख्याय नियमान् व्याचष्टे ।

शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ॥ ३२ ॥

स्थूलशरीरस्यैव बाह्यान्तररूपेणादौ द्विविधं बाह्यशौचं दर्शयति । मृज्जलेति । मेध्यं गोमूत्रयवाग्वादि तेषां भक्षणं मेध्याभ्यवहरणम् आदिशब्देनोपवासादयो बाह्याः । मानसमपि शौचमाह । आभ्यन्तरमिति । सत्यस्वभावस्य चित्तस्य मला रागद्वेषादयस्तेषां मैत्र्यादिना प्रक्षालनं प्रसाद इति प्रागुक्तमित्यर्थः । संतोषं व्याचष्टे । संनिहितेति । अत्यावश्यकप्राणयात्रानिर्वाहकविद्यमानसाधनादतिरिक्तस्यालिप्सेत्यर्थः । द्वंद्वसहिष्णुतेति । शास्त्रोक्तरीत्या निर्द्वेषं द्वंद्वसहनमित्यर्थः । द्वंद्वान्याह । जिघत्सेति । जिघत्सा बुभुक्षा, यद्यपि शीतोष्णादिवत्परस्परविरुद्धत्वं बुभुक्षापिपासयोर्नास्ति तथापि मिथुनवदेव पारिभाषिकद्वंद्वता । स्थानमूर्द्ध्वावस्थानम् । आसनं चोपवेशनम् । काष्ठमौनमिङ्गितेनापि स्वाभिप्रायाप्रकाशनम् । आकारमौनं स्ववचनमात्रम् । एतानि शास्त्रोक्तव्रतेनैव सोढव्यानि न तु वृथेत्याशयेनाह । व्रतानि चैषामिति । स्वाध्यायव्याख्या सुकरा । तज्जपस्तदर्थभावनमिति प्रथमपादोक्तप्रणिधानव्यावृत्त्यर्थं द्वितीयपादाद्यसूत्रवाक्यार्थमेव प्रणिधानशब्दार्थं स्मारयति । तस्मिन्परमगुरौ सर्वकर्मार्पणमिति । एतच्च तत्रैव व्याख्यातम् । नन्वेवं तदर्थभावनरूपमेव प्रणिधानमर्थो भवतु । न । बहिरङ्गतायाः वक्ष्यमाणत्वात् । ईश्वरभावनं हि ध्यानरूपतया योगस्यान्तरङ्गमेव । त्रयमन्तरङ्गमिति वक्ष्यमाणसूत्रात् सर्वकर्मार्पणमेव मुख्यतो ध्येयं न त्वीश्वरतत्त्वम् । 'कुर्यात् कर्मसंन्यासचिन्तन'मिति योगियाज्ञवल्क्यवाक्यात् ।

नाहं कर्ता सर्वमेतन्मनसा कुरुते तथा ।
एतद् ब्रह्मार्पणं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः ॥

Digitized by Google

इति कौर्माच्च । ईश्वरस्तु सामान्यतस्तद्विशेषणतामात्रेण कर्तृत्वारोपेण च ध्येय इत्यतो युक्ता तस्य योगबहिरङ्गतेति । तदेवं सूत्रगणोक्ता यमनियमा विष्णुपुराणादिष्वपि दर्शिताः ।

ब्रह्मचर्यमहिंसां च सत्यास्तेयपरिग्रहान् ।
सेवेत योगी निष्कामो योग्यतां मनसो नयन् ॥
स्वाध्यायशौचसंतोषतपांसि नियतात्मवान् ।
कुर्वीत ब्रह्मणि तथा परस्मिन्प्रवणं मनः ॥

इत्यादिभिः । एतेषु दशसु मध्ये ईश्वरप्रणिधानस्य मुख्यतो योगाङ्गत्वमिति प्रतिपादनाय निर्विघ्नपरमात्मयोगहेतुत्वं तस्याह श्लोकेन । शय्यासनेति । ईश्वरप्रणिधानी तदनुग्रहात्सदैव योगयुक्तः स्यादिति श्लोकार्थः । स्वस्थः परमात्मनिष्ठः परमात्मार्पितकर्मणां मुख्यतस्तद्योगस्यैव कल्पनोचित्यात् वितर्कजालो यो वक्ष्यमाणः वक्ष्यमाणप्रतिपक्षभावनां विनापि परिक्षीणो यस्य स तथा । संसारबीजानां संस्काराादीनां क्षयमनुदिनमुपलभमानः तथामृतभोगभोगी त्यागीचेन्मुक्तिसुखानुभवितेत्येवंभूतो नित्ययुक्तः स्यादित्यर्थः । न केवलमीश्वरार्पितकर्मणा ऐश्वरयोग एव भवति अपि त्वीश्वरसाक्षात्कारद्वारा पूर्णत्वादिना तत्त्वसाक्षात्कारोपीत्युक्तमेव स्मारयति । यत्रेदमुक्तमिति । यत्रेश्वरयोगे । ननु यमनियमयोर्मध्ये यज्ञदानाद्यवचनान्यूनतेति चेत्, न ।

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥

इत्यादिवाक्येभ्यो ऽत्रानुक्तकर्मणां तपस्येवान्तर्भावात् । एवं योगिनामन्तर्यागाऽभयदानादेरपि तपस्येवान्तर्भावः । देवब्राह्मणार्थहिंसाया अपि त्याज्यवचनेन च प्रकृष्टयोगिनां बाह्यकर्मणाम् अभावसिद्धिरिति । तदेवं यमाः पञ्च नियमाश्च पञ्च सर्वस्मृतिसिद्धाः प्रोक्ताः । ननु* यमानामभावरूपतयाकालाद्यनवच्छिन्नत्वसंभवात् सार्वभौमत्वमुक्तं नियमानां तु प्रतिनियतकालावच्छिन्नतया न सार्वभौमत्वं संभवति अतो नात्र

* ननु इत्यस्य स्थाने 'तत्र' इति युक्ततरः पाठः ।

महाव्रतरूपो विशेष उक्त इति । यथोक्तयोश्च यमनियमयोर्मध्ये निवृत्तिरूपतया शक्यसंपादनत्वेन यमा एव परमहंसानामावश्यका जडभरतादीनामप्यहिंसापालनस्य विष्णुपुराणादौ स्मरणात् । न तु नियमाः प्रवृत्तिरूपतया योगान्तरायत्वात् । तदुक्तं भागवते

यमानभीक्ष्णं सेवेत नियमान् मत्परः क्वचित् ।

इति । उक्तेषु यमनियमेषु वक्ष्यमाणविघ्नस्य निवृत्त्युपायप्रतिपादकं सूत्रं पूरयित्वावतारयति । एतेषां यमनियमानामिति ।

वितर्कबाधने प्रतिपक्षभावनम् ॥ ३३ ॥

वक्ष्यमाणवितर्कैर्यमादिबाधने सति वक्ष्यमाणं प्रतिपक्षभावनं कुर्यादित्यर्थः । तदेतद्व्याचष्टे । यदास्येति । विपरीतास्तर्का विचारा येष्विति । वितर्कसंज्ञा हिंसादिषु तान्त्रिकी । तर्कस्यात्र विशेषणं, तथाच वितर्क्यमाणो हिंसादिर्वितर्कः तेन बाधने स्वाभिमुखीकरणे प्रतिपक्षभावनम् । उत्तरसूत्रवक्ष्यमाणं कुर्यादित्यर्थः । विपरीततर्कस्याकारमाह । हनिष्यामीत्यादिना इतीत्यन्तेन । एवं नियमपञ्चकेऽपि त्यक्ष्याम्यहं शौचमित्यादयो वितर्काः द्रष्टव्याः युक्तिसाम्यात् । सूत्रतात्पर्यार्थमाह । एवमिति । एवमुन्मार्गाभिमुखेन हिंसादिगतेन वितर्कज्वरेण ज्वलितेन बाध्यमानो योगी वितर्कविरोधिज्ञानविषयतया वितर्कप्रतिपक्षान् दुःखादिफलकत्वादीन् भावयेत् चिन्तयेत् इत्यर्थः । प्रतिपक्षभावनं व्याचष्टे । घोरेष्वित्यादिना भावयेदित्यन्तेन । वितर्कान् हिंसादीन् । अत्र दुःखफलत्वचिन्तनं वाक्यतात्पर्यार्थः । तुल्यत्वमेव विवृणोति । यथेति । श्वमादीति । वितर्कबाधने प्रतिपक्षभावनमित्येवमादिकं सूत्रान्तरेषु आसनप्राणायामसूत्रेष्वपि योजनीयम् । आदिशब्देनास्य सूत्रस्य व्याख्या उत्तरसूत्रं च ग्राह्यम् । आसनादिषु च वितर्का आसनादिकं त्यक्ष्यामीत्यादिरूपा इति शेषः । इदानीं ये वितर्काः ये वा वितर्कस्य प्रतिपक्षाः यादृशं वा तच्चिन्तनं तत्सर्वमाह ।

वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम् ॥ ३४ ॥

हिंसादय इति । वितर्काणां स्वरूपकथनं विशेषणत्रयेण । तत्तद्गतविशेषाणां कथनं सर्वेषां हेयत्वप्रतिपादनाय दुःखादिफलकत्वकथनं च प्रतिपक्षकथनम् । प्रतिपक्षान् भावयेदितिपूर्वसूत्रीयभाष्यानुपपत्त्या प्रतिपक्षभावनमित्यन्तकर्मधारयासंभवात् । शेषेण च भावनकथनमिति । दुःखाज्ञाने एवानन्ते फले येषामिति विग्रहः । विशेषणत्रयोक्तान् विशेषान् विवृणोति । तत्र हिंसेति । कृतेति । कृता वा कारिता वा अनुमोदिता वेत्यर्थः । तत्र कृता स्वयं निष्पादिता कारिता कुर्वित्युक्ता अनुमोदिता परैः क्रियमाणा साधुसाध्वीत्यङ्गीकृता । कृतादीनामपि द्वितीयविशेषणोक्तं त्रैविध्यं व्याचष्टे । एकैकेति । लोभेनेत्यस्य व्याख्या । मांसचर्मार्थेन मांसचर्मादिप्रयोजनेन तथा अपकृतमनेनेत्येवं क्रोधेन तथा मोहेन यज्ञार्थहिंसया निर्दोषो धर्मो भविष्यतीत्येवंरूपेणेत्यर्थः । यद्यपि मृदुमध्याधिमात्रा इति हिंसादिविशेषणं सूत्रेऽस्ति तथापि लोभादेर्मृदुत्वादिनैव हिंसादेर्मृदुत्वादिकमत्र विवक्षितमर्थसौष्ठवमित्याशयेन लोभादिविशेषणतया मृदुत्वादीन् व्याचष्टे । लोभक्रोधमोहा इति । लोभक्रोधमोहा एकैकाः पुनस्त्रिधा मृदुमध्याधिमात्रा इत्यर्थः । एवमित्यादि हिंसाया इत्यन्तमेकं वाक्यं मृदुमध्याधिमात्रत्वात्ततोऽपि विशेष इति पूर्वपादीयसूत्रानुसारेण । यौक्तिकानपरान्विशेषान् स्वयमाह । मृदुमध्याधिमात्राः पुनस्त्रिधेति । सर्वत्र तीव्रत्वमधिमात्रता, शेषं स्पष्टम् । सा पुनर्नियमेति । मत्स्येष्वेव हिंसेत्यादिर्नियमः । एकस्मिन् दिवसे स्थावरस्य जङ्गमस्य वान्यतरस्यैव हिंसा नोभयोरित्यादिर्विकल्पः । स्थावरजङ्गमयोरुभयोरेवाव्यवस्थया हिंसेत्यादिः समुच्चयः । इत्येवं नियमविकल्पसमुच्चयानाम् आनन्त्याद्धिंसासंख्येयभेदेत्यर्थः । नियमाद्यानन्त्ये हेतुः, प्राणभृदिति । हिंसकानां हिंसानां वाऽसंख्यतया नियमादीनामनन्तप्रकारत्वमित्यर्थः । एवमिति । हिंसायामिवानृतादिरूपवितर्केष्वपि कृतकारिता इत्यादिविभागा योजनीया इत्यर्थः । अज्ञानं चेति । अज्ञानं संमोहः हिंसातो दुःखाज्ञाने यथा भवतस्तदाह । तथा चेति । तथाहीत्यर्थः । वीर्याक्षेपो बलान्नियमनम् । एवं त्रिप्रकारहिंसनात्त्रिप्रकारमेव दुःखं हन्ता प्राप्नोति कर्मो-

Digitized by Google

नुरूपफलोदयादिति प्रतिपादयति । ततो वीर्येति । परस्य वीर्याक्षेपात्तस्य हन्तुरपि चेतनमुपकरणं स्त्रीपुत्रधनादिकं क्षीणवीर्यं कार्याक्षमं भवति । तथा परस्य शस्त्रादिना दुःखोत्पादनाद्धन्तापि नरकादिषु याम्यशस्त्रादिना दुःखमनुभवति । तथा परस्य जीवितव्यपरोपणात् प्राणवियोजनात्तस्य हन्तापि प्रतिक्षणं जीवितात्ययं रागादिना मरणावस्थां संमोहमयीमापन्नो मरणमिच्छन्नपि कथं चिदेव जीवति । ननु तदानीमेव कथं मरणं न भवति तत्राह । दुःखविपाकस्येति । दुःखरूपस्य विपाकस्य प्रतिनियतजन्मादिविपाकैरेव भोग्यत्वादित्यर्थः । तदेतद्धिंसाया अनन्तदुःखाज्ञानफलकत्वं गीतायामप्युक्तं

मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ।
तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ॥
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ।

इति । पुत्रा ह्यग्निविस्फुलिङ्गवत् पितुरंशाः । 'आत्मा वै जायते पुत्र' इति श्रुतेः । अत ईश्वरांशजीवेषु द्वेष ईश्वरद्वेष एव । किं च जीवानामप्यात्मा परमेश्वरः । अतः शरीरद्वेषेण शरीरिद्वेषवत् जीवद्वेषेण परमेश्वरस्य द्वेषो भवतीति भावः । पुण्यावापगतेति । पुण्यकर्मरूपस्य सुबीजस्य चित्तभूमावावपने गता सहावापितेत्यर्थः । धान्यबीजवपने तृणबीजानां वपनवदिति भावः । भवेदल्पायुरिति । ननु 'अहिंसन्सर्वाणि भूतान्यन्यत्र तीर्थेभ्यः' 'तस्माद्यज्ञे वधो ऽवध' इत्यादिश्रुतिस्मृतिभिर्वैधहिंसातिरिक्तहिंसाया एव प्रतिषेधात् कथं वैधहिंसाया अनिष्टसाधनत्वमुच्यत इति । अत्रोच्यते । कार्यत्वमिष्टसाधनत्वं वा विध्यर्थो न पुनरनिष्टाननुबन्धित्वमपि । राजत्वादिप्रापककर्मणां गर्भवासजन्याद्यनर्थहेतुतायाः सर्वसंमतत्वात् । न च बलवदनिष्टाननुबन्धित्वमपि विध्यर्थो वक्तुं शक्यते । अनिष्टेषु पुरुषाणां बलवद्द्वेषस्याव्यवस्थितेः । दुःखमेव सर्वं विवेकिन इत्युक्तत्वात् । किं च बलवदनिष्टाननुबन्धित्वस्य विध्यर्थत्वेपि यज्ञादिनान्तरीयकहिंसायाः सामान्यतोऽनिष्टजनकत्वश्रुत्यविरोधः । अपि चा-

Digitized by Google

वेदर्हिंसात्यागस्य स्वर्गादिसाधनताबोधकविधिभिर्वैधहिंसायाः स्वर्गादिसाधनताबोधकविधिभिश्च सह हिंसाया मृत्य्वाद्यनिष्टहेतुताबोधकश्रुतिस्मृतीनां नास्त्येव विरोधो येन तासु संकोचः कल्प्येत अतो युक्तमुक्तं पुरुषार्थकानामपि हिंसानामनिष्टहेतुत्वम् । युद्ध्यादिपगतहिंसास्वपि युधिष्ठिरादीनां प्रायश्चित्तश्रवणादप्ययमेव सिद्धान्त उन्नीयते ।

तस्माद्वक्ष्याम्यहं तात दृष्ट्वेमं दुःखसंनिधिम् ।
त्रयीधर्ममधर्माढ्यं किंपाकफलसंनिभम् ॥

इतिमार्कण्डेयादिस्मृतिश्रुत्यादिभ्यश्च । अत एव स्मर्यतेपि ।

सर्वाणि भूतानि सुखे रमन्ते सर्वाणि दुःखेषु तथोद्विजन्ति ।
तेषां भयोत्पादनजातखेदः कुर्याच्च कर्माणि हि जातवेद ॥

इति मोक्षधर्मादिष्विति । वधोऽत्रय इत्यादि वाक्यं तु वधाभासतापरमिति दिक् । अनृतादिष्वप्येवं दुःखाज्ञानफलकत्वं यथासंभवं मरणादिकं विहाय योज्यमित्यर्थः । प्रतिपक्षभावनस्य प्रयोजनमाह । एवं वितर्काणामिति । अनुगतं नियतमेवमनिष्टं विपाकं वितर्काणां कार्यमेव चिन्तयन् योगी न वितर्केषु मनः प्रणिदधीत दद्यातीत्यर्थः । यमनियमनिष्पत्तिसूचकानां सिद्धान्तानां प्रतिपादकानि सूत्राणि अवतारयति । प्रतिपक्षेति । हेया हातुमर्हा एवंभूता वितर्का यदास्य योगिनः प्रतिपक्षभावनातो विषयसान्निध्यकालेप्यप्रसवस्वभावा भवन्ति तदा तत्कृतं वितर्कहानिकृतमैश्वर्यं यमादिनिष्पत्तिसूचकं भवतीत्यर्थः । तन्निष्पत्त्यवधारणे च तत्तद्भूमिषु यत्नं विहाय भूमिकान्तरेषु योगी यत्नमातिष्ठेतेत्येतत्प्रतिपादयितुं सर्वेष्वेव योगाङ्गेषु सिद्धिकथनम् । तद्यथा तदैश्वर्यं यथा ।

अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः ॥ ३५ ॥

प्रतिष्ठायां स्थैर्ये उक्तवितर्कैरसंस्पर्श इति यावत् । तस्यां सत्यां तत्सन्निहितानां सर्वप्राणिनां मार्जारमूषकादीनामन्योन्यवैरत्यागो भवतीत्यर्थः ।

सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम् ॥ ३६ ॥

Digitized by Google

सर्वप्राणिनां भवतीत्यत्रापि शेषः । क्रिया धर्मः तस्य फलं स्वर्गादिः तयोराश्रयत्वं सर्वप्राणिनां सत्यप्रतिष्ठस्य वचनाद्भवतीत्यर्थः । तदेतद्व्याचष्टे । धार्मिक इति । धार्मिको भूया इति वचनात् संबोध्यो धार्मिको भवतीत्यादिरर्थः । अमोघेति । एवं प्रकारेणास्य योगिनो वाक् सत्या भवतीत्यर्थः । अत्र वाक् मनसोऽप्युपलक्षणम् ।

अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम् ॥ ३७ ॥

सर्वाभ्यो दिग्भ्यो रत्नोपस्थानं सर्वरत्नोपस्थानम् । तदेतद्व्याचष्टे । सर्वदिक्स्थानीति ।

ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः ॥ ३८ ॥

वीर्यं शक्तिविशेषं लक्षयति । यस्येति । यस्य वीर्यस्य लाभात्प्रतीघातवर्जितान् गुणान् ज्ञानक्रियाशक्तीरुत्कर्षयति योगी वर्धयति तथा सिद्धः स्वयं ज्ञानी भूत्वा शिष्येषु ज्ञानाधानसमर्थश्च भवतीत्यर्थः ।

अपरिग्रहस्थैर्ये जन्मकथंतासंबोधः ॥ ३९ ॥

अपूर्वेण देहेन्द्रियादिसंघातेन ज्ञानहेतुः संबन्धो जन्म तस्य कथंता किंप्रकारता तयोः संबोधः साक्षात्कारो जन्मकथंतासंबोधः । तथाच शान्तोदिताव्यपदेश्यानां जन्मनां स्वरूपतः प्रकारतश्च जिज्ञासामात्रेण साक्षात्कारोऽपरिग्रहस्थैर्ये भवतीत्यर्थः । तदेतद्व्याचष्टे । अस्य भवतीति । इदं सूत्रेण सहान्वेति । कोऽहमासं कथमहमासमित्यतीतजन्मनः स्वरूपप्रकारयोर्जिज्ञासा किंस्विदित्यादिद्वयं वर्तमानजन्मनः स्वरूपप्रकारजिज्ञासा के वा भविष्याम इत्यादिद्वयं च भाविजन्मन इति । पूर्वापरान्तमध्याः भूतभविष्यद्वर्त्तमानकालाः तेष्वस्य योगिनः स्वजन्मजिज्ञासोत्पन्नमात्रैव स्वरूपेण स्वविषयेण ज्ञानेन उपावर्त्तते विशिष्टा भवति नास्त्यत्र साधनापेक्षेत्यर्थः । स्वतः सर्वार्थग्रहणयोग्यस्यापि चेतसोऽतीतादीनां स्वावस्थानाम् अग्रहणं परिग्रहव्यासङ्गदोषात् अतोऽपरिग्रहस्थैर्यात्ताः सर्वा प्रणिधानमात्रेणैव गृह्यन्त इति भावः ।

शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः ॥ ४० ॥

शौचात् शौचस्थैर्यात् । अनेन सूत्रेण बाह्यशौचस्थैर्यस्य सिद्धिरुच्यते, जुगुप्सा कुत्सा अशुचित्वदोषदर्शनं तस्याशेषतः साक्षात्कार इति यावत् । शौचात्स्वाङ्गजुगुप्सायां युक्तिमप्याह । स्वाङ्ग इति । यतः पूर्वमल्पजुगुप्सया शौचमभ्यस्तम् अतोऽतिशयितजुगुप्सा शौचफलं युक्तेत्याशयः । जुगुप्सो विशु[illegible]चीति । कायेति । अवद्यं दोषः । तज्ज्ञानस्य फलमाह । कायानभिष्वङ्गीति । केवं सुगमम् । अतः शौचस्य सिद्धिसूचकं सूत्रमवतारयति । किं चेति ।

सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शन-योग्यत्वानि च ॥ ४१ ॥

एतेषु क्रमं दर्शयति । शुचेरिति । क्षालितचित्तमलस्य सत्त्वशुद्धिः सत्त्वोद्रेको भवति ततः सौमनस्यं प्रीतिः स्वत एवानन्दो [illegible] ततश्च प्रीतचित्तस्याविक्षेपादैकाग्र्यं तत इन्द्रियजयः ततश्चात्मदर्शनयोग्यत्वमिति । सूत्रद्वयार्थमुपसंहरति । एतत्सूत्रद्वयोक्तं शौचसमान्यस्य स्थैर्यात्प्राप्यते इत्यर्थः ।

संतोषादनुत्तमः सुखलाभः ॥ ४२ ॥

नास्त्युत्तमं सुखं यस्मात्तादृशसुखस्य लाभः संतोषस्थैर्याद्भवतीत्यर्थः । तृष्णाक्षयोर्हि संतोषः तृष्णाप्रतिबन्धापगमे च चित्तस्य स्वाभाविकसत्त्वाधिक्यनिमित्तिका सुखस्वभावता स्वत एवाविर्भवति न तत्सुखं विषयापेक्षमिति तन्निर्विषयं शान्तिसुखम् आत्मसुखमुच्यते । 'ते ये शतं प्रजापतेरानन्दाः । स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्ये'त्यादिश्रुतेः । ईश्वरस्य पूर्णकामत्वात् श्रोत्रियस्य च ज्ञानेन कामक्षयादुभयोरेव वैतृष्ण्यस्य तुल्यतया समानं सुखमित्याशयः । बुद्धेः सत्त्वात्मकतया सुखस्वभावत्वेन बौद्धमपि नित्यं सुखमिदमेव गीयते स्वाभाविकस्य यावद्द्रव्यभावित्वात् तमसा पिहितत्वेन च सदाऽनभिव्यक्तत्वात् न पुनश्चितिरेव सुखस्वरूपिणी चिन्मात्रत्वश्रुतिस्मृतिसूत्र* विरोधादेरुक्तत्वात् इति । संतोषा-

* युक्त्यादिविरोधं पुस्तकान्तरे ।

दभिव्यक्तसुखस्यानुत्तमत्वे स्मृतिमुदाहरति । तथा चोक्तमिति । कामसुखं कामेभ्यो लौकिकविषयेभ्यः सुखं दिव्यं संकल्पमात्रोत्थविषयजं 'संकल्पादेवास्य पितरः समुत्तिष्ठन्ती'त्यादिश्रुतेः । तृष्णाक्षयसुखस्य तृष्णाक्षयाभिव्यक्तसुखस्येत्यर्थः । विदेहकैवल्ये तु सुखवाक्यानि दुःखनिवृत्त्या गौणानीति ।

कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः ॥ ४३ ॥

व्याचष्टे । निर्वर्त्यमानमिति । अशुद्धिरधर्मस्तामसो गुणः सैवाणिमादिशक्तेरावरको मत* इत्यर्थः । अणिमादिसिद्धीर्विभूतिपादे व्याख्यास्यति । शेषं सुगमम् ।

स्वाध्यायादिष्टदेवतासंप्रयोगः ॥ ४४ ॥

संप्रयोगो दर्शनं यां देवतां द्रष्टुमिच्छति सैव दृश्या भवतीत्यर्थः । सुगमं भाष्यम् ।

समाधिसिद्धिरीश्वरप्रणिधानात् ॥ ४५ ॥

व्याचष्टे । ईश्वरेति । ईश्वरेऽर्पितः सर्वभावः सर्वव्यापारो येन तस्य समाधिसिद्धेर्योगनिष्पत्तिर्यथा येन प्रकारेणेश्वरानुग्रहतो भवति तदुच्यते, आदौ तावद्देशाद्यन्तरस्थमपि ध्येयं सर्वं श्रवणमननकाले यथार्थमेव जानाति । गुरुवाक्यादावविपर्यस्तं भवति । ततोस्य योगिनः प्रज्ञा समाधिकालेपि यथार्थमेव साक्षात्करोतीत्यर्थः । एवं संप्रज्ञातसिद्धावसंप्रज्ञातसमाधिः स्वयमेव सिध्यतीति तत्र प्रदर्शितम् । न चेश्वरप्रणिधानादेव योगनिष्पत्तावितराङ्गवैयर्थ्यमिति वाच्यम् । ईश्वरप्रणिधानस्य मोहमात्रनिवृत्तिद्वारत्ववचनात् । द्वारान्तरेण त्वङ्गान्तराणां समाधिसाधनत्वसंभवात् । अपि च ईश्वरप्रणिधानेनैव निर्विघ्नं सर्वाण्यङ्गानि संपाद्य समाधिं जनयतीति नान्याङ्गवैफल्यम् । अथ वा अन्यान्यङ्गानीश्वरप्रणिधानद्वारा समाधिं निष्पादयन्ति इतराङ्गानां च स्वतो नैतादृशी शक्तिरस्ति

* मत इति पा० २ ।

इत्याशयेनेश्वरप्रणिधानस्यैव तु मुख्यतः समाधिसाधकत्वं सूचितमिति बहिरङ्गत्वं त्वस्य संयमद्वारकतया अनावश्यकतया च वक्ष्यतीति । सूत्रान्तरमवतारयति । उक्ता इति ।

स्थिरसुखमासनम् ॥ ४६ ॥

स्थिरं निश्चलं सुखकरं च यत्तदासनम् आस्यतेऽनेन प्रकारेणेत्यासनमित्यर्थः । आसनस्य भेदानाह । तद्यथेति । तत्र पद्माद्यासनचतुष्टयस्य लक्षणं वसिष्ठेनोक्तम् ।

अङ्गुष्ठौ सन्निबध्नीयात् हस्ताभ्यां व्युत्क्रमेण तु ।
ऊर्वोरुपरि विप्रेन्द्र कृत्वा पादतले उभे ॥
पद्मासनं भवेदेतत् सर्वेषामेव पूजितम् ।
एकपादमथैकस्मिन् विन्यस्योरौ च संस्थितः ॥
इतरस्मिंस्तथा पादं वीरासनमुदाहृतम् ।
अस्यैवार्द्धमर्द्धासनमप्युच्यते, तथा ।
गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ।
पार्श्वपादौ च पाणिभ्यां दृढं बद्ध्वा सुनिश्चलः ॥
भद्रासनं भवेदेतत्सर्वव्याधिविषापहम् ।
जानूर्वोरन्तरे सम्यक् कृत्वा पादतले उभे ॥
ऋजुकायः सुखासीनः स्वस्तिकं तत्प्रचक्षते ।

इति । इतराण्यासनानि योगप्रदीपाद्युक्तानि संक्षेपात्कथ्यन्ते । दण्डासनम् उपविश्य श्लिष्टाङ्गुलिकौ श्लिष्टगुल्फौ भूमिश्लिष्टजङ्घोरुपादौ प्रसार्य दण्डवच्छयनम् । सोपाश्रयं योगपट्टयोगेनोपवेशनम् । पर्यङ्कं च जानुप्रसारितबाहोः शयनम् । क्रौञ्चनिषदनादीनि क्रौञ्चादीनां निषण्णानां संस्थानदर्शनात् प्रत्येतव्यानि । जान्वोरुपरि हस्तौ कृत्वा कायशिरोग्रीवाणामवक्रभावेनावस्थानं समसंस्थानम् । स्थिरसुखं च सूत्रोपात्तं, तस्य व्याख्यानं यथासुखमिति । आदिशब्देन मायूराद्यासनानि ग्राह्याणि । यावन्त्यो जीवजातयस्तावन्त्येवासनानीति संक्षेपः । आसनस्थैर्यस्योपायमाह ।

प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम् ॥ ४७ ॥

प्रयत्नशैथिल्यस्य द्वारमाह । येन नाङ्गेति । बहुव्यापारानन्तरं चेदासनं क्रियते तदाङ्गकम्पनादासनस्थैर्यं न भवतीत्याशयः । अनन्तेति । अथ वा प्रयत्नशालित्वेऽपि पृथिवीधारिणि स्थिरतरशेषनागे समापन्नं तद्द्वारस्थया तदात्मतापन्नं चित्तमासनं निष्पादयतीत्यर्थः । तच्चानन्तानुग्रहाद्वा सजातीयभावनावशाद्वा अदृष्टविशेषवशाद्वेत्यन्यदेतत् । आसनप्रतिष्ठायां सिद्धिमाह ।

ततो द्वंद्वानभिघातः ॥ ४८ ॥

भाष्यं सुगमम् । क्रमप्राप्तं प्राणायाममाह ।

तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ॥ ४९ ॥

वक्ष्यमाणचतुर्विधप्राणायामस्यैवं सामान्यलक्षणं गतिविच्छेदः । शास्त्रोक्तरीत्या स्वाभाविकगतेः प्रतिषेध इत्यर्थः । स च रेचकपूरककुम्भकेष्वनुगतः । नन्वेवं प्रत्येकस्यापि प्राणायामत्वापत्त्या त्रिभिर्मिलित्वैकप्राणायाम इति 'प्राणायामस्तु विज्ञेयो रेचकपूरककुम्भकै' रित्यादिवाक्योक्तं व्याहन्येतेति चेन्न । त्रयाणां पौर्वापर्येण प्रथमभूमिकायां सहानुष्ठाननियमादेकत्वव्यवहारोपपत्तेः । न तु तादृशवाक्येषु मिलितानामेव प्राणायामत्वं विवक्षितम् ।

रेचकं पूरकं त्यक्त्वा सुखं यद्वायुधारणम् ।
प्राणायामोऽयमित्युक्तः स वै केवलकुम्भकः ॥

इति वासिष्ठसंहितादौ केवलकुम्भकस्यापि प्राणायामत्ववचनादिति । इदं सूत्रं व्याचष्टे । सत्यासनइति । यथा यमनियमयोरन्यकालकृतयोर्योगाङ्गत्वं नैवमासनस्य किं तु प्राणायामाद्यङ्गपञ्चकसाहित्येनेति एतत् प्रतिपादयितुं सत्यासने इतिविशेषणं तथा च सत्यासनइति समाधिसूत्रपर्यन्तम् अनुवर्तनीयम् । गीतादावासनोपरागेणैव ध्यानादिस्मरणादिति । अत एव चासनादीनां षडङ्गानां सहानुष्ठेयत्वेनाराद्युपकारकत्व-

मानत्वकृत्त्वमित्याशयेन स्मृत्यादिषु क्वचित्प्रसङ्गो योग उच्यते । यमनियमयोः कालान्तरीयतयात्यन्तर्बहिरङ्गत्वादिति । आचमनमन्तःप्रवेशः । नन्वेवं प्रवेशनिर्गमरूपयोः श्वासप्रश्वासयोः गतिरेव नास्तीत्याशयेनाह । उभयाभाव इति । तथा च गतिशब्दार्थोऽत्र न विवक्षितः स्वाभाविकश्वासप्रश्वासयोः प्रतिषेधः प्राणायाम इत्येवार्थः । अवान्तरभेदप्रतिपादकमुत्तरसूत्रं पूरयित्वोत्थापयति । स त्विति ।

बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः ॥ ५० ॥

स तु प्राणायामो बाह्यवृत्तिराभ्यन्तरवृत्तिस्तम्भवृत्तिरिति त्रिविधः रेचकपूरककुम्भकभेदात् । तदुक्तं विष्णुपुराणे ।

परस्परेणाभिभवं प्राणापानौ यदानिलौ ।
कुरुतः स द्विधा तेन तृतीयः संयमात्तयोः ॥

इति । स च त्रिविधः । प्राणायामो देशकालसंख्याभिः परिदृष्टो निर्णीतो नियमितो भवति तदाभ्यासवशात् क्रमेण दीर्घसूक्ष्मसंज्ञको भवतीति सूत्रार्थः । तदेतद्व्याचष्टे । यत्रेति । विशेषाणां सामान्यनिष्ठत्वात् इयं सप्तमी । यत्र प्राणायामे गतिविच्छेदे प्रश्वासपूर्वकगत्यभावः प्रश्वासेन रेचकेन गतिविच्छेदः स बाह्यो बाह्यवृत्तिः प्राणायामो रेचकनामेत्यर्थः । न च रेचनं बाह्य इत्येवास्त्विति वाच्यम् । प्राणस्यायामः प्राणायाम इति योगादरेचनायामाख्यनिरोधस्य विशेष्यीकरणादिति । यत्र श्वासेति । यत्र श्वासेन पूरकेण गत्यभावः स आभ्यन्तरः आभ्यन्तरवृत्तिः प्राणायामः पूरकनामेत्यर्थः । स्तम्भवृत्तिरिति । यत्रोभयाभावः श्वासप्रश्वासयोरभावः सकृत्प्रयत्नादेवाभ्यासनिरपेक्षाद्भवति स स्तम्भवृत्तिः प्राणायामः कुम्भकनामेत्यर्थः । वक्ष्यमाणस्य कुम्भकभेदस्य चतुर्थप्राणायामस्य व्यावर्तनाय सकृत्प्रयत्नादिति विशेषणम् । स हि प्रयत्नबाहुल्येनैव भवतीति तत्रैव प्रतिपादयिष्यति । एकदैव बाह्याभ्यन्तरप्राणविलापने दृष्टान्तमाह । यथा तप्त इति । द्वयोर्बाह्याभ्यन्तरदेशयोः । देशकालसंख्याभिः परिदृष्ट

इति विशेषणस्यायमर्थः । एतावद्देशेन वा एतावत्कालेन वा एतावन्मात्रसंख्याभिर्वावच्छिन्नो मया रेचकादिः कर्त्तव्य इत्येवमवधारित इति । तदेतद्विभज्य व्याचष्टे । त्रयोप्येतइति । त्रयो रेचकपूरककुम्भकाः । देशाविति । नासाग्रप्रदेशद्वादशाङ्गुलहस्तादिपरिमितो बाह्यदेशो रेचकस्य विषयः स चेषीका तूलादिक्रियानिश्चेयः । पूरकस्य चापादतलमामस्तकमाभ्यन्तरो विषयः स च पिपीलिकास्पर्शसदृशेन स्पर्शेन निश्चेयः । कुम्भकस्य रेचकपूरकयोः बाह्याभ्यन्तरदेशौ समुच्चितावेव विषयः उभयत्रैव प्राणस्य विलयात् । स च तूलस्य क्रिया उक्तस्पर्शस्य चानुपलब्ध्या निश्चेय इति । कालेनेति । चतुर्निमेषावच्छिन्नस्य कालस्य चतुर्थभागः क्षणः तेषामियत्तावधारणेनावच्छिन्नाः एतावत्क्षणरेचकादिः कर्त्तव्य इति नियमिता इत्यर्थः । संख्याभिरिति । मात्राणां द्वादशादिसंख्याभिरित्यर्थः । यद्यपि संख्याभिरपि कालनियम एव क्रियते । तथापि प्रकारभेदाद्भेद इति । तत्र हि शङ्खध्वन्यादिना कालनियमः क्रियते स कालेन परिदृष्टः यत्र च वक्ष्यमाणमात्रासंख्याभिः कालनियमः क्रियते स संख्याभिः परिदृष्ट इति । संख्यार्थे मात्रा च मार्कण्डेयप्रोक्ता ।

निमेषोन्मेषणे मात्रा तालो लघ्वक्षरं तथा ।
प्राणायामस्य संख्यार्थे स्मृता द्वादशमात्रिकाः ॥

इति । निमेषादिलघ्वक्षरान्तं मात्राप्रमाणं तदेव दर्शयत्युत्तरार्द्धेन द्वादशमात्रिको द्वादशगुणितो यः कश्चन निमेषादिरयं पदार्थः प्राणायामस्य संख्यार्थे स्मृत इत्यर्थः । एवं प्रणवादयोपि मात्रा वसिष्ठयाज्ञवल्क्यादिभिरुक्ताः । पूरकादित्रय एव द्वादशमात्रेत्ययमधमः कल्पः । यतः पूरकादिषु प्रत्येकं मात्रायाः संख्याभेदो वसिष्ठसंहितायामुक्तः ।

एवं ज्ञात्वा विधानेन प्रणवेन समाहितः ।
प्राणायामत्रयं कुर्यात्पूरकुम्भकरेचकैः ॥
आकृष्य श्वसनं बाह्यात् पूरयेदिडयोदरम् ।
शनैः षोडशमात्राभिरकारं तत्र संस्मरन् ॥
मकारं मूर्त्तिमत्रापि संस्मरन् प्रणवं जपेत् ।

धारयेत् पूरितं पश्चात् चतुःषष्ट्या तु मात्रया ॥
यावद्वा शक्यते तावद्धारयं जपसंयुतम् ।
पूरितं रेचयेत्पश्चात् प्रणवं ह्यनिलान्वितम् ॥
शनैः पिङ्गलया पुन द्वात्रिंशन्मात्रया पुनः ।
प्राणायामाक्षरं तच्च प्रणवस्य समाहितम् ॥

इति । अकारोकारमकाराणां मूर्त्तयो ब्रह्मविष्णुरुद्रशरीराणि तमेतं पुराणयुक्तं मात्राभेदं सामान्यतो भाष्यकार आह । एतावद्भिरित्यादिना । एतावद्भिः षोडशादिभिः मात्राख्यैः पदार्थैः निमेषोन्मेषणादिभिः । श्वासप्रवेशः पूरकः प्रथम उद्घातः । वायोरुद्धननं गतिनिरोध इति यावत् । तथा निगृहीतस्य स्तम्भितस्य वायोरेतावद्भिश्चतुःषष्ट्यादिभिर्निमेषोन्मेषणादिभिः कुम्भको द्वितीय उद्घातः । एवं तृतीय उद्घातोऽर्थाद्रेचक, एतावद्भिर्द्वात्रिंशदादिभिर्निमेषोन्मेषणादिभिरित्यर्थः । अत्र प्रथमादिशब्दैः पूरकादित्रये क्रमवचनात्सौत्रः पाठक्रमोनुष्ठाने नादर्त्तव्यः । तथा च पूरककुम्भकरेचका इत्येवौत्सर्गिकोनुष्ठानक्रमः पुराणादिषु बाहुल्येनदर्शनाच्च । सृष्टौ महदादिक्रमवदिति । प्रकारान्तरेणापि संख्यापरिदृष्टत्वमाह । एवं मृदुरित्यादिना । एवम् एतावद्भिर्मात्राप्रमाणैर्मृदुः प्राणायामः एवम् एतावद्भिर्मध्यमः एवमेतावद्भिस्तीव्रः प्राणायाम इत्यपि संख्यापरिदृष्टा भवतीत्यर्थः । तदुक्तं कौर्मे ।

मात्राद्वादशको मन्दश्चतुर्विंशतिमात्रकः ।
मध्यमः प्राणसंरोधः षट्त्रिंशन्मात्रकोन्तिमः ॥

इति । अत्र पूरकादिविशेषावचनात् त्रिष्वपिप्राणायामेषु द्वादशद्वादशमात्रादिरूपैकैव संख्या इत्येवं पृथक्कल्पः । देशकालसंख्याभिः परिदृष्ट इत्यत्र चेच्छाविकल्प एव न तु समुच्चयः उदाहृतवसिष्ठवाक्यादौ केवलमात्रासंख्यायामपि प्राणायामदर्शनात् । समुच्चयानुष्ठाने तु फलभूमा भवत्येव भूयसि भूय इति न्यायादिति । दीर्घसूक्ष्म इति दलं व्याचष्टे । स खल्विति । स बाह्याभ्यन्तरस्तम्भवृत्तिस्त्रिविधः प्राणायामः । एवं देशा-

श्चवधारणयोरभ्यस्तः स दीर्घसूक्ष्मसंज्ञको भवतीत्यर्थः । दीर्घश्चासौ सूक्ष्मश्चेति सान्वयेयं संज्ञा, देशकालसंख्याभिर्नियमेन हि प्रत्यहमभ्यस्यमानः क्रमेण कालवृद्ध्या दीर्घकालव्यापित्वेन दीर्घो भवति वायुसंचारस्यातिसूक्ष्मतया च सूक्ष्म इति । यद्यपि अभ्यस्त इति सूत्रे नास्ति तथापि दीर्घसूक्ष्मसंज्ञया अर्थाक्षिप्त एव भाष्यकारेण व्याख्यात इति । तदेवं प्राणायामस्य रेचककुम्भकपूरकाख्यविशेषत्रयमभ्यासाख्यगुणयोगेन तेषां दीर्घसूक्ष्मत्वं चोक्तम् इदानीं केवलकुम्भकरूपं प्राणायामस्य चतुर्थं विशेषमाह ।

बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः ॥ ५१ ॥

बाह्याभ्यन्तरविषयकौ बाह्याभ्यन्तरवृत्ती पूर्वसूत्रोक्तौ रेचकपूरकौ तयोराक्षेपी अतिक्रमी तावतिक्रम्य त्यक्त्वा स्वयमेव केवलो वर्त्तत इति यावत् । एवं भूतो यः प्राणायामः स चतुर्थ इत्यर्थः । अस्य च केवलकुम्भक इति संज्ञा वसिष्ठवाक्याद्व्यक्तीभविष्यति । पूर्वसूत्रोक्तस्तम्भवृत्तिस्तु नियमेन रेचकपूरकयोरन्तराल एव वर्त्तत इति न तदतिक्रमी, रेचकपूरकविषयातिक्रमस्यापि लाभाय विषयघटितं लक्षणमुक्तम् । न तु रेचकपूरकातिक्रमीत्येवं सूचितम् । अयं च कुम्भको न रेचकपूरकदेशेन परिच्छिन्नः व्यापकत्वात्, नापि कालसंख्याभ्यां परिच्छिन्नः स्वेच्छया माससंवत्सरादिकालस्थायित्वात् । स च प्राणायामो ध्रुवस्य विष्णुपुराणे श्रूयते । तस्य हि तपसि प्राणनिरोधेन सर्वजीवप्राणनिरोधोऽभवदिति तत्रोक्तम् । अतस्तस्य केवलकुम्भक आसीदिति । अयं चतुर्थः प्राणायामः सोपायो वसिष्ठसंहितायामुक्तः । यथा ।

प्रस्वेदजनको यस्तु प्राणायामो हि सोऽधमः ।
मध्यमः कम्पनात्प्रोक्त उत्थाने चोत्तमे भवेत् ॥
पूर्वपूर्वं प्रकुर्वीत यावदुत्तमसंभवः ।
निश्वासोच्छ्वासको देहे स्वाभाविकगुणावुभौ ॥
तथापि मध्यतस्तेन प्राणायामोत्तमेन हि ।
तयोर्नाशे समर्थः स्यात् कर्त्तुं केवलकुम्भकम् ॥

रेचकं पूरकं त्यक्त्वा सुखं यद्वायुधारणम् ।
प्राणायामोऽयमित्युक्तः स वै केवलकुम्भकः ॥
सहितं केवलं वापि कुम्भकं नित्यमभ्यसेत् ।
यावत्केवलसिद्धिः स्यात् तावत्सहितमभ्यसेत् ॥
केवले कुम्भके सिद्धे रेचपूरकवर्जिते ।
न तस्य दुर्लभं किंचित् त्रिषु लोकेषु विद्यते ॥

इति । आकाशगमनादिशक्त्याविर्भावेन कामगमत्वादिकं स्यादित्यर्थः । चतुर्थस्योत्पत्तिक्रमं कथयति । देशकालेति । बाह्यविषयो रेचको देशकालसंख्याभिरादौ परिदृष्टः पश्चाच्च देशादिभिः सहैवाक्षिप्तोऽतिक्रामितो भवतीति शेषः । अतश्च सूत्रे देशवाचको विषयशब्दः कालसंख्ययोरप्युपलक्षणमित्याशयः । तथा आभ्यन्तरविषयः पूरकोऽपि देशादिभिरादौ परिदृष्टः पश्चाद्देशादिभिः सहैव सोऽप्याक्षिप्तो भवति । तच्चाक्षिप्तमुभयथा दीर्घसूक्ष्मो द्विविधो दीर्घसूक्ष्मश्चिरकालदेशादिभिरभ्यस्तो रेचकपूरकावर्तित यावत् । तत्पूर्वकः सदुभयाक्षेपपूर्वकस्तदुभयमाक्षिप्यैवेति यावत् । अवान्तरालिकभूमिजयात् कालक्रमेण न तु शीघ्रमुत्पद्यमान एवंभूत उभयोः श्वासप्रश्वासयोः गतिविच्छेदश्चतुर्थः प्राणायाम इत्यर्थः । स्तम्भवृत्त्याख्यतृतीयप्राणायामात् मिश्रकुम्भकादस्य वैलक्षण्यमाह । तृतीयस्त्विति । तृतीयस्तु गत्यभावः स्तम्भवृत्तिर्विषयेण देशेन तदुपलक्षितकालसंख्याभ्यां चानालोचितोऽनवधारितः सकृदारब्धोऽभ्यासबाहुल्यं विनैवोत्पद्यमानश्च भवति । तथा स एव तृतीयो देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मश्च भवतीति सामान्यविशेषाभ्यां तृतीयस्य रूपद्वयमुक्तम् । चतुर्थस्य तद्विपरीततामाह । चतुर्थस्त्विति । चतुर्थस्तु श्वासप्रश्वासयो रेचकपूरकयोर्देशाख्यविषयावधारणानन्तरं क्रमिकभूमिजयाद्धेतोः पूरकरेचकाक्षेपपूर्वको गत्यभाव इत्ययं चतुर्थप्राणायामे तृतीयाद्विशेष इत्यर्थः । प्राणायामस्य चापरे सगर्भागर्भादयो विशेषाः पुराणादिषु द्रष्टव्याः । ‘जपध्यानयुतो गर्भो त्वगर्भस्तद्विवर्जित’ इत्यादिवाक्यैरिति दिक् । योगे जनयितव्ये प्राणायामस्य व्यापारं तत्सिद्धिसूचकमाह ।

ततः क्षीयते प्रकाशावरणम् ॥ ५२ ॥

ततः प्राणायामात् । सूत्रं व्याचष्टे । प्राणायामानिति । विवेकज्ञाना वरणीयं विवेकज्ञानावरकम्, अथवा कोपनीयेत्यादिवत् अत्रापि कर्त्तरि कृत्यप्रत्ययः भव्यगेयप्रवचनीयादीनां कर्त्तरि निपातनस्य दिङ्मात्रप्रदर्शनपरत्वात् । कर्मेति । कर्माधर्मः तस्य ज्ञानप्रतिबन्धकत्वमेव ज्ञानावरकत्वम् एतादृशं कर्मक्षीयतइत्यर्थः । कर्मणो ज्ञानावरकत्वे पूर्वाचार्यवाक्यं प्रमाणयति । यत्तदाचक्षतइति । यत्तत्कर्म एवमाचक्षते । महामोहो रागस्तन्मयेन तत्प्रचुरेणेन्द्रजालतुल्येन शब्दादिविषयेण द्वारेण प्रकाशशीलमपि बुद्धिसत्त्वमावृत्य तदेव कर्मैवाकार्ये संसारहेतुव्यापारे एव नियुङ्क्तइत्यर्थः । दुर्बलं प्रकाशावरणाक्षमं भवति । तथा प्रतिक्षणं क्षीयते ऽपक्षीयते चेत्यर्थः । तदुक्तं मनुना ।

> दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः ।
> तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥

इति । दोषाः पापानि तत्कार्ये तमोमलविपर्ययौ च । तपः पापनाशकं कर्म । पापक्षये सति यद्भवति तदाह । तत इति । ततः पापाख्यकारणाभावान्मलानां तमसां तत्कार्यविपर्ययाणां चापगमे ज्ञानदीप्तिश्चेत्यर्थः । ननु तपसैव पापक्षय इत्युक्तं तर्हि किं प्राणायामेनेति चेन्न । ज्ञानावरकपापक्षये प्राणायामस्य श्रेष्ठोपायत्वात् । अत एव पूर्वपादे प्रकृष्टाधिकारिणः प्राणायाम एव साधनमुक्तं विक्षेपकतया तपोन्तराभावेपि तेनैव योगनिष्पत्तिसंभवादिति । अन्यच्च भवतीत्याह ।

धारणासु च योग्यता मनसः ॥ ५३ ॥

प्राणायामाभ्यासादेवेति सूत्रेण सहान्वयः । प्रच्छर्दनेत्यादिप्रथमपादीयसूत्रेण प्राणायामस्य धारणायोग्यतारूपस्थितिहेतुत्वावचनादित्यर्थः । एतेन तस्मिन्नपि सूत्रे पूरकादित्रयात्मकः प्राणायाम एवोक्त इत्यवधारणीयम् । प्रत्याहारसूत्रमवतारयति । अथ क इति ।

स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकार इन्द्रियाणां प्रत्याहारः ॥ ५४ ॥

इन्द्रियविषयासंप्रयोगकाले इन्द्रियाणां चित्तस्वरूपानुकारितेव या भवति सा इन्द्रियाणां प्रत्याहार इत्यर्थः । जितेन्द्रियस्य हि ध्यानकाले चक्षुरादीन्यपि ध्येयवस्त्वाकाराणि चित्तेन तुल्याकाराणीव भवन्ति न स्वातन्त्र्येण विषयान्तरं मनसैकीभूय संकल्पयन्ति । तथा चित्ते निरोधोन्मुखे सति प्रयत्नान्तरं विनैव निरुद्धानि भवन्ति अतस्तस्येन्द्रियाणि चित्तानुकारीणीत्युच्यन्ते । अजितेन्द्रियस्य तु चक्षुरादीनि तदानीमपि रूपादिषु मनसेव धावन्ति अतश्चित्तमेवेन्द्रियानुकारि भवति ।

इन्द्रियाणां हि सर्वेषां यद्येकं क्षरतेन्द्रियम् ।
तेनास्य क्षरति प्रज्ञा दृतेः पादादिवोदकम् ॥

इति स्मृतेरित्याशयः । अजितेन्द्रियस्यापि इन्द्रियाणि विषयभोगकाले चित्तानुकारीणि भवन्त्येवेति तद्व्यावर्त्तनाय स्वविषयासंप्रयोग इत्युक्तं ध्यानकाले च चाक्षुषादितुल्या वृत्तिश्चित्तस्यैव भवति न तु चक्षुरादीनां तेषां तु तदतिरिक्तवृत्त्यभावमात्रमतोऽनुकार इवेत्युक्तम् । अतएव ।

पिबन्निव च चक्षुर्भ्यां पादौ संवाहयन्निव ।
चित्तेन्द्रियैकयतो ध्यायेत्तन्मूर्त्तिं विजितेन्द्रियः ॥

इत्यादिस्मृतिष्वपीवशब्द एव प्रयुक्त इति । तदेतद्व्याचष्टे । स्वविषयेति । इवेतीत्यन्तस्य एव प्रत्याहार इत्यागामिनान्वयः । अनुकार्यस्य कार्यरूपं लक्षणमाह । चित्तनिरोध इत्यादिना अपेक्षन्त इत्यन्तेन । चित्तस्य वृत्तिनिरोधकाले यत्स्वयमेवेन्द्रियवृत्तिनिरोधो भवति इदमेव परमवश्यत्वं प्रत्याहारकार्यत्वात् तल्लक्षणमित्याशयः । निरुद्धानि भवन्तीति शेषः । नेतरेन्द्रियजयवदिति । इतरे उक्तपरमवश्यत्वादतिरिक्ता द्वितीयसूत्रवक्ष्यमाणा इन्द्रियजयाः । तेषु सत्स्वपि स्वनिरोधार्थं यथेन्द्रियाणि प्रत्याहारादिकमपेक्षन्ते नैवं यथोक्तप्रत्याहारे सति स्वनिरोधार्थं चित्तनिरोधातिरिक्तमपेक्षन्त इत्यर्थः । इन्द्रियाणां चित्तानुकारं दृष्टान्तेन प्रतिपादयति ।

Digitized by Google

यथा मध्वित्यादिना निरुद्धानीत्यन्तेन । दार्ष्टान्तिके दृष्टान्तोक्तोत्पतनतुल्यो निरोधः । तेन च निवेशनतुल्यं ध्यानमप्युपलक्षणीयम् अन्यथा दृष्टान्तदार्ष्टान्तिकयोः साधर्म्यादिप्रदर्शने न्यूनतापत्तेः । इत्थ प्रत्याहार इति । पुरैव व्याख्यातम् । सोयं प्रत्याहारः सप्रयोजनो विष्णुपुराणे प्रोक्तः ।

शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित् ।
कुर्याच्चित्तानुकारीणि प्रत्याहारपरायणः ॥
वश्यता परमा तेन जायते निश्चलात्मनाम् ।
इन्द्रियाणामवश्यैस्तैर्न योगी योगसाधकः ॥

इति । अतश्च प्रत्याहार इन्द्रियधर्म इति । योगे प्रत्याहारस्यावान्तरव्यापारभूतं तत्सिद्धिसूचकमाह ।

ततः परमवश्यतेन्द्रियाणाम् ॥ ५५ ॥

ततः प्रत्याहारादिन्द्रियाणां परमो जयो भवतीत्यर्थः । तत्र परमजयप्रतिपादनार्थं बहुविधान् पक्षानाह । शब्दादिष्वित्यादिना । व्यसनशब्दार्थमाह । सक्तिरिति । सक्तिः सङ्गो येन शास्त्रविरुद्धेपि विषयभोगे इन्द्रियाणि प्रवर्त्तन्ते । व्यस्यति क्षिपति निरस्यत्येनं श्रेयस इति व्युत्पत्त्येति शेषः । एवं च सति शास्त्राविरुद्धा प्रतिपत्तिरेवभोगो न्याय्या एवेति पूर्वोक्तेन केचिदित्यनेनान्वयः । मतान्तरमाह । शब्दादीति । इन्द्रियविषययोः संप्रयोगे तदपारतन्त्र्यमित्यर्थः । मतान्तरमाह । रागद्वेषेति । रागद्वेषनिमित्तकाभ्यां सुखदुःखाभ्यां शून्यो विषयभोगस्तथेत्यर्थः । तेनाभिमानिकसुखदुःखशून्यत्वं लब्धं कायिकसुखदुःखानां योगावस्थां विना परिहारासंभव इति भावः । एतेषु पूर्वपूर्वस्मादुत्तरोत्तरमुत्कर्षेपि नैते परमा इन्द्रियजया एतावन्मात्रमिन्द्रियवृत्त्यनिरोधात् । अतः सूत्रकारसंमतं परममाह । चित्तैकाग्र्यादिति । चित्तैकाग्र्याद्धेतोरिन्द्रियाणां या ऽप्रतिपत्तिर्वृत्तिनिरोधस्तद्रूपावश्यता स एव जय इति जैगीषव्य इत्यर्थः । तत इति । इयं च वश्यता ततो हेतोः परमा वश्यता । यत् यतः चित्तनिरोधेनेत्यादिरर्थः । कालादिष्वावर्त्तनाय प्रयत्नकृतमिति । तथा च पूर्वसूत्रोक्तचित्तानुकारस्य फलं लक्षणं च । सा

समाधौ चित्तेन सहेन्द्रियाणां वृत्तिनिरोधयोग्यता सैव परमवश्यताख्यो जयो ऽनेन सूत्रेणोक्त इति । एतादृशवश्यताभावेनैव सौभरिप्रभृतीनां योगभ्रंशादियं वश्यतापि योगनिष्पत्तिहेतुः । अत एव गीता ।

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥
तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥

इति । तदेवं ज्ञानसाधनमुखेन योगस्यापि बहिरङ्गानि यमादिप्रत्याहारान्तानि साङ्गान्यत्र पादे प्रोक्तानि धारणादित्रयस्य सिद्धिबाहुल्यात्तु सिद्धिभिः सह तत्प्रतिपादनार्थमेव समयस्तृतीयपादो भविष्यति ॥

इति श्रीपातञ्जलभाष्यवार्त्तिके विज्ञानभिक्षुनिर्मिते साधननिर्देशो नाम द्वितीयः पादः ॥ २ ॥ (शेषमग्रे)

काशीस्वराजकीयप्रधानपाठशालायां { सांख्ययोगाध्यापकस्तात्याशास्त्र्यपरनामा पटवर्धनोपाह्वो रामकृष्णशास्त्री । ज्योतिषशास्त्राध्यापकः केशवशास्त्री च ।

सटीकसंक्षेपशारीरकम् ।

(*Continued from page* 168. VOL. VI.)

टी० ॥ वक्तृत्वमेव घटते, सामर्थ्यमेकरसमिति चोक्तं स्वमतेन वैदिकलिङादेरुपपादयति । श्रेयोहेतुत्ववाचीति । वैदिकलिङादिरिति शेषः । तदा तस्य लिङादेरभिधाने स्वार्थबोधने एकरूपा शक्तिर्भवति । एवं सति प्रमाणरूपस्य वेदस्य कारकत्वदोषोऽपि परिहृतः स्यादित्याह । न तु भवतीति । अयं लिङादिः तदा श्रेयोहेतुत्ववाचित्वे प्रवृत्तेः कारको न भवति प्रवर्तको न भवति । तस्याः श्रेयोहेतुत्वज्ञानेनान्यत एव सिद्धत्वादित्यर्थः । ननु श्रेयोहेतुत्वज्ञानं वा लिङ्व्यापारः कल्प्यतां प्रवर्तना वा को विशेष इत्याशङ्क्याह । श्रेयोहेतुश्चेति । यदा लिङादेः श्रेयोहेतुत्वं वाच्यं भवति तदा स श्रुतिवचसि पौरुषेये च तुल्यस्तथा च लिङादेः श्रेयोहेतुत्वबोधनं नापूर्वमिति न प्रेक्षावतोऽत्यं तस्येत्यर्थः ।

किञ्च मन्मते गामानयेत्यादिवाक्ये लिङादेः श्रेयोहेतुत्वबोधकत्वं क्लृप्तं न तु शब्दभावनाबोधकत्वं न चान्यत्र धात्वर्थे वा त्वन्मते श्रेयोहेतुत्ववत् शब्दभावना क्वचिदपि क्लृप्तास्तीति प्रमेयस्वरूपं प्रमाणस्य तद्बोधकत्वं च अलौकिकमेव कल्प्यं तच्चायुक्तं क्लृप्तेनैवोपपत्ताविन्याह । क्लृप्तश्चेति । असौ श्रेयोहेतुः प्रमाणस्य तद्बोधनव्यापारश्च । लिङ्निबद्धो लिङ्व्यापाररूपेत्यर्थः । इदमत्राभिप्रेतम् । अस्ति तावत्प्रेक्षावतामपि भोजनादौ प्रवृत्तिः सा तावच्छब्देन वा पुंसा वा केन चित्प्रेर्यमाणस्य न भवति अपि तु हितसाधनत्वज्ञानादिति भवतोऽपि संप्रतिपन्नम् । बालस्य स्तन्यदाने मातृप्रवृत्तिरपि तदिष्टमावश्यकं च बालजीवनाद्युद्दिश्यैव न तु तत्प्रेरणयैव, भोजनादौ क्लृप्तहेतोरेव तस्यां कल्पयितुमुचितत्वाच्च । अतः प्रवर्तनायाः क्वाऽपि प्रवृत्तिहेतुत्वस्याक्लृप्तत्वाच्च मानान्तरवृत्त्या तदनुमानमिति न लिङादेः प्रवर्तनासामान्येऽपि लोकतः शक्तिः सिद्ध्यत्यपि तु श्रेयोहेतुत्व एवेति कथं वैदिकलिङादिः प्रवर्तनां प्रतिपादयेत् । तदभावे वा कथं तस्य प्रवर्तना व्यापारः कल्प्यः । व्यापारोऽपि निरवयवे विभौ शब्दे परिणामः परिस्पन्दो वा न संभवति, न चान्यः कश्चित्तद्व्यापारो निरूपयितुं शक्यः, एवं शब्दभावनात्वविशेषोऽपि लिङादितो न सिद्ध्येत् तस्य प्रवर्तनासामान्यनिष्ठत्वात् वाच्यार्थसंबन्धितयाऽन्यतोऽनवगते तस्मिन् लक्षणानुपपत्तेश्च । तस्मादप्रामाणिकमिदं कल्पनमिति श्रेयोहेतुत्वमेव सर्वत्र लिङाद्यर्थ इत्यर्थ इति ॥ ३९८ ॥

मू० ॥ धात्वर्थतोऽन्या न च भावनाऽस्ति
याम् भावनां वक्तुमलं लकारः ॥
धात्वर्थमुद्दिश्य न पुंप्रयत्नो
लोके यतो भाति निरूपणायाम् ॥ ३९९ ॥

टी० ॥ एवं लिङ्त्वाद्याकारेण शब्दभावना लिङाद्यर्थ इति भाट्टमतं निराकृत्य लिङ्त्वाकारेणाख्यातार्थोऽर्थभावनेति तन्मतमर्थभावनाया अप्रामाणिकत्वेन दूषयति । धात्वर्थत इति । भावना अर्थभावना । लकारः लडादिप्रत्ययः । न तावत्प्रयत्नरूपार्थभावनायां प्रत्यक्षं प्रमाणं

भवति सुखदुःखादिवत् प्रयत्नरूपस्य कस्य चिदननुभवात् । अत एव करोमीति प्रत्यक्षसिद्धः स इति निरस्तम् । हस्तादिव्यापारदशायामेव नियमेन भवतोऽस्यानुभवस्य तन्मात्रविषयत्वात् । अत एव रथो गच्छतीत्याद्यनुभवोऽपि बाह्यव्यापाराभावेऽप्यान्तर उद्योगरूपोऽर्थः कश्चिदनुभूयत इति चेच्च । तस्यापि शरीरान्तःप्रवेशचेष्टाविषयत्वादतो न प्रत्यक्षं तत्र प्रमाणमित्यर्थः । ननु प्रयत्नवदात्मसंयोगासमवायिकारणकत्वाच्चेष्टायास्तया सोऽनुमीयत इति चेत्तत्राह । धात्वर्थमुद्दिश्येति । चिकीर्षानन्तरमेव चेष्टादर्शनेन तदाश्रयसंयोगो मनःसंयोगविशेषो वा तत्रासमवायिकारणं भविष्यतीति धात्वर्थहेतुतयाऽपि लोके वर्णितप्रकारेण विचारे क्रियमाणे प्रयत्नो नाम कश्चिदतो न भाति ततो भावना नास्तीति संबन्धः । यत्त्वर्थोत्पादानुकूलः कर्तृव्यापारो भावना स च धात्वर्थादन्यः । अन्यथाऽऽख्यातस्यानर्थक्यापत्तेः पाकयागादेर्धात्वर्थस्य पचियज्यादिधातुभिरेवाभिहितत्वात्, स च रथो गच्छतीत्यादावप्यस्त्येव, एवं परस्परव्यावृत्तधात्वर्थेभ्यः सकलधात्वर्थानुगतत्वादपि तस्य ततोऽन्यत्वम्, प्रतीयते हि पचति यजेतेत्यादिप्रयोगे सर्वत्र करोत्यर्थः, सैव कृतिर्न प्रयत्न इति । तच्च । न तावत्प्रत्ययार्थत्वाय धात्वर्थादन्यो व्यापार एषितव्यः लिङादिरूपस्याख्यातस्यावश्यकश्रेयःसाधनताभिधायित्वेनातदर्थत्वात्, लिङादेरपि धात्वर्थगतसाध्यताभिधायित्वात्, अत एव यजेतेत्यादिना यागादेः साध्यत्वविशिष्टश्रेयःसाधनत्वं प्रतीयते अन्यथा ततः प्रवृत्त्यनुपपत्तेः । काष्ठैः पचतीति काष्ठादेः पाककरणत्ववत्राप्यनुगततया तस्य धात्वर्थात्पृथग्व्यापारत्वम् आख्याताभिधेयस्य धर्ममात्रत्वेनाप्यनुगतत्वोपपत्तेः, ततो नास्तिभावनेति भावः ॥ ३९९ ॥

मू० ॥ न कर्मकाण्डेऽपि ततो नियोगो
न भावनाप्युक्तनयेन तस्मिन् ॥
न तद् द्वयं वेदशिरःसु तस्मा-
त्ततो न कार्यार्थपराणि तानि ॥ ४०० ॥

टी० ॥ एवं वेदान्तानां सिद्धब्रह्मपरत्वमुदासाय नियोगरूपे कार्ये

भावनारूपे वा पर्यवसन्नो वेद इति प्रत्यवस्थानं कर्मकाण्डस्यापि न तद-र्थत्वं तद्गतलिङ्गादीनां श्रेयःसाधनतार्थत्वेन तदन्वितार्थपरत्वात्तस्येत्युपपा-दनेन प्रत्युक्तम् । भव्याय भूतमिति भाष्याशयस्य प्रागेवोक्त इति न तद्बलादपि कार्यपरत्वमित्यभिप्रेत्योपसंहरति । न कर्मकाण्डेऽपीति । ततः प्राक्वर्णितन्यायाच्च नियोगोऽस्तीति शेषः । तस्मिन् कर्मकाण्डे । यदा कर्मकाण्डेऽपि तयोरियं गतिस्तदाखण्डब्रह्मपरे वेदान्ते तदुभयं नेति किमु वक्तव्यमित्याशयेनाह । न तद् द्वयमिति । नियोगो भावना चेत्यर्थः । तर्हि द्रष्टव्यः पश्येदित्यादिज्ञानविधीनां का गतिरित्याशङ्क्याह । तत इति । ज्ञानविधेरप्युपरिष्टान्निरसिष्यमाणत्वाच्च तद्विधिपरं वेदशिरः किं त्वख-ण्डब्रह्मपरमिति भावः ॥ ४०० ॥

मू० ॥ अपि च प्रतिषेधचोदना-
विषयः स्यात्प्रतिषिद्धकर्मणः ॥
फलगर्द्धिनिवृत्तिरेव सा
न नियोगो न च तस्य गोचरः ॥ ४०१ ॥

टी० ॥ एवं वेदान्तानां कार्यपरत्वं निराकृत्य ब्रह्मपरत्वं स्थापि-तम् । इदानीं वेदान्तवाक्यं कार्यपरं वेदवाक्यत्वादग्निहोत्रादिवाक्यव-दित्यनुमानं ब्राह्मणं न हन्यात्सुरां न पिबेदित्यादिप्रतिषेधवाक्ये व्यभि-चारेण दूषयति । अपि चेति । प्रतिषेधचोदना प्रतिषेधवाक्यं प्रतिषिद्ध-कर्मणः प्रतिषिद्धस्य हननादेः या फलगर्द्धिनिवृत्तिः फलाकाङ्क्षौदासीन्य-रूपोपरतिः सैव प्रतिषेधचोदनाया विषयः* स्यात् । ततः किं तत्राह । सेति । सा निवृत्तिः नियोगः कार्यं न भवति प्रागभावरूपत्वेन तस्याः सिद्धस्वभावत्वात् । तर्हि किं तद्विषयो विधेयः तथा च निषेधानां विधिनिष्ठता नेत्याह । न चेति । तस्य नियोगस्य गोचरो विषयः तस्या-ननुष्ठेयत्वात् । नियोगग्रहणं भावनाया अप्युपलक्षणम् । नापि भावना-भाव्यो वा तथेत्यर्थः । निषेधवाक्यस्य हि निषिध्यमानहननादिगतश्रेयः-साधनत्वाभाव एवार्थः । न च स नियोगो भवति । न वा तस्य गोचरः

* चोदनाविषयः । पा ०२ ॥

विधेर्भावार्थेनोपरन्त्वनियमादिति न तद्वाक्यं कार्यपरमतस्तत्र वेदवाक्यत्वं व्यभिचरतीत्यर्थः ॥ ४०१ ॥

मू० ॥ नञः स्वसंबन्धिपदार्थवस्तुनो
निवृत्तिरर्थः सहजप्रसिद्धितः ॥
अनीक्षणादौ व्रतशब्दसंगते:
परप्रयुक्ता खलु मानसी क्रिया ॥ ४०२ ॥

टी० ॥ ननु निवृत्तिरेव नञर्थ इति कथम्, यावता नेक्षेतोद्यन्तमित्यत्रेक्षणविरुद्धमानसक्रियाविधिर्यथाऽऽश्रीयते तद्वद्धननादिविरुद्धक्रिया प्रकृतेऽपि विधीयतामित्याशङ्क्य दृष्टान्तवैषम्येण परिहरति । नञ इति । स्वसंबन्धि यत्पदं तदर्थः स एव वस्तु तस्येत्यर्थः । नञ्पदं येन पदेन संबध्यते तस्य तदर्थाभाव एव सहजोऽर्थो मुख्योऽर्थः, कुतः वृद्धव्यवहारे तथा प्रसिद्धितः, न तद्विरुद्धत्वादिः, नानार्थत्वप्रसङ्गात् । तच्चैकस्य शब्दस्य सति गत्यन्तरेऽनुपपन्नम् । एतदुक्तं भवति । न हन्तव्य इत्युक्ते स्वरसतः स्वसंबन्धिनिवृत्तेरेव पुरःस्फूर्तिदर्शनात्सैवार्थः न पर्युदासस्तथेति मुख्यार्थसंभवे नार्थान्तरं कल्प्यमित्यर्थः । कथं तर्हि नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदा चन । नोपरक्तं न वारिस्थं न मध्यं नभसो गतमित्यादौ पर्युदासाश्रयणमिति चेद्बलवद्बाधवशादित्याह । अनीक्षणादाविति । नेक्षेतेत्यादौ मानसी क्रिया ईक्षणविरुद्धा मानसी क्रिया परप्रयुक्ता खलु मुख्यार्थपरित्यागहबलवद्बाधनिमित्तेव । किं तद्बलवद्बाधकं व्रतशब्दसंगतेस्तस्य वाक्यस्योपक्रमे अथातः प्रजापतिव्रतमिति व्रतशब्दश्रवणाद् व्रतस्य चानुष्ठेयत्वादनुष्ठेयपरं तत्प्रकरणं नञो मुख्यार्थस्याभावस्याननुष्ठेयत्वात्तदनुष्ठानयोग्या मानसी क्रिया तत्र लक्ष्यत इति तद्वाक्यं विधिपरम्, न च तथात्र मुख्यार्थान्वये किं चिद्बाधकमस्तीति नैतद्विधिपरमित्यर्थः ॥ ४०२ ॥

मू० ॥ अपि च प्रतिषेधचोदना
न तु भिद्येत भवन्मते विधेः ॥

Digitized by Google

विधिरेव तु चोदनाखिला

न हि वेदे वचनं निवर्त्तकम् ॥ ४०३ ॥

टी० ॥ किं च प्रतिषेधवाक्यस्यापि निवृत्तिक्रियाविधिपरत्वे सर्वमेव वाक्यं विधिपरमिति विधिप्रतिषेधविभागो न स्यादस्ति च सः, फलबुद्धिप्रमेयाधिकारिबोधकभेदतः । पञ्चधाऽत्यन्तभिन्नत्वाद्भेदो विधिनिषेधयोरिति सकलमहाजनादृत इत्याशयेनाह । अपि च प्रतिषेधचोदनेति । विधेरिति पञ्चमी । कुत इत्यत आह । विधिरेव त्विति । भवन्मत इत्यनुषङ्गः । ननु प्रवर्त्तको विधिः निषेधवाक्यं च निवर्त्तकमिति कथं तस्य विधित्वं तत्राह । न हि वेद इति । अत्रापि भवन्मत इत्यनुषञ्जनीयम् । निषेधेऽपि विधीयमानायाः क्रियायाः प्रवृत्तिविशेषत्वाद भवन्मते तद्वाक्यं प्रतिषेधनिष्ठमिति भावः ॥ ४०३ ॥

मू० ॥ प्रतिषेधवाक्यवदतः सकलं

विधिशून्यमेव फलवद्भवतु ॥

वचनं त्रयीशिरसि तत्त्वमसि-

प्रभृति प्रतीचि तमसोऽपहतेः ॥ ४०४ ॥

टी० ॥ एवं संक्षेपेण प्रतिषेधवाक्यस्य सिद्धनिष्ठत्वमुपपाद्य तद्वदेव समस्तं वेदान्तवाक्यं विधिशून्यमेव फलपर्य्यवसायि प्रमाणमस्तु इत्युपसंहरति । प्रतिषेधवाक्यवदिति । अत उक्तन्यायात् । तत्त्वमसिप्रभृति तत्त्वमस्यादिवचनमिति संबन्धः । फलवत्त्वमेवाह । प्रतीचीति । तमसोऽनाद्यज्ञानस्य अपहतेर्बाधनादित्यर्थः ॥ ४०४ ॥

मू० ॥ नामधातुसहितो नञिष्यते

पर्युदासविषयो मनीषिभिः ॥

न प्रसक्तविनिवृत्तिवाचको-

ऽब्राह्मणादिषु तयोरसम्भवात् ॥ ४०५ ॥

Digitized by Google

टी० ॥ एवं नञो मुख्यार्थं कृत्वा प्रसज्यप्रतिषेधार्थत्वात् तस्य च कार्यविषयत्वासंभवात्तन्नीतवाद्यावनुष्ठेयार्थप्रकरणसमभिव्याहारबलेन नञः पर्युदासलक्षणया ईक्षणविरुद्धमानसक्रियार्थत्वाद्विधेयवाक्ये न तोदृत्रस मुख्यार्थत्यागनिमित्तस्य कस्य विद्यमानत्वाद्विधेयवाक्यं निषेधनिष्ठं न कार्यनिष्ठं तद्वदेव वेदान्तवाक्यं सर्वमेव ब्रह्मनिष्ठमित्युक्तमिदानीं नञर्थे भट्टाभ्युपगमविशेषं दूषयितुमनुवदति । नामधातुसहित इति । सुबन्तेन धातुना वा सहित इत्यर्थः । न केवलं प्रसक्तस्याऽभाव एव नञो मुख्यार्थोऽपि तु तदन्यतद्विरोधिनावपि । तत्र नामधातुसहितो नञ् पर्युदासविषय इष्यते । पर्युदासो नाम नञ्संबन्धिपदार्थपरिवर्ज्जनम् । नामधातुभ्यां योगे प्रसक्तस्य विनिवृत्तिरभावस्तन्मात्रवाचको न कुतः अब्राह्मणादिषु यत्र अब्राह्मणास्तिष्ठन्ति म्लेच्छोऽयमधर्मोऽत्यादौ ब्राह्मणातिरिक्ते धर्मविरुद्धे पापे च ततः प्रतीतिदर्शनादित्यर्थः । तदुक्तम् । नामधात्वर्थयोगी तु नैव नञ् प्रतिषेधकः । वदत्यब्राह्मणाधर्मावन्यमात्रविरोधिनाविति ॥ ४०५ ॥

मू० ॥ अब्राह्मणाधर्मगिरोर्नञेष
नामान्वयाद्धाश्रितपर्युदासः ॥
अन्यं विरुद्धं च सदाऽभिधत्ते
नोद्यन्तमित्यादिषु धातुयोगात् ॥ ४०६ ॥

टी० ॥ उक्तमेव दृष्टान्तं प्रकटयन्नामधातुयोगिनोऽपि नञस्तदन्यविरुद्धार्थत्वे क्रमेणोदाहरणमाह । अब्राह्मणेति । आश्रितोऽर्थत्वेन स्वीकृतः पर्युदासो येन नञा सः । नोद्यन्तमिति । नेक्षेतोद्यन्तमादित्यमित्यादिष्वित्यर्थः । एष नञ् धातुयोगाद्धातुरीक्षणं तत्संबन्धात् पर्युदासवृत्त्या विरुद्धमीक्षणविघातकमन्यसंकल्पं सदाभिधत्त इति योजना ॥ ४०६ ॥

मू० ॥ नोद्यन्तमित्यत्र नञेक्षणार्थे-
समीपकार्यान्तरमुच्यते हि ॥
ततश्च नेक्षेत इतीदृशी स्या-
त्संकल्पना संनिहितत्वहेतोः ॥ ४०७ ॥

टी ॥ नन्वत्र वाक्ये कीदृशः पर्युदासो नञा लभ्यते तमाह । नोद्यन्तमिति । अत्रास्मिन्वाक्ये ईक्षणार्थस्य ईक्षधात्वर्थस्य समीपं संबन्धि यत्कार्यान्तरम् ईक्षणविरुद्धम् ईक्षणकार्यात्कार्यान्तरं धातुयोगिनापि नञा तदर्थविरुद्धमेव वस्त्वन्तरमभिधीयते नान्यदिति समीपेत्युक्तम् । तदेव विविच्य दर्शयति । ततश्चेति । नेक्षिष्य इतीदृशी संकल्पनाऽस्मिन्वाक्ये नञभिधेया स्यादीक्षणविरोधिसंकल्पस्येक्षणाविरोधितया तत्संबन्धित्वेन सन्निहितत्वाद्धेतोरित्यर्थः ॥ ४०७ ॥

मू० ॥ द्विजं न हन्यान्न कलञ्जमद्या-
दित्यादिवाक्ये विधिनास्य योगात् ॥
प्रसज्यमानार्थनिवृत्तिमात्रं
नञोऽर्थ इत्याश्रितमादरेण ॥ ४०८ ॥

टी० ॥ क्व तर्हि प्रसज्यप्रतिषेधावकाशस्तमाह । द्विजं न हन्यादिति । भक्षयेत् । आदिपदेन न सुरां पिबेदित्यादि संगृह्यते विधिना लिङादिपदेनास्य नञः प्रसज्यमानस्य भ्रान्त्या प्रसक्तस्य हननादिगतस्यार्थस्य श्रेयःसाधनत्वस्य निवृत्तिरभावस्तन्मात्रमित्यर्थः द्विजं न हन्यादित्यादिवाक्ये नञो लिङादिसंबन्धवशात्तदर्थस्य श्रेयःसानत्वस्याभावमात्रमर्थ इत्यङ्गीकृतं परैरित्यर्थः ॥ ४०८ ॥

मू० ॥ नाद्यां न हन्यां न पिबेयमित्यपि
वाक्येषु नञ्वत्सु वदन्ति मानसीम् ॥
संकल्परूपां विधिबन्धिनीं क्रियां
नोद्यन्तमित्यादिवचःस्विवापरे ॥ ४०९ ॥

टी० ॥ अत्रापि प्राभाकराणामभ्युपगममाह । नाद्यां न हन्यामिति । अपरे प्राभाकराः नञ्वत्सु न हन्यादित्यादिषु वाक्येषु नाद्यां न हन्यामित्यादिसंकल्परूपां विधिबन्धिनीं विध्यनुबन्धरूपां क्रियां वदन्तीति संबन्धः । तत्र दृष्टान्तो नोद्यन्तमित्यादीति । न हन्यादित्यादावपि हन

नपानादि न कुर्यामिति हननादिक्रियाविरोधिसंकल्पक्रियाविधिर्वाऽर्थ इति प्राभाकरा वदन्तीत्यर्थः ॥ ४०९ ॥

मू० ॥ वाक्येषु नञ्वत्सु निवृत्तिमात्रं
प्रमेयमित्यभ्युपगम्यमाने ॥
प्रत्यक्षमानेन विहन्यते हि
निवृत्तिशास्त्रं न च युज्यते तत् ॥ ४१० ॥

टी० ॥ ननु न हन्यादित्यादौ प्रसज्यप्रतिषेधार्थत्वसंभवे किमिति पर्युदासाश्रयणमित्याशङ्क्य तत्संभवोऽसिद्ध इत्याह । वाक्येष्विति । प्रत्यक्षमानेनेति वक्ष्यमाणविधया श्रेयःसाधनत्वस्य हननादेर्ज्ञानस्याऽऽदेर्वा निवृत्तिरभावः प्रत्यक्षमानेन हि विहन्यत इति नञस्तत्प्रमेयत्वमभ्युपगन्तुं न शक्यतेऽतस्तच्छास्त्रं निवृत्तिशास्त्रमिति न युज्यत इति सर्वमेव शास्त्रं प्रवर्तकमित्यर्थः ॥ ४१० ॥

मू० ॥ प्रवर्तकं वाक्यमुवाच चोदनां
निवर्तकं नैवमुवाच भाष्यकृत् ॥
ततश्च विद्धो न हि चोदनाऽस्ति सा
प्रवर्तिका या न भवेदिति स्थितिः ॥ ४११ ॥

टी० ॥ किं च चोदनेति क्रियायाः प्रवर्तकं वचनमिति शाबरभाष्यकारोऽपि निषेधचोदनाया अपि प्रवर्तकत्वं दर्शयति । विधिनिषेधविभागस्तु धात्वर्थतद्विरोधिक्रियाविधित्वरूपतदवान्तरविशेषनिमित्त इति सापि प्रवृत्तिनिष्ठेत्याशयेनाह । प्रवर्तकमिति । अन्यथा निषेधवचनं निषेधचोदनेत्यपि स ब्रूयान्नैवमवोचदित्याह । निवर्तकमिति । ततः किं तत्राह । ततश्चेति । या प्रवर्तिका न भवेत्सा चोदना न ह्यस्तीति स्थितिरिति विद्ध इति संबन्धः । तथा च न हन्यादित्यादिनिषेधचोदनापि संकल्पक्रियायां प्रवर्तिकेति भावः ॥ ४११ ॥

(शेषमग्रे)

॥ अथ चित्सुखी ॥

॥ तत्र तृतीयपरिच्छेदारम्भः ॥

(*Continued from page* 129. Vol. VI.)

ननु कथमपरोक्षज्ञानजनकता शब्दस्य, तथा सत्यपरोक्षप्रमितिकरणतया प्रत्यक्षान्तर्भावप्रसङ्गात्, धर्माधर्मप्रतिपादकवाक्येष्वदर्शनाच्च ।

न च "दशमस्त्वमसी"ति वाक्यमुदाहरणम्, तत्रापि केवलशब्दस्यापरोक्षज्ञानाजनकत्वात्, इन्द्रियसंनिकर्षस्यापि दशमशरीरगोचरस्य तत्र भावात् ।

न च सत्यपीन्द्रियसंनिकर्षे तस्याहावदर्शनात् पश्चाद्वाक्यशब्दश्रवणस्यैव तस्येति निश्चेतुं शक्यम्, रत्नतत्त्वाधिगमेऽपि तथात्वप्रसङ्गात्, तथाहि सत्यपीन्द्रियसंनिकर्षेऽनधिगतरत्नतत्त्वपरीक्षाशास्त्रः पुष्परागादिभेदं न प्रत्यक्षतः प्रतिपद्यते, अधिगतशास्त्रस्तु तत्तत्त्वं प्रतिपद्यते, न चैतावता शास्त्रं तत्र प्रत्यक्षप्रमितिजनकमभ्युपेयते ।

यत् पुनरिह कैश्चिदुच्यते विमतं शाब्दज्ञानमपरोक्षम् अपरोक्षविषयत्वात् सुखज्ञानवदिति, तत्र किमिदमपरोक्षत्वं शब्दज्ञानस्य, किं साक्षात्कारत्वजातिमत्त्वमपरोक्षव्यवहारहेतुत्वं वा ।

नाद्यः, अयं घट इति शब्देनैकान्तात्, प्रतिपत्तिव्यवधानमन्तरेण तद्विषयत्वमपरोक्षविषयत्वमिति चेत्, न, अयं पर्वतोऽग्निमानिति परोक्षापरोक्षविषयानुमानिकज्ञाने व्यभिचारात्, अपरोक्षमात्रविषयत्वं विवक्षितमिति चेत्, न, सुखेच्छायां व्यभिचारात्, तज्जनकज्ञानस्य तद्विषयत्वादिच्छायास्तद्विषयत्वमुपचर्यत इति चेत्, मैवम्, तथाप्यविद्यायां व्यभिचारात्, स्वतोऽपरोक्ष आत्मैवाविद्याया आश्रयो विषयश्चेति भवद्भिरभ्युपगमात् ।

नापि द्वितीयः, अविद्यायामेव व्यभिचारात्, तस्या अपरोक्षात्मविषयत्वेऽपि तद्विपरीतव्यवहारहेतुतया तद्व्यवहारहेतुत्वाभावात्, अपरोक्षव्यवहारहेतुत्वमेव हेतुरस्ति चेत्, न, स[illegible]त्, प्रति·

प्रयोगसंभवाच्च, विवादाध्यासितः शब्दोऽपरोक्षज्ञानजनको न भवति शब्दत्वाज्ज्योतिष्टोमादिवाक्यवदिति ।

अत्रोच्यते ।

साक्षात्कारणहेतोरप्यप्रत्यक्षत्वसंभवात् ।
दशमस्त्वमसीत्यादौ शब्दादेव तदुद्भवात् ॥ १ ॥

यत्तावदुक्तमपरोक्षप्रमितिकरणत्वे प्रत्यक्षान्तर्भावः स्यादिति, तत्र ब्रूमः, अभ्युपगम्यते हि परैरपि योगिमनसो बाह्यविषयापरोक्षप्रमितिकरणता, तथापि न बाह्यप्रत्यक्षान्तर्भावस्तस्याभ्युपेयते, एवं शब्दस्यापरोक्षप्रमितिजनकत्वेऽपि प्रत्यक्षान्तर्भावो मा भूत्, अथ तत्र बाह्यप्रत्यक्षान्तर्भावे चक्षुरादीनामन्यतमत्वं योगिमनोऽन्यत्वे सति बाह्यप्रत्यक्षप्रमितिकरणत्वं वा प्रयोजकम्, हन्तेहापि तर्हि स्वतोऽपरोक्षब्रह्मात्मविषयशब्दान्यत्वे सत्यपरोक्षप्रमितिकरणत्वं प्रत्यक्षान्तर्भावे प्रयोजकमस्तु, सिद्धे शब्दस्यापरोक्षप्रमितिकरणत्वे तद्व्यावृत्त्यर्थं विशेषणं युक्तम् ।

तदेव तु कथमिति चेत्, "दशमस्त्वमसी"त्यादिवाक्येषु दर्शनादिति ब्रूमः ।

ननु तत्रापीन्द्रियसहितस्यैव तद्धेतुत्वं न केवलस्येत्युक्तमिति चेत्, अत्रापि तर्हि मनःसहायस्यैव शब्दस्यापरोक्षप्रमितिहेतुतास्तु ।

ननु तत्रेन्द्रियस्यैव करणत्वं शब्दस्य तु सहकारितामात्रमिति चेत्, न, शब्द एव करणमिन्द्रियं सहकारीति वैपरीत्यमेव कुतो न स्यात्, अन्वयव्यतिरेकयोरुभयत्राविशिष्टत्वात् ।

तथापि विनिगमनायां को हेतुरिति चेत्, क्वचिद्बहुलतमे तमसि कस्यचिल्लोचनविरहितस्यापि वाक्याद् दशमोऽस्मीत्यपरोक्षप्रमितिदर्शनमेवेति वदामः ।

अस्त्वेवं तथापि ब्रह्मसाक्षात्कारे करणं मन एव, "मनसैवेदमाप्तव्य"मित्यादिश्रुतेः, "यन्मनसा न मनुते" "अप्राप्य मनसा सह" इत्यादिश्रु- [illegible] तावदिति चेत्, मैवम् ।

तद्धेत्यादिश्रुतेः क्वापि मनसस्तदयोगतः ।
शब्दत्वानुमितेर्बाधाद्व्यभिचारादनुत्थितेः ॥ २ ॥

“तद्धास्य विजज्ञौ” “तमसः पारं दर्शयती”ति चोपदेशमात्रादेवापरोक्षप्रमित्युपपत्तिप्रतिपादनात् ।

नन्वेतानि वचनान्यागमाचार्योपदेशयोर्न साक्षात्कारहेतुतां प्रतिपादयन्ति साक्षात्कारहेतोर्मनसः सहायताप्रतिपादनपरत्वेनाप्युपपत्तेः, अन्यथा श्रवणोत्तरकालयोर्मनननिदिध्यासनयोर्विधानानर्थक्यात्, श्रवणेनैव साक्षात्कारोत्पत्तेः श्रुतवेदान्तानामपि पूर्ववत् संसारानुवृत्तिदर्शनाच्च, इति चेत्, मैवम्, असंभावनाविपरीतभावनाख्यस्य चित्तविक्षेपलक्षणस्य च प्रतिबन्धस्य निरासद्वारेण मनननिदिध्यासनयोः फलोपकार्यङ्गतयापि श्रवणं प्रति विधानोपपत्तेः, पूर्ववत् संसारित्वोपलब्धेश्च, प्रतिबद्धविज्ञानपुरुषविषयत्वा“न्मनसैवेदमाप्तव्य”मित्यादिश्रुतेश्चित्तैकाग्र्यस्यान्तरङ्गताप्रतिपादनपरत्वात्, मनसश्च नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मात्मसाक्षात्कारहेतुत्वस्यादृष्टचरतया तत्र शब्दस्य सहकारित्वकल्पनानुपपत्तेः, तथात्वे श्रवणादीनामेव वैयर्थ्यप्रसङ्गात्, सुखादीनां साक्षिवेद्यत्वादात्मनश्च स्वयं प्रकाशत्वान्मनसः क्वचिदपि साक्षात्कारहेतुत्वासंप्रतिपत्तेः, भावनासहायस्य तु मनसो गरुडादिसाक्षात्कारप्रमित्यनुत्पादकत्वात्, तदापरोक्ष्यस्य च विधुरपरिभावितकामिनीसाक्षात्कारवद्भ्रमत्वात्, अप्रमारूपसाक्षात्कारस्यापि साक्षिरूपतया मानसत्वाभावात्, इह च “भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः,” “तमसः पारं दर्शयति”, “भूयश्चान्ते विश्वमायानिवृत्तिः,” “तरति शोकमात्मविद् योऽस्माकमविद्यायाः परं पारं तारयति”, “मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते”, “तरत्यविद्यां विततां”मित्यादिश्रुतिस्मृतिषु ब्रह्मविद्याया एवाविद्यानिवर्तकत्वश्रवणात्, पारिशेष्यात् तत्कारणं वेदान्तवाक्यमिति निश्चीयते, श्रूयते च “नावेदविन्मनुते तं बृहन्तं” “तं त्वौपनिषदं पुरुषं पृच्छामि” “वेदान्तविज्ञानसुनिश्चितार्था” इति, अत्र हि वेदान्तवाक्यजन्यज्ञानस्य विज्ञानमिति विशेषणेन विशेषविषयत्वप्रतिपाद-

नाविश्चयहेतुत्वे सिद्धेऽपि सुशब्दविशेषणेनापरोक्षनिश्चयहेतुत्वप्रतिपाद्यत्वायमर्थो निश्चीयते, यत् पुनः शब्दत्वादित्यनुमानं तच्छ्रुतिविरुद्धतया कालात्ययापदिष्टम्, "दशमस्त्वमसी"त्यादिवाक्येनैकान्तं च ।

प्रतिप्रयोगयोगाच्च विपक्षे बाधसंभवात् ।

तस्याभाससमानत्वाच्छब्दादेवापरोक्षधीः ॥ ३ ॥

प्रतिप्रयोगश्च, अपरोक्षत्वं तत्त्वमस्यादिवाक्यजन्यज्ञानवृत्ति-अपरोक्षज्ञाननिष्ठात्यन्ताभावाप्रतियोगित्वात् ज्ञानत्ववत्, न च परोक्षत्वं तद्वृत्ति परोक्षज्ञाननिष्ठात्यन्ताभावाप्रतियोगित्वादिति सप्रतिसाधनता, सिद्धसाधनत्वात्, दृश्यते हि तस्यासंभावनाविपरीतभावनाप्रतिबद्धान्तःकरणे पुंस्येऽपरोक्षज्ञानजनकत्वम्, "तद्धास्य विजज्ञा" विति श्रुतिविरुद्धतया कालात्ययापदिष्टत्वाच्च ।

न वा परोक्षत्वमग्निहोत्रादिवाक्यजन्यज्ञानवृत्ति- अपरोक्षज्ञाननिष्ठात्यन्ताभावाप्रतियोगित्वात् ज्ञानत्ववदित्याभाससमानयोगक्षेमता, विपक्षे बाधकतर्काभावेन तस्याप्रयोजकत्वात् ।

किं वाक्यप्रामाण्यानुपपत्तिर्बाधिका- उतानुष्ठानानुपपत्तिः स्वर्गादिफलासिद्धिर्वा ।

नाद्यः, अनुमानादिवत् प्रामाण्योपपत्तेः ।

न द्वितीयः, परोक्षनिश्चयादप्यनुष्ठानसिद्धेः ।

न तृतीयः, अनुष्ठानादेव फलसिद्धेरिति, इह त्वात्मविज्ञानस्य मोक्षसाधनत्वश्रुत्यन्यथानुपपत्तिरेव बाधिका, तथाहि "ब्रह्मविदाप्नोति परं", "ब्रह्म वेद ब्रह्मैव भवति" "तरति शोकमात्मवित्" इति वेदान्तवाक्यजनितात्मविज्ञानान्मोक्षः श्रूयते, स च सविलासाज्ञाननिवृत्तिलक्षणः, संसारस्य दुर्निरूपत्वेनाविद्याकृपत्वात्, तस्य चाहं कर्ता भोक्तेत्याद्यपरोक्षविभ्रमलक्षणस्य परोक्षज्ञानानिवृत्त्यनुपपत्तेः,ब्रह्मणि च सकलकरणागोचरे प्रमाणान्तरेण प्रत्यक्षज्ञानानुत्पत्तेः, वाक्याच्चापरोक्षज्ञानानुत्पत्तावनिर्मोक्षः स्यादिति, विपक्षे बाधकतर्कसद्भावादाभाससमानतानुमानस्य, तस्माच्छब्दादेवापरोक्षज्ञानात् कैवल्यमिति सकलमनाविलम् ।

ननु कथं ज्ञानात् कैवल्यम्, तस्य स्वर्गादिफलकर्मशेषतया स्वतन्त्रफलसाधनत्वाभावात्, देहव्यतिरिक्तात्मतत्त्वविज्ञानव्यतिरेकेण पारलौकिके कर्मणि प्रवृत्त्ययोगात्, फलश्रुतेश्चापापश्लोकश्रवणवदर्थवादत्वात्, तथा चाहुः ।

"आत्मा ज्ञातव्य इत्येतन्मोक्षार्थं न च चोदितम् ।
कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य लक्ष्यते ॥
विज्ञाते चास्य पारार्थ्ये पापिनामफलश्रुतिः ।
सार्थवादो भवेदेव न स्वर्गादेः फलान्तरम्" ॥

इति ।

देहव्यतिरिक्तात्मज्ञानस्य कर्मप्रवृत्त्युपयोगित्वेऽप्यशनायाद्यतीतब्रह्मविज्ञानस्य न तच्छेषत्वमनुपयोगादधिकारविरोधाच्चेति चेत्, मैवम्, नान्यावेक्षणव्रीहिप्रोक्षणादिवददृष्टद्वारेणोपपत्तेः ।

न चाधिकारविरोधः, तथाभूतब्रह्मविदामपि यमनियमादौ प्रवृत्तिवत् कर्मप्रवृत्त्यविरोधात्, जनकोद्दालकप्रभृतीनां तथाभूतानामपि कर्मणि प्रवृत्तिदर्शनाच्च, इति चेत्, मैवम् ।

अत्रोच्यते ।

अभावाच्छ्रुतिलिङ्गादेरुपयोगानिरूपणात् ।
अधिकारविरोधाच्च कर्माङ्गं नात्मतत्त्वधीः ॥ ४ ॥

न तावदैन्द्र्या गार्हपत्यमुपतिष्ठत" इतिवदात्मविज्ञानस्य कर्माङ्गत्वे श्रुतिरस्ति ।

न च "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवती"ति श्रुतिः, तस्याः प्रकृतोद्गीथविद्याविषयत्वात् ।

श्रद्धादिवत् सार्वत्रिकं किं न स्यादिति चेत्, तथाप्युपासनानुष्ठानस्यैव तदङ्गतास्तु, उपासनाप्रकरणे पाठात् ।

नापि बर्हिर्देवसदनं दामीतिवच्छ्रुतसामर्थ्यलक्षणं लिङ्गमस्ति ।

न चोद्दालकादीनां कर्मणा सहात्मविज्ञानसद्भावो लिङ्गम्, "किं प्रजया करिष्यामः किमर्थं वयमध्येष्यामहे" इति च वैपरीत्यस्यापि दर्शनात् ।

न च "यस्य पर्णमयी जुहूर्भवती"तिवद्वाक्याद्विनियोगः, पर्णमयीत्वादिवदात्मनोऽव्यभिचरितक्रतुसंबन्धाभावात्, तस्य लौकिकवैदिककर्मसाधारण्यात् ।

न चात्मज्ञानं कर्मप्रकरणे श्रुतम्, येन प्रयाजादिवत् कर्माङ्गत्वमश्नुवीत ।

नापि स्थानम्, कर्मसंनिधावपठ्यमानत्वात् ।

नापि समाख्या, संज्ञासाम्याभावात् ।

न चात्मज्ञानस्य कर्मण्युपकारप्रकारो निरूप्येत, देहव्यतिरिक्तात्मज्ञानस्योपयोगेऽप्यशनायाद्यतीतात्मविज्ञानस्य तत्रानुपकारित्वात् ।

न चाज्यावेक्षणादिवददृष्टद्वारेणोपयोगः, स्वप्रकरणपठितसंसारनिवृत्तिलक्षणदृष्टफलनिराकाङ्क्षस्यादृष्टफलकल्पनानुपपत्तेः ।

न च क्रियाकारकफलशून्यमद्वैतमात्मानं विजानतः कर्मणि प्रवृत्तिरुपपद्यते ।

न च यमनियमादिप्रवृत्तिवद्विरोधः, यमनियमादावप्यपरोक्षात्मविज्ञानवतो विधितः प्रवृत्त्यनङ्गीकारात्, तस्य कार्यं न विद्यते ।

"ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ।
नैवास्ति किंचित् कर्तव्यमस्ति चेन्न स तत्त्ववित्" ॥

इति स्मरणात्, भिक्षाटनादावपि व्युत्थानदशायां यदृच्छयैव प्रवृत्तेः ।

न चैवं कर्मणि प्रवृत्तिः, नियतदेशकालतया तस्य विधानात्, एतेन ज्ञानकर्मणोः समुच्चयोऽपि निराकृतो वेदितव्यः, विरोधादेव, उक्तं हि,

"यद्धि यस्यानुरोधेन स्वभावमनुवर्तते ।
तत् तस्य गुणभूतं स्यान्न प्रधानाद्गुणो यतः" ॥

इति ।

अपि चोत्पत्त्याप्तिविकृतिसंस्कृतयः कर्मणः फलम्, विद्यायाः पुनरविद्यास्तमयः, तत् कथमनयोः साहित्यम्, नहि शुक्तिकाबोधकं सकलमाक्षालयतः कलधौतविभ्रमनिवृत्तिः स्नानाचमनादिकर्मापेक्षया विलम्बते,

तदेवं लौकिकेन न्यायेन ब्रह्मात्मसाक्षात्कार एव तदविद्यानिवृत्तिहेतुरित्यास्थेयम्, श्रुतिस्मृतिषु कर्मणो निर्बाधकारणतानिराकरणाच्चैतदवसेयम्, श्रूयते हि "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय", "न कर्मणा न प्रजया धनेन" "नास्त्यकृतः कृतेन" "एतावदरे खल्वमृतत्व"मित्यादि । स्मर्यते च ।

"ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यते ।
कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ॥
तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः" ।

इति ।

न ह्येतानि वचनानि केवलानामेव कर्मणां कैवल्यसाधनत्वनिराकरणपराणि, समुच्चितानां तूपपद्यते तत्साधनभावः, तथा "अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ततो भूय इव ते तमो य उ विद्यायां रताः" इत्येकैकनिन्दापुरःसरं "विद्यां चाविद्यां च यस्तद्वेदोभयं सह," "अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत" इति ज्ञानकर्मणोः समुच्चितयोर्मोक्षसाधनत्वप्रतिपादनात्, तथाहि संसारनिवृत्तिर्ब्रह्मप्राप्तिश्च मुक्तिः, तत्र विद्येतरत्वेनाविद्यामूलत्वेन वाविद्याशब्दवाच्यानां कर्मणां मृत्युपदवेदनीयकर्मक्षयद्वारेण संसारनिवृत्तावुपयोगः, ब्रह्म त्वात्मरूपतया नित्यप्राप्तमविद्यामात्रतिरोहितं कण्ठगतचामीकरवत्, न तत्राविद्यानिवृत्तेरधिकं कार्यमस्तीत्यविद्यानिवृत्तौ विद्याया उपयोगः, तदिदमुक्तं "विद्ययामृतमश्नुत" इति ।

यत् पुनः परेषां व्याख्यानम्, देवताज्ञानमिह विद्याशब्देन विवक्षितं तस्य कर्मणा समुच्चयोऽनेन वाक्येन कथ्यत इति तदयुक्तम्, प्रक्रमाननुगुणत्वात्, ईशावास्ये परमात्मन एव प्रक्रान्तत्वात्, तथा च श्रुति"स्तेनेति ब्रह्मवित् पुण्यकृत् तैजसश्च सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्य"मिति स्पष्टमेव समुच्चयं प्रतिपादयति, स्मृतिरपि ।

Digitized by Google

"तपो विद्या च विप्रस्य निःश्रेयसकरं परम् ।
तपसा कल्मषं हन्ति विद्ययामृतमश्नुते ॥
तत्प्राप्तिहेतुर्ज्ञानं च कर्म प्रोक्तं महामुने ।
यथान्नं मधुसंयुक्तं मधु चान्नेन संयुतम् ॥
एवं तपश्च विद्या च संयुक्तं भेषजं महत्" ।

इत्यादिका, तेन वाचनिकसमुच्चयानुसारेण कर्मनिन्दापराणां वाक्यानां केवलकर्मविषयतैवेति निश्चीयते ।

न च मोक्षस्य साक्षाज्ज्ञानं साधनम्, कर्माणि तु पापापाकरणद्वारेण ज्ञानसाधनानीति वचनानां व्यवस्था ।

"कर्मणैव तु संसिद्धिमास्थिता जनकादय" इत्यादेस्तु लाङ्गलेन यवं जीवाम इतिवत् पारंपर्येणापि तत्साधनपरत्वोपपत्तेरिति युक्तम्, साक्षान्मोक्षसाधनत्वेन प्राप्तस्य कर्मणः साधनसाधनत्वग्रहणे प्राप्तान्वयबाधप्रसङ्गात् ।

"नान्यः पन्था" इत्यादेस्तु निषेधस्य केवलकर्मविषयतयान्तरेणापि प्राप्तान्वयबाधं संकोचेनाप्युपपत्तेः ।

न च बाध्यमन्वयबाध एवात्र युक्तः, "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन" ।

"धर्मात् सुखं च ज्ञानं च ज्ञानान्मोक्षोऽधिगम्यते ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥
कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते" ।

इत्यादिश्रुतिस्मृतिवाक्यैः कर्मणां मोक्षसाधनसाधनत्वेन विनियोगादिति, ज्ञानस्यैव कैवल्यसाधनत्वे "ततो भूय इव ते तमो य उ विद्यायां रता" इति केवलविद्यानिन्दानुपपत्तेः ।

न च समुच्चयपक्षे "नान्यः पन्था" "न कर्मणा" "नास्त्यकृतः कृतेने"ति कर्मनिषेधानुपपत्तिः, तद्वचनानां बहुयागवत् साक्षात् समप्रधानतया साधनतानिषेधपरत्वात्, अभ्युपगम्यते हि व्यवधानेन कर्मणां मोक्षसाधनत्वम्, व्यवधानं च करणोपकारो न तदुत्पादकत्वम् ।

न चैवमपि कर्मसाध्यत्वे मोक्षस्यानित्यत्वदोषः, ‘तद्यथे’त्यादिश्रुतेर्यत् कृतकं तदनित्यमिति न्यायाच्चेति युक्तम्, बन्धप्रध्वंसे कर्मणामुपयोगात्, प्रध्वंसस्य कृतकत्वेऽपि नित्यत्वात्, अन्यथा नष्टानष्टिप्रसङ्गात्, “वेदानुवचनेन ब्राह्मणा विविदिषन्ती”त्यत्र सन्वाच्येच्छायाः करणसंबन्धानुपपत्तावश्वेन जिगमिषतीत्यादाविवोभयवादिसंप्रतिपन्नेष्यमाणवेदनोत्पत्तावेव कर्मणां करणत्वावगमात् ।

न कर्मणां करणोपकारकत्वं करणे मुख्यार्थायास्तृतीयाश्रुतेः करणोपकारकत्वे भङ्गप्रसङ्गादिति च न वाच्यम्, “यज्ञेन विविदिषन्ती”त्यत्रापूर्वत्वाद्विधिपरे वाक्ये विध्यवच्छिन्नभावनारूपवाक्यार्थानुप्रवेशेनैव पदार्थानां परस्परसंबन्धात्, तस्याश्च भावनाया मोक्षभाव्यावच्छिन्नत्वात्, धात्वर्थस्य च स्वतोऽसमीहिततया भाव्यत्वानुपपत्तेः, ततश्चान्यार्थप्रवृत्तभावनाभाव्यत्वलक्षणकरणभाव एव धात्वर्थस्य, तथा च लब्धधात्वर्थकरणायां भावनायां यज्ञादीनां करणत्वेनानुप्रवेशानुपपत्तेस्तदपेक्षितकरणोपकारद्वारेण तेषां संबन्धः, ततश्च यज्ञादिभिरुपकृत्येति वाक्यार्थः संपद्यते ।

न च शमादीतिकर्तव्यतानिराकाङ्क्षत्वाद् भावनाया यज्ञादीनां विधेयधात्वर्थकरणत्वेनैवान्वय इति वाच्यम्, उभयोरपि प्रयाजादिवदङ्गमाणविशेषतयेतिकर्तव्यत्वेनैवान्वयोपपत्तेः, तदेवं बाधकाभावात् साधकसद्भावाच्च कर्मसमुच्चितमेव ज्ञानं मोक्षसाधनमिति ।

तदिदमसुन्दरम् ।

यज्ञादेः करणत्वेन श्रुत्यैव प्रतिपादनात् ।
शेषत्वाधिगतावेव प्रक्रमस्याप्युपक्षयात् ॥ ५ ॥

“विविदिषन्ति यज्ञेन दानेने”ति तृतीयाश्रुत्या विधेयविज्ञानकरणत्वेन यज्ञादेः प्रतिपादनात् तेषां फलोपकार्यङ्गत्वकल्पने श्रुतिबाधप्रसङ्गात् ।

न च प्रकरणप्रमाणेन प्रयाजानुयाजादिवदङ्गमाणविशेषतयेतिकर्तव्यतात्वमेव यज्ञादीनां शमादिवदिति वाच्यम्, प्रकरणस्य सामान्यतः शेषत्वबोधनेनैव चरितार्थत्वात्, तद्विशेषं प्रति श्रुत्यादेरेव प्रमाणत्वात् ।

तस्मात् "व्रीहिभिर्यजेते"त्यादाविव करणशरीरनिर्वर्तकतया च यज्ञादीनां करणत्वं यज्ञेनेति तृतीयाश्रुत्या निश्चीयते, यज्ञादिभिरुपकृत्येति व्याख्याने साध्याहारयोजनाप्रसङ्गात् ।

न च यज्ञादीनां श्रवणादिवत् साक्षाद्विज्ञानसाधनत्वाभावात् करणत्वानुपपत्तिः, परंपरासाधनेष्वपि लोके वेदेऽपि करणत्वाभ्युपगमात्, अभ्युपगम्यते हि ज्वालाव्यवधानेनैव काष्ठानां पाके करणत्वम्, अपूर्वव्यवधानेनैव स्वर्गे यागस्य, तथेहापि परिपन्थिदुरितशोधनव्यवधानेन यज्ञादेर्विज्ञानकरणतायां न कश्चिद्विरोधः ।

तदेवं तृतीयाश्रुत्या यज्ञादेर्विज्ञानकरणत्वाधिगतौ सर्वाण्यपि समुच्चयवचनानि परंपरया समुच्चयप्रतिपादनपराणीत्यभ्युपेयम् ।

न च केवलविद्यानिन्दानुपपत्तिः ।

> निन्दाया देवताज्ञानविषयत्वेऽपि संभवात् ।
> प्रक्रमस्यापि बाध्यत्वाद्बलीयस्या तृतीयया ॥ ६ ॥

निन्दाया देवताविज्ञानविषयत्वेनाप्युपपत्तेः ।

न च परमात्मोपक्रमविरोधः, यज्ञेनेति तृतीयाश्रुतेः प्रक्रमाद्बलीयस्त्वेन तद्बाधेऽप्यविरोधात्, क्रमसमुच्चयविषयत्वेनाप्युपपत्तेश्च, "अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत" इति पौर्वापर्याभिधानात्, 'सह वेदे'ति च वेदन एव सहभावश्रवणात्, प्रक्रमानुरोधेनात्मविद्याविषयत्वेऽप्यपरिपक्वात्मज्ञानविषयतयाप्युपनेयत्वात् ।

एतदुक्तं भवति, विद्यापरिपाकात् प्रागेव ये यथा स्वं स्वं विहितं नित्यादि कर्म त्यजन्ति तेषामुपात्तदुरितक्षयाभावाद्विहिताकरणनिमित्तप्रत्यवायस्याहरहरुपचीयमानत्वेनाशुद्धान्तःकरणतया परिपक्वात्मविद्यानुदयाच्च कैवल्यं शुभकर्मपरित्यागाच्च नाभ्युदय इत्यात्यन्तिक एव बाधः प्राप्तः स्यादिति ।

तत्रेत्थमक्षरयोजना, विद्यां परिपक्वात्मज्ञानलक्षणामविद्यां च कर्मलक्षणां यः सहोपायोपेयभावेन वेद सोऽधिकृतः पुरुषोऽविद्यया कर्मलक्षणया

विद्योत्पत्तिप्रतिबन्धकं मृत्युपदवेदनीयं पापं तीर्त्वा विद्यया परिपक्कब्रह्मसाक्षात्कारलक्षणयामृतं निर्वाणमश्नुत इति ।

इदमत्राकूतम्, आ-विद्यापरिपाकाद्यथास्वं कर्मानुष्ठेयम्, विद्या तु परिपक्वा कर्मनिरपेक्षैव मोक्षं साधयिष्यतीति ।

समुच्चयवादिनोऽपि न तावत् काम्यकर्मणा समुच्चयः, तस्य मुमुक्षुणा परित्यागात् ।

नापि नित्यनैमित्तिकैस्तत्तदाश्रमविहितानां तेषामुत्पत्त्यापेक्षत्वात् कर्मभूयस्त्वात् फलभूयस्त्वन्यायेन कैवल्यफले तावभ्युपेयाविति स्वर्गवदपवर्गस्यापि सातिशयत्वेनानित्यत्वादिदोषप्रसङ्गात् ।

तस्माज्ज्ञानमेव कैवल्यसाधनमित्यभ्युपेयम्, "सत्येन लभ्यस्तपसे" त्यत्रापि सत्यादीनां ज्ञानसाधनत्वं ज्ञानस्यैव च मोक्षसाधनत्वमित्यभ्युपेयम्, विविदिषावाक्ये यज्ञादीनां विज्ञानसाधनत्वस्यावधृतत्वात् ।

"तेनैति ब्रह्मवित् पुण्यकृ" दिति ब्रह्मवित्पुण्यकृतोर्मार्गे समुच्चयः, मार्गश्च कार्यब्रह्मगोचरः, "कार्यं बादरिरस्य गत्युपपत्ते" रित्यत्र राद्धान्तितत्वात् ।

एवं चोदाहृताः स्मृतयोऽपि क्रमसमुच्चयपरतया श्रुत्यनुसारेण योजनीयाः ।

तस्माज्ज्ञानमेव मोक्षसाधनमिति सिद्धम् ।

॥ इति श्रीज्ञानोत्तमपूज्यपादशिष्यचित्सुखमुनिविरचितायां तत्त्वप्रदीपिकायां तृतीयः परिच्छेदः ॥ ३ ॥

(शेषमग्रे)

काशीस्थराजकीयप्रधानपाठालयीयसंख्यावान् ।
सांख्याध्यापनकारी श्रेवनरामोऽस्मि कान्यकुब्जोऽहम् ॥ १ ॥

॥ पं० श्रेवनरामत्रिपाठी ॥

चतुर्थः परिच्छेदः ।

(Continued from page 97. Vol. VI.)

प्रकारान्तरेण लक्षणा त्रिधा जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति ।

Implication is three-fold, by a different division, viz, (a) where the word abandons its literal meaning; (b) where the literal meaning is retained; (c) where a part is abandoned and a part retained.

तत्र शक्यार्थमनन्तर्भाव्य यत्रार्थान्तरस्य प्रतीतिस्तत्र जहल्लक्षणा यथा विषं भुङ्क्ष्वेत्यत्र स्वार्थं विहाय शत्रुगृहे भोजननिवृत्तिर्लक्ष्यते ।

The first kind is that which abandoning the literal meaning of the word (furnishes) a knowledge of a meaning other than (the literal). Thus in the instance, "Eat poison," the literal meaning of the words being set aside, the implied meaning is abstinence from food in the house of an enemy.

यत्र शक्यार्थमन्तर्भाव्यैव अर्थान्तरप्रतीतिः तत्राजहल्लक्षणा यथा-शुक्लो घट इति अत्र हि शुक्लशब्दः स्वार्थं शुक्लगुणमन्तर्भाव्यैव तद्वति द्रव्ये लक्षणया वर्त्तते ।

The second kind of implication is that which retaining the literal meaning (affords) a knowledge of a meaning other than (the literal): as in the instance "white jar," where the word "white," retaining its own meaning, viz, the quality white, attaches by implication to a thing possessing such quality.

यत्र हि विशिष्टवाचकः शब्दः एकदेशं विहाय एकदेशे वर्त्तते तत्र जहदजहल्लक्षणा यथा सोऽयं देवदत्त इति । अत्र हि पदद्वयवाच्ययोर्विशिष्टयोरैक्यानुपपत्त्या पदद्वयस्य विशेष्यमात्रपरत्वम् ।

Implication of the third kind occurs where a word denoting an individual applies in part to the individual and in part not: as in the sentence "that is this Devadatta." Here the two words ("that" and "this") refer to a subject only (i. e. to a common portion), for the identity of the individuals denoted by the two words ("this" and "that") could not be proved.

यथा वा तत्त्वमसीत्यादौ तत्पदवाच्यसर्व्वज्ञत्वादिविशिष्टस्य त्वंपदवाच्येनान्तःकरणविशिष्टेनैक्यायोगाद् ऐक्यसिद्ध्यर्थं स्वरूपे लक्षणेति साम्प्रदायिकाः ।

Further, in such texts as "that thou art" and the like, in order to prove the identity (of "that" and "thou") the Sámpradáyikas maintain that the words "that" and "thou" attach by implication to the Absolute Reality (svarúpe); for the identity of an individual, possessing omniscience and like attributes (and) denoted by the word "that", with an individual possessing a common sensory, denoted by the word "thou," is impossible.

वयंतु ब्रूमः सोऽयं देवदत्तः तत्त्वमसीत्यादौ विशिष्टवाचकानां पदानामेकदेशपरत्वेऽपि न लक्षणा शक्त्युपस्थितविशिष्टयोरभेदान्वयानुपपत्तावपि विशेष्ययोः शक्त्युपस्थितयोरेवाभेदान्वयबोधाविरोधात् ।

But we hold that in "that is this Devadatta," "that thou art" and like instances, there is no (bond of) implication, although the words denoting individuals have only a partial application. For although a knowledge of the identity of the two individuals known through the original power of the words "(that" and "thou," which power or link connects the words with the individuals) cannot be established, yet there is nothing to prevent a knowledge of the identity of the two subjects (i. e. portions common to the individuals "that" and thou")—these subject portions being known through the power of the two words.

यथा घटोऽनित्य इत्यत्र घटपदवाच्यैकदेशघटत्वस्यायोग्यत्वेऽपि योग्यघटव्यक्त्या सह अनित्यत्वान्वयः ।

Thus, in "non-eternal jar," non-eternal-*ness* may be appropriately connected with an individual object (called) jar, though it cannot apply to jar-*ness*, which is part of the meaning of the word jar.

यत्र पदार्थैकदेशस्यविशेषणतयैवोपस्थितिस्तत्रैव स्वातन्त्र्येणोपस्थि-

In a case where there is a knowledge of the partial meaning of a word—such meaning being

तये लक्षणाभ्युपगमः। यथा नित्यो घटइत्यत्र घटपदाद्घटत्वस्य शक्त्या स्वातन्त्र्येणानुपस्थित्या तादृशोपस्थित्यर्थं घटपदस्य घटत्वे लक्षणा।

in the form of a predicate or determining attribute (viśeshaṇatayá)—the bond of implication must certainly be admitted as directly necessary (svátantryeṇa) for the knowledge (of such partial meaning). Thus, in "eternal jar", since the knowledge of jar-*ness* does not follow from the word jar directly through the power (or link) of the word jar, the bond of implication must be held to exist between the word jar and jar-*ness*, in order that such knowledge of jar-*ness* should result.

एवमेव तत्त्वमस्यादिवाक्येऽपि न लक्षणा शक्त्या स्वातन्त्र्येणोपस्थितयोस्तत्त्वंपदार्थयोरभेदान्वये बाधकाभावात्।

Accordingly, implication does not hold in such texts as "that thou art" and the like; for there is nothing to preclude a knowledge of the identity in meaning of the words "that" and "thou"—these meanings being obtained directly through the original power (of the words "that" and "thou").

अन्यथा गेहे घटः घटे रूपं घटमानयेत्यादौ घटत्वगेहत्वादेरभिमतान्वयबोधायोग्यतया तत्रापि घटादिपदानां विशेष्यमात्रपरत्वे लक्षणा चस्यात्। तस्मात्तत्त्वमस्यादिवाक्येषु आचार्य्याणां लक्षणोक्तिरभ्युपगमवादेन बोध्या।

On any other theory, implication will obtain in such phrases as "a jar in a house"; "colour in a jar"; "bring a jar" and the like; for here the words jar, house &c. mean certain subjects (not predicates or attributives) since jar-*ness*, house-*ness*, do not fit in with the verbal knowledge ordinarily supposed to accrue (from the above phrases). The (Vedántin) Áchâryas' declaration, therefore, of Implication (attaching to) such texts as "that thou art" &c., must be understood to be an assumption.

Digitized by Google

अजहल्लक्षणोदाहरणन्तु काकेभ्यो दधि रक्ष्यतामित्यादिकमेव । तत्र शक्यकाकत्वपरित्यागेनाशक्यदध्युपघातकत्वपुरस्कारेण काके ऽकाके ऽपि काकशब्दप्रवृत्तिः ।

"Protect the curds from the crows" and like sentences are examples of the third kind of implication. Here the word *crow* applies to things that are not crows as well as to crows, by giving up the notion of crow that comes from the original power of the word and advancing the notion of a destroyer of curds—such notion not being derived from the original power of the word *crow.*

लक्षणाबीजन्तु तात्पर्य्यानुपपत्तिरेव नत्वन्वयानुपपत्तिः काकेभ्यो दधि रक्ष्यतामित्यत्रान्वयानुपपत्त्यभावात् गङ्गायां घोष इत्यादौ तात्पर्य्यानुपपत्तेरपि भावात् ।

Implication is due only to the (speaker's) intention not being made clear (from the sentence itself), and not to the connexion of words (in a sentence) not being apparent. For, in the sentence "protect the curds from the crows", the connexion of the words is clear: and in such a phrase as "a herdsman's station on the Gaṅgá" the (speaker's) intention, in addition, is not made clear (from the words themselves).

लक्षणा न पदमात्रवृत्तिः किन्तु वाक्यवृत्तिरपि यथा गम्भीरायां नद्यां घोष इत्यत्र गम्भीरायां नद्यामिति पदद्वयसमुदायस्य तीरे लक्षणा ।

Implication is a link attaching not merely to words but also to (syntactical) phrases; thus, in the sentence "a herdsman's station on a deep river", there is the link of Implication between the words "deep" and "river", taken together, and the meaning *bank*.

ननु वाक्यस्याशक्यतया कथं शक्यसम्बन्धरूपा लक्षणा ।

Here you may ask, by way of objection, how (we continue to regard) Implication as attaching to an original (literal) meaning, since a phrase (admittedly) has no original meaning (apart from that of the words composing the phrase).

उच्यते । शक्त्या यत्पदसम्बन्धेन ज्ञाप्यते तत्सम्बन्धो लक्षणा शक्तिज्ञाप्यश्च यथा पदार्थस्तथा वाक्यार्थोऽपीति न काचिदनुपपत्तिः ।

We reply that Implication is a link attaching to the meaning already known through the inter-connexion of words by means of the original power (Śakti, attaching to these words); and that the meaning of a phrase may be known in the same way that the meaning of a word is to be known through the original power (that connects the word and its meaning). Thus, our view is weakened in no respect.

एवमर्थवादवाक्यानां प्रशंसारूपायां प्राशस्त्ये लक्षणा सोऽरोदीदित्यादिनिन्दार्थवादवाक्यानां निन्दितत्वे लक्षणा ।

Thus, the link of Implication holds between laudatory arthaváda-sentences * and the praise-worthiness (of the matter enjoined by vidhi); (and again) between such texts as "He howled" &c., which are arthaváda-sentences expressive of blame, and the blameworthiness (of the matter prohibited by nishedha).

अर्थवादगतपदानां प्राशस्त्यादिलक्षणाभ्युपगमे एकेन पदेन लक्षणया तदुपस्थितिसम्भवे पदान्तरवैयर्थ्यं स्यात् ।

If Implication of praise or dispraise be held to attach to the words of an arthaváda-sentence, since the knowledge of such praise or dispraise could be (furnished) by a single word through the link of Implication, the inutility of the remaining words of the sentence will result.

एवञ्च विध्यपेक्षितप्राशस्त्यरूपा

Accordingly, the syntactical unity of the words of arthaváda

* "The translation of arthaváda by explanatory statement is not quite adequate, as arthaváda is defined as comprising all those sentences which either contain a praise of the things enjoined by (vidhi) or a blame of the things prohibited by (nishedha)."— G. Thibaut's Arthasamgraha, Introd. p. xiv.

Digitized by Google

पदार्थप्रत्यायकतया अर्थवादपदसमुदायस्य पदस्थानीयतया विधिवाक्येनैकवाक्यत्वं भवतीत्यर्थवादपदानां पदैकवाक्यता ।

क्व तर्हि वाक्यैकवाक्यता यत्र प्रत्येकं भिन्नभिन्नसंसर्गप्रतिपादकयोर्वाक्ययोराकाङ्क्षावशेन महावाक्यार्थबोधकत्वं ।

यथा दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिवाक्यानां समिधो यजतीत्यादिवाक्यानाञ्च परस्पराङ्गाङ्गिभावबोधकतयैकवाक्यता । तदुक्तं भट्टपादैः । स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया । वाक्यानामेकवाक्यत्वं पुनः संहत्य जायत इति ।

passages and the words (of vidhi or nishedha passages) is thus maintained:—the words of an arthaváda-sentence taken together—in that they make known a something (padártha, viz,) the praiseworthiness implied by an injunction and, (as a collective whole), stand in the place of a (single) word (padasthániyatayá),—form a syntactical whole with the vidhi-passage.

Where then does the syntactical unity of sentences take place? It takes place in those cases where two sentences, expressing different relations respectively, convey (also) the purport of a principal sentence (constituted by these two)—such purport being requisite owing to the reciprocal expectancy (holding) between the two sentences.

Thus, syntactical unity of sentences is found in "The man desirous of svarga must sacrifice with the darśapúrṇamása" and "He sacrifices the burnt-fuel sacrifices', since these and like sentences make it known of the one sentence that it is principal and of the other that it is subsidiary (as regards matter). This has been set forth by his reverence Kumárila Bhaṭṭa as, follows:—"Between sentences that have already effected their purpose by each expressing its own sense, syntactical unity results by combining them, on account of the aṅga-aṅgí and other relations existing between them".

Digitized by Google

एवं द्विविधोऽपि पदार्थो निरूपितः । तदुपस्थितिश्चासत्तिः सा च शाब्दबोधे हेतुः । तथैवान्वयव्यतिरेकदर्शनात् । एवं महावाक्यार्थबोधेऽवान्तरवाक्यार्थबोधो हेतुः तथैवान्वयाद्यवधारणात् ।

Thus the two kinds of the meanings of words have been explained. * And Juxtaposition † is the knowledge of these meanings (resulting from the words being heard without any long pause between the several words). Juxtaposition is a cause of verbal knowledge: that it is a cause (tathaiva) is proved by (applying to it) the joint method of agreement and difference. ‡ Thus, the knowledge of the meaning of the intermediate sentences is a cause of the knowledge of the meaning of a principal sentence, as is proved by the anvayavyatireka method. §

क्रमप्राप्तं तात्पर्यं निरूप्यते । तत्र तत्प्रतीतीच्छयोच्चरितत्वं न तात्पर्यम् अर्थज्ञानशून्येन पुरुषेणोच्चरिताद्वेदादर्थप्रत्ययाभावप्रसङ्गात् । अयमध्यापकोऽव्युत्पन्न इति विशेषदर्शनेन तात्पर्यभ्रमस्याप्यभावात् । न चेश्वरीयतात्पर्यज्ञानात्तत्र

Intention is next in order of exposition. Intention does not consist in uttering (words) with a desire to convey a knowledge of their meaning, for it would follow from this that there would be no knowledge of the meaning of the Veda uttered by a man ignorant of its meaning.

(Further) there would not be even a false intention in a case where it is specified that a certain teacher is incompetent (to understand the Veda). Nor must it be maintained that verbal knowledge, in the case of the Veda, results from God's

---

* vide "Pandit" vol. vi. p. 94.

† cf. definition in vol. vi. p. 94.

‡ परस्परान्वययोग्यपदार्थोपस्थितिसत्त्वे शाब्दबोधो भवति तदभावे नेत्यन्वयव्यतिरेकदर्शनात् ।

§ अवान्तरवाक्यार्थबोधसत्त्वे महावाक्यार्थबोधो भवति तदभावे न शाब्दबोध इत्यन्वयव्यतिरेकावधारणात् ।

Digitized by Google

शाब्दबोध इति वाक्यम् ईश्वरानङ्गीकर्त्तुरपि तद्वाक्यादर्थप्रतिपत्तिदर्शनात् ।

उच्यते । तत्प्रतीतिजननयोग्यत्वं तात्पर्य्यम् । गेहे घटइति वाक्यं गेहघटसंसर्गप्रतीतिजननयोग्यं न तु पटसंसर्गप्रतीतिजननयोग्यमिति । तद्वाक्यं घटसंसर्गपरं न तु पटसंसर्गपरमित्युच्यते ।

ननु सैन्धवमानयेत्यादिवाक्यं यदा लवणानयनप्रतीतीच्छया प्रयुक्तं तदाप्यश्वसंसर्गप्रतीतिजनने स्वरूपयोग्यतासत्त्वाल्लवणपरत्वज्ञानदशायामप्यश्वादिसंसर्गज्ञानापत्तिरिति चेन्न तदितरप्रतीतीच्छयानुच्चरितत्वस्यापि तात्पर्य्यविशेषणत्वात् तथाच यद्वाक्यं यत्प्रतीतिजननयोग्यत्वे सति तदन्यप्रतीतीच्छया नोच्चरितं तद्वाक्यं तत्संसर्गपरमित्युच्यते ।

(शेषमग्रे)

knowledge of its intention, since a knowledge of the meaning of Vaidic sentences is seen to accrue to those who deny the existence of God.

We expound our view :—Intention consists in the fitness (of words) to produce a knowledge of their meaning (tat). Thus the sentence—"in the house (there is) a jar"—is fitted to effect a knowledge of the connexion between house and jar and is unfitted to convey a knowledge of a connexion between a piece of cloth and a house. The sentence is devoted to a jar-relation and not to a cloth-relation.

Now comes a doubt—when such a sentence as "bring the saindbava" is employed with the desire of conveying the impression that salt (one of the senses of the word *Saindhava*) is to be brought, the knowledge of a relation between the act of bringing and a horse (another of the meanings of *Saindhava*) will result, faultily, even when a knowledge of the meaning salt exists; for there is an inherent fitness (in this sentence) to produce a knowledge of a relation (between the act of bringing and) a horse. No! we reply; for the sentence not being uttered with a desire to convey any knowledge other than that (of bringing salt) serves so far to define the Intention (of the sentence).

A. V.

कैवल्यरत्नम् ।

(*Continued from page* 177. VOL. VI.)

ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ।
भविष्यं नारदीयं च मार्कण्डेयसमाह्वयम् ॥
आग्नेयं ब्रह्मवैवर्तं लैङ्गं वाराहसंज्ञितं ।
स्कान्दं च वामनं चैव कौर्मं मात्स्यं च गारुडम् ॥
ब्रह्माण्डं चेति पुण्योयं पुराणानामनुक्रमः ।
अन्यान्युपपुराणानि कथितानि महर्षिभिः ॥
अष्टादश पुराणानि श्रुत्वा संक्षेपरूपतः ।
स्कान्दमद्याभिधास्यामि लक्षग्रन्थविनिर्मितम् ॥
षड्विधं संहिताभेदैः पञ्चाशत्खण्डमण्डितम् ।
संहितान्त्या बुधास्तासु या सा सौरसमाह्वया ॥
तामहं वः प्रवक्ष्यामि संहितामतिशोभिताम् ।
पुरा सूरसमाख्येन कथिता भानुना स्वयम् ॥
याज्ञवल्क्याय तेनैव संहिता सौरसंज्ञिता ।
संहिता सौरसंज्ञा सा ग्रन्थतस्तु सहस्रकः ॥
निर्मिता सर्वविज्ञानफलदा पावनी शुभा ।
पुराणैरेव वेदार्थो विस्पष्टो ज्ञायते खलु ॥
बिभेति मानवं वेदः पुराणाभ्यासवर्जितम् ।
यश्च वेदविदुद्धांशः पुराणोपनिषत्सु च ॥
तदंशस्तु परित्याज्यः सर्वेषां सुकृतैरपि ।
तन्त्रावलम्बनेनैव पुराणानि च कानि चित् ॥
पाषण्डैर्व्यवहार्याणि कल्पितानि क्व चित् क्व चित् ।

Digitized by Google

अधिकारिविभेदेन नैव वेदपरं प्रति ॥

एवं प्रथमाध्याये वैदिकेन पुराणाभ्यासः कर्तव्य इति दर्शितम्।

अधुना द्वितीयाध्याये भगवन्तं याज्ञवल्क्यमन्तेवासित्वेन स्वीकृत्य भगवान्सहस्रकिरणः सकलवेदान्तसारसर्वस्वं ग्राहयामासेति भगवान्वेदव्यासः प्रदर्शयति तदेव प्रदर्शयते भगवते याज्ञवल्क्याय भगवान् ॥

भास्कर उवाच ॥

शृणु गुह्यतमं ज्ञानं वेदान्तोदरसंस्थितम्
यं न देवा विजानन्ति यतन्तो ऽपि यतीश्वराः ॥
इदं विज्ञानमज्ञानमसत्यात्मनि कल्पितम् ।
आत्मा नाम चितिः साक्षादनाद्यन्ता स्वयंप्रभा ॥
आत्मन्यध्यस्तमज्ञानं केवलं व्यावहारिकम् ।
सर्वतर्कप्रमाणानामगम्यं दुर्घटोद्भवम् ॥
अज्ञो ऽस्मीति तदज्ञानं विभाति हि चिदात्मनि ।
एतद्रूपातिरेकेण न तदस्ति कदा चन ॥
महादेवप्रसादेन सुसूक्ष्मं परिपश्यताम् ।
प्रकाशाव्यभिचारेण प्रकाशस्तत्प्रकाशवत् ॥
अज्ञानाश्रयमात्मानं चिद्रूपं केवलं विना ।
कल्पयन्ति भ्रमादन्ये तत्त्वानि च ततः परम् ॥
तानि वास्तवभेदेन नैव भिन्नानि सत्तम ।
अभावादेव भेदस्य वास्तवस्य निरूपणे ॥
एकत्वेन विरुद्धत्वाद्भेदो नैकस्य वस्तुनः ।
द्वयोर्भेदो ऽथ भेदस्य प्रवेशे सति हि द्वयम् ॥
भेदान्तरेण भिन्नत्वे ऽप्येषा तुल्या गतिर्बुध ।
यानि भिन्नानि तत्त्वानि तानि चिद्रूपतः स्वतः ॥

Digitized by Google

नैव भिन्नानि चिद्रूपाच्चिद्रूपं भिद्यते कथम् ।
वैशेषिकेण रूपेण चितश्चिन्नैव विद्यते ॥
ननु वैशेषिकं रूपं चितो भिन्नं भवेद्यदि ।
चैत्यरूपं भवेदेव यथा कुड्यादि संमतम् ॥
तथा सति चितोभेदः सर्वथा नैव विद्यते ।
अभिन्नं तच्चिदेकं स्याद्भेदाभेदौ स्वसंगतेः ॥
अतस्तत्त्वानि भिन्नानि माययैव न वस्तुतः ।
सर्ववेदेषु चैतन्यं केवलं परमं पदम् ॥
इतोऽन्यथा मतिः पुंसां मोहायैव हि केवलम् ।
सर्वमानातिगामिन्या श्रुत्या यत्प्रतिपाद्यते ॥
तद्विरुद्धतयैवार्थं प्रवदन्ति हि तान्त्रिकाः ।
स्वतन्त्रा एव ते सर्वे न श्रुत्यर्थोपजीविनः ॥
अतो वेदविरुद्धार्थं गृह्णीयान्नैव बुद्धिमान् ।
यदेव सर्ववेदान्तैः सादरं प्रतिपाद्यते ॥
तदेव परमं तत्त्वं न हि संशयकारणम् ।
यदेव परमं तत्त्वं सच्चिदानन्दमद्वयम् ॥
तदेव मायया विद्वन् विभाति जगदात्मना ।
आकारा बहवः सन्ति मायाशक्तौ परात्मनः ॥
तेषु कश्चिज्जगच्चित्रविवर्तस्यैव कारणम् ।
केचिद् ब्रह्मविभागस्य कारणं कश्चिदास्तिक ॥
जीवभेदस्य चिच्छक्तिविभागस्य च कश्चन ।
जगद्विवर्तनस्यैव कारणत्वेन यः स्थितः ॥
आकारः स तु सत्त्वादिगुणाकारैस्त्रिधा भवेत् ।
तेषु सत्त्वगुणादीषद्रजो मिश्रान्महानभूत् ॥

तदुपाधिवशेनैव त्रिधा सर्वेश्वरो भवेत् ।
सर्वैश्वर्येविता चेति न स्वतः पण्डितोत्तम ॥

॥ इति चतुर्थोऽध्यायः ॥

सर्वेद्रष्टुर्महेशस्य मूर्तयस्तिस्र एव हि ।
रजः सत्त्वतमोयोगाद् ब्रह्मविष्णुहरा हि ताः ॥
अन्योन्यमनुरक्तास्तेप्यन्योन्यमुपजीविनः ।
अन्योन्यप्रणताश्चैव लीलया परमेश्वरः ॥
साक्षात्परतरस्यैव शिवस्य परमात्मनः ।
अंशभूता यतस्तस्मादेते च परमेश्वराः ॥

॥ अथ पञ्च चतुर्थोऽध्यायः ॥

भगवान् भानुरुवाच ।
अथातः संप्रवक्ष्यामि जगत्कारणनिर्णयम् ।
श्रुतिभिः स्मृतिभिस्तद्वत्पुराणैरपि भाषितम् ॥
ब्रह्मैव कारणं साक्षात्सच्चिदानन्दमद्वयम् ।
नेतरत्सत्यमेवोक्तं संदेहं विसृज द्विज ॥
अन्यथा चान्यथा चाहुः केचिदत्यन्तमोहिताः ।
सर्वथा तन्न संग्राह्यं सम्यग्दर्शनकाङ्क्षिभिः ॥
केचित्प्रधानं त्रिगुणं कारणं प्रवदन्ति तु ।
ईश्वरस्तदधिष्ठाता त्याहुरन्ये सनातनाः ॥
सत्यामेव महामायामाहुरन्ये सनातनाः ।
अचिद्रूपाणि चान्यानि प्राहुरन्ये किरेवतः ।
चिद्रूपं केवलं चान्ये सत्यया स्वात्मभूतया ॥
अभिन्नमेव चिद्रूपं शक्त्या केचन मोहिताः ।
पृथिव्यादीनि भूतानि केचन प्रवदन्ति च ॥

अथ त्वन्ये च निर्भेदानाहुरन्यांश्चतुर्विधान् ।
सर्वप्रध्वंसि विज्ञानं के चिच्छून्यं तथापरम् ॥
एवं नानाविधं प्राहुरज्ञानादविवेकिनः ।
यथाधिकारं ते सर्वे स्थापयन्ति च तर्कतः ॥
स्वपक्षं परपक्षं च दूषयन्ति यथाबलम् ।
स्वपक्षरागमग्नानां तत्तद्दृष्ट्याभिवीक्ष्यताम् ॥
रज्जुवत्सर्पसिद्धान्ताः स्फुरन्ति न विवेकिनाम् ॥
एवं तर्कप्रतिष्ठानादज्ञानपरिमोहिताः ।
कदा चित्क्व चिद्वाऽपि न लभन्ते स्थितिं बुधाः ॥
अविचार्यैव यत्किञ्चिदवलम्ब्यावशा भृशम् ।
अनर्थं प्रापुः सर्वे नैव सौख्यं कदा चन ॥
वेदानुसारितर्कस्य सन्मत्या वेदमूलया ।
इतिहासपुराणाभ्यां नरो वेदार्थविद्भवेत् ।
अतीन्द्रियार्थविज्ञानं वेदादेव हि केवलम् ॥
न प्रमाणान्तरेणैव मुमुक्षूणां परिपश्यताम् ।
तात्पर्येणैव वेदान्ताः प्राहुर्ब्रह्मैव कारणम् ॥
वदन्ति सर्वे ते नैव कारणं ब्रह्म नापरम् ।
यद् ब्रह्म चित्सुखानन्तं केवलं जगदात्मना ॥
परिणामं न सहते जडं हि परिणामवत् ।
नापि तत्सत्यया मायया भिन्नया ऽभिन्नयापि च ॥
ब्रह्मणो ऽन्यस्य सत्यत्वं विद्यते नैव कस्य चित् ।
ब्रह्मणो ऽन्यस्य तुच्छस्य सत्यता नेष्यते खलु ॥
ब्रह्मणो भिन्नशक्तिस्तु ब्रह्मैव खलु नापरा ।
तथा सति वृथा प्रोक्तं शक्तिरित्यविवेकिभिः ॥

शक्तिशक्तिमतोर्विद्वन् भेदाभेदस्तु दुर्घटः ।
बहिष्ठा एव सिद्धान्तात्सिद्धान्तास्त्वपरे भृशम् ॥
ब्रह्मणः कारणत्वस्य शक्तिर्निर्वाहिका तु या ।
सा त्वन्या दुर्निरूपैव सदसद्रूपतः सदा ॥
दुर्घटत्वमविद्याया भूषणं न तु दूषणम् ।
मायामात्रमिदं द्वैतमित्याह हि परा श्रुतिः ॥
दृश्यत्वाद्धि मतं मिथ्या शुक्तिकारजतादिवत् ।
ततोऽलीकं जगद्धेतुर्मायैव हि न संशयः ॥
कार्यरूपस्य सत्यत्वसंभवे सति सत्तम ।
परिणामस्तथारम्भः खलु सर्वो भविष्यति ॥
कार्यरूपं जगत्सर्वं अनृतं सततं खलु ।
वाचारम्भणशब्दाच्च तथा प्राणावधारणात् ॥
प्रकृतेः सत्यतायाश्च सदेकत्वं श्रुतेरपि ।
सर्वोपनिषदामर्थः साक्षादद्वैतमेव हि ॥
अतो मायामया सृष्टिर्न सत्या सत्यमीरितम् ।
पुराणेषु मुने सृष्टिः कथ्यते च क्वचित्क्वचित् ॥
अन्यथा चान्यथा सा तु नैव वेदानुसारिणी ।
क्वचित्सांख्यानुगुण्येन क्वचिद्योगानुगुण्यतः ॥
क्वचित्तन्त्रानुगुण्येन क्वचिदन्यानुगुण्यतः ।
श्रुत्युक्तेनैव मार्गेण ग्राह्या सृष्टिर्न चान्यथा ॥
भारते धर्मशास्त्रे च तथा सृष्टिः क्वचित्क्वचित् ।
कथ्यते मुनिशार्दूल क्वचिद्वेदानुसारतः ॥
सृष्टिरेषा मया प्रोक्ता साक्षाद्वेदानुसारिणी ।
कारणं जगतः साक्षाद् ब्रह्म वस्तु न चापरम् ॥

ब्रह्मैकारणवादो यः स हि वेदः प्रकीर्त्तितः ।
अतो ऽन्ये सकला वादा मायावादा हि केवलम् ॥
अनेकजन्मसिद्धानां श्रौतस्मार्त्तानुवर्त्तिनाम् ।
ब्रह्मैकारणवादे तु मतिर्येषां विजायते ॥
तेषामेव परिज्ञानं यथावज्जायते ऽचिरात् ।
यथावद्ब्रह्मविज्ञाने जाता येषां मतिः स्थिरा ॥
तेषामेव परा मुक्तिर्नेतरेषां न संशयः ।
यथावद्ब्रह्म विज्ञानं न तन्त्रेभ्यः प्रजायते ॥
प्रत्युत भ्रान्तिविज्ञानं जायते ऽनर्थकारणम् ।
तस्मादश्रोदितं बोद्धुं ब्रह्मशब्दार्थितागमम् ॥
पञ्चरात्राह्वयं तन्त्रं तथा भागवताह्वयम् ।
तथैवैकायनं तन्त्रं भेदानेषामनेकतः ॥
श्रुतिस्मृतिविरुद्धांश्च स्वतन्त्रानागमान्तरान् ।
तदनुग्राहकांस्तर्कान्वेदनिष्ठः परित्यजेत् ॥
तेषूपदिष्टमाचारं समस्तं त्वविशेषतः ।
वर्जयेद्वेदसंसिद्धं गृह्णीयादादरेण तु ॥
वैदिकाचारतो मुक्तिं प्राप्नुयादप्रमादतः ।
वेदादेव हि धर्म्मश्च वेदादेव परं पदम् ॥
वेदादेव हि विज्ञानं वेदशुद्धः सनातनः ।
पापिष्ठानां मनुष्याणां महामोहावृतात्मनाम् ॥
वेदे वेदोदिताचारे नैव वाञ्छा विजायते ।
तेषामेव महामोहाद्वेदबाह्येषु सत्तम ॥
इच्छा शास्त्रेषु जायेत स्वभावादेव केवलम् ।
महादेवप्रसादेन केवलं तु द्विजोत्तम ॥

श्रुतौ वाञ्छा विजायेत तन्मूलायां स्मृतावपि ।
यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ॥
तदा वेदविरुद्धेन विमुक्तास्युर्न संशयः ।
तस्मात्सर्वं परित्यज्य वेदमेकं समाश्रयेत् ॥

इति चतुर्थोऽध्यायः ।

श्रीभगवानुवाच ॥

अथ मुक्तिस्वरूपं ते प्रवक्ष्यामि समासतः ।
यज्ज्ञानेन परा मुक्तिः सिध्यत्यखिलदेहिनाम् ॥
ज्ञानादेव परां मुक्तिं वेदान्ताः प्रवदन्ति हि ।
प्रकाशकं तु विज्ञानं सिद्धस्यैव प्रकाशकम् ॥
ज्ञानं तु कारकं विद्वन् बोधकं खलु केवलम् ।
दृश्यते हि घटज्ञानं घटार्थस्य तु बोधकम् ॥
अतो वेदान्तविज्ञानं मुक्तेः साक्षात्प्रकाशकम् ।
प्रकाशकं तु विज्ञानं सिद्धस्यैव प्रकाशकम् ॥
तथा सति परा मुक्तिः पूर्वमेवास्ति वेदनात् ।
मुमुक्षुस्तावदात्मैव खल्वनात्मा न सत्तम ॥
अत एव परा मुक्तिः साक्षादात्मन एव हि ।
आत्मनो या परा मुक्तिः पुरस्तादेव सात्मनि ॥
अस्तीत्यभ्युपगन्तव्यं वेदनाल्लभ्यते यतः ।
अन्यत्र संस्थिता मुक्तिः ब्रह्मन्केवलवेदनात् ॥
आत्मनो नैव लभ्या स्यात्प्रागप्राप्तिर्हि वेदनात् ।
भूतले संस्थिते कुम्भे तज्ज्ञानेनैव केवलम् ॥
लभ्यते नैवमन्यत्र ज्ञायते खलु केवलम् ।
प्राप्ता स्वतोऽप्यभिज्ञापि प्राप्नोति क्रिययैव हि ॥

॥ माधवीयधातुवृत्तिः ॥

(Continued from page 159. VOL. VI.*)*

अण रण वण भण मण कण क्वण व्रण भ्रण ध्वण शब्दार्थाः ॥ इतः अन्ता उदात्ता उदात्तेतः। अणति। आण। अणिता। अणिष्यति। आणा-यति। मा भवानणियात्। अणुः। स्वल्पो धान्यविशेषश्च। अणश्च, धान्ये निदि-ष्टत्वाच्च। अणूनां धान्यानां भवनं क्षेत्रम् आणव्यम्। आणवीनम्। 'विभाषा तिलमाषोमाभङ्गाणुभ्य' इति षष्ठ्यन्ताद्भवने क्षेत्रे यत् विभाषाग्रहणात् खञ्च। यति 'ओर्गुणः'। उवर्णान्तस्य गुणो भवति भसंज्ञानिमित्ते तद्धिते परत-इति गुणे वान्तो यीत्यवादेशः। अणुप्रकारः अणुकः। 'स्थूलादिभ्यः प्रकारवचने कन्' इति कन्, प्रकारो भेदः सादृश्यं च, अणुकः सूक्ष्मदृक्। अणु निपुण इति-यावादिपाठात् कन्। अण्डः। यमन्ताड्ड, इति डः। बाहुलकाड्डकारस्य ने-त्वम्। अड्डुः। जलतरणिः। अणो डश्चेत्युकारप्रत्ययो डश्चान्तादेशः। रणति। रराण। रणिता। अरणीत्। अराणीत्। अतो हलादेरिति वा वृद्धिः। रिरणिषति। रंरण्यते। रंरणीति। रंरण्टि। रंरण्ठः। 'नुगतोनु-नासिकान्तस्ये'त्यभ्यासस्यानुस्वारः, 'अनुनासिकस्य क्विझलोः क्ङिती'ति-दीर्घः। रणयति। अरीरणत्। अरराणत्। काण्यादित्वाद् ह्रस्वविकल्पः। रणयतीति गतौ घटादिः। रणनं शब्दः। रणन्त्यस्मिन्निति रणो सङ्ग्रामश्च। 'वशिरण्योरुपसंख्यान'मिति अकर्त्तरि कारके अप् प्रत्ययः। रणि-तं, रण्डा। अमन्ताड्डः। रणरणको हृल्लेखः। घञर्थे कविधानमिति कः क्वणादीनां के द्वे भवत इति द्विर्वचनं, संज्ञायां कन्। पृषोदरादित्वाद्धला-दिशेषाभावो ऽभ्यासस्याकारश्च। वणति। ववाण। ववणतुरित्यादि। वकारादित्वादेत्वाभ्यासलोपाभावः। अयमपि काण्यादिः। वाणः शतं तनुः। 'हलश्चेति' संज्ञायां घञ्। वाणी। इञ् वपादिभ्य इति इञन्तात्सर्वतोक्तिन्नर्थादित्येक इति ङीष्। अन्तर्वाण्यस्येति अन्तर्वाणिः विप-श्चित्। 'निष्प्रवाणिश्चे'ति चकारात् 'नद्यृतश्चे'ति कपो निषेधः। अव-श्यं वणतीति वाणिनी। आवश्यकाणिन्यन्तात् ङीप्। वण्डः। पूर्ववत्।

अल्पतनुः पशुः । भणति । बभाण । भणितेत्यादि । अयमपि कणादिः । भणयतरिति भाणः । कर्मणि घञ् । भणितिः । तितुत्रेतीण्निषेधे तिसु- त्रेष्वग्रहादीनामिति वचनादिडागमः । भण्डः । भाण्डः । भण्डेर्वा पुच्छ- भाण्डेति निर्देशाद्दीर्घः । भामेर्वा डप्रत्यये संभाण्डयते, भाण्डानि संचिनोतीत्यर्थः । 'पुच्छभाण्डचीवराण्णिङि'ति णिङ्, भाण्डात्समाचयने इति च वृत्तिः । ङित्वात्तङ् । समबभाण्डत । णिश्रीति चङ् । मणति । ममाण । मेणतुः । मणितेत्यादि । मणितम् । मणिः । इन्प्रत्ययः । मणिप्रकारो मणिकः । स्थूलादित्वात् कन् । मणिरेव मणिकः । यावादित्वात्कन् । मणिको लञ्जरः । संज्ञायां कन् । मण्डः । मण्डतेर्वा । कणति । चकाण । कणितेत्यादि । अयमपि कणादिः । कणयतीति गतौ घटादित्वात् । कणः । लेशः सूक्ष्मत- ण्डुलश्च । गोचरादिसूत्रे चकारस्यानुक्तसमुच्चयार्थत्वात् घः । कणिका । सं- ज्ञायां कनि प्रत्ययस्थादितीत्वम् । कणठः । कणेष्ठः । बाहुलकात् ठस्येका- भावः । अयं निमीलनार्थश्चुरादौ । क्वणति । चक्वाण । क्वणितेत्यादि । क्वाणः । क्वणः । निक्वाणः निक्वणः । कल्याणप्रक्वणा वीणा । कल्याणप्रक्वाणेति वा । 'क्वणो वीणायां च' । अनुपसृष्टान्निपूर्वात् वीणाविषयाच्च क्वणेर्वा ऽप्प्रत्ययः । सोपसर्गार्थं वीणाग्रहणम् । कुणालो धान्यं यज्ञोपकरणं च । पीयुक्वणिभ्यां कालन् ह्रस्वः संप्रसारणं चेति कालन्प्रत्ययः यथासंख्यात्संप्रसारणं च । कुण- पम् । क्वणः संप्रसारणं च इति पन्प्रत्ययः संप्रसारणं च । कङ्कणीका । प्रतिसरः । यङ्क्वणेः कङ्कण चेति यङ्लुगन्तादीकन्प्रत्ययः कङ्कणादेशश्च । व्रणति । वव्राण । व्रणितेत्यादि । अयं वशादिः क्वचि त्पठ्यते । दन्तोष्ठ्यादिरेव सर्वत्र तथा च यादवः, व्रणोच्छब्दार्थविषये व्रणगात्रचूर्णनइति, गात्रचू- र्णनार्थोऽयं कथादिः । भणति । बभाण । भणिता । ध्वणति । दध्वाण । ध्वणितेत्यादि । ध्वणिरपि संमतायामत्र पठ्यते ॥ ४४८ ॥

ओणृ अपनयने ॥ ओणति । प्रोणति । ओणां चकार । ओणिता । ओणिणिषति । ओणयति । मा भवानोणिणत् । ऋदित्वान्नोपधाह्रस्वः । इदमेव ऋदित्वं द्विर्वचनात् पूर्वमुपधाह्रस्वत्वे ज्ञापकमित्युक्तम् । अवाणा । 'अन्येभ्योऽपि दृश्यत'इति वनिपि 'विड्वनोरनुनासिकस्यात्'इति णकारस्या-

कारे च्वादेशे सर्वनामस्थानइत्युपधादीर्घे नलोपः । स्त्रियामवावरी । वनो र चे’ति वचनस्प्रातिपदिकत्वात् ङीब्रौ । ‘वनो न हशः’ । हशन्ता-द्यो वन् विहितस्तदन्तात् ङीब्रौ नेत्ययं प्रतिषेधः प्रायिकत्वादत्र नेति न्यासादौ ॥ ४४९ ॥

शोणृ वर्णगत्योः ॥ शोणति । शुशोण । शोणिता । शुशोणिषति । शोण्यते । अशोणिट । शोणयति । अशुशोणत् । शोणितम् । शोणः । शोणी । शोणा । ‘शोणात्प्राचामि’ति वा ङीप् ॥ ४५० ॥

श्रोणृ संघाते ॥ श्रोणतीत्यादि । श्रोणिः । इन्प्रत्ययः । श्रोणी । कृदिकारत्वाद्वा ङीष् । श्रोणा नक्षत्रम् । अजन्ताट्टाप् ॥ ४५१ ॥

श्लोणृ च ॥ श्लोणतीत्यादि । शोणादयः तालव्योष्मादयः ॥ ४५२ ॥

पैणृ गतिप्रेरणश्लेषणेषु । लैणृ इति क्वचित्पठ्यते । पैणती-त्यादि ॥ ४५३ ॥

ध्रण शब्दे ॥ उपदेशे नान्तोयमिति प्रागस्य निर्देशो न कृतः । तस्य प्रयोजनं यङ्लुकीति मैत्रेयः, अतोस्य दण्डके पाठः प्रत्युक्तः । ध्रणती-त्यादि । रषाभ्यामिति त्वम् । यङ्लुकि दन्ध्रन्ति दन्ध्रान्त इत्यादौ णत्वस्य नश्चापदान्तस्येत्यनुस्वारे ऽसिद्धत्वात् कृते तस्मिन्परसवर्णः, तस्यासिद्धत्वा-त् पुनर्णत्वं न भवति । अभ्यासस्य नुगत इति नुक् । अस्मादनन्तरं क्वचित् कोशे वण भण धण इति त्रयः पठन्ते, तत्र भणिर्मैत्रेयानुसारेण दण्डके पठितः । धणिरपि संमतायामिति तत्रैवोक्तम् । वणति । वाणः । उद्धण इत्यत्र ॥ ४५४ ॥

कनी दीप्तिकान्तिगतिषु ॥ कनति । चकान । कनितेत्यादि । कन्या । कन्याया अपत्यं कानीनः । कन्यायाः ‘कनीन चे’ति अण् कनीना-देशश्च । अत एव निर्देशाद्यत् । स्वरितान्तत्वं तु तित्स्वरितमित्यकाश्म-र्यधान्यकन्याराजन्यमनुष्याणामन्त इति, अन्यथा ‘यतोनाव’ इति यदन्तस्य द्व्यचो विधीयमान आद्युदात्तः स्यात् । कनकम् ‘क्वुन् शिल्पिसंज्ञयो’रिति क्वुन् ॥ ४५५ ॥

ष्टन वन शब्दे ॥ स्तनति । तस्तान । स्तनितेत्यादि । तिस्तनि-

यति । तंस्तन्यते । तंस्तनीति । तंस्तन्ति । ध्वनतिवत्प्रक्रिया । स्तन-यति । प्रतिष्टनत् । अभिनिष्टानः । विसर्जनीयः । 'अभिनिसः स्तनः शब्दसंज्ञायामि'ति षत्वम् अन्यत्राभिनिस्तनति मृदङ्गः । अत्र न्यासे सकारादिरयं पठितः । तदस्य षोपदेशपर्युदासवाक्ये उपादानाच्चिर्मूलम् । अत एव पुरुषकारे मूर्द्धन्यादिरेवायं दर्शितः । स्तान्यम् । ण्यत् । स्तनः । अच् । स्तन्यम् । 'शरीरावयवाद्यत्' इति भवार्थे यत् । स्तनितम् । स्तनयतीति देवशब्दार्थस्य कथादिपठितस्य । वनति । ववान । ववनतुः । वनितेत्यादि । वनितम् । वनित्वा । वतिः । क्तिनि तितुत्रेतीण्निषेधा'दनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिती'त्यनुनासिकलोपे वतिरिति भवति । अनुदात्तोपदेशा यमिरमिनमिहनिगमिमन्यतयः । प्रवत्य । 'वा ल्यपी'त्यनुदात्तोपदेशादीनां विधीयमानोऽयमनुनासिकलोपविकल्पो व्यवस्थितविभाषाविज्ञानात् नान्तेषु नित्यः अन्यत्र विकल्प, इतीह नित्यः । वन्तिः । क्तिच् 'न क्तिचि दीर्घश्चे'ति दीर्घानुनासिकलोपयोर्निषेधः । अनुदात्तोपदेशवनतीतिश्तिपा निर्देशात् वंवान्त इत्यादावनुनासिकलोपो न भवति । वनोतिनिवृत्त्यर्थे तु श्तिपा निर्देशो न भवति तनोत्यादित्वेन तस्यानुनासिकलोपस्येष्टत्वात् । वनिष्ठः । अपानं मांसविशेषश्च । अतन्यत्रिवनिचत्यादिनेष्ठच् । वनम् । अच् । वनानां समूहो वन्या । 'पाशादिभ्यो य'इति समूहे यः । तदेतत्स्वभावात् स्त्रीलिङ्गम् । वन्यम् । दिगादित्वाद्भवार्थे यत् । वानेयम् । पूर्वनगरीति नद्यादित्वात् ढक् शैषिकः । वनिः । वनी । 'कृदिकारादक्तिन'इति वा ङीष् ॥ ४५७ ॥

वन षण संभक्तौ ॥ वनेरर्थभेदात्पुनः पाठ इति मैत्रेयः । तथैवोदाहरणानि । सनति । ससान । सेनतुः । सनितेत्यादि । सायात् । सन्यात् । किदाशिषीति कित्वात् । 'ये विभाषा'जनसनखनां यकारादौ क्ङित्यात्वं वेति तद्विकल्पः । एवं यण्यङोरपि । धातुपारायणे तु लोपो यीतिसूत्रे भाष्ये निर्देष्टव्ये य इत्यस्वतो निर्देशादासुट्यात्वं नेत्युक्तम् । सिसनिषति । सिषासति । 'सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसना'मितीड्विकल्पः । इडभावे'जनसनखनां सञ्झलो'रिति झलादौ सनि क्ङिति विधीयमा-

नमात्वं भवति । सासायते । संसन्यते । ‘ये विभाषे’त्यात्वम् । इदं च क्तिच्ये-
वेति स्मरति न भवति सान्यमिति । संसनीति । संसन्ति । संसातः ।
ऊतियूतीत्यत्र न्यायेन जनसनेत्यात्वे अनुनासिकस्येतिदीर्घं परत्वाद् बाधित्वा-
त्वापि भवति । सातिः । सातः । सातवान् । आत्वसूत्रे च झलादिसन्
जनखनोर्न संभवतीति सनोतेरेव विशेषणमिति वदता वृत्तिकारेण सनोतेः
अवीवन्तीति पक्षइडागमः तदिह सनोत्यर्थमेव सन्ग्रहणमित्यभिधानादि-
ड्भावात्वे च सानादिकस्यैव ग्रहणमिति च प्रतीयते । अन्ये तु पुनरु-
भयत्रोभयोर्ग्रहणमाहुः । एवं वृत्तौ सनोतेरित्युपादानं तस्यानुनासिकलोपा-
दात्वं विप्रतिषेधेनेति वक्ष्यामीत्येवमर्थं मन्तव्यम् । सानुः । दृसनिजनिचरि-
चटिभ्यो ञुणिति ञुण्प्रत्ययः । षनु पाने, षणु दानइति द्वयं तनादेः ॥ ४५९ ॥

अम गत्यादिषु । ऋनदीप्रिगतीत्यत्र गतेः परयोः शब्दसंभक्त्योरा-
दिशब्देन ग्रहः । अमति । आम । आमतुः । अमितेत्यादि । अमिमिषति ।
आमयतीत्यत्र ‘न कम्यमिचमा’मिति मित्त्वनिषेधा‘न्मितां ह्रस्व’ इति ह्रस्वा-
भावः । अम्यम् । अमितवान् । पोरदुपधादिति यत् । अमित्वात् निष्ठा-
यां रुष्यमत्वरसंघुषास्वनामितीड्विकल्पनात् अमितः । आन्तः ।
अमितवान्, आन्तवान् इति भवति । इडभावे अनुनासिकस्य क्विझलोः
क्ङितीति दीर्घः क्विपि पूर्ववत् । दीर्घे मो नो धातोरिति नत्वे आनिति
भवति । नलोपस्तु न भवति असिद्धत्वादिति प्रागेवोक्तम् । आमः । घञि नोदा-
त्तोपदेशस्येति वृद्धिनिषेधः । अत एव चिण्यपि ण्यन्तात् न कम्यमीति मित्त्व-
निषेधात् व्यपेक्षया वृद्धौ मा भवान् आमि इति भवति । आमय इत्यम
रोगइति चौरादिकस्य । अमनम् । अमिनक्षियजिबधिपतिभ्योऽत्रन्नित्य-
त्रन् । अमत्रः । अमेर्द्विषि चिच्चेतीनप्रत्ययः । आमः । अमितम्योर्दीर्घश्चेति
तप्रत्यये दीर्घः । आन्तम् । अत्यमिचमिशसिभ्यः क्तनिति क्तन् ॥ ४६० ॥

द्रम ह्रम्म मीमृ गतौ । द्रमति । दद्राम । द्रमितेत्यादि लुङि ह्म्यन्तेति
वृद्धिनिषेधात् अद्रमीत् । दिद्रमिषति । दन्द्रम्यते । दन्द्रमीति । दन्द्रन्ति ।
दन्द्रान्त इत्यादि । ‘कस्तोम्योश्चे’ति नत्वे आत्वम् । दन्द्रमीत्यादि ।
अदन्द्रनित्यत्र तिप्सिपोर्हल्ङ्यादिलोपे ‘मो नो धातो’ रिति नत्वे ‘पदा-

Digitized by Google

न्तस्ये’ति णत्वं न भवति । द्रमयति । अदिद्रमत् । अमन्तत्वान्मित्वम् । अद्रमि । अद्रामि । द्रमंद्रमम् । द्रामंद्रामम् । चिण्णमुलोरिति दीर्घविकल्पः । स्यादिषु चिण्वदिट्पक्षे दीर्घविकल्पे णिलोपे च द्रमिष्यते द्रामिष्यतइत्यादि । शुद्धे पुनरिटि णेर्गुणायादेशयोर्द्रमयिष्यतइत्यादि । अमन्तात् चिणि नोदात्तोपदेशेति वृद्धिनिषेधात् अद्रमीत्येवेति । एवं णिति कृति च द्रमः द्रमक इत्यादि । दन्द्रमणः । लुषसूयेत्यादिना तच्छीलादौ यङन्तादस्माद्युचि अल्लोपयलोपौ । द्रमिडः । यमताड्’ इति डः । ‘नेड्वशि कृती’ति निषेधो बाहुलकान्न भवति । हम्मति । जहम्म । हम्मितेत्यादि । जिहम्मिषति । जेहम्यते । जंहम्मीति । जंहन्ति । जंहन्त इत्यादावनुपधात्वान्नोपधादीर्घः । लङि हल्ङ्यादिसंयोगान्तलोपयोर्मो नो धातो’रिति नत्वे अजंहन् । हम्मयति । अजहम्मत् । हम्मित्वा । हम्मतिः । ज्ञानं, गत्यर्था बुद्ध्यर्थः न हम्मतिः अहम्मतिः अज्ञानम् । यद्वा अहमिति मतिः । अहंशब्दो मान्तोहङ्कारवचनोऽव्ययम् । मीमति । मिमीम । मिमीमतुः । मीमितेत्यादि । मिमिमिषति । मेमीम्यते । मेमीमीति । मेमीन्त इत्यादि । लङि अमेमीन् । मीमयति । अमीमिमत् । मीमित्वा । मीमितः । अयं शब्दे चेति क्व चित्पठ्यते ॥ ४६३ ॥

चमु छमु जमु झमु अदने ॥ चमति । चचाम । चमतुः । चमितेत्यादि । आङ्पूर्वत्वे तु ष्ठिवुक्लमुचमां शितीति दीर्घः । आचामति । आचामतु । आचामत् । आचामि । आचामयति । चिणि ञिति णिति कृति च नोदात्तोपदेशेति वृद्धिनिषेधात् अचमि । चमः । चमकइत्यादि । अत्रापि अनाचमीतिवचनाद् आचामि आचाम इति वृद्धिरेव । ननु वार्त्तिके अचमिकमिवमीनामिति केवलस्योपादानात् सर्वत्र वृद्ध्या भाव्यम् । नैतत् । यत इदं वार्तिकं धात्वन्तरमपि पर्युदसनीयं न केवलं सूत्रोपात्त इत्येवं परम् । तथा च भाष्ये अध्यगीष्ट । अत्यल्पमिदमुच्यते अनाचमेरिति । अत एव न्यासश्चमेस्तावत् अनाचमेरिति सूत्रएवोपादानात् प्रतिषेधइति । तथा वर्द्धमानोपि उपसर्गोपादानात् अचमि, पर्यचमीति । अपि च वृत्तावपि वार्त्तिकस्योदाहरणमाङ्पूर्वमेव दर्शितम् । चिचमिषति । चञ्चम्यते । चञ्चन्ति । चञ्चान्त इत्यादि ।

यत्रापि प्रकृतिवदाहुः पूर्वत्वे चिण्णि ञिति णिति कृति वृद्धिः, अन्यत्र तदभावस्तु । चामयति । न कम्यमिचमामिति मित्त्वनिषेधः । चम्यतेऽत्रेति चमसः । अत्यमिचमीत्यसन् । चमूः । कृषिचमितनिधनिसर्जिभ्य ऊरित्यू-कारप्रत्ययः । क्रमति । चक्राम । क्रमितेत्यादि । चिक्रमिषति । चङ्क्रम्यते । चङ्क्रमीति । चङ्क्रन्ति । चङ्क्रान्त इत्यादि । क्रमयति । अमन्तत्वान्मित्त्वम् । विभाषा चिण्णमुलोः' 'चिण्णमुलोर्दीर्घोऽन्यतरस्या'मिति वा दीर्घः । अक्रमि । अक्रामि, क्रमंक्रमम् । क्रामंक्राममिति । चिण्वदिटि वृद्धेर्भावाभावाभ्यां णिलोपे' क्रमिष्यते, क्रामिष्यते इत्यादि । शुद्धे पुनरिटि गुणाययोः क्रमयिष्यत-इत्यादि । णिचोभावे चिण्णि ञिति णिति कृति च नोदात्तोपदेशस्येति वृद्धि-निषेधात् अक्रमि इत्यादिरेव भवति । जमति । जजाम । जेमतुः । जमिता । झमति । जझाम । झमितेत्यादि पूर्ववत् । अत्र मैत्रेयः । जिमिं के चिदिच्छन्ति, जेमनमिति । एवामुदित्त्वात्क्त्वायामिड्विकल्पे चमित्वा । चान्त्वेत्यादि भवति । निष्ठायां 'यस्य विभाषे'त्यनिट्त्वाच्चान्त इत्यादि । अनिटि । अनुनासिकस्य क्विझलोः क्ङितीति दीर्घः ॥ ४६७ ॥

क्रमु पादविक्षेपे ॥ क्रामति । चक्राम । चक्रमतुः । क्रमिता । क्रमि-ष्यते । क्रामतु । अक्रामत् । क्रामेत् । आशिषि । क्रम्यात् । अक्रमीत् । ह्म्यन्तेति वृद्धिनिषेधः । अक्रमिष्यत् । 'क्रमः परस्मैपदेष्वि'ति परस्मैपदे शिति दीर्घः । क्रामेत्यत्र हेर्लुकि प्रत्ययलक्षणेन परस्मैपदपरशित्परत्वेन दीर्घः । न च न लुमतेति निषेधः । तस्य लुमता लुप्तप्रत्ययनिमित्ताङ्गसंज्ञा-विषयत्वात् । इह च द्वौ विकरणान्तमङ्गं क्रमस्तु विकरणे, विकरणश्च नित्यत्वात् पूर्वमत्र भवति । 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' इति सर्वविषये पक्षे श्यनो विधानात् क्राम्यति, क्राम्यतु, अक्राम्यत् । क्राम्येदित्यपि भवति । पूर्ववद्दीर्घः । चिक्रमिषति । चङ्क्रम्यते । चङ्क्रमीति । चङ्क्रन्ति । इत्यादि । क्रमयति । अचिक्रमत् । 'मितां ह्रस्व'इत्यत्र वृत्तिः । के चिदत्र वेत्यनुवर्तयन्ति सा च व्यवस्थितविभाषा, तेन संक्रामयतीत्येवमादि सिद्धं भवति, अविगीतस्तु संक्रमयतीति, अतएव रसातले संक्रमितेत्यादिप्रयोगोऽनुकू-लः । क्रमते । चक्रमे । क्रन्ता । क्रंस्यते । क्रमताम् । अक्रमत । क्रमेत, क्रंसीष्ट ।

अक्रंस्त । अक्रंस्यत । अनुपसर्गाद्वेति पक्षे तङ् । अत्रापि शब्विषये वा श्यनि क्राम्यतइत्यादि 'वृत्तिसर्गतायनेषु क्रम' इति वृत्त्यादिषु नित्यस्तङुदाहार्यः। वृत्तिरप्रतिबन्धः । सर्ग उत्साहः । तायनं स्फीतता, अयं वृत्त्यादिविषय-स्तङु'पपराभ्या'मिति सिद्धे सत्यारम्भान्नियमादन्योपसृष्टाच्च भवति तेन संक्रामतीति परस्मैपदमेव। यदायमाङ्पूर्व उद्गमनार्थस्तदा 'आङ उद्गम-न'इति वचनात् नित्यस्तङुदाहार्यः। आक्रमते भानुरित्यादि। अत्र 'ज्योति-रुद्गमनइति वक्तव्य'मित्युक्तत्वात् आक्रामति धूमो हर्म्यतलादित्यत्र न भवति । उद्गमने वर्तमानोयमकर्मक इति कैयटउक्तम् । पदमञ्जर्यां तु आक्रामति धूमो हर्म्यतलमिति वृत्तिमुपादाय उद्गमने क्रमिरकर्मकः, तस्मादाक्रमति धूमोहर्म्यतलादिति पठितव्यमित्युक्तम् । यद्वा उद्गमनपूर्विकायां व्याप्तौ अत्र क्रमिर्द्रष्टव्य इति द्वितीया समर्थिता । अतः समाक्रामति चन्द्रमा इत्यत्र नोद्गमनं विवक्षितं किं तर्हि व्याप्तिरिति परस्मैपदमिति तत्रैवोक्तम् । विक्रमते । सुष्ठु पदानि विक्षिपतीत्यर्थः । अश्वादीनां गतिविशेषो विक्रम इति वृत्तिः । 'वेः पादविहरण'इति नित्यस्तङ्, अन्यत्र विक्रामत्यजिनसन्धिरिति । त्रुट्यतीत्यर्थः । प्रक्रमते भोक्तुम् । उपक्रमते भोक्तुम् । 'प्रोपाभ्यां समर्थाभ्या'मिति नित्यस्तङ् । समर्थौ समानार्थौ । तच्च समा-मार्थत्वमादिकर्मणि । अन्यत्र प्रक्रामति उपक्रामतीति, आगच्छति उपगच्छतीति चार्थः । आत्मनेपदेषु वलाद्यार्धधातुकस्य 'स्नुक्रमोरनात्मनेपदनिमि-त्त'इतीड्भावः । स्नुक्रमोर्वलाद्यार्धधातुकस्येडागमो भवति आत्मनेपदनिमित्ताभावइत्यक्षरार्थः । तदर्थादनयोरुदात्तत्वादेवेटः सिद्धावप्यभावादात्मने-पदनिमित्तत्वे निषेधार्थं सूत्रं भवति । निमित्तग्रहणं मुख्यरूपताप्रतिपत्त्यर्थं न तु योग्यतापरमिति कर्मकर्तृविषयाद्भावकर्मविषयाच्चास्मात् अतः सत्यामपि योग्यतायामात्मनेपदाभावात् प्रक्रमिता प्रक्रमितुं प्रक्रमितव्यमितीड् भवत्येव । न चार्थविशेषादुपसर्गविशेषाच्चात्मनेपदस्य निमित्तं न क्रमिरिति कथमस्यात्मनेपदनिमित्तत्वमिति मन्तव्यम् । यतस्तेषां विषयतया विशेषणत्वात् तद्विशिष्टो धातुरेव निमित्तम् । विक्रंस्तइत्यादौ 'पूर्ववत् सन'इत्यतिदेशादात्मनेपदनिमित्तत्वमेव अनन्तोऽप्यात्मनेपदस्य निमित्तमिति तस्य

क्रमिनिमित्तत्वादिडभावः । चिक्रंस्यत इत्यादौ भावकर्मणोरपि परत्वात् 'पूर्ववत् सनः' इत्यात्मनेपदमिति प्रकृतेरेवात्मनेपदनिमित्तत्वमितीडभावः सिद्धः । अस्ति च विप्रतिषेधः भावकर्मणोरित्यात्मनेपदक्रमिनिमित्तत्वाभावादिट् स्यात्, अनेन तु सति नेति । यदा तु सनन्ताण्णिच् तदात्मनेपदस्य क्रमिनिमित्तत्वाभावात् चिक्रमिषयतीतीटा भाव्यम् । तथा चिक्रमिषते स्वयमेवेति कर्मकर्तर्यपि । अत्र हि कर्मवदतिदेशनिमित्तमेवात्मनेपदं न तु क्रमिनिमित्तम् । अत्र हरदत्तः । सिद्धं तु क्रमेरात्मनेपदेन समानपदस्थस्येण्निषेधात् । 'क्रमेश्चे'ति वार्त्तिककारवचनादिहाप्यात्मनेपदेन समानपदस्थत्वादिटा न भाव्यमित्याह । भाष्यवार्त्तिकपूर्वापरपर्यालोचनायां समानपदस्थत्वे तात्पर्यं नेति प्रतीयते । यतस्तु वार्त्तिककार आत्मनेपदे परे स्नुक्रमोर्नेडित्येवं सूत्रार्थे आश्रीयमाणे निर्दिष्टपरिभाषया आनन्तर्य एव भाव्यत्वात् प्रक्रंसिष्यत इत्यत्र स्येन व्यवधानात् प्रक्रंसिष्टेत्यत्र च सीयुट आत्मनेपदभक्तत्वात् प्रक्रंस्येते इत्यत्र व्यपवर्गाभावात् आत्मनेपदपरत्वाभावादिण्निषेधाप्रसङ्गादात्मनेपदपरतङ्परसीयुडेकादेशेषु च प्रतिषेधो वक्तव्य इत्युक्तत्वात् परिहारमात्राय सिद्धं त्वात्मनेपदेन समानपदस्थस्येण्निषेधादित्याह । भाष्यकृता च यथान्यासमेवास्त्विति सूत्रमेव स्थापितम् । न च तत्र समानपदस्थत्वावगतिः, तथा वृत्तावपि, न चेत् स्नुक्रमी आत्मनेपदस्य निमित्ते, निमित्तत्वं सीयुडादेस्तत्परस्य च प्रतिषेधार्थमित्युक्तम् । गतमन्यत्, प्रक्रन्तेत्यादावात्मनेपदाभावेपि क्रमेस्तु कर्त्तर्यात्मनेपदविषयादन्यत्राप्यात्मनेपदे प्रकृतिनिषेधो वक्तव्य इति इडभावः । अनुपसर्गात् क्रमेः क्रन्ता क्रमितेत्युभयमपि भवति । अनुपसर्गाद्वेति विकल्पेनात्मनेपदविषयादित्येके । अन्ये त्वात्मनेपदविषयादिति अनन्यभावे विषयशब्दं वर्णयन्तः क्रमितेत्येव भवितव्यमित्याहुरिति । पदमञ्जर्याम् । क्रमेरात्मनेपदे तासावनिठत्वात् उपदेशेत्वत इति थल इण्निषेधो नाशङ्क्यः । यतः परस्मैपदे तासौ सेट्त्वान्नित्यानिठत्वाभावः । क्रान्त्वा क्रमित्वा । उदित्त्वादिड्विकल्पः । इडभावे 'क्रमश्च क्त्वी'ति वा दीर्घः । क्रान्तः । 'यस्य विभाषे'तीण्निषेधः । क्रमः । घञ् । नोदात्तोपदेशस्येति वृद्धिनिषेधः । क्रममधीते क्रमकः । 'क्रमादिभ्यो वुन्' इति तदधीते तद्वेदेति

विषये वुन् । चङ्क्रमणः । जुचङ्क्रम्येति युच् । न क्रामतीति नक्रः । ‘डोऽन्यत्रापि दृश्यत’ इति डः । ‘नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्ये’ति निपातनान्नञो नलोपाभावः । क्रिमिः । क्रमिगमिनमिस्वभ्यामच्च इत्येतीन्प्रत्यये अकारस्येकारः । क्रमिणः । ‘लोमादिपामादिपिच्छादिभ्यः शनेलच’ इति पामादिपाठान्मात्वर्थियो नः ॥

यज्ञनारायणार्येण प्रक्रियेयं प्रपञ्चिता ।

तस्या निःशेषतस्सन्तु बोद्धारो भाष्यपारगाः ॥

अथादय उदात्ता उदात्ततः ॥ ४६८ ॥

(शेषमग्रे)

सटीकसंक्षेपशारीरकम् ।

(*Continued from page* 205. Vol. VI.)

मू० ॥ न नामयोगो न तु धातुयोगो

लिङ्गादियोगोऽपि न कारणं नः ॥

नञः स्वसंबन्धिनिवृत्तिमात्रं

स्वतोऽभिधेयं परतोऽन्यदस्य ॥ ४१२ ॥

टी० ॥ इदानीमाक्रमते यद्यप्युक्तविधयापि न हन्यादित्यादिनिषेधवाक्यस्य सिद्धमात्रपर्यवसानं सिध्यति तथाऽपि यदि नेक्षेतेतिवाक्यस्यनञस्तथाविरुद्धार्थप्रतीत्यनुरोधेन तस्य मुख्यार्थत्वं भवेत्तर्हि ततस्तत्प्रतीतौ शक्तिं विना गत्यन्तरमुक्तमेव, यद्युपपत्तितः तर्हि सा तत्र नास्त्येव, प्रत्युत विपक्ष एव सेत्याशयेन नामादियोगव्यवस्थया तुल्यवन्नञर्थवैचित्र्यमुक्तं दूषयति । न नामयोग इति । कारणं व्यवस्थयान्यत्वादिप्रतिपादन इति शेषः । नः अस्मन्मते कुतस्तत्राह । नञ इति । स्वसंबन्धिनो निवृत्तिरभावः तन्मात्रं स्वतः मुख्यवृत्त्या । तर्हि ब्राह्मणादिप्रयोगेषु अन्याद्यर्थप्रतीतिः कथं तत्राह । परत इति । अस्य नञोऽन्यत्वसदृश्यप्रतिषेधातिरिक्तं तदन्यत्वादि परतो लक्षणया प्रतीयत इति शेषः । तथा चान्य-

सम्भवादनेकशक्तिकल्पने गौरवाच्च तदन्यतद्विरोधिनो नञो न मुख्यार्था-विति भावः ॥ ४१२ ॥

मू० ॥ तथाहि नाये करिष्यीति नाम्ना
गजोऽत्र नास्तीति च धातुयोगे ॥
लिङ्गादियोगेऽपि निवृत्तिरर्थो
विषं न खादेदिति नञ्पदस्य ॥ ४१३ ॥

टी० ॥ ननु नामादियुक्तेन नञा नियमेन प्रतीयमानयोस्तद-न्यविरोधिनोः कथं लाक्षणिकत्वमित्याशङ्क्य नियमेन ततस्तत्प्रतीतिरसि-द्धेत्याशयेन तदप्रकारत्वमेव विवृणोति । तथाहीति । नाये करिष्यीति वाक्य इति शेषः, अये करिष्यी नेति वाक्ये नञ्पदस्य नाम्ना योगेऽपीत्यनुषङ्गः । एवं गजोऽत्र नास्तीत्यादावपि योजना । निवृत्तिः प्रसज्यप्रतिषेधः । न खा-देत भक्षयेत्, लोके हि नाये करिष्यीत्यादिवाक्ये प्रयुक्तान्नञो नामादि-सम्बन्धविशेषे सत्यपि लिङ्गादियुक्तात्ततस्तदर्थाभाव इव करिष्यादेरभाव एव प्रतीयते न ततोऽर्थान्तरमिति कुतस्त्वदुक्तो नियमः, कुतस्तरां नामादे-र्नञ्सम्बन्धस्य त्वदुक्तव्यवस्थितनञर्थप्रतीतिहेतुत्वमिति भावः ॥ ४१३ ॥

मू० ॥ तथा श्रुतौ नेति वचःसु नाम्नि
नानेह नास्तीति च धातुयोगे ।
तथा विधाने न कलञ्जमद्या-
न्नञोऽविशेषेण निवृत्तिरर्थः ॥ ४१४ ॥

टी० ॥ ननु लोके यथा तथाऽस्तु, श्रुतौ तूक्तव्यवस्था भविष्यतीत्या-शङ्क्य तत्रापि लोकसाम्यमेवाह । तथा श्रुताविति । नेतिनेतीति वाक्य-द्वयं स एष नेतिनेतीति वाक्यं चापेक्ष्य नेति वचःस्विति बहुवचनम् । नापि नामयोगे इतिशब्दस्य नामत्वाच्छ्रुतौ नेति वचःसु नञो नामयोगे सत्यपि । तथा नेह नानास्तीति वाक्ये अस्तीति धातुना योगेऽपि नानेह नास्तीति छन्दोऽनुरोधेन व्यत्ययः, तथा न कलञ्जमद्यादिति वाक्ये विधाने विधायकपदयोगेऽप्यविशेषेण त्वदुक्तविशेषं विनैवेतिशब्द-

परामृश्यप्रपञ्चादिनिवृत्तिरर्थो भवति तथैव तदर्थस्य बादरायणादिभिः प्रकृतैतावत्त्वं हि प्रतिषेधतीत्यादिन्यायेन निरूपितत्वादतो वेदेऽपि नामयोगादिना नञो न व्यवस्थितार्थत्वमित्यभाव एव स्वतोऽव्यभिचाराच-अर्थः पर्युदासस्तु लाक्षणिक एवेति भावः ॥ ४१४ ॥

मू० ॥ औदासीन्यं पुरुषगतमेवाविशेषान्नञोऽर्थो*
भ्रान्तिप्राप्ते सति तु विषये यत्रयत्रैव दृष्टः ।
औदासीन्यं पृथगिह भवेदात्मचिन्मात्ररूपा-
त्सिद्धे वस्तुन्यवसितमतो वेदवाक्यं निषेधे ॥ ४१५ ॥

टी० एवं नामादियोगेन नञः स्वतोऽर्थविशेषनिष्ठत्वं निराकृत्य मुख्यया वृत्त्या प्रसज्यप्रतिषेधार्थत्वमुक्तं तदुपसंहरति । औदासीन्यमिति । प्रसज्यप्रतिषेध इत्यर्थः । भावप्रपञ्च इवाभावोऽप्यात्मन्येव बाध्य इति दर्शयितुं पुरुषगतमेवेत्युक्तम् । नञर्थो भवेदिति शेषः । तुरवधारणे । विषये नामाद्यर्थे । भ्रान्तिप्राप्ते वस्तुतोऽविद्यमाने भ्रान्त्या प्रसक्ते सति । यत्रयत्र वाक्ये एष नञ् दृष्टः तत्र सर्वत्राविशेषान्नामादियोगकृतविशेषाभावात् पुरुषगतमौदासीन्यमेव नञर्थो भवेदिति संबन्धः । ननु नेतिनेतीति वाक्यस्यात्मपरत्वात्कथं निषेधपरत्वम् । अन्यथा तस्यानात्मनिष्ठत्वापत्तेरात्मनोऽद्वयत्वव्याघाताच्च इत्याशङ्क्य सोऽपि प्रपञ्चाधिष्ठानात्मैवेति नोक्तदोष इत्याशयेनाह । नौदासीन्यमिति । इह ब्रह्मणि ॥ ४१५ ॥

मू० ॥ प्रवर्तकं वाक्यमुवाच चोदनां
निधाय बुद्धौ वचनं निवर्तकम् ॥
द्वितीयसूत्रे भगवान्बहुश्रुतो
न चोदनाद्वित्वनिवारणाय तत् ॥ ४१६ ॥

टी० ॥ इदानीं नाक्षं न हन्यामित्यादिना प्राभाकरोक्तं निषेधवाक्यस्य प्रवृत्तिनिष्ठत्वं सोपस्कारमेवाशङ्क्य निराकरिष्यन्नादौ शाबरभाष्यानुविरोधेऽपि विधिः प्रवृत्तिनिष्ठ एवेति तदुक्तं दूषयति । प्रवर्तकमिति ।

---

* नञर्थो । पा० २ ॥

द्वितीयसूत्रे चोदनालक्षणोऽर्थो धर्म इति सूत्रे। भगवान् बहुश्रुतः तत्र हेतु-र्बहुश्रुतः यत इत्य सहस्रशाखा यर्वतोऽपि वेत्ति शबरस्वामीत्येतिहासम्। चोदनानां प्रवर्तकत्वनिषेधकत्वरूपेण द्वित्वस्य द्वैविध्यस्य निवारणाय न तद्वाक्यमित्यर्थः। भाष्यकारो हि निवृत्तिनिष्ठामपि चोदनां बुद्धौ निधा-यैव वेदे निषेधकपरमपि वाक्यमस्तीति जानन्नेव प्रक्रान्तधर्मनिरूपणाय प्रवृत्तस्तत्प्रमाणं प्रवर्तकं वाक्यं चोदनामुवाच न तु निवृत्तिमात्रनिष्ठां चोदनां निवारयितुम्। अन्यथोक्तविधया निषेधवाक्यस्य प्रवृत्तिनिष्ठत्वासि-द्धेस्तस्य तदज्ञानप्रसङ्गाच्च बहुश्रुतत्वं संभवेदिति भावः॥ ४१६॥

मू०॥ ननु निवृत्तिपरत्वमुदीरितं
विघटयामि निषेधगिरामहम्॥
न हि कलञ्जमिति प्रतिपाद्यते
यदि तदा नयनेन विरुध्यते॥ ४१७॥

टी०॥ एवं भाष्यवाक्यबलान्निषेधवाक्यस्य निवृत्तिकार्यार्थत्वमाशा-ङ्क्तं निरस्तमिदानीं प्राभाकरः प्रतिज्ञापूर्वकं निषेधनिष्ठत्वं दूषयति। नन्विवृत्तीति। किं कलञ्जाद्यभावो निषेधवाक्ये नञर्थः। किं वा भक्षणाद्यभावः। उत प्रत्ययार्थाभाव इति विकल्प्याद्यं प्रत्यक्षविरोधेन दूषयति। न हीति। यदीह कलञ्जं न हीति निषेधवाक्ये नञर्थः प्रति-पाद्यते तदा नयनेन प्रत्यक्षेण विरुद्ध्यते। तस्य तत्र प्रत्यक्षेणानुभवादि-त्यर्थः॥ ४१७॥

मू०॥ अथ कलञ्जपदार्थगभक्षणं
न हि तदप्यमुनेत्र विरुद्ध्यते॥
अथ तदीयफलस्पृहयाऽन्वयो
न हि तदप्यनुभूतिपराहतम्॥ ४१८॥

टी०॥ द्वितीयं दूषयति। अथेति। अनेनार्थान्तरतोक्ता। कलञ्जप-दार्थभक्षणं तस्य भक्षणं न हीति यदि प्रतिपाद्यत इत्यनुषङ्गः। तदपि पूर्ववत्प्रत्यक्षेणैव बाध्यते तदौन्मुख्येन चेतस्य* स्वसामग्रीद्वारा प्राप्तत्वा-

तदौन्मुख्येनैवेतस्य। पा० २॥

दित्याशयेनाह । तदपीति । तृतीयेऽपि किं प्रत्ययार्थः फलरागः, उत भक्षणादिनियोगः । आद्यमनूद्य प्रत्याह । अथ तदीयेति । कलञ्जभक्षणादिसंबन्धि यत्फलं तस्य स्पृहा रागः तयाऽन्वयो नञ इति शेषः । तदपि एतदपि न हीति संबन्धः । यतस्तद्रागिणोऽनुभूतिपराहतमिति ॥ ४१८ ॥

मू० ॥ अथ तदीयनियोगनिवर्त्तनं
भवतु भक्षणमस्तु तदिच्छया ॥
न हि नियोगनिवृत्तिनिवेदने
सति कलञ्जमभक्ष्यमितीङ्ग्यते ॥ ४१९ ॥

टी० ॥ प्रत्ययार्थो नियोगो निषेध्य इति पक्षमनुवदति । अथ तदीयनियोगेति । कलञ्जभक्षणे नियोगो विधिर्नेति निषेधवाक्यार्थ इति शङ्कितुराशयः । एतावता न तवेष्टसिद्धिरिति दूषयति । भवत्विति । अयं निषेधवाक्यार्थ इति शेषः । माभूत्तस्य विधिः नैतावता तद्भक्षणनिवृत्तिः सिद्ध्येत् भोजनादेरिवान्यतोऽपि तत्संभवेन निषेधवैयर्थ्यादित्याशयेनाह । भक्षणमस्त्विति । उक्तमेव व्यतिरेकमुखेनाप्याह । न हि नियोगेति । इङ्ग्यते ज्ञायते ॥ ४१९ ॥

मू० ॥ इह कलञ्जपदेन नञन्वयो
भवति वास्य नञोऽदिसमागमः ॥
अदिगतेन लिङादिपदेन वा
सह समेति नञोऽष गतिस्त्रयी ॥ ४२० ॥

टी० ॥ अस्तु तर्हि यदभावस्तत्र केनापि मानेन न बाध्यते तदभाव एव नञर्थ इत्याशङ्क्य शब्दोपस्थितस्यैव शाब्देन नञर्थेनान्वयो वक्तव्यः नामधातुप्रत्ययव्यतिरिक्तशब्दस्येहाभावेन कलञ्जाद्यतिरिक्तस्य नञर्थान्वयिनः कस्य चिच्छाब्दस्यासंभवादित्याशयेनाह । इह कलञ्जपदेनेति । इह प्रकृतवाक्ये अदिना भक्षणवाचिधातुना वा समागमः संबन्धः । अदिगतेनादधातुगतेन लिङादिपदेन प्रत्ययार्थेन वा सह समेति संबध्नाति अन्वितो भवतीत्यर्थः । अत्र न कलञ्जमित्यादिवाक्ये । गतिः ज्ञानोपायोऽन्वयः । त्रयी त्रिविधा ॥ ४२० ॥

Digitized by Google

मू० । उदितपक्षपरिग्रहकारिणां
न च निषेधगिरामुपपादने ॥
भवति शक्तिरतश्च निषेधगी-
रपि नियोगपराऽभ्युपगम्यताम् ॥ ४२१ ॥

टी० । एवं च उक्तान्यतमपक्षे निषेधवाक्यस्य निषेधनिष्ठत्वोपपादनाशक्तेर्निषेधवाक्यमपि निवृत्तिनियोगपरमेवाभ्युपगन्तव्यमिति प्राभाकरः स्वमतमुपस्थापयति । उदितेति । उक्तपक्षचयान्यतमपरिग्रहकारिणां वादिनामित्यर्थः । निषेधगिरां प्रामाण्यस्येति शेषः । यतः उक्तरीत्या निषेधवाक्यस्य प्रामाण्यं न संभवति अत इत्यर्थः । चकारेण शब्दार्थस्य कार्यान्वयनियमं सूचयति ॥ ४२१ ॥

मू० । यथा च यागाद्यनुबन्धभेदा-
द्भिन्नेषु शास्त्रेषु नियोगभेदः ॥
निवृत्तिभेदादपि तद्वदस्य
निवृत्तयोऽपि ह्यनुबन्धभूताः ॥ ४२२ ॥

टी० । ननु वेदे निवृत्तिनियोगस्यैकत्वे भक्षणादिनिवृत्तिनियोगसिद्धावपि पानादिनिवृत्तिनियोगसिद्धिर्न स्यादिति पानादौ यथेष्टं प्रवर्तेत, तन्निवृत्तिनियोगभेदस्तु तन्मतेऽनुपपन्न एव, अनुबन्धभेदाधीनशास्त्रभेदे सत्येव नियोगभेदस्य तदभ्युपगमात्, न हीह यागदानादिरिवानुबन्धो भिद्यत इत्याशङ्क्येहापि पानभक्षणादिभेदेन तत्प्रतियोगिकनिवृत्तिक्रियारूपानुबन्धभेदसंभवान्निवृत्तिनियोगोऽपि यागदानादिनियोगवद्भिद्यत इत्याशयेनाह । यथा च यागादीति । आदिपदेन दानहोमसंग्रहः । अनु पश्चाद्बध्यते व्यवच्छेदकतयेति यागादिधात्वर्थोऽनुबन्धः तद्रूपोऽनुबन्धो नियोगविषयस्तद्भेदाच्छास्त्रेषु असन्निकृष्टार्थप्रतिपादकवाक्येषु भिन्नेषु सत्सु यथा यागादिनियोगभेदस्तद्वदत्र भक्षणादिनिवृत्तिक्रियाभेदादपि निवृत्तिशास्त्रभेदादस्य नियोगस्य भेद इत्यनुषङ्गः । ननु यागादीनामनुष्ठेयत्वात् कृतिसाध्यनियोगानुबन्धत्वं युज्यते न निवृत्तीनामित्याशङ्क्य तासामपि प्रवृत्ति-

विरोधिमनोव्यापाररूपतयाऽनुष्ठेयत्वात्तदनुबन्धत्वं युज्यत इत्याशयेनाह । निवृत्तयोऽपीति । अपिशब्देन तासां यागादिसाम्यं द्योतयति । हि यस्मान्निवृत्तयो यागादिसमास्तस्मादनुबन्धभूता नियोगसाधनत्वस्यावच्छेदकतया तद्द्वारा निरूपकाः स्युरित्यर्थः ॥ ४२२ ॥

मू० ॥ निवृत्तिसिद्ध्याऽपि नियोगसिद्धिः
प्रवर्तमानस्य न गर्तपातः ॥
निषिद्धचेष्टा निरयस्य हेतु-
र्नियोगतो नाध्यवसीयते हि ॥ ४२३ ॥

टी० ॥ नन्वेवमपि कस्तत्र नियोज्यः न हि तेन विना नरव्यापाररूपायाः कृतेर्लिङादिनाऽभिधानं पर्यवस्येदित्याशङ्क्य निवृत्तिनियोगस्य निवर्तनव्यापारसामर्थ्यप्राप्तनिवर्त्यप्रवृत्त्युन्मुखस्यैव तन्नियोज्यत्वात् तन्निवृत्तिमात्रादेव नियोगसिद्धेरत एव विश्वजिन्न्यायात्स्वर्गकामोऽत्र नियोज्योऽस्त्विति निरस्तं सामर्थ्यप्राप्तनियोज्ये संभवति तन्न्यायस्यानवतारादित्याशयेनाह । निवृत्तिसिद्ध्यापीति । ननु कलञ्जभक्षणादिनिवृत्त्या निरयादिपातो न भवतीति तत्परिहारकाम एव नियोज्योऽस्त्विति चेन्न । नियोगस्य तदाकाङ्क्षया कल्प्यत एव शान्तत्वेन तत्कल्पनायोगात् । किं च यदि तद्भक्षणादिना निरयपातो भवेत्तर्हि तद्वर्जनेन सोऽपि वर्जितः स्यात्, न चैवमस्ति प्रमाणाभावादित्याशयेनाह । प्रवर्तमानस्येति । ननु यो ब्राह्मणायावगुरेत्तं शतेन यातयादित्यादिवाक्यान्निषिद्धप्रवृत्तेर्नरकहेतुत्वं प्रतीयत इति चेत्तत्राह । निषिद्धचेष्टेति । हेतुपदानन्तरमितिपदमध्याहर्तव्यम् नियोगतो विधित इत्यर्थः । अर्थवादो हि नियोगाकाङ्क्षितमेवार्थं प्रतिपादयति । नियोगश्च स्वनियोज्यसिद्धयेऽर्थवादसामर्थ्यलभ्यमपि फलमाकाङ्क्षतीत्यन्यतो लब्धे नियोज्ये नियोगस्य तदपेक्षोपरमाच्च नियोगसामर्थ्येन ततस्तदध्यवसातुं शक्यत इत्युक्त एव नियोज्य इति भावः । हिशब्देन नरकाभावरमत एतत्सुप्रसिद्धमिति द्योतयति ॥ ४२३ ॥ (शेषमग्रे)

काशीस्थराजकीयप्रधानपाठशालाध्यापकेन श्रीहरिप्रसादशर्मणा ।

॥ श्रीः ॥

॥ योगवार्त्तिकम् ॥

(Continued from page 197. Vol. VI.*)*

योगाङ्गेषु मध्ये कियन्ति पूर्वपादे प्रोक्तानि कियन्ति चात्र पादे इत्यत्र नियामकं वदन्नेव क्रमप्राप्तं धारणासूत्रमवतारयति । उक्तानीति । बहिरङ्गान्तरङ्गत्वे अपि पादभेदेन निरूपणे नियामके इत्यर्थः ।

देशबन्धश्चित्तस्य धारणा ॥ १ ॥

यत्र देशे ध्येयं चिन्तनीयं तत्र ध्यानाधारदेशविषये चित्तस्य स्थापनं तदेकाग्र्यं धारणेत्यर्थः । तदेतद्व्याचष्टे । नाभीति । मूर्द्ध्नि मूर्द्धस्थे ज्योतिषि आदिशब्देन गारुडाद्युक्तदेशान्तराणि ग्राह्याणि, यथा गारुडे ।

प्राक् नाभ्यां हृदये चाथ तृतीये च तथोरसि ।
कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्द्धसु ॥
किंचित्तस्मात्परस्मिंश्च धारणा दश कीर्त्तिताः ।

मुखे जिह्वाग्रे । किंचित्तस्मात्परस्मिन्निति मूर्द्ध्न उपरि द्वादशाङ्गुलपरिमिते देशे लिङ्गशरीरस्य सप्राणस्य तावत्पर्यन्तं प्रदीपशिखावदवस्थानादवहितैस्तावत्पर्यन्तमेव लिङ्गशरीरानुगतोष्मोपलभ्यते वाक्यानामुपलम्भाच्च । तदुक्तं कौर्मे ।

शिखाग्रे द्वादशाङ्गुल्ये कल्पयित्वाथ पङ्कजम् ।

इत्यादिनेति । एतानि च नाभ्यादीनि जीवेश्वरयोर्मुख्यस्थानान्येव राज्ञः सिंहासनवत् । जीवेश्वरव्यञ्जकस्य लिङ्गशरीरस्य मुख्यस्थानत्वात् अत एतानि धारणायाः प्रकृष्टदेशा उक्ताः आध्यात्मिकान् ध्यानदेशानुक्त्वा बाह्यानपि संक्षेपत आह । बाह्ये वा विषयइति । चन्द्रसूर्याग्न्यादावीश्वरदेवतादिध्यानदेशइत्यर्थः । वृत्तिमात्रेणेति । वृत्तिमात्रेण न तु ध्येयकल्पनयेत्यर्थः । तेन ध्यानाद्व्यावृत्तिः । तदुक्तमीश्वरगीतायाम् ।

हृत्पुण्डरीके नाभ्यां वा मूर्द्ध्नि पर्वतमस्तके ।
एवमादिषु देशेषु धारणा चित्तबन्धनम् ॥

देशावस्थितमालम्ब्य बुद्धेर्या वृत्तिसन्ततिः ।
वृत्त्यन्तरैरसंस्पृष्टा तद्ध्यानं सूरयो विदुः ॥
एकाकारसमाधिः स्याद्देशालम्बनवर्जितः ।
प्रत्ययो ह्यर्थमात्रेण योगसाधनमुत्तमम् ॥

इति । बन्ध इतीत्यन्तेन देशबन्धशब्दं व्याख्याय सूत्रवाक्यार्थमुपसंहरति । बन्ध इति । ईदृशो बन्धो धारणेत्यर्थः । इदं च धारणालक्षणं प्राथमिकपरिच्छिन्नयोगाभिप्रायेण सूचितं यत्र प्रथमत एवेश्वरानुग्रहात् अपरिच्छिन्नतया जीवब्रह्मयोगो भवति तत्र देशालम्बनधारणानुपयोगात् । अतो धारणाया अन्यदपि लक्षणं गारुडादावप्युक्तम् । यथा गारुडे ।

प्राणायामैर्द्वादशभिर्यावत्कालः कृतो भवेत् ।
स तावत्कालपर्यन्तं मनो ब्रह्मणि धारयेत् ॥

इत्यादि । एतदेव तु धारणासामान्यलक्षणम् । अन्यथा क्षणमात्रेणापि धारणापत्तेः । अतः सूत्रोक्तं विशेषलक्षणमपि प्राणायामद्वादशकालावच्छिन्नत्वेन विशेषणीयमिति । धारणासाध्यं ध्यानमाह ।

तत्र प्रत्ययैकतानता ध्यानम् ॥ २ ॥

भाष्यं सुगमम् । इदमपि ध्यानलक्षणं प्राथमिकौत्सर्गिकध्यानाभिप्रायेण सर्वत्र ध्याने देशानियमात् । अतोऽस्य गारुडे लक्षणान्तरमुक्तं तस्यैव ब्रह्मणि प्रोक्तं ध्यानं द्वादशधारणेत्यनेन । तस्यैव द्वादशप्राणायामकालेन धारितचित्तस्य द्वादशधारणाकालावच्छिन्नं चिन्तनं ध्यानं प्रोक्तमित्यर्थः । अनेन च पूर्ववत्सूत्रोक्तं विशेषलक्षणं विशेषणीयम् । ध्यानसाध्यं समाधिं लक्षयति ।

तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ॥ ३ ॥

मात्रपदास्यार्थः स्वरूपशून्यमिवेत्यनेन स्वयं विवृतः । तदेतद्व्याचष्टे । ध्यानमेवेति । तदा तदेव ध्यानं ध्येयस्याकारेणैव सा चित्ति निर्भासते न तु प्रत्ययाकारनिर्भासं चित्तस्य ध्येयस्वरूपावेशेनाहमिदं चिन्तयामीत्येवं प्रत्ययाकारवृत्त्यन्तरानुदयात् । तदा ध्यानमेव समाधिरुच्यत इत्यर्थः ।

Digitized by Google

…स्वरूपस्य वस्तुतः सत्त्वादेव शब्दप्रयोगः । तथा च ध्यातृध्येयध्यान-भानवत् ध्यानं तद्रहितं च समाधिरिति ध्यानसमाध्योर्विभागः । इदं च समाधिलक्षणं पूर्वसूत्रोक्तध्यानविशेषतया देशघटितत्वेनापरिच्छिन्न-समाधिव्यापकम् अतोऽर्थमात्रावभासनं चिन्तनमित्येव समाधिसामान्यलक्ष-णम् । उदाहृतेश्वरगीतावाक्ये तल्लक्षणसिद्धे । अथ वा मार्कण्डोक्तं यथा ।

ध्यानद्वादशपर्यन्तं मनो ब्रह्मणि योजयेत् ।
तिष्ठेत्तल्लयतो युक्तः समाधिः सोऽभिधीयते ॥

इतीति । अत्रापि सूत्रोक्तं विशेषलक्षणं ध्यानद्वादशगुणितकाला-वच्छिन्नत्वेन विशेषणीयमिति । अस्य च समाधिरूपस्याङ्गस्याङ्गियोग-संप्रज्ञातयोगादयं भेदो यदत्र चिन्तारूपतया निःशेषतो ध्येयस्वरूपं न भासते अङ्गिनि तु संप्रज्ञाते साक्षात्कारोदये समाध्यविषया अपि विषया भासन्त इति । तथा च साक्षात्कारयुक्तैकाग्र्यकाले संप्रज्ञातयोगो ऽन्यदा तु समाधिमात्रमिति विभागः । अष्टानां चाङ्गानां फलद्वयं संप्रज्ञातयोग-स्तद्द्वारा ऽसंप्रज्ञातयोगश्चेति । ध्यानादित्रयस्य परिभाषासूत्रम् ।

त्रयमेकत्र संयमः ॥ ४ ॥

अस्मिन्नेव पादे प्रोक्ततया त्रयशब्देन धारणादित्रयमेव लभ्यते । भाष्यं सुगमम् । धारणाध्यानसमाधीनां मिलितानां तत्रतत्र सूत्रे ऽनया संज्ञया व्यवहारो भविष्यति । तेषु च प्रातिस्विकरूपैस्त्रयाणामुच्चारणे ग्रन्थबाहुल्यं स्यादित्याशयेन तन्त्रान्तरसिद्धसंज्ञाप्रतिपादकमिदं सूत्रम् । संयमसिद्धयोऽग्रे विस्तरतो वक्ष्यन्ते सांप्रतं संयमस्य योगाङ्गताप्रयोजकं द्वारमाह ।

तज्जयात्प्रज्ञालोकः ॥ ५ ॥

तज्जयः संयमस्य जयः स्थैर्यं सात्म्यमिति यावत् । तस्मात्प्रज्ञाया आलोको दीप्तिर्वृद्धिः क्रमेण भवतीत्यर्थः । तदेतद्व्याचष्टे । तस्येति । स्वोक्तं विस्रोति । यथेति । वैशारद्यं चातिसूक्ष्मव्यवहितादर्थानां परप्रत्यक्षीकर-णसामर्थ्यमिति । संयमस्यानुष्ठाने विशेषमाह ।

तस्य भूमिषु विनियोगः ॥ ६ ॥

तस्य संयमस्य स्थूलादिपूर्वपूर्वभूमिकाजयानन्तरं सूक्ष्मादिषूत्तरोत्तरभूमिकासु नियोजनं योगिना कर्त्तव्यमित्यर्थः । एतदेव व्याचष्टे भाष्यकारस्तस्येति । अनन्तरा अव्यवहिता । क्रमेण भूमिकारोहे युक्तिमाह । नहीति । प्रान्तभूम्यपेक्षया ऽधरा ऽधस्या भूमिरजिता येन सोऽजिताधरभूमिर्योगी नहि अनन्तरभूमिमव्यवहितभूमिं विलङ्घ्य प्रान्तभूमिषु व्यवहितोत्तरभूमिषु संयमं लभते । धनुर्धरादिषु स्थूलवेधाद्यनन्तरमेव सूक्ष्मे वेधादिदर्शनात्सोपानारोहणादिषु च क्रमेणैवारोहादिदर्शनात् अन्यथाधःपातात् तदभावाच्चेति । ततश्च संयमालाभात् कुतः प्रज्ञालोकस्तत्तद्भूमिषु स्यादित्यर्थः । तथा चोक्तं गारुडे ।

स्थित्यर्थं मनसः पूर्वं स्थूलरूपं विचिन्तयेत् ।
तत्र तन्निश्चलीभूतं सूक्ष्मेऽपि स्थिरतां व्रजेत् ॥

इति । अयं च भूमिकारोहे क्रमश्चौत्सर्गिकः कदाचिदपोद्यतेऽपीत्याह । जितान्तरेति । ईश्वरप्रसादादादावेव वशीकृतप्रकृतिपुरुषविवेकादिभूमिकस्य योगिनो नाधोभूमिषु परचित्तज्ञानादिषु परचित्तप्रत्ययादिषु प्रत्यये परचित्तज्ञानमित्यादिआगामिसूत्रवाच्येषु विराडादिस्थूलेषु वा संयमो युक्त इत्यर्थः । पृच्छति । कस्मादिति । उत्तरं, तदर्थस्येति । अपरभूमिसंयमप्रयोजनस्योत्तरभूम्यारोहणस्येश्वरानुग्रहादेवावगतत्वात् प्राप्तत्वादित्यर्थः । नन्त्सर्गात्सिद्धं क्रममुल्लङ्घ्य प्रथममुत्तरभूमिकासु संयमारम्भ एव न युक्तः तत्कथमादौ तज्जयो घटेतेति चेन्न । युञ्जमानेनादावेव सर्वोत्कृष्टभूमिकायां स्वचित्तस्य परीक्षणीयत्वात् । तत्संयमायोग्यतां स्वस्यानुभूयैवाधरभूमिषु स्वयोग्यतामवधार्य चित्तस्य धारणीयत्वादिति । नन्वेवमधिकारिपुरुषभेदेन भूमिकाक्रमभेदात् कथं स्वयोग्यो भूमिकाक्रमो योगिभिरवधारणीय इति तत्राह । भूमेरस्या इति । उपाध्यायो गुरुः योगबलादेव स्वयं ज्ञायतीत्यर्थः । अत्र प्रमाणं पृच्छति । कथमिति । उत्तरम् । एवमुक्तमिति । अप्रमत्तः सिद्धिलम्पटः । व्याकरणकृत्वाद्यवधारणार्थं योगाङ्गेष्ववान्तरविशेषमाह सूत्राभ्याम् ।

अथमन्तरङ्गं पूर्वेभ्यः ॥ ७ ॥

आद्यामिसूत्रानुरोधाद्त्र संप्रज्ञातसमाधेरिति पूरयित्वा व्याचष्टे । तदेतदिति । अत्र संप्रज्ञातस्येत्यत्र प्रज्ञाया विशेषणतया ज्ञानस्याप्यन्तरङ्गत्वमेतत्त्रये विवक्षितम् बीजसाम्यात् ज्ञानप्रकरणपाठाच्च । अन्तरङ्गत्वे च बीजमिदं यद्ध्येयातिरिक्तवृत्तिनिरोधरूपे संप्रज्ञाते ध्येयसंयमः साक्षादेव कारणं विषयान्तरसंचाररूपत्वात् एवं ध्येयसाक्षात्कारेऽपि साक्षादेव विषयान्तरसंचाराख्यप्रतिबन्धनिवृत्तिद्वारा कारणमिति प्रत्याहारान्तं त्वङ्गपञ्चकं चित्तस्थैर्यद्वारेण परंपरयैवोभयोः कारणमिति अत एव यस्य जडभरतादेः स्वत एव प्राचीनकर्मवशाच्चित्तं संयमयोग्यं भवति तस्य नास्तीतराङ्गावश्यकत्वमित्युक्तं गारुडादिषु

आसनस्थानविधयो न योगस्य प्रसाधकाः ।
विलम्बजननाः सर्वे विस्तराः परिकीर्त्तिताः ॥
शिशुपालः सिद्धिमाप स्मरणाभ्यासगौरवात् ।

इत्यादिना । अत एव जडभरतादीनां समाधिविघ्नतया बाह्यकर्मत्यागोऽपि श्रूयते । अत एव गीतायां संयमाशक्तायैवाभ्यासकर्मादीनि विशेषत उपदिष्टानि ।

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥
अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥
अभ्यासेप्यसमर्थोसि मत्कर्मपरमो भव ।

इत्यादिना । अभ्यासश्चात्रैव सूत्रितः । स्थितौ यत्नो भ्यास इति । तथा ब्रह्ममीमांसायामपि । समाधिविरोधे सति गुणलोपेन गुणिन इति न्यायसिद्धा बाह्यकर्मानपेक्षोक्ता । अत एव चाग्नीन्धनाद्यनपेक्षेति सूत्रेण विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते इति श्रुत्या ज्ञानकर्मणोः साहित्यमुक्तं तत्राङ्गाङ्गिनो-

रौत्सर्गिकं सहानुष्ठानमेवाभिप्रेतं न तु मोक्षाख्यफले तयोः तुल्यवत्समुच्चयः । अविद्यया मृत्युं तीर्त्वेत्यनेन ज्ञानविघ्नपूर्वनिवृत्त्याख्यमृत्युतरणद्वारेण विद्यायामेव मोक्षदायिन्यां कर्मण उपयोगावगमात् ।

न केवलेन योगेन प्राप्यते परमं पदम् ।
ज्ञानं तु केवलं सम्यगपवर्गप्रदायकम् ॥

इत्यादिवाक्यैर्योगशब्दोक्तकर्मनिरपेक्षात् ज्ञानयोगादपि मोक्षसिद्धेः । अङ्गत्वं च पूर्वजन्मन्यनुष्ठितानामपि कर्मणां जडभरतादिषु सिद्धमिति । एतेन ।

उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः ।
तथैव ज्ञानकर्मभ्यां लभते परमं पदम् ॥

इत्यादि वाक्यानि अङ्गाङ्गिनोरौत्सर्गिकसहानुष्ठानपराण्येव न मोक्षं प्रति समुच्चयबोधकानीति दिक् ।

तदपि बहिरङ्गं निर्बीजस्य ॥ ८ ॥

निर्बीजयोगस्यासंप्रज्ञातस्य तदपि त्रयं बहिरङ्गमेव विवेकख्यातिपरवैराग्यद्वारा परंपरया हेतुत्वेनावश्यकत्वाभावादित्यर्थः । एतदेवाह । तदभावे भावादिति । पूर्वोक्तविदेहप्रकृतिलयानां देवविशेषाणामौत्पत्तिकज्ञानवैराग्याणां संयमनैरपेक्ष्येणैव दैनंदिनप्रलयादावसंप्रज्ञातोदयादित्यर्थः । तथा च स्मृतिः ।

योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ।
आस्तीर्य शेषमभजत् कल्पान्ते भगवान् प्रभुः ॥

इति । तदेतत्प्रागुक्तं भवप्रत्ययो विदेहप्रकृतिलयानामिति सूत्रेणेति । ज्ञानोपायप्रसङ्गेन योगाङ्गानि विस्तरतः प्रोक्तानि इदानीमङ्गभूतस्य समाधेरङ्गिनश्च योगयोः स्वरूपभेदावधारणाय तत्तदवस्थागता विशेषा वक्तव्याः । तावतैव तयोरङ्गाङ्गिनोः प्रयोजनमपि प्रतिपादितं भविष्यति तत्राङ्गसमाधिनो योगद्वयस्य विशेषावधारकसूत्रमुत्थापयति प्रश्नमुखेन । अथेति । निरोधचित्तक्षणेषु निरोधावस्थचित्तक्षणेषु योगद्वयक्षणेषु इति

Digitized by Google

यावत् । गुणव्यापारस्यास्थिरत्वात् त्रिगुणात्मकस्य चित्तस्य निरोधक्षणेष्वपि परिणामधारा आवश्यकी स च परिणामः कीदृश इति प्रश्नः ।

व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः ॥ ९ ॥

असंप्रज्ञातापेक्षया संप्रज्ञातेऽपि व्युत्थानं तथा च व्युत्थानं निरोधश्च योगद्वयसाधारण एवात्र ग्राह्यः केवलस्यासंप्रज्ञातरूपस्य निरोधस्यात्र ग्रहणे संप्रज्ञाताख्यनिरोधस्य परिणामाकथनान्न्यूनतापत्तेः । व्युत्थानसंस्काराभिभवश्च क्रमेण ह्रासो न तु दाहः । निरोधसंस्कारप्रादुर्भावश्च क्रमेण वृद्धिः तौ निरोधपरिणामो निरोधकालीनपरिणामः स च निरोधक्षणचित्तान्वयः प्रत्येकं निरोधक्षणेषु एकस्मिन् स्थिरे चित्तेऽन्वित इत्यर्थः । एतच्च विशेषणं योगकाले प्रतिक्षणमेतादृशपरिणामलाभाय चित्तस्थैर्यलाभाय चोक्तम् । अत्र निरोधकाले जायमानः संस्कार एव निरोधसंस्कार इत्युक्तः तेन संप्रज्ञातरूपनिरोधस्य संस्काराजनकत्वेऽपि तत्कालीनप्रज्ञाजन्यसंस्कारस्यैव निरोधसंस्कारत्वमुपपन्नमिति चित्तधर्मिणो धर्मपरिणामोऽयमिति प्रतिपादनाय भाष्यकार आह । व्युत्थानसंस्काराश्चित्तधर्मा इति । ननु वृत्तिनिरोधेनैव तत्कार्यतया तत्संस्काराणामपि निरोधो भवतु तन्तुनिरोधेन पटनिरोधवत् । अतो न पृथग्व्युत्थानसंस्काराभिभवापेक्षेत्याशङ्कां समाधत्ते । न ते प्रत्ययात्मका इति । न प्रत्ययोपादानकाः । अतो न व्युत्थानसंस्काराः प्रत्ययनिरोधेऽपि निरुद्धा भवन्तीत्यर्थः । निमित्तकारणत्वादेव प्रत्ययस्येति भावः । तस्मात्प्रत्ययनिवृत्तावपि तत्संस्कारनिवृत्तिकारणं पृथगेवापेक्ष्यत इति । शेषं भाष्यं सूत्रव्याख्ययैव व्याख्यातप्रायम् । ननु किमर्थं निरोधसंस्काराः कल्प्यन्ते इत्याकाङ्क्षायां निरोधसंस्कारप्रमाणमाह ।

तस्य प्रशान्तवाहिता संस्कारात् ॥ १० ॥

तस्य निरोधावस्थचित्तस्य प्रशान्तवाहिता निश्चलनिरोधधारया वहनं निरोधसंस्कारबलादेव भवतीत्यर्थः । अतो निरोधसंस्कारस्तत्प्रादुर्भावश्चावश्यमेष्टव्य इति भावः । अन्वयव्यतिरेकाभ्यां कार्यकारणभावं प्रतिपाद-

यति। निरोधेत्यादि भाष्यं सुगमम्। निरोधरूपयोगद्वयकार्यः परिणामो व्याख्यातः इदानीं तद्विलक्षणं योगाङ्गसमाधिकार्यं परिणामं दर्शयति।

सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः ॥ ११ ॥

सर्वार्थता विक्षिप्तता एकाग्रता एकमात्रविषयता तयोर्यथाक्रमं क्षयोदयौ चित्तस्य समाधिकालीनपरिणाम इत्यर्थः। अत्रापि प्रतिक्षणमित्यनुषञ्जनीयं युक्तिसाम्यात् तदेतद्व्याचष्टे। सर्वार्थतेति। सर्वार्थताया अत्यन्तोच्छेद एकदा न भवति। नापि एकाग्रताया निष्पत्तिरेकदा भवति किंतु यथाक्रमेणैवातः क्षयोदयौ तिरोभावाविर्भावपर्यायतया व्याचष्टे। क्षय इत्यादिना तिरोभाव इत्यर्थ इत्यन्तेन। अत्र तिरोभावाविर्भावौ ह्रासवृद्धी। ननु सर्वार्थतैकाग्रतयोर्धर्मौ कथं चित्तस्येत्युच्यते तत्राह। तयोर्धर्मित्वेनानुगतं चित्तमिति। तयोः सर्वार्थतैकाग्रतयोः। तथा च धर्मपरिणामेऽपि धर्मद्वारा धर्मिण एव भवतीत्यर्थः। उत्तरसूत्रवक्ष्यमाणपरिणामात् व्यावर्त्य प्रकृतसूत्रवाक्यार्थभूतं परिणामं व्याचष्टे। तदिदमिति। तदिदमित्यस्य विवरणम् अनुगतमित्यन्तं तथा च चित्तं स्वात्मभूतयोः स्वकार्ययोः सर्वार्थतैकाग्रतयोर्धर्मयोरपायकाले उपजनकाले चानुगतं यत्समाधीयते स समाधिपरिणाम इत्यर्थः। समाहितचित्तस्य तु परिणामः शेषसूत्रेण वक्ष्यत इति भावः। इदानीमङ्गसमाधावेव परिणामान्तरमुक्तपरिणामकालीनमाह।

ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः ॥ १२ ॥

ततः सर्वार्थतायाः निःशेषतः क्षये सति शान्तोदितौ अतीतोत्पद्यमानौ तुल्यप्रत्ययौ एकाकारप्रत्ययौ चित्तस्यैकाग्रताकालीनः पुनः परिणामो भवति सजातीय एकैकः प्रत्ययो नश्यति अन्योन्य उत्पद्यत इत्येवं परिणामो भवतीत्यर्थः। तदेतद्व्याचष्टे। समाहितेति। समाध्यारूढस्य चित्तस्येत्यर्थः। अनेन पूर्वसूत्रोक्तचिताद्व्यवच्छेदः इतः तत्र समाधीयमानचित्तस्यैव परिणामस्योक्तत्वादिति पुनस्तथेत्यनेन धारावाहिक एकाग्रता-

संतान उक्तः । अवधिमाह । आसमाधीति । शेषो ग्रंथः । तदेवं [illegible]द्वयोः परिणामरूपवैलक्षण्यं तयोर्विवेकाय प्रदर्शितम् । अनयेव दिशा व्युत्थानकालीना अपि चित्तपरिणामा व्याख्यातप्रायाः इतः परिणामत्रयसंयमादित्यागामिसूत्रोपोद्घातसंगत्या सर्वत्र वैराग्याभिप्रस्तावाय च चित्तवदेवान्येष्वप्यतिदेशेनैव परिणामान्व्याचष्टे सूत्रकारः ।

एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः ॥ १३ ॥

धर्मलक्षणयोरवस्थाभिश्च परिणामा धर्मलक्षणावस्थापरिणामा एते च भाष्ये व्याख्येयाः, एत एव परिणामाः भूतेन्द्रियेषु न तु तत्त्वान्तरपरिणामा इत्यवधारणाश्रयेणैवात्र प्रकृत्यादिष्विति नोक्तम् । तेन तत्त्वान्तरपरिणामवद्वेतेऽपि परिणामाः सर्व एव यथायोग्यं प्रकृत्यादिष्वप्यवगन्तव्याः । तथा च भाष्यकारो वक्ष्यति एवं धर्मलक्षणावस्थापरिणामैः शून्यं न क्षणमपि न गुणवृत्तमवतिष्ठते इत्येतेन सर्ववस्तुषु परिणामत्रयमिति । सूत्रं व्याचष्टे । एतेनेति । ननु चित्तपरिणाममात्रं पूर्वसूत्रेषूक्तं न तु धर्मलक्षणावस्थापरिणामा इत्याशङ्क्य तद्विभागप्रदर्शनेनापाकर्तुमुपक्रमते । तत्र व्युत्थानेति । तत्र तेषु मध्ये व्युत्थाननिरोधयोरभिभवप्रादुर्भावावेव चित्ते धर्मिणि धर्मपरिणामः प्रथमसूत्रेणैवोक्त इत्यर्थः अवस्थितस्य धर्मिणः पूर्वधर्मतिरोभावे धर्मान्तरप्रादुर्भावस्यैव धर्मपरिणामत्वमिति भावः । यद्यपि प्रथमसूत्रे व्युत्थाननिरोधसंस्कारयोरेवाभिभवप्रादुर्भावावुक्तौ तथापि व्युत्थाननिरोधयोरपायोपजनावप्यर्थाल्लब्धाविति । धर्मश्च द्रव्यं गुणो वेत्यन्यदेतत् । तथा तेनैव सूत्रेणाभिभवप्रादुर्भावशब्दाभ्यां धर्मस्य लक्षणपरिणामोऽप्युक्त इत्याह । लक्षणपरिणामश्चेति । लक्षणपरिणामो हि अवस्थितस्य धर्मस्यानागतादिलक्षणत्यागे वर्तमानादिलक्षणलाभः स चाभिभवप्रादुर्भावशब्दाभ्यामेनैव लब्धः । अतीततावर्तमानतयोरेवाभिभवप्रादुर्भावत्वादिति भावः । तत्रादौ निरोधरूपस्य धर्मस्य प्रादुर्भावशब्दोक्तं लक्षणपरिणाममुदाहरति । निरोधस्त्रिलक्षण इति । एतस्यैव विवरणं त्रिभिरध्वभिर्युक्त इति क्रमेण संबन्धादध्वतुल्यतयाऽनागतादिभावोऽध्वेत्युच्यते । तथा धर्मिणो धर्माणां

चान्योऽन्यं व्यावर्तनाल्लक्षणशब्देन च तन्त्रे परिभाषित इति । ततः किमित्यत आह । स खल्विति । स खलु, निरोधः प्रादुर्भावकाले ऽनागतलक्षणरूपमध्वानं हित्वेत्यादिरर्थः । अत्र सत्कार्योपपत्तये धर्मपरिणामत्वोपपादनाय च धर्मत्वमनतिक्रान्त इत्युक्तम् । स्वरूपेणावस्थितस्यैव धर्मस्य रूपान्तरापाये रूपान्तरोत्पत्तौ धर्मपरिणामव्यवहारादिति । वर्तमानावस्थामितरावस्थाद्वयाद्विविच्य दर्शयति । यत्रेति । स्वरूपेणार्थक्रियाकारित्वेनाभिव्यक्तिरुपलब्धिरित्यर्थः । स चानागतापेक्षया द्वितीयोऽध्वेति शिष्यव्युत्पादनाय प्रसङ्गादाह । एषोऽस्येति । असदुत्पादसद्विनाशयोः प्रतिषेधायाह । न चेति । निरोधलक्षण एव निरोधस्य लक्षणपरिणामं दर्शयित्वा व्युत्थानस्यापि दर्शयति । तथा व्युत्थानमिति । सर्वं पूर्ववत् विशेषस्तु वर्तमानतां हित्वातीततां प्राप्त इति तृतीयोऽध्वेति च । एवं व्युत्थानकालेऽपि व्युत्थाननिरोधयोः लक्षणपरिणामौ क्रमेण दर्शयति । एवं पुनर्व्युत्थानमुपसंपद्यमानमिति । उपसंपद्यमानं जायमानं तच्च व्यक्त्यन्तरम् अतीतव्यक्तेरनुत्पादस्य वक्ष्यमाणत्वात् । अन्यत्सर्वं पूर्ववत् । एवं पुनर्निरोध इति । अत्र एवमित्यनेन तथा व्युत्थानमित्यादिवाक्योक्ता निरोधस्य तृतीयाध्वक्रिया निर्दिष्टा अतो न निरोधतृतीयावस्थाकथनाभावशून्यतेति । इदं च व्युत्थाननिरोधपरिणामचक्रम् अपवर्गपर्यन्तमेवेति संक्षेपेणाह । एवं पुनर्व्युत्थानमिति । व्युत्थानादिरित्यर्थः । चित्तधर्मस्य लक्षणपरिणामं प्रदर्श्य तल्लक्षणस्यावस्थापरिणामं तस्य प्रशान्तवाहिता संस्कारादिति सूत्रे व्याख्यातं दर्शयति । तथा अवस्थापरिणाम इति । उच्यत इति शेषः । संस्कारयोर्बलवत्त्वदुर्बलत्वे च घटस्य नवपुराणतादिवत् वृद्धिह्रासौ उत्पत्तिविनाशरूपत्वे लक्षणपरिणामाद्भेदानुपपत्तेः । लक्षणस्यैव नवपुराणत्वादिना ऽवस्थापरिणाम इति वक्ष्यमाणाच्च । ननु द्रव्यस्यैव वृद्धिक्षयौ दृष्टौ न गुणस्येति चेन्न । रूपादीनामपि वृद्धिह्रासानुभवात् रूपभेदकल्पने च गौरवात् तदेव रूपमिदानीं प्रवृद्धमिति प्रत्यभिज्ञानुपपत्तेश्चेति ॥ (शेषमग्रे)

काशीस्थराजकीयप्रधानपाठशालायां { सांख्ययोगाध्यापकस्तात्याशास्त्र्यपरनामा पटवर्धनोपाह्वो रामकृष्णशास्त्री । ज्योतिषशास्त्राध्यापकः केशवशास्त्री च ।

पञ्चदशी ।

द्वैतविवेकः ।

(*Continued from page* 106. Vol. VI.)

ईश्वरेणापि जीवेन सृष्टं द्वैतं विविच्यते ।
विवेके सति जीवेन हेयो बन्धः स्फुटी भवेत् ॥ १ ॥

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
स मायी सृजतीत्याहुः श्वेताश्वतरशाखिनः ॥ २ ॥

आत्मा वा इदमग्रेऽभूत्स ऐक्षत सृजा इति ।
संकल्पेनासृजल्लोकान्स एतानिति बह्वृचाः ॥ ३ ॥

खं वाय्वग्निजलोर्व्योषध्यन्नदेहाः क्रमादमी ।
सम्भूता ब्रह्मणस्तस्मादेतस्मादात्मनोऽखिलाः ॥ ४ ॥

बहु स्यामहमेवातः प्रजायेयेति कामतः ।
तपस्तप्त्वासृजत्सर्वं जगदित्याह तित्तिरिः ॥ ५ ॥

1. The duality created by Ísvara and the personal sentiency is now propounded. The bondage to be shunned by the personal sentiency will become clear through this inquiry.

2. Let a man know for certain that Máyá is Prakṛiti and that the Máyá-associated one is Maheśvara. This one, associated with Máyá, creates: thus the followers of the Śvetáśvatara recension declare.

3. This (world) was indeed Self before (the creation). Self reflected:—let me create. Self created all these worlds by will:—thus the followers of the Ṛigveda declare.

4. Ether, air, water, earth, herbs, food and bodies—all these are sprung, in order, from Brahma, this same Self.

5. The Self having desired—may I become many, may I pass into plurality; having performed self-torture (of thought), created all this world:—this is the Taittiríya text.

---

2. **Śvetáśvatara, IV. 10.**

3. **Aitareya I. 1. 2.**

4. 5. **Taittiríya III. and II. 6.**

Digitized by Google

इदमग्रे सदेवासीद्बहुत्वाय तदैक्षत ।
तेजोऽबन्नाण्डजादीनि ससर्जेति च सामगाः ॥ ६ ॥

विस्फुलिङ्गा यथा वह्नेर्जायन्तेऽक्षरतस्तथा ।
विविधाश्चिज्जडा भावा इत्याथर्वणिकी श्रुतिः ॥ ७ ॥

जगदव्याकृतं पूर्वमासीद्व्याक्रियताधुना ।
दृश्याभ्यां नामरूपाभ्यां विराडादिषु ते स्फुटे ॥ ८ ॥

विराण्मनुर्नरा गावः खराश्वाजावयस्तथा ।
पिपीलिकावधि द्वन्द्वमिति वाजसनेयिनः ॥ ९ ॥

कृत्वा रूपान्तरं जैवं देहे प्राविशदीश्वरः ।
इति ताः श्रुतयः प्राहुर्जीवत्वं प्राणधारणात् ॥ १० ॥

चैतन्यं यदधिष्ठानं लिङ्गदेहश्च यः पुनः ।
चिच्छाया लिङ्गदेहस्था तत्सङ्घो जीव उच्यते ॥ ११ ॥

6. In the beginning this (world) was the existent Reality. The Reality thought to become many. It created fire, water, food and things born from germs: thus declare the Sámaveda school.

7. As sparks proceed from fire, so from the imperishable Reality come the various living and insentient things: this is a text of the Atharvaveda.

8. The world was unmanifested previous to creation. It is now manifest through visible name and form. These are seen in Viráṭ and the others.

9. Viráṭ, Manu, men, kine, asses, horses, goats and sheep down to ants (he created) in pairs: thus the Vájasaneyins declare

10. Ísvara having taken another form, viz, the living, entered the aggregate of bodies: thus texts declare this to be the nature of the personal sentiency, because it supports life.

11. The personal (transmigrating) sentiency is held to be a combination of the following:—(a) Intelligence (Brahma) as the substrate in which is surmised (b) the subtile body and (c) the reflexion of Intelligence upon this subtile body.

---

6. Chhándogya. VI.

7. Muṇḍaka II. 3. 1.

8-9. Bṛihadárany: III. 4. 7. and III. 4. 4.

Digitized by Google

माहेश्वरी तु माया या तस्या निर्माणशक्तिवत् ।
विद्यते मोहशक्तिश्च तं जीवं मोहयत्यसौ ॥ १२ ॥
मोहादनीशतां प्राप्य मग्नो वपुषि शोचति ।
ईशसृष्टमिदं द्वैतं सर्वमुक्तं समासतः ॥ १३ ॥
सप्तान्नब्राह्मणे द्वैतं जीवसृष्टं प्रपञ्चितम् ।
अन्नानि सप्त ज्ञानेन कर्मणाजनयत्पिता ॥ १४ ॥
मर्त्यान्नमेकं देवान्ने द्वे पश्वन्नं चतुर्थकम् ।
अन्यत्त्रितयमात्मार्थमन्नानां विनियोजनम् ॥ १५ ॥
व्रीह्यादिकं दर्शपूर्णमासौ क्षीरं तथा मनः ।
वाक्प्राणश्चेति सप्तत्वमन्नानामवगम्यताम् ॥ १६ ॥
ईशेन यद्यप्येतानि निर्मितानि स्वरूपतः
तथापि ज्ञानकर्मभ्यां जीवोऽकार्षीत्तदन्नताम् ॥ १७ ॥

12. The inexplicable Máyá, associated with Ísvara, possesses a deluding as well as a creative power. And this deludes the personal sentiency.

13. The personal sentiency having become dependent through infatuation, being sunk in a body, grieves. All this manifold order of things created by Ísvara has been briefly declared by us.

14 In the Bráhmaṇa dealing with the seven kinds of food—"the father created seven kinds of food by meditation and action"—the duality created by the personal sentiency is set forth.

15. One kind of food for men, two kinds for the devas, one for animals and the remaining three for Self—this is the distribution of the kinds of food.

16. This heptad of foods must be understood to consist of rice and the like; the two sacrifices, darśa and púrṇa-mása; milk; mind, speech and vital breath.

17. Although these things were in reality created by Ísvara, yet the personal sentiency, by its own knowledge and action, makes them objects of (its own) fruition.

14, 15, 16, cf. Bṛihadáraṇy: III. 5. 1. et seq.

Digitized by Google

ईशकार्यं जीवभोग्यं जगत् द्वाभ्यां समन्वितम् ।
पितृजन्या भर्तृभोग्या यथा योषित्तथेष्यताम् ॥ १८ ॥
मायावृत्त्यात्मको हीशसङ्कल्पः साधनं जनौ ।
मनोवृत्त्यात्मको जीवसङ्कल्पो भोगसाधनम् ॥ १९ ॥
ईशनिर्मितमण्यादौ वस्तुन्येकविधे स्थिते ।
भोक्तृधीवृत्तिनानात्वात्तद्भोगो बहुधेष्यते ॥ २० ॥
हृष्यत्येको मणिं लब्ध्वा क्रुध्यत्यन्यो ह्यलाभतः ।
पश्यत्येव विरक्तोऽत्र न हृष्यति न कुप्यति ॥ २१ ॥
प्रियोऽप्रिय उपेक्ष्यश्चेत्याकारा मणिगास्त्रयः ।
सृष्टा जीवैरीशसृष्टरूपं साधारणं त्रिषु ॥ २२ ॥
भार्या स्नुषा ननान्दा च याता मातेत्यनेकधा ।
प्रतियोगिधिया योषिद्भिद्यते न स्वरूपतः ॥ २३ ॥

18. Hold the phenomenal world to be connected with these two (Íśvara and Jíva), as an object created by Íśvara and as an object of experience for the personal sentiency; much in the same way that a woman is begotten of her father and beloved of her husband.

19. The will of Íśvara consisting in a modification of the inexplicable power (Máyá), is the instrument in the creation of the world. The will of the individual sentiency, consisting in a modification of mind, is the means by which the world becomes to it an object of experience.

20. Although an object created by Íśvara, such as a gem or the like, remains (in its own nature) one and unchanged, the experience of it as a sensible object is manifold because the mental modifications of the personal sentiencies (bhokṭri) are manifold (in regard to such object).

21. Having won the gem the one man is glad, and another is angry, failing to possess it; while a third, caring not for the gem, merely gazes at it and is neither glad nor vexed.

22. The gem, in its three-fold modifications as a pleasant or unpleasant or indifferent object, is created by the personal sentiencies. The gem in itself (rúpam), created by Íśvara, is the element common to these three aspects.

23. A woman varies so far as she is the mental counterpart of the several notions of wife, daughter-in-law, brother's wife and mother, but in herself she is unchanged.

ननु ज्ञानानि भिद्यन्तामाकारस्तु न भिद्यते ।
योषिद्वपुष्यतिशयो न दृष्टो जीवनिर्मित: ॥ २४ ॥
मैवं मांसमयी योषित्काचिदन्या मनोमयी ।
मांसमय्या अभेदेपि भिद्यते हि मनोमयी ॥ २५ ॥
भ्रान्तिस्वप्नमनोराज्यस्मृतिष्वस्तु मनोमयम् ।
जाग्रन्मानेन मेयस्य न मनोमयतेति चेत् ॥ २६ ॥
बाढं माने तु मेयेन योगात्स्याद्विषयाकृति: ।
भाष्यवार्त्तिककाराभ्यामयमर्थ उदीरित: ॥ २७ ॥
मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा ।
रूपादीन्व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम् ॥ २८ ॥
व्यञ्जको वा यथाऽऽलोको व्यङ्ग्यस्याकारतामियात् ।
सर्वार्थव्यञ्जकत्वाद्धीरर्थाकारा प्रदृश्यते ॥ २९ ॥

24. Here it may be objected that, though these notions vary, the form of the woman does not do so. No difference in the body of the woman (corresponding to the several notions) is observed as caused by the (various) personal sentiencies (that regard her).

25. Not so, we reply: the woman of flesh (and blood) is one thing; the woman of the mind is another. Although the living woman is one and undivided, the mental woman varies.

26. If you object further that, while the thing (known) may be regarded as mental in the case of misapprehension, dreams, play of fancy and recollection, this mental character cannot belong to a thing known through the instruments of right knowledge in the waking state.

27. Granted (we reply, as regards the external object known in the waking state), but the form of (such) object (in the mind), is due to the connexion between the object and the instrument of right knowlege (i e. mind.) This explanation is given by the writers of the Bháshya and Várttika.

28. As (melted) copper poured into a crucible takes its form, so the mind pervading the form, &c., (of external objects) appears certainly to be like these.

29. Or, just as light, the illuminator, takes the form of the illumined object, so the mind is seen to take the form of objects, for it is the illuminator of all objects.

Digitized by Google

मातुर्मानाभिनिष्पत्तिर्निष्पन्नं मेयमेति तत् ।
मेयाभिसङ्गतं तच्च मेयाभत्वं प्रपद्यते ॥ ३० ॥
सत्येवं विषयौ द्वौ स्तो घटौ मृन्मयधीमयौ ।
मृन्मयो मानमेयः स्यात् साक्षिभास्यस्तु धीमयः ॥ ३१ ॥
अन्वयव्यतिरेकाभ्यां धीमयो जीवबन्धकृत् ।
सत्यस्मिन्सुखदुःखे स्तस्तस्मिन्नसति न द्वयम् ॥ ३२ ॥
असत्यपि च बाह्यार्थे स्वप्नादौ बध्यते नरः ।
समाधिसुप्तिमूर्च्छासु सत्यप्यस्मिन्न बध्यते ॥ ३३ ॥
दूरदेशं गते पुत्रे जीवत्येवात्र तत्पिता ।
विप्रलम्भकवाक्येन मृतं मत्वा प्ररोदिति ॥ ३४ ॥
मृतेऽपि तस्मिन्वार्तायामश्रुतायां न रोदिति ।
अतः सर्वस्य जीवस्य बन्धकृन्मानसं जगत् ॥ ३५ ॥

30. From the knower there springs the instrument of knowledge. (The latter) thus produced, goes to the object known and, blended with the object, becomes like it.

31. This being so, there are two objects, the jar of clay (for instance) and the jar of the mind. The jar of clay is an object for the instrument of knowledge. The mental jar is illumined by the witness.

32. The mental object is that which fetters the personal sentiency (as may be proved) by the joint method of agreement and difference. When the mental object is present, pleasure and pain are felt; when the former is absent, the latter also are absent.

33. Moreover, a man is bound (by the fetters of pleasure and pain) in dreams, &c., though an external object (is not present to his senses at this time). And he is not fettered during profound meditation, dreamless sleep or a fainting fit, even when an external object is thus present.

34. 35. A father lives at home while his son is gone to a distant land. Induced by some false reporter's word to believe him dead the parent weeps bitterly. And though his son be really dead, if no word of this has come, the father weeps not. Thus it is the mental world that binds all personal sentiencies.

30. मातुः साधिष्ठानबुद्धिस्थचिदाभासरूपात्प्रमातुः । मानाभिनिष्पत्तिर्मानस्य आभासान्तःकरणवृत्तिरूपस्य अभिनिष्पत्तिरुत्पत्तिर्भवतीति शेषः ॥—ṭíká. *And* compare "Pandit" (New Series) Vol iv, note pp. 109, 341 et seq:

विज्ञानवादो बाह्यार्थवैयर्थ्यात्स्यादिहेति चेत् ।
न हृद्याकारमाधातुं बाह्यस्यापेक्षितत्वतः ॥ ३६ ॥
वैयर्थ्यमस्तु वा बाह्यं न वारयितुमीश्महे ।
प्रयोजनमपेक्षन्ते न मानानीति हि स्थितिः ॥ ३७ ॥
बन्धश्चेन्मानसं द्वैतं तन्निरोधेन शाम्यति ।
अभ्यसेद्योगमेवातः ब्रह्मज्ञानेन किं वद ॥ ३८ ॥
तात्कालिकद्वैतशान्तावप्यागामिजनिक्षयः ।
ब्रह्मज्ञानं विना न स्यादिति वेदान्तडिण्डिमः ॥ ३९ ॥
अनिवृत्तेऽपीशसृष्टे द्वैते तस्य मृषात्मताम् ।
बुद्ध्वा ब्रह्माद्वयं बोद्धुं शक्यं वस्त्वैक्यवादिनः ॥ ४० ॥

36. A baseless Idealism it may be urged, will follow on our doctrine (iha), since external objects are unnecessary. No, we reply: for an external object is necessary to impress its own form upon the mind.

37. Or, granting the uselessness of an external world, an external object we cannot deny. Instruments of knowledge do not demand a use (for the objects known through them):—this is common sense.

38. 39. "If this mind-created duality is the (soul's) bondage, it can find its end in restraint of the mind. A man should practise Yoga only. Say, therefore, what need for knowledge of the Absolute Reality?"—(to your objection we reply), that what the Vedánta proclaims at beat of drum (as it were) is this:—cessation of future births is impossible without a knowledge of Brahma, although cessation of this present transitory duality (may have been secured through Yoga).

40. Monists hold that Brahma, one without a second, can be known when a man has recognised the falsity of the manifold universe created by Íśvara, although this universe has not ceased to exist for him.

---

36. For Vijñánavâda see Gough's Philosophyof the Upanishds pp. 185, 189. (Trübner's Oriental Series).

37. मानाधीना वस्तुसिद्धिर्न प्रयोजनाधीना मानसिद्धस्य प्रयोजनशून्यत्वमात्रेण वस्तुत्वस्य तार्किकैर्वादिभिरनभ्युपगमादिति भावः—ṭiká.

प्रलये तन्निवृत्तौ तु गुरुशास्त्राद्यभावतः ।
विरोधिद्वैताभावेऽपि न शक्यं बोद्धुमद्वयम् ॥ ४१ ॥
अबाधकं साधकञ्च द्वैतमीश्वरनिर्म्मितम् ।
अपनेतुमशक्यञ्चेत्यास्तां तद्विष्यते कुतः ॥ ४२ ॥
जीवद्वैतं तु शास्त्रीयमशास्त्रीयमिति द्विधा ।
उपाददीत शास्त्रीयमातत्त्वस्यावबोधनात् ॥ ४३ ॥
आत्मब्रह्मविचाराख्यं शास्त्रीयं मानसं जगत् ।
बुद्धे तत्त्वे तद्धेयमिति श्रुत्यनुशासनम् ॥ ४४ ॥
शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः ।
परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत् ॥ ४५ ॥
ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः ।

41. The one Reality cannot be known even though the opposing duality be non-existent, for, when duality is destroyed at the dissolution of the universe, neither spiritual guide nor revelation, &c., remain (and without these a knowledge of Brahma is impossible).

42. (We reply :—)The manifold order of the universe, created by Íśvara is effective (of a knowledge of Brahma) and not destructive (of such knowledge) and cannot be set aside by us. Let it therefore remain. Why make it an object of bitter contention?

43. The duality created by the personal sentiency is of two kinds ;—the one countenanced by revelation, the other not. The former a man should accept until a knowledge of the truth has arisen (within him).

44. The mind-created duality (i. e. the duality created by the personal sentiency, v. 43), treated of in Scripture, is called the "deliberation of Brahma as the Self". But when the truth (that Brahma and the Self are one), is known, this duality must be thrown aside :—this is the declaration of revelation.

45. A wise man, having read the Scriptures again and again, and having recognised the supreme Reality, should cast these aside just as a (burnt-out) taper (is thrown away).

46. A wise man, devoted to knowledge and the highest

पलालमिव धान्यार्थी त्यजेद्ग्रंथमशेषतः ॥ ४६ ॥
तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ।
नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तत् ॥ ४७ ॥
तमेवैकं विजानीथ ह्यन्या वाचो विमुञ्चथ ।
यच्छेद्वाङ्मनसी प्राज्ञ इत्याद्याः श्रुतयः स्फुटाः ॥ ४८ ॥
अशास्त्रीयमपि द्वैतं तीव्रं मन्दमिति द्विधा ।
कामक्रोधादिकं तीव्रं मनोराज्यं तथेतरत् ॥ ४९ ॥
उभयं तत्त्वबोधात्प्राङ्निवार्यं बोधसिद्धये ।
शमः समाहितत्वं च साधनेषु श्रुतं यतः ॥ ५० ॥
बोधादूर्ध्वं च तद्धेयं जीवन्मुक्तिप्रसिद्धये ।
कामादिक्लेशबन्धेन युक्तस्य न हि मुक्तता ॥ ५१ ॥

knowledge, having revised the Scripture, should put it away entirely, just as the grain-gatherer rejects the husks.

47. Let the wise man, seeking after Brahma, recognise that (the Self) and gain wisdom. Let him not learn many words, for this is a weariness of speech.

48. Know that (Self) alone, one without a second. Abandon other forms of speech (i. e. all inferior knowledge). A man should restrain speech and mind. These and other sacred texts are clearly (in favour of our doctrine).

49. The duality, not countenanced by the Veda, is of two kinds, active and inactive; the one in the form of desire, anger, &c., and the other in the form of day-dreams.

50. Both these forms must be set aside, previous to a knowledge (of the truth), in order that this knowledge may result. And therefore restraint and profound contemplation have been declared to be among the means (to such knowledge).

51. Further, this duality must be abandoned after (true) knowledge has arisen, in order that emancipation may be secured to a man while alive. For the man who is fettered with the hindrances of desire, &c, cannot obtain emancipation.

---

47. Bṛihadáraṇyaka, VI, 4, 21.

48. (a) Muṇḍaka, II, 4, 5. (b) Kaṭha I, 3, 13.

Digitized by Google

जीवन्मुक्तिरियं माभूज्जन्माभावे त्वहङ्कृती ।
तर्हि जन्मापि तेऽस्त्वेव स्वर्गमात्रात्कृती भवान् ॥ ५२ ॥
क्षयातिशयदोषेण स्वर्गो हेयो यदा तदा ।
स्वयं दोषतमात्माऽयं कामादिः किं न हीयते ॥ ५३ ॥
तत्त्वं बुद्ध्वापि कामादीन्निःशेषं न जहासि चेत् ।
यथेष्टाचरणं ते स्यात्कर्मशास्त्रातिलङ्घिनः ॥ ५४ ॥
बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि ।
शुनां तत्त्वदृशां चैव को भेदोऽशुचि भक्षणे ॥ ५५ ॥
बोधात्पुरा मनोदोषमात्रात्क्लिष्टोऽस्यथाधुना ।
अशेषलोकनिन्दा चेत्यहो ते बोधवैभवम् ॥ ५६ ॥

52. Granting that this emancipation is not obtained by me while alive, I am satisfied (in the assurance through knowledge of Brahma) that no future births await me. Following up your argument (tarhi), a future birth should certainly be acceptable to you, for you would be satisfied with a mere paradise.

53. If (you say that) paradise is to be set aside because of the defects in the inequalities (of its happiness), then why are your present desires not abandoned ; and these are the very essence of faultiness ?

54. And even when you have acquired knowledge of Brahma, if you do not abandon all desire, &c, you will follow the bent of your inclination, transgressing the ordinances of Scripture.

55. If the man who knows Brahma, one without a second, may follow the bent of his desires, what indeed is the difference between knowers of Brahma and dogs as regards eating unclean things ?

56. Prior to your knowledge (of Brahma) you used to suffer merely from defects of mind (sc. desire, &c.) and now (by your rejection of sacred ordinances) the reproach of all the world (is upon you). Is this the sublimity of your knowledge !

53. cf. "And there, too, in heaven, there are differences of low, high and middling"—Anugítá. p. 240 and note—"Sacred Books of the East," vol. VIII. K. T. Telang.

55. For this quotation see Jacob's Vedántasára, p. 120. (Trübner's Orient : Series).

Digitized by Google

विड्वराहादितुल्यत्वं माकाङ्क्षीस्तत्त्वविद्भवान् ।
सर्वधीदोषसन्त्यागाज्जनैः पूज्यश्च देववत् ॥ ५७ ॥
काम्यादिदोषदृष्ट्याद्याः कामादित्यागहेतवः ।
प्रसिद्धा मोक्षशास्त्रेषु तानन्विष्य सुखी भव ॥ ५८ ॥
त्यज्यतामेष कामादिर्मनोराज्ये तु का क्षतिः ।
अशेषदोषबीजत्वात्क्षतिर्भगवतेरिता ॥ ५९ ॥
ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्संजायते कामः कामात् क्रोधोऽभिजायते ॥ ६० ॥
शक्यं जेतुं मनोराज्यं निर्विकल्पसमाधितः ।
सुसम्पादः क्रमात्सोऽपि सविकल्पसमाधिना ॥ ६१ ॥
बुद्धतत्त्वेन धीदोषशून्येनैकान्तवासिना ।

57. Friend, knower of the truth, be unwilling to lower to the level of swine. Cast aside the frailties that come of mind, and be held in honour by all men, like a God.

58. The reasons for the rejection of desire, &c., given in treatises on emancipation, are well known :—one reason, for instance, among others being the certain evidence of faults in the objects desired and the like. Prove these and be happy.

59. These, desire and the rest, should be cast away, but what the evil (you may ask) in play of fancy? The evil, for such play is the source of all defects, has been declared by the Divine One.—

60. "In him, who thinks on (sensuous) things, there is produced an attachment for these things. From attachment springs desire; from desire results anger."

61. Idle wandering of the mind can be crushed by profound contemplation of the nirvikalpa sort, and this state too, can be attained perfectly, by degrees, through contemplation of the savikalpa kind.

62. Play of fancy is subdued by the man, who having gained knowledge of Brahma and free from mental defects (desire, &c.,)

60. **Bhag: Gitá, II. 61.**

61. दीर्घं षड्द्वादशादिमात्रोपेतं प्रणवमोङ्कारमुच्चार्य ।—ṭíká. For the technical meaning of mátrá see Yoga Aphorisms, pp. 42, 43 (Rajendralal Mitra; Biblioth : Indica).

Digitized by Google

दीर्घं प्रणवमुच्चार्य मनोराज्यं विजीयते ॥ ६२ ॥
जिते तस्मिन्वृत्तिशून्यं मनस्तिष्ठति मूकवत् ।
एतत्पदं वसिष्ठेन रामाय बहुधेरितम् ॥ ६३ ॥
दृश्यं नास्तीति बोधेन मनसो दृश्यमार्जनम् ।
सम्पन्नं चेत्तदुत्पन्ना परानिर्वाणनिर्वृतिः ॥ ६४ ॥
विचारितमलं शास्त्रं चिरमुद्ग्राहितं मिथः ।
सन्त्यक्तवासनान्मौनादृते नास्त्युत्तमं पदम् ॥ ६५ ॥
विक्षिप्यते कदाचिद्धीः कर्मणा भोगदायिना ।
पुनः समाहिता सा स्यात्तदैवाभ्यासपाटवात् ॥ ६६ ॥
विक्षेपो यस्य नास्त्यस्य ब्रह्मवित्त्वं न मन्यते ।
ब्रह्मैवायमिति प्राहुर्मुनयः पारदर्शिनः ॥ ६७ ॥

lives in a lonely spot, muttering the sacred syllable Om during long periods.

63. When this has been subdued, the mind remains free of all modifications just as a dumb man remains silent. This quiescent state was declared to Ráma by Vasishṭha in many ways.

64. If the effacement of objects from the mind be effected through the knowledge that objects exist not, the highest bliss of final emancipation will result from this effacement.

65. When the science has been thoroughly pondered and firmly grounded through (the intercourse of) the two (teacher and pupil), (it becomes clear that) the highest state is not reached except through silent meditation—a state in which the mental retenta (of former actions and desires) are set aside.

66. At times the mind is disturbed by (former) actions now bearing fruit. At such a time the mind can be calmed again through the virtue in the practice (of silent meditation).

67. He, in whom this disquietude is not, is not considered to be a knower of Brahma. He is indeed Brahma—thus the wise Munis have declared.

64, 65, 68. The ṭíká refers these to the Yogavásishṭha.

दर्शनादर्शने हित्वा स्वयं केवलरूपतः ।
यस्तिष्ठति स तु ब्रह्मन्ब्रह्म न ब्रह्मवित्स्वयम् ॥ ६८ ॥
जीवन्मुक्तेः परा काष्ठा जीवद्वैतविवर्जनात् ।
लभ्यतेऽसावतोऽत्रेदमीशद्वैताद्विवेचितम् ॥ ६९ ॥

इति द्वैतविवेकः समाप्तः ।

अथ महावाक्यविवेकः ।

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च ।
स्वाद्वस्वादु विजानाति तत्प्रज्ञानमुदीरितम् ॥ १ ॥
चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु ।
चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि ॥ २ ॥
परिपूर्णः परात्मास्मिन्देहे विद्याधिकारिणि ।
बुद्धेः साक्षितया स्थित्वा स्फुरन्नहमितीर्यते ॥ ३ ॥

68. The man, who having done with knowing and not knowing, remains pure undifferenced Self is Brahma, O Bráhman! He is not a knower of Brahma.

69. The supreme limit of emancipation for the living man is obtained through rejection of the manifold, created by the personal sentiency. For this reason we have distinguished, in this chapter, between this duality and that created by Iśvara.

1. That by which one beholds this phenomenal world (idam), hears, smells, utters speech and distinguishes sweet and not sweet is absolute Intelligence.

2. Intelligence, the absolute Reality, in Brahmá, Indra and the Devas, and in men, horses, cattle and the rest is one only; wherefore Intelligence, the Reality, is in me also.

3. The infinite, highest Self that, shining forth, abides as the witness (enlightener) of the phenomenal mind (buddhi) in this (gross) body of the duly qualified aspirant to Vedantic truth is entitled the "I" (aham, in the text *aham brahma asmi*).

1, 2. cf. Aitareya, III, 1, 2.

Prajñána is thus described elsewhere:—स्वतश्चैतन्यमुपाधिरहितं नामरूपरहितमवस्थात्रयरहितं समस्तप्रपञ्चोत्पत्तिप्रलयात्मकं करोति जगत्साक्षित्वेन पश्यति यत्तत्प्रज्ञानं नामधेयं ब्रह्म भवति ।

3, 3. cf. Brihadárany: III, 4, 10.

स्वतःपूर्णः परात्मात्र ब्रह्मशब्देन वर्णितः ।
अस्मीत्यैक्यपरामर्शस्तेन ब्रह्म भवाम्यहम् ॥ ४ ॥
एकमेवाद्वितीयं सन्नामरूपविवर्जितम् ।
सृष्टेः पुराधुनाप्यस्य तादृक्त्वं तदितीर्यते ॥ ५ ॥
श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितम् ।
एकताग्राह्यतेऽसीति तदैक्यमनुभूयताम् ॥ ६ ॥
स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतम् ।
अहङ्कारादिदेहान्तात्प्रत्यगात्मेति गीयते ॥ ७ ॥
दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते ।
ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम् ॥ ८ ॥

इति महावाक्यविवेकः समाप्तः

4. The infinite, highest Self is implied by the word *Brahma*. Identity (of personal soul and Brahma) is evidenced by the word *asmi*: wherefore I am Brahma.

5. By the word "that" (tat in *tat tvam asi* is intended the fact that the absolute Reality is one only and, even now as well as previous to creation, has no name or form.

6. By the word "thou" is intended the reality, which is superior to the body and sense-organs of the hearer. The identity (of "that" and "thou") is shown by the word *asi*. (Aspirants to emancipation) should ponder this identity.

7. That which shines forth in its own light is declared by the word "this" (ayam in *ayam átmá brahma*). The Self, internal to (ie. the witness of) that complex whole beginning with consciousness of personal identity and ending with the gross body, is meant by the word *átmá*.

8. By the word *Brahma* is meant the reality underlying all that appears to be. This absolute Reality is the Self that shines in its own light.

A. V.

(to be continued)

5, 6. cf. Chhándogya, VI.

7, 8. cf. Máṇḍúkya. 2.

Digitized by Google

॥ अथ विचारमाधुकरी * ॥

तत्रादौ शककालविचारः ।

नासतो विद्यते भावो नाभावो विद्यते सतः–भगवद्गीता ।

१–त्रिंशत्सु त्रिसहस्रेषु भारतादाहवादितः ।
सप्ताब्दशतयुक्तेषु गतेष्वब्देषु पंचसु ॥
पंचाशत्सु कलौ काले षट्सु पंचशतेषु च ।
समासु समतीतासु शकानामपि भूभुजाम् ॥
सत्याश्रयस्य परमाप्तवता प्रसादम् ।
निर्म्मापितं मतिमता रविकीर्त्तिनेदम् ॥

वसंततिलकायां जिनायतनमिति शेषः । तद्वितौ प्रशस्ति१पङ्क्तिस्थिताः समनंतरोक्ताक्षरणाः । अपाणिनीयस्त्रिंशत्पंचाशतोर्बहुवचनान्तः प्रयोगः कालिदासादीनां विश्रामादिवत् कविनिरंकुशत्वेन व्याकरणांतरप्रमाणत्वेन वा समाधातव्यः । त्रिंशत्स्वित्यत्र पंचाशत्स्वित्यत्रैव शकारोऽध्याहर्तव्यः । पंचशतेष्विति बहुवचनान्तः प्रयोगोऽपि चिन्त्यः । तत्समनंतरोक्तस्त्वकारः शकनामसमुच्चयार्थः । शकानामिति भवभूत्यादेः कविभ्य इत्यादिवत् पूजायां बहुवचनम् । स च योगत्वाच्छालिवाहनः । अनयोः संवत्सरत्रयः शककाला अनुष्टुभोक्ताः । एवं पृतोऽतः । द्वितीयः शाकान्तः । सैवत्तृतीयः । सत्याश्रयः पुलकेश्यपरनामा दाक्षिणात्यचालुक्यवंशमुकुटमणिः कादंबरीकदाश्रयदानलब्धकीर्तिहर्षवर्द्धनसमकालीनः कवितापितकालिदासभारविकीर्तिः कश्चिज्जिनभक्तः ।

---

* माधुकर्या माहाराष्ट्यामनुवादो विविधज्ञानविस्ताराख्ये (पु० १५, अं० २) गीर्वाणां चाऽर्थज्ञानवर्धकाख्ये (अं० २९) मासिकपुस्तके द्रष्टव्यः ।

१–अयं शिलालेखः डिक्लमाचोः सप्तविंशदधिकद्विशततमं पृष्ठं (Indian Antiquary, Vol. VIII.). द्रष्टव्यम् ।

अथ शककालोपपत्तिः ।

३००० + ३० = ३०३० – भारतादाहवात् ।

६ + ५०० = $\frac{५०६}{२५२४}$ – शकानां भूभुजाम् ।

७०० + ५ + ५० = ७५५ – कलेः काले गते भारत आहवः । युधिष्ठिराभिषेकेण तच्छकारंभ इति यावत् । एवं दाक्षिणात्यो यौधिष्ठिरः शककालः २५२४ वर्षाणि भवति ।

२–वराहमिहिरधृतो वृद्धगर्गस्तु षड्द्विकपंचेत्याह ।

षड्द्विकपंचद्वियुतः शककालस्तस्य राज्ञश्चेति बृहत्संहितायां सप्तर्षिचारे वराहाचार्यः । स च सप्तर्षिचारो वराहाचार्येण वृद्धगर्गसंहितायाः स्वसंहितायामवतारित इति कथयिष्ये वृद्धगर्गमतादित्युपक्रमतो विस्पष्टम् । अतो वृद्धगर्गवचनमिदं द्योतयेद् वृद्धगर्गकालम् । वराहमिहिरकालं तु कथंचनापि न द्योतयेत् । वचनमिदमवतारयताऽऽचार्येण केवलं ग्रंथविस्तरस्यार्थमिति मुधा एव कृता प्रतिज्ञा निर्वाहिता । एवं मन्यताऽऽचार्यस्य स्वकालाभिधानभ्रमः पौर्वापर्यानवबोधमूलकः ।

३–तरंगिणीकारो वराहमिहिरधृतं वृद्धगर्गं प्रमाणयति।

तरंगिणी राजतरंगिणीनाम्ना प्रसिद्धः कश्मीरराजानामितिहासः शकस्यैकादशे शतके पादशेषे प्राक्तनांस्तद्विषयकान् प्रबंधादीनालोच्य कल्हणपंडितेन विरचितः ।

४–तद्बहुवचनं संहिताकारैरिति तु पूजायां ज्ञेयम् ।

उच्चारे संहिताकारैरेवं दत्तोऽत्र निर्णय इत्याह कल्हणः प्रथमस्यैव तरंगस्य भूमिकायाम् । उच्चारः(?)=चारः । संहिताकारैर्बृहत्संहिताकारैः । वराहाचार्यैरित्यर्थः । शकस्य नवमं शतकं स्वयशःपूरैः स्नपयता भट्टोत्पलेनापि सूर्यावतारत्वेन वर्णितत्वात् सवितृलब्धवरप्रसाद इत्याचार्येणैव तच्छिष्येण वा केनचिद् बृहज्जातकांते कथितत्वाच्च पूज्यता

२–चार्या ३, पृ० ८५, बृहत्संहिता कलिकाताख्ये नगरे मुद्रिता ।

३–आर्या ५६, पृ० ३, राजतरंगिणी कलिकातायां मुद्रिता ।

न विस्मयमावोढुमर्हति । एवं कल्हणस्यापि यौधिष्ठिरशककालाभिधान-परत्वेनैवैतद्वचनादरो न वराहमिहिरकालाभिधानपरत्वेनेति ततोऽन्यथा व्यापिका निर्मूलत्वेन हेया ।

५—एवमौत्तराहाणां शालिवाहनशके वर्षद्वयमधिकम् ।

षड्विंशपंचविंशयुत इति तैरास्थितत्वात् ।

६—हर्षस्य कश्मीरलाभो जयेनान्यथा वा षड्विंशे । तत्स-ममेव तदूर्ध्वमेव वा शालिवाहनेन दाक्षिणात्यजयो-द्यतस्य हर्षस्य पराभवः ।

तत्रानेहस्युज्जयिन्यां श्रीमान् हर्षापराभिधः । एकच्छत्रश्चक्रवर्ती विक्रमादित्य इत्यभूदिति तृतीये[4]तरंगे कल्हणपंडितवचनम् । तदादरेण हर्षो विक्रमादित्य इत्यनर्थांतरम् । विक्रमो विक्रमादित्य इति वंशनाम रूढं वा योगरूढं वा मूलपुरुषतो नंदमौर्यादिवत् । जयेन कश्मीरलाभस्य कुतोऽपि मातृगुप्ताख्यानेऽनुक्तावपि सिंहासनप्रत्यान[5]यनकथया जयेनैव हर्षस्य कश्मीरलाभः कल्हणेन वस्तुतः सूपपादितः । काश्मीरिकाणां राज्ञां सिंहासनस्योज्जयिनीं प्रति नयनं जितानेकोपमर्देजनन्या जयलक्ष्म्या कृतेनैव हर्षेण कृतं संभाव्यते नान्यथेति जयेनैव कश्मीरलाभो हर्षस्य भवितुमर्हति । कल्हणेन हर्षस्यैकच्छत्रत्वेन वर्णितत्वात् कश्मीरलाभात् परं सममेव वा शालिवाहनकृतः पराभवोऽवगंतव्यो न प्राक् ।

७—गर्गः कश्मीरनिवासः कश्मीराभिजनो वा ।

यत्र स्वयमुष्यते स निवासः । यत्र पूर्वैरुषितं सोऽभिजनः । हर्षः शालिवाहनसमकालीनः । अतः काश्मीरिको वैक्रमः शकः शालिवाहनश-कतो न भिद्यते । एवं गर्गोक्तः शकः काश्मीरिको वैक्रम इति फलितम् ।

८—गर्दाभिर्भिल्लादिभिर्लोपं प्रापिते वैक्रमे वंशे म्लेच्छाभिः कश्मीरादयः पर्यंतजनपदाः स्वाधिष्ठानत्वेन हृताः ।

४-श्लो०१२५, पृ०२६, राजतरंगिणी ।
५-श्लो०२२२, पृ०३३, राजतरंगिणी ।

अत्रैतदवधेयम् । विष्णुपुराणाद्युक्ता गर्दभिल्लादयः समकालीनत्वेन ग्राह्याः । न पौर्वापर्येण । अयोग्यत्वात् । हर्षस्य पुनः प्रतापादित्यः शीलादित्यापराभिधो वैरिणा निर्वासित इत्याह कल्हणः । अयं वैरी सौराष्ट्र आसीदित्यनुमीयते । सौराष्ट्रोत्पाटनसमनंतरमेव प्रतापादित्यस्य पुना राज्यप्राप्तेः कल्हणेनाभिहितत्वात् । अयं सौराष्ट्रको वैरी चष्टनपुत्रो जयदामा भवितुमर्हति । भिल्लजातीयेन गर्दैन स पुनर्निर्वासितः । अवंतीनां राजधान्युज्जयिनी । तत्र गर्दभिल्लो नाम राजेति जैनाः । गर्दभीविद्यैत्यादिनामनिर्वचनायासः शकुंतलादिनामनिर्वचनप्रयासवदकिंचित्करः । कालकाचार्यस्योपसिंधु गमनात् राजा तत्रपो रुद्रदामा भवितुमर्हति । स गर्दं समूलमुन्मूलयामास । रुद्रदाम्नो नियोगेन सुराष्ट्रान् कश्चित् पल्हवामात्यः शशासेति सुदर्शनशिलालेखे श्रूयते । ततोऽप्यनुमीयते । तद्वंशस्य चष्टनादीनां जनपदो भवितुमर्हतीति । काश्मीरिकैः प्रतापादित्यस्य प्रतिद्वंद्विषु सौराष्ट्रकत्वारोपस्तन्न्यायत्वाज्ज्ञेयः । इतिविधिललितेषु रुद्रदामवंश्येषु गौतमीपुत्रपरिग्रहत्वेनोज्जयिन्याः सुप्रसिद्धत्वात्तत्कालिनृणां तद्वल्लभानां वा गुप्तानां शककर्तृसंबंधाभिमानित्वाभावाच्च प्रायः प्रतिष्ठासमनंतरमेव वैक्रमशककालोपस्यात्यंतिकत्वं विज्ञायते । अपूर्वस्य शकस्य प्रवर्तितत्वेनाभिमानित्वाभावः । बाणेनोज्जयिनीसंबंधस्य स्पष्टमभिहितत्वाच्छालिवाहनीये षष्ठे शतके तु गुप्तानां तद्वल्लभत्वे न काचिद् विप्रतिपत्तिः ।

९–एवं गुप्तकालात् प्रागराजकेऽनेकराजके वा काले गर्गवराहमिहिरादीनामुदयः ।

प्राप्यहणामतंत्रम् । केषांचिदुदयस्य गुप्तकालारंभे केषांचिच्च स्कंदगुप्तादीनां कालेऽपि सुप्रसिद्धत्वात् । अराजकत्वं प्राय एकातपत्रत्वाभा·

६–उषवदातः पराक्रमित्वे सुदर्शनसरः शिलालेखः (No XXII January 1862, Jour. B. B. R. A. S.) प्रमाणीकर्तव्यः ।

७–पृ०१४२, Vol. IX, Jour. B. B. R. A. S.

८–पृ०४१, July, 1853, Jour. B. B. R. A S.

९–पृ०१०५, हर्षचरितम् (कलिकातायां मुद्रितम्).

वाम् । आवंतिको वराहमिहिरः । अवंतयोऽभिजना यस्य । स हि कश्मीरनिवासः काश्मीरमात्मानं काश्मीरकमभिधत्ते । आदिशब्देनायं मठादीनां ग्रहणम् ।

१०—महापराक्रमिभिर्गुप्तैर्नवीनस्य शकस्य प्रवर्तितत्वाद्वल-भीश्वरैस्तत्सेनापतिभिस्तस्यैवानुगृहीतत्वाद्वैक्रमः शको मध्यदेशे सुराष्ट्रादिषु च लुप्तप्रायः कश्मीरादिष्ववशेषितः ।

महापराक्रमिणः समुद्रगुप्तकुमारगुप्तस्कंदगुप्ताः । समुद्रगुप्तः कुमार-गुप्तपितामहः । कुमारगुप्तस्कंदगुप्तौ पितापुत्रौ । स्कंदगुप्तस्य महापराक्र-मित्वे सुराष्ट्रशासकत्वे च सौराष्ट्रकः शिलाले[१०]खोऽपि प्रमाणम् । कृष्ण-परीक्षयाऽऽहुः । सुराष्ट्रेषु पूर्वं रुद्रदाम[११]वंशः । पश्चादनन्तरो गुप्तवंश इति । तच्च विचारसहम् । शालिवाहनशकात्प्राक् प्रवृत्तत्वेन शाहिका-लस्य तथात्वे गुप्तकालारंभ एव कुमारगुप्तेन शाहिवंशसमु[१२]च्छेदापत्तेः । अत उभयांतरा गोतमीपुत्रनिवेशो युक्तः । तेन रुद्रायितं रुद्रदामवंशं प्रति न कुमारगुप्तेन । रुद्रदामवंश्यान् प्रति कृष्णतो गुप्तानामानंतर्यं तु न विवादः । कुमारगुप्ते दिवमुपेते विप्लुतां राज्यलक्ष्मीं समुद्धृत्य स्कंदगुप्तेन सुराष्ट्रेषु पर्णदत्तस्थापनमिति कुमारगुप्तस्य पूर्वं सुराष्ट्राणां लाभो गोतमीपुत्र-वंश्येभ्यो भवितुमर्हति । स्कंदगुप्तेन नियुक्तः पर्णदत्तो वलभीलेखोक्तो लोकोक्तश्च सेनापतिर्भवितुमर्हति । स्कंदगुप्तस्य शक्तित्रयाऽसंपन्नता लोकोक्ताऽप्यसंभवदोषानाघ्रातापि शिलालेखविरोधादुपेक्ष्या । असंभवद्दोषा-नाघ्राता लोकोक्तिः शिलादिलेखाऽभावे सर्वथा प्रमाणम् । शिलादिलेख-सत्त्वे तु तद्विरोधिनी प्रमाणम् । नेतरा । राजा भट्टारको देव इति भट्टारकाऽपभ्रंशो [१३]भटार्क इति शब्द एव जातिवाचकस्तद्वंश्यैः सेनाप-

१०—पृ०१२८, July 1853, Jour. B B. R. A S.

११—पृ० १०, July 1853, Jour. B. B. R. A. S.

१२—शाहिवंशसमुच्छेदकालो नवत्यधिकद्विशततमं द्विनवत्यधिकद्विशततमं वा शाहिवर्षम् (July 1853, Jour. B B. R. A S.)

१३—पृ० ३५६, Vol .XI, Jour. B. B. R. A. S.

सित्वमपन्होतुकामैः प्रयुक्तो भाति । मध्यवर्त्तिबलजवंशादित्ति पंचमु-पादावप्रवासतस्तत्पुत्राद्विरहितस्याऽतत्पुत्रेण महुंस्वेन गुहसेनेनापूर्व-राजपदपरिग्रहः कृतः स्यात् । सेनापतिवंश्यानां सुराष्ट्रलाभो न क्वचिदपि लेखे जयपूर्वकमुपपादितो न च कस्यापि वलभीश्वरस्य गुप्ताधिवंशमवी-नमिव विजेतृत्वं कुतोऽपि श्रूयत इति वैष्णवगुप्तप्रतापानले निर्वाणभूयिष्ठ एव निर्वाणे वा गुहसेनस्य परममाहेश्वरस्य राजपदलाभः संभाव्यस्तद्वं-श्यानां च प्रबलविजेतृदर्शनेन नात्यल्पं कालमपराक्रमिणामपि सुखेनैव भोगभाक्त्वमुपपादनीयम् । आर्येतरनिग्रहः सुदर्शनशिलालेखोक्तो मेर-काणां म्हेतर इति प्रसिद्धानां शूद्राणां शूद्रप्रायाणां वा निग्रहः स्यात् । गुप्त-कालस्य द्वितीयशतकांते बुद्धगु[14]प्तः । तदा ततो वा स्वल्पेनैव कालेन तृती-यशतकारंभे तृतीयशतकस्य प्रथमे वा पादे व्यतीते राजपदभाजां गुहसे-नादीनां वलभीश्वराणां कालोऽसंगत्यभावाद् गुप्तकाल एव भवितुमर्हति । अत्र द्वयोरभेदं प्रतिपादयन् बीर्लोकरप्यनुसंधेयः । शककालस्य चत्वारिंश-दुत्तरयोः शतयोर्द्वयोर्गतयोरेकचत्वारिंशाद्गुप्तकालारंभ इति बीर्लोकः । मध्यदेशो मनूक्तः । आदिशब्देनानर्तादिपरिग्रहः ।

११–स कश्मीराणां गौडानां च प्रभुतायां पुनः प्रचारितः।

स्थानेश्वरः श्रीकंठानां राजधानी । तत्र पुष्पभूत्याख्यस्य राज-वंशः प्रतिष्ठामाप । तस्य मौलिमाणिक्यायमानो हर्षवर्धनः पुलकेशिस-मानकालीन आसीत् । इवल्लीशिलालेखः शकानां सप्ताधिकपंचशततमे वर्षे रविकीर्त्तिना सत्तामापादितः । तत्र भयविगलितहर्षो येन चाकारि हर्ष इत्युक्तम् । एष हर्षः सकलोत्तरापथमंडलचक्रवर्त्तीति तस्य पुलकेशिना पराजयात् परमेश्वर इति पदं चुलु[15]क्यवंशीयैरुपात्तमिति च पुलकेशि-पुत्रादीनां ताम्रलेखेषु श्रूयते । हर्षस्य महापराक्रमित्वं बाणकृतितोऽपि विज्ञायते । तत एव हर्षपितुर्द्रोणहरिणकेस[16]रित्वं हर्षभ्रातुश्च हूणदंड-

१४-पृ॰ २४७, Vol. VIII, Jour B. B. R. A. S.

१५-January 1851 Jour. B. B. R. A. S.

१६-पृ. ८६, ११६ च (हर्षच॰).

नाम्नोत्तरापथं प्रति प्रस्थानमवगंतव्यम् । निर्दिष्टायां दिशि चीनोत्तरं तो हूणानां प्रस्थानं[17] संनिवेशनं च प्रमाणांतरतोऽपि सिद्धम् । शालिवाहनीयस्य षष्ठस्य शतकस्याव[18]साने तुरुष्कैर्हूणानां करदीकरणे पुष्पभूतिवंश्यैरसकृज्जनिताऽवनतिरपि कारणत्वेन वक्तव्या । नैव हर्षवर्धनो हर्षापरनामा विक्र[19]मादित्यो भवितुमर्हति । शकहूणयोरभेदाभ्युपगमेऽप्येतस्य जयमपि कश्मीरलाभस्य मातृगुप्तसंबंधस्य वा बाणेनानुक्तत्वात् । हर्षापरनामा विक्रमादित्य उज्जयिनीप्रियः । हर्षवर्धनस्य तु स्थानेश्वरी राजधानी । शककालस्काले सौराष्ट्रकाणां प्रभावशालित्वं स्वर्गत एव शकरूति तत्पुत्रनिर्वासनमग्रणेनानुमीयते । तच्च प्रभावशालित्वं गुप्तकालात् प्राक्संभवति । हर्षवर्धनकाले तु श्रीकंठाः कान्यकुब्जा मालवा गौडा इति चतुर्षु प्रधानजनपदतत्त्वं परिसमाप्यते । नापि शालिवाहनीयस्य पंचमस्य शतकस्यावसाने षष्ठस्य वाऽऽरम्भे ऽभ्युदयमापन्नो हर्षवर्धनः शालिवाहनीयस्य षष्ठस्य शतकस्य प्रथमे पादे गते यात्रानिमित्तेन चीनस्य त्संग[20]स्य तेषु तेषु जनपदेषु भ्रमतः समानकालीनः सुवचः । शीलादित्यो हर्षवर्धनपर्याय इत्याद्युल्लापा बाणाद्यनभिहितत्वेन निर्मूलत्वात् केवलं मनोराज्यविजृम्भितमित्युपेक्ष्याः । यदि त्संगसमानकालीनः कश्चिच्छीलादित्यः कान्यकुब्जाधिपतिः प्रमाणसिद्धो भवति स राज्यश्रियः पुत्रो हर्षस्याऽपुत्रत्वाद्विषयादौ हर्षस्य वा पुत्रः पितृष्वसुरवीरया रक्षितादोऽस्तु । तस्मिन् त्संगस्य पुलकेशिप्रतिद्वंद्वित्ववचनमस्तु भाषानभिज्ञस्य श्रुतार्थानवधारणोपादानत्वेन समाधेयः । उत्तरापथेश्वरादि दाक्षिणात्यैः प्रयुक्तं संदिग्धं पदं तदात्वे शिलादित्यपरतया तत्त्वमजानानेन त्संगेन व्याख्यातमित्येतस्यापि पक्षस्यावकाश इति सुधीभिरूह्यमित्यलं प्रसक्तानु-

१७–पृ. १८, २२ च Vol. II, Gibbon, Chandos Library

१८–पृ. ५५८, Vol. II, Gibbon, ...

१९–पृ. २२०, January 1861, Jour. B. B. R. A. S.

२०–पृ. ३१७, Vol. XVI, Jour. R. A. S. G. B. & I.

प्रकृतया । इतस्य पुष्पभूतिवंशस्य प्रभुतामनु काश्मीराणां प्रभुता । किञ्च जयापीडस्य शालिवाहनीयस्याष्टमस्य शतकस्य द्वितीये पादे कल्लोलप्रमाणानादर्शक कल्हणोक्तिर्लौकिकवर्षमालिकादिविषयकसंदेहनिराकरणात् सर्वथा प्रामाण्यमर्हति । अत्र कश्चिदाह । सर्वथा दुष्टं कार्कोटकवंशवर्षपरिगणनं कल्हणस्य । हरिवेभ्यः परित्रस्तेन चंद्रापीडेन चीनाधीश्वरस्य साहाय्यकान्वेषणं शालिवाहनीयस्य सप्तमस्य शतकस्य पंचत्रिंशे । द्विचत्वारिंशे च राजपत्रेन चंद्रापीडस्य चीनाधीश्वरेणानुग्रहः प्रमाणांतरात् सिद्धः । कल्हणोक्तदिशा गमने तु द्वितीये राज्याभिषेको दशमे स्वर्गवासित्वं चापततीति त्रयस्त्रिंश[२१]द्वर्षविरोधात् स्थालीपुलाकन्यायेन सर्वथा दुष्टमिति सुष्ठूक्तम् । अत्रोच्यते । गोनंदो गोनर्दो वा पंचत्रिं[२२]शतिमब्दानित्युक्तम् । पंचत्रिंशतमिति युक्तम् । बालादित्यस्य ज्यायान् भ्राता विक्रमादित्यो द्वा[२३]चत्वारिंशतिं समा इत्युक्तम् । द्वाचत्वारिंशतमिति युक्तम् । रणप्रभावेण्यां जातो युधिष्ठिरः क्ष्मां च द्वाविंश[२४]तिं समा इत्युक्तम् । क्ष्मां चत्वारिंशतं समा इति संग्रहतश्चकारस्य समुच्चयाभावतस्त युक्तः पाठः । प्रथमतरंगसमाप्तौ संग्रहश्लोकेऽष्टाविंशतिराजस्वित्युक्तम् । परिगणनेन राज्ञामेकविंशतित्वस्य सिद्धत्वेनैकविंशतिराजस्विति राजतरंगिण्यवसाने संग्रहोक्तस्यैव पाठस्यानुसरणं श्रेयः । पंचषष्ठे पृष्ठे षट्त्रिंशदब्दान्यपालयदित्युक्तम् । तस्य तरंगस्यैकत्रिंशद्वर्षांतत्वात् योग्यत्वाच्च षड्विंशदब्दान्यपालयदिति युक्तम् । सर्वोऽप्येष लेखकापराधो मुद्रकापराधो वा न कल्हणस्य । संग्रहेऽपि ललितादित्यस्य राज्यं षड्विंशतिमेव वर्षाणि । जयापीडस्य तूक्तरीत्यैकत्रिंशतिं वर्षाणि नैकत्रिंशतमिति ज्ञेयम् । तदंतःपाति जज्जस्य वर्षत्रयम् ।

(शेषमग्रे)

२१–पृ· ६१, ६२; ६३ च, Cunningham's Geography of Ancient India.

२२–श्लो· १६१, पृ· ७, राजत: .

२३–श्लो ४७७, पृ· ३८.

२४–श्लो· ३८१, पृ· ३५.

Digitized by Google

कैवल्यरत्नम् ।

(Continued from page 232. Vol. VI.)

न ज्ञानेन ततो मुक्तिः प्रागप्यात्मनि संस्थिता ।
आत्मन्येव स्थिता मुक्तिः पूर्वसिद्धात्मवेदनात् ॥
कार्यद्रव्यतया नैव स्थिता भवितुमर्हति ।
कार्यरूपेण नैवात्मा परिणामं कदा चन ॥
सहते परिणामित्वात् कूटस्थ इति हि श्रुतिः ।
गुणरूपतया मुक्तिर्न स्थिता सा परात्मनि ॥
निर्गुणत्वात्सदात्मानं निर्गुणं प्राह हि श्रुतिः ।
न क्रियारूपतश्चापि स्थिता मुक्तिः परात्मनि ॥
अक्रियत्वात्परात्मानं प्राह वेदोऽपि यं खलु ।
सामान्यरूपतश्चापि न स्थिता मुक्तिरात्मनि ॥
व्यक्तावेव हि सामान्यं न व्यक्तिः कस्य चित्पुमान् ।
व्यक्तिश्चेत्स पुमान्नित्योऽनित्य एव ध्रुवं भवेत् ॥
कुम्भादिव्यक्तयोऽनित्याः संमताः खलु सत्तम ।
अन्येनापि च रूपेण न स्थिता मुक्तिरात्मनि ॥
आत्मनो नैव मुक्तेश्च संबन्धः खलु विद्यते ।
असंगत्वात्परात्मानमसंगं प्राह हि श्रुतिः ॥
संबंधो नास्ति चेन्मुक्तिः कल्पिता शुक्तिरूप्यवत् ।
अतः साक्षात्परा मुक्तिः स्वात्मभूतैव केवलम् ॥
अनाद्यविद्यया विद्वंस्तिरोभूतात्मविद्यया ।
व्यज्यते स्वप्रकाशैव चाविद्यापगमेन तु ॥
अविद्याऽविद्यया साक्षादात्मन्येव प्रकल्पिता ।

अधिष्ठानात्मरूपेण स्थिता स्यादशुभाश्रया ॥
घृतकाठिन्यवच्छुक्तिरजतादिप्रतीतिवत् ।
अविद्या त्वात्मभूता या मुक्तेराच्छादिका खलु ॥
सुखदुःखादिरूपेण संततेरपि कारणम् ।
निवृत्तायामविद्यायां मुक्तिं चानन्दलक्षणाम् ॥
संसारस्य निवृत्तिं च लभते हि परः पुमान् ।
कर्मणैव हि या मुक्तिः सात्मनो नैव साध्यते ॥
साध्या ऽनित्या भवेन्मुक्तिर्नित्या मुक्तिः परा खलु ।
साध्यते या परा मुक्तिः कर्मणा वेदवित्तम ॥
संबन्धश्च तया मुक्त्या साध्यते हि परात्मनः ।
संबन्धस्याप्यनित्यत्वं दुर्निरूपं भविष्यति ॥
वस्तुनः पूर्वसिद्धस्य साध्यता नैव चात्मनः ।
तथा ऽसतो ऽपि साध्यत्वं नैव सिध्यति शून्यवत् ॥
तथा सदसतो नास्ति तादृशस्यानिरूपणात् ।
सदसद्भ्यां विभिन्नस्य साध्यता यदि सत्तम ॥
मुक्तिः कल्पितरूपा स्याच्छुक्तिकारजतादिवत् ।
तस्मादात्मस्वरूपैव परा मुक्तिरविद्यया ॥
प्रतिबद्धा विशुद्धस्य विद्यया व्यज्यते ऽनघ ।
सालोक्यापि च सामीप्या सारूप्या मुक्तिरास्तिक ॥
साध्यते क्रियया साक्षाज्ज्ञानेनैव केवलम् ।
मुक्तयः क्रियया साध्या नश्वरा हि न संशयः ॥
क्रियासाध्यस्य कुम्भादेर्नश्वरत्वं प्रतीयते ।
क्रियया साध्यते ऽभावः संसारस्यैव केवलम् ॥
सैव मुक्तिः परा नान्या भावरूपेति चेन्न तत् ।

संसारो वस्तुतः सत्यः स्वात्मवन्न विनश्यति ॥
स तु कल्पितसत्यश्चेन्मिथ्यादेहात्मवद्भवेत् ।
मिथ्यारूपस्य सर्वस्य ज्ञानान्नाश्यत्वमेव हि ॥
न क्रिया नाश्यते सर्पो यथा रज्ज्वां प्रकल्पितः ।
घटादीनामनित्यानां व्यवहारे तु सत्यता ॥
आब्रह्मदर्शनादस्ति इत्येषा परमा श्रुतिः ।
तेनान्यस्याखिलस्यापि वाचारम्भणता खलु ॥
अतः संसारविच्छित्तिः कर्म्मणा नैव सिध्यति ।
वेदान्तवाक्यजन्येन ज्ञानेनैर्वाह केवलम् ॥
वेदान्तवाक्यजा विद्या मुने संसाररोधिका ।
प्रसादादेव रुद्रस्य जायते नापरस्य तु ॥
मुक्तिर्योगीन्द्र ते ऽस्माभिः कथिता वेदवर्त्मना ।
तां विद्ययैव संपाद्य विमुक्तो भवबन्धनात् ॥

॥ इति चतुर्दशोध्यायः ॥

श्री भगवान् भास्कर उवाच ॥

अथ सर्वार्थसंक्षेपं प्रवक्ष्यामि समासतः ।
याज्ञवल्क्य तवाद्यान्तं श्रद्धया सहितः शृणु ॥
अस्त्येव परमं तत्त्वं प्रथमं सकलस्य तत् ।
स्वयं भातं निराधारं नितरामेव निर्मलम् ॥
तत्स्वरूपातिरेकेण न किं चिदपि विद्यते ।
अस्ति नास्तीति यद्भाति तत्तदेव न चापरम् ॥
विभाति न विभातीति यद्विश्वमवभासते ।
तत्तत्सर्वं तदेवोक्तं हे मुने तस्य वैभवम् ॥
अहं तत्तदहं भेदो नैव भेदात्मनापि तत् ।

विभाति केवलं तत्र किं जाने किं वदाम्यहम् ॥
तस्यार्थस्य तु को वक्ता कः प्रष्टा वचनं च किम् ।
कः श्रोता श्रवणं किं स्यात्फलं तच्छ्रवणस्य किम् ॥
कः प्रमाता प्रमाणं हि किं प्रमेयस्य का मितिः ।
कः कर्ता का क्रिया कानि कारणानि मुनीश्वर ॥
तत्र ते केवलं साक्षान्मौनमेव हि युज्यते ।
तत्रावतिष्ठतु ब्रह्मन् सुन्दरं हि शरीरिणाम् ॥
अनिरूपितवेलायामनिरूपितरूपिणी ।
अविद्या भासते साक्षादनन्तस्फुरणात्मनि ॥
अतो ऽस्मीत्यवभासेन सा ऽविद्याभ्युपगम्यते ।
वस्तुगत्या न सा ऽविद्या तथा सर्व्वार्थकल्पना ॥
अविद्या ज्ञानमायाख्यो मलः संसारकारणम् ।
नेतरत्सत्यमेवोक्तं तद्धि वेदान्तदर्शनम् ॥
मलः कर्मापि संसारकारणं न हि संशयः ।
रागद्वेषादयो दोषा अपि संसारकारणम् ॥
अज्ञानाख्यं मलं साक्षात्संसारस्यैव कारणम् ।
आत्मनः कल्पयन्त्यन्ये तत्तावन्नैव संगतम् ॥
कल्पितो वा यथार्थो वा सुमलश्चाणवाह्वयः ।
कल्पितश्चेदविद्यैव प्रोक्ता नामान्तरेण वै ॥
यथार्थश्चेत्स्वरूपं वा धर्मो वास्यात्स वस्तुनः ।
स्वरूपं चेन्मलस्तोकं कदा चिन्न विनश्यति ॥
स्वरूपस्य विनाशे तु सुसूक्ष्मं परिपश्यताम् ।
नैरात्म्यवादः संप्राप्तः को वा तस्य निवारकः ॥
धर्मश्चेत्स गुणत्वेन नैव तिष्ठति चात्मनि ।

Digitized by Google

निर्गुणः खलु चिद्रूपः साक्षादात्मा मुनीश्वराः ॥
अपि चात्मगतः सो ऽयं मलश्चिद्वा ऽचिदेव वा ।
यदि चित्स्यान्मलः साक्षाच्चिद्रूपात्मैव केवलम् ॥
यद्यचित्तु हि चिद्रूपे विरोधान्नैव तिष्ठति ।
चैतन्याश्रय एवात्मा न चिदित्यब्रवीद्यदि ॥
तदाप्यात्मन्यचिच्चिन्न न तिष्ठति सह द्वयम् ।
शीतोष्णसुखदुःखादिधर्मौ यद्वत्तथैव तु ॥
चैतन्याश्रय आत्मायं चिदन्या ऽचित्खलु स्वतः ॥
तथा सत्यचिदात्मायं कथं चैतन्यधर्मवान् ॥
अचिद्रूपो घटाद्यर्थश्चैतन्यस्य स नाश्रयः ।
घटादीनामनात्मत्वाच्चैतन्याश्रयता न हि ॥
आत्मत्वाच्चात्मवदेव चैतन्यस्याश्रयो भवेत् ।
इति चेदात्मज्ञानं स्यादचित्वादेव कुम्भवत् ॥
चैतन्याश्रयताभावाद् घटो नात्मा न चान्यथा ।
अयं चैतन्यधर्मित्वादात्मा स्यादिति चेन्न तत् ॥
आत्मत्वे सति चैतन्यधर्मित्वं तस्य सिद्ध्यति ।
सिद्धे चैतन्यधर्मित्वे ऽप्यात्मता तस्य सिद्ध्यति ॥
अत एव मलः सो ऽयं मुने आणवसंज्ञितः ।
न तिष्ठति गुणत्वेन सर्वथा ह्यात्मवस्तुनि ॥
कार्यद्रव्यतया चापि मलो नात्मनि तिष्ठति ।
संसारकारणत्वेन मलो ऽनादितया मुने ॥
तैरभ्युपगतः सोऽयं न क्रियात्वेन तिष्ठति ।
नापि जात्यात्मना तेषां न तथा दर्शने मुने ।
अत एवाणवाख्यो ऽयं मल आत्मनि कल्पितः ।

अविभागेन बाध्यस्तो मल आणवसंज्ञित: ॥
ईषन्मात्रविभागेन कल्पितो मल आत्मनि ।
मायात्वेनैव शास्त्रेषु पठ्यते स परात्मन: ॥
वैपरीत्यस्य हेतुत्वादपि माया परात्मन: ।
तथा दुर्घटहेतुत्वादपि माया प्रकीर्त्तिता ॥
अतो मायातिरेकेण वास्तवो नाणवो मल: ।
लौकिको वैदिकश्चान्यो मायया परिकल्पित: ॥
कल्पितेषु समस्तेषु वैदिको मोक्षसाधनम् ।
पारंपर्य्येण चान्यो ऽपि श्रुत्यर्थे पर्य्यवस्यति ॥
अयं साधारण: प्रोक्तो लौकिकस्तन्न वेदयेत् ।
आणवादिमलो च्छेद: साक्षान्मोक्ष: प्रकीर्त्तित: ॥
कल्पितो ह्यमलस्यापि निवृत्तिर्विद्ययैव हि ।
वेद्या वेदान्तवाक्योत्था विद्याया: कर्म्म साधनम् ॥
संसारार्णवमग्नानां साक्षात्संसारमोचक: ।
महाकारुणिको रुद्र: सोमसोमार्द्धशेखर: ॥
प्रत्यक्षादि प्रमाणेषु श्रुतिरेव बलीयसी ।
स्मृतय: श्रुतिमूलाश्च पुराणानि च भारतम् ॥
शिक्षाद्यङ्गानि मीमांसे कर्म्मब्रह्मपरे तथा ।
श्रुतिमूलेषु शास्त्रेषु समस्तेषु मुनीश्वर ॥
प्रत्यक्षश्रुतिसिध्यर्थं यद्युक्तिं मुनिसत्तम ।
तत्प्रत्यक्षश्रुतेरर्थं अनूद्यार्थप्रकाशकम् ॥
तेषु श्रुत्यविरुद्धश्च तस्य मूलतया श्रुति: ।
कल्प्यते यद्विरुद्धं तत्तत्र मूलमिति स्थिति: ॥
केवलं भ्रान्तिमूलं तद्युक्तैरित्यपरे जना: ।

Digitized by Google

ब्रुवन्ति सर्वथा तावच्छ्रुतिर्मानोत्तमोत्तमा ॥
प्रत्यक्षादिप्रमाणानां पञ्चानामपि मानता ।
साक्षाद्वेदाविरोधेन स्वीकर्त्तव्या निरूपके: ॥
दोषसंभावना तेषां पञ्चानामपि सत्तम ।
दोषसंभावना त्वस्या: श्रुतेर्नास्ति कदा चन ॥
कर्त्तृदोषेण दुष्टं स्यात्प्रत्यक्षं क्व चिदास्तिका: ।
क्व चित्कारणदोषेण क्व चिद्विषयदोषत: ॥
क्व चिच्चादृष्टदोषेण तत्सर्वं न श्रुतौ खलु ।
प्रत्यक्षमूलान्यन्यानि खलु मानानि सत्तम ॥
अतो वेदातिरिक्तानां दोषसंभावनास्ति हि ।
निर्दोषेणैव वेदेन यत्तत्वं प्रतिपादितम् ॥
तत्तु साक्षात्स्वत: सिद्धं प्रथमं सकलस्य तु ।
प्रथमं तद्द्वयं तत्त्वं द्वयं मायामयं न सत् ॥
सर्व्वस्य प्रथमं साक्षात्स्वभूतं परमं पदम् ।
स्वातिरिक्तं विजानाति मायया परिमोहित: ॥
स्वातिरिक्ततया ज्ञानं मायया परमं परम् ।
अन्यथा चान्यथा भ्रान्त्या प्रवदन्ति च के चन ॥
पञ्चविंशकमित्याहुस्तदेव परमं पदम् ।
अन्ये षड्विंशकं प्राहुस्तथान्ये सप्तविंशकम् ॥
तथा शतसहस्रादिसंख्यासंख्येयमास्तिक ।
प्राहु: संख्याविनिर्मुक्तं परं तत्त्वं शिवाभिधम् ॥
संख्यासंख्येयनिर्मुक्तं संख्यासंख्येयसाक्षिणम् ।
संख्यासंख्येयचित्रस्य भित्तिभूतं सदोदितम् ॥

Digitized by Google

सत्यं ज्ञानं यदानन्दं ब्रह्मानन्तमकल्मषम् ।
अहमर्थतया श्रुत्या गुरूक्त्या स्वानुभूतितः ॥
पश्यन्योगी परिज्ञानान्निर्वाणं याति सत्तम ।
ब्रह्मैव स न यं साक्षाद्ब्रह्माप्येति सनातनम् ॥
विमुक्तो मुच्यते ज्ञाता विज्ञानादेव केवलम् ।
अज्ञानस्य विनाशेन संसारश्च विनश्यति ॥
यदा ब्रह्मात्मविज्ञानाद्दग्धाविद्यो भवेत्पुमान् ।
जीवन्मुक्तस्तदा तस्य कर्मलेपो न विद्यते ॥
अनारब्धानि कर्माणि पुण्यपापात्मकानि तु ।
ज्ञानाग्निनैव दग्धानि भवेयुर्न हि संशयः ॥
देहारम्भककर्म्माणि फलभोगेन केवलम् ।
विनश्यन्ति न विज्ञाता तथा चाह परा श्रुतिः ॥
श्रुत्युक्तार्थो न चोद्याहः खलु सर्वजनैरपि ।
यथोपदेशः संग्राह्यः केवलं वेदवित्तम ॥
इतः किं बहुनोक्तेन श्रुत्यर्थो निखिलो मया ।
करामलकवद्ब्रह्मन्यथावत्कथितस्तव ॥

इति सौरसंहितायां षोडशोऽध्यायः ॥ * ॥

इति कैवल्यरत्ने स्कन्दपुराणे सौरसंहिताप्रकाशितजीवन्मुक्तिपर्यन्तं परमाद्वैतसारोद्धारः समाप्तः ॥

॥ शुभमस्तु ॥

Digitized by Google

॥ अथ चित्सुखी ॥

॥ तत्र चतुर्थपरिच्छेदारम्भः ॥

(*Continued from page* 216. VOL. VI.)

कः पुनरयं मोक्षः ।

न तावद्विषयाकारोपप्लुतविज्ञानसंतानोपरमः, तज्ज्ञानसंतानस्यात्मरूपतया तदुच्छेदस्यापुरुषार्थत्वात्, नहि सर्वतः प्रियतमस्यात्मनः समुच्छेदाय वाञ्छा कस्यचिदुपजायते, बन्धविमोकपर्यायस्य मुक्तिशब्दस्यातदर्थत्वाच्च, नहि बद्धनाशो मोक्षपदवाच्यः, किंतु सत एव तस्य बन्धविश्लेषः ।

नापि विधूतविषयाकारोपप्लवविशुद्धविज्ञानसंतानोदयः, विकल्पासहत्वात्, तथाहि किमयं संतानिनां पुरुषार्थः किं वा संतानस्य ।

नाद्यः, तेषां स्वरसपरिनिर्वाणात् ।

नोत्तरः, तथाविधसंतानोदयेऽपि मुमुक्षोरुपप्लुतसंतानरूपस्योपरमात्, बन्धमोक्षयोर्वैयधिकरण्यापाताच्च, उभयान्वयिनः संतानस्य चैकस्याभावात्, कारणाभावाच्च, भावनाप्रकर्षो हि तस्य कारणमिष्यते, तस्य स्थिरैकाधिकरणाभावे विशेषानाधायकत्वात्, संतानस्यावस्तुत्वात्, संतानिनां च प्रतिक्षणमपूर्ववदुपजायमानत्वेनानासादितभावनाप्रकर्षतया विशुद्धविज्ञानजननासामर्थ्यात् ।

नाप्यात्यन्तिकी दुःखनिवृत्तिः, अतीतस्य तस्य स्वत एवात्यन्तनिवृत्तत्वेनासाध्यत्वात्, वर्तमानस्य विरोधिगुणप्रादुर्भावनिवर्त्यत्वात्, अनागतस्य निवर्तयितुमशक्यत्वात् ।

निवृत्तेरात्यन्तिकत्वशब्देन निवृत्तजातीयस्य दुःखस्य तस्मिन्नात्मनि पुनरनुत्पादो विवक्षित इति चेत्, न, अनुत्पादस्यापि प्रागभावतयानुत्पाद्यत्वात् ।

ननु दुःखात्यन्ताभावो मोक्षः ।

न च तस्य नित्यत्वादसाध्यत्वम्, तत्संबन्धस्य स्वात्मनि साध्यत्वादशेषक्लेशहेतुनाशस्य दुःखात्यन्ताभावात्मनोः संबन्धरूपत्वात्, तदुत्प-

तो दुःखात्यन्ताभावस्य तदीयत्वेन व्यवहारात्, तदीयतया व्यवहारहेतुत्वेन च विषयविषयिभावादिवदस्यापि संबन्धव्यवहारगोचरत्वात्, तस्य च कृतकत्वेऽपि ध्वंसत्वादेवाविनाशित्वात् ।

न चात्यन्ताभावस्य प्रतियोगी दुर्निरूपः, मुमुक्षुसमवेततया संभावनोपनीतस्य दुःखस्य प्रतियोगित्वात्, असति योगाभ्यासे दुरितप्रवाहस्यानागतसमयवर्तिदुःखोत्पादकत्वात्, सर्वत्र चात्यन्ताभावनिरूपणे सामान्यतोऽवगतस्य विशेषतः समारोपविज्ञानविषयस्यैव प्रतियोगित्वात्, विशेषतस्तु प्रतियोगिसद्भावनिश्चयापेक्षायामत्यन्ताभावनिरूपणव्याघातात्, शशविषाणं तदीयमन्यदीयं वा नास्तीति पर्यनुयोगस्य सुवचत्वात् ।

न चास्य समव्ययफलत्वेनापुरुषार्थत्वम्, योगप्रभावात् कायव्यूहनिर्माणेन जीवन्मुक्तिदशायां सकलसुखोपभोगाङ्गीकारात् ।

"क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे", "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथे"ति श्रुतिस्मृतिशतेभ्यः सर्वकर्मणां ज्ञानेन विलयावगमात् सुखोपभोगो न युक्त इति च न वाच्यम्, तद्वचनानामचिरविनश्वरतामात्रप्रतिपादनपरत्वात्, अन्यथा सर्वकर्मणां विलयाद्विदुषः सद्य एव शरीरपाते जीवन्मुक्ताभावप्रसङ्गात् ।

प्रारब्धकार्येतरकर्मणां ज्ञानादेव प्रक्षयो विवक्ष्यत इति चेत्, मैवम्, अकृतप्रायश्चित्तानां कर्मणां देहारम्भककर्मवद्भोगैकनाश्यत्वनियमात्, "नाभुक्तं क्षीयते कर्मे"ति स्मृतेः ।

न चानन्त्यात् कर्मणां भोगेन प्रक्षयानुपपत्तिः, योगप्रभावादनन्ततदुपभोगसाधनकायव्यूहनिर्माणेन तदुपपत्तेः ।

न चानियतकालविपाकतया कर्मणां युगपदुपभोगविरोधः, उपभोगानुकूलसहकारिसाकल्यादेव समानविपाकसमयतोपपत्तेः, अत आत्यन्तिकदुःखनिवृत्तावपि मुक्तौ न समव्ययफलता ।

न चाननुभूयमानतया दुःखनिवृत्तेरपुरुषार्थत्वम्, विकल्पासहत्वात्, किमनुभूयमानतामात्रं पुरुषस्योपयोगि यावद्दुःखनिवृत्तिसत्त्वं वा ।

Digitized by Google

नाद्यः, चरमे जन्मनि योगप्रभावादनागताया अपि दुःखनिवृत्तेर-नुभूयमानत्वसंभवात्, वर्तमानाया अप्यचिरमनुभवोपपत्तेः, तथाहि योगि-नश्चरमज्ञानेन सकलविषयेण दुःखतत्प्रभावौ युगपत् साक्षात्कृतौ, तेनैव विरोधिगुणप्रादुर्भावेन निवृत्ते दुःखे विनश्यदवस्थज्ञानेन वर्तमानापि दुःख-निवृत्तिरनुभूतेति ।

नापि द्वितीयः, प्रसक्तकण्टकादिदुःखनिवृत्तेरपुरुषार्थत्वप्रसङ्गात्, यावत्सत्त्वमननुभूयमानत्वात्, तथात्वे विषयान्तरावेदनप्रसङ्गात् ।

न च दुःखाभावस्य सुखशेषतया पुरुषार्थत्वम्, सुखस्यापि दुःखाभा-वशेषतयाऽपुरुषार्थत्वमिति वैपरीत्यस्यापि वक्तुं सुकरत्वात्, कामनाया-स्त्वभयत्रापि समानोदयतयोभयोरपि पुरुषार्थत्वोपपत्तेः, प्रयोगश्च, आत्मा कदाचिद् ध्वस्ताशेषविशेषगुणो नित्यत्वे सत्यनित्यविशेषगुणाश्रयत्वात्, महाप्रलयावस्थायामाकाशवदिति लीलावतीकारः ।

नव्यमतानुसारिणः पुनरेवं मोक्षलक्षणमाचक्षते, एतज्जीवनिष्ठदुः-खसमानकालिकदुःखध्वंसातिरिक्ततन्निष्ठदुःखध्वंसोऽस्य मुक्तिरिति, प्रयो-गश्च, देवदत्तोऽयमेवंविधदुःखध्वंसवान् दुःखित्वाच्चैत्रवत् ।

एतन्निष्ठदुःखप्रागभावासमानकालिकैतन्निष्ठदुःखध्वंसोऽस्य मोक्ष इत्यपरे, एवंविधसाध्येऽपि दुःखित्वादिति प्रयोगः पूर्ववदेव ।

अन्ये तु ज्ञानाजनकसंस्कारजनकजन्यसाक्षात्कारविषयो दुःख-ध्वंसो मोक्ष इति मन्यन्ते, तत्र साक्षात्कारविषयो दुःखध्वंस इत्येतावति लक्षणे सांसारिकदुःखध्वंसेऽतिव्याप्तिर्मा भूदिति ज्ञानाजनकेत्यादिना विशेषणेन साक्षात्कारो विशेष्यते, तत्र जन्यपदेनेश्वरसाक्षात्कारो व्याव-र्त्यते, तस्यापि सकलजनकतया ज्ञानाजनकसंस्कारजनकत्वात्, अस्ति च ज्ञानाजनकसंस्कारजनकत्वं चरमसाक्षात्कारस्य दुःखध्वंसविषयस्य, तदन-न्तरं मुक्तौ ज्ञानान्तरानुदयात्, दुःखनिवृत्तिरेव मुक्तिरित्यत्र वा "शरीरं वा वसन्तं न प्रियाप्रिये स्पृशतः" इत्यादयो वेदान्ताः प्रमाणम्, प्रियशब्दा-भिधेयस्य सुखस्यापि निराकरणात्, "यो वै भूमा तत् सुखम्", "एषोऽस्य पर-

मानन्द" इत्येवमाद्यास्तु श्रुतयो दुःखाभावविषयतयोपचरितार्थाः, विषयाजन्यसुखस्यादृष्टचरत्वात् ।

न च सुप्तोत्थितस्य सुखमहमस्वाप्समिति सुखपरामर्शदर्शनाददृष्टचरत्वमसिद्धमिति वाच्यम्, पित्ताद्युपहतेन्द्रियस्य दुःखमहमस्वाप्समिति परामर्शाद् दुःखस्यापि नित्यताप्रसक्तेः ।

न च परमप्रेमास्पदत्वादात्मनः सुखरूपतानुमेया, दुःखाभावे व्यभिचारात्, आत्मनः सुखरूपत्वे च मुक्तिसंसारयोरविशेषप्रसङ्गात्, स्वयंप्रकाशस्य निरतिशयसुखरूपतया सदावभाससंभवात्, सुखं मे स्यादिति च प्रेमालोकेन सुखमहं स्यामिति, तथा चात्मनः सुखरूपत्वे प्रेमास्पदत्वमेव न स्यादिति प्रतिज्ञाहेत्वोर्विरोधः, तत्र कुतस्ततः सुखरूपतानुमानम्, तस्माद् दुःखनिवृत्तिरेव मुक्तिरिति ।

अत्रोच्यते, प्रतियोगिहेतुनाशो न तदत्यन्ताभावस्य तदीयत्वे प्रयोजकः ।

लीने शब्दनिदानेऽपि व्योम्नि तस्यानवस्थितेः ।
रूपाभावव्यवहृतेस्तदभावेऽपि चात्मनि ॥ १ ॥

प्रलयदशायामशेषशब्दनिदाननाशेऽप्याकाशे न शब्दात्यन्ताभावः, पुनः सर्गे तत्रैव शब्दोत्पत्तेः, प्रतियोगिहेतुनाशाभावेऽप्यात्मनि रूपात्यन्ताभावव्यवहारात् ।

न चाभावत्वेऽपि विषयविषयिभावादिवद् ध्वंसस्य संबन्धरूपता, विषयविषयिभावादेरप्यभावत्वे संबन्धरूपत्वे चासंप्रतिपत्तेः ।

न च विनाशस्याप्यविनाशिता, कृतकत्वात् ।

न च ध्वस्ताध्वस्तिप्रसङ्गः, पुरस्तादेव परास्तत्वात् ।

न च समारोपितप्रतियोगिकत्वे दुःखात्यन्ताभावस्य पारमार्थिकता, स्वप्नसमारोपितद्विरदध्वंसवदस्यापि पारमार्थिकत्वानुपपत्तेः ।

न च शशविषाणनिषेधप्रतिबन्दी ग्रहः, तस्याप्यविद्यारितत्मकी- यत्वात् ।

न च कायव्यूहनिर्माणेन जीवन्मुक्तिदशायामशेषसुखोपभोगाङ्गीकारात् समव्ययफलत्वदोषपरिहारः, विदेहकैवल्ये दुःखाननुभववत् सुखानुभवस्याप्यभावात् ।

न च सर्वकर्मफलोपभोगसंभवः, प्रारब्धकर्मेतरकर्मणां ज्ञानान्निवृत्तिवचनात् ।

न चाकृतप्रायश्चित्तानां कर्मणां भोगैकनाश्यत्वनियमः, "चीराचीरावपत्रैस्तु ज्वरं सद्यो निवारयेत्" इत्यादिना अकृतप्रायश्चित्तानामपि ज्वरादिहेतुकर्मणां निवृत्तिस्मरणात् ।

न चाकृतप्रायश्चित्तत्वम्, "एवं हास्य सर्वे पाप्मानः प्रदूयन्ते", "एवंविदि पापं कर्म न श्लिष्यते" इत्यादिवाक्यशेषे श्रूयमाणस्य पापक्षयस्य रात्रिसत्रन्यायेन ज्ञानफलत्वकल्पनया सगुणासु विद्यासु "दुरितक्षयकामो ब्रह्मोपासनं कुर्यात्" इति प्रायश्चित्तविधित्वोपपत्तेः,

"उपपातकेषु सर्वेषु पातकेषु महत्सु च ।
प्रविश्य रजनीपादं ब्रह्मध्यानं समाचरेत्" ॥

इति स्मरणाच्च ।

"सत्येनापि शपेद्यस्तु देवाग्निगुरुसंनिधौ ।
तस्य वैवस्वतो राजा धर्मस्यार्धं निकृन्तति" ॥

इत्यादिस्मरणात् सुकृतस्यापि भोगैकनाश्यत्वनियमानुपपत्तेः । "नाभुक्तं क्षीयते" इत्यादेरौत्सर्गिकत्वादपवादं परिहृत्यैव चोत्सर्गस्थितेः, निर्गुणब्रह्मविद्यायाश्च सर्वकर्महेतुभूताविद्यानिरासिकाया दृष्टद्वारेणैव तत्कार्यपुण्यापुण्यनिवर्तकत्वोपपत्तेः ।

न च कायव्यूहनिर्माणेन युगपत् सर्वकर्मफलोपभोगसंभवः, तत्तत्कल्पमन्वन्तरादिनियतकालोपभोग्यानां युगपदुपभोगे तत्प्रतिपादकशास्त्रस्याप्रामाण्यप्रसङ्गात् ।

न च प्राप्ताणिमाद्यैश्वर्याणामेव मुक्तिः, येन कायव्यूहनिर्माणेन युगपदशेषकर्मफलोपभोगः स्यात्, न त्वेवम्, भगवता पतञ्जलिना नियमाभावाभिधानात्, यदा निर्धूतरजस्तमोमलं बुद्धिसत्त्वं पुरुषस्यान्यताप्रत्य-

यमात्राकारं दग्धक्लेशबीजं भवति तदा पुरुषस्य बुद्धिसारूप्यमिवापन्नं भवति, एतस्यामवस्थायां कैवल्यं भवतीश्वरस्यानीश्वरस्य वेति, जनकजड-भरतविदुरधर्मव्याधपिङ्गलादीनामप्राप्तैश्वर्याणामपि मुक्तिस्मरणाच्च ।

न च युगपद् भोगसाहकारिसाकल्यम्, भविष्यत्कल्पमन्वन्तरा-दीनां सहकारिणामिदानीमाहर्तुमशक्यत्वात् ।

न च प्रसक्तकण्टकादिदुःखनिवृत्तिवन्मुक्तौ दुःखनिवृत्तेर्वर्तमान-तया साक्षात्कारसंभवः, अप्राप्तैश्वर्यस्यापि मुक्तिप्रतिपादनेन तदसं-भवस्योपपादितत्वात् ।

न च दुःखाभावः स्वतन्त्रया पुरुषार्थः, सुखाभिव्यक्तिशेषत्वात् ।

न च विपरिवृत्तिप्रसङ्गः, विकल्पासहत्वात्, किं सुखं दुःखाभाव-स्योत्पादकमुताभिव्यञ्जकम्, नोभयथापि आत्मनि समस्तदुःखाभाव-मनुभवतोऽप्यकस्मादुपनतविपञ्चीस्वरश्रवणादौ सुखोत्पत्तेः ।

न च संतापवतः शीतहृदनिमग्नार्धकायस्य सत्येव दुःखे सुखोप-लम्भान्न दुःखाभावस्य सुखप्रतिपत्तिशेषतेति वाच्यम्, सुखस्य दुःखाभावै-काभिव्यङ्ग्यत्वनियमानभ्युपगमात्, अनुभूयमानो दुःखाभावः सुखमभिव्य-नक्त्येवेति नियमात् ।

ननु वैषयिकसुखस्य कण्टकादिनिवृत्तावननुभवात् आत्मनश्च सुखरूपत्वासंप्रतिपत्तेर्न दुःखाभावस्य सुखाभिव्यक्तिशेषतेति चेत्, न, आ-त्मनः सुखरूपत्वस्यानन्तरमेव निवेदयिष्यमाणत्वात् प्रयोगश्चासमीचीनः, वेदान्तिनः प्रति हेतोरसिद्धत्वात्, दृष्टान्तस्य च साध्यसाधनविकलत्वात्, आकाशस्यापि प्रलये लयाभ्युपगमात् ।

अस्तु तर्हि दुःखसंततिरत्यन्तमुच्छिद्यते संततित्वात् प्रदीपसंतति-वदिति किरणावलीकारप्रयोग इति चेत्, न, पार्थिवपरमाणुरूपादिसंता-नेन त्वन्मते व्यभिचारात् ।

ननु सर्वमुक्तौ सापि संततिरुच्छिद्यते धर्माधर्माख्यनिमित्तस्य सुखदुःखोपभोगलक्षणप्रयोजनस्य चाभावादिति चेत्, मैवम्, सर्वमुक्त्यन-ङ्गीकारवादिनं प्रत्येवं पर्यनुयोगायोगात्, कन्दलीकारलीलावतीकारप्रभृ-

तिभिः कैश्चिद् वैशेषिकविशेषैः सर्वमुक्तेरनङ्गीकारात्, केषांचिदात्मनः संसारैकस्वभावताङ्गीकारात् ।

न चैवं सति सर्वेषां तथात्वाशङ्कया मोक्षसाधनाननुष्ठानप्रसङ्गः, "अमृतमोपरमेतितिक्षादिना मुमुक्षुचिह्नेन श्रुतिसिद्धेन तथात्वाशङ्कानिवृत्तेः, चरमानुमानं पुनः सिद्धसाधनत्वादुपेक्षणीयम्, नहि मुक्तस्य दुःखनिवृत्तौ कश्चिद्विप्रतिपद्यते ।

तृतीयमपि मोक्षलक्षणमसंभवित्वदोषेण निरसनीयम्, योगप्रभावनियमनिराकरणात्, अनागतदुःखध्वंसस्य साक्षात्कर्तुमशक्यत्वात्, चरमदुःखध्वंसदशायां विज्ञानस्यापि विशेषगुणस्योच्छेदस्याङ्गीकारात्, प्रियस्पर्शनिषेधश्रुतिस्तु वैषयिकसुखनिषेधपरा, अन्यथा "एषोऽस्य परमानन्दः", "यो वै भूमा तत् सुख"मिति सुखरूपताप्रतिपादकश्रुतिविरोधात् ।

न चासामुपचरितार्थत्वम्,मुख्यार्थे बाधकाभावात् ।

न च नित्यसुखस्यानुपलब्धिर्बाधिका, नित्यज्ञानवदुपपत्तेः, सुखस्य विषयेन्द्रियादिजन्यत्वव्याप्तेश्च, ज्ञानेच्छादेर्जन्यत्वे व्याप्तिवदेव निरसनीयत्वात्, श्रुत्यवष्टम्भेन नित्यत्वाङ्गीकारस्योभयत्रापि तुल्यत्वात्, विषयाद्यभावेऽपि सुप्तोत्थितस्य सुखमहस्वाप्समिति सुखपरामर्शदर्शनाच्च ।

न च दुःखपरामर्शेऽपि तुल्यमिति वाच्यम्, नित्यदुःखरूपतायामात्मनः परमप्रेमास्पदत्वव्याकोपात् ।

न च दुःखाभावे व्यभिचारादिदमसाधनमिति वाच्यम्, तस्य सुखशेषतया परमप्रेमास्पदत्वाभावात्, परमप्रेमास्पदत्वानुपपत्तिरप्यात्मनः सुखरूपत्वे प्रमाणम्, आत्मनः प्रेमास्पदतायां न कस्यचिद्विवादः, "मा न भूवं भूयास"मित्यात्मन्याशिषो लौकिकपरीक्षकसंमतत्वात् ।

न चेयमाशीः शरीरोपघातजन्मनो दुःखाद्बिभ्यतो न पुनरात्मानमानन्दं मन्यमानस्येति युक्तम्, शरीरोपघातजन्मनो भयस्याप्यात्मनः प्रेमास्पदत्वमन्तरेणानुपपत्तेः, नहि दुःखं दुःखतया भयहेतुः, अन्यगतस्यापि तथाभावप्रसङ्गात्, "तदेतत् प्रेयः पुत्रा"दिति प्रेमास्पदत्वश्रुतेश्च ।

Digitized by Google

न च दुःखाभावतयात्मनः प्रेमास्पदत्वम्, भावरूपत्वात्, नापि तदाश्रयतया, दुःखदशायामप्यात्मनि प्रेमोपलम्भात्, नापि तत्साधनतया, साधने प्रेम्णो निरुपाधिकत्वासंभवात्, अत एव न सुखसाधनतयापि, सुखस्याप्यात्मार्थतया प्रेमास्पदत्वात्, अतः सकललौकिकवैदिकसुखगोचरप्रेम्णोऽतिशयी स्वात्मनि प्रेमा निरतिशयसुखगोचरप्रेमसमान एवात्मन्यवकल्पत इत्यर्थापत्त्यात्मनो निरतिशयसुखस्वभावत्वसिद्धेः ।

प्रयोगश्च ।

कुम्भः कुम्भेतराचित्कासुखान्यान्यः प्रसाध्यताम् ।
कुम्भत्वेन यदित्थं तत् तथा कुम्भान्तरं यथा ॥ २ ॥

कुम्भोऽयमेतदितरानात्मासुखान्यान्यः कुम्भत्वात् संप्रतिपन्नकुम्भवत् ।

न च कुम्भोऽयमेतदितरानात्मादुःखान्यान्यः कुम्भत्वात् संप्रतिपन्नकुम्भवदित्याभाससमानयोगक्षेमता, तस्यागमार्थापत्तिबाधितविषयतयानुत्थानात् ।

किंच सुखप्रेम्णोः संबन्ध आत्मनिष्ठः सुखनिष्ठत्वात् संप्रतिपन्नलघुत्वादिवत् ।

न च सुखनिष्ठोत्कर्षापकर्षादिधर्मैरनैकान्तता, तेषां वेदान्तिभिः सुखनिष्ठतानङ्गीकारात्, तत्प्रतीतेरौपाधिकत्वाभ्युपगमात् ।

न चेदृशसंबन्धोऽनात्मनिष्ठः प्रेमनिष्ठत्वात् सत्तादिवदिति सत्प्रतिसाधनता, प्रेमनिष्ठतयैव सिद्धसाधनत्वात्, अनात्मनिष्ठ एवेति तु साधने दृष्टान्तस्य साध्यविकलता, सत्तादेरात्मानात्मनिष्ठत्वस्य पराङ्गीकारात् ।

न च नित्यसुखरूपत्वे मुक्तिसंसारयोरविशेषप्रसङ्गः, तस्याविद्यातिमिरतिरोधानातिरोधानाभ्यां विशेषोपपत्तेः । (शेषमग्रे)

काशीस्थराजकीयप्रधानपाठालयीयसंख्यावान् ।
सांख्याध्यापनकारी वेचनरामोऽस्मि कान्यकुब्जोऽहम् ॥ १ ॥
॥ पं० वेचनरामत्रिपाठी ॥

Digitized by Google

॥ श्रीः ॥

॥ योगवार्त्तिकम् ॥

(*Continued from page* 258. Vol. VI.)

तस्मात्संस्कारस्यादृष्टादेश्चास्ति अवस्थापरिणामः ज्ञानेच्छादिषु चोत्पत्तिविनाशानुभवात् क्षणद्वयमात्रस्थायित्वेपि द्वितीयक्षणे वर्त्तमानलक्षणस्यावस्थापरिणामो भवति क्षणत्वेनैव परिणामहेतुत्वात् अन्यथा सर्ववस्तूनां प्रतिक्षणपरिणामस्य वक्ष्यमाणस्यानुपपत्तेः । एतेनोत्तरवृत्तिविभुविशेषगुणस्येव ज्ञानादिनाशकत्वेनैकाग्रतादशायामपि ज्ञानस्य बहुक्षणस्थायित्वाच्चावस्थापरिणामसंभव इत्यपास्तम् । तदेव परिणामत्रयं व्याख्याय तेषामाधारव्यवस्थामाह । तत्र धर्मिण इत्यादिना । लक्षणानामप्यवस्थाभिरिति । यद्यपि अवस्थानामपि बाल्यादीनां लक्षणपरिणामोस्ति तथापि यथोक्तक्रमे न काप्यनुपपत्तिः । ननु वर्त्तमानलक्षणस्य नवपुराणाद्यवस्थापरिणामोस्तु अनागतातीतलक्षणयोस्तु कीदृशोऽवस्थाभेदः स्यादिति । उच्यते । शीघ्रभविष्यत्ताविलम्बभविष्यत्तादिरूपो विशेषस्तयोरपि लक्षणयोरनुमीयते सत्त्वादिवदेव गुणत्वेन प्रतिक्षणपरिणामित्वसिद्धेरिति । यथोक्तैस्त्रिपरिणामैः सर्ववस्तूनां परिणाममतिदिशन् वैराग्याग्निप्रज्वलनार्थं तेषां प्रतिक्षणपरिणामित्वं दर्शयति । एवं धर्मलक्षणेति । तदुक्तं मन्वादौ ।

घोरेस्मिन्हतसंसारे नित्यं सततघातिनि ।
कदलीस्तम्भनिःसारे संसारे सारमार्गणम् ॥
यः करोति स संमूढो जलबुद्बुदसंनिभे ।

इति । गुणवृत्तं गुणानां सत्त्वादीनां व्यापारः स्वकार्यैर्धर्मादिपरिणामैः क्षणमपि शून्यं नावतिष्ठते । प्रतिक्षणं परिणामं जनयतीत्यर्थः । ननु व्यापाराभावदशायामपरिणामित्वं स्यात् तत्राह । चलं च गुणवृत्तिमिति । चलमिति भावप्रधानो निर्देशः । चाञ्चल्यं हि गुणानां स्वभाव इत्यर्थः । ननु प्रतिक्षणं चाञ्चल्ये प्रमाणं किमित्याकाङ्क्षायामाह । गुणस्वाभाव्यं त्विति । राज्ञो हि गुणानामुपकरणानां भृत्यादीनां स्वाम्यर्थे प्रतिक्षणमेव व्यापारो

दृश्यते अतो गुणस्वभावतैव पुरुषगुणानामपि सत्त्वादीनां प्रतिक्षणपरि-
णाममुक्तं पूर्वाचार्यैरित्यर्थः । गुणत्वं च परस्यैव भोगापवर्गहेतुत्वमिति
चित्तदृष्टान्ते परिणामत्रयं व्याख्याय दार्ष्टान्तिकेपि तद्व्याख्यातुमारभते
एतेनेति । धर्मधर्मिभेदादिति । धर्मधर्मिभेदमाश्रित्येत्यर्थः । तत्र पृथिव्या-
दीनां धर्मिणां घटादिधर्मपरिणामः घटादीनां धर्माणां वर्त्तमानातीत-
लक्षणपरिणामः वर्त्तमानादिलक्षणानां च त्रयाणामपि बाल्ययौवनादिराव-
स्थापरिणाम इति । ननु त्रयोपि कथं परिणामा भूतेन्द्रियेषूच्यन्ते तेषु धर्मि-
धर्ममात्रपरिणामादिति, तत्राह । परमार्थतस्त्विति । एक एव परिणामः
त्रयोपि धर्मिपरिणाम एव यतो धर्मिस्वरूप एव धर्मा इति धर्मिपरिणाम एवै
लक्षणादिपरिणामो धर्मादेरित्यवान्तरमेव विभज्यत इत्यर्थः । इदानीं प्रति-
क्षणपरिणामे क्षणिकतादिप्रसङ्गमपाकर्तुं परिणामत्रयं क्रमेण परीक्षणीयम् ।
तत्रादौ धर्मपरिणामः परीक्ष्यते । तत्र धर्मस्येत्यादिना । तत्र तेषु परिणा-
मेषु मध्ये धर्मिणि सत एव धर्मस्यातीताद्यवस्थासु धर्मिणो भावान्यथात्वं
धर्मान्यथात्वमेव भवति न द्रव्यान्यथात्वं स्वरूपान्यथात्वे हि प्रतिक्षण-
परिणामेन क्षणिकतापत्त्या प्रत्यभिज्ञाद्यनुपपत्तिरिति भावः । सुवर्णस्य
भावान्यथात्वं भाजनादिरूपधर्मापाये कटकादिधर्माभिव्यक्तिरिति, प्रत्यभि-
ज्ञाबलेन च सुवर्णसामान्यस्य सर्वविकारानुगतस्य सिद्धिः । तत्सामान्यं
चावयविरूपो धर्मीति । वैशेषिकास्तु सुवर्णस्यान्यथात्वे अवयवसंयोगना-
शात् पूर्वसुवर्णव्यक्तिर्नश्यत्येव प्रत्यभिज्ञा तु जातिविषयेति । तन्न । एवं सति
प्रतिक्षणमवयवोपचयापचयाभ्यामवयवसंयोगविभागस्यावश्यकत्वेन शरीरा-
द्यखिलवस्तूनां क्षणिकत्वापत्तेर्ब्रह्मणाप्यपरिहार्यत्वात् । आत्मैव सर्वत्र
प्रत्यभिज्ञोपपत्तौ प्रत्यभिज्ञया घटादिस्थैर्यमिति स्वसिद्धान्तविरोधापत्तेश्च ।
तस्मादवयवसंयोगनाशो न द्रव्यनाशहेतुः किं तु वह्न्यादौ तृणारणिमणा-
दिविरुद्धावस्थितमेव बलवत्कारणं कल्पनीयम् । यद्वा विजातीयाव-
यवविभागविशेष इति । स्वरूपान्यथात्ववादिबौद्धैर्धर्मिपरिणामे प्रोक्तं दूषणं
निराकर्तुमुत्थापयति । अपर आहेति । धर्मी धर्मेभ्योऽतिरिक्तो न भवति
अत्यन्ताभिन्न इत्यर्थः । तत्र हेतुः पूर्वतत्त्वानतिक्रमात् । पूर्वतत्त्वस्य धर्मिणो-

चलितमापत्तेः कौटस्थ्यापत्तेरिति यावत् । एतदेव विवृणोति । पूर्वापरेति । धर्मी यद्यन्वयी धर्मेषु स्यात्तर्हि पूर्वापरसकलावस्थाभेदेषु अनुगततया अतीताद्यवस्थायामपि सत्त्वप्रसङ्गात् कौटस्थ्येनैव तिष्ठेत् चितिशक्तिवत् नित्यत्वकूटस्थत्वयोरेकार्थत्वात् तच्च तवाप्यनिष्टमित्यर्थः । परिहरति । अयमदोष इति । एकान्ततेति । एकान्तनित्यत्वानभ्युपगमादित्यर्थः । एकान्तेन सर्वथा स्वरूपतो धर्मतश्च नित्यत्वमेव कौटस्थ्यमस्माभिरभ्युपेयते । तच्च चितिशक्तेरेव न तु धर्मरूपेणानित्यस्य धर्मिण इत्यर्थः । विकारेभ्यावृत्तं प्रकृतेर्नित्यत्वं सतोतीतानागतावस्थाशून्यत्वम् इति स्वरूपतो धर्मतश्च नित्यानित्योभयरूपत्वं प्रपञ्चस्येति प्रतिपादयति । तदेतदिति । तदेतत्त्रैलोक्यं कार्यकारणात्मकं चतुर्विंशतितत्त्वानि सकार्याणीति यावत्, यथायोग्यं धर्मरूपेण स्वतश्च व्यक्तेर्वर्तमानावस्थातोऽपैति नित्यत्वप्रतिषेधात् । 'नैवेह किंचनाग्र आसीत्' 'असद्वा इदमग्र आसी'दित्यादिश्रुतिभि'र्व्यक्ताव्यक्तात्मिका तस्मिन्प्रकृतिः संप्रतीयत'इत्यादिस्मृतिभिः यत्सावयवं तदनित्यं घटादिवदित्यनुमानेनेत्यर्थः । नन्वेवमत्यन्तोच्छेद एवास्तु तत्राह । अपेतमिति । अपेतमतीतमपि प्रकृत्यादि धर्मिरूपेणातीतरूपेण चास्ति विनाशप्रतिषेधात् अत्यन्तोच्छेदप्रतिषेधात् तद्धैक आहुरसदेवेकमग्र आसीदित्यत्यन्तोच्छेदमाशङ्क्य कथमसतः सज्जायेत सत्त्वेव सोम्येदमग्र आसीदिति श्रुत्या तत्प्रतिषेधादित्यर्थः । विनाशित्वे सत्यनादिभावत्वानुपपत्तेरिति । यद्यपि सत्त्वेवेति श्रुतौ सच्छब्दार्थः परमात्मैव तदैक्षतेत्युत्तरवाक्यात् । तथापि सदेकीभावेनेदमासीदितिवचनादस्य प्रपञ्चस्यापि प्रलये सत्त्वं सिद्धमेव । एवं तद्धेदं तर्ह्यव्याकृतमासीत्तमसेवेदमासीत् आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् इत्यादिश्रुतिस्मृतयोऽप्यत्यन्तोच्छेदनिषेधिका उदाहार्याः । युक्तिश्चासदुत्पादे शशशृङ्गाद्युत्पत्तिप्रसङ्गबन्धमोक्षाद्यनुपपत्त्यादिरूपा ग्राह्या । ननु अपेतमपि चेदस्ति कथं नोपलभ्यते तत्राह । संसर्गाच्चेति । अस्य विकारजातस्य स्वस्वकारणेषु प्रकृत्यादिषु संसर्गादविभागाख्यात् कार्यस्य सौक्ष्म्यमव्यक्तता तस्माच्चास्यानुपलब्धिः सूक्ष्मतायाः सौक्ष्म्यसाक्षात्कारप्रतिबन्धकत्वादित्यर्थः । तदेवं

कार्यकारणाभेदेन प्रकृत्यादीनां सर्वेषां परिणामिनां प्रकारभेदेन नित्यानित्योभयरूपत्वव्यवस्थापनात्तेषां सदसद्रूपत्वं सिद्धान्तितम् । सदसत्ख्यातिर्बाधाबाधाभ्यामिति सांख्यसूत्रानुसारात् । इदमेव च जडानां व्यावहारिकसत्त्वं पुराणादौ गीयते । यच्च निःसत्तासत्तं प्रधानमिति भाष्यकारैः प्रागुक्तं तत् पारमार्थिकसत्त्वासत्त्वाभिप्रायेणैवेत्यस्माभिस्तत्रैव व्याख्यातम् । सतेनात्मैव सदन्यत्सर्वमसदिति श्रुतिस्मृतिवादा अप्यविरुद्धा एकान्तनित्यत्वस्यैव पारमार्थिकसत्तात्वात्तच्च कूटस्थनित्यस्यैवास्ति असत्ता संपर्काहित्यात् न तु व्यवहारसत्ता प्रकृत्यादीनामिति । इत्थमेव च

नासद्रूपा न सद्रूपा माया नैवोभयात्मिका ।
सदसद्भ्यामनिर्वाच्या मिथ्याभूता सनातनी ॥

इत्यादिवाक्यान्यपि संगच्छन्ते न पुनराधुनिकवेदान्तिब्रुवाणामनिर्वचनीयतावादेऽपि, तैर्हि मायाख्यजगत्कारणस्यापि विनाशोऽत्यन्ततुच्छत्वमेव वा परमार्थत इष्यते तन्मते च सनातनत्ववचनविरोध* इति दिक् । धर्मपरिणामं परीक्ष्य लक्षणपरिणामः परीक्ष्यते । लक्षणपरिणाम इति । अध्वसु वर्तमान इति । धर्माणां नित्यत्वमुक्तं नित्यत्वं विना अतीतानागतलक्षणायोगासंभवात् । अत्र एकैकलक्षणाभिव्यक्तिकालेऽपि धर्मो लक्षणान्तराभ्यां सूक्ष्माभ्यां वियुक्तो न भवतीति समुदायार्थः । तथा धर्मा इव लक्षणान्यपि नित्यान्येवेति नात्यन्तासदुत्पत्तिसदत्यन्तोच्छेदयोः प्रसङ्ग इति भावः । नन्वेकलक्षणाभिव्यक्तिकाले लक्षणान्तरयोरनुपलम्भादभाव एव युक्त इत्याशङ्कायां तयोरुपलब्धिमानुमानिकीं दर्शयति । यथेति । न शेषासु विरक्त इति । रागस्य भावित्वे सति विरक्तव्यवहारादर्शनात् तथा चैकविषयरागाभिव्यक्तिकालेऽपि विषयान्तररागस्यात्यन्तमभावो नास्ति अतो रागस्य एकलक्षणाभिव्यक्तिकाले अन्ययोः सत्ता सिध्यत्यनुमानादित्यर्थः । लक्षणपरिणामेऽपि परोक्तदूषणमुद्भावयति । अत्रेति । सर्वस्यानागतादेर्वर्तमानादि-

* किं बहुना 'सत्त्वाच्चावरस्य' 'असद्व्यपदेशादिति चेन्न धर्मान्तरेण वाक्यशेषात्' इति वेदान्तसूत्रद्वयोरेव विकारसदसत्त्वयोर्विरोध, इति पुस्तकान्तरे ऽधिकम् ।

सर्वान्वययोगादनागतादिकमपि वर्त्तमानं स्यादित्यध्वनां संकरः प्रसक्तः क्रमिकत्वे चासदुत्पादप्रसङ्ग इति शेषः। अतो वर्त्तमानमात्रलक्षणकं सर्वं वस्तु पूर्वोत्तरकालयोस्तु तस्याभावमात्रम् । अभावप्रतियोगित्वादेव चातीतत्वादिव्यवहार इति। तत्रादौ धर्मेषु लक्षणत्रयसंबन्धमेव व्यवस्थापयति । धर्माणामिति। धर्माणां तावत् धर्मत्वं प्राक्साधितत्वान्न साधनीयम् । सिद्धे च धर्मत्वे धर्माणां लक्षणं भेदो लक्षणबहुत्वमपि वक्तव्यं न पुनर्बौद्धवैनाशिकोक्तं वर्त्तमानमात्रमेकं लक्षणम् । यतो न वर्त्तमानसमयमात्रस्य धर्मस्य धर्मत्वं किं त्वतीतादिसमयेपीति शेषः । अत्र हेतुमाह । एवं हीति । हि यस्मात् एवं वर्त्तमानकालएव धर्मत्वे सति सर्वमेव चित्तं न रागधर्मकं विरक्तमिति यावत् । विरक्तव्यवहारयोग्यं स्यात् क्रोधकाले रागस्यासमुदाचारात् अनाविर्भावादित्यर्थः । अयं भावः । यथा यदा कदा चिद्रागसत्त्वेन भवन्मते चित्तं रक्तमितिव्यवहारः तथा यदा कदा चिद्रागाभावेन चित्तं विरक्तमिति व्यवहारः स्यादिति । अतोतीतादिकालेपि रागादेश्चित्तादिधर्मत्वात् धर्माणां त्रिलक्षणकत्वं सिद्धम् । यच्च तैरुच्यते अभावप्रतियोगितामात्रेणातीतादिव्यवहार इति, तदपि हेयम् । असति घटे ध्वंसप्रतियोगित्वादिरूपस्यातीतत्वस्य वृत्त्यनुपपत्तेः संयोगित्वादिवत्प्रतियोगित्वादेरपि संबन्धिद्वयसत्त्वं विनानुपपत्तेः सदसतोः संबन्धादर्शनात् । ध्वंसप्रागभावयोरसिद्धेश्च । घटो वर्त्तमान इतिवत् घटोतीतो भविष्यंश्चेति प्रत्ययाभ्यां घटावस्थाविशेषयोरेव सिद्धेः । अन्यथा भावाभावस्याप्यतिरिक्तत्वादिप्रसङ्ग इत्यादयश्च दोषाः स्वयमूहनीयाः । तदेवं धर्माणां लक्षणत्रयं व्यवस्थाप्येदानीं तत्साङ्कर्यं परिहरति । किं चेति । त्रयाणामनागतादिलक्षणानामेकदैकस्मिन्वस्तुनि संभवोभिव्यक्तिर्नास्ति किं तु स्वाभिव्यञ्जकं दण्डचक्रादिवस्त्वञ्जनतुल्यं यस्य एवंभूतस्य लक्षणस्य क्रमेण भावोभिव्यक्तिर्भवेदिति नाभिव्यक्तौ सांकर्यं स्वरूपतस्तु सांकर्यमिष्यतएवेत्यर्थः । अव्यक्तयोर्लक्षणयोर्व्यक्तेन लक्षणेन सह नास्ति विरोध इत्यत्र पञ्चशिखवाक्यं प्रमाणयति । उक्तं चेति । धर्माद्यनैश्वर्यान्तान्यष्टौ चित्तस्य रूपाणि वृत्तयश्च ज्ञानाद्याश्रयाः शान्तघोरमूढाश्चित्तपरिणामास्तेषामतिशयो ऽभि-

व्यक्तिरूपेणोत्कटतेति। इदं च वाक्यं गुणवृत्तिविरोधाच्च दुःखमेव सर्वमिति
सूत्रे व्याख्यातम्। उपसंहरति। तस्मादिति। असंकरे दृष्टान्तमाह।
यथेति। रागस्यैवेति। धर्माणां लक्षणत्रयसंबन्धे उदाहृतस्यैव रागस्यैवे-
त्यर्थः। क्वचिद्विषये अन्यत्र विषयान्तरेऽभावः सामान्याभाव इत्यर्थः।
दार्ष्टान्तिकमाह। तथा लक्षणस्येतीति। क्वचित्समुदाचार इत्यादिरर्थः।
अयं च लक्षणपरिणामो न धर्मिणः किं तु धर्माणामेवेत्येवं धर्मपरिणामा-
द्विशेषमाह। न धर्मीति। नन्वयं लक्षणपरिणामो लक्षणेऽस्ति न वा, आद्ये
अनवस्था अन्त्ये लक्षणपरिणामे परिणामलक्षणासंभवः पूर्वलक्षणातीततायां
लक्षणान्तराभिव्यक्तेरेव लक्षणपरिणामत्वादिति, मैवम्। बीजाङ्कुरवत्प्रामा-
णिकत्वेनास्या अनवस्थाया अदोषत्वात्। अन्यथा धर्मस्य धर्मस्तस्यापि धर्म
इत्याद्यनवस्थाया अपि दोषत्वापत्त्या धर्मधर्मिभावादिरपि न सिध्येतेति।
अधिकं तु निर्वितर्केतिसूत्रे प्रोक्तम्। तदेवं सर्वधर्माणां सदैव लक्षणत्रयसं-
बन्धोऽस्ति अभिव्यक्तिस्तु त्रयाणां क्रमिकीति सिद्धम्। स्यादेतत्। लक्षणा-
भिव्यक्तेरपि नित्यत्वात्कथं क्रमिकत्वं तत्र क्रमिकत्वसंभवे वा किमपराद्धं
लक्षणक्रमिकत्वेन। अत्रोच्यते। नित्यानित्योभयरूपत्वस्योक्ततया नित्य-
त्वेऽपि सर्वकार्येष्वनित्यरूपेण क्रमः संभवति लक्षणानामपि क्रमश्चेष्यत एव
लक्षणाभिव्यक्तिक्रमस्तु लक्षणासांकर्याय प्रकृते प्रदर्शितः। अधिकस्तु निर्वि-
तर्कसमापत्तिसूत्रेऽस्माभिः प्रोक्त इति दिक्। लक्षणपरिणामं परीत्यावस्था-
परिणामं परीक्षितुं धर्मगतं विभागमाह। ते लक्षिता इति। लक्षिता
व्यक्ता वर्त्तमाना इति यावत् अलक्षिता अव्यक्ता अतीतानागता इति
यावत्। तांतां बाल्ययौवनवार्धकाद्यवस्थां प्राप्नुवन्तोऽन्योन्यमन्यत्वेन भेदे-
नोच्यन्ते बालोऽयं न युवेत्यादिरूपेण। स च निर्देशो अवस्थान्तरतो
ऽवस्थाभेदादेव न तु द्रव्यभेदादित्यर्थः। तथा च पूर्वावस्थापाये अवस्था-
न्तरप्राप्तिः सिद्धा सैव चावस्थापरिणाम इति भावः। यद्यप्येतादृशोऽवस्था-
परिणामोऽनागतातीतलक्षणयोरपि पूर्वमुक्तः। तथापि वर्तमानलक्षणस्यैवा-
वस्थापरिणामः स्फुटमुपलभ्यत इत्याशयेन वर्त्तमानलक्षणमालम्ब्यैव स
उदाहृत इति। धर्मिण एकत्वेऽपि निमित्तभेदेनान्यत्वव्यवहारे दृष्टान्तमाह।

Digitized by Google

दशेति । यथा एकत्वव्यञ्जिका रेखा अङ्कविशेषो यदा बिन्दुद्वयोपरि तिष्ठति तदा शतमिदं नैकमिति व्यवह्रियते । तयोरेकबिन्दुलोपे च दशेदं न शतमिति व्यवह्रियते अवशिष्टबिन्दुस्थाने चैकत्वव्यञ्जकरेखान्तर-दाने सति एकादशेदं न दशेतीत्यर्थः । दृष्टान्तान्तरमाह । यथा चेति । उपसंहरति । पुत्रपितृभ्रातृभिन्नत्वादिनिमित्तभेदाद्द्वेधेति शेषः । अवस्थापरिणामेऽपि बोद्धारं दृष्टान्तमुदाहरति । अवस्थेति । अवस्थापरिणा-माभ्युपगमे धर्मधर्मिलक्षणावस्थानां चतुर्णामेव कौटस्थ्यापत्तिरित्यर्थः । तत्र हेतुं पृच्छति । कथमिति । उत्तरम् । अध्वनो व्यापारेण व्यवहितत्वादिति । व्यापारनिमित्तेनैव सर्ववस्तुष्वनागतादध्वनामन्योन्यं व्यवहितत्वाभ्युपग-मात् विभागाभ्युपगमात् न तु भावरूपेण धर्मलक्षणयोः सदा सत्त्वस्येष्ट-त्वादित्यर्थः । अधुना विभागस्य व्यापारनिमित्तकत्वं विवृणोति । यदा धर्म इत्यादिना यदा अतीत इत्यन्तेन । धर्मशब्दोऽत्राभिमतावस्थावाची न करोति न करिष्यतीत्यर्थः । अवस्थाधर्मयोर्विभागस्य व्यापारनिमित्तकत्वं व्यापाराभावनिमित्तकत्वेन परम्परयेति भावः । एवं च सति पूर्वधर्मातीत-तायां धर्मान्तराभिव्यक्तिरित्येवंरूपपरिणामकथनान्नित्यत्वमवस्थानामपि सर्वदा वक्तव्यं न तु विनाशः । अवस्थानां च नित्यत्वे किमप्यनित्यं न स्यादि-त्येवं धर्म्यधर्म्यादिकं सर्वं जगत् कूटस्थं स्यादिति परैर्दोष उद्धरति स्पसंहारः । नित्यत्वमात्रं न कौटस्थ्यं किं त्वेकान्तनित्यत्वमित्याशयेन पूर्वोक्तं दोषं परिहरति । नासौ दोष इति । कौटस्थ्यदोषो नास्तीत्यर्थः । गुणिनित्यत्वेऽपीति । धर्मिनित्यत्वेऽपि धर्माणां विमर्दस्य विनाशस्य कूट-स्थतो वैचित्र्यात् वैलक्षण्यादित्यर्थः । अपरिणामिनित्यतैव कौटस्थ्यं तच्च पुरुषातिरिक्ते नास्तीति भावः । गुणिनित्यत्वेऽपि गुणानां विमर्दमुदाह-रति । यथेति । यथेति न दृष्टान्ते किं तूदाहरणे । संस्थानमिति । अर्थवि-नाशेनाविनाशिनां शब्दादितन्मात्राणां पञ्चभूतरूपं संस्थानं धर्ममात्रमादि-मत् इत्यतो विनाशीत्यर्थः । एवमित्याद्यप्येवं व्याख्येयम् । लिङ्गं महत्तत्त्वम् । एवमहङ्कारादयो घटादयश्च स्वविनाशेनाविनाशिनां कारणानां धर्ममा-त्राणि विनाशीनि इति बोध्यम् । तदेतच्छ्रुत्याप्युक्तम् । 'वाचारम्भणं विकारो

नामधेयं मृत्तिकेत्येव सत्य'मिति । सत्यं विकारापेक्षया स्थिरमित्यर्थः । तस्मिन्निति । तस्मिन् धर्मे विकारसंज्ञा परिणामसंज्ञेत्यर्थः । अतो धर्मिणां परिणामित्वया न कौटस्थ्यं सुतरां तु धर्मलक्षणावस्थानामिति भावः । परिणामत्रयं विस्तरेण परीक्षितम् । इदानीं भूतेन्द्रियेषु परिणामत्रयं क्रमेण दर्शयति । तत्रेदमुदाहरणमिति । धर्मत इति । धर्मेण परिणामतइत्यर्थः । धर्मपरिणामस्य स्वरूपं दर्शयति । घटाकार इतीति । स परिणामो घटाकार इत्यर्थः । नवपुराणतामिति । नवीनतानन्तरं पुराणतां प्राप्नुवन्नित्यर्थः । धर्मादीनां सर्वेषामेवावस्थात्वाविशेषेऽपि गोबलीवर्दन्यायेनैवैषां तान्त्रिको भेदनिर्देश इत्याह । धर्मिणोऽपीति । लक्षणस्य च पुराणत्वादिकमवस्थेति प्राप्तत्वादेव नोक्तम् । एक एवेति । अवस्थामात्र एवेत्यर्थः । इदमवस्थालक्षणयोरपि धर्मत्वाद्धर्मपरिणामेऽपि गोबलीवर्दन्यायेनैव बोध्यः । एवं पदार्थान्तरेष्वपीति । भूतान्तरेषु इन्द्रियेषु प्रकृत्यादिषु चेत्यर्थः । अपरं विशेषं परिणामेषु पूर्वोक्तं स्मारयति । तएतइति । त्रयोऽपि परिणामाः धर्मिस्वरूपमनतिक्रान्ताः धर्मिण्येवानुगता अतो धर्मधर्म्यभेदात् धर्मपरिणाममात्रमेकमेवेति सामान्यतो भवति धर्मी । स एव च सर्वान् परिणामानभिप्लवते व्याप्नोति । सूत्रस्थं परिणामशब्दार्थं प्रश्नपूर्वकं व्याचष्टे । अथ कोऽयं परिणाम इति । उत्तरम् । अवस्थितस्येति । संस्कारेऽपि परिणामस्योक्तत्वात् द्रव्यस्येति धर्मिण इत्यर्थः । धर्मशब्दश्चाश्रितमात्रवचनः निवृत्त्युत्पत्ती अतीततावर्त्तमानते । ननु धर्मातिरिक्तो धर्मी नानुभूयते यस्य धर्मादिः परिणामः स्यादिति बौद्धाशङ्कायां धर्माद्विविच्य धर्मी सूत्रकारेण प्रतिपादयिष्यते । तत् सूत्रं तत्रेति पूरयित्वा पठति । तत्रेति । तत्र तेषु परिणामेषु तेषां परिणामानामिति यावत् । धर्मीति सूत्रेण सहान्वयः ।

शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी ॥ १४ ॥

अतीतवर्त्तमानानागतधर्मेष्वनुपाती वर्त्तमानरूपेणानुगतो धर्मीत्यर्थः । अव्यपदेश्येति विशेषणं धर्मधर्मिणोर्विवेकप्रदर्शनाय । तथा च वर्त्तमानत्वावर्त्तमानत्ववैधर्म्येण धर्मिणोऽधर्मस्य च विवेक इति भावः । धर्मशब्दार्थं व्याचष्टे । योग्यतेति । दग्धशक्तेरपि संग्रहाय योग्यतावच्छिन्ने-

Digitized by Google

त्वकम् । वर्त्तमानता स्वरूपयोग्यतेत्यर्थः । तेन अतीतादिसाधारण्यलाभः । एवकारो वर्त्तमानादिविशेषव्यवच्छेदार्थः शक्तित्वं चानागन्तुकत्वम् । तथा चान्वेदोहशक्तिवद्धर्मा अपि धर्मिणि यावद्द्रव्यभाविनः न हि शक्तिवियोगः शक्तिमतोऽस्ति शक्तिशक्तिमतोरभेदादिति भावः । धर्मशब्दार्थमुक्त्वा तस्य शान्तोदितोपपादनायानभिव्यक्तिदशायामपि सत्तां साधयति । स चेति । स च धर्मः शक्तिरूपः फलप्रसवात् तदानुमिताव्यक्तावस्थक इत्यर्थः । शक्त्यात्मकत्वे हि मृदेव घटस्तन्तुरेव पट इत्यादिर्भेदः फलस्य प्रसवे स्यात् अतो अनादित्वं वक्तव्यम् अनादित्वाच्चानन्तत्वमिति भावः । एकानेकत्ववैधर्म्येणापि धर्मधर्मिविवेकायाह । एकस्येति । स च धर्म एकस्य धर्मिणो ऽनेकोऽपि दृष्ट इत्यर्थः । सूत्रतात्पर्यविषयं धर्माद् धर्मिणो विवेकमुपपादयित्वा आदौ धर्माणामेवान्योन्यं विवेकं प्रतिपादयति । तत्रेति । तेषु धर्मेषु मध्ये वर्त्तमानो धर्मो धर्मान्तरेभ्यो वर्त्तमानातिरिक्तधर्मेभ्यः शान्ताव्यपदेश्यरूपेभ्यो भिद्यते विविच्यते वर्त्तमानत्वावर्त्तमानत्ववैधर्म्यादिति शेषः । वर्त्तमान इत्यस्य विवरणं स्वव्यापारमनुभवन्निति । नन्वेवं किं धर्माणामन्योन्यमत्यन्तमेव भेदो न तु भेदाभेदौ, नेत्याह । यदा त्विति । यदा तु शान्ताव्यपदेश्यावस्थायां धर्मः सामान्येनाभिव्यक्तविशेषराहित्येन धर्मिणि अनुगतो विलीनो भवति तदा धर्मिस्वरूपमात्रतया अवस्थानात् धर्म्यविभागादिति यावत् । कोऽसौ धर्मः केन व्यापारेण भिद्येत अयोगिभिर्विविच्येत धर्मस्य तल्लक्षणस्य वानुपलम्भादतस्तदानीमविभागलक्षणाभेदोऽपि भवतीत्यर्थः । एतेन च भाष्यकृता ब्रह्माद्वैतमपि वेदान्तोक्तं व्याख्यातप्रायम् । प्रलये सर्ववस्तूनां परमात्मन्यविभागात् यथाकाशेऽम्भोर्मिति । तथा च श्रुतिः । स यथा सर्वासामपां समुद्र एकायनमित्यादिना समष्टिजीवस्य प्रलयं प्रदर्श्यात्माद्वैतमाह । यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति । यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति । इदानीं शान्तोदिताव्यपदेश्यशब्दार्थं व्याचष्टे । तत्र त्रय इति । तदिदं व्याख्याय तस्य पाठक्रमात् क्रमभ्रमं परिहर्तुमाह । ते चानागतस्येति । एवं वक्ष्यमाणाव्यपदेश्येपि पाठक्रमो नादर्त्तव्य इत्याह । वर्त्तमानस्यानन्तरा अतीता इति पाठक्रमः ।

कथं त्यज्यत इत्याशयेन पृच्छति । किमर्थमिति । उत्तरम् । पूर्वपश्चिमताया अभावादिति । पूर्वपश्चिमक्रमाभावादित्यर्थः । तदेव विवृणोति । यथेति । नैवमतीतस्येति । वर्त्तमानेन सहेति शेषः । तथा चानागतावस्थायाः प्रागभावस्थानीयायां वर्त्तमानावस्थायां हेतुत्वादतीतावस्थानन्तरं वर्त्तमानावस्था न भवतीत्यर्थः । उदिताव्यपदेश्यरूपपाठक्रमत्यागेपीदमेव बीजमिति भावः । उपसंहरति । तस्मादिति । समनन्तरः पश्चिमो लक्षणभेद इति शेषः । तस्यातो ऽनागत एव वर्त्तमानस्य समनन्तरः पूर्वो भवतीत्यर्थः । एतेन सत्कार्यवादेपि पूर्वाभिव्यक्तो घटादिर्न पुनरुत्पद्यत इति सिद्धान्तः स्मर्त्तव्यः । ननु अनागतवर्त्तमानयोः कार्यकारणभाव एव किं प्रमाणमिति चेत्, शृणु । यद्यतीतस्य पुनर्वर्त्तमानता स्यात् तर्ह्यनिर्मोक्षः स्यात् । विनष्टान्तःकरणविद्याकर्मादीनां पुनरुद्भवेन मुक्तस्यापि संसारोदयसंभवात् । किं च यद्यतीतोपि घटः पुनर्वर्त्तमानः स्यात्तदा स एवायं घट इति कदाचित्प्रत्यभिज्ञायेत अतो योग्यानुपलब्ध्या अतीतव्यक्त्यनुन्मज्जनं निर्णीयत इति । अत्रानागतातीतावस्थयोः प्रागभावध्वंसरूपयोः कार्योत्पादकानुत्पादकत्ववैधर्म्यवचनात् अव्यक्तावस्थाया एवावान्तरभेदावनागतातीतते परस्परविलक्षणे इति मन्तव्यम् । नन्वेवमतीतस्य पुनरनुत्पादादतीतसत्त्वकल्पना व्यर्थेति चेत् न । लोकानतीतान्द्रक्ष्ये स्वदेह इत्यादिवाक्यशतसिद्धयोगिप्रत्यक्षान्यथानुपपत्त्या तत्सिद्धेः विषयतत्संनिकर्षयोः प्रत्यक्षहेतुत्वात् । न चातीतार्थस्मरणमेवास्त्विति वाच्यम् । पूर्वाननुभूतस्यापि योगिना दर्शनात् । ये तु योगजधर्मस्यापि संनिकर्षत्वमिच्छन्ति तेषामप्यसत्पदार्थे संनिकर्षानुपपत्तिः प्रत्यक्षं प्रति संनिकर्षनानात्वेनाननुगमेन हेतुताग्रहानुपपत्तिश्च । ज्ञानादेर्विषयतादिरूपोपि संबन्धो ऽसति न संभवति सतोरेव संबन्धदर्शनादिति । प्रत्यक्षादिषु संयोगादिरेव प्रत्यासत्तिः योगजधर्मस्त्वधर्मतमआदिप्रतिबन्धमात्रं क्रियत इति दिक् । शान्तोदितौ व्याख्यायाव्यपदेश्यं व्याख्यातुं पृच्छति । अथाव्यपदेश्याः क इति । ये व्यापारं करिष्यन्ति ते व्यपदेश्या इति वक्तुं न शक्यते अकरिष्यमाणव्यापारकस्यापि केवलानागतलक्षणस्य वस्तुनः स्वीकारादित्यतः प्रकारान्तरेणाव्यपदेश्यं लक्षयति । सर्वं सर्वात्मक-

मिति । सर्वात्मकं सर्वशक्तिकं, तथा च सर्वत्र परिणामिन्यवस्थिताः सर्वविकारजननशक्तय एवाव्यपदेश्या इत्यर्थः । ननु वर्त्तमानातीतावस्थयोरनुभवस्मरणे प्रमाणे स्तः शक्त्याख्यायां त्वनागतावस्थायां किं प्रमाणं किं वा सर्वत्र सर्वशक्तिमत्त्वे प्रमाणमित्याकाङ्क्षायामाह । यत्रोक्तमिति । अभिव्यक्तिरितीत्यन्तेनान्वयः । यत्र सर्वं सर्वशक्तिमदित्यत्रार्थे पूर्वाचार्यैरिदं वक्ष्यमाणं प्रमाणमुक्तमित्यर्थः । तत्रादौ प्रत्यक्षस्थले शक्तिमनुमापयति । जलभूम्योरिति । स्थावरेषु रसादिभिः मधुराम्लसुरभ्यसुरभिमृदुकठिनत्वादिभिर्यदनन्तरूपत्वं तज्जलपृथिव्योः परिणामनिमित्तकमित्यन्वयव्यतिरेकाभ्यां प्रत्यक्षतो दृष्टम् अतो जलभूमी स्थावरात्मिके स्थावरशक्तिमत्यौ इति भावः । शक्तिं विनापि कार्यकरणेऽतिप्रसङ्गात् तथा जङ्गमेषु यद्वैश्वरूप्यं स्थावराणां परिणामनिमित्तकं दृष्टं मनुष्यादीनां धान्यादिस्थावरकार्याणां धान्यादिविशेषैः रूपादिविशेषदर्शनात् । तथा स्थावराणां यद्वैश्वरूप्यं तज्जङ्गमानां परिणामनिमित्तकं दृष्टम् । गोमयदुग्धादिभिर्धान्यचम्पकादीनां स्थावराणां विचित्ररूपं सादिदर्शनादित्यर्थः । एवमादिदृष्टान्तैः सर्वेषु वस्तुषु सर्वविकारजननशक्तिः सिध्यतीत्याह । इत्येवमिति । यथा जलादिस्थावराद्यात्मकम् एवमन्यदपि सर्वं विकारात्मकं तच्छक्तिमत् । ननु अतीतकार्यशक्तिमत्त्वं नास्ति भाविवस्तूनामित्यत उक्तम् । जात्यनुच्छेदेनेति । यद्यप्यतीतकार्यव्यक्तय उच्छिन्नास्तथापि तज्जातीयसर्वस्यानुच्छेदादित्यर्थः । तथा च सर्वात्मकत्वं सर्वजातीयशक्तिमत्त्वमेवात्र विवक्षितमिति भावः । एतेनान्यद्रव्यस्य परिणामव्यक्तीनामन्यत्राभावेपि न नियमभङ्गः तज्जातीयव्यक्त्यन्तरजननशक्तिमत्त्वसंभवादिति । तदेतदुक्तं विष्णुपुराणे ।

यथा च पादपो मूलस्कन्धशाखादिसंयुतः ।
आदिबीजात्प्रभवति बीजान्यन्यानि वै ततः ॥
संभवन्ति ततस्तेभ्यो भवन्त्यन्ये परे द्रुमाः ।
तेपि तल्लक्षणद्रव्यकारणानुगता मुने ॥
एवमव्याकृतात्पूर्वं जायन्ते महदादयः ।
संभवन्ति सुरास्तेभ्यस्तेभ्यश्चाखिलजन्तवः ॥

Digitized by Google

इति। यदि च सर्वत्र सजातीयवस्तुजननशक्तिर्न स्वीक्रियते तदा कथमेकस्मादेव चतुर्मुखशरीरादखिलदेवदानवनरपश्वादिसमुद्भवः कथं वागस्त्यजाठराग्नेः समुद्रशोषणं कथं वा ब्रह्मविष्णुरुद्रपार्वतीशरीरादिषु विश्वरूपदर्शनम्। योगिनां च स्वशरीरमनसोरनन्ता विभूतय उपपद्येरन्, किं बहुना।

उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि॥
सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥

इत्यादिवाक्यैः सर्वप्राणिशरीरे सर्वजातीयवस्तुसत्तावचनं शक्तिरूपतां विनाऽनन्यथेनोपपद्येत। अर्जुनादिभिश्च शक्तिरूपेणावस्थितं भाविभीष्मवधादिकमेव कृष्णादिशरीरे कालात्मके दिव्यचक्षुषा दृष्टं योगिभिरतीतानागतमिवेति। एतेन स इदं सर्वं भवति तस्मात्सर्वमभवदिति श्रुतेः ब्रह्मविदः सर्वभावरूपा अन्युक्ता सिद्धिरुपपादिता। तथा जीवोपाधावपि या महैश्वर्यशक्तिमत्त्वाज्जीवानामीश्वरत्वप्रतिपादकश्रुतिस्मृतय उपपन्नाः। तथा तएते सत्या अनृतापिधानाः इति श्रुतिरपीति मन्तव्यम्। नन्वेवं सर्वत्र सर्वजातीयशक्त्यङ्गीकारे कथमेकदा न नानाविकारोत्पत्तिः कथं वा शिलाशकलादपि नाङ्कुरोत्पत्तिरस्मदादिशरीराच्चतुर्मुखादिवत् संकल्पमात्रेण नाखिलप्राण्युत्पत्तिरित्याशङ्कां परिहरति। देशकालेति। देशो भूर्लोकादिः कालः कलियुगादिराकारः संस्थानम् अवयवसंयोगविशेषः निमित्तमधर्मादिस्तैरप्रबन्धात् प्रतिबन्धात् एकदा कारणेषु न विरुद्धानामात्मभूतशक्तीनामभिव्यक्तिर्वर्त्तमानलक्षणपरिणामा इत्यर्थः। एतेन च प्रतिबन्धवचनेनान्या अपि उक्ताशङ्काः परिहृताः सहकारिविरहादित्यर्थ इत्यपि कश्चित्। तस्यापि प्रतिबन्धनिमित्तकविलम्बे पर्यवसानं 'निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्' इत्यागामिसूत्रे सर्वेषां निमित्तकारणानां स्वतन्त्रायाः प्रकृतेः परिणामेषु प्रतिबन्धनिवर्तकतामात्रावगमादिति। अतः शिलाशकलाद्याङ्कुरोत्पत्तिरवयवसंयोगविशेषस्याङ्कुरोत्पत्तिप्रतिबन्धक-

त्वात् अस्मदादिशरीराद्याखिलप्राण्युत्पत्तिरधर्मप्रतिबन्धात् । अस्माद्ग्रादिशक्तिमतश्च घटादेरस्माद्गाद्युत्पादनं विनैव प्रायशो नाशदर्शनात् सा शक्तिः समुत्पन्ना घटादिना सहैव नश्यति आधारनाशात् । कदाचिच्चहुषशरीरादीनां सर्पादिभाववत् परमेश्वरादिसंकल्पतो घटादीनामपि प्रकृत्यापूरवशात् अव्यवस्थिताखिलपरिणामो भवत्येव । तथा चोक्तं लौकिकैरपि

विषमप्यमृतं क्व चिद्भवेदमृतं वा विषमीश्वरेच्छया ।

इति । एतेन तथाज्ञानेन पुरुषार्थसमाप्त्या चित्तस्यात्यन्तिकलयकाले अनागतदुःखमपि शक्तिरूपं चित्तेन सहैव नश्यति अतो हेयं दुःखमनागतमिति सूत्रोक्तमनागतदुःखस्य हेयत्वमुपपन्नम् । एवं च सति विकाराणां क्वचित्क्षणमात्रमपि भवति अनागतातीतताद्रूपमिति वक्तव्यम् । अन्यथानागतदुःखस्य हेयत्वानुपपत्तेः । परेषामनागतदुःखस्य हानं हि सिद्धत्वान्न पुरुषार्थः । अस्मिंश्चानागतदुःखमभावितया न घटेतेति । पदार्थान् व्याख्याय समयं सूत्रार्थमाह । य एतेष्विति । अन्वयी सर्वधर्मान्वयी स्थिर इत्यर्थः । तथा चाभिव्यक्तानभिव्यक्तत्ववैधर्म्येण धर्मधर्मिणोर्विवेक इति सूत्रतात्पर्यार्थः । तदेवमन्योन्यवैधर्म्याद्धर्मिभ्योऽतिरिक्ततया धर्मो प्रसाधितः । इदानीं तदनभ्युपगमे भाष्यकारो बाधकमप्याह । यस्य त्विति । धर्ममात्रमित्यनेनैव क्षणिकत्वमप्यायातम् । अनेकक्षणस्थायित्वे हि क्षणसंबन्धरूपधर्मवत्त्वमेव पदार्थमात्रस्य स्यादिति । धर्ममात्रमित्यस्य विवरणं निरन्वयमिति, निर्धर्मिकमित्यर्थः । धर्मिनिराकरणादात्मा क्षणिकविज्ञानमित्यायातं तथा च प्रथमपादोक्तमेव दूषणमाह । तस्य भोगाभाव इति । शेषं सुगमम् ।

(शेषमग्रे)

काशीस्थराजकीयप्रधानपाठशालायां { सांख्ययोगाध्यापकस्तात्याशास्त्र्यपरनामा पटवर्धनोपाह्वो रामकृष्णशास्त्री । ज्योतिषशास्त्राध्यापकः केशवशास्त्री च ।

Digitized by Google

॥ अथ विचारमाधुकरी ॥

(*Continued from page* 280. Vol. VI.)

	व०	मा०	दि०	
दुर्लभवर्धनः	३६			
दुर्लभः	५०			
चंद्रापीडः	८	८		
तारापीडः	४	०	२४	
ललितादित्यः	२६	७	११	
कुवलयापीडः	१	०	१५	
वज्रादित्यः	७			
पृथिव्यापीडः	४	१		
संग्रामापीडः	०	०	७	
जयापीडः	२१			
ललितापीडः	१२			
संग्रामापीडः	७			
चिप्पटजयापीडः	१२			एकोननवते शांतिमागतः
अजितापीडादयः	४२			एकत्रिंशेऽवंतिवर्माभिषेकः

	व०	मा०	दि०	
	२३१	५	२७	
शालि०	७७७			अवंतिवर्माभिषेकः
	२३१	५	२७	
	५४५	६	३	
	८६			
	६३१	६	३	शालिवाहनाद् गतेषु चंद्रापीडाभिषेकः ।

न काचिदेवमनुपपत्तिः । राज्ञो राजपदेनानुग्रहश्चीनानां केवलं निरर्गलः प्रलापः । न तावता प्रमाणांतरासद्भावे चंद्रापीडो द्विचत्वारिंशे तदूर्ध्वं वा प्रमीतो नैकचत्वारिंश इति सिध्यति । अकिंचित्करो वैष एकवर्षविरोधः । राजपदेनानुग्रहप्रदर्शनाय चीनाधीश्वरेण प्रहितानां पुरुषाणामतिदीर्घस्याध्वनः क्रमणे वर्षमपि गतं स्यादिति । तथात्वे नाममात्रशेषस्य चंद्रापीडस्यानुग्रहोऽङ्गीकर्तव्यः । किलितो इति त्संगोक्तः कर्कोटस्यापभ्रंशः । तद्वंश्ये कस्मिंश्चित् प्रशासति कश्मीरान् त्संगस्यागमनमिति प्रवरसेनस्य त्संगः समानकालीन इति यत् केनचिदुक्तं तत्परास्तं वेदितव्यम् । प्रवरसेनस्य कर्कोटवंशजातत्वाभावात् साधारणत्वाच्चानेकेषां काश्मीरिकाणां सहृत्त्वस्य विहारनिर्मातृत्वस्य लिंगस्य । कर्कोटवंशस्य त्संगेन श्रुतायास्तु निंदाया अराज[25]बीजित्वं बीजम् । गोनंदस्यायतो वर्षपरिगणनं विहायावंतिवर्मणः पृष्ठतः परिगणने तत्समनंतरत्वेनासंभवद्दोषानाघ्रातत्वेन च वर्षसंख्यायाः कर्कोटानां चंद्रापीडाभिषेकवर्षनिश्चयाय । संग्रहकारेण विहिता कर्कोटानां वर्षसंख्या मेघवाहनतद्वंश्यानां च वर्षसंख्या न प्रामाण्यमर्हतः । तत्रोक्तानां वर्षाणां संकलनेऽप्रामाण्यस्य सूर्यवत्प्रकाशमानत्वात् ।

मेघवाहनः	३४	
तुंजीनः	३०	
हिरण्यः	३०	२
मातृगुप्तः	४	९
मातृगुप्तः	१०	
प्रवरसेनः	६०	
युधिष्ठिरः	३९	३
नरेंद्रादित्यः	१३	
रणादित्यः	३००	
विक्रमादित्यः	४२	
बालादित्यः	३७	४
	व० ६००	६ मा०

हर्षवर्धनप्रभृतिपराक्रमापन्हत्रपस्य कल्हणस्य त्रीणि शतानि वर्षाणि रणादित्यस्य कश्मीरसिंहासनाध्यासनोक्तिरन्यथादृष्टचरमश्रुतचरं महासाहसम् । दश वर्षाणि कश्मीरोत्पत्तिमंजसा मातृगुप्ताय प्रणिधाय प्रवरसेनः । तावंति वर्षाण्यधिकं मातृगुप्तः प्राणान् दधार । अतो व्यतिक्रांतेषु दशसु वर्षेषु क्रमेणोपचीयमानकोशदंडतेजस एव प्रवरसेनस्य युक्ताऽभ्यमित्रीणतेति तस्य षष्ठिर्दशविरहिता भवितुमर्हति । एवमत्र शकक्रन्मातृगुप्तप्रवरसेनानां समकालीनतांगीकारो बाधकाभावेन नानुपपन्नः ।

२५–चतुर्थस्य तरंगास्यांत्ये द्वे पृष्ठे द्रष्टव्ये ।

नैतच्छोधद्वयं स्वकपोलकल्पितं मंतव्यम् । कल्हणोक्त्यंतरेण सह संवादात् । प्रायस्तृतीयगोनंदादारभ्य शरदां तदा द्वे सहस्रे गते त्रिंशदधिकं च शतत्रयमित्याह प्रथमतरंगारंभे भूमिकायां कल्हणः ।

गोनंदादयः	१०१४	९ (?)	९ (?)	मासदिवसानां निश्चयाभा-
प्रतापादित्यादयः	१९२			वो लेखकादिदोषहेतुकः ।
मेघवाहनादयः	६००	१०		
दुर्लभवर्धनादयः	२६१	५	१७	
अवंतिवर्मादयः	२९३			
व०	२३६२	०	२६	

वर्षद्वयाधिक्यं कथंचित्समाधेयम् । संग्रहोक्तेन सह संवादाभावस्तु तत एव संकलनेनावगंतव्य इत्यलं पल्लवितेन । कर्कोटकवंश्यो ललितादित्यजयापीडावनेकजनपदविध्वंसकौ । कश्मीराणां गौडानां च गुप्तकालाऽपरिग्रहेण ज्योतिर्विदनुग्रहेण च शकस्य तस्य पुनः प्रचारः ।

१२—चेराणां सप्तचत्वारिंशः क्षयः ।

गतानि वर्षाणि शकेंद्रकालाद् हतानि रुद्रैर्गुणयेच्चतुर्भिः ।
नवाष्टपंचाष्टयुतानि कृत्वा विभाजयेच्छून्यशरागरामैः ॥ २० ॥

फलेन युक्तं शकभूपकालं संशोध्य षष्ट्या विषयैर्विभज्य ।
युगानि नारायणपूर्वकाणि लब्धानि शेषाः क्रमशः समाः स्युः ॥ २१ ॥

एकैकमब्देषु नवाहतेषु दत्त्वा पृथग्द्वादशकं क्रमेण ।
हृत्वा चतुर्भिर्वसुदेवताद्यान्युडूनि शेषांशकपूर्वमब्दम् ॥ २२ ॥

एते बृहस्पतिचारे बृहत्संहितायां श्लोकाः । एषामुपपत्तिः—

१७७७
× ११
१९५४७
× ४
७८१८८
+८५८९
३७५०)८६७७७(२३
७५००
११७७७
११२५०
५२७

१७७७
२३
१८००
६० = ३० अब्दानि बार्हस्पत्यानि

३० बा० बार्ह०
१२
३६०
९
४)३२४०
२७)८१०-
बा० बार्ह० ३०
{ वसुदेवताद्यान्युद्गूनि । बार्हस्पत्यानीति शेषः ।

एकं बार्हस्पत्यं वर्षं | सं० नक्षत्राणि
१ = ६० = १३५ } अतः १ बार्हस्पत्यं नक्षत्रं = ५ नक्षत्राणि

यथाष्टसप्ततः — १७७८ + २३ = $\frac{१८०१}{६०\,(५)} \times \frac{१२\,(१)}{१} = \frac{१८०१}{५} \times \frac{९}{१} = \frac{१६२०९}{५} \times \frac{१}{४}$

$= ८१०\,\frac{९}{२०}$ = उद्गूनि बार्हस्पत्यानि गतान्यष्टासप्तते ।

बार्ह० नक्ष०

|
$\frac{९}{२०} \times \frac{५}{१} = \frac{४५}{२०} = २\,\frac{१}{४}$ नक्षत्राणि प्रतिवर्षम् ।

एवं प्रतिवर्षं ($२\frac{१}{४}$) सपादे द्वे नक्षत्रे गुरुर्भुङ्क्ते ।

क्वचिदेकोनषष्ठिः क्वचिच्च षष्ठिः संवत्सराण्येकं बार्हस्पत्यं वर्षम् । तत्र मासस्थानापन्नानि युगानि द्वादश युगं मासो बार्हस्पत्यो राशिर्बार्हस्पत्य इति मार्यांतरं राशिचक्रं सप्तविंशतिनक्षत्रात्मकमिति बार्हस्पत्यमेकं नक्षत्रं पंचनक्षत्रात्मकं चेति बृहत्संहिताश्लोकनिष्कर्षः । आद्यं धनिष्ठांशमभिप्रपद्य यदा माघे बृहस्पतिरुदयं याति तदा प्रभवः प्रवर्तत इति । संवत्सरकल्पनेषा तर्हि वर्षस्य माघारंभत्वमभ्युपगच्छताम् । गुरोरुदयान्माघस्याद्यत्वम् । लघवोऽपि माघारंभवर्षवादी । माघारंभवर्षवादिनां मतानि वर्षाणीत्यादि श्लोकसंग्रहः संग्रहकारेणाचार्येण गुरुचारे धृतः । अतः शेषांशकपूर्वत्वं तस्यैव न कार्तिकारंभस्य चैत्रारंभस्य वा वर्षस्येति ज्ञेयम् ।

Digitized by Google

वराहमिहिरकृतसंग्रहश्लोकोक्तया क्रिया

बार्ह० वर्ष०	क्षयः	वर्षसंख्या	लुप्तः	सौराणाम्
१	५८			४७
२	११७	५९	३	१०७
३	१७६	५९	२६	१६७
४	२३५	५९	५५	२२७
५	२९५	६०		२८७
६	३५४	५९	२२	३४७
७	४१३	५९	४८	४०७
८	४७३	६०		४६७
९	५३२	५९	१४	५२७
१०	५९१	५९	४०	५८७
११	६५१	६०		६४७
१२	७१०	५९	७	७०७
१३	७६९	५९	३३	७६७
१४	८२८	५९	५९	८२७
१५	८८८	६०		८८७
१६	९४७	५९	२५	९४७
१७	१००६	५९	५१	१००७
१८	१०६६	६०		१०६७
१९	११२५	५९	१८	११२७
२०	११८४	५९	४४	११८७
२१	१२४४	६०		१२४७
२२	१३०३	५९	१०	१३०७
२३	१३६२	५९	३६	१३६७
२४	१४२२	६०		१४२७
२५	१४८१	५९	३	१४८७
२६	१५४०	५९	२९	१५४७
२७	१५९९	५९	५५	१६०७
२८	१६५९	६०		१६६७
२९	१७१८	५९	२१	१७२७
३०	१७७७	५९	४८	१७८७

अश्विनी प्रथमं नक्षत्रम् । आश्विनः सौरो मास आद्यः । अश्विनीनां प्राथम्यात् । बार्हस्पत्यमानेप्याश्विनस्य वर्षस्यैवं प्राथम्यं युज्यते । मेषानुग्राहके सूर्ये सौरवर्षारंभः । मेषाद्दरवत्येव गुरौ तर्हि बार्हस्पत्यवर्षारंभो युक्तः । ग्रहराजवद् ग्रहगुरुरपि मेषाद्दरवांश्चैत्रे भवति । एवमाद्यमश्विन्यंशं यदा गुरुरभिप्रपन्नस्तदा प्रभवः । अभिप्रपन्न उदितश्चाभिप्रपन्नोऽस्तमितश्चेति पक्षयोः कतरो वास्तव इति न विद्मः । पर्यालोचनया तु द्वाद-

षमासात्मकबार्हस्पत्यवर्षेऽत् षष्ठिवर्षात्मकबार्हस्पत्यमहावर्षस्यापि क्वचिद् गुरूदयेन क्वचिद् गुर्वस्तमयेन निर्वाह उत्पलोक्तया द्विधा भवितुमर्हतीत्येतावद्वृम: । ज्योतिर्विद्रामेव विषय इत्यलमप्रस्तुतप्रसंगेन । एवमष्टाचत्वारिंश: प्रभव: । तस्य वर्षस्य बार्हस्पत्याश्विनत्वानुमानात् । हर्षपराभवाच्चेराणां शक: । अत: षड्द्विकपंचद्विवादिनश्चेरा: । अभिषेकाच्छकं मन्यतां चतुर्द्विकपंचद्विवादिनां पंचाश: प्रभव: । अभिषेकश्चतुर्विंशे । पंचविंशादुक्ता गणना । केषांचिच्चतुर्विंशादेव गणनयैकपंचाश: प्रभव: । हर्षपराभव: षड्विंशे । सप्तविंशादुक्ता गणना । षड्विंशाद्गणनयैकोनपंचाश: प्रभव: । एवं क्वचित्सप्तचत्वारिंश: जय: क्वचिदष्टाचत्वारिंश: क्वचिदेकोनपंचाश: क्वचित् पंचाशश्चेति चतुर्धा शकप्रवृत्तिरिति फलितम् । चतुर्धाप्येषा शिलालेखादिषूपयुज्यते । माघारंभवर्षवादिनो वैष्णवा: । तेषामुपपन्नं युगानां श्रावणादित्वम् । विष्णुदेवताया: श्रवणाधिष्ठात्रीत्वात् । श्रावणादीनि पंच बार्हस्पत्यानि वर्षाणि श्रावणं युगम् । श्रवणो धनिष्ठा चेति द्विनक्षत्रं श्रावणं वर्षम् । प्रतिषष्ठिवर्षं गुरो: श्रवणाभिप्रपन्नस्यास्तमितत्वेन तदंतत्वं महावर्षस्य धनिष्ठाभिप्रपन्नस्य चोदयेन तदादित्वमिति यथा महावर्षं विष्णो: प्रभवति तथा तस्मिन्नेव लीयत इति वैष्णवानामेष पंथा: । कार्तिकारंभवर्षवादिनामपि श्रावणादित्वं युगानां न विरुध्यते । चैत्रारंभवर्षवादिनामपि तदविरुद्धम् । प्रगुणीभूतै र्वैष्णवैस्तत: प्राचीनमाश्विनस्य युगस्य प्राथम्यं कुंठनामवापितम् । वराहमिहिरेण वैष्णवस्यैव युगस्य प्राथम्याभिधानादाश्विनयुगप्राथम्यलोपस्यातिप्राचीनत्वं निर्विवादम् । कालेनाश्विनयुगप्राथम्ये प्रस्मरणमहावात्यया क्वापि प्रविलापिते महावर्षस्य दृष्टमपि सार्वत्रिकं षष्ठ्यात्मकत्वमवलंब्य प्राय: प्रवृत्ति: शिलालेखादिषु । एवमेकषष्ठत्वं प्रभवत्वमिति तल्लक्षणमपूर्वं वेदितव्यम् । अस्माकं पंचांगेषु विक्रमस्य नाम्नाऽभिहित: संवत्सर: शालिवाहनस्यैव शकस्य । एकांतरता तूक्तदिशा समाधातव्या । तथाहि । क्वचित् सप्तपंचाश: जय: क्वचिदष्टापंचाश: क्वचिदेकोनषष्ठ: क्वचित्षष्ठितम: । संग्रहकारेण षड्विंशोऽपि शकमध्ये गणित: । अतोऽष्टापंचाशस्य तन्मते जयत्वम् । एवं १७७६ तम: जय: १७७७ तम: जय

१७७८ तमः चयः १७७९ तमोऽपि चय इति फलितम् । पंचांगेषु १७७६ तमः चयलक्षणत्वात्क्षयः । सप्तसप्ततस्य चयीकरणं पंचांगकाराणां करा-हमिहिरानुयायप्रयासः । वस्तुतस्तु तस्य प्रभवलक्षणत्वात् प्रभवत्वमेवांगी-कर्तव्यम् । केषांचिन्मतेनाष्टाचत्वारिंशस्य क्षयत्वात् १७८८ तमस्य क्षयत्वे १७८९ तमस्य प्रभवत्वे च तदुभयलक्षणाभावेऽपि न विप्रतिपत्तिः । संवत्सरतः परिगणनं राजस्थाने प्राचीनशिलालेखादिषु दर्शनप्रभावाद् दाक्षिणात्यानामेव प्रियमासीदिति निश्चीयते ।

१७–शक्यतेऽनेन कालो गणयितुमिति शकुल् शकपदनि-ष्पत्तिः । स चासौ कालश्च नृपादिर्वेति कर्मधारयः । अस्य निर्वचनस्य सांप्रदायिकत्वे वृद्धगर्गवचनमपि प्रमाणम् ।

शकुलिति शक्लृधातोः षष्ठी । शककालनृपादयः शब्दाः श्रूयंते । तत्रोक्तरीत्या कर्मधारय एव । वृद्धगर्गेण शककालस्तस्य राज्ञश्चेत्युक्तम् । यवं-तोऽपि प्राचीनत्वं वृद्धपदं द्योतयति । अतो नास्माकं निर्वचनं स्वकपोल-कल्पितम् ।

१८–षष्ठीतत्पुरुषप्रयासस्तु केवलमज्ञानविजृंभितम् । उषव-दातस्य शकत्वेऽपि नृपत्वाऽसिद्धेः । निरुपपदस्य श्वशुराभिधानं स्वमहिमख्यापनमात्रप्रयोजनम् ।

कश्चिदाह[26] । शकस्य शकानां वा कालः शककालः । शको नाम कश्चिन्म्लेच्छगणो म्लेच्छपर्यायो वा भगस्थानशिला[27]लेखेषु प्रसिद्धो विक्र-मादित्यस्य प्रतिपक्षत्वेन च लोकानां विदितः । तत्त्वेन प्रसिद्धस्योषवदा-तस्य पुष्करेऽभिषेकात् तेषां वाऽऽगमनाच्छककालस्य गुप्तकालवत् प्रवृत्तिः । अत्रोच्यते । पुष्करेऽभिषेकस्तीर्थाभिषेकस्तीर्थस्नानमिति यावच्च राज्याभि-

२६–पृ० २३३, Vol. VIII, Jour. B. B. R. A. S. and Nasik Inscription (July 1853, Jour B. B. R. A.S.).

२७–भगस्थानं "बेहिस्तून" (Behistun) इत्यपभ्रष्टम् ।

केन । उषवदातस्य नृपत्वं तावत् संदिग्धम् । प्रागवरनिर्देशात् । यस्तु वा श्वशुरश्चायम् । न तावता तस्य नृपत्वं सिध्यति । भट्टारकस्तु क्षहरातो यस्य क्षत्रपो नहपानः । क्षहरातनहपानेत्येकस्यैव नामपरंपरेत्यवसत्यावहेयम् । क्षत्रपो वा क्षत्रपो वा न सच्छत्रो भवितुमर्हति । तस्य क्षत्रपस्येव चक्रधारत्वं सर्वत्र सुप्रसिद्धम् । न ह्यनुषवदातेन राजपदमंगीकृतम् । लेखेषु तु क्षत्रपेति प्रायः श्रवणम् । क्वचिद् वर्षाभिधानं भट्टारकस्य पूर्वतनस्येव भट्टारकपदवाच्यस्य श्वशुरस्य तत्पुत्र्या वा भवितुमर्हति । उषवदातो लेखेषु निरुपपदः प्रसिद्धः । सर्वत्र सभट्टारकश्वशुराभिधानमपि तस्याऽस्वातंत्र्येऽधस्तनत्वे च प्रमाणम् । न हि राजा कश्चित् कस्यचिन्मंडलेश्वरस्य जामातृत्वेनात्मानं विख्यातिं गमयति । प्राकृत एव प्रसिद्धस्य राज्ञो मंडलेश्वरस्यात्मश्वशुरत्वं कंठरवेणोद्घोषयेत् ।

१७—तेषु तेषु लयनकरणं लेखकादीनामिव कल्याणादीनां पुण्यक्षेत्रादिषु घट्टादिकरणमिव वा । एवमप्यसंतोषे कालस्य स्तुत्युपरतया षष्ठीतत्पुरुषोऽस्तु ।

ननु तेषु तेषु स्थानेषूषवदातेन लयनानि कृतानि । बाढम् । कृतानि । न तु तानि कृतानि तस्य राजत्वं द्योतयितुमलम् । यत्र यत्रोषवदातेन लयनानि कृतानि तत्र तत्र लेखकैरपि लयनानि कृतानि । न केवलं लेखकैः स्वर्णकारादिभिरपि । न तावता तेषां लेखकानां वा स्वर्णकारादीनां वा राजत्वं सिध्यति । अराजपदभाजां नहपानादीनां राजांतराणां च बौद्धानामबौद्धानां वा लयनकरणेऽपि तावता न तज्जनपदशासकत्वं कल्प्यम् । अन्यथैव सत्कृत्यकरणं वाऽकिंचित्करम् । अहल्यया पुण्यक्षेत्रेषु काश्यादिषु घट्टाः कृताः । न तावताऽहल्यायाः तज्जनपदशासित्वं भवति । कृष्णगिरौ केषांचित् पल्हवानाम्[28]अपि द्विचा लेखाः संति । न तावता तत्र तेषां राज्यानुमानम् । बुद्धगयायां लेखसत्त्वेन चीना[29]नां राज्यं न केनाप्यवगतम् ।

२८–पृ· २६५–२६८, Vol. IX, Indian Antiquary.

२९–पृ· ३३९. Vol. X, Indian Antiquary.

यते। धर्मैकधना[३०]नां मोसुलानां शकप्रचारस्तत्प्रायत्वाज्जनपदानामधिकारिणां चाम्लशकप्रचारस्त्वांग्लीभूतेष्वेवेति द्वयमप्यनुदाहरणम् । एवं सत्यपि षष्ठीतत्पुरुषव्यसनं वेच्छकस्य शकानां वा कालो मृत्युर्विक्रमस्य शकारित्वेन काश्मीरादिष्वपि सुप्रसिद्धत्वेन तथात्वादित्यस्तु । प्रौढिवाद एषः । वास्तवं तु निर्वचनं प्रागुक्तं शकातेरेव । अन्यथा युधिष्ठिरादीनां काले शकत्वाऽयोगात् । शकपदस्य म्लेच्छवाचकत्वे न विवदामहे केवलं शककाल इत्यत्र शकपदं न तदर्थकमिति ब्रूमः । हूनो हूणो वा नासिकादिलेखेषु श्रूयते । न स तत्र म्लेच्छवाचको भवितुमर्हति । स होनार्थकोऽवगंतव्यः । न तावता होनो हूनो हूणो वा कश्चिद् रूप्यविशेषो हूणाख्यान्म्लेच्छगणादस्माभिः स्वरूपतो लब्धत्वात्तन्नामत्वेन व्यवहृतो हूणराज्यं वाऽऽरामेश्वरमासीदिति वक्तव्यम् । होनो हूनो हूण इति वा सद्दयोः परस्परादेशत्वस्य सर्वसंमतत्वात् सुवर्णशब्दस्यापभ्रंशः । अत्रापि हूणशब्दस्य म्लेच्छगणवाचकत्वे न विवादः। केवलं रूप्यविशेषस्य हूनस्य हूणस्य होनस्य वा म्लेच्छगणवाचकेन शब्देन न कोऽपि संबंध इत्येतावद् ब्रूमः। अथाह कश्चित् । गौतमीपुत्रः प्रतिष्ठाना[३१]धिपतिः । तस्य लेखे खगरातवंशनिर्मूलनं श्रूयते । खगरात इति छहरात्रस्यापभ्रंशः । स शकः । ततः शालिवाहनशकमवनेति । अत्रोच्यते । गौतमीपुत्रस्य प्रतिष्ठानाधिपतित्वं तावदसिद्धम् । नास्त्याख्यायिका तद्बोधिनी । नापि पुराणेषु तत्प्रतिपादकं वचनम् । पुराणेषु प्रत्युतांध्रस्य गौतमीपुत्रस्य मगधाधिपतित्वं श्रूयते । न तस्य प्रतिष्ठानाधिपतित्वस्य कश्चिच्छिलालेखः साक्षी । नापि पाश्चात्यभूगोलकारेण तत् कक्षीकृतम् । तन्मतेन प्रतिष्ठानाधिपतिः पुलोमा । नापि गौतमीपुत्रेण दक्षिणादिगधिपतित्वमात्मन उपवर्णितम् । आत्मनः शासनं तैर्गृहीतमित्येतावल्लेखेऽभिहितम् । न तावता स तद्राजेत्यभिहितं भवति । आत्मनो नर्मदामुत्तरेणैव प्रायो जनपदानां राजत्वं लेखे गौतमीपुत्रेणोक्तम् । राजा पुलोमा पट्टाव्यपरनामा । राजराजो गौतमीपुत्रः । तैनयोः

३०-पृ. ७३-७४, Vol. X, Jour. B. B. R. A. S.

३१-पृ. ४१, July 1853, Jour. B. B. R. A. S.

पितापुत्रत्वकल्पना न्याय्या । एतादृशस्य जीवतो राज्यं शासतश्च पितु-
रुपमर्दस्यादृष्टचरत्वात् । नापि पुलोम्नः करदत्वेन संभावना युक्ता । गौत-
मीपुत्रनामविरहितानामपि तल्लेखानां सद्भावात् । किमित्यस्मिन्नेव लेखे
द्वयोः सहभावः । अस्मिन्नेव लेखे गौतमीपुत्रेण शातवाहनकुलयशः प्रति-
ष्ठापनकरत्वं स्वस्योपपादितम् । शातवाहनः शालिवाहन इत्यनर्थांतरम् ।
कुलनामैतत् । केनापि राष्ट्रकूटेनान्येन वा वात्यायित्वाक्रान्तस्य शालिवा-
हनवंशस्य तस्य पुनः प्रतिष्ठापने मैत्रीमापन्नेन गौतमीपुत्रेण यत्नः कृतः
स्यात् । तस्य लेखो विजृम्भितमिति मन्महे । अतो लेख एतस्मिन् द्वयोः
सहभावः प्रतिष्ठानाधिपतेश्च संवत्सराभिधानम् । शालिवाहनशककर्तुः
शकारित्वं तु महाराष्ट्राणामपूर्वो लाभः । गौतमीपुत्रस्य शातकर्णित्वम-
पि श्रूयतेऽवंतिराजत्वमपि श्रूयते । रुद्रदामोऽप्यवंतिराजो निर्जितशातक-
र्णिरिति सुदर्शनसरः शिलालेख आह । प्रतिष्ठानाधिपतिः पुलोमाऽवंति-
पतिश्चष्टनश्चेति द्वौ पाश्चात्यभूगोलकारेणोक्तौ । पाश्चात्यभूगोलकारौ
द्वौ । तयोः पूर्वः शा[३२]लिवाहनशकस्य प्रथमशतके पादशेषेऽर्धशेषे वाऽपरस्तु
गतमात्रे प्रथमे शतके पादशेषे वा स्वप्रबंधं निबबंधेत्याहुः । रुद्रदामा द्विः
शातकर्णिं जिगायावंत्यादींश्चोत्सादयामासेति गीयते । राजराजो गौत-
मीपुत्रोऽपि महापराक्रमीति क्षहरातवंशनिर्मूलनकरश्चेति रुद्रदामगौत-
मीपुत्रयोः समानकालीनता न त्वादरणीया । गौतमीपुत्रो यज्ञश्रीशातकर्णी
श्रीयज्ञशातकर्णीति श्रूयते । सुदर्शनशिलालेखे तादृशविशेषणाभावात्तत्र-
त्यशातकर्णेरन्यत्वं युक्तम् । रुद्रदामसमानकालीनः शातकर्णिर्गौतमीपुत्र-
स्य पूर्वजः कृष्णाख्यस्य पुराणोक्तः पुत्रः स्यात् । न संज्ञाऽभेदात्संज्ञ्यभेद
इति पाश्चात्यभूगोलकारोक्तः पुलोमा प्रतिष्ठानाधिपतिर्भिन्न एव भवितु-
मर्हति । क्षहरातवंशः शाहिवंशेन कथं संबद्ध आसीदिति विस्पष्टं न विज्ञा-
यते । शाहिवंश एव क्षहरातवंशत्वेनाभिमतो लेखकारस्येत्यत्र तु न काचिद्
विप्रतिपत्तिरित्यलमतिप्रसंगेन ।

(शेषमग्रे)

३२—पृ०२३६-२३८ Vol. VIII, Jour. B. B. R. A. S.

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 242. Vol. VI.)

अय वय पय मय चय तय णय गतौ ॥ इत आरभ्य रेवत्यन्ता उदात्ता अनुदात्तेतः । अयते । अयां चक्रे । 'दयायासश्चे'त्याम् । अयिता । अयिष्यते । अयताम् । आयत । अयेत । आशिषि । अयिषीष्ट । आयिष्यत । अस्य लुङ्लिटोर्ध्वमि 'विभाषेट' इति मूर्द्धन्यविकल्प उदाहार्यः । एवमन्येष्वपि यान्तेषु । आयियिषते । आययति । माभवानयियत् । आयः । अयः । घञचौ । चलनार्थत्वेपि नास्य युजस्ति, 'न य'इति यान्तानां तन्निषेधात् । तेन अयितेति सामान्यस्तृन् भवति । प्लायते । 'उपसर्गस्यायतौ'विति उपसर्गस्यस्य रेफस्यायतिपरत्वाल्लत्वम् । नन्वेकादेशस्य स्थानिवत्त्वाद्रेफस्यायतिः परो न भवति । सत्यम् । येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यादिति एकेन वर्णेन व्यवधानमाश्रयिष्यते । न चास्ति पूर्वत्रासिद्धे न स्थानिवदिति तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति तस्य सापवादत्वात् । एवं च पल्ययत इत्यत्रापि लत्वं भवति । न चानन्तरो निर्दुरो रेफोवकाश इति वाच्यम् । तर्हि लाघवार्थं तावेवोपाददीत । येषामुपसर्गविशेषणमयतिग्रहणम् अयतिपरस्योपसर्गस्य यो रेफ इति तेषां नैवास्य चोद्यस्यावसरः, किं तु प्रत्यय इत्यत्रापि लत्वं स्यात् । भवितव्यमेवेति तेषामेव केचित्, अपरे तु प्रतिपूर्वस्यायतेर्नैव प्रयोग इति तेषां प्रत्ययशब्दः प्रतिपूर्वादिणोचि, प्रत्ययितशब्दोप्यस्मादेव तारकादित्वादितचि । निरयते । दुरयते । इति प्रयोगस्ससान्तयोर्द्रष्टव्यः । नह्यत्र लत्वप्रसङ्गः, ससजुषो रित्यस्यासिद्धत्वात् । वयते । ववये । वादित्वान्नैत्त्वाभ्यासलोपौ । वयितेत्यादि पूर्ववत् । विवयिषते । वावय्यते । वावयीति । वावति । वावतः । वावयति । वावयीषि । वावसि । वावथः । वावथ । वावयीमि । वाव्यामि । वावावः । वावामः । वलि यलोपः । यङादौ तु कृते लोपे 'अतो दीर्घो यञी'ति दीर्घः । झौ यलोपात्पूर्वं नित्यत्वाद्दद्वावे वल्परत्वाभावाद्यलोपाभावः, लोटि सेर्हिभावात् परत्वात्पूर्वं वलि लोपे तदनन्तरं हिरादेशः तस्येत्रा'तो हे'रिति

लुकि वावेति भवति । पूर्वं तु द्विभावे समाश्रित्य वलि लोपे सन्निपातप-रिभाषया हेर्लुङ् न स्यात्, उत्तमे तु नित्यत्वादाटि यलोपाप्रसङ्गात् वावया-नीत्यादि भवति, लङि तिप्सिपोः परमपि हल्ङ्यादिलोपं यलोपो बाधत इति अवावत्, अवाव, इति भवति । इदं च व्योर्वलि लोप इत्यनुवादपूर्वं वि-धेयं निर्दिश्य तस्य पूर्वनिर्देशेन विद्धन्तराद्बलीयस्त्वज्ञापनादवगम्यते, यत्तु तत्र वृत्तावुक्तं पूर्वनिर्देशस्य फलं वेरपृक्तलोपात्पूर्वं वलि लोप इति, तद्विध्यन्त-रे फलवचनम् । आहुश्चैवं तत्र व्याख्यातारः । यद्वा प्रकृतिविशेषं प्रत्ययविशेषं चापेक्षमाणाद्धल्ङ्यादिलोपात् वर्णमात्रापेक्षत्वादन्तरङ्गो वलि लोप इति पूर्वमेवासावत्र प्रवर्त्तिष्यते । पयते । पेये । पयिता । मयते । मेये । मयिता । चयते । चेये । चयिता । तयते । तेये । तयिता । नयते । नेये । नयिते-त्यादि । चयिवत् । नयतेर्णोपदेशत्वात् प्रणायत इति णत्वं भवति । अत्र णयीति मूर्द्धन्योष्मादिरपि क्व चित् कोशे पठ्यते मैत्रेयादिभिस्तु न पठ्यते । नयादीनामपि अयिवत् ‘न य’ इति युञ्निषेधात् तच्छीलादौ तृन्नेव । णय रक्षणे चेति मैत्रेयः । तय णयेत्येके । अयादीनां क्वौ वलि लोपे तुकि यत्, वत्, इत्यादि भवति । अतो लोपस्तु न भवति, आर्द्धधातु-कोपदेशे यदकारान्तं तस्य तद्विधानात् ॥ ४७५ ॥

दय दानगतिरक्षणहिंसादानेषु ॥ सर्पिषो दयते । सर्पिर्दयते । ‘अधीगर्थदयेशां कर्मणी’ति कर्मणि शेषे षष्ठी । अशेषे तु द्वितीयैव । दयां चक्रे । ‘दयायासश्चे’त्याम् । दयितेत्यादि । अयिवत् । दयालुः । ‘स्पृहिगृहिप-तिदयिनिद्रातन्द्राश्रद्धाभ्य आलुजि’ति ताच्छीलिक आलुच्, दया । दयतिर्भि-दादिषु द्रष्टव्यः ॥ ४७६ ॥

रय गतौ ॥ रयत इत्यादि वयिवत् । रायः घञ् । रयस्तु अचि ॥ ४७७ ॥

ऊयी तन्तुसंताने ॥ ऊयते । ऊयां चक्रे । इजादेश्च गुरुमत इत्याम् । ऊयितेत्यादि । ऊययति । मा भवानूयियत् । द्विर्वचनात्पूर्वमुपधाह्रस्वत्वमि-त्युक्तम् । ऊयित्वा, ऊतः, ऊतवान् । ईदित्त्वान्निष्ठायामनिट्त्वम् । ऊतिः । बाहुलकात् क्तिन् । ऊतियूतीति निपातनमञ्चतेः क्तिनि उदात्तार्थमिति हरदत्तः ॥ ४७८ ॥

पूयी विशरणे दुर्गन्धे च ॥ पूयते । पुपूये । पूयितेत्यादि । पुपूयिषते । पोपूय्यते । पोपूयीति । पोपूति । पोपूतः । इत्यादि वयतिवत् । तसादेर्ङित्त्वाच्च गुणः । पूययति । अपूपुयत् । पूयित्वा । पूतः । पूतवान् । ईदित्त्वान्निष्ठायामनिट्त्वम् । पूतिः । गन्धस्येदुत्पूतीत्यादिनिर्देशात् क्तिन् । पूयः । पचाद्यच् ॥ ४७९ ॥

क्नूयी शब्दे उन्दे च ॥ क्नूयते । चुक्नूये । क्नूयितेत्यादि पूयतिवत् । क्नोपयति 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णावि'ति पुकि यलोपे । 'पुगन्तलघूपधस्य चे'ति गुणः । अचुक्नुपत् । कृतेपि गुणे णौ चङीतिह्रस्वः । क्नूयीति सानुबन्धकस्य निर्द्देशाद्यङ्लुकि चोक्नूयीतीति भवति । चेलक्नोपं वृष्टो देवः'चेले क्नोपे'रिति णयन्तादस्मात् कर्मणि चेलउपपदे वर्षप्रमाणे गम्यमाने णमुल् यावता वर्षेण चेलं क्नूप्यते तावद् वृष्ट इत्यर्थः । चेलइत्यर्थग्रहणमिति वस्त्रक्नोपमित्याद्यपि भवति । अस्यापीदित्त्वान्निष्ठायामनिट्त्वम् ॥ ४८० ॥

क्ष्मायी शब्दे विधूनने ॥ क्ष्मायते । चक्ष्माये । क्ष्मायितेत्यादि । चिक्ष्मायिषते । चाक्ष्माय्यते । चाक्ष्मायीति । चाक्ष्माति । तसादौ क्ङिति सार्वधातुके 'श्नाभ्यास्तयोरातः' 'ईहल्यघोरि'तीत्वम् । चाक्ष्मीत इत्यादि । लोटि तातङ्पक्षे तस्य ङित्त्वात् चाक्ष्मीतादिति भवति । हेरप्पित्त्वात् ङित्त्वात् चाक्ष्मीहि । लङि नित्यत्वाद्यलोपात्पूर्वं सिजभ्यस्तेति जुसभावो भवति । अचाक्ष्मायीत् । अचाक्ष्मीताम् । अचाक्ष्मयुरित्यादि । क्ष्मापयति । अचिक्ष्मपत् । अर्तिह्रीत्यादिना पुक् । अस्यापि सानुबन्धकस्य निर्द्देशात् यङ्लुकि चाक्ष्माययतीति । ईदित्त्वान्निष्ठायां क्ष्मातः । क्ष्मातवान् ॥ ४८१ ॥

स्फायी ओप्यायी वृद्धौ ॥ स्फायते । पस्फाये । अभ्यासे । 'शर्पूर्वाः खय' इति खयः शेषः । स्फायितेत्यादि क्ष्मायिवत् । णौ 'स्फायो व'इति यकारस्य वकारे स्फावयति । अपिस्फवदिति भवति, स्फीतः, स्फीतवान् 'स्फायः स्फी निष्ठायामि'ति स्फीभावः । वत्वस्फीभावौ प्रकृतिग्रहणन्यायेन यङ्लुग्यपि भवत इति पास्फाययति । स्फीतः । स्फीतवानिति भवति । स्फायतरति

स्फाः। क्विपि वलि लोपः। अयं वेरपृक्तलोपात्पूर्वं भवतीति वयतौ प्रतिपादितम्। स्फाश्च तदण्डं च स्फाण्डम्। एवं स्फान्त्रम्। वृद्धाण्डमुच्यते। स्फारः। स्फायितञ्चीत्यादिना रक्। प्यायते। पिप्ये। पिप्यिषे। पिप्याथे। पिप्यिध्वे। पिप्यिवहे। परत्वात् 'लिड्यङोश्च' इति प्यायः पीभावः। पुनः प्रसङ्गविज्ञानात् पीशब्दस्य द्विर्वचनम्। एरनेकाच इत्यजादौ यण्। प्यायितेत्यादि पूर्ववत्। लुङि 'दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्या'मिति कर्त्तरि तशब्दे वा चिणि अप्यायि अप्यायिष्टेति भवति। यङि लिड्वत् पीभावे पेपीयत इत्यादि। यङ्लुकि तु पाप्याति। पाप्यात इत्यादि पूर्ववत्। पीनः पीनवान्। 'प्यायः पी निष्ठाया'मिति वा पीभावात्। इयं च व्यवस्थितविभाषेति अनुपसृष्टे नित्यम् उपसृष्टे तु नैव। आप्यानः प्रप्यानश्चन्द्रमा इति। चाङ्पूर्वादन्धूधसोर्भवत्येव। आपीनोऽन्धुः आपीनमूध इति। 'ओदितश्चे'ति निष्ठानत्वम्। ईदित्त्वं पीभावाभावे निष्ठाया इण्निवृत्त्यर्थम्। ईदितोऽनन्तराया निष्ठाया नत्वार्थमिदमोदित्त्वम्। कृते पीभावे स्वरान्तत्वादनिट्स्वरान्त इत्यनिट्त्वे सावकाश इति पीभाव इण्निवृत्तेर्न ज्ञापकः। स्फायेस्त्वीदित्त्वे स्फीभावस्य नित्यत्वात् स्वरान्तत्वादनिट्त्वे सिद्धे अनुदात्तत्त्वमात्रं फलम्। न च सत्यपीटि सवर्णदीर्घत्वेनेदमेव रूपमिति मन्तव्यम्। परत्वादियङ्प्रसङ्गात्॥ ४८३॥

तायृ संतानपालनयोः॥ संतानः प्रबन्धः। तायते। तताये। तायितेत्यादि पूर्ववत्। लुङि दीपजनेत्यादिना कर्त्तरि तशब्दे वा चिणि अतायि अतायिष्टेति भवति। ऋदित्त्वाण्णौ चङ्युपधाया ह्रस्वाभावात् अततायत्। ऋनीदित्त्वान्निष्ठायां तायितः तायितवान्॥ ४८४॥

शल चलनसंवरणयोः॥ शलते। शेले। शलिता। शलिष्यते। शलताम्। अशलत। शलेत। आशिषि शलिषीष्ट। अशलिष्ट। शाशल्यते। शाशलीति। शाशल्ति। लङि तिप्सिपोर्हल्ङ्यादिलोपः। अशाशल्। शालयति। अशीशलत्। शलित्वा। शलितः। शलभः। कृशृशलिभ्यो ऽभच्। शल्कम्। इण्भीकापाशल्यतिमर्चिभ्यः कन्। शलाका। शलिपतिपटिभ्यो णिदित्याकः। शालूकः। शलिमण्डिभ्यामूकणित्यूकण्। शललं, कलप्रत्ययश्चेत्यत्र प्रत्ययस्य पूर्वनिर्दे-

शस्य धात्वन्तरादप्ययं भवतीति सूचनार्थत्वात् कुण्डलादिवत् कलः प्रत्ययः। शलली। पिप्पल्यादित्वात् ङीष् जातिलक्षणो वा। शलालुः। गन्धद्रव्यविशेषः, शलालुः पण्यं व्यवहार्यमस्य शलालुकः। 'शलालुनोऽन्यतरस्या'मिति प्रथमान्तादस्य पण्यमित्यर्थे ष्ठन्, षित्वात् स्त्रियां शलालुकी। अन्यतरस्याग्रहणात् 'प्राग्वहतेष्ठगि'ति ठकि 'किति चे'त्यादिवृद्धौ शालालुकः। उभयोरपि ठशब्दयोरुकः परत्वात् 'इसुसुक्तान्तात्क' इति कादेशः। अत एव शलालुन इति निर्देशादालुप्रत्ययः। शालेति शलतावुक्तम्। अयं कथया ज्वलादौ परस्मैपदी ॥ ४८५ ॥

वल वल्ल संवरणे संचरणे च ॥ वलते। ववले। वलितेत्यादि शलिवत्। णौ घटादित्वाद्वलयतीति। वालः। 'हलश्चे'ति करणे घञ्। वारः। वालमूलेत्यादिना पक्षे रः। वलिः। वली। इनन्तात् 'कृदिकारादक्तिन' इति वा ङीष्। वलिनः। पामादित्वान्मत्वर्थे नः। वलिभः। 'तुन्दिवलिवटेर्भः' अयमपि मत्वर्थीयः। वलिः। वलेर्वलश्चाहिरण्य इति इन्प्रत्यये वलादेशः। वलभी। बाहुलकादभचि पिप्पल्यादिदर्शनात् ङीष्। वलयः। वलिमलितनिभ्यः कयचिति कयन्। वल्गुः। 'वलेर्गुक्चे'ति उक्प्रत्ययो गुगागमश्च। वलाकः। 'बलाकादयश्चे' त्याकनन्तो निपातितः। वलाकाया अपत्यं वालाकिः। 'बाह्वादिभ्यश्चे'तीञ्प्रत्ययः। अत्र पाठात् जातिलक्षणङीषं बाधित्वा टाप् अजादित्वाद्वा। वलाका अस्य सन्तीति वलाकी 'व्रीह्यादिभ्यश्चे'ति मत्वर्थ इनिः। वलिकं लिप्रम्। 'अलीकादयश्चे'तीकन्। वल्मीके बाहुलकान्मुडागमः। वल्लते। ववल्ले। वल्लितेत्यादि। यङ्लुकि तिप्सिपोर्हल्ङ्यादिलोपे संयोगान्तलोपे च वावल्। वल्लभः। 'शासिवल्लिभ्यां चे' त्यभच्। वल्लरी। बाहुलकादरप्रत्यये पिप्पल्यादिदर्शनात् ङीष्। वल्लिः वल्ली इति कृदिकारत्वाद्वा ङीष्। वल्लूरं शुष्कमांसम्। खर्जपिञ्जादिभ्य ऊरोलचाविति ऊरः ॥ ४८६ ॥

मल मल्ल धारणे ॥ मलते। मेले। मलिता। मल्लत इत्यादि पूर्ववत्। माला। अकर्तरि च कारके इति कर्मणि घञ्। लस्येत्यत्र भाष्यकैयटयोर्माहेऽयं लप्रत्यय उक्तः। माली व्रीह्यादित्वादिनिः। मालभारी। 'इष्टकेषीकामा-

लानां चिततूलभारीष्वि'ति यथासंख्यान्मालाया भारिण्युत्तरपदे ह्रस्वः । केचित्तु तत्र हारीति पठन्ति । माल्यम् । 'ऋहलोर्ण्यत्' । मलयः । वलिमलीति कयन् । शरीरं धार्यतइति मलम् । अच् । मृजेर्वा व्युत्पादयिष्यते । मलिनः मलीमसः । 'ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः' इतीनच्चीमसजन्तौ मत्वर्थे निपातितौ । केन मल्यतइति कमलम् । घञर्थे कविधानमिति कः, कर्तृकरणे कृतेति समासः । कमेर्वा कलप्रत्यये व्युत्पादनीयः । आमलकी । 'कुन् शिल्पिसंज्ञयोरपूर्वस्यापि' इति क्वुनि गौरादित्वान् ङीष् । मल्लः । अच्प्रत्ययः । मल्लिका । संज्ञायामिति स्त्रियां ण्वुन् । मल्लकः । क्वुन् । मलं मल्लते धारयतीति मलमल्लं कौपीनम् ॥ ४८९ ॥

भल भल्ल परिभाषणहिंसादानेषु ॥ भलते । भल्लतइत्यादि । भालम् । अकर्तरि च कारकइति घञ् । भां दीप्तिं लातीति वा भालः भलूकः श्वापदः 'उलूकादयश्चे'ति ऊकनन्तो निपातितः । भल्लूकोऽप्युलूकादिः । भल्यते हिंस्यतेऽनेनेति भल्लः । पुंसि संज्ञायामिति घः 'हलश्चे'ति घञ् वा । भल्ली 'जातेरस्त्रीविषयादयोपधादि'ति ङीष् । अयमाभण्डने चुरादिः ॥ ४९१ ॥

कल शब्दसंख्यानयोः ॥ कलतइत्यादि । कालः । अकर्त्तरि च कारकइति घञ् । काले भवं काल्यम् । 'दिगादिभ्यो यदि'ति सप्तम्यन्ताद्भवार्थे यत् । कालः प्राप्तोऽस्य काल्य उत्सवः 'कालाद्यदि'ति प्रथमान्तादस्य प्राप्तमित्यर्थे यत् । अनित्यो वर्णः कालेन रक्तो वा कालकः । 'कालाच्चे'ति अनित्ये वर्णे रक्ते च वर्त्तमानात्स्वार्थे कन् । काली । जानपदेत्यादिना वर्णे ङीष् । अन्यत्र काला कालिका संज्ञायां कनि 'केऽण'इति ह्रस्वः । कलिकम् । सलिकलीति इलच् । कलभः । कृशृसलिकलीत्यभच् । कलिः । इनितीन्प्रत्ययः । कलिना दृष्टं साम कालेयम् । 'कलेर्ढगि'ति तृतीयान्ताद् दृष्टं सामेत्यर्थे ढक्, आयनेयीत्यादिनेयादेशः । सर्वत्राग्निकलिभ्यां ढग्वक्तव्य इत्युक्तत्वात् सर्वेष्वर्थेष्वयं ढग्भवति । कलिका । संज्ञायां क्वुन् प्रत्ययः । कलिं गृह्णाति कलयति । मुण्डमिश्रेत्यादिना गृह्णात्यर्थे णिचि णाविष्ठवदिति टिलोपः । अत्र हलिकल्योरदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थमिति णिसंनियोगेनेकारस्याकारविधानादग्लोपित्वाद् ह्रस्वाभावात् अचकलदिति भवति । अत्र यद्यपीकारोऽप्यणेव

तथापि तस्य टेरिति लोपात्परत्वाद्वृद्धौ ऐकारे तस्य चायादेशात्पूर्वं परत्वाट्टिलोपे सकृदग्लोपि न स्यात् कृते त्वस्वे वृद्धौ कृतायामप्यग्लोप्येव । ननु च वृद्ध्यात्वे पुकि च तत्सहितस्य टिलोपेन भाव्यमित्यनग्लोपित्वात् कथमग्लोपः । नैष दोषः । तत्राग्लोपिग्रहणस्य समुदायार्थत्वात् अन्यथा मालामाख्यत् अममालदित्यादौ केवलस्याप्यको लोपे अचः परस्मिन्निति तस्य स्थानिवत्त्वात् अभ्यासस्य चङ्परणिपरत्वाभावादेव सन्वद्भावो न भविष्यतीति किमग्लोपिग्रहणेन । न च मन्तव्यं सर्वत्राभ्यासस्य चङ्परणिपरत्वायोगादव्यवधानेन भाव्यमेवेत्यको प्राप्तेन स्थानिवद्भावेन व्यवधानेऽपि तदिति तत्रैव निषेधार्थमेतद्भविष्यतीति । येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यादिति न्यायेनावर्जनीयोत्तरव्यञ्जनव्यवधानस्यैवाश्रयणं युक्तम् । अयं क्षपे चुरादिः । गतिसंख्यानयोः कथादिः ॥ ४९२ ॥

कल्ल अव्यक्ते शब्दे ॥ कल्लत इत्यादि । कल्लोलः । किशोरादित्वादोरप्रत्ययः कपिलकादित्वाल्लत्वम् । अशब्द इति स्वामी । अशब्दस्तूष्णींभाव इति च ॥ ४९३ ॥

तेवृ देवृ देवने ॥ तेवते । तेविता । तेविष्यते । तेवताम् । अतेवत । तेवेत । तेविषीष्ट । अतेविष्यत इत्यादि । तितेविषते । तेतेव्यते । तेवयति । अतितेवत् । ऋदित्वान्नोपधाह्रस्वः । वकारान्तानामूठ्भाविनां भाषायां यङ्लुङ्नास्ति च्छ्वोः शूडित्यत्र क्विद्ग्रहणानुवृत्त्यननुवृत्ती प्रस्तुत्य तत्र त्वेतावानेव विशेषः अनुवर्तमाने क्विद्ग्रहणे छ्वः षत्वं वक्तव्यमिति भाष्यउक्तत्वात् । छ्वः षत्वमित्यक्तिति झलादौ षत्वार्थं व्रश्चभ्रस्जेत्यत्र छग्रहणं कर्तव्यं क्विदधिकाराभावे तु झलादिमात्रे छ्वः षत्वं शकारान्तत्वादेव सिद्धमित्यर्थः । यदि च वकारान्तानामपि यङ्लुक् स्यात्तत्रापि क्विद्ग्रहणानुवृत्तौ ऊठा न भाव्यमन्यदा तु भाव्यमिति विशेषस्य विद्यमानत्वात् तत्रैतावान् विशेष इत्यादि भाष्यं कथं संगच्छेत स्पष्टं चैतत्तत्र कैयटे । देवत इत्यादि पूर्ववत् । आदेवकः । 'देविक्रुशोश्चोपसर्गे' इति तच्छीलादौ वुन् । देवरः । अर्तिकमिभूमिवाशिभ्यश्चेत्यरः । देवलः, कपिलकादीनां संज्ञाच्छन्दसोरिति वा लत्वम्, यद्वा देवाल्लाति आदत्ते इति देवलः । अनयोः क्विपि वलि लोपात्परत्वा-

क्तोः सूरित्यूठयादेशे तयूर्वयूरिति भवति । एवमन्यत्रापि वकारान्तेषु । दिवी ति प्रीणनार्थीये परस्मैपदी, दिवु इति क्रीडार्था दिवादिः, परिपूजनार्थश्चु- रादिः ॥ ४९५ ॥

षेवृ गेवृ ग्लेवृ पेवृ खेवृ सेचने ॥ शेवृ खेवृ मेवृ इत्यप्येकेइति मैत्रेयः । सेवते । सिषेवे । सेवितेत्यादि । सिसेविषते । स्तौतिण्योरेवेत्यषत्वम् । सेषेव्य- ते । सेवयति । असिषेवत् । एषाम् ऋदित्त्वाण्णौ चङ्गीति न ह्रस्वः । परिषेव- यते 'परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जा'मिति षत्वं सात्पदा- द्योरिति निषेधापवादः । 'प्राक् सितादड्व्यवायेपी'ति वचनात्पर्यषेवतेत्या- दावपि भवति । परिषिषेविषतइत्यषणीति नियमः स्वादिष्वभ्यासेन चाभ्या- सस्येत्यनेन बाध्यते । एवं विनिभ्यामप्युदाहार्यम् । सेवित्वा । सेवितः । क्विप् । सयूः । अत्र मैत्रेयादयो दन्त्यादिमपि वदन्ति । तथा च परिनिविभ्यः सेवेत्यत्र न्यासेपि षोपदेशस्य सात्पदाद्योरिति निषेधे प्राप्ते अपरस्य त्वप्राप्ते चेति तदिदं षोपदेशलक्षणपर्युदासे सेक्सृवर्जमिति स्त्यायतिव- दनुपादानाद्वाष्यकारस्यानभिमतत्वमिव प्रतीयते । अत एव परिनिविभ्य इत्यत्र हरदत्तः । सेवतिर्भ्वादिष्वनुदात्तेदित्याह न तु सेवतीति । गेवते । ग्लेवते । प्रेवते । मेवते । श्लेवते । खेवते । प्लेवते । षेवृ क्लेवृ इत्यपि क्व चित्पठ्यते ॥ ५०० ॥

रेवृ प्लवगतौ ॥ प्लवगतिः प्लुतिगतिः । रेवतइत्यादि । रेवा । अचिटाप् । रेवः । अनुदात्तेत्त्वाद्वा चलनार्थत्वाद्वा युच् । अत्र मैत्रेयः प्लव इति धात्व- न्तरमाह, तच्चिन्त्यं यदि हि स्यात् आप्लवशब्दस्यास्मात् घञि सिद्धौ तदर्थे 'विभाषा ङि रुप्लुवो'रि'ति प्लुवः पक्षे घञ्विधानमनर्थकं स्यात् । तथा प्लुङ्- णौ वृध्यावादेशयोश्चङि णौ कृतस्य स्थानिवत्त्वात् प्लुशब्दस्य द्विरुक्तावपु- प्लवदिति नित्ये प्राप्ते पक्षे अपिप्लवदिति सिद्ध्यर्थे 'स्रवतिशृणोतिद्रवतिप्रव- तिप्लवतिच्यवतीनां वे'त्युकारस्येत्त्वविधानमनर्थकं स्यादिति. सति ह्यस्मिन्न- नेनैवापिप्लवदिति भविष्यति । अत एव किलापरितुष्य मैत्रेयोपि प्लवइत्ये- कइत्याह । आयादय उदात्ता अनुदात्तेतः ॥ ५०१ ॥ (शेषमग्रे)

चतुर्थः परिच्छेदः ।

(*Continued from page* 224. VOL. VI.)

(p. 224, *dele* last three lines of Sanskrit text)

तथा च यद्वाक्यं यत्प्रतीतिजननयोग्यत्वे सति तदन्यप्रतीतीच्छया नोच्चरितं तद्वाक्यं तत्संसर्गपरमित्युच्यते ।

Accordingly,—there being (in a sentence) an inherent fitness to convey certain knowledge—a sentence, not uttered with a desire to convey any knowledge other than this, is held (by us) to be devoted to that relation (which was at first intended).

शुकादिवाक्येऽव्युत्पन्नोच्चरितवेदवाक्यादौ च प्रतीतीच्छया एवाभावात् तदन्यप्रतीतीच्छयोच्चरितत्वाभावेन लक्षणसत्त्वान्नाव्याप्तिः ।

The fault of non-pervasiveness (as regards our definition of Intention) does not occur in the case of a parrot's talk, and of Vaidic sentences uttered by one unable to understand their meaning, since our definition applies here: for (these sentences are) not uttered with the desire of conveying any meaning other than that intended, since the very intention of conveying knowledge is absent (in the case of parrots and ignoramuses).

नचोभयप्रतीतीच्छयोच्चरितेऽ-

Nor is our definition non-pervasive * in the case of a sentence uttered with the desire to convey knowledge of two meanings, for what the definition implies is that a sentence should not be uttered with a desire to

* The ṭíká expands thus:—ननूभयप्रतीतीच्छयोच्चरिते तदन्यप्रतीतीच्छया ऽनुच्चरितत्वाभावादव्याप्तिरित्याशङ्क्य परिहरति, नचेति। उभयप्रतीतीच्छयोच्चरितत्वेन तदन्यमात्रप्रतीतीच्छयाऽनुच्चरितत्वस्य सत्त्वादित्याह, तदन्यमात्रेति । तदन्यमात्रप्रतीतीच्छयाऽनुच्चरितत्वम्. उभयप्रतीतीच्छयोच्चरितत्वमेवेति भावः । नचैवमेकप्रतीतीच्छयोच्चरिते ऽव्याप्तिरितिवाच्यम् । तदन्ययावत्प्रतीतीच्छयाऽनुच्चरितत्वम् इत्यर्थस्य तदार्थो विवक्षितत्वात् ॥

प्तिः, तदन्यमात्रप्रतीतीच्छयानुच्चरितत्वस्य विवक्षितत्वात् ।

तत्प्रतीतिमात्रजननयोग्यतायाः स्वरूपयोग्यतावच्छेदिका शक्तिः । अस्माकं मते सर्वत्र कारणतायां शक्तेरेवावच्छेदकत्वमिति नकोऽपि दोषः ।

एवं तात्पर्यस्य तत्प्रतीतिजनकत्वरूपस्य शाब्दज्ञानजनकत्वे चतुर्थवर्णके तात्पर्यस्य शाब्दज्ञानहेतुत्वनिराकरणमपि तत्प्रतीतीच्छयोच्चरितत्वरूपतात्पर्यनिराकरणपरम् । अन्यथा तात्पर्यनिश्चयफलकवेदान्तविचारवैयर्थ्यप्रसङ्गात् ।

convey all the other meanings (though it may be uttered with a desire to convey a certain ambiguous meaning).

And the original power of words (Śakti, regarded as an attribute,) is that which essentially constitutes the fitness (capability), here expounded, of words to convey a knowledge of all their meanings. Nor does any fault (sc. cumbrousness) attach to this view, for, in our opinion, it is the attribute of power that, in all cases, essentially constitutes a cause.

Accordingly, since Intention, so far as it is the capacity (of words) to produce a knowledge of their meanings (tat), is a cause of verbal knowledge, the ruling, in the fourth Varṇaka, rejecting Intention as a cause of verbal knowledge, must apply to the rejection of that Intention which (in the opinion of some) consists in "uttering (words) with the desire to convey a knowledge of their meaning."* If the ruling be understood otherwise (anyathá, ie, so as to deny Intention altogether as a cause of verbal knowledge), it will follow that the deliberations of the Vedánta that aim at the ascertainment of the Intention (of the Veda) are purposeless.

* तात्पर्यस्य तत्प्रतीतिजनकत्वरूपस्य is a re-statement of the definition of tátparyya :—तत्प्रतीतिजननयोग्यत्वं तात्पर्यम् Pandit Vol. VI, p. 224. To harmonise the fourth Varṇaka with his own view, our author holds that the ruling of the former implies the rejection of the Nyáya tenet that Intention is the will of the speaker (वक्तुरिच्छा)—a tenet he also rejects: तत्प्रतीतीच्छयोच्चरितत्वं न तात्पर्यम् Vol VI. p. 223.

केचित्तु शाब्दज्ञानत्वावच्छेदेन तात्पर्य्यज्ञानं न हेतुरित्येवं परं चतुर्थवर्णकवाक्यं तात्पर्य्यसंशये विपर्य्ययोत्तरशाब्दज्ञानविशेषे च तात्पर्य्यज्ञानं हेतुरेव । इदं वाक्यमेतत्परमुतान्यपरमिति संशये तद्विपर्य्यये च सत्युत्तरवाक्यार्थविशेषनिश्चयस्य तात्पर्य्यनिश्चयं विनानुपपत्तेरित्याहुः ।

Others, however, hold that the fourth section is devoted to showing that the knowledge of Intention is not a cause of verbal knowledge in every case, but only in the special case of verbal knowledge following upon a doubt as to the Intention or upon a misapprehension of the Intention. For the certain knowledge (they say) of the definite meaning of a sentence that follows in the case of such a doubt as—does this sentence mean this or something else?—or in the case of a misapprehension of the Intention could not be established without a certain knowledge of the Intention.

तच्च तात्पर्य्यं वेदे मीमांसापरिशोधितन्यायादेवावधार्य्यते लोके तु प्रकरणादिना ।

Intention, as regards the Veda, is determined by the systematic exposition of the Mímámsá, and, as regards secular speech, by the requirements of the context (sc. expectancy &c).

तत्र लौकिकवाक्यानां मानान्तरावगतार्थतयाऽनुवादकत्वं वेदे तु वाक्यार्थस्यापूर्व्वतया नानुवादकत्वम् । तत्र लोके वेदे च कार्य्यपराणामिव सिद्धार्थानामपि प्रामाण्यं

Secular sentences possess the character of (explanatory) repetitions, because the objects they denote can be ascertained by the other means of correct knowledge (sc. perception, inference &c); but this character does not belong to Vaidic sentences, for the objects denoted by the Veda are not previously known by any of the other means of correct knowledge. Both in the case of the Veda and of secular speech, sentences, denoting objects within the reach of the other sources of correct knowledge, are also authoritative as are those sentences that imply

Digitized by Google

पुत्रस्ते जातइत्यादिषु सिद्धार्थेऽपि पदानां सामर्थ्यावधारणात् । अतएव वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यं । यथा चैतत्तथा विषयपरिच्छेदे वक्ष्यते ।

तत्र वेदानां नित्यसर्व्वज्ञपरमेश्वरप्रणीतत्वेन प्रामाण्यमिति नैयायिकाः । वेदानां नित्यत्वेन निरस्तसमस्तपुंदूषणतया प्रामाण्यमित्यध्वरमीमांसकाः ।

अस्माकं तु मते वेदोऽनित्य उत्पत्तिमत्त्वात् उत्पत्तिमत्त्वञ्च अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्व्वेदः सामवेदोऽथर्व्ववेद इत्यादिश्रुतेः ।

नापि वेदानां त्रिक्षणावस्थायित्वं य एव वेदो देवदत्तेनाधीतः स एव मयापीत्यादिप्रत्यभिज्ञाविरोधात् । अतएव गकारादिवर्णानामपि न

action (something to be done) for such words as—*a son is born to you*—are certainly a competent source of correct knowledge, although the thing intended by them (sc. a son) can be known through the other sources of knowledge. Hence the sentences of the Upanishads are an authoritative source of knowledge of Brahma. The nature of this authoritativeness will be explained in the Vishaya-pariccheda.

The Naiyáyikas maintain that the authoritativeness of the Vedas consists in their being composed by an omniscient, eternal God. The Mímámsakas maintain that this consists in the Vedas being free from all human defects, since the Vedas are eternal.

But in our view the Veda is not eternal, for it has the character of a production; and its character as a production is proved from such passages of Scripture as "the breathing of this great Being (Paramátmá) is the Ṛigveda, the Yajurveda, the Sámaveda, the Atharvaveda &c." (Bṛihadáraṇya : IV. 4. 10).

Nor does the character of duration for three moments belong to the Vedas, for the recognition that *the Veda read by Devadatta is the very same Veda read by me* is contradictory (of such momentariness). Wherefore letters also like G and the rest are not momentary.

क्षणिकत्वं सोऽयं गकार इत्यादिप्रत्यभिज्ञाविरोधात् ।

for the recognition of this G as the same G (previously heard) is contradictory (of momentariness).

तथाच वर्णपदवाक्यसमुदायरूपस्य वेदस्य वियदादिवत् सृष्टिकालीनोत्पत्तिमत्त्वं प्रलयकालीनध्वंसप्रतियोगित्वञ्च न तु मध्ये वर्णानामुत्पत्तिविनाशौ अनन्तगकारादिकल्पनायां गौरवात् ।

Thus the Veda, which is a collection of sentences (made up of) words and letters, is produced at the creation and ceases to exist at the universal dissolution of things, just as ether and the other elements (are produced and cease to exist); but there are no intermediate (ie. between universal creation and dissolution) productions and destroyals of the letters, for it is cumbrous to assume an infinite number of Gs and like single letters.

अनुच्चारणदशायां वर्णानामनभिव्यक्तिस्तूच्चारणरूपव्यञ्जकाभावान्न विरुध्यते अन्धकारस्थघटानुपलम्भवत् ।

The non-manifestation of the letters, when these are not uttered, is not contradictory (of our position), since at such a time that which manifests the letters, viz, the utterance of them, is absent, just as there is no perception of a jar that stands in a dark spot.

उत्पन्नो गकार इत्यादिप्रतीतिस्तु स एवायं गकार इत्यादिप्रत्यभिज्ञाविरोधादप्रमाणं वर्णाभिव्यञ्जकध्वनिगतोत्पत्तिनिरूपितपरम्परासम्बन्धविषयत्वेन प्रमाणं वा तस्मान्न वेदानां क्षणिकत्वम् ।

The avowal that the letter G is produced (or destroyed) &c. is incorrect, for it is contradicted by the recognition of *this G as the same G* (previously heard); or it may be regarded as correct so far as it indirectly refers to the productions (and destroyals) of the articulate noise which manifests letters.* The Vedas therefore are not momentary.

ननु क्षणिकत्वाभावेऽपि वियदादिप्रपञ्चवदुत्पत्तिमत्त्वेन परमेश्व-

An objection may be urged against us :—even if the Vedas are not momentary, your final

* cf. Sarvadarśanasaṅgraha (Trübner's Oriental Series) p. 195. note 2.

रकर्तृकतया पौरुषेयत्वादपौरुषेयत्वं वेदानामिति तव सिद्धान्तो भज्येतेति चेन्न ।

न तावत् पुरुषेणोच्चार्यमाणत्वं पौरुषेयत्वं गुरुमतेऽपि अध्यापकपरम्परया पौरुषेयत्वापत्तेः ।

नापि पुरुषाधीनोत्पत्तिकत्वं पौरुषेयत्वं नैयायिकाभिमतपौरुषेयत्वानुमानेऽस्मदादिना सिद्धसाधनापत्तेः ।

किन्तु सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं पौरुषेयत्वम् ।

तथा च सर्गाद्यकाले परमेश्वरः पूर्वसर्गसिद्धवेदानुपूर्वीसमानानुपूर्वीकं वेदं विरचितवान् न तु तद्विजातीयं वेदमिति न सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं पौरुषेयत्वं वेदस्य ।

position that the Vedas are not a personal production will be overthrown, since the character of a personal production will attach to them, in that God is their maker, for they are products like the universe of ether &c. To this we say No!

The character of a personal production does not consist in being uttered by a person; for then the Prábhákara school would have to admit (against their own view) that the Veda is a personal production, since there is a succession of teachers of the Veda (each uttering the Veda).

Nor does it consist in being a production dependent on (the will of) a person; for then the charge of proving what is already proved will lie against the argument adopted by the Naiyáyikas for the personal character of the Vedas (viz, that they are works like those composed) by persons like ourselves.

But this *being a personal production* consists in being an utterance that does not demand an (antecedent) similar utterance.

To continue—God, at the creation, arranged a Veda precisely similar to the preceding Veda existing at the previous creation, but not a different Veda. Thus the character of *being a personal production*, consisting in an utterance that does not demand an antecedent similar utterance, does not attach to the Veda.

भारतादीनां तु सजातीयोच्चारणमनपेक्ष्यैवोच्चारणमिति तेषां पौरुषेयत्वम् । एवं पौरुषेयापौरुषेयभेदेन द्विविध आगमो निरूपितः ।

इति परिभाषायामागमपरिच्छेदः ।

(शेषमग्रे)

But the *being personal productions*, attaching to the Mahábhárata and like works, is the utterance (of these works) without demanding any (antecedent) similar utterance. Thus Ágama is expounded as twofold, according as it does or does not proceed from a personal author.

A. V.

सटीकसंक्षेपशारीरकम् ।

(*Continued from page* 248. Vol. VI.)

मू० ॥ नियोग एवैष पुमान्नियुज्यते
नियोगसिद्धौ तु पुनर्नियुज्यते ॥
परत्र कर्मस्वथ वा निवृत्तिषु
स्थितिः प्रसिद्धेति नियोगवादिनाम् ॥ ४२४ ॥

टी० ॥ ननु निरयपातपरिहारेच्छां विना चेतनः कथं नियोगेन नियुज्येत प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्त्तेत इति न्यायादित्याशङ्क्य प्राभाकरसिद्धान्तरहस्यमाह । नियोग एवेति । एष नियोज्यः । नियोगे इति सप्तमी । नियुज्यते नियोगेनेति शेषः । नियोज्यो हि लोके कार्यं लिङादिव्युत्पत्तिबलान्नियोगमेव लिङादितः स्वकृतिसाध्यत्वेनावगच्छंस्तदुन्मुखो भवति । अयमेव नियोज्यस्य नियोगे तन्नियोगो नाम स्वर्गादिकमपि हि नियोगः स्वसिद्ध्यनुकूलनियोज्यसिद्धये प्रयच्छतीति स एव मुख्यः साध्यः । तदुक्तम् । स्वात्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये । कुर्वंस्स्वर्गादिकमपि प्रधानं कार्यमेव न इति । नियोगमुद्दिश्यैव पुमान्धर्मं प्रवर्त्तेत इत्यर्थः । नन्वव्यापाररूपे तस्मिन्कथं पुंसो नियोगो भवेदित्याशङ्क्य तदनन्तरं तेनैव नियोगेन तद्विषये यागादिधात्वर्थे तत्सिद्धये स नियुज्यत इति तद्द्वारा स नियोगं साधयिष्यतीत्याशयेनाह । नियोगसिद्धा इति । तुरवधारणे । तत्सिद्ध्यर्थमेवेत्यर्थः । पुनः पश्चात् । परत्र नियोगाव-

ष्वेषु । तानेवाह । कर्मस्वित्यादिना । कर्मसु नियुज्यत इत्यनुषङ्गः । स्थितिः सिद्धान्तः ॥ ४२४ ॥

मू० ॥ वृद्धर निवृत्तयोऽस्थिरा-
स्तत: स्थिरत्वाय नियुज्यते पुमान् ॥
निवृत्तिदेशेषु नियोगबुद्धितो
निवृत्तिमूर्ध्वं परिपालयिष्यति ॥ ४२५ ॥

टी० ॥ ननु यदि निवृत्तिसिद्ध्या तन्नियोगः सिध्येत्तर्हि निषिद्धे ऽप्यतोऽपि प्रवर्त्तकरागाद्यभावे निवृत्तिसिद्धेः किं नियोगस्य पृथङ्नियोगे नेत्याशङ्क्याह । प्रवृद्धरागस्येति । यद्यप्युक्तरीत्या सकृन्निवृत्तिर्भवेत्तथाऽपि नियोगेन तन्नियोगाभावे प्रथममिव पुंसः पुनरपि तत्र राग उत्पद्येतेति निषेध्यान्निवृत्तयोऽस्थिराः स्युरिति यतस्ततो हेतोः निवृत्तिस्थैर्ये निवृत्ति-रूपदेशेषु विषयेषु पुमान्नियुज्यते । एवं हि सति प्रवृत्त्युन्मुखः पुमान्निवृ-त्तनियोगमेव कार्यमवगच्छेदिति निवृत्तयः स्थिराः स्युरित्याशयेनाह । नियोगबुद्धित इति । ऊर्ध्वं ऊर्ध्वमपीत्यर्थः । परिपालयिष्यति । अविच्छि-न्नप्रवाहां तां करोतीत्यर्थः ॥ ४२५ ॥

मू० ॥ अनाद्यनर्थेभ्य निवृत्तिरिष्टा
विशिष्टदन्ताद्यनिविष्टसंवित् ॥
अनन्यसंसर्गिपदार्थसंवि-
न्निवृत्तिरित्येष हि राजमार्गः ॥ ४२६ ॥

टी० ॥ ननु केयं निवृत्तिर्नाम ननूक्तं प्रवृत्तिविरोधिमानसी क्रियेति ननु तत्राप्युक्तमेवं सति नञः स्वार्थत्यागप्रसङ्ग इति सत्यं निवृत्तिस्थैर्याय योऽप्युचित एव ननु प्राभाकरनयेऽभावाभावात्कथं तेन लक्षणा मुख्यार्थसंब-न्धासंभवादित्याशङ्क्य प्राभाकरमते भावरूपभवणाद्यभावं नञो मुख्यार्थ-निवृत्तिलक्षणार्थमाह । अनाद्येति । न आद्यमनाद्यं तस्य भक्षणानर्थस्य कलञ्जादेरनर्थभेभक्षणादित्यर्थः योऽवधारणे निवृत्तिरभावः विशिष्टद-न्ताद्यनिविष्टसंविदेव । अविशिष्टेति वा छेदः । केवलदन्ताद्यविषय-

ज्ञानमित्यर्थः । अर्थैरिति षष्ठी वा । अन्यत्समानम् । भक्षणाख्यकालीनद-न्तोष्ठादिव्यावृत्तये विशिष्टेत्युक्तम् । तत्र हेतुत्वेन तत्सिद्धान्तं दर्शयति अनन्यसंसर्गीति । अन्यो निषेध्यः तत्संसर्गी न भवतीत्यनन्यसंसर्गी तादृशो यः पदार्थः निषेध्यानधिकरणं तत्संवित्केवलाधिकरणज्ञानमिति यावत् । राजमार्गः निर्दोषः । प्राभाकरपक्षे हि यत्राभावव्यवहारस्तस्य प्रतियोग्यसंसर्गिणो ज्ञानमभाव इति प्रसिद्धम् । एवं च भक्षणादिनिवृत्तिरपि केवलदन्तोष्ठादि तदेव तत्र नञोच्यते । अतो न निवृत्तिर्लक्ष्यत इत्यर्थः । एवं रूप एवाभावो निवृत्तिः प्रकृते विधेयाऽस्तु तथा च न लक्षणेति वाशयः ॥ ४२६ ॥

मू० ॥ ननु समीहितसाधनता लिङो
लशुनगृञ्जनभक्षणसंश्रया ॥
भवति वाच्यतयाऽभिमताऽस्य नो
नञपि तद्विनिवृत्तिनिवेदकः ॥ ४२७ ॥

टी० ॥ एवं स्वमतं प्रसाध्येदानीं सिद्धान्त्यभिमतं निषेधवाक्ये नञर्थं दूषयितुमनुवदति । ननु समीहितेति । लशुनादिकं लोकप्रसिद्धम् । अस्य लशुनादिभक्षणस्य नोऽस्मन्मते तस्याः समीहितसाधनतायाः विनिवृत्तिरभावः तस्या निवेदको बोधक इत्यर्थः । प्रत्ययेन संबद्धो हि नञ् लशुनादिभक्षणगतेष्टसाधनत्वस्य लिङाद्यर्थस्याभावं बोधयतीत्यर्थः ॥ ४२७ ॥

मू० ॥ तदसदिष्टफलोद्भवदर्शना-
ल्लशुनगृञ्जनपर्युषिताशनात् ॥
न हि निषिद्धपदार्थनिमित्तकः
सुखलवः पुरुषस्य न विद्यते ॥ ४२८ ॥

टी० ॥ तद्दूषयति । तदसदिति । तदप्यसदित्यर्थः । कुतः लशुनादिभक्षणादिष्टफलस्य सुखादेरद्गम उदयः तद्दर्शनादित्यर्थः । तदेव व्यतिरेकनिषेधेन द्रढयति । न हीति । स्पष्टमन्यत् । तस्मात्सर्वो वेदः कार्यपर इति भावः ॥ ४२८ ॥ (शेषमग्रे)

॥ श्रीः ॥

॥ योगवार्तिकम् ॥

(*Continued from page* 309. Vol. VI.)

नन्वस्तु धर्मो धर्मातिरिक्तः तथाप्येकस्य धर्मिण एक एव परिणामोऽस्तु एकस्य नानापरिणामाङ्गीकारे सहकारिभेदकल्पनागौरवादित्याशङ्कायामेकस्य धर्मिणः परिणामभेदं साधयति । एकस्य धर्मिण आगामिसूत्रवक्ष्यमाणपरिणामत्रयसिद्धये ।

क्रमान्यत्वं परिणामान्यत्वे हेतुः ॥ १५ ॥

एकस्य धर्मिणः परिणामनानात्वे क्रियाभेदो हेतुर्लिङ्गमित्यर्थः । आशङ्कापूर्वकं सूत्रं व्याचष्टे । एकस्येति । भवतीति सिद्धान्त इति शेषः । हेतुत्वं प्रतिपादयितुमादौ धर्मपरिणामविषये धर्मिणः क्रमं दर्शयति । चूर्णेति । एकैव मृत् प्रथमं चूर्णमृत्तिष्ठति ततः पिण्डमृद्भवति ततश्च घटमृदिति । घटेत्यन्तो मृद्धर्मिणः क्रमं प्रतिपाद्य घटलयेपि मृदः क्रममाह । कपालमृत्कणमृदिति । चशब्देनान्यपरिणामविषयेपि क्रमः समुच्चीयते सर्वत्र पृथक्छेदो मृद्धर्मिण एकत्वप्रतिपादनार्थः । एकस्य सामान्यात्मकस्य मृद्धर्मिणोऽनङ्गीकारे मृदित्यनुगतप्रत्ययो न स्यादिति भावः । ननु धर्माणामेव क्रमः पौर्वापर्यात्मा संभवति न तु धर्मिण इत्याशङ्कायां प्रकृतेः क्रमं लक्षयति । यो यस्येति । यस्य धर्मिणो धर्मान्तरस्य समनन्तरो यो धर्मः स एव तस्य धर्मिणः क्रम इत्यर्थः । तथा च मृदेकैव चूर्णा भूत्वा पश्चात् पिण्डा भवतीत्येकः क्रमः पश्चाच्च घट इत्यादिक्रमैर्मृद्धर्मिण एव क्रमबहुत्वमिति भावः । धर्माणां क्रमस्यैवात्र विवक्षितत्वे तु तेषां क्रमनानात्वेप्येकस्य धर्मिणः परिणामबहुत्वं न सिध्यतीति भाष्यकाराशयः । परिणामत्रयेपि क्रममुदाहरति । पिण्डः प्रच्यवत इत्यादिना । नातीतस्यास्ति क्रम इति । लक्षणात् लक्षणान्तरप्राप्तिरूपः क्रमो नातीतस्येत्यर्थः । धर्मपरिणामरूपावस्थापरिणामे प्रतिक्षणक्रमो न प्रत्यक्षीक्रियत इति तमनुमानेन साधयति ।

घटस्याभिनवस्येति । प्राप्नोति शेषः । सा चेति । सा च पुराणता क्षणपरम्परानुपातिना प्रतिक्षणं भिन्नेन स्वरूपसत्ताक्रमसमूहेनैवाभिव्यज्यमाना भवन्ती चरमावस्थायां स्फुटप्रत्यक्षगोचरतामेति । अतः पुराणताभिव्यक्तिहेतुतया प्रतिक्षणमवस्थापरिणामोऽनुमीयतइति शेषः । प्रतिक्षणपरिणामतो यत्किंचिदति तदाह । धर्मलक्षणाभ्यामिति । विशिष्टोऽतिशयितः । धर्मलक्षणपरिणामयोः प्रतिक्षणमनुत्पादादवस्थापरिणामस्य च प्रतिक्षणमुत्पादादित्यर्थः । तथा चोक्तं मनुना

घोरेऽस्मिन्हन्त संसारे नित्यं सततयायिनि ।

इति । स्मृत्यन्तरेषु च ।

नित्यदा ह्यङ्ग भूतानि भवन्ति न भवन्ति च ।
कालेनालक्ष्य वेगेन सूक्ष्मत्वात्तन्न दृश्यते ॥

इत्यादि च । पुराणे चात एव चतुर्विधः प्रलय उक्तः ।

नित्यो नैमित्तिकश्चेति प्राकृतात्यन्तिकौ तथा ।

इति । नित्यः प्रतिक्षणं जायमानः । एतेन स्वप्नमायादिदृष्टान्ता अपि प्रपञ्चस्य क्षणभङ्गुरत्वेनैव श्रुतिस्मृतिष्वभिप्रेता इति । सूत्रतात्पर्यार्थमाह । तएत इति । प्रतिलब्धस्वरूपाः प्राप्तसंभवा इतरथा तु नेत्यर्थः । ननु धर्मिणोऽपि घटादेः कपालादिधर्मत्वात् कथं धर्मधर्मिणोर्भेद इति तत्राह । धर्मोपीति । तथा च यो यस्य धर्मी स तस्माद्भिन्न इत्येव नियम इत्यर्थः । नन्वेवं धर्मधर्मिलक्षणानां परिणामभेदे कथमेकस्याः प्रकृतेः सर्वे परिणामा इति श्रूयते 'इत्येषा प्रकृतिः सर्वा व्यक्ताव्यक्तस्वरूपिणी' त्यादिस्मृतिषु तत्राह । यदा त्विति । यदा तु परमार्थधर्मिणि प्रधानेऽभेदोपचारेण निमित्तेन सर्वोऽपि धर्मः स एवाभिधीयते तदायं क्रम एकत्वेन एकनिष्ठत्वेनैव प्रतीयतइत्यर्थः । परमार्थधर्मित्वं च साक्षात्परम्परया सर्वविकाराश्रयत्वं तच्च प्रधानस्यैवास्तीत्यन्ये । अपारमार्थिकधर्मिणा आपेक्षिकत्वात् । यथा परिणामिनां सत्यत्वं यथा वा ब्रह्ममीमांसायां जीवानामात्मत्वमपारमार्थिकं तयोरपि शशशृङ्गदेहाद्यापेक्षिकत्वादिति भावः । अत्र प्रधानस्यैव पारमार्थिकधर्मिकत्वं वदद्भिः भाष्यकारैः परमात्मन एव

निरतिशयसतो ऽनापेक्षिकात्मनश्च पारमार्थिकसत्त्वं पारमार्थिकात्मत्वं च श्रुतिस्मृतिसिद्धमनुमतं न्यायसाम्यादिति ध्येयम् । तथा ऽभेदोपचारवचनात् धर्मधर्मिणोर्भेद एव पारमार्थिकः । अविभागमात्रं त्वभेद इत्यप्युक्तमिति । तदित्थं सूत्रगणेन प्रपञ्चः प्रकृतिपरिणाम इति सिद्धान्तितम् । तत्र चारम्भवादिभिः सहास्माकं धर्मधर्म्यभेदसत्कार्ययोरेव विरोधो न तु प्रपञ्चस्याचेतनसूक्ष्मद्रव्योपादानकत्वेपि तैरभेदप्रत्ययनियामकस्याविभागलक्षणस्वरूपस्यानङ्गीकारात् प्रागभावध्वंसयोरङ्गीकाराच्च । ये तु प्रपञ्चस्य ब्रह्मविवर्त्ततावादिनस्तैः सह च नास्माकं विरोधलेशोपि वर्त्तते । मायापरिणामस्य प्रपञ्चस्य परमात्मन्यतात्त्विकतायाः अस्माभिरपीष्टत्वात् । 'इन्द्रो मायाभिः पुरुरूप ईयते'

बहुरूप इवाभाति मायया बहुरूपया ।
रममाणो गुणेष्वस्या ममाहमिति बध्यते ॥

इत्यादिश्रुतिस्मृतिषु मायाविकारस्यैव परमात्मन्यध्यारोपावगमात् । शुद्धो बुद्धिपरिणामरञ्जतारोपवत् बध्यतइति भ्रंशत इत्यर्थः । यदि च मायायामपि विवर्त्तत्वं प्रपञ्चस्य कश्चिद्वदेत् तदपि परमार्थाभिप्रायेणेष्यत एवास्माभिः मायापेक्षया तत्कार्याणामनित्यत्वेन तामपेक्ष्य मिथ्यात्वात् । वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रौतदृष्टान्तैरेवमेव सिध्येदिति । तदेवं चित्तपरिणामप्रसङ्गेन सर्ववस्तूनां भूतेन्द्रियशब्दोपलक्षितानां त्रिविधः परिणामः सूत्रकारेण प्रतिपादितः । तत्र सूत्रकारेण चित्तस्य निरोधव्युत्थानसंस्काररूपावेव परिणामौ प्रतिपादितौ न सर्व इति न्यूनता तस्याः परिहाराय परिणामात्मकान् चित्तधर्मानशेषतः प्रकरणसमाप्त्यवसरे दर्शयति । चित्तस्य द्वय इति । परिदृष्टापरिदृष्टाः प्रत्यक्षाप्रत्यक्षाः । प्रत्ययात्मका इति । प्रत्ययो वृत्तिपरिणामविशेषो यः साक्षिणि प्रतिबिम्बाधानक्षमः स च ज्ञानेच्छाकृतिसुखदुःखादिमान् प्रदीपशिखावद् द्रव्यरूपः परिणामविशेषः तदात्मकाः तद्रूपा इत्यर्थः । वस्तुमात्रेति । परमाणुतद्रूपवत् प्रतिबिम्बाधानाक्षमतया साक्षिण्याभासमाना इत्यर्थः । ते चापरिदृष्टाः । अनुमानेनेति । अनुमानेन साधिता वस्तुमात्रतया सत्ता येषां सप्रा-

णामित्यर्थः । सप्त दर्शयति । निरोधेति । निरोधो वृत्तिनिरोधः संस्कार-
जनकत्वेन निवृत्तिप्रवद्भावरूपोनुमीयते इति प्रागेवोक्तम् । धर्मश्चादृष्ट-
सामान्यं भोगवैचित्र्यादनुमीयते संस्कारश्च स्मृतिहेतुतयानुमीयते परिणा-
मश्चित्तस्योपचयापचयादिवृत्त्युत्कर्षापकर्षादिरनुमीयते । एतच्च छान्दोग्ये
स्पष्टम् 'अन्नमयं हि सोम्य मन' इत्यत्र । जीवनं प्राणनादिरूपव्यापारवि-
शेषः सुषुप्तावपि श्वासप्रश्वासाभ्यामनुमीयते चेष्टा चित्तस्य संचारः स च
जाग्रत्स्वप्नसुषुप्त्यादिहेतुभ्यां चित्तस्य चक्षुरादिदेशसंयोगवियोगाभ्यामनुमी-
यते । यद्यपि चित्तस्य विभुत्वं तथापि बाह्यसत्त्वाद्युपष्टम्भेनापचयोपच-
यवत्त्वोत्रस्यैवौपाधिकी क्रियाप्यस्तीति भावः । शक्तिः ध्यानादिसामर्थ्यं तच्च
तत्कार्येणानुमीयते । यद्यपि कार्यजननशक्तिः सर्वपरिणामिष्वनुमेयैव भवति
तथापि चित्तस्याखिलधर्मप्रसङ्गेन चित्तमधिकृत्योक्ता । पादसमाप्तिपर्यन्ता-
नि संयमसिद्धिसूत्राण्यवतारयति । अतो योगिन इति । ज्ञानसाधनानि
योगाङ्गानि विस्तरेण व्याख्यातानि योगकालीनावस्थाश्च चित्तस्य परिणा-
मरूपा योगनिष्पत्त्यवधारणाय दर्शिताः । अतः परं बुभुत्सितानां
योगिभिर्जिज्ञासितानामर्थानां साक्षात्काराय यमादिसाधनसंपन्नस्य योगि-
नः संयमविषय उपक्षिप्यते । उभयत्र संयमाख्यया सिद्धिर्भवति तत्सर्वं
विशिष्य प्रदर्श्यते पादसमाप्तिपर्यन्तमित्यर्थः । अत्र बुभुत्सितार्थप्रतिपत्तय-
इति वचनात् तत्तद्विभूतिकामैरेव ते संयमाः कर्तव्याः केवलमुमुक्षुभिस्तु
सत्त्वपुरुषान्यतामात्रसंयमः कर्तव्यः परवैराग्यायेति सूचितम् । एताश्च
विभूतयः संयमसिद्धिसूचिका अपि ज्ञेयाः ।

परिणामत्रयसंयमादतीतानागतज्ञानम् ॥ १६ ॥

अस्य धर्मिणोऽयं धर्मपरिणामस्तस्य च अयं लक्षणपरिणामः लक्षण-
स्य चायं नवपुराणाद्यवस्थापरिणाम इत्येवमनुक्रमं यत्र कुत्र चिदर्थे संय-
मात्तत्साक्षात्कारे सति तदितरार्थानामपि धर्मादिपरिणामेषु अतीतानागत-
ज्ञानं संकल्पमात्रेण प्रणिधानलेशादेव भवतीत्यर्थः । अन्यविषयकसंयमात्
प्रतिनियतपदार्थान्तरसाक्षात्कारश्च योगजधर्मबलाद्भवतीति शास्त्रप्रामा-
ण्यादवधार्यते धर्मविशेषात्स्वर्गविशेषवत् तपोजन्यसिद्धिवत् भुवनज्ञानं

सूत्रे संयमादिति वक्ष्यमाणसिद्धिवच्च । कश्चित्तु समानविषयत्वानुरोधात् संयमविषययोरेवातीतानागतयोः साक्षात्कारो भवतीत्यर्थ इत्याह । तन्न * । तर्हि तत्संयमात्तज्ज्ञानमित्येव सामान्यतः सूत्रं युज्येत संयमस्य स्वविषयमात्रसाक्षात्कारजनकत्वनियमात् । अपि च परिणामत्रयं साक्षात्क्रियमाणं तेष्वतीतानागतज्ञानं संपादयतीति भाष्ये पौनरुक्त्यमपि स्यादिति । भाष्ये तेष्विति । धर्मलक्षणावस्थापरिणामेषु सर्ववस्तुसाधारणेष्वित्यर्थः । शेषं सुगमम् । संयमान्तरस्य सिद्ध्यन्तरमाह ।

शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानम् ॥ १७ ॥

गौरित्यादिः शब्दो गौरित्यादिरर्थो गौरित्यादिः प्रत्ययः तेषां अन्योन्यं संकेतरूपादध्यासात्संकरो विवेकाग्रहणं भवति । वस्तुतस्तु तेषां भेदोऽस्ति अतस्तेषां प्रविभागे भेदे संयमात्साक्षात्कृते सति सर्वभूतानां रुतानि ज्ञायन्ते । अयं काकादिरिममर्थमेतं प्रतीत्यानेन शब्देन कथयतीत्येवमित्यर्थः । यद्यपि साक्षात्कृते सतीति सूत्रे नास्ति तथापि संस्कारसाक्षात्करणादित्युक्तसूत्रेण साक्षात्कारपर्यन्तस्यैव संयमस्य सिद्धिकथनात्तत्रैव सूत्रे संयमस्य साक्षात्कारद्वारकत्वं व्याख्येयम् । अत एव भाष्यकारोऽप्यनेकसूत्रे दृग्दर्शनार्थं साक्षात्कारपर्यन्ततां संयमस्य व्याख्यास्यति । त्रिविधैरेव शब्दैरर्थप्रत्ययगणैस्तेषां शब्दानामन्योन्यं च संकरं दर्शयितुं शब्दानामेवादौ त्रैविध्यं दर्शयति भाष्यकारः । तत्र वागिति । तत्र शब्दमध्ये वागिन्द्रियं वर्णेष्वेव प्रयोजनवत् शब्देषु मध्ये वागिन्द्रियजन्यः शब्दो वर्ण एव न तु मृदङ्गादि शब्दो नापि वाचकं पदमित्यर्थः । अष्टस्थानादुत्पद्यमानः शब्दो वर्णः ।

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च ॥

इति स्मरणात्, वागिन्द्रियस्य च शरीराद्बहिर्वृत्तिर्नास्ति अतो न [illegible]शब्दो नापि तदनन्तरं श्रोतृबुद्धिग्राह्यो वाचकशब्दो

* तन्नेति पा० २ ।

वागिन्द्रियकार्यः श्रोतृश्रोत्रदेशे वक्तृवागिन्द्रियासंबन्धेन श्रोत्रग्राह्यश-ब्दोत्पादकत्वासंभवात् इति । वागिन्द्रियजन्याच्छब्दाच्छब्दान्तरमाह । श्रोत्रं चेति । ध्वनिर्नाम वागिन्द्रियशब्दादिष्वभिहतस्योदानवायोः परिणाम-भेदः येन परिणामेनोदानवायुर्वक्तृदेहादुत्थाय शब्दधारां जनयन् श्रोतृश्रोत्रं प्राप्नोति तस्य ध्वनेः परिणामभूतं वर्णावर्णसाधारणं नादाख्यं शब्दसामा-न्यमेव श्रोत्रस्य विषयः न तु ध्वन्यपरिणामभूतं वाचकं पदमित्यर्थः । स च शब्दो वर्णजातीयत्वेन वर्ण इत्युच्यते । तृतीयं शब्दमाह । पदं पुनर्ना-दानुसंहारबुद्धिनिर्ग्राह्यमिति । यथाप्रतीतिसिद्धान्नादाख्यान् गकारादिव-र्णान् प्रत्येकं गृहीत्वानु पश्चाद्या बुद्धिः संहरति एकत्वमापादयति गौरि-त्येकं पदमिति तया बुद्ध्या निर्ग्राह्यं वर्णेभ्योऽतिरिक्तमखण्डमेकदैवोत्पद्यमानं वक्ष्यमाणं स्फोटाख्यमिति शेषः । तथा चायं तृतीयः शब्दोऽन्तःकरणस्यैव ग्राह्य इत्यर्थः । तस्य हि पदस्य श्रोत्रग्राह्यत्वे चानुसंहारबुद्धेरन्तःकरणनिष्ठाया वैयधिकरण्येन हेतुत्वं स्यात् तच्चायुक्तं, सामानाधिकरण्यस्य प्रत्या-सत्तितायां लाघवात् । न चानुसंहारबुद्धिरपि श्रोत्रादेरेवास्त्विति वाच्यम् । असंभवात् । वर्णानां ह्यैक्यापादनमानुपूर्व्यैक्यात् सा चानुपूर्वी गकारोत्त-रौकारादिरूपिणी नानेकवर्णपदेषु श्रोत्रेण गृहीतुं शक्यते । आशुविनाशि-तया वर्णानां मेलनाभावात् पूर्वपूर्ववर्णसंस्काराणां तत्स्मृतीनां चान्तःकरण-निष्ठानामन्तःकरणसहकारित्वमेवोचितम् । अतः स्मृतानां वर्णानां मनसैवानुपूर्वी ग्रहीतुं शक्यत इति भावः । ननु स्फोटाख्यः शब्दः कीदृशः किंकारणकः किंप्रमाणक इति । अत्रोच्यते । यथा बीजाङ्कुराद्यनेकावस्थो वृक्षधर्मी क्रमिकाभ्यस्ताभ्योऽतिरिक्तः पल्लवादिरूपशेषावस्थया व्यज्यते चाव-मामवृत्तो न वृक्षान्तरमेवंरूपेण स च बीजादिभ्यो भिन्नाभिन्नः भेदाभेद-योरनुभवात् तथैव गकारौकाराद्यनेकावस्थो गौरित्यादिरखण्डः स्फोटशब्दः क्रमिकाभ्यो गकाराद्यवस्थाभ्योऽतिरिक्त आनुपूर्वीविशेषविशिष्टया विसर्ज-नीयादिरूपचरमावस्थया व्यज्यते इदं गौरिति पदं न तु गौर इतीत्यादि-रूपेण, तच्च स्फोटपदं गकारादिवर्णेभ्योभिन्नाभिन्नं भेदाभेदयोरनुभवात् । स च पदाख्यः शब्दोऽर्थस्फुटीकरणात् स्फोट इत्युच्यते स्फोटशब्दस्य च

त्वरकम् एकप्रयत्नजन्यो ध्वनिविशेषः प्रयत्नभेदेनोच्चारणे व्यवधाने सत्ये-कपदव्यवहाराभावात् । गौरित्येकपदमिति व्यवहारस्तु स्फोटे प्रमाणं वर्णानामनेकत्वेन तैरेकत्वव्यवहारस्यान्यथानुपपत्तेः । तथा प्रत्येकवर्णा-दनुत्पद्यमानस्यार्थप्रत्ययस्य हेतुत्वं च स्फोटे प्रमाणम् । यदि चानुपूर्वीविशि-ष्टसमूहस्यैकत्वादेकत्वव्यवहारः तेनैव रूपेणार्थप्रत्ययहेतुत्वं च स्वीक्रि-यते तर्हि संयोगविशेषावच्छिन्नावयवसमूहादेवैकत्वव्यवहारजलाहरणा-द्युपपत्त्या घटाद्यवयविमात्रोच्छेदप्रसङ्गः युक्तिसाम्यात् । नन्वेवं युक्तिसाम्याद्वाक्यमपि स्फोटरूपम् एकैकं स्यात् इति चेत् । बाधका-भावे सतीष्टत्वादिति दिक् । भाष्यकारस्तु संक्षेपतो वर्णानां पदत्वं निराकरोति । वर्णा एकेति । अनेकवर्णा एकसमयासम्भवित्वात् परस्परं निरनुग्रहात्मानोऽसंबद्धस्वभावा अतस्ते पदमसंस्पृश्य पदत्वमप्राप्य अत एवार्थमनुपस्थाप्याविर्भूयैव नष्टास्तिरोभूताश्चेतिकृत्वा प्रत्येकमपदस्व-रूपा विवेकिभिरुच्यन्तइत्यर्थः । अत्र स्वरूपग्रहणादवस्थावस्थावतोरभेदेन वर्णानां पदत्वं न निराकृतम् । ननु यदि वर्णाः पदस्वरूपा न भवन्ति तर्हि कथमियन्तो वर्णाः क्रमविशेषावच्छिन्ना अस्यार्थस्य वाचका इति लोकैः संके-त्यन्ते इत्याशङ्कां परिहरति । वर्णः पुनरित्यादिना संकेत्यतइति पर्य्यन्ते-नैकवाक्येन । अयमर्थः । यद्यपि वर्णाः पदात् भिन्नास्तथापि अवस्थावस्था-वतोरभेदस्यापि सत्त्वादेकैकोऽपि वर्णः पदात्मा पदाभिन्नो भवति बीजा-ङ्कुरादिरिव वृक्षाभिन्नो ऽत एव पदरूपेण सर्वपदार्थाभिधानयोग्यतासंप-न्नः । अत्र हेतुमाह । सहकारीति । यदभावे सहकारिणि यानि वर्णान्त-राणि तत्प्रतियोगित्वात् तत्संबन्धित्वात् अनन्तपदरूपतामिवापन्नो भवति । इवशब्दोऽत्र वैश्वरूप्ययोग्यतामात्रप्रतिपादनार्थः । वैश्वरूप्यप्रकार-माह । पूर्वो गकारः उत्तरयोरिति वर्णद्वयेन गण इत्यादिपदात् व्यावर्त्यते उत्तरश्च विसर्जनीयः । पूर्वेण गौरिति वर्णद्वयेन गौर इत्यादिपदेभ्यो व्यावर्त्य विशेषे गौरिति स्फोटपदे ऽखण्डे तादात्म्येनावस्थापितो भवति इति हेतो-रेवंरूपा बहवो वर्णाः क्रमानुरोधिन आनुपूर्वीविशेषसापेक्षाः पदाभेदतो-ऽर्थसंकेतेनावच्छिन्ना नियमिता भूत्वा सर्वाभिधानसमर्था अपि इयन्त एता-

वत्संख्यका एते गकारादयो गाव * मेवोपस्थापयन्ति इत्यतस्तु तेन प्रकारेण वर्णमुखेन तत्पदमेवाविवेकतः संकेत्यतइत्यन्वयः । तत्र हेतुर्वाच्यस्य वाचकमिति पदमेव हि वाच्यस्य वाचकमुपस्थापकम् अन्यस्यान्यरूपेण संकेते हेतुरेतेषामित्यादि निर्भास इत्यन्तम् । यः पदाख्यो बुद्धिमात्रग्राह्यः स्फोट एतेषां वर्णानाम् अर्थसंकेतेनावच्छिन्नानां तथा समाप्तो ध्वनिजन्यः क्रम आनुपूर्वीविशेषो येषां तादृशानाम् एकोऽभिव इति पदस्य स्वरूपाख्यानम् । समाप्तो वाक्यार्थः । अयं भावः । यथा संयुक्तं कपालद्वयं जलाहरणहेतुरित्यविवेकतो बालकेभ्य उपदिश्यते पटादिभ्यो घटस्य व्यावर्तकान्तरासंभवात् । ततश्च बालकः कपालाविवेकेन घटस्यैव जलाहरणहेतुत्वं गृह्णाति एवमेव स्फोटान्तरव्यावर्त्तनाय वर्णाविवेकेनैव स्फोटे संकेतोपदेशः संकेतग्रहश्च भवतीति न वर्णेषु संकेततानुपपत्तिरिति । त्रिविधं शब्दं प्रदर्श्येदानीं तेषां मध्यात्संकेतकारणं† प्रतिपादयति । तदेकमिति । प्रतीयतइत्यनेनान्वयः । अयमर्थः । यद्यपि तत्पदं स्फोटाख्यम् एकमेव न तु वर्णवदनेकम् एकत्वे प्रमाणमेकबुद्धिविषयमिति तथा वक्तुरेकेनैव प्रयत्नेन ध्वन्यादिद्वारोत्पादितं वर्णास्तु प्रयत्नभेदेनाप्युत्पद्यन्ते तथा अभागं निरंश, वर्णसमूहस्तु वनवत् सांशः तथाऽक्रमम् एकदैवोत्पद्यमानं न तु वर्णवत् क्रमेण, अत एभिर्हेतुभिर्वर्णेभ्यो भिन्नं किं च बौद्धं बुद्धिमात्रग्राह्यं तथान्त्यवर्णस्य प्रत्ययरूपव्यापारेणाभिव्यक्तं वर्णास्तु नैवं तथापि परप्रतिपिपादयिषया वक्तृभिरभिधीयमानैः श्रोतृभिश्च श्रूयमाणैर्वर्णैरेवंरूपैः सिद्धवत्परमार्थवदन्योन्यसंप्रतिपत्त्या संवादेन प्रतीयते व्यवह्रीयते । न तु वर्णेभ्योन्येन रूपेण, तत्र हेतुरनादिवाग्व्यवहारवासनावशीकृतया लौकिकबुद्ध्येति । अत्राभिधीयमानैरित्यनेन वागिन्द्रियविषयवर्णाविवेकः पदस्येति । श्रूयमाणैरित्यनेन श्रोत्रविषयकशब्दाविवेकः पदस्येति बोध्यम् । तदेवं त्रिविधशब्दानामन्योन्याध्यासात्संकरो दर्शितः । इदानीं त्रिविधशब्देनार्थप्रत्यययोरध्यासं प्रतिपादयितुं शाब्दव्यवहारस्य संकेतग्रहमूलकत्वमाह । तस्येति । तस्य पदस्य प्रविभागो विषयव्यवस्था संकेतग्रहादेव भवति । प्रविभाग-

* गामिति सूचितम् । रा० शा० । † मध्यादेकं संकेतकारणमिति पा० २ ।

मेवाह । एतावतामिति । एतावतां वर्णानाम् एवंजातीयक एवमानुपूर्वीको ऽनुसंहारो मिलनमेतस्यार्थस्य वाचक उपस्थापक इत्येवंरूपो विभाग इत्यर्थः । एकस्यार्थस्येति पाठे ऽर्थविशेषस्येत्यर्थः । संकेतशब्दार्थमाह । संकेतस्त्विति । अध्यासः संकेतकर्त्तुराहार्यारोपः । आरोपिताभेद इति यावत् । तस्यैव च ध्यानं पदार्थोपस्थापकं तत्राधुनिकनामादिकल्पनाख्या- वर्त्तनाय स्मृत्यात्मक इति विषयविषयिणोरभेदात् पाणिन्यादिस्मृत इत्य- र्थः । न च कल्पिताभेदस्यासतः कथं संकेतत्वमिति वाच्यम् । असत्ख्यात्य- नभ्युपगमेनान्यत्र सत एवाभेदस्यान्यत्र कल्पनादिति । अध्यासस्य संकेतत्वे प्रमाणमाह । यो यं शब्द इत्यादिना भवतीत्यन्तेन । ओमित्येकाक्षरं ब्रह्मे- त्यादिः शास्त्रेषु कम्बुग्रीवादिमान् घट इत्यादिर्लोके च पदपदार्थयोरभे- दारोप एव संकेतो दृश्यते इत्यर्थः । ओमित्यादिशब्दवाच्यत्वलक्षणायां प्रमाणाभावात् । अत एव कोशेषु अमरा निर्जरा देवा इत्यादिना शब्दार्थ- योरारोप्यमाणाभेद एव संकेतो दृश्यतइति । अत एवैतेनानाद्यभेदारो- पेणाभिन्नो मन्त्रार्थयोरभेदोपासनामुपदिशन्ति । मीमांसकाश्च मन्त्रमयीं देवतामाहुः । या तु अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छाविषयत्वं शक्तिरिति तन्त्रान्तरे लक्षणा सा ऽप्रामाणिकी लक्षणादिसाधारणी च । अपि चेश्वरमजानतोपि शब्दार्थप्रत्ययो दृश्यते तथा पदपदार्थयोरभेदेन संकेतोपि न युज्यतेत्यादिदोषो बोध्यः । इदानीमुक्तसंकेतबुद्धिनिमित्तकः त्रयाणां संकेत इत्याह । एवमेत इति । एवं संकेतबुद्धेः कारणात् एते त्रिविधाः शब्दा अर्थप्रत्ययौ च संकीर्णावविविक्तौ च तत्र संकेतग्रह एव शब्दार्थयोरितरेतराध्यासः शब्दार्थयोस्तु प्रत्ययेन सहैकाकारत्वादन्योन्याध्या- सः प्रसिद्ध एवेति भावः । संकराकारमाह । गौरिति । य इति । स एव शब्दादीनां तत्त्वज्ञो नान्य इत्यर्थः । वर्णध्वनिपदानामन्योन्यसंकरवदिदानीं पदवाक्ययोस्तदर्थयोश्च संकरेणापि शब्दार्थप्रत्ययानां संकरं दर्शयति । सर्वपदेष्विति । वाक्यशक्तिः पदार्थान्तरसहकारेण वाक्यभवनशक्तिः । तथा च वृक्ष इत्यादिपदानां वृक्षोस्ति वृक्षश्चलति वृक्षश्छिद्यतइत्यादि- वाक्यैः संकरोऽविवेक इति भावः । पदेषु वाक्यशक्तिमुदाहरति । वृक्ष

इत्युक्तइति । एव इत्युक्ते सत्याकाङ्क्षापूरणार्थे योग्यताविवशादस्तीति शब्दो गम्यते ऽध्याह्रियतइत्यर्थः । तथाच पदे वाक्यसंकर इति भावः । ननु शब्दाध्याहारो न संभवति एकस्मिन्नेवार्थे शब्दानामानन्त्यात् शब्दवि-शेषानुमापकलिङ्गाद्यनुपस्थितेरिति चेत्, न । स्वेच्छया स्वयं कल्पितेन केनाप्याकाङ्क्षापूरकशब्देन वक्तृतात्पर्यविषयार्थबोधसंभवात् । अर्थविशे-षानुमाने तु योग्यताकाङ्क्षातात्पर्यादिकमेव लिङ्गमस्ति, एतदेवाह । न सत्तामिति । योग्यताप्रदर्शनेनाकाङ्क्षातात्पर्यादयोऽप्युपलक्षिताः केवलयो-ग्यताया अर्थान्तरसाधारण्यादिति । उदाहरणान्तरमाह । तथा नहीति । आक्षेपोऽनुमानम् । नन्वेवं कारकवाचकपदानां कुत्रापि प्रयोगो न स्यादि-त्यत्राह । नियमार्थ इति । योग्यतादिभिः सर्वत्रार्थविशेषानुमानं न संभवति अतः कारकाणां सामान्यतोऽनुमितानामपि नियमार्थः कारकान्तरव्यावृत्त्यर्थश्चैत्राग्निना भर्जनमित्यादिपदैश्चैत्राग्निभर्जनानां क-र्तृकरणकर्मणामनुवाद इत्यर्थः । इदानीमध्याहारं विनापि पदवाक्ययोः संकरमर्थाभेदनिमित्तकं दर्शयति । दृष्टश्चेति । छन्दोधीत इति वाक्य-स्यार्थे श्रोत्रिय इति पदस्य तथा प्राणान् धारयतीतिवाक्यस्यार्थे जीवती तिपदस्य च वचनमित्यर्थः ।

> जन्मना ब्राह्मणो ज्ञेयः संस्काराद् द्विज उच्यते ।
> विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते ॥

इतिस्मृतेः । जीवबलप्राणधारणयोरित्यनुशासनाच्चेति । ननु यदि वाक्यार्थप्रतिपत्तिः पदादपि भवति तर्हि गुरुतरस्य छन्दोधीत इति वा-क्यस्य वचनं कदापि न स्यादित्याशङ्कायामाह । तत्र वाक्यइति । अत एव पदवाक्ययोः सांकर्यात् संशयस्थले पदं वाक्येन विवरणीयमिति । प्रसङ्गादाह । तत्त इति । यतो वाक्यार्थेऽपि पदरचना भवति अतः संदेहस्थले पदमंशभेदैः वाक्येन विवरणीयमित्यर्थः । अव्याकरणे अर्था-प्रत्ययाद्वाक्यव्यवहरणमेव व्यर्थं स्यादित्याह । अन्यथेति । भवतीति प्रयुक्ते नामाख्यातयोः साम्याद्'द्रवति घटो''भवति भिक्षां देही'त्यर्थद्वयसंदेहे ऽनव-धारितं पदं कथं किमर्थं क्रियायां कारके वा व्याक्रियेत श्रोतुरर्थप्रत्ययार्थं-

भवात् । एवमश्व इति प्रयुक्ते श्वास * मकार्षीर्घोटको वेति संशयो नामा-
ख्यातसारूप्यात् । तथा ऽजापय इति प्रयुक्ते छाग्याः पयः पिबन् शत्रून् † परा-
भावितवान्वेत्यर्थसंशयो नामाख्यातसारूप्याद् इत्यर्थः । तदेवं शब्दार्थ-
प्रत्ययानां संकरं प्रदर्श्येदानीं प्रविभागं दर्शयति । तेषामित्यादिना ।
तत्रादौ शब्दभेदेप्यर्थप्रत्यययोरभेदेन शब्दार्थयोर्भेदं दर्शयति । श्वेतत
इत्यादिना प्रत्ययश्चेत्यन्तेन । क्रिया साध्यरूपोर्थो यस्य स क्रियार्थः । श्वेतत-
इति शब्दः तथाकारकः सिद्धरूपोर्थो यस्य स कारकार्थः श्वेत इति
शब्द एतौ शब्दौ भिन्नौ एतयोरर्थस्तु क्रियाकारकरूप एक एव श्वेतगुण-
मात्रः । एवं प्रत्ययोपि । क्रियाकारकात्मकगुणाकारत्वे प्रमाणं पृच्छति ।
कस्मादिति । उत्तरम् । सोयमित्यभिसंबन्धादिति । श्वेतनं या क्रिया
सोयं श्वेतरूपः कारको गुणो यश्च श्वेततइत्यस्मात् श्वेताकारप्रत्ययः
सोयं श्वेत इत्यस्मादपि श्वेताकारः प्रत्यय इत्यभेदप्रत्यभिज्ञानादित्यर्थः ।
कथं तर्ह्यभेदेन शब्दार्थयोः संकेत इति तत्राह । एकाकार इति । एकाकार
आरोपरूपः प्रत्यय एव संकेत आरोपिताभेद एव संकेतो न तु पारमार्थिका-
भेदरूप इत्यर्थः । ननु शब्दार्थयोरभेदप्रत्ययेन प्रत्यभिज्ञेव कथं न बाध्यते
तत्राह । यस्त्विति । यस्तु श्वेतोर्थः शब्दप्रत्यययोर्विषयत्वात् स्वाभिः
शब्दादिव्यावृत्ताभिरवस्थाभिर्नवपुराणादिभिर्विक्रियमाणत्वाच्च न
शब्दप्रत्यययोः सहगतो न कालतः सहचरो वैयधिकरण्यादित्यर्थः । एवं
देशतो न सहचरो यतः शब्द आकाशे प्रत्ययो बुद्धावर्थस्तु श्वेतगुणादिः
प्रासादादिष्विति भावः । एवमिति । एवं शब्दोपि स्वावस्थाभिः विक्रिय-
माणो नापि अर्थबुद्ध्योः सहचर एवं प्रत्ययोपीत्यर्थः । उपसंहरति । इत्य-
न्यथेति । सूत्रार्थमुपसंहरति । एवं तत्प्रविभागेति । एवं मनुष्यविषये शब्दा
र्थप्रत्ययेषु प्रविभागसंयमात् साक्षात्कारपर्यन्तात्सर्वभूतानां रुतं तदर्थप्र-

† द्विषच्छत्रूनिति पा० २ ।

* गमर्नामिति तु पाठ उचितः श्विधातोर्गत्यर्थतया अश्वासमकार्षीरित्यर्थप्रदर्श-
नासंभवात् । श्वसधातोर्लङि लुङि वा अश्वसः अश्वसीरित्यस्यापत्तेः । मूलोक्तपाठस्तु आग-
मशास्त्रस्यानित्यतया अश्वासमिति अकारप्रश्लेषेण वा कथं चित् योज्य इति रा० शा०

त्ययं च योगी जानाति योगजधर्मस्याचिन्त्यशक्तित्वात् धर्माणां स्वसदृशफलदानस्यौत्सर्गिकत्वाच्चेत्यर्थः । अस्मदादीनां च शब्दार्थप्रत्ययभेदसाक्षात्कारे सत्यपि तस्य साक्षात्कारस्य संयमाजन्यत्वान्न सर्वभूतरुतज्ञानं भवति संयमस्यैव हीयं सिद्धिरिति । एवमुत्तरसूत्रेष्वपि यथास्थलमिदमेव समाधानम् ।

संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम् ॥ १८ ॥

संस्कारसंयमेनेति सूत्रस्यादौ पूरणीयं संयमसिद्धिप्रकरणत्वात् । अत्र ज्ञानसंस्कारवद्रागादिवासना धर्माधर्मावपि ग्राह्यावित्याह । द्वयइति । अमी सूत्रोक्ताः । स्मृतिर्ज्ञानविशेषः क्लेशोऽत्र रागादिरेव अविद्यास्मितयोः स्मृतिमध्यप्रवेशात् । न चाविद्यात एव रागादिसंभवे तत्संस्कारे प्रमाणं नास्तीति वाच्यम् । अविद्यासाम्येऽपि कस्यचिद्दुग्धएव प्रीतिर्न दध्नि कस्यचिद्वैपरीत्यमित्यत्र वासनां विना नियामकान्तराभावेन तत्सिद्धेः । तेषां दृष्टान्तेनाप्रत्यक्षत्वमनात्मधर्मत्वं चाह । तद्इति । अभिसंस्कृता उपचिताः परिणामादिजीवनान्तचित्तधर्मवत् साक्षिभास्याः । चित्तधर्माश्चानात्मधर्मा इत्यर्थः । एतेन धर्मादयः प्रलयेऽपि चित्तएव तिष्ठन्ति तेन चित्तं बीजरूपेण नित्यमित्यायातम् । संस्कारसाक्षात्कारकारणतया संयमं व्याचष्टे । तेषु संयम इति । नन्वज्ञाते संस्कारे संयमो न घटते ज्ञाते च व्यर्थ इति चेन्न । शब्दानुमानाभ्यां सामान्यतो ज्ञाते विशेषज्ञानफलकस्य संयमस्य संभवात् । संस्कारसाक्षात्कारे जायमाने पूर्वजन्मज्ञानं भवतीत्यत्र युक्तिमप्याह । न चैत्यादिना साक्षात्करणमित्यन्तेन । देशो जन्मभूमिर्नगरादिः कालो युगादिः निमित्तं मातापित्रादिः । एतेषां संस्कारविषयतया तदनुभवैर्विना तान्यविषयीकृत्य संस्काराणां साक्षात्कारो न संभवति सविषयकगुणग्रहणस्य विषयोपरागेणैव ज्ञानेच्छादिस्थले दृष्टत्वात् अतः संस्कारसाक्षात्कारे पूर्वजन्मनां देशकालनिमित्तादिरूपाशेषविशिष्टानामपि साक्षात्कारो भवति विषयविधयेत्यर्थः । सूत्रार्थं व्याचष्टे । तदित्थमिति । न केवलं संस्कारसाक्षात्कारात् पूर्वजातिज्ञानमेव अपि तु भाविजन्मज्ञानमपीति स्वयं पूरयति । परत्रापीति । भाविजन्मसंस्काराणामनागतावस्थानां साक्षात्कारादिति विशेषः । संस्कारसाक्षात्करणात्पूर्वादिजन्मान्यशेषविशेषैर्ज्ञायन्त इत्यत्र

Digitized by Google

प्रमाणतया जैगीषव्यावट्ययोः संवादमाह । अन्नेदमाख्यानमिति । अत्र पूर्वजन्मादिज्ञानविषये महासर्गेषु प्राकृतसर्गेषु जन्मक्रमं बाल्ययौवनवार्द्धकादिरूपं तत्परिणामक्रमं च साक्षात्कुर्वतो जैगीषव्यस्य तारकं सर्वविषयकमित्यागामिसूत्रलक्षणीयं विवेकजं ज्ञानमुदभूत् अथानन्तरं तमाहावट्यनामा योगी लिङ्गशरीरमात्रविहारी परीक्षार्थं तनुधरो निर्माणकायं धृत्वा पप्रच्छेत्यर्थः । भव्यत्वात् कुशलत्वादनभिभूतवृत्तिसत्त्वेनेत्यस्याधिकं किमुपलब्धमित्यनेनान्वयः । यथाश्रुते भव्यत्वाख्यजीवन्मुक्त्यनन्तरम् आकाशादिगमनासंभवादिति । संपश्यता उपभुञ्जानेन देवतामनुष्येषु जायमानेनेत्यनेन च तत्रत्यसुखमुपभुञ्जतेत्युपलक्षितं सुखदुःखयोर्मध्ये संसारे किं बहुलमिति पृष्टः स दुःखबहुत्वप्रतिपादनाय सर्वमेव दुःखमित्याह । दशस्विति । अनुभूतं सुखमिति शेषः । सुखस्यापि दुःखत्वं गुणवृत्त्यविरोधाच्चेत्यनेनोक्तम् । प्रधानवशित्वं स्वेच्छया प्रकृतिनियोक्तृत्वं तत्कार्यत्वात्तद्रूपम् ऐश्वर्यसुखं तथा संतोषसुखं संतोषोत्थं स्वाभाविकं सुखं प्रधानवशित्वेन हि कामसमाप्त्या विषयेष्वलंप्रत्ययरूपं वैतृष्ण्याख्यं संतोषमुत्पाद्य चित्तस्य स्वाभाविकं सुखमभिव्यज्यतइति । कैवल्यापेक्षया दुःखमुपपादयति । बुद्धिसत्त्वस्येति । बुद्धिसत्त्वस्यायं धर्मः संतोषाख्योऽलंप्रत्ययः त्रिगुणः सुखादिगुणत्रयवान् सुखादिगुणवांश्च प्रत्ययो बुद्धिपरिणामो हेयपक्षे दुःखपक्षे न्यस्तो मधुविषसंपृक्तान्नवदित्यर्थः । कैवल्यस्य च सुखत्वम् आत्यन्तिकदुःखनिवृत्तिरूपतयोक्तम् । सुखं दुःखसुखात्ययइति मोक्षशास्त्रे परिभाषणात् । निरुपाधिप्रियत्वस्यैव सुखत्वाच्चेति यथा वात्र कैवल्ये सुखशब्दो दुःखनिवृत्त्यादिपरतया निर्णीत । एवं श्रुतिस्मृत्योरपि निर्णयः सर्वशास्त्रेष्वेकरूपव्यवहारौचित्यादिति । नन्वेवं कथं संतोषसुखस्यानुत्तमत्वं श्रुतिस्मृत्युक्तमुपपद्येत तत्राह । दुःखरूप इति । दुःखसाधनतया दुःखरूपस्तृष्णाख्यस्तन्तुर्बन्धकरज्जुहेतुस्ततः तृष्टोर्थो बन्धरूपो यः सम्यक्तया उद्वेजकस्तस्यापगमात् प्रसन्नं वैषयिकदुःखाकलुषितम् अबाधमक्षयं यावद्बुद्धिस्थायि सर्वेषामेवानुकूलं प्रियमिदं संतोषोत्थं प्रधानवशित्वमूलकं सुखमुक्तं शास्त्रेष्वित्यर्थः ।

प्रत्ययस्य परचित्तज्ञानम् ॥ १९ ॥

व्याचष्टे । प्रत्ययइति । प्रत्ययस्य रागादिमत्याः स्वकीयचित्तवृत्तेः संयमेनाश्रयादिरूपैरशेषविशेषैः साक्षात्कारणात्ततस्तस्माच्चित्तात् परस्य भिन्नस्य चित्तान्तरस्यापि अशेषविशेषतो ज्ञानं संकल्पमात्रेणैव भवतीत्यर्थः । ननु यथा संस्कारसाक्षात्कारे तद्विषयदेशादिकमपि साक्षात्क्रियते किमेवं चित्तान्तरसाक्षात्कारे तद्विषयोपि नियमेन साक्षात्क्रियते न वेति जिज्ञासायामाह । न च सालम्बनमिति । तत् परचित्तज्ञानं सालम्बनं न नियमेन भवति तस्य परचित्तालम्बनस्य संयमविषयेन स्वचित्तेनाविषयीकरणादित्यर्थः । तत्प्रतिपादकशास्त्राभावाच्चेत्यपि द्रष्टव्यम् । न च सालम्बनमित्युक्तं विवृणोति । रक्तमिति । तस्येत्यादि हेतुं विवृणोति । परचित्तस्येति । उपसंहरति । परप्रत्ययेति । तस्मात्परप्रत्ययमात्रं योगिचित्तस्यालम्बनीभूतं न तु परचित्तस्यालम्बनमपीति तु शब्दार्थः ।

कायरूपसंयमात् तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासंप्रयोगेन्तर्द्धानम् ॥ २० ॥

कायस्येति । स्वशरीरस्य रूपे संयमादशेषविशेषतः कारणादिभिः साक्षात्कृते सति संकल्पमात्रेण स्वकीयरूपस्य दृश्यताशक्तिं परचक्षुःसंयोगयोग्यतां प्रतिबध्नाति ततश्च परचक्षुःप्रकाशैस्तत्किरणैरसंयोगेनान्तर्धानमुत्पद्यते योगिनः । दिवान्धेनेव केनाप्यसौ न दृश्यतइत्यर्थः । सूत्रकारस्य न्यूनतां परिहरति । एतेनेति । एतेन रूपान्तर्द्धानेनशास्त्रान्तरसिद्धं शब्दाद्यन्तर्द्धानमप्युपलक्षितं वेदितव्यमित्यर्थः । यदा कायस्य शब्दस्पर्शरसगन्धसंयमात्तेषां ग्राह्यशक्तिस्तम्भो भवति तदा श्रोत्रादिसंनिकर्षप्रतिबन्धाद्योगिनः शब्दादिकं बधिरेणेव केनापि न श्रूयतइति भावः ।

सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्तज्ञानमरिष्टेभ्यो वा ॥ २१ ॥

व्याचष्टे । आयुरिति । आयुष्करकर्मज्ञानादेव झटित्यझटितिरूपाभ्यामपरान्तस्य मरणस्य ज्ञानं भवति अतः कर्मणो विशेषणमायुर्विपाकमिति । सोपक्रमं तीव्रवेगेन फलदातृ । यथा कलिकालीनप्रजासु बाल्ययौवनवार्द्धकाद्यवस्थानां झटित्येवारम्भकमायुष्करं कर्मेति । निरुपक्रमं च मन्दवेगेन फलदातृ । यथा सत्यादिकालीनप्रजासु बाल्ययौवनवार्द्धकाद्यवस्थानां विलम्बेन आरम्भकम् आयुष्करं कर्मेति । तथा च सोपक्रमस्य साक्षात्करणात् शीघ्रमरणस्य ज्ञानं निरुपक्रमस्य साक्षात्करणाच्च विलम्बेन मरणस्य ज्ञानं भवतीति विभागः । सोपक्रमनिरुपक्रमकर्मणोर्दृष्टान्तमाह । तत्र यथेत्यादिना । वितानितं विस्तारितम् । ह्रसीयसा स्वल्पेन । यथाक्रममुभयोरपरं दृष्टान्तद्वयमाह । यथा वाग्निरित्यादिना । कक्षे तृणे, क्षेपीयसा शीघ्रेण । उपसंहरति । तदैकेति । जन्मान्तरभोगस्य कर्मणो ज्ञानं वर्त्तमानदेहस्यापरान्तज्ञानहेतुरत उक्तमैकभविकमिति । भुज्यमानकर्मभिः सहैकभविकमित्यर्थः । सूत्रार्थमाह । तत्संयमादिति । ऐकभविकायुष्ककर्मसंयमात्सोपक्रमादिरूपविशेषावधारणे सति पूर्वान्तापेक्षया अपरान्तस्य मरणस्य शीघ्रत्वाशीघ्रत्वरूपैर्ज्ञानं भवति अरिष्टेभ्यो वेत्यर्थः । अरिष्टज्ञानस्यापीदं फलमिति सूत्रे प्रसङ्गादेवोक्तं संयमसिद्धीनामेव प्रकृतत्वादरिष्टानि मरणचिह्नानि च योगिना समाध्यवधानार्थम् अवधारणीयानि । तानि व्याचष्टे । त्रिविधमिति । पिहितकर्णः स्वदेहान्तर्घोषं वह्निज्वलनशब्दवत्क्वचिद्विशेषं न शृणोतीत्येकमरिष्टमाध्यात्मिकम् । अवष्टब्धे अङ्गुल्यादिना भ्रमिते चक्षुषि वह्निकणतुल्यं ज्योतिर्न पश्यति इत्यपरम् । अन्यान्यपि विविधान्यरिष्टानि वसिष्ठमार्कण्डेयादिभिरुक्तानि दिनमाससंवत्सरादिभेदैर्मृत्युचिह्नानि संक्षेपत आह । विपरीतं वा सर्वमिति । सर्वं श्वासप्रश्वासादिकमिति । अनेन वा अरिष्टेन वेत्यर्थः ॥

मैत्र्यादिषु बलानि ॥ २२ ॥

मैत्र्यादिषु संयमात् बलान्यवन्ध्यानि वीर्याणि भवन्ति परेषु मैत्र्याद्यर्थं प्रयत्नो विफलो न भवतीति यावत् । तदेतद्व्याचष्टे । मैत्रीकरुणेति । मैत्र्यादित्रयविषयिण्यस्तिस्रो भावनाः संयमा भवन्ति तत्र सुखितेषु

मैत्री एवंस्वरूपा स्वमादिसाधनिकेत्यमेव विशेषैर्मैत्रीं भावयित्वा साक्षात्कृत्य च व्याख्यातं मैत्रीबलं लभत इत्यर्थः । एवं करुणामुदितयोरपि व्याख्येयम् । यद्यपि भावनाशब्दः सूत्रे नास्ति तथापि तन्त्रान्तरानुसारात्स्वयं व्याख्यातः । प्रथमपादोक्तभावनाशब्दवत् अत्राप्युत्पादनार्थमिति भ्रमो माभूत् इत्येतदर्थं प्रकृते तन्त्रान्तरीयभावनाशब्दस्यार्थं स्वयमाह । भावना समाधिरिति । भाव्यते फलमनेनेति व्युत्पत्त्या भावनाचिन्तनयोरेकार्थतया वेति भावः । ध्यानधारणयोः संग्रहाय पुनराह । यः स संयम इति । यः स पूर्वेषु सूत्रेषु प्रक्रान्त इत्यर्थः । भावनाशब्दोक्तसमाधिना ध्यानधारणयोरपि ग्रहणं तन्त्रान्तर इति भावः । भावनातः समाधिरिति पाठे तु अतः सूत्रात् पूर्वाचार्योक्तादत्र भावना समाधिरेवेत्यर्थः । बलशब्दं विवृण्वानः सूत्रार्थमुपसंहरति । ततो बलानीति । ननु प्रथमपादोक्तोपेक्षा कथं मैत्र्यादिषु इत्यत्रादिशब्देन संगृहीता तत्राह । पापशीलेष्विति । पापशीलेषु मैत्र्यादिशून्यतारूपम् उपेक्षामात्रं न तु तस्यामभावरूपिण्यामुपेक्षायां प्रतियोगितत्त्वातिरिक्तः कश्चन विशेषोऽस्ति यस्य साक्षात्कारार्थं भावना स्यादतश्च तस्यामुपेक्षायां नास्ति समाधिः संयमोपेक्षित इत्यर्थः । शेषं सुगमम् ।

बलेषु हस्तिबलादीनि ॥ २३ ॥

हस्त्यादिबलेषु संयमाद्धस्त्यादिबलानि भवन्तीत्यर्थः । भाष्यं सुगमम् ।

प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानम् ॥२४॥

व्यवहितमावृतं विप्रकृष्टं दूरवर्त्ति । व्याचष्टे । ज्योतिष्मतीति । ज्योतिष्मती बुद्धिपुरुषान्यतरसाक्षात्काररूपिणी मनसः प्रवृत्तिः प्रथमपादोक्ता तस्याश्च य आलोकस्तत्कालीनो यः सत्त्वप्रकाशस्तं योगी सूक्ष्मादिष्वर्थेषु विन्यस्य च साक्षात्करोतीत्यर्थः । अत्र न्यासमात्रवचनात् तेषु संयमापेक्षा नास्ति चक्षुर्न्यासमात्रेण घटदर्शनवद्बुद्धसत्त्वप्रतिसन्धानमात्रेणैव सूक्ष्मादिसाक्षात्कारो भवतीति भावः । परम्परया बुद्ध्यादिविषयकसंयमसाध्यत्वेनैव चास्याः सिद्धेः संयमसिद्धिमध्ये निर्वचनमिति ॥ (शेषमग्रे)

काशीस्थराजकीयप्रधानपाठशालायां { सांख्ययोगाध्यापकस्तात्याशास्त्र्यपरनामा पटवर्धनोपाह्वो रामकृष्णशास्त्री । कौशिकशास्त्राध्यापकः केशवशास्त्री च ।

सटीकसंक्षेपशारीरकम्।

(Continued from page 336. Vol. VI.)

मू० ॥ अदृष्टदोषं परिहृत्य शंसतः
कलञ्जमास्वाद्य सुखित्वमात्मनः ॥
पुमानबोधोपहतः समीहते
तदीहिताभावपरा निषेधगीः ॥ ४०६ ॥

टी० ॥ उच्यते। यदि निषेधवाक्यस्थलिङादिना कार्यमुपस्थाप्येत तदा तस्य कथं चिदुक्तरीत्या नञर्थो विषयः कल्प्येत। न त्वेतदस्ति। लोके धात्वर्थातिरिक्तकार्याभावेन तस्य च धातुसिद्धत्वेन लिङादेस्तदर्थत्वाभावात्। न च धात्वर्थ एव कार्यतया लिङाद्यर्थ इति वाच्यम्। कृतिसाध्यताया एव कार्यतात्वेऽतिप्रसक्तायास्तस्या लिङाद्यर्थत्वायोगात्। न च कृतीप्सितता तस्य कार्यतेति वाच्यम्। बहुक्लेशसाध्यतया तस्य स्वतस्तदयोगादिष्टसाधनत्वेन तस्य कृतीप्सितत्वेऽवश्यं प्रथमोपस्थितस्य तस्यैव प्रवर्तकत्वं लिङर्थत्वं चेति न कार्यं लोके लिङर्थ इति कथं निषेधवाक्यस्थलिङादिना तत्राविदितसंगतिकेन तदुपस्थाप्येत। तस्माच्छ्रेयःसाधनत्वमेव लोकव्युत्पत्तिबलेनात्रापि लिङर्थः कल्प्यत इति तदभाव एव नञर्थः। न चैवं कलञ्जभक्षणादेः सुखसाधनत्वानुभवविरोधः। यद्यपि प्रवृत्तौ कृतिसाध्यश्रेयःसाधनत्वज्ञानं कारणम्। तथापि तस्य श्रेयसः प्रबलानर्थसंबन्धित्वज्ञाने प्रवृत्तिर्न भवतीति तदज्ञानं प्रतिबन्धकाभावतयाऽवश्यं वक्तव्यमिति निषिद्धे प्रवर्तमानस्यापि तत्साध्यसुखे बलवदनर्थसाधनत्वाज्ञानं वाच्यम्। एवं च सामग्रीसमाजादिदं बलवदनिष्टाननुबन्धीष्टसाधनमिति भ्रमो भवतीति भ्रान्तिप्राप्तं तदेव विशिष्टेष्टसाधनत्वं निषेधवाक्येन नञर्थान्वयाय लक्षयानूद्य निषिध्यते भोजनादिव्यापारे तस्य लिङ्वाच्यसंबन्धित्वावगमादिति नानुभवविरोध इत्याशयेनाह। अदृष्टदोषं परिहृत्येति। यतः पुमान्कलञ्जभक्षणादेर्बलवदनिष्टानुबन्धित्वाज्ञानेनोपहतः सन् समीहते प्रवर्तते ततश्चात्मनः स्वस्य कलञ्जं विषलिप्तशरहतमृगमांसमास्वाद्य

भक्षयित्वा अदृष्टदोषं परिहृत्य अनादृत्य सुखित्वं शंसतः प्रार्थयतस्तस्येहि-तमभिलषितं यद्बलवदनिष्टाननुबन्धीष्टसाधनत्वं तदभावपरा निषेधगी-रिति संबन्धः । ममानेन कलञ्जभक्षणेन बलवदनिष्टाननुबन्धीष्टं भव-त्विति प्रार्थयतस्तस्याभिलषितसुखसाधनत्वं लिङादिनाऽनूद्य निषेधवाक्यं निषेधति । यतः पुमानज्ञानादेव तच्चिकीर्षापूर्वं करोतीत्यर्थः । अबोधोपहत इत्यनेन भ्रान्तिप्राप्त इति प्रागुक्तः प्रसज्य प्रतिषेधविषयो दर्शितः ॥ ४२९ ॥

मू० ॥ नरकपातविवर्जनवर्त्मना
भवतु विप्रवधात्परमार्थतः ॥
मम सुखित्वमितीच्छति यत्पुमा-
न्न तदितीह निषेधगिरोच्यते ॥ ४३० ॥

टी० ॥ अदृष्टदोषमित्याद्युक्तमेव विवृणोति । नरकपात इति । नरक-पातस्य विशेषेण वर्जनं यस्मात्तेनोपायेन इत्थंभावे तृतीया नरकपातवर्जना-भिमानमात्रव्यावृत्तये परमार्थत इत्युक्तम् । भवति ह्यत्यन्ताविवेकिनः तीव्ररा-गवशात्तादृशाभिमानः । तत्तादृशसुखहेतुत्वम् । इह विप्रवधादौ ॥ ४३० ॥

मू० ॥ प्रमाणतो नास्ति निषिद्धकर्मणः
फलस्पृहाऽदृष्टभयं विना तव ॥
भ्रमादबोधप्रभवात्प्रवर्तते
न तातमानेन फलस्पृहाऽथ ते ॥ ४३१ ॥

टी० ॥ नन्वनुभवसिद्धं सर्वेषां कलञ्जभक्षणादेस्तादृशसुखसाधनत्वं कथं नञा निषेद्धुं शक्यमित्याशङ्क्य भ्रान्तिसिद्धमेव तत्र प्रमाणासिद्धं तत्प्रमा-णस्य श्रुतेस्तत्राभावात्, प्रत्यक्षादेश्च पारलौकिकानर्थाभावावेदने असम-र्थत्वादित्याशयेनाह । प्रमाणत इति । फलस्पृहा फलसाधनत्वम् । अदृ-ष्टभयं विना पारलौकिकबलवद्दुःखभयपरिहारेण । कथं तर्हि तत्र प्रवृत्ति-रिति तत्राह । भ्रमादिति । बलवदनिष्टानुबन्धित्वाज्ञानप्रभवादिदं बलवदनिष्टाननुबन्धीति भ्रमादित्यर्थः । उपसंहरति । न तातेति । यथा बालं माताऽनिष्टान्निवर्तयति । एवं श्रुतिरपि त्वदभिमतफलसाधनत्वमत्र नेति निवारयतीति तातेत्यनेन सूचितम् ॥ ४३१ ॥

Digitized by Google

मू० ॥ इति श्रुतिः शास्ति निषिद्धकर्मणि
प्रवृत्तिमन्तं पुरुषं नञन्विता ॥
न चाऽयमर्थोपहृतः प्रमान्तरै-
र्न हि प्रमाणैरपरैर्विरुद्ध्यते ॥ ४३२ ॥

टी० ॥ निषिद्धेषु वर्णितफलसाधनत्वस्य भ्रमसिद्धत्वोपपादनफलमाह । इतीति । उक्तप्रकारेणेत्यर्थः । श्रुतिः निषेधवाक्यं शास्ति प्रतिपादयति । निषेधाधिकारिणमाह । निषिद्धेति । प्रवृत्तिमन्तं प्रवृत्त्युन्मुखम् । नचैवं सति मानान्तरविरोध इत्याह । न चेति । अयं बलवदनिष्टाननुबन्धीष्टसाधनत्वाभावः । अपहृतः बाधितः । तत्राविरोधे हेतुमाह । न हीति । विशेष्यांशस्य तत्र सत्त्वेऽपि विशेषणांशस्याऽभावेन तद्विशिष्टस्याप्रामाणिकत्वाद्विशेष्यमात्रग्राहिभिर्न विरोधः । यद्यपीष्टसाधनत्वमेव लिङर्थ इति वक्ष्यति । तथापि नञर्थान्वययायात्र वर्णितभ्रान्तिप्राप्तं विशिष्टेष्टसाधनत्वमेव लिङा लक्षितं नञा निषिध्यते । न चैवं नञ एव निवृत्तौ लक्षणाऽस्त्विति वाच्यम् । प्रतिपिपादयिषितार्थतया प्रधाननञनुरोधे तदर्थप्रतियोगितया गुणभूतश्रेयःसाधनत्ववाचिलिङादावेवानुवादेन लक्षणाया न्याय्यत्वाल्लक्षितं च तत्तत्राप्रामाणिकमेवेति न प्रमाणान्तरविरोध इति भावः । अथ वा प्रकृतश्रुतिर्न स्वार्थपरेत्यपि नाशङ्कनीयमित्याह । न चेति । अव्ययानामनेकार्थत्वादपशब्द उपशब्दार्थे मानान्तरेण प्रापित इत्यर्थः । अनेनानुवादकत्वविरस्तम् । गुणवादाशङ्कापि नास्तीत्याह । न हीति । विरोधिप्रमाणान्तरानिरूपणादित्यर्थः ॥ ४३२ ॥

मू० ॥ भुजङ्गभोगं सुकुमारशीतलं
निदाघसंतापनिवृत्तये शिशुम् ।
भ्रमादुपादित्सुमुदीक्ष्य कातरा
निवर्तयेत्तज्जननी यथा तथा ॥ ४३३ ॥

टी० ॥ न तात मानेनेत्यनेन सूचितदृष्टान्तानुवादपूर्वकं दार्ष्टान्तिकं विशदयति । भुजङ्गभोगमिति द्वयेन । सर्पशरीरमित्यर्थः सुकुमार-

शीतलं मृदु शीतलं चेत्यर्थः । निदाघस्तीव्रातपस्तत्कृतो यः शरीरस्य संतापस्तन्निवृत्तये भ्रमाद्बलवदनिष्टाननुबन्धितया निवृत्तिसाधनमिति भ्रमादुपादित्सुं वह्निमेच्छुं कातरा दुःखपरवशा निवर्तयेत् मा गृहाणेति हस्तेन निवारयेत् यथा तथेत्युपरि श्लोके योजनीयम् ॥ ४३३ ॥

मू० ॥ भ्रमादनर्थस्य निदानमादरा-
त्कृतार्थताये लशुनादिभक्षणम् ॥
नञन्विता वैदिकचोदनाप्यसौ
विधित्वमालम्ब्य निवर्तयिष्यति ॥ ४३४ ॥

टी० ॥ लशुनादिभक्षणादिविधित्वमालम्ब्यासौ वैदिकचोदनापि निवर्तयिष्यतीति संबन्धः ॥ ४३४ ॥

मू० ॥ क्रियानुप्रवेशं विना प्रागभावः
प्रसक्तक्रियाया न निर्वोढुमीशः ॥
गुणद्रव्यवन्नित्यनिष्पन्नभावा-
त्पदत्वं नियोगस्य भावार्थवद्वः ॥ ४३५ ॥

टी० ॥ एवं स्वमते निषेधवाक्यस्थनञः प्रसज्य प्रतिषेधार्थत्वमुपपाद्य परमतं दूषयितुमारभते । तत्र किं नञ्लक्षितो निवृत्तिक्रियाविशेषो विधीयते किं वा तन्मुख्यार्थः। नाद्यः लक्षणाया अन्याय्यत्वादित्युक्तम् । द्वितीयेपि प्रत्ययार्थनियोगाभावं न तावद्विधातुं शक्नोति । नियोगाभावस्य नियोगगोचरतालक्षणविधेयत्वासंभवादतो धात्वर्थाभाव एव त्वया विधेयो वाच्यः तत्रापि न तद्ध्वंसः प्रसक्तक्रियानिष्पत्तिं विना तदयोगात्तस्यां च सत्यां निषेधवैयर्थ्यादिति तत्प्रागभाव एव विधेयः स्यात्सोऽपि न स्वरूपेण विधेयो भावार्थत्वादनादिसिद्धत्वाच्चाधिकरणज्ञानस्यापि वक्ष्यमाणज्ञानविधिनिरासेनैवाविधेयत्वात् । तस्माद्धात्वादिवत्क्रियोपरक्तत्वाकारेण तद्विधेयत्वं वाच्यं न तस्य तदस्तीत्याह । क्रियानुप्रवेशमिति । यः प्रसक्तक्रियायाः प्रागभावः क्रियासंबन्धं विना नियोगस्य पदत्वं विषयत्वं गुणद्रव्यवन्निर्वोढुं न शक्नोति नित्यनिष्पन्नभावाद्भावार्थवदपि वेद इति संबन्धः ।

गुणः आरुण्यादि । द्रव्यं दध्यादि । न च प्रकृतक्रियाभावो भावार्थव्यापार-
रूपो न वा दध्यादिवत् क्रियासाधनत्वेन क्व चित्प्रमितः येन विधेयः
स्यादिति भावः ॥ ४३५ ॥

मू० ॥ न पाल्यत्वयोगादलं भूष्णुभावो
यतः पालनं श्रूयते नात्र वाक्ये ॥
न खल्वश्रुतं गृह्यते न्यायहाना-
द्यथा न श्रुतं त्यज्यते तद्भयेन ॥ ४३६ ॥

टी० ॥ ननु प्रागभावस्यापि परिपालनक्रियायोगेन विधेयत्वं भवि-
ष्यतीत्याशङ्क्याह । न पाल्यत्वयोगादिति । अलमत्यर्थं भूष्णुभावः भवन-
कर्तृत्वं साध्यत्वमिति यावत् । प्रागभावस्येति शेषः । कुतो नेत्यत आह ।
यत इति । नन्वश्रुतमपि तदर्थं लक्ष्यताम्, न श्रुतसंभवे लक्षणाया अयो-
गादित्याह । न खल्विति । तत्र दृष्टान्तमाह । यथा न श्रुतमिति । तद्भयेन
श्रुतपरित्यागायोगरूपन्यायहानभयेन अतस्तदुभयपरिहाराय परिपाल्यत-
याऽपि प्रागभावो न विधेयः । किं च तत्प्रवर्तकरागे सति नियोगशतेनापि
प्रागभावपरिपालनं न संभवत्येव, रागनिवृत्तिश्च विना न दोषदर्शनं संभव-
तीति किं नियोगेनेति भावः ॥ ४३६ ॥

मू० ॥ उदासीनता च श्रुता नञ्पदार्थो
नियोगे सति त्याज्यतां याति सद्यः ॥
अतद्योग्यभावादयोग्यः पदार्थो
न वाक्यार्थभागिष्यते जैमिनीयैः ॥ ४३७ ॥

टी० ॥ निषेधवाक्ये श्रुतं दर्शयत् प्रकृते तत्त्यागस्याश्रुतकल्पना-
याश्च प्रसङ्गं विवृणोति । उदासीनेति । चकारान्नियोगस्याश्रुतत्वं सूच-
यति । लिङादेरतदर्थत्वान्नियोगे सतीत्यनेनाश्रुतकल्पनां सूचयति ।
त्याज्यतामिति । श्रुतहानिरुक्ता । अस्तु तर्हि श्रुतस्यैवौदासीन्यस्य विधि-
रिति न तद्वद् द्वयप्रसङ्ग इत्याशङ्क्य तस्याभावार्थत्वादिति प्रागुक्तं मनसि
निधायाह । अतद्योग्यभावादिति । औदासीन्यस्य धात्वर्थत्वाभावेन
नियोगविषयतायोग्यताशून्यत्वादित्यर्थः । ततः किं तत्राह । अयोग्य इति ।
वाक्यार्थभाक् वाक्यार्थान्वयी जैमिनीयैरपि ॥ ४३७ ॥

मू० ॥ निषिद्धक्रिया प्रत्यवायाय नेति
स्वकर्णौ जनः प्रोर्णुते पापभीरुः ॥
समाकर्ण्य दुर्भाषितं पार्श्ववर्ती
न पापवरं किं चिदेतादृगन्यत् ॥ ४३८ ॥

टी० ॥ एवं निषेधवाक्यस्य गुरुमतानुवर्त्तिकल्पितनियोगार्थत्वं संदूष्य निषिद्धानुष्ठानस्य प्रत्यवायजनकत्वं नेति तदुक्तमपि प्रथमं महाजनसंवदनविरोधेन दूषयति । निषिद्धक्रियेति । प्रोर्णुते गाढं पिधत्ते पार्श्ववर्त्ती जनः । निषिद्धक्रिया प्रत्यवायाय नेति प्राभाकरस्य दुर्भाषितं समाकर्ण्य पापभीरुः सन् स्वकर्णौ प्रोर्णुते तस्य जनस्याशयमाह । न पापावरमिति । एतादृशमन्यत्किं चिदपि दुष्टवचनं नेत्याशयेनेत्यर्थः । अतः सकलमध्यस्थमहाजनव्यवहारविरोधादतितुच्छमिदं मतमिति भावः ॥ ४३८ ॥

मू० ॥ निषिद्धक्रिया प्रत्यवायाय नो चे-
त्तदा दुःखमाकस्मिकं सर्वपुंसाम् ॥
सुखं पुण्यमूलं यथा सर्वपुंसां
तथा दुःखमप्यस्तु वः पापमूलम् ॥ ४३९ ॥

टी ॥ किं च निषिद्धक्रियायाः पापजनकत्वेनुभूयमानं दुःखमाकस्मिकं स्यात् तस्य तदेकनिदानत्वादिति सदृष्टान्तमाह । निषिद्धक्रिया प्रत्यवायाय नो चेदिति । आकस्मिकमकारणकमित्यर्थः । वो युष्माकमपि संमतमिति शेषः । भवद्भिरपीदमवश्यमङ्गीकार्यमित्यर्थः ॥ ४३९ ॥

मू० ॥ निषिद्धक्रियां चोदितस्याक्रियां वा
विना नास्ति पापस्य निष्पत्तिहेतुः ॥
ततस्तद्द्वयं पापनिष्पादकत्वा-
द्भवेत्प्रत्यवायस्य नित्यं निदानम् ॥ ४४० ॥

टी० ॥ ननु निषिद्धक्रियायाः पापामूलत्वेऽपि विहिताकरणनिमित्तपापेन दुःखं भविष्यतीत्याह । निषिद्धक्रियामिति । चोदितस्य नित्यस्याक्रियाम् अननुष्ठानं यत इत्यादौ योजनीयम् । तद्द्वयं निषिद्धक्रि-

या विहितानानुष्ठानं च प्रत्यवायस्य दुःखस्य। यदि विहिताकरणं पापज नकं तव मते स्यात्तदा निषिद्धानुष्ठानमपि पापजनकं कथं न स्यात्फलवर्जनफलाकाङ्क्षाया निषिद्धाद्विवर्तमानेऽपि तुल्यत्वात् नियोगपुरुषार्थतायाश्च नित्यनियोगेऽपि संभवादित्युभयं तुल्यमेवेति भावः ॥ ४४० ॥

मू० ॥ निषिद्धक्रिया दुःखनिष्पत्तिहेतु-
र्भवेल्लक्षणं चोदितस्याक्रियाऽस्य ॥
अभावान्न भावस्य निष्पत्तिरिष्टा
भवेल्लक्षणं ज्ञायमानस्त्वभावः ॥ ४४१ ॥

टी० ॥ विहिताकरणस्य पापनिदानत्वमापातदृष्ट्याङ्गीकृतं वस्तुतस्तु निषिद्धक्रियैव पापहेतुः तस्या अनर्थहेतुतायां प्रमाणस्य वक्ष्यमाणत्वात् विहिताकरणं तु पापहेतोर्लक्षणमात्रं न तु स्वयं पापजनकम् । तदुक्तं भट्टपादैः । अकुर्वन्विहितं यस्तु करोत्यन्यदचेतनः। प्रत्यवायोऽस्य तेनैव नाभावेन स जन्यत इति । विहितमकुर्वन् लक्षणार्थे शतृप्रत्ययः । लक्ष्यमेवाह । तत्काले यदन्यदविवेकी करोति निषिद्धमनिषिद्धं वा तत एवास्य प्रत्यवायः स्वतोऽनिषिद्धस्यापि तत्कालीनतया निषिद्धत्वात् न त्वभावात्पापोत्पत्तिरिति श्लोकार्थः । अत इदं प्रामाणिकमित्याशयेनाह। निषिद्धक्रिया दुःखेति। लक्षणं ज्ञापकमस्य दुःखहेतोः पापस्य। कुत एवमित्यत आह । अभावादिति । नचैवं प्रागभावस्य कारणता न स्यादिति वाच्यम्। तस्यैवाभावात् । प्रतिबन्धकाभावतया तत्सत्त्वेऽपि तस्य निःस्वभावत्वान्निर्व्यापारत्वाच्च तदतिरिक्तदण्डादिभ्य एव कार्यनिष्पत्तेः अभावज्ञानमपि प्रतियोग्यनुपलम्भेन साक्षिण एवास्मिन्मते भवतीति नाभावस्य क्वचिदपि भावकारणत्वमिति भावः । तर्हि लक्षणं वा कथं विहिताकरणं स्यादित्यत आह। भवेल्लक्षणमिति । अविद्यमानस्यापि धूमादेरिव वह्न्यादिकम्। प्रत्यक्षस्यापि ज्ञायमानतया लक्षकत्वमविरुद्धमिति भावः ॥ ४४१ ॥

मू० ॥ निवृत्तिनिष्ठे तु निषेधवाक्ये
निषिद्धकर्माचरणादनर्थः ॥
प्रतीयतेऽर्थादिति तच्च युक्तं
दुःखं नृणां दुश्चरितैकमूलम् ॥ ४४२ ॥

टी० ॥ ननु भवन्मतेपीष्टसाधनत्वाभावस्यैव नञर्थत्वान्निषिद्धक्रियाया निरयपातहेतुत्वं कुतोऽवसीयत इत्याशङ्क्य बलवदनिष्टाननुबन्धीष्टसाधनत्वाभावस्य नञर्थस्यानुपपत्त्या तत्सिद्ध्यति निषिद्धक्रियाया दृष्टसुखजनकत्वेन विशेषणाभावादेव विशिष्टाभावस्य तत्र वक्तव्यत्वाद्विशेषणं च बलवदनिष्टाननुबन्धित्वमिति तदभावे बलवदनिष्टसाधनत्वं सिद्ध्यतीत्याशयेनाह । निवृत्तिनिष्ठ इति । तुशब्देन परमताद्विशेषं दर्शयति । तमेव विशेषं निषिद्धेत्यादिना दर्शयति । अर्थादुक्तानुपपत्त्या निषिद्धक्रियायाः पापजनकत्वे स्वमते प्रमाणोपन्यासफलमाह । तत्र युक्तमिति । एकशब्देन विहिताकरणस्य तन्मूलत्वं निषेधति ॥ ४४२ ॥

मू० ॥ समीहितोपायतया लिङन्वया-
त्प्रतीयमानस्य तु भक्षणादिनः ॥
न पर्युदासाश्रयणेन नञ्पदा-
दनिष्टहेतुत्वमतिर्भविष्यति ॥ ४४३ ॥

टी० ॥ एवं स्वमते निषेधवाक्यस्याभावमात्रनिष्ठत्वमर्थाद्विशेषप्रवृत्तेर्बलवदनिष्टहेतुत्वसिद्धिश्चेत्युपपादितम् । संप्रति निषेधवाक्यस्य बलवदनिष्टसाधनत्वमर्थं पर्युदासलक्षणया ये आश्रयन्ते तन्मतमनूद्य निषेधति । समीहितोपायेति । लिङन्वयान्निषेधवाक्य इति शेषः । निषेधवाक्यस्थभक्षयेदित्यादेर्लिङन्वयाल्लिङान्वयो यस्य नञ्पदस्य लिङन्वयं तस्मादिति विग्रहः । समीहितोपायतया प्रतीयमानस्य भक्षणादिनः भक्षणमादिर्यस्य पानस्य तस्य नञ्पदात्पर्युदासाश्रयणेनानिष्टहेतुत्वमतिर्भविष्यतीति यत्तदेति संबन्धः । इदमत्र तदाकूतं यत्र निषेद्धुं भ्रान्त्या प्रसज्यते तत्र नञः प्रसज्यप्रतिषेधोऽर्थः । यत्र तु तदस्त्येव तत्र तस्य निषेधायोगात्पर्युदासलक्षणा आश्रयणीया प्रकृतेऽपीष्टसाधनत्वस्य सत्त्वात्तदनिष्टसाधनत्वमेव नञर्थो वक्तव्यः । एवं च प्रवृत्त्युन्मुखस्य ततो निवृत्तिरप्युपपद्येति एतदेत्यर्थः ॥ ४४३ ॥ (शेषमग्रे)

॥ अथ विचारमाधुकरी ॥

(*Continued from page* 319. Vol. VI.)

१६—नक्षत्रेषु कृत्तिकानां श्रुतिसिद्धेन प्राथम्येन मासानां कार्त्तिकप्रथमतायाः प्रसिद्धत्वात् वर्षव्यवस्थायास्तदा-श्रिनत्वाच्च युगव्यवस्थायास्तदाऽऽत्मकत्वं समाश्रीयते ।

कृत्तिकानामाग्नेयत्वादग्नेश्च मुखत्वात् कृत्तिकानां मुखत्वम् । मुखत्वं प्राथम्यमित्यनर्थान्तरम् । कृत्तिकाः प्रथममिति श्रुतिः । अत्र कश्चिदाह । वसंताव[११]तारलक्षणं नक्षत्रप्राथम्यम् । इदानीमश्विनीषु वसंतावतारः । अतोऽश्विनीनां नक्षत्रव्यूहे प्रथमत्वम् । यदा भरणीषु तदा भरणीनां प्राथम्यम् । पूर्वं वैदिके काले कृत्तिकासु वसंतावतार आसीत् । अतो वेदेषु कृत्तिकानां प्रथितं प्राथम्यम् । वसंतस्याऽऽद्यत्वमपि श्रुतिसिद्धम् । इदमाद्यत्वं मनसिकृत्य वसंते ब्राह्मणोऽग्निमादधीतेत्यादयः श्रुतयः प्रवृत्ताः । पुरा वसंतावतारः पूर्वं परःसहस्रेभ्यो वर्षेभ्यो माघादर आसीत् । तं हृदि निधाय माघशुक्लप्रवृत्तस्य पौषकृष्णसमापिन इति लगधस्योक्तिः । ततः पूर्वं मार्गशीर्षे आसीत् । अतस्तदानींतनत्वेन च भगवतो मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकर इत्युक्तिः संगच्छते । समाख्याबलान्मूलस्याप्येवमनुमेयम् । नक्षत्रमालाया मूलत्वेन मूलमिति । अत्रोच्यते । सर्वोऽप्येष मनोराज्यविलासः । नक्षत्रप्राथम्यस्य वसंतावतारलक्षणत्वे मानाभावात् । उपाद्वासादिवद् वसंतस्यायनेन संबंधज्ञानसत्त्वस्य पूर्वेषां दुरुपपादत्वात् । अव्यवस्थाया ज्ञानाभावस्य सदापदेन निःसंदेहत्वात् । वसंतावतारः प्रतिनक्षत्रं प्रायश्चत्वारिंशदूनं वर्षसहस्रं व्याप्नोति । एतस्य वसंतावतारस्य पृष्ठतोगामित्वं धर्मः । एतावद्व्यवस्थो नक्षत्रव्याप्तिधर्मौ पुरस्कृत्य व्यवस्थापिता अस्माकं ज्योतिर्विदः प्रवृत्ता इति कुत एषा प्रवृत्तिः । वैदिकेषु कालेषु वसंतावतारस्य कृत्तिकालक्षणत्वं न प्रत्याचक्ष्महे केवलं नक्षत्रप्राथम्यस्य

वसंतावतारलक्षणत्वेन व्यवस्थापने किं प्रमाणमिति पृच्छामः । कृत्तिका-प्राथम्येन वसंतस्य प्राथम्यमिति युक्तः पक्षः । कृत्तिकाप्राथम्यं त्वाग्नेयत्वेनेति प्रागुक्तम् । हेमंतग्रीष्मयोः संधिकालत्वमपि पुष्पादिसमृद्धिमत्त्वेन सह वसंतस्य प्राथम्ये हेतुत्वेन निवेशनीयम् । माघस्याग्रत्वे बीजं तूक्तं प्राक् । इह खलु त्रिविधा जनपदाः । केचिद् हेमंतप्रधानाः । हिमो हिमवित्यनर्थांतरम् । पाणिनेर्हैमनस्य हेमंताद् व्युत्पत्तिप्रयासो हिमन्शब्दस्य लोकेऽदर्शनात्तत्काले । हेमंतप्रधानेषु शतं हिमा इति प्रयोगः पुरा स्ववबोधः । केचिच्छरत्प्रधानाः । शरत् सरदीत्यनर्थांतरम् । नदपूरेण प्लावितस्य जनपदस्य शरदुत्पादकत्वाच्छरद् । जीवाव शरदः शतं शतं जीव शरदो वर्धमाना इत्यादयः प्रयोगाः शरत्प्रधानेषु पुरा सुवचाः । केचिद्वर्षप्रधानाः । तत्र वर्षाणि गतानीति प्रयोगः समंजसः । एतद् वर्षादिशब्दानां त्रिविधं प्रवृत्तिनिमित्तम् । मंत्रकर्तृणां वा मंत्रद्रष्टॄणां वा हिम्यवासित्वान्मार्गशीर्षस्याग्रहायणिकत्वम् । अतो भगवद्वचनं मासानां मार्गशीर्षोऽहमिति संगच्छते । तस्याऽऽग्रहायणिकत्वं लोकसिद्धं गृहीत्वा भगवतः प्रवृत्तत्वात् । कुसुमाकरत्ववचनं तु पुष्पादिसमृद्धिमत्त्वेन संधिकालत्वेन च रमणीयत्वात् । यत्तु तेनैव कस्यचिदंगलस्यानुप्रवेशेन स्वमतसिद्ध्यर्थं मूलोपन्यासः कृतस्तन्महासाहसं कृतम् । ज्येष्ठायाः प्राचीनं नाम ज्येष्ठघ्नी मूलस्य मूलबर्हणीति श्रु[३४]तिसूक्तत्वेन द्वयोरपि संज्ञयोः फलतः प्रवृत्तिसंभावनया तदभिमताऽपूर्वनिर्वचनस्याऽश्रौतत्वेनानुपादेयत्वादित्यलमप्रस्तुतप्रसंगेन । कृत्तिकानां नक्षत्रेषु प्रथमत्वेन कार्त्तिकस्य मासेषु प्रथमत्वं कार्त्तिकस्य मासेषु प्रथमत्वेन बार्हस्पत्येषु वर्षेषु कार्त्तिकस्यैव वर्षस्य प्रथमत्वं भवितुमर्हति । तथा चासीदिति वर्षाणि कार्त्तिकादीनीत्या-दिवराहमिहिरवचनतोऽनुमीयते । एवं सति युगव्यवस्थाऽपि कृत्तिकातो युक्ता ।

१७—मैना मासा द्वादशैव संवत्सरे । तादृशं शतमेकः पादः ।

३४—अनुवा०२, प्रपाठ०५, कां०१, तैत्ति० ब्राह्म० ।

संवत्सरे मौन इति शेषः । मुनयः सप्तर्षयो देवता अस्येति मौनः । मुनयो वर्षाणि शतं प्रतिनक्षत्रं भुंजते । मौनः संवत्सरो वर्षमिति यावद्दैवं २७०० वर्षात्मकः । मौनो मास एवं सपादद्विशतवर्षात्मकः । शतं मौनानि वर्षाण्येकः पादः । चतुष्पाद् युगमित्याहुः । एवं १०८०००० वर्षात्मकमेकं युगम् । चत्वारि युगानि ४३२०००० वर्षात्मकान्येवमवगंतव्यानि । सेषा मौनी प्राचीना षोडशपादात्मिका व्यवस्था पौराणिकैः पादविकला त्रेता द्विपादविकलो द्वापरः पादत्रयविकलः कलिरिति दशपादात्मिकीकृत्याऽन्यथात्वं प्रापिता । ४३२०००० वर्षाणि पादास्तु दशेति ४३२००० वर्षात्मकः कलिरेकः पादः । स द्विगुणितो द्वापरः । त्रिगुणितस्त्रेता । चतुर्गुणितः कृतमिति । त्रयश्च युगपादा इति वदत आर्य्यभटस्य चत्वारि युगानि युगं महायुगमिति यावद्दवांतरयुगानि च महायुगपादत्वेनाभिमतान्यासन् योग्यत्वादिति निश्चीयते ।

१८—मुनीनां कृत्तिकायोगे कलियुगारंभः प्राचाम् । व्यतीता सप्तशती सयोगाश्च मघाभिर्मुनयः । एतत् कल्हणोक्तेन न संवदति संवदति तु रविकीर्तिवचनेनास्मदनुगृहीतया दिशा ।

एवं तर्हि कृत्तिकातः कलियुगारंभो भवितुमर्हति । कृत्तिकातोऽष्टम्यो मघाः । आसन्मघासु मुनयः शासति पृथिवीं युधिष्ठिरे नृपताविति गर्गोक्तिः । कलेः पंचपंचाशेषु सप्तसु शतेषु गतेषु युधिष्ठिरशकारंभ इति रविकीर्तिः । यदि पूर्वोक्तं प्रमाणं रविकीर्तिः प्रमाणं भवितुमर्हति न कल्हणः । अतः शतेषु षट्सु सार्धेषु त्र्यधिकेषु च भूतले । कलेर्गतेषु वर्षाणामभवन् कुरुपांडवा इति तदुक्तिर्हेया । रोहिणीतो युगारंभांगीकारे प्रामाण्याभावात् ।

१९—प्रायः शककालो ऽभिषेकादिति षट्पंचाशमभिषेकवर्षम् । त्र्यधिकशतवर्षलोपस्तु कथंचित् समाधेयः ।

Digitized by Google

अभिषेकवर्षाद्धककालगणने मंगलीश[३५]शिलालेखः प्रमाणम् । युधिष्ठिराभिषेकः कलियुगस्य पंचपंचाशेषु सप्तसु शतेषु व्यतीतेषु षट्पंचाशे जात इति निश्चीयते । चेरादिभिस्तु हर्षपराभवान्नृषितो विक्रमप्रियैः शकपराभवाच्चेति प्रायोवचनम् । शकः शकः कनिष्कः । तत्तुल्य[३६]कालत्वात् । यथासंभवमेतिह्यादन्यत्र पूर्वापरविरोधादनेकदोषवती तरंगत्रयी न प्रमाणमिति कल्हणेन कनिष्कस्य द्वापंचाशत्सु पठनमकिंचित्करम् । द्व्यधिकशतवर्षलोपः कल्हणोक्तावेति शेषः । कलेः काले भारतादाहवादिति द्वो मिलित्वा ३०+३०००+७००+५+५०=३७८५ वर्षेषु गतेष्वित्यर्थे कृते तु ततो युधिष्ठिरशककालस्य प्रमाणांतरात् सिद्धत्वेन तदधिक (२५२६+५०६) गतशालिवाहनशकव्यवकलने त्र्यधिकेषु सार्द्धेषु सप्तसु शतेषु वर्षेषु कलेर्गतेषु युधिष्ठिरशकारंभ इति फलति । सत्येवं कलिकालगणनायां काश्मीरिकैर्बहुतिथे काले गते संप्रदायविच्छेदेन ह्रस्वमेकं नवत्रं मोनं विस्मृतमिति संभावना सावकाशेत्यूह्यं सुधीभिः । प्रयाणा[३७]त् सप्तर्षिशकस्तु कश्मीराणां बौद्धप्रायत्वाद् बौद्धैः तुषणेन पथा प्रस्थितानां तत्रत्यानां निर्माणं लौकिकवर्षपरिग्रहश्च संहिताकाराणां पद्धतेरादरायेति तस्य द्व्यामुष्यायणत्वे न शंका ।

२०—शकारिर्विक्रमादित्य इत्यस्मिन् विक्रमद्वयता कल्हणेन निराकृताप्यऽकामतः स्वीकृता ॥

शकारिर्विक्रमादित्य इति संभ्रममाश्रितैः । कल्पेरत्रान्यथाऽत्रैव विसंवादि कदर्थितमिति द्वितीयतरंगारंभे । विक्रमपराभवस्य नर्मदां दक्षिणेन त्रिलिंगादिष्वपि सार्वत्रिकी प्रसिद्धिः । शालिवाहनशकः काश्मीरिकविक्रमशकतोऽभिन्नश्चेति विक्रमस्यैकस्य शालिवाहनसमकालीनता युक्ता । राजस्थानीये विक्रमशके पंचत्रिंशमेकं शतमधिकमिति कल्हणेनापि विक्रमद्वयता च स्वीकृतेति युक्तं तस्य विक्रमस्य शालिवाहन-

३५—पृ०३६३, Vol. VI, Indian Autiquary.

३६–पृ०५०, ललितविस्तर (Calcutta Edition) भूमिका ।

३७–पृ०६०, Extra No of 1877, Jour. B. B. R. A. S.

समकालीनाद् विक्रमादन्यत्वम् । विक्रम इति शालिवाहनवंशनामेत्युक्तं प्राक् । बाधकसत्वे हि लोकोक्तिरप्रमाणं न बाधकाभावे । साधकानि तु बहून्युपपादितानि । सर्वथा लोकोक्तिर्निर्मूला न भवति । भोजकालिदासयोरकबरबीरबलयोश्चैवान्यगतानामपि लोकोक्तीनां मूलान्यन्वेषणपरैर्वेवोपलब्धव्यानीति ।

२१—एवं द्वावपि प्रकारौ विक्रमौ । पूर्वस्तज्जनपदवासिभिः स्वीकृतोऽपि पर्यन्तजनपदेष्वपि स्वशकं प्रवर्तयता तद्धर्मघातिना तेषां विस्मारितप्राय: ।

शिलालेखेष्वभिषेकः संवत्सरप्रवृत्तिनिमित्तम् । प्रायः संवत्सरारंभः शकः । स वंशे विजेतुर्जन्मना प्रसरति । वंशस्य समूलमुन्मूलने लुप्यते परिक्षिप्यतेऽपि । लोपे परिक्षेपे चादृष्टमेव प्रभवति । श्रीगुप्तस्याभिषेकस्ततः संवत्सरपरिगणनं समुद्रगुप्तस्य स्कंदगुप्तस्य च विजिगीषुत्वेन गुप्तकालप्रसरो गुप्तवंशस्य समूलमुन्मूलनात् कालेन गुप्तकाललोपो गुप्तकालेन प्रायो निरवकाशितस्यापि विक्रमशकस्य पुनः प्रचारः शाहिवंशोन्मूलने तद्वंशोच्छेदस्खलुब्धमौलित्वेन विक्रमेण शिवच्छत्रपतिनेव प्रवर्तितस्याप्यार्थ्यशकस्य गंधर्वनगरायमाणत्वं शालिवाहनवंशस्य कुतोऽपि समाप्त्यर्थंपि परिक्षिप्यत एव तच्छक इति सर्वाप्येषा भगवतो विधेः क्रीडा ।

२२—६५३ + २५२६ = ३१७९ । सैषा कश्मीराणां पद्धतिः कलियुगारंभो निज धाम गते कृष्णे तस्मिन्नेव तदाप्तनीत्यादि वदद्भिर्वैष्णवैरन्यथा प्रस्थापिता । युधिष्ठिरशकांतःपातिविक्रमशकग्रहणं च कापिशायनमदमत्तस्य कपेर्दंशकेन संदंभः । एवं

३१७९
१३५
३०४४ युधिष्ठिरशककाल इति फलितम् ।

३८—पृ०१८०-१८३, Vol. VIII, Indian Antiquary.

तदनुरूपा च वर्षसहस्रचितयमित्येषा गीतिस्तदनुयायिभिः प्रक्षेपिता ।

यदैव भगवद्विष्णोरंशो यातो दिवं द्विज । तदा प्रवृत्तस्तु कलिरिति वैष्णवमपि पुराणं कलियुगारंभेऽनुसंधेयम् । युगवर्षसंख्या ऽन्यथोपपादनं कलियुगारंभान्यथाकरणं नंदकालापलापप्रयासश्चन्द्रगुप्तांतानां राज्ञां कुलादिविप्रलापबाहुल्यं चेति महत्येषाऽनर्थपरंपरा वैष्णवोत्पातकृता सर्वेषां दोषाणामेकैकमप्येतेषामायतनं किमुत समवायः । तत्राद्यौ द्वावनर्थावुक्तस्वरूपौ । अधुना शेषयोः स्वरूपमाविष्क्रियते । ते तु पारिक्षिते काले मघास्वासन् द्विजोत्तम । तदा प्रवृत्तश्च कलिरिति विष्णुपुराणे । ते सप्तर्षय इत्यर्थः । यदा देवर्षयः सप्त मघासु विचरंति हि । तदा प्रवृत्तस्तु कलिरिति विष्णुभागवतस्य द्वादशस्कंधे शुकवचनम् । एष एकत्रिंशः श्लोकः । यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि । प्रतिपन्नं कलियुगमिति प्राहुः पुराविद इति त्रयस्त्रिंशः । अतोऽपि विस्पष्टं यस्मिन्नहनि भगवान् निजधाम गतस्तस्मिन्नेवाहनि मघासु सप्तर्षयः प्रविष्टा इति । प्रयास्यंति यदा चैते पूर्वाषाढां महर्षयः । तदा नंदात् प्रभृत्येष कलिर्वृद्धिं गमिष्यतीति च नंदकालनिश्चयो विष्णुपुराणे । सप्तर्षयो युक्तास्तिष्ठंत्यब्दशतं नृणामिति विष्णुपुराणवचनाच्छतं ते चरंति वर्षाणामिति बृहत्संहितोक्तस्य पौराणिकानां संमतत्वे न संदेहगंधोऽपि । मघातः पूर्वाषाढैकादशीति कलियुगारंभनंदाभिषेकयोरंतरमेव सहस्रमेकं समा भवितुमर्हति । एवं सति विष्णुपुराणकारः परीक्षिज्जन्मनंदाभिषेकयोरंतरं केवलं वर्षसहस्रं पंचदशोत्तरमित्याह । भागवतकारस्य तु तदेव शताधिकं संमतम् । विष्णुपुराणपरिगणितानां बार्हद्रथानां प्रद्योतनानां शैशुनागानां च वर्षाणां संकलने कलियुगस्य पंचदशसु शतेषु गतेष्वेव नंदाभिषेकः प्रतीयते । भागवतात्तु नंदाभिषेको न्यूनेषु पंचदशसु शतेषु गतेष्वनुमीयत इति व्याख्यातो नंदकालापलापप्रयासः । इदानीं चंद्रगुप्तांतानां राज्ञां कुलादिविप्रलापबाहुल्यं व्याख्यायते । तत्रादौ विचार्यते । किं पितृतो जातिनिर्णय उत मातृत इति । मातृत इति लोकः । अतो भगव-

त्पादानां ब्राह्मणत्वम्। पितुरब्राह्मणत्वेऽपि मातुर्ब्राह्मणत्वात्। समशेरबाहादुरस्य च मैसलत्वं पितुर्ब्राह्मणत्वेऽपि मातुर्मैसलत्वात्। ऋषीणां तु श्रुतिदृशां पितृतो जातिनिर्णय इत्याहुः। मातुर्मात्स्यकन्यात्वेऽपि वेदव्यासस्य ब्राह्मणबीजित्वाद् ब्राह्मणत्वम्। क्षत्रियाणीपुत्रस्य परशुरामस्य तथैव तथात्वमिति कलौ मातृतो जातिनिर्णयो युक्तः। अतः शूद्रापुत्रस्य नंदस्य शूद्रत्वमेवेति। अत्रोच्यते। जातिः पितृत एव। पितुरेवोत्पादकत्वात्। तच्चोत्पादकत्वं यथा युगांतरे तथैव कलौ। न पूर्वमासीदद्य नास्तीति। अतः पारस्करो ब्राह्मणस्य भार्याचतुष्टयं विधत्ते। शूद्रा मंत्रवर्ज्जमितरा समंत्रमिति तयोर्भेदः। एवं वृषलीगमनादिनिषेधोऽपरिणीताया एव युक्तः। ननु युगांतरीया स्थितिरेषा। मैवम्। आपस्तंबादिसूत्राणां कलियुगार्थमेव प्रवृत्तेः प्रत्यक्षत्वात्। प्रत्यक्षाऽभावे ह्यनुमानं प्रमाणम्। नापि युगांतरे संकरकल्पना यदवलंबनेनोभयोः संकरयोर्युगांतरविषयत्वं कल्प्येत। न केवलमनुलोमस्य निषेधः क्वापि न स्मर्यते प्रत्युत पारस्करादिषु तद्विधिर्याज्ञवल्क्यादिषु च ततः संततेः कालेन धर्मोत्पादकजातिलाभः श्रूयते। नन्वेवं जातिरनैकांतिकी भवति। बाढं। भवति जातिरनैकांतिकी। दृष्टमस्माकमेवं सिध्यत्याप[३८]स्तंबश्चानुगृहीतो भवति। अतो युक्तः पितृतो जातिनिर्णयः। एवमप्यनपगच्छति मातृतो जातिनिर्णयतिमिरे ब्राह्मणकन्यायाः क्षत्रियेण क्षत्रियबंधुना वा सपाणिपीडनमपाणिपीडनं वा परिगृहीतायाः संततेर्ब्राह्मणत्वं त्वयाऽकामेनाप्यभ्युपेयम्। अथवा पितृतोऽस्तु जातिनिर्णयो मातृतो वा। उभयथापि चंद्रगुप्तस्य शूद्रत्वं न सिध्यति। नंदस्य क्षत्रियत्वे त्वनास्तिको विशाखदत्तः प्रमाणम्। शिर्के-चिल्के-चालके-वेतिप्रसिद्ध-चव्हाण-पवार-कदम-चावडे-प्रभृतीनां चुलुक्य-चाहमान-प्रमार-कदंब-चापोत्कटादिवन्मोरे इत्येतस्य कुलविशेषवाचकस्य प्राकृतस्य पदस्याऽप्राकृतकरणप्रयासो ब्राह्म-

३८–धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते जातिपरिवृत्तौ। अधर्मचर्यया पूर्वो वर्णो जघन्यं जघन्यं वर्णमापद्यते जातिपरिवृत्तौ–पट०५, प्र०२, आपस्तंबधर्मसू०।

Digitized by Google

णानाम् । अतो मुद्राराक्षसे रघुनंदनादिकुलपुत्रादिवन्मौर्यपुत्रप्रयोगः । पुत्रवि-
शेषत्वेन च तस्य स्वामिपुत्रत्वम् । वृषलत्वमपुण्यभूमिमातृककुलजातत्वा-
द्बौद्धस्याशोकस्य पितामहत्वाच्च । मुरायाः पुत्र इति व्युत्पत्तिस्तु कल्पनादि-
व्युत्पत्तिवन्निर्मूला । स्त्रिया यन्निधायकशास्त्राभावात् । स्वामिपुत्रत्वादि-
स्मरणाच्चाणाक्यविद्वेषित्वाच्च तत्सवर्णैः पौराणिकैर्नंदोपरि पंकनिक्षेपस्त-
द्विशेषणादानेन च स्वतो बलीयसीनामपि स्मृतीनां विरोधं तृणाय
मत्वा तदर्वाक्तननृपतीनां शूद्रत्वस्थापनप्रयासो महासाहसम् । यादृशी
स्थितिर्नंदादर्वाक् तादृशी प्रागपि । बिंबसारादयः प्रद्योतनाः कुलांतरजा
वा भवितुमर्हंति । तेषां शिशुनागकुलोत्पन्नत्वं तु महावंश[४०]विरोधादुपे-
क्ष्यम् । यत्र यत्र साक्षादन्यथापि वा बौद्धसंबंधस्तत्र तत्र महावंशस्य वैद-
त्वहानिर्न युक्ता । स्वस्वधर्ममधिकृत्य हि प्रायः सर्वेषां ग्रंथकृतामतिश-
योक्तिः प्रेयसी । तदादरेण पौराणिकानां बौद्धधर्मपरिगृहीतुरशोकस्य
वंशनिंदा बौद्धानां च भगव[४१]तः शौद्धोदनेर्वंशाभिसंबंधप्रशंसा । अतः
शिशुनागस्य स्वामिवधेन पूर्ववत्परश्चच्व सिंहासनाक्रमणानुमाने न दोषा-
वतारः । अन्यथाकारणं तु महावंशकृता तदात्मजस्य कालवर्मणः काला-
शोकस्य काकवर्णस्य वा कालस्याभ्यर्हितत्वात् । शिशुनागस्तदात्मजस्त-
दात्मजाश्च दशाष्टषष्ठिं वर्षाणि महीं प्रशासुरिति महावंशकारः । न
केवलं चंद्रगुप्तांतानामेषाऽवस्था तदर्वागपि प्रायः सैव समुल्लसति ।
बृहद्रथस्य मौर्यस्यांत्यत्वे बाणोक्तिसंवादेन संदेहाभावेऽपि पुष्पमित्रस्य
स्वयं सिंहासनाक्रमणे कालिदासवचनविरोधात् संदेहो युक्तः । अग्निमि-
त्रवसुमित्रावंतरा स्थितः सुज्येष्ठो वसुज्येष्ठो वा द्वयोः पितापुत्रत्वस्य
बाणकालिदासाभ्यां कंठरवेणोक्तत्वात् पौराणिकसंकल्पजन्मत्वेन स्थान-
विपर्यासोत्प्रेक्षणेन वा ततः समुद्धर्तव्यः । अधिकचत्वारिंशेषु शतेषु कले-
र्वर्षेषु गतेषु गुप्तकालोक्तिः पौराणिकानामेव शोभत इति सर्वमेतद्यदि
नोन्मत्तप्रलपितं क उन्मत्तः किं वोन्मत्तप्रलपितमिति निरूप्यताम् । अतो

४०–पृ० ३६–४०, Upham's Mahawanse.

४१–पृ० ४५, ibid ibid

वंशतदनुचरितवान् पुराणांशः सर्वथा प्रामाण्यं नार्हति । क्षीरनीरन्यायेन संकीर्णयोः सदसतोः प्रायो दुर्विवेकत्वादित्यलमप्रस्तुतप्रस्तावनेन । सन् राजस्थानीयो विक्रमशकः । तस्य युधिष्ठिरशकांतःपातित्वं वचनादनुमीयते । वर्षसहस्रत्रितयं शतमेकं सप्ततिर्नवाया च । शककालयोरंतमिश्रं कलेर्गतं धर्मपुत्रात्त्विति प्रक्षेपिता गीतिः । प्रक्षेपितत्वं तु सर्वत्रानुपलंभात् ।

२३–श्रौतं नक्षत्राणां कृत्तिकाप्रथमत्वम् । वास्तवमश्विनीप्रथमत्वम् । आरंभनक्षत्रेण मासानां संज्ञाव्यवहारस्य युक्तत्वेऽपि वैदिकैरपूर्वमवसाननक्षत्रप्रधान्यमालंब्य कार्त्तिकप्रथमताव्यवस्थापनेनाश्विनस्यांतिमत्वं स्वीकृतं चांद्रं च मानं प्रवर्तितम् । वसंतस्याद्यत्वं न निराकृतमिति तु नाश्चर्यम् । दाक्षिणात्यानामाश्विनप्रथमत्वेऽपि चांद्रेण मानेन चैत्रप्रथमत्वं यज्ञविद्याफलम् ।

यतः पादादिकल्पना तदेव नक्षत्रं प्रथमं भवितुमर्हति । तादृशमश्विनी मघा मूलमिति त्रयम् । तत्र मूलं माससंज्ञाऽप्रतिष्ठापकत्वेन त्याज्यम् । मासप्राथम्यतो नक्षत्रप्राथम्यं नक्षत्रप्राथम्यतो वा मासप्राथम्यमित्यत्र द्वितीयं ज्यायः । अन्यस्य प्रवृत्तिनिमित्तस्य माससंज्ञास्वदर्शनात् । यदि च मेषः प्रथमो राशिरश्विनी प्रथमं नक्षत्रं भवितुमर्हति । आश्विनस्य प्रथमो मासः । मेष आश्विन इत्यनर्थांतरम् । बार्हस्पत्यानि वर्षाण्याश्वयुजतो गणयत आर्यभटस्याप्यश्विनीनां नक्षत्रव्यूहमुखत्वमभिमतमासीदित्यनुमीयते । वसंतावतारलक्षणत्वोत्प्रेक्षणेनार्यभटकालज्ञानप्रयासस्तु मोहविजृंभितम् । मानाभावात् । अमरसिंहेन वा मार्गशीर्षस्याग्रहायणिकत्वात्तया वसंतावतारलक्षणप्रामाण्येन तस्य श्रुतितोऽपि प्राचीनत्वमंगीकर्तव्यम् । अथेदानीमृतुविचारः । वर्षाशब्दस्य वृष्टिः प्रवृत्तिनिमित्तम् । ग्रीष्मशब्दस्य तापो घर्मो गरमेति । शिशिरोऽनुकरणम् । अस्मात्क्रमेतदृतुत्रयम् । वर्षाणि गतानीति वर्षप्रधानत्वात् प्रयोगः । हेमंतशब्दस्य हिमं प्रवृत्तिनिमित्तम् । शरच्छब्दस्य तत्पातजा तल्लयजा वाऽऽर्द्रता

भूमेः सरदीति प्रसिद्धा। वसंतस्य ग्रीष्महेमंतयोः संधित्वेन माहात्म्य-
विशेषः। हिमवासिनां प्रायो हेमंतवसंतग्रीष्माः। हेमंतप्रधानानां शतं
हिमा इत्यादयः प्रयोगाः। यथा हिमपातादिजा सरदी तथा वर्षजाऽपीति
तत्रापि शरच्छब्दप्रयोगः। फलदायिनीत्वेन च तत्प्राधान्यम्। अतस्तदं-
तत्वं वर्षस्य वैदिकानाम्। जीवेम शरदः शतमित्यादिप्रयोगसिद्धिश्च।
एतया दिशाऽपि मार्गशीर्षस्याग्रहायणिकत्वं सूपपादम्। वसंतस्याद्यत्वं
तु ब्राह्मणकालीनम्। तदानीं मंत्रकृतामभावेन मंत्रव्याख्यातॄणां च बहु-
लीभवनेन वसंतस्य शरद इव वर्षपर्यायत्वाभावः। एतादृशोऽभावोऽर्वा-
क्कालिकत्वं तस्य पिशुनयति। ब्राह्मणकाले वर्षस्य फाल्गुनांतत्वं तैत्तिरी-
या[42]यां श्रुतितः सुग्रहम्। वर्षस्य फाल्गुनांतत्वेन वसंतस्याद्यत्वं न विरुध्यत
इति ज्ञेयम्। पूर्वं ब्राह्मणकालेऽप्यृत[43]वः पंचैवासन्। न षट्। षष्ठो दुर्ल-
क्ष्यः शिशिरोऽपूर्वः। ऐतरेय[44]केऽपि हेमंतशिशिरयोः समासः समाम्ना-
यते। अत्रत्यानां प्राचीनेषु शिला[45]लेखेषु ऋतुत्रयं पक्षो दिवसश्चेति स्मर्यंते।
तत्र पक्षा नक्षत्राण्यृत्ववयवा नव प्रत्यृतु दिवसः क्वचित्पक्षादिः। त एते
यथासंभवमेको द्वौ त्रयश्चत्वारः पंच वा ऋतवः पूर्वं पश्चान्मासाः। ते
द्वादशैव। ततो द्वादशैव नक्षत्राणि पूर्वं गृहीतानीति। यदि मासाभिधाने
नक्षत्राणां सप्तविंशतित्वमभविष्यज्ज्येष्ठश्रावणयोः पौषज्येष्ठश्रावणानां
वा संज्ञानां मूलश्रविष्ठे पुनर्वसुमूलश्रविष्ठा वा प्रवृत्तिनिमित्तत्वमाश्रयि-
ष्यन्। वैशाखस्य राधेति संज्ञांतरं राधेत्यनूराधायाः संज्ञांतरत्वेन सुप्रसि-
द्धमेव। ततो विशाखानुराधयोरेकत्वं विशाखा राधा तदनु राधाऽनुरा-
धेति कालेन विशाखा द्विधा कृतेति चाऽवसीयते। पूर्वोत्तरसंज्ञाकरणप्र-

---

४२—न पूर्वयोः फल्गुन्योरग्निमादधीत। एषा वै जघन्या रात्रिः संवत्सरस्य। उत्तरयोरादधीत। एषा वै प्रथमा रात्रिः संवत्सरस्य—अनु० २, अ० १, अष्ट० १, तैत्ति० ब्रा०

४३—यदि वसंते प्रमीयते वसंतो भवत्यादयः श्रुतयो द्रष्टव्याः (अनु० १०, अ० ४, कां० १, तैत्ति० ब्रा०)

४४—खं० १, अ० १, पंचि० १.

४५—पृ० ४१, ४६, १५८, Jour. B. B. R. A. S. of 1853.

यावतोऽपि न पूर्वं सप्तविंशतिर्नक्षत्राणि भवितुमर्हति । उपरिष्टादषाढानां-मवस्तात्श्रोणाया अभिजित्कल्पना देवनक्षत्राणि पितृनक्षत्राणीति समवि-भागार्थमिति तावन्मात्रफलका न ततोऽन्यत्र सप्तविंशतित्वं नक्षत्राणां व्युदसितुमुत्सहते । ब्राह्मणो वा अष्टाविंशो नक्षत्राणामित्यादिश्रुतिभ्यः सप्तविंशतित्वस्यैव प्रतीतेः । तेषां सप्तविंशत्या नक्षत्राणामृतुत्रयानुग्रहाय त्रेधा विभागो राश्यनुग्रहाय द्वादशधा । राशिमासयोः केवलं संज्ञातत्प्र-वृत्तिनिमित्ते भिन्ने । आरंभनक्षत्रेण माससंज्ञानां नियममाभावान्मासापेक्षया राशयोऽर्वाक्कालिकाः । अनियतं हि प्राचीनं न नियतम् । आरंभनक्षत्रेणैव प्रायो मासाभिधानं दृश्यते । युक्तं च तत् । वैदिकानामवसाननक्षत्रादरः स्वलक्षणत्वाय । एतादृशं स्वलक्षणत्वं पक्षप्रतिपक्षत्वाग्रहश्च सर्वत्रोपलभ्येते । फल्गुन्यंतं वर्षं चित्राद्यंता मासाः शरदंता ऋतवः पूर्णिमांतो मासः पूर्ण-चंद्रांतोऽन्यः पक्ष इत्यंतवादिनो वैदिकाः । एतादृशं स्वलक्षणत्वमभिप्रे-त्यैवाश्विनस्य कार्तिकत्वं व्यवस्थापितम् । कार्तिकस्य प्राथम्यावलंबनेन वैदिकैः कृत्तिकानां प्राथम्यग्रहः । एतद् वास्तवं कृत्तिकानां प्राथम्य निमि-त्तम् । अग्नेर्मुखत्वेन तस्मिन् प्रथमानां कृत्तिकानां देवतात्वारोपः । यज्ञ-विद्याप्रियं चांद्रं मानम् । धर्मे तत्प्रधानत्वात् । अवैदिकानामस्माकं दाक्षिणात्यानां सौरं मानम् । प्राचीनेषु शिलालेखेषु तस्य दर्शनाद् मासा-नां संज्ञांतराऽऽश्रुतत्वेऽपि द्रविडेष्वद्यत्वेऽप्युपलंभाच्च । वसंतस्याद्यत्वाऽनि-राकरणे तु तस्य प्राकृताऽनभिमतत्वं निमित्तम् । न वसंतस्याद्यत्वमवैदिक-लोकाभिमतं यत्तस्य निराकरणे प्रयत्नः क्रियेत । अवैदिकसंप्रदायाद्विनिरा-करणे हि वैदिकानां प्रयत्नः प्रसक्तः । वसंताद्यत्वमभ्युपगच्छद्भिर्ब्राह्मणैर्ब्रा-ह्मणकालीनैः केवलं पूर्वस्य कालस्य स्वकालतो भेदः साधित इत्यपूर्वं वसंताद्यत्वं वैदिकानामेव परिग्रहो वेदितव्य इति नाश्चर्यमिति तत्त्वम् । पुष्यादिसमृद्धिमत्त्वारंभोऽपि वसंतस्याद्यत्वाऽऽग्रहे निमित्तम् । चैत्रवैशा-खावेव वसंतः । यदि मासांतरयोरपि वसंतत्वमभ्युपागंस्यत मधुमाधवा-विति यौगिक्यौ संज्ञे तत्समानार्थके वाऽपरे तयोः प्रावर्तयिष्येताम् । न च तथा कयोरपि प्रवर्तिते इति चैत्रवैशाखावेव वसंतः । मधुमाधवाविति

सहःसहस्यादिवत् पितापुत्रत्वकल्पना तदनु जातत्वात् काव्यस्य महिमा। आश्विनस्य चैत्रत्वं य आहुस्तेषाममांतोऽपि मासो वक्तव्योऽमांतोऽत्यश्च पक्षः । प्राचीनप्राय एष पक्षः । लगधेनोद्दिष्टत्वात् । गुरूदयेन वर्षादिं स्वीकुर्वतां योग्यत्वाच्चंद्रोदयस्य पक्षस्याद्यत्वं चंद्रानुदयस्य चांत्यत्वम् ।

२४–वर्षाणामभिधानाय योग्यत्वाद् बृहस्पतिचारो नियोजितः ।

अभिहिता मासाः । अभिधातव्यानि वर्षाणि । तत्र बृहस्पतिचारस्यैव योग्यता । बृहस्पतेर्हि प्रायो वर्षमेकं राशिभोगः ।

२५–अस्य द्वादशवर्षात्मकस्य बार्हस्पत्यस्य वर्षस्यैकाऽवस्थाकल्पनया पंचावस्थः षष्टिसंवत्सरात्मकः कालपुरुषः प्रकल्पितः । षष्ट्यब्दानां षष्टिरिति वदतार्य्यभटेनाप्येतस्य सत्ता दत्तप्रायः ।

एवं द्वादशवर्षात्मकमेकं बार्हस्पत्यं वर्षम् । पंचसंवत्सरमयं युगमित्याहुः । प्रथमः संवत्सरो द्वितीयः परिवत्सरस्तृतीय इडावत्सरश्चतुर्थोऽनुवत्सरः पंचम इद्वत्सर इति बृहत्संहिताकारः । श्रुतौ तु पंचममनभिहितमप्यनुमेयम् । अनभिधानं चातुर्मास्ययागस्य पर्वचतुष्टयात्मकत्वात् । यथा पंचर्तवो वर्षं तथा पंच वर्षाणि युगम् । अग्निसूर्यचंद्रप्रजापतिरुद्रा इति तद्दैवतोपलक्षिताः प्रभवविभवप्रमोदप्रजापतित्वक्षयाः पंचावस्थाः । विभवः पराक्रमः । एतत्पंचावस्थः पुरुषांतरवत् कालपुरुषो युगम् । एवं प्रायः षष्टिसंवत्सरात्मकमेकं बार्हस्पत्यं युगम् । द्वादशवर्षात्मक एतस्य युगस्य संवत्सरादिः प्रभवाद्यपरनामा । सैषा कल्पना न्याय्या । ये तु षष्टिवर्षात्मकमेकं बार्हस्पत्यं वर्षमित्याऽऽस्थिषत तेषां द्वादश युगानि राशयः कथमपि प्रतिवर्षाभिधानयत्नश्च । षष्ट्यब्दानां षष्टिर्यदा व्यतीतास्त्रयश्च युगपादा इत्यार्यभटस्य स्वकालस्मरणी ।

इति भगवद्दत्तसंगृहीतायां विचारमाधुकर्यां शककालो विचारः प्रथमः ।

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 327. Vol. VI.)

मव्य बन्धने ॥ एतदादयो वन्यन्ता उदात्तेतः । मव्यति । ममव्य मव्यिता । मव्यिष्यति । मव्यतु । अमव्यत् । मव्येत् । आशिषि मव्यात् ‘हलो यमां यमि लोप’ इति वा यलोपः । अमव्यीत् । ‘नेटी’ति न वृद्धिः ह्म्यन्तेति वा, मिमव्यिषति । मामव्यति । अत्र वृत्त्यादौ यदा हलो यमामिति धातुयकारस्य लोपः, तदार्धधातुकमाश्रित्याल्लोपः ‘यस्य हल’ इति यङोऽपि लोपः । मामवितेत्यादि, यदा हलो यमामिति न भवति तदा पूर्ववद्यङो लोपे मामव्यितेत्यादि । मामव्यीति । मामति । इडभावे ‘लोपो व्योर्वली’ति वयोर्लोपः, मामौतः । यलोपे वकारस्याङ्गात्परत्वाद्वलि लोपमपवादत्वाद्बाधित्वोठि वृद्धिः । मामव्यति । अद्भावो नित्यत्वाद्वलि लोपं बाधते । मामव्यीषि । मामसि । व्योर्लोपः । मामौथः । मामौथ । यलोपः । ऊठि वृद्धिः । मामव्यीमि, मामौमि । अनुनासिकत्वादूठि वृद्धिः । मामौवः । व्योर्लोपः ‘अतो दीर्घो यञी’ति दीर्घः । मामौमः । मामव्यीतु । मामतु । मामौतात् । मामौताम् । मामव्यतु । मामौहि । मामौतात् । मामौतम् । मामौत । मामव्यानि । मामव्याव । उत्वहित्वाभ्यां परत्वात्पूर्वमेव व्योर्लोपे पश्चात्तुह्योरिति तातङि तदाश्रय ऊठ् नाशङ्कनीयः । पूर्वमेव वकारस्य लुप्तत्वात् हेस्त्व‘तो हे’रिति लुक् । उत्तमे नित्यत्वादाटि न व्योर्लोपः । अमामव्यीत् । अमामौताम् । अमामव्युः । अमामः । अमामव्यम् । अमामौव । अमामौम । तिप्सिपोर्हल्ङ्यादिलोपादन्तरङ्गत्वाद्वलि लोपः । झिमिपोर्जुस्भवाम्भावौ वलि लोपं नित्यत्वाद् बाधेते । वसि व्योर्लोपे ‘ऽतो दीर्घो यञी’ति दीर्घः । मसि यलोपेऽनुनासिकादित्वादूठि वृद्धिः । मव्ययति । अममव्यत् । मव्यित्वा । मव्यितः । क्विपि लोपो व्योर्वलीति विधेयस्य लोपस्य पूर्वनिर्देशाद् वेरपृक्तलोपाद्वलोपस्य बलीयस्त्वस्य ज्ञापनादपृक्तलोपात् पूर्वं यकारस्य वलि लोपः वकारस्य त्वपवादेनोठा बाधाच भवतीति ऊड्वृद्धोर्मौः । यथा तु भाष्यं तथास्य न यङ्लुगस्ति तच्च तेवतावुक्तमुपपादितं च ॥

अत्रापि शिष्यबोधाय प्रक्रियेयं प्रपञ्चिता ।
यज्ञनारायणार्येण बुद्ध्यतां भाष्यपारगैः ॥ ५०२ ॥

सूर्त्स्य ईर्त्स्य ईर्ष्य ईर्ष्यार्थाः ॥ सूर्त्स्यति । सुसूर्त्स्य । सूर्त्स्यिता । सूर्त्स्यिष्यति । सूर्त्स्यतु । असूर्त्स्यत् । सूर्त्स्येत् । आशिषि सूर्त्स्यात् । असूर्त्स्यीत् । असूर्त्स्यिष्यत् । सुसूर्त्स्यिषति । स्तौतिण्योरेवेति नियमाच्च षत्वम् । सोसूर्त्स्यते । हलो यमामिति पक्षे यलोपः । अन्यदा तु यकारद्वयम् । सोसूर्त्स्यीति । सोसूर्ष्टि । बहूनां समवाये द्वयोरपि संयोगसंज्ञाया आश्रितत्वात् स्कोरिति कलोपः । लङि तिप्सतोर्हल्ङ्यादिलोपे पदान्तसंयोगादित्वात् कलोपे जश्त्वचर्त्वयोरसोसूर्ट् । सर्वत्र यकारस्य वलि लोपः । सूर्त्स्ययति । असुसूर्त्स्यत । सूर्त्स्य आवरदत्यये । ईर्त्स्यति । ईर्त्स्या चकार । ईर्त्स्यिता । ईर्त्स्यिष्यति । ईर्त्स्यतु । ऐर्त्स्यत् । ईर्त्स्येत् । ईर्त्स्यात् । ऐर्त्स्यिष्यत् । ईर्चित्स्यिषति । न न्द्रा इति रेफवर्जस्य द्विर्वचनहलादिशेषचर्त्वे ईर्त्स्ययति । ऐर्चित्स्यत् । ईर्ष्यति । ईर्ष्यां चकार । ईर्षितेत्यादि । सनि 'ईर्ष्यतेस्तृतीयस्य द्वे भवत इति वक्तव्यमि'त्यत्र वृत्तौ कस्य तृतीयस्य के चिदाहुर्व्यञ्जनस्य । अपरे पुनराहुस्तृतीयस्यैकाच इति । तत्र तृतीयस्य व्यञ्जनस्येति पक्षे यकारादेर्द्वितीयस्यैकाचो द्विर्वचनम् । ईर्ष्यियिषति । पक्षान्तरे तु तृतीयस्यैकाचः सन एव द्विर्वचनम् । ईर्ष्यिषिषतीति भवति । ईर्ष्ययति ऐर्षिर्ष्यत् । ईर्ष्या 'गुरोश्च हल' इत्यकारप्रत्ययः । एषामीर्ष्यार्थत्वात् क्रुधद्रुहेति कोपविषयस्य संप्रदानत्वाच्चतुर्थी । देवदत्ताय सूर्त्स्यतीत्यादि । क्विपि वलि लोपे च पदान्तसंयोगादित्वात् स्कोरिति कलोपे जश्त्वचर्त्वयोः सूर्ट् । 'रात्सस्ये'ति नियमाच्च संयोगान्तलोपः । एवमीर्त्स्यतेरपि । ईर्ष्यतेरपीदमेव रूपम् ॥ ५०५ ॥

हय गतौ ॥ भक्तिशब्दयोरपीति के चित् । हयति । जहाय । जहयिथ । हयिता । अहयीत् । श्व्यन्तेति न वृद्धिः । जिहयिषति । जाहय्यते । जाहयीति । जाहति । जाहतः । जाहयति । अदादेशो वलि लोपाच्चित्य इत्युक्तम् । जाहसि । जाहामि । वलोपे यञादौ दीर्घः । हाययति । अजीहयत् । हयित्वा । हयतेः क्वौ वलि लोपे तुकि हत् अतो लोपो नेत्ययतावुक्तम् । हयः । हया वडवा । गौरादित्वान् ङीष् ॥ ५०६ ॥

शुच्य अभिषवे ॥ अवयवानां शिथिलीकरणं सुरायाः संधानं वाऽभिषवस्तथा सोममभिषुणोत्यृजीषमभिषुणोतीति सुराप्रकरणे च संधा स्यादभिषव इति । अभिषवः स्नानमिति चन्द्रः । शुच्यति । शुशुच्य । शुच्यिता । शुशुच्यिषति । शोशुच्यते । हलो यमां यमि लोप इति यलोपपक्षेऽतो लोपे 'यस्य हल' इति चार्धधातुके यशब्दलोपे न धातुलोप इति चाल्लोपस्य असिद्धत्वात् स्थानिवत्त्वाद्वा गुणाभावे शोशुचिता । यमो लोपाभावे तु शोशुच्यिता । शोशुच्यीति । शोशोक्ति । वलि लोपे लघूपधत्वाद्गुणः । यङ्लुको नैमित्तिकत्वाद्गुणस्यानार्धधातुकनिमित्तत्वाद्वा न धातुलोप इति निषेधाभावः । शोशुक्तः । शोशुच्यति । शोशुच्यीषि । शोशोक्षि । शोशुच्यीमि । शोशोच्मि । शोशुच्वः । शोशोक्तु । शोशुग्धि । हेर्धित्वम् । 'चोः कुरि'ति चकारस्य ककारे 'झलां जश् झशी'ति गकारः । अशोशुच्युरित्यत्र वलि लोपासिद्धत्वाज्जुस्भावः । इगन्तविषयत्वाज्जुसि गुणो न भवति अशोशुच्यम् । नित्यत्वाद्वलि लोपात् पूर्वमम्भावः । शुच्ययति । अशुशुच्यत् । शुच्यित्वा । शुच्यितः । शुक्तिरित्यत्र तितुत्रेत्यनिट्त्वम् । चुच्य इत्यपि पठन्तीति मैत्रेयः चुच्यतीत्यादि ॥ ५०७ ॥

हर्य गतिकान्त्योः ॥ हर्यति । जहर्य । हर्यिता । अहर्यीत् । नेटीति न वृद्धिः । जिहर्यिषति । जाहर्य्यीति । पूर्ववदार्धधातुके यमो यमि लोपे यलोपालोपाभ्यां जाहर्ता । अन्यदा जाहर्यितेत्यादि । जाहर्य्यीति । जाहर्ति । जाहर्तः । जाहर्यति । जाहर्षि । 'शरोचि' अचो रहाभ्यां शरोचि न द्वित्वमिति षकारस्य द्वित्वाभावः । जाहर्मि । लोटि जाहर्हि । जाहर्याणीत्यत्राड् नित्यत्वाद्वलि लोपं बाधते । अजाहर्यीत् । इडभावे वलिलोपहल्ङ्यादिलोपयोरजाहः । अजाहर्ताम् । अजाहर्युः । अजाहर्यम् । हर्ययति । अजहर्यत् । हर्यित्वा । हर्या स्त्रियामकारः । क्विपि वलि लोपे हः । हर्यतो यज्ञः । दृशियजियज्यनिममिहर्य्यिभ्योऽतजित्यतच् ॥ ५०८ ॥

अल भूषणपर्याप्तिवारणेषु ॥ अलति । आल । अलिता । मा भवानालीत् 'अतो ल्रान्तस्य' अकारसमीपरेफलकारान्ताद्धातोः परस्मैपदपरे सेटि सिच्यतो वृद्धिरिति वृद्धिः । अलिलिषति । आलयति । आलिलत् । अलित्वा । अलितः । अलकम् । संज्ञायामिति क्वुन् । अलका । टापि प्रत्ययस्थादितीत्वं क्षिपकादि-

त्वाच्च भवति । अलिः । इञ् वपादिभ्य इति इञ् । आली । कृदिकारत्वात् ङीष् । अलीकम् । अलीकादयश्चेति कन् । अत्र मैत्रेयोऽकारमनुनासिकस्वरितमिच्छतीत्याह । तत्रालतइत्यादि ॥ ५०९ ॥

ञिफला विशरणे ॥ ञित्वं 'ञीतः क्त' इति वर्त्तमानक्तार्थम् । फलति । पफाल । फेलतुः । 'तॄफलभजत्रपश्चे'तिकिति लिटि थलि च सेट्येत्वाभ्यासलोपौ । निरनुबन्धकपरिभाषायाः प्रत्ययग्रहणविषयत्वादस्यापि तत्र ग्रहणं न केवलं फल निष्पत्तावित्यस्यैव । अन्येत्विमं परिभाषासार्वत्रिकीति भजत्रपश्चेति चशब्देन सानुबन्धकममुं समुच्चिन्वन्ति । उभयथा रूपे न विवादः । फलितेत्यादि । अफालीदित्यत्रातोल्रान्तेति वृद्धिः । पिफलिषति । पम्फुल्यते । पम्फुलीति । पम्फुल्तः । पम्फुल्मि । 'चरफलोश्चे'ति यङि यङ्लुकि अभ्यासस्य नुक् । अत्रापि पूर्ववत् सानुबन्धकस्यापि ग्रहः । उत्परस्यात इत्यभ्यासाच्चरफलाकारस्योत्वम् । तपरकरणं लघूपधगुणनिवृत्त्यर्थम् । फालयति । अपीफलत् । फलम् । अच् । फलित्वा । फुल्लः । अस्याकर्मकत्वात्कर्तृभावाधिकरणे क्तः । 'आदितश्चे'ति निषेधे 'अनुपसर्गात्फुल्लक्षीबकृशोल्लाघा' इति निपातनान्निष्ठातकारस्य लत्वम् । अत एव निपातनादुत्वंच । यद्वा लत्वस्यासिद्धत्वात्तकारादिप्रत्ययपरत्वा'त्ति चे'त्युक्ते'आदितश्चे'ति निषेधस्य 'विभाषा भावादिकर्मणो' रिति विकल्पनात् फलितमित्यपि भवति । अनुपसर्गादिति वचनादुपसृष्टस्योत्वे लत्वाभावात्प्रफुल्तमिति भवति । समुत्पूर्वत्वे तु 'उत्फल्लसंफुल्लयोरुपसंख्यान'मिति लत्वम् । क्तवतोरप्येतल्लत्वमिष्यतइति वृत्तिः । तेन फुल्लवानिति भवति । फल्गुः । फलिपाटीत्यादिनोप्रत्यये गुणागमः । क्विपि फल् । फलिवाचरतीति सर्वप्रातिपदिकेभ्य इति क्विपि फलो धातुत्वे फलति । पफाल । फेलतुः । फेलुः । पम्फुल्यत इत्यादि प्रकृतिवत् । प्रत्ययान्तधातुत्वे आम् न भवति कास्यनेकाच इति उक्तत्वात् । निष्ठायां फलितमिति नित्यमिडेवादित्त्वाभावात् ॥ ५१० ॥

मील श्मील स्मील निमेषणे ॥ निमेषणं संकोचः । द्वितीयस्तालव्यादिः । तृतीयो दन्त्यादिः । मीलति । मिमील । मीलिता इत्यादि । मिमीलिषति । मेमील्यते । मेमीलीति । मेमील्ति । मीलयति । अमीमि-

लत् । अमिमीलत् । भ्राजभासेत्यादिना वो चङ्युपधाया ह्रस्वविकल्पः । स्मीलति । स्मीलतीत्यादि । मिल श्लेषण इति ह्रस्वोपधस्तुदादौ ॥ ५१३ ॥

पील प्रतिष्टम्भे ॥ प्रतिष्टम्भो रोधनम् । पीलति । पिपील । पीलितेत्यादि । पीला नाम का चित् । इगुपधलक्षणे कप्रत्यये टाप् । पीलाया अपत्यं पैलः । 'पीलाया वे'त्यण् । तदभावे ढक् च इति पैलेयः । अणन्तादपत्येऽञि तस्य 'पैलादिभ्यश्चे'ति लुकि पैलः पुत्रः । पीलुः । मृगय्वादिभ्यश्चेति उप्रत्ययः । पीलोः पाकः पीलुकुणः 'तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचा'विति षष्ठ्यन्तात्पील्वादेः कर्णादेश्च यथासंख्यं पाकमूलयोः कुणब्जाहचोर्विधानादस्मात्कुणप् ककारस्य 'लशक्वतद्धित'इति तद्धितत्वादेत्त्वम् ॥ ५१४ ॥

णील वर्णे ॥ नीलति । प्रणीलति । निनील । नीलिता इत्यादि । नीलः । इगुपधलक्षणः कः । नीली ओषधिर्वडवा च । जानपदेत्यत्र नीलादोषधौ प्राणिनि चेति ङीष् । अन्यत्र नीला शाटी । जानपदाभावे च सञ्ज्ञायां वेति वचनात्संज्ञायां नीली नीलेत्युभयं भवति । नील्या 'रक्तं वस्त्रं नीलं तेन रक्तं रागात्' रज्यते नेनेति रागः शुक्लस्य वर्णान्तरापादनमिह रञ्जेर्धर्म इति वृत्तिः । रागवचनात्तृतीयान्ताद्रक्तार्थे यथाविहितं प्रत्यय इत्यणि प्राप्ते नील्या अन्वक्तव्य इत्यन् । णिल गतौ इति ह्रस्वोपधस्तुदादौ ॥५१५॥

शील समाधौ ॥ शीलतीत्यादि । शीलम् । इगुपधलक्षणः कः घञ् च । शीले समाधाने भवा वृत्तिः शैली । अणि ङीप् । शील उपधारण इति चुरादौ । शिल उञ्छ इति ह्रस्वोपधस्तुदादौ ॥ ५१६ ॥

कील बन्धने । कीलतीत्यादि । कीलः । इगुपधलक्षणः कः, हलश्चेति घञ् वा । कीलकं संज्ञायां कन्, क्वुन्वा ॥ ५१७ ॥

कूल आवरणे । कूलतीत्यादि । कूलं पूर्ववत्कः ॥ ५१८ ॥

शूल रुजायां संघाते च ॥ शूलति । शूलम् । शूलेषु संस्कृतं शूल्यम् । 'शूलोखाद्य'दिति सप्तम्यन्तात्संस्कृतमित्यर्थे यत् । शूले पचति शूला करोति । शूले प्रोप्य पचतीत्यर्थः । शूलात्पाक इति कृञो योगे डाच् । डाचि बहुलं द्वे भवत इति द्वित्वं अव्यक्तानुकरणस्य डाजन्तस्य नेष्यत इत्युक्तत्वाच्च भव-

ति । 'ऊर्यादिच्विडाचश्चे'ति डाजन्तस्य निपातत्वं गतित्वं च । तत्र निपातत्वेऽव्ययत्वात्सोर्लुक्, गतित्वात् शूलाकृत्येत्यत्र 'कुगतिप्रादय' इति समासे क्त्वो ल्यप् अयः शूलेनान्विच्छति, आयःशूलिकः । 'अयः शूलदण्डाजिनाभ्यां ठक्ठञा'विति तृतीयान्तादस्मादन्विच्छतीत्यर्थे यथासंख्यं ठक् । अयःशूलशब्देन क्रूराकार उच्यते ॥ ५१९ ॥

तूल निष्कर्षे ॥ निष्कर्षो निष्कोषणं, तच्चान्तर्गतस्य बहिर्निःसारणम् । तूलति । तूलम् । तूलेनानुकुष्णाति, अनुतूलयति । सत्यापपाशेत्यादिना णिचि टिलोपः । णौ चङ्युपधाया ह्रस्वः' इति ह्रस्वो न भवति, ह्रस्वलोपित्वादतुतूलत् ॥ ५२० ॥

पूल संघाते ॥ पूलति । पूलः ॥ ५२१ ॥

मूल प्रतिष्ठायाम् ॥ मूलति । मूलम् । मूले जातो मूलकः । 'पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्करा्द्वु चि'ति तत्र जात इति विषये वुन् । नक्षत्राणोपवादः । उत्पाटनीयं मूलमस्य इति मूल्यो मुद्गः 'मूलमस्याबर्हि'त्यौपाधिकात्प्रथमान्तान्मूलादस्येत्यर्थे यत् । आबर्हीति बृह् उद्यमन इत्यस्माद्भावे घञाबर्हः । सोस्यास्तीतीनिः । उद्यमानमिहोत्पाटनं, ये सुपक्का मूलोत्पाटनमन्तरेण ग्रहीतुं न शक्यन्त इति ते एवमुच्यन्ते, मुद्गादिषु मध्यतो लूयमानेषु कोणा अपि लूयेरन्नित्यवश्यमेषां मूलमुत्पाटनीयम् । मूलेनानाम्यं मूल्यं लाभाख्यं द्रव्यम् । 'नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्य्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेष्वि'ति यथासंख्यं मूलादानाम्ये यत् आनाम्यमभिभवनीयं शेषीक्रियमाणमित्यर्थः । मूलं नाम पद्यादीनामुत्पत्त्यर्थे वणिग्भिर्विनियुक्तं द्रव्यं तेन हि स्वस्मादतिरिक्तं लाभाख्यं शेषीक्रियते । आत्मन उपकारकं क्रियते यतः स्वयं तेन स गुणी गुणो भाग, इदमेव मूलमस्य भागीकरणं, तत्प्रति मूलस्योपकारकत्वं शेषत्वमानाम्यत्वं च । मूलेन समो मूल्यः पटः । उपादानसमानफल इत्यर्थः । अनेनैव सूत्रेण तृतीयान्तान्मूलात्समे यत् । न विद्यते मूलमस्याः साऽमूला पाककर्णेत्यादिना प्राप्तं ङीष् बाधित्वा 'मूलान्नञ' इत्यजादिपाठाट्टाप् । शतमूली । पाककर्णेत्यादिना ङीप् । अयं रोहणार्थश्चुरादिः ॥ ५२२ ॥

Digitized by Google

फल्ल विशरणे ॥ फलति इत्यादि । ञिफलावत् फलितमिति निष्ठायामिडेव । फलतीति फलं, संफला । पाककर्णेति ङीषं बाधित्वा 'संभस्त्राजिनशणपिण्डेभ्यः फला'दित्यजादिपाठाट्टाप् । भस्त्रफलादयोऽप्येवम् । 'ङ्यापोः संज्ञाच्छन्दसोर्बहुलमि'ति ह्रस्वः । अल्पं फलं, फलिका । ततोऽन्यत्फलम् । फलं च तत्फलिका च फलाफलिका । 'कृतापकृतादीनामुपसंख्यानं'मिति कर्मधारयः । 'अन्येषामपि दृश्यत' इति दीर्घः पूर्वपदस्य एकमेव फलमवस्थाभेदादल्पत्वमहत्त्वाभ्यां युज्यते । त्रिफला । अजादिदर्शनाट्टाप् । फलिनः । 'फलबर्हाभ्यामिनज्वक्तव्य' इति मत्वर्थे इनच् । फलकं, संज्ञायां कन् । निष्पाद्यते कृषिरनेनेति । फालः । 'हलश्चे'ति करणे घञ् ॥ ५२३ ॥

चुल्ल भावकरणे ॥ भावकरणमभिप्रायाविष्कारः । चुल्लिः । चुल्ली । इगन्तत्वाद्वा ङीष् ॥ ५२४ ॥

फुल्ल विकसने ॥ फुल्लति । फुल्लः । अच् । फुल्लित्वा । फुल्लितः ॥ ५२५ ॥

चिल्ल शैथिल्ये भावकरणे च ॥ चिल्लति । चिल्लः । तिल गतौ इति दुर्गमैत्रेयौ । तिल्लेत्यन्ये । तेलतीत्यादि । तिलः इगुपधलक्षणः कः । तिलस्नेहनइति तौदादिकाद्वा । तिलानां भवनं क्षेत्रं तिल्यं तैलीनम् । विभाषा तिलेति यत्खञौ । तिलेभ्यो हितं तिल्यम् । 'खलयवमाषतिलवृषब्रह्मणश्चे'ति चतुर्थ्यन्ताद्धितार्थे यत् । निष्फलस्तिलः तिलपेजः । तिलपिञ्जः । 'तिलान्निष्फलात्पिञ्जपेजा'विति तौ । तिलकम् । संज्ञायां कन् । तिल स्नेहइति चुरादौ च ॥ ५२६ ॥

वेल्ल चेल्ल केल्ल खेल्ल वेल्ल चलने ॥ वेलतीत्यादि । वेला । गुरोश्चेत्यकारः । चेलति चेलः । पचादौ चेलडिति पाठात् अच् टित्त्वं स्त्रियां ङीबर्थं, चिल वसनइत्यस्माद्वा चेलम् । प्रसङ्गादत्र किं चिदुच्यते । कुत्सिता ब्राह्मणी ब्राह्मणचेलीति 'कुत्सितानि कुत्सनैः' कुत्साहेतुधर्मवचनैः समानाधिकरणैः समस्यन्तइति तत्पुरुषः । घरूपेत्यादिना ह्रस्वः । चेलादयो वृत्तिविषये कुत्सनवचना इति भवतावुक्तम् । तत्र चेलमकुलीनेन तन्तुवायेनोत्पादितं भवति, तत्सादृश्याद् ब्राह्मण्यादिषु वृत्त्या चेलशब्दस्य कुत्सनवृ-

चनत्वम् । स्त्रिचेली, स्त्रीचेली वा । वामोरुचेली, वामोरूचेली वा । 'नद्याः शेषस्यान्यतरस्या'मिति ह्रस्वविकल्पः । अङी च या नदी ङ्यन्तं च यदेकाच् स शेषः तस्य घादिषु वा ह्रस्व इति सूत्रार्थः । अत्रान्तरेणापि शेषग्रहणं पूर्वसूत्रव्यतिरिक्तविषयत्वे सिद्धे तत्सामर्थ्यात्पूर्वमप्रतङ्यन्तानेकाजपेक्षं शेषत्वं बोधयितुं, तेन यदङ्यन्तमनेकाच्च ङ्यन्तमेकाच् तत्रैवायं विकल्प इति यदभाषितपुंस्कमामलक्यादि यच्च समानायामाकृतौ अभाषितपुंस्कं द्रोणयादि पूर्वसूत्राविषयं तत्र न भवति । लक्ष्मीचेली । यवागूचेली । इत्यादौ च ङ्यन्तनदीत्वेपि ह्रस्वयाः प्रतिषेध इत्युक्तत्वाच्चायं विधिर्भवति । श्रीचेलीत्यादौ तु नदीग्रहणाच्चास्य प्रसङ्गः । नापि पूर्वसूत्रस्य, ङ्यन्तानेकाच्त्वाभावात् । विदुषीचेलीत्यादौ 'उगितश्च' उगितः परा या नदी तस्या ह्रस्व विकल्पः । विदुच्छ्रेयसोः पुंवद्भावोत्र पक्षे वक्तव्य इति वृत्तावुक्तत्वात् विदुच्चेलीत्यपि भवति । केलति । केलिः । इन्प्रत्यये केली । अप्रत्ययः केला । केलयति । 'कण्ड्वादिभ्यो यगि'ति स्वार्थे यकि सनाद्यन्तत्वेन धातुत्वे लडादि । खेलति । खेला । अयमपि कण्ड्वादिः । वेल्लति । वेल्लो विषम् । संज्ञायां घञ् । वेल्लयति । वेल्लादिनां पञ्चानामृदित्वाच्चङीति ह्रस्वाभावादविवेलदिति भवति । वेल्लस्त्वनुपधात्वाच ह्रस्वप्रसङ्गः ॥ ५३१ ॥

पेल्ल शेल्ल फेल्ल गतौ ॥ पेलति । अपिपेलत् । पेला भुक्तमुज्झितम् । शेलति । अशिशेलत् । अत्र क्व चित्खल्लषेल्लश्लेल्ल इत्यपि त्रयः पठ्यन्ते । तत्र खेलतिर्मैत्रेयाद्यनुसारेणाग्रे पठिष्यते । सेलतिस्तुदन्त्यादेः पाठः बोपदेशपर्युदासवाक्येनुपादानादनार्षः । मूर्द्धन्यादिस्तु सेलुः श्लेष्मान्तक इत्यादिदर्शनाद् ग्राह्यः ॥ ५३४ ॥

स्खल संचलने ॥ स्खलति । चस्खाल । अस्खालीत् । वो घटादित्वात् स्खलयति ॥ ५३५ ॥

खल संचये ॥ खलति । चखाल । अखालीत् । खलति पापानि संचिनोतीति, खलः । खल्यते संचीयते धान्यादिकमिति खलम् । 'खनो घ च'त्यत्र वृत्तिः । खलं भगः पदं चेति वक्तव्यमिति । अत्र हरदत्तः । चि-

Digitized by Google

त्करखसामर्थ्यादन्येऽभ्योऽप्ययं भवति, नहि खनः कश्चिदवयवः कुत्स्यभागस्ति खलानां समूहः, खल्या । 'खलगोरथा'दिति बहुम्मात्समूहे यत्, खलिनी । 'इनित्रकठ्यचश्चे'ति पूर्वत्रैव विषये इन्यादिविधानादिह यथासंख्यादि-निः । सर्वएते यादयः स्वभावात् स्त्रीविषयाः । खलाय हितं खल्या । खलयवेति यत् । यस्मिन्काले खले यवा भवन्ति स कालो खलेयवः । एवं खलेबुसम् । तिष्ठद्गुप्रभृतीनि चेत्यव्ययीभावः । तत्र ह्येवं पठ्यते, खलयवा-दीनि प्रथमान्तानि विभक्त्यन्तरेण न संबध्यन्ते, अन्यपदार्थे च वर्त्तन्तइति । नैतौ प्रथमान्तावेव । अव्ययीभावादव्ययीभावश्चेति नपुंसकत्वम् । खलन्ति संचलन्ति केशा अस्मादिति खलतिः । अयं च भीमादिषु पाठात् 'भीमा-दयोपादान'इत्यपादानविषयः । अत्रैव पाठादेवातिप्रत्यये धातूनामने-कार्थत्वात्संचलने वृत्तिः । यद्वा पूर्वस्यैव धातोर्भीमादिषु पाठात् सलोपः । खलतइत्यपि निपातितः । शास्त्रं शाठ्यं शिरोमध्यं च ॥ ५३६ ॥

गल अदने ॥ गलति । अगालीत् । गलः । गोचरसंचरेत्यादौ चका-रेण 'पुंसि संज्ञायां घः प्रायेण'गिरतेर्वा ॥ ५३७ ॥

षल गतौ ॥ सलति । सालयति । असीसलत् । सालः । अकर्त्तरि च कारकइति संज्ञायां घञ् । सलिलम् । सलोकलीत्यादिनेलच् ॥ ५३८ ॥

(शेषमग्रे)

॥ अथ चित्सुखी ॥

॥ तत्र चतुर्थपरिच्छेदावशेषः ॥

(Continued from page 296. Vol. VI.)

न चात्मनः सुखरूपत्वे सुखं मे स्यादिति प्रेमानुपपत्तिः, संबन्ध-व्यपदेशस्यान्यनिष्ठताव्यावृत्तिपरत्वात्, अन्यासंबन्धिसुखसाक्षात्कारे सत्यपि संबन्धाभावापराधेनापुरुषार्थत्वानुपलब्धेः, संबन्धस्य केवलव्यतिरेकाभावात्, सुखसंबन्धमात्रस्य पुरुषार्थत्वे परकीयसुखसंबन्धस्यापि तथात्वप्रसङ्गात्, संबन्धेन संबन्धान्तरमभ्युपेयम्, तथा चानवस्था, तस्मादात्यन्तिकी दुःख-

निवृत्तिरेव मुक्तिरित्ययुक्तम्, एतेन प्रकृतिपुरुषविवेकदर्शनात् पुरुषस्य स्वरूपावस्थानं मुक्तिरित्यपि परास्तम् ।

आत्मनोऽसुखरूपत्वाद् बन्धस्यान्यगतत्वतः ।
उपचारस्य चायोगात् संबन्धस्यानिरूपणात् ॥ ३ ॥

सुखसाक्षात्कारस्यैव पुरुषार्थत्वोपपादनादात्मनश्च सुखानभ्युपगमात्र पुरुषस्य स्वरूपमात्रावस्थानं पुरुषार्थः ।

अपि च यस्य बन्धस्तस्यैव मुक्तिः ।

न च पुरुषस्य बन्धः, बन्धस्य बुद्धिगतत्वाङ्गीकारात् ।

न चोपचाराद्बुद्धिगतावेव बन्धमोक्षौ पुरुषेषु व्यपदिश्येते, निमित्ताभावादुपचारानुपपत्तेः ।

न च स्वस्वामिभावो निमित्तम्, सर्वथोदासीनस्य स्वामिभावे दृष्टान्ताप्रसिद्धेः ।

न च बुद्धेः स्वत्वमपि, अनाधेयातिशयपुरुषेऽनुपकारकत्वात् ।

न च द्रष्टृदृश्ययोर्योग्यतालक्षणः संबन्धः, मुक्तावपि प्रसङ्गात्, तस्यास्तदाप्यनपायात् ।

न च पुरुषभेदेन प्रकृतिगतयोग्यताया अपायानपायौ, अनाधेयातिशयतया पुरुषप्रकृतिविशेषाभावे तद्व्यवस्थानुपपत्तेः, तस्मादनतिशयानन्दस्वभावस्यात्मनोऽविद्यातिरोधानमेव बन्धः, विद्यानिमित्तस्तदस्तमयो मोक्ष इति सिद्धम् ।

ननु कस्याविद्या, किं ब्रह्मणो जीवानां वा ।

नाद्यः, सर्वज्ञस्य तदनुपपत्तेः,

न द्वितीयः, तेषां परमार्थतः परस्माद्भेदेऽद्वैतव्याघातात्, अभेदे च पूर्वदोषानुषङ्गात्, अविद्याकल्पितभेदत्वे चेतरेतराश्रयापातात्, अविद्याधीनो जीवविभागो जीवाश्रया चाविद्येति ।

अनुपपत्तिरविद्याया न दूषणमिति चेत्, अनुपपत्त्यभावे मुक्तानां ब्रह्मणश्च सा किं न स्यात् ।

ननु न सा मुक्तानां ब्रह्मणश्च भाति, नापि कल्प्या, कल्पकाभावात्, मुक्तसर्वज्ञयोरविद्याश्रयत्वव्याघाताच्च ।

जीवानां तु न सा कल्प्या॰ अहमज्ञ इत्यनुभवसिद्धत्वादिति चेत्, न, अविद्याकल्पितोऽहमज्ञ इत्यनुभवाभावात् ।

नन्वहमिति प्रतीतिः कल्पिततामविद्याश्रयस्य बोधयति, अहंकृतेः कल्पनामयत्वात् सुषुप्ततुरीयादौ च सत्यपि चिदात्मनि तदभावात्, अहं ब्रह्मास्मीति सामानाधिकरण्यस्य योऽयं स्थाणुरसौ पुमानितिवद्बाधपरत्वात्, अहंशब्दस्य तत्र लक्षणया शोधितत्वंपदार्थे विषयत्वाभ्युपगमाद्वा।

अतः कल्पिताश्रयमज्ञानं प्रतीतित एव सिद्धमिति चेत्, न, प्रविलीनाहंकारेऽप्यात्मनि सुषुप्त्यादावज्ञानस्य सद्भावाभ्युपगमात्, अन्यथा सुषुप्तिप्रलययोर्मुक्तिप्रसङ्गात्, तस्मादविद्याधीनो जीवविभागस्तदधीना चाविद्येति दुर्वारा परस्पराश्रयता ।

न च बीजाङ्कुरसंतानयोरिव जीवाविद्ययोरनादित्वेन तत्परिहारः, दृष्टान्तवैषम्यात्, तत्र हि बीजाङ्कुरव्यक्तीनामन्योन्यकार्यकारणभावात् तत्संतानयोः परस्पराधीनत्वव्यपदेशः, इह तु जीवाविद्याव्यक्त्योरेकत्वात् कार्यकारणभावाभावाच्च कथं तथा व्यपदेशः स्यात् ।

नन्वात्मनि गुणवत्त्वद्रव्यत्वयोरिवानादित्वेऽपि प्रयोज्यप्रयोजकभावो जीवाविद्ययोः किं न स्यादिति चेत्, तर्ह्यविद्यावत्त्वजीवत्वयोश्चिन्मात्रं किमधिकरणमुताविद्याविशिष्टम्, आद्ये ब्रह्मण्येवाविद्येति प्राचीनदोषानुषङ्गः, द्वितीये पुनरविद्यावत्येवाविद्येत्यात्माश्रयः, ब्रह्मवज्जीवस्यानादित्वे च न ब्रह्मप्रतिबिम्बता ।

अथ ब्रह्मैव स्वाविद्यया संसरति स्वविद्यया च विमुच्यत इत्युच्येत, तदा तस्यैकत्वाच्च विद्वदविद्वद्गुरुशिष्यबन्धमोक्षादिव्यवस्थाः स्युः, तथाहि यदि नोत्पन्नाविद्याकस्तदा गुरुः,आत्मान्तराभावादनुत्पन्नाविद्याकस्तदा शिष्यः ।

सर्वभेदप्रविलयान्मायाविनिर्मितौ गुरुशिष्यौ स्त एवेति चेत्, उत्पन्नविवेकस्य मायानुपपत्तेः ।

शिष्याविद्याविनिर्मितो गुरुरिति चेत्, न, अविद्यानिर्मितस्य जडत्वेन विद्यावत्त्वानुपपत्तेः ।

दृश्यत एवाविद्यानिर्मितस्य गुरुत्वं स्वप्न इति चेत्, तर्हि शिष्याविद्याविनिर्मितस्य गुरुत्वे तस्य तस्यापि शिष्यस्य स्वीयं स्वीयं शिष्यं प्रति गुरुत्वेन तत्तदविद्याविनिर्मितत्वाच्च कोऽपि परमार्थः परमात्मतया निरूपितः स्यात् ।

यच्चाहुः स्वात्मानमेव कल्पितभेदं गुरुः शास्तीति, तच्चायुक्तम्, तस्य स्वात्मनो मुक्तिं निश्चिन्वतः स्वव्यतिरेकेण तेषामभावं च पश्यतस्तदुपदेशार्थं प्रवृत्त्ययोगात्, प्रवृत्तौ वा मन्मुक्त्यैवासि मुक्तस्त्वं मा यत्नं कुरु मुक्तय इत्येवोपदेशप्रसङ्गात् ।

किञ्चानादौ संसारे कस्यचिन्मुक्तिरासीन्न वा, आद्ये नेदानीं संसारोपलम्भः स्यात्, आत्मान्तराभावात्, द्वितीयेऽपि कथं भविष्यतीति प्रत्याशा ।

न च विद्याभावात् पूर्वममुक्तिः, शुकवामदेवप्रभृतीनामविद्यमानाविद्याऽन्यस्य भविष्यतीति प्रत्याशासंभवात्, गुरुसंप्रदायाभावाच्च ।

तस्मादैकात्म्यवादे बन्धमोक्षव्यवस्थानुपपत्तेः पारमार्थिक एवात्मभेदः समाश्रयणीयः, प्रयोगश्च, आत्मा· आत्मप्रतियोगिकान्योन्याभाववान्· आत्मनिष्ठमिथ्याभेदातिरिक्तभेदवान् लक्ष्यत्वाद् घटवत् ।

न "एको देवः सर्वभूतेषु गूढ" इत्याद्यागमविरोधः, तस्येश्वरैकत्वप्रतिपादनपरत्वात् ।

न च तत्र सर्वभूतान्तरात्मत्वविरोधः, तस्यैव नियामकतया सर्वभूतान्तरावस्थानात्, तथा च श्रुतिः,"य आत्मनि तिष्ठन् य आत्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृत" इति,

"एक एव तु भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" ॥

इति स्मृतेरपीश्वरपरत्वात्, तस्य कायव्यूहनिर्माणेन बहुधा भावस्याप्युपपत्तेः, "तत्त्वमसी"त्याद्यैकात्म्योपदेशस्य चोपासनापरत्वात् ।

Digitized by Google

न चोपासनाविध्यश्रवणादतत्परत्वं शङ्कनीयम्, अपूर्वत्वेन पूर्वाप्र-विष्टभाग इत्यादाविव विधेः कल्प्यमानत्वाच्च,"नेह नानास्ति किंचने" त्यादेरप्येश्वरभेदाभावपरत्वात् "मृत्योः स मृत्यु"मित्यस्य भेददर्शननिन्दाया अभेदोपासनाविधिपरत्वात्, "द्वा सुपर्णा सयुजा", "अजामेका"मित्यादिना च जीवेश्वरयोर्जीवानां च परस्परभेदस्य साक्षादेव प्रतिपादनात् ।

न च तत्र लोकसिद्धभेदानुवाद इति वाच्यम्, ईश्वरस्यालौकिकत्वादेव तद्भेदस्य लोकतोऽधिगमासंभवात्, जीवभेदस्य च लोकसिद्धत्वे प्रत्यक्षादिव्यतिरेकेण लोकशब्दार्थानिरूपणात्, प्रत्यक्षादिसिद्धत्वेन जीवभेदस्य प्रामाणिकत्वसिद्धिः, सुखदुःखव्यवस्थानुपपत्तिरपि जीवभेदं साधयति, अन्यथैकस्मिंश्चित्सुखिनि सुखिन एव सर्वे स्युः, दुःखिनि वा दुःखिन इति व्यवस्था न स्यात् ।

न च पादे मे वेदना शिरसि मे सुखमितिवदुपाधिनिबन्धना व्यवस्था, तद्वदेव शरीरभेदेऽपि भोगानुसंधानप्रसङ्गात् ।

न च सुखादीनां साक्ष्यत्वेन साक्षिधर्मत्वाभावात् तद्भेदव्यवस्थापकत्वासिद्धिः, प्रमातृव्यतिरिक्तस्य साक्षिणो दुर्निरूपत्वात्, तथाहि तस्य द्रष्टृत्वे प्रमात्रन्तर्भावादद्रष्टृत्वे सुखादिसाधकत्वासिद्धेर्ब्रह्मरूपत्वे च संसारदशायामनाविर्भावात् साक्षिप्रत्यक्षं नाम व्यवहाराङ्गं न सिध्येत्, प्रमाणाभावाच्च ।

न तावत् प्रत्यक्षमत्र प्रमाणम्, मानसप्रत्यक्षवेद्यत्वे प्रमात्रन्तर्भावप्रसङ्गात् ।

इच्छादय एतद्ग्राहका नित्यज्ञानातिरिक्तप्रत्यक्षवेद्या अर्थापरोक्षत्वाद् रूपादिवदित्यनुमानं च प्रमाणमिति चेत्, न, ईश्वरप्रत्यक्षवेद्यतया सिद्धसाधनत्वात्, अनीश्वरवादिनां चेच्छादय एतद्ग्राहकानित्यानुमानातिरिक्तानुमानवेद्या वेद्यत्वादिति साधनवदाभाससमानयोगक्षेमत्वात्, अनित्यप्रत्यक्षवेद्यत्वे बाधकाभावाच्च ।

सुखादिविशिष्टस्यात्मनः स्वाश्रितज्ञानवेद्यत्वे कर्मकर्तृत्वविरोधप्रसङ्गो बाधक इति चेत्, नैवम्, स्वरूपमात्रेण ग्राहकस्य विशिष्टस्वरूपेण

Digitized by Google

धर्मत्वेऽप्यविरोधात्, अन्यथा त्वन्मतेऽपि कर्तृत्वकरणत्वयोरेकत्र समावेशो न स्यात्, अभ्युपगम्यते हि केवलाया बुद्धेः करणत्वमात्मविशिष्टत्वेन च कर्तृत्वम्, अविद्याविशिष्टस्य साक्षित्वं केवलाविद्यायाश्च साक्ष्यत्वमिति च स्वीकारात्, "ब्रह्म वा इदमग्र आसीत्", "तदात्मानमेव वेदाहं ब्रह्मास्मी"ति चात्मन एव वेद्यवेदकभावश्रवणात्, प्रमाणवत्त्वेन विद्धु-स्याप्यभ्युपगमे प्रकृतेऽप्यहं सुखीत्यनुभवसद्भावाचासौ दुरुद्धारितः ।

एतेन सुखादिप्रतिपत्त्यन्यथानुपपत्तिरपि साक्षिसिद्धौ प्रमाणमिति परास्तम्, अन्यथाप्युपपत्तेः ।

न च व्यभिचारिकारणजन्यज्ञानानां चैतन्यरूपमनुगतमनुसंधातार-मन्तरेण प्रतिसंधानानुपपत्तिः साक्षिणि प्रमाणम्, ज्ञानानां स्वयंप्रकाशत्वात् तदाश्रयतया सिद्धस्य स्थिरस्यात्मनः पूर्वापरकालिकज्ञानानुसंधानोपपत्तेः ।

एतेन प्रमातृप्रमाणप्रमेयप्रतीत्यन्यथानुपपत्तिरपि परास्ता, त्रिपुटी-प्रत्यक्षवादे घटमहं जानामीति त्रितयप्रतिभासोपपत्तेः ।

नापि "साक्षी चेता केवलो निर्गुणश्चे"त्यागमः प्रमाणम्, साक्षा-दीक्षत इतीश्वरस्य सर्वापरोक्षदर्शिनः प्रतिपादनात्, तदेवं न साक्षिणः सिद्धिः, सिद्धावपि न साक्ष्याणां धर्मत्वक्षतिः, आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्मा इति साक्ष्याणामपि तद्धर्मत्वस्वीकारात् ।

किंचाकाशो विशेषगुणवद्व्यापकद्रव्यान्यो द्रव्यत्वाद्घटवदित्यनुमा-नादप्यात्मनां सुखादिविशेषगुणवत्त्वसिद्धिः, तथा च तद्भवस्थातस्तेषां नानात्वसिद्धिः ।

अत्रोच्यते, यत्तावदुक्तं सर्वत्वाद्ब्रह्मणो नाविद्येति, तदयुक्तम्, यतः,

स्वरूपतः प्रमाणैर्वा सर्वज्ञत्वं द्विधा स्थितम् ।
तत्रोभयं विना मिथ्यासंबन्धं नैव सिध्यति ॥ ४ ॥

स्वरूपज्ञया चेत् सर्वज्ञत्वं ब्रह्मणोऽभ्युपगम्यते तदा असङ्गस्य ब्रह्मणो न विद्यामन्तरेणाशेषार्थसंगतिरिति सर्वज्ञत्वोपपत्त्यर्थमेव साभ्यु-पगमनीया, प्रमाणतः सर्वज्ञत्वेऽपि प्रमातृत्वस्य प्रमाणप्रमेयसंबन्धस्य

Digitized by Google

सर्वकल्पितस्य जीवानाद्यविद्यासंबन्धमन्तरेणासिद्धेः, सर्वज्ञत्वमविद्यावत्त्वमाक्षिपति न तु प्रतिक्षिपतीति कुतो विप्रतिषेधः ।

ननु प्रकाशरूपस्य कथमप्रकाशाविद्याश्रयत्वं परस्परविरोधिनोस्तमःप्रकाशयोरिवाश्रयाश्रयिभावानुपपत्तेरिति चेत्, मैवम्, विकल्पासहत्वात् ।

किमप्रकाशशब्देन प्रकाशाभावः प्रकाशादन्यत् तद्विरुद्धं वा विवक्षितम् ।

नाद्यः, अविद्याया भावाभावविलक्षणत्वेन भावत्वानभ्युपगमात् ।

द्वितीये तु दृष्टान्ताभावः, किं खलु चित्प्रकाशादन्यत् तदाश्रयं न भवतीति मां प्रत्युदाह्रियेत, सर्वस्य जडस्य चित्प्रकाशाश्रयत्वाभ्युपगमात्, तदेकाश्रयस्य तेन सह विरोधासंभवाच्च तृतीयोऽपि ।

न चाविरुद्धत्वादनिवृत्तिः, वेदान्तवाक्यजनितेन ब्रह्मैकाकारेण विज्ञानेन तदवच्छिन्नेन वा चित्प्रकाशेन तन्निवृत्त्युपपत्तेः ।

न च विज्ञानस्य निवर्तकान्तराभावादनिवृत्तिः, भावे वा तन्निवर्तकान्तरस्याभ्युपगन्तव्यत्वादनवस्थेति वाच्यम्, कारणनिवृत्त्यैव तन्निवृत्तेरप्यत्र सिद्धत्वात् ।

न च कार्येण कारणस्यानिवृत्तिः, संस्कारेण तज्जनकस्य ज्ञानस्य स्मरणेन तज्जनकसंस्कारस्यान्त्यशब्देनोपान्त्यशब्दस्य च परीक्षकैर्नाशाभ्युपगमात्, लौकिके चारणिप्रभवेनाशुशुक्षणिनारणेः कदलीफलोद्गमेन कदलीकाण्डादेः प्रत्यक्षदर्शनाच्च ।

ननु भवत्वेवम्, ब्रह्माश्रया अविद्या तस्याश्च को विषयः, किं स्वयमेव ब्रह्म उत द्वैतमुभयं वा, सर्वथाप्यनुपपन्नम्, सर्वज्ञस्य तत्तद्विषयज्ञाने सति तत्र तत्राज्ञानासंभवादिति चेत्, मैवम्, मां न जानासि त्वदुक्तमर्थं न जानामीति चावभाससमानेऽपि विषये तस्याः स्वानुभवसिद्धत्वात्, जडस्याविद्यानिर्मितत्वेन तद्विषयविद्यानुपपत्तौ तन्निवर्त्याविद्यायास्तत्रासंभवाच्च, जीवाश्रयाविद्यापक्षोद्भावितास्तु दोषास्तदनङ्गीकारादेव परास्ताः ।

यत्तु ब्रह्मण एवाविद्याश्रयत्वे विद्वदविद्वद्गुरुशिष्यबन्धमोक्षव्यवस्था न स्यादिति, तदसत्, यावदविद्यं सर्वव्यवस्थानां स्वप्नवदुपपत्तेः, निवृत्तायां तस्यां न कदाचिदपि व्यवस्था, न चाविद्यानिर्मितस्य गुरोः कल्पितत्वेन विद्यावत्त्वानुपपत्तिः, स्वप्न इव विद्यावत्तयैव कल्पनोपपत्तेः ।

न च गुरोः शिष्याविद्याकल्पितत्वे शिष्याणामपि स्वीयस्वीयशिष्याविद्याकल्पितत्वाच्च कोऽपि परमार्थः स्यादिति वाच्यम्, विकल्पासहत्वात्, गुरुशिष्यादिशब्दैः किं केनचित् परिच्छेदेन कवलीकृतं चैतन्यमभिधीयते किंवा निरस्तसमस्तभेदम् ।

नाद्यः, परिच्छिन्नस्य परिकल्पितत्वादेवाविद्याश्रयत्वानुपपत्तेः ।

द्वितीये तु सिद्धसाधनम् । यस्मादस्माभिरप्येतदेवाभिधीयते, विध्वस्तसमस्तविकल्पं चिन्मात्रमेव ब्रह्म स्वाविद्यापरिकल्पितांस्तत्तद्विकल्पान् पश्यन् संसरतीति, तादृशमेव चाकारमभिप्रेत्य गुरुरिति शिष्य इति चाभिलप्यते न तु परिछिन्नं कंचनाकारम्, न चेत् परिच्छिन्नानामविद्या ।

कथं तर्हि मदविद्यानिर्मितस्त्वं मदविद्यानिर्मितस्त्वमिति वादिप्रतिवादिनोरन्येषां च कोलाहल इति चेत्, मैवम्, विनैव तत्तत्परिच्छेदेष्वविद्यां स्वप्न इव परस्मिन्नेव ब्रह्मणि गुरुरिति शिष्य इति चार्यमिति चैकस्मिन्नेव नानाप्रतिभासः स्वप्नदृशीव चिदात्मनीत्युक्तत्वादित्यलमतिकर्दमेन, एतेन स्वात्मानमेव कल्पितभेदं गुरुः शास्तीत्यत्राभिहितोपालम्भः परास्तः, परमार्थत उत्पन्नविद्यो मुक्तश्च कश्चिच्छास्तीत्यनङ्गीकारात्, अविद्यादिनिर्मिते च गुरौ स्वाप्न इव कस्मादित्थं कुरुते कस्माच्चेति पर्यनुयोगायोगात् ।

यत् पुनरनादौ संसारे न कश्चिदपि मुक्तश्चेद्भविष्यति मुक्तिरिति प्रत्याशा न संभवति विद्योत्पत्तिरप्यनुपपन्ना गुरुसंप्रदायाभावादिति तदपि प्रत्युक्तम्, शास्त्रप्रामाण्यादेव भविष्यति मुक्तिरिति प्रत्याशोपपत्तेः ।

न च गुरुसंप्रदायाभावः, विद्वत्तया परिकल्पितगुरोस्तदुपपत्तेरुक्तत्वात्, प्रथमप्रयोगे च पारमार्थिकान्योन्याभाववत्त्वसाधने साध्यविकलो दृष्टान्तः, अद्वैतवादिभिर्घटस्यापि वास्तवान्योन्याभावानभ्युपगमात्, व्या-

Digitized by Google

वहारिकसाधने च सिद्धसाधनत्वात्, द्वितीयप्रयोगे च कालात्ययापदिष्टता, "एको देवः सर्वभूतेषु गूढ" इति श्रुत्या बाधात् ।

न चैषा श्रुतिरीश्वरपरा, असकृन्निषेधप्रसङ्गात्, नहीश्वरस्य प्रतिभूतं भेदो लोकतो वेदतः परीक्षकसंमत्या वा प्रसक्तः ।

न च तस्यापि नियन्तृतया सर्वभूतान्तरवस्थानं "य आत्मनि तिष्ठ"न्निति श्रुतेरिति वाच्यम्, आत्मेश्वरभेदाभावस्य तत्र तत्र श्रुतिषु बहुशः प्रतिपादनात्, अन्तर्यामिब्राह्मणे च "नान्योऽतोऽस्ति द्रष्टा" "नान्योऽतोऽस्ति श्रोते"त्यात्मभेदनिराकरणात्, "य आत्मनि तिष्ठ"न्निति चौपाधिकस्यात्मनो घटाकाशस्य महाकाशाधीनवत् स्वानुगतात्माधीनतामात्रप्रतिपादनपरत्वात्, अन्यथा नित्यद्रव्याणां स्वतन्त्रतया परस्पराधाराधेयभावानुपपत्तेरनङ्गीकाराच्च श्रुतेरानर्थक्यप्रसङ्गात् ।

न च 'तत्त्वमसी'त्याद्युपासनापरम्, तथात्वे प्रमाणाभावात्, तथाहि किं प्रमाणान्तरविरोधादुपासनापरमुत स्वार्थे तात्पर्यावगमोपायाभावात् ।

नाद्यः, जीवब्रह्मणोः प्रमाणान्तरागोचरतया तद्भेदस्यापि प्रमाणान्तरागोचरत्वात्, बिम्बप्रतिबिम्बयोरिव भेदावभासोपपत्तेश्च ।

न द्वितीयः, तत्त्वमसीति नवकृत्वोऽभ्यासादनेन जीवेनेति स्वार्थवादोपादाना"दथ्ययो अन्यथातो विदु"रिति भेददर्शननिन्दना"दथ संपत्स्य" इति फलश्रवणा"देकमेवाद्वितीय""मैतदात्म्यमिदं सर्व"मिति चोपक्रमोपसंहारयोरैकरूप्यादपूर्वत्वान्मृदादिदृष्टान्तैश्चोपपादनात्, अन्यत्रा"प्यहं ब्रह्मास्मि""स एष इह प्रविष्टो योऽन्यां देवतामुपास्ते स इदं सर्वं भवती"त्यादिश्रवणादेकत्वे तात्पर्यावगमात्, "तद्धास्य विजज्ञा"विति "तरति शोकमात्मवित् तमसः पारं दर्शयति" "भिद्यते हृदयग्रन्थि" "ब्रह्म वेद ब्रह्मैव भवती"ति विद्याया अविद्यानिवृत्तिब्रह्मात्मभावफलकत्वश्रवणात्, उपासनाविज्ञानस्याप्रमाणत्वादविद्यानिवर्तकत्वायोगात्, परमार्थतो भिन्नस्यात्मनो ब्रह्मात्मत्वासंभवात्, स्थितस्य नष्टस्य वान्यस्यात्मत्वायोगात्, उपासनापरत्वस्य वक्तुमयुक्तत्वात्, 'वेद' 'भवति' 'विद्वान्'

'न बिभेति' "पश्यन् प्रतिपेदे को मोहः कः शोक एकत्वमनुपश्यत" इत्यादिना विद्यातत्फलयोः समकालीनत्वप्रतिपादनात्, विधेयज्ञानपूर्वकत्वे च तदयोगात्, "नेह नानास्ती"त्यत्र च त्वप्रत्ययाश्रवणेन नानात्वस्यानिषेधात्, अप्रसक्तप्रतिषेधप्रसङ्गस्य च पूर्वमेव दर्शितत्वात्, नानाभूतस्य कार्यस्य प्रतिषेधे च कारणादन्यत्र कार्यस्याभावेन वाक्यस्य तन्मिथ्यात्वे पर्यवसानात्, उपासनाविधिपरत्वस्य निषेधादेव भेददर्शननिन्दायास्तत्परत्वायोगात्, "द्वा सुपर्णे"त्यादेश्च लोकसिद्धभेदानुवादकत्वात्, लोकसिद्धत्वेऽपि भेदस्य देहात्मभाववत् सवितृप्रादेशिकत्वादिवच्च प्रामाणिकत्वाप्रसङ्गात्, व्यवस्थानुपपत्तेश्च दुर्निरूपतया भेदासाधकत्वात्, व्यवस्थाशब्देन धर्मभेदमात्राभिधाने दाहपाकादेरिव धर्मिभेदासाधकत्वात्, भिन्नाधिकरणधर्मभेदाभिधाने चान्योन्याश्रयत्वात्, परस्परविरुद्धधर्मोक्तौ च विरोधस्य विचारासहत्वात्, सहानवस्थानस्यासिद्धेः, एकस्मिन्नप्यात्मनि पादे मे वेदना शिरसि मे सुखमिति युगपत् सुखदुःखयोरनुभवात्, अणुपरिमाणस्य मनसो युगपत् प्रदेशद्वयेन संनिकर्षाभावेऽपि त्वगिन्द्रियेण व्यापकेन युगपत् संनिकर्षात्, तत्तत्प्रदेशावच्छिन्नात्मनः संनिकर्षस्य च सुखदुःखनिदानत्वाङ्गीकारे सुखदुःखयोरणुमात्रतयोपलम्भप्रसङ्गात्, सकलदेहव्यापितया च तयोरनुत्पादप्रसङ्गात्, विनश्यदविनश्यतोश्च सुखदुःखयोः सहावस्थानस्य स्वयमेवाङ्गीकारात्, वध्यघातकभावस्य च नाजात एकोऽन्यं हन्ति नाप्यन्याधारमिति न्यायेन सहावस्थानाक्षेपकत्वात्, व्यवस्थायाश्च कल्पितभेदाश्रयत्वेनाप्युपपत्तेः, अननुसंधानस्य च शरीरभेदादेवातीतशरीरेष्विव संभवात्, वर्तमानशरीरेष्वपि निदर्शनाभावादेवं योगिनमनङ्गीकुर्वद्भिरनुसंधानस्य प्रसञ्जयितुमशक्यत्वात्, योगिसद्भावाभ्युपगमेऽपि नयनावच्छिन्नस्यात्मनः शब्दाद्यननुसंधानवदेकशरीरविशिष्टस्य शरीरान्तरेऽननुसंधानादेवोपपत्तेः, उपलक्षितस्य परमात्मनः सर्वज्ञस्य सर्वत्रानुसंधानेऽपि दोषाभावात्, अनुसंधानेऽपि तस्याभोक्तृत्वादेव योगिवदीश्वरवच्च तस्य तत्तच्छरीरदुःखपरिहाराय प्रवृत्त्यप्रसङ्गात्, सुखादीनां च साक्ष्यायां साक्षिधर्मत्वाभावेन तद्भेदासाधकत्वात्, साक्षिणश्च प्रमाकरणासंनिधानेऽपि

Digitized by Google

सुषुप्तावज्ञानसाधकस्य प्रमान्तर्भावानुपपत्तेः, तस्य जीवात्मान्तर्भावात्, साक्षिप्रत्यक्षस्य लौकिकव्यवहाराङ्गत्वोपपत्तेः ।

न च साक्षिणि प्रमाणाभावः, यतः,

वैषरागः स्वविषयानित्यज्ञानातिरेकिणा ।
तदध्यक्षेण संवीक्ष्यः प्रत्यक्षत्वात् पटादिवत् ॥ ५ ॥

विवादाध्यासिताश्चैवेच्छादय एतद्ग्राहकानित्यज्ञानातिरिक्तैतत्प्रत्यक्षग्राह्या एतत्प्रत्यक्षत्वादेतत्प्रत्यक्षघटादिवत् ।

न चाभाससमानयोगक्षेमत्वम्, अनुमानस्य नित्यत्वप्रसाधने लक्षणव्याघातात्, व्याप्याद्व्यापके बुद्धिरनुमानम्, साधनधर्मदर्शनात्, साध्यधर्मविशिष्टे बुद्धिरनुमानं लिङ्गदर्शनात् संजायमानं लैङ्गिकमनुमानं त्रिरूपाल्लिङ्गतोऽर्थदृगित्यादिलक्षणैरनित्यस्यैव ज्ञानस्यानुमानत्वेन लक्ष्यमाणत्वात्, विपक्षे बाधकाभावाच्च, मानसप्रत्यक्षवेद्यत्वे इच्छादेः कर्मकर्तृभावस्यैव बाधकत्वात् ।

न च स्वरूपमात्रेण ग्राहकस्य विशिष्टरूपेण ग्राह्यत्वेऽप्यविरोधः, केवलस्य देवदत्तस्य गन्तृत्वं कुण्डलविशिष्टस्य तु गन्तव्यत्वमिति तत्रापि विरोधाभावप्रसङ्गात्, दृश्यते च कर्तुरप्यन्यत्र करणता योधै राजा युध्यते चारेण परसैन्यं कलयतीत्यादिषु ।

न चाविद्याविशिष्टः साक्षी येन कर्तृकोटिनिविष्टाया अविद्यायाः कर्मता स्यात्, चिद्रूपस्यैवात्मनः साक्ष्यसंबन्धे साक्षित्वेन व्यवहारात्, "यद्वैतं न पश्यती" त्यादिश्रुतेः, "ब्रह्म वा इदमग्र आसीत्" "तदात्मानमेवावे" दिति नात्मनः कर्मकर्तृभावो विवक्ष्यते, किं तर्हि वेदान्तवाक्यजनितब्रह्मैकाकारान्तःकरणवृत्तिरूपया विद्यया स्वतः सिद्धस्यैवात्मनोऽब्रह्मत्वप्रमकारणाविद्याया निवृत्तिः, तथाचान्तःकरणविशिष्टस्यैव प्रमातृत्वं विशुद्धस्य ब्रह्मणो वृत्तिव्याप्यत्वमिति कुतस्तत्रैकस्य कर्मकर्तृभावः ।

न च नित्यबोधमन्तरेण पूर्वापरबुद्धीनामनुसंधानसिद्धिः, ग्राहकतया सिद्धेर्निराकृतत्वात् ।

न च "साक्षी चेता केवलो निर्गुणश्चे"ति वाक्यमीश्वरपरत्वादात्मनः साक्षित्वेन प्रमाणमिति युक्तम्, मायाविशिष्टरूपे तस्मिन् केवलो निर्गुण इति विशेषणानुपपत्तेः, तस्मात् सर्वप्रत्यग्भूतं विशुद्धं ब्रह्मात्र जीवाभेदेन साक्षीति प्रतिपाद्यते ।

न चानन्दादीनां साक्ष्याणां साक्षिधर्मत्वम्, आनन्दानुभवयोरात्मरूपत्वात् ।

न च नित्यत्वं धर्मः, विनाशराहित्येनोपलक्षितस्वरूपस्य तथा व्यपदेशात्, विशेषगुणवद्‍व्यापकान्यत्वसाधनं च प्रतिकल्पं जायमानाकाशभेदैरेव सिद्धसाधनम्, अर्थान्तरं चेश्वरवादिनामीश्वरेण, अनित्यपदप्रक्षेपे च पूर्वोक्त एव दोषः, तथा च सुखादीनामात्मगुणत्वाभावाच्च तद्व्यवस्थातस्तद्भेदसिद्धिः, तदेवं स्वाविद्यया ब्रह्मैव संसरति स्वविद्यया च मुच्यत इत्येकाविद्यापक्षे न कश्चिद्दोषः, तथा नानाविद्यापक्षेऽपि ।

ननु नानाजीवानां किमेकाविद्या कल्पिका उत प्रतिजीवं भिन्ना ।

नाद्यः, एकमुक्तौ सर्वमुक्तिप्रसङ्गतादवस्थ्येन नानाजीवकल्पनायामपि व्यवस्थानुपपत्तेः ।

न द्वितीयः, कल्पनागौरवात् ।

ननु व्यवस्थानुपपत्तौ कल्पिकायां न कल्पनागौरवं दोषः "प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपी"ति न्यायादिति चेत्, मैवम्, व्यवस्थायाः पारमार्थिकत्वे सत्यविद्याकार्यत्वानुपपत्तेस्तत्कल्पनावैयर्थ्यात्, अपारमार्थिकत्वे पुनरेकयैव तस्याः सिद्धेरविद्याभेदकल्पना व्यर्था, अन्यथैकस्याप्यनन्तभेदभानायानन्ताविद्याः कल्प्याः स्युः ।

सन्तु को दोष इति चेत्, तर्हि ताभिरेव सर्वकल्पनासिद्धेरात्मान्तरस्य न ताः कल्प्याः ।

(शेषमग्रे)

काशीस्थराजकीयप्रधानपाठालयीयसंख्यावान् ।
सांख्याध्यापनकारी वेचनरामोऽस्मि कान्यकुब्जोऽहम् ॥ १ ॥

॥ पं० वेचनरामत्रिपाठी ॥

Digitized by Google

॥ श्रीः ॥

॥ योगवार्त्तिकम् ॥

(*Continued from page* 352. VOL. VI.)

भुवनज्ञानं सूर्ये संयमात् ॥ २५ ॥

भुवनशब्दार्थं व्याचष्टे। तत्प्रस्ताव इत्यादिना। भुवनविस्तारः कथ्यत इति शेषः। तत्र चतुर्दशसु लोकेषु व्यक्तत्वादौ सप्त लोकानाह। सप्त लोका इति। सप्त लोकान् विभजते। तत्रेति। अवीचिर्नाम नरकविशेषः। सर्वलोकानामधःस्थानं तदादाय सुमेरुपृष्ठपर्यन्तं भूर्लोकः। मेरुपृष्ठमारभ्य मेरुपृष्ठोपलक्षितभूर्लोकस्योपरि ध्रुवपर्यन्तं भुवर्लोकः। तदुपरि क्रमेण पञ्चविधः स्वर्लोकः। एतेन त्रिलोकव्यवस्थापि दर्शिता। पञ्चानां सामान्यतः स्वर्लोकत्वेनैक्यात्। पञ्चानामवान्तरभेदानाह। माहेन्द्र इत्यादिना। माहेन्द्रो लोकः स्वरितिनामको भूर्भुवर्लोकापेक्षया तृतीयः। एवमुत्तरत्रापि। उक्तव्युत्क्रमेण सप्तलोकानां संग्रहश्लोकं पठति। ब्राह्म इति। जनस्त्रिभूमिको ब्रह्मलोकः। ततोऽधः प्रजापतिलोको महान् महरितिनामा। ततोऽधः स्वरितिनामा इन्द्रलोकः। ततोऽधस्तारालोको द्यौरिति भुव इति चोच्यते। तदधश्च प्रजानां मनुष्याणां लोको भूरितिनामेत्यर्थः। इदानीं पृथिव्या अधःस्थितान् सप्त नरकान् भूर्लोकांशतया प्रतिपादयति। तत्रेति। तत्र भूर्लोके सर्वनरकाधःस्थितादवीचिनरकादुपर्युपरि स्थिता षण्महानरकभूमयो घनादीनामुत्तमोत्तमानाम् आधारा महाकालादिसंज्ञकास्तिष्ठन्तीत्यर्थः। घनाः शिलाशकलादयः पार्थिवपदार्थाः तमश्चान्धकारः। अत्र महानरकशब्दादन्येऽप्युपनरकाः कुम्भीपाकादयोऽनन्तास्तत्रैव तिष्ठन्तीति प्रतिपादितम्। दुःखवेदनाः दुःखभोगिन आक्षिप्य गृहीत्वा भूरादिसप्तलोकानुक्त्वा महातलादीनन्यान्सप्तलोकानाह। ततो महेति। ततोऽवीचेरध इत्यर्थः। तदेवं चतुर्दश लोका भवन्तीति सूचयति। भूमिरियमष्टमीति। अत्र भूमेरष्टमीत्ववचनात्सर्वाधःस्थितान्महातलादुपर्युपरि क्रमेण सप्तपातालानीत्यवगन्तव्यम्। संक्षेपतश्चतुर्दशलोकानुक्त्वा

विस्तरेण विवक्षुरादौ भूर्लोकस्य विस्तारमाह । सप्तद्वीपेति । तस्य राजतेति पूर्वादिप्रदक्षिणक्रमेणेत्यादिः, दक्षिणभागाकाशस्य वैदूर्यप्रभाव्याप्ततायाः वक्ष्यमाणत्वात् । श्वेतो रजतवर्णः स्वच्छः स्फाटिकवत्प्रतिबिम्बोद्ग्राही कुरण्टकं स्वर्णवर्णः पुष्पविशेषः । दक्षिणेति । अस्य सुमेरोरुपरि दक्षिणपार्श्वे जम्बूनामा वृक्षः । यतो यन्नामा लवणोदधिवेष्टितो जम्बूद्वीपो जम्बूद्वीपनामेत्यर्थः । तस्येति । निरन्तरं सूर्येण प्रदक्षिणीकरणात्तस्य सुमेरोरवच्छेदभेदेन रात्रिंदिनसंयुक्तमिव सद्वर्त्तते भ्रमति । तथा तस्य मेरोरुत्तरदिशि नीलाद्यास्त्रयः पर्वताः प्रत्येकं द्विसहस्रयोजनविस्तारास्तिष्ठन्ति तेषामवकाशेषु त्रीणि वर्षाणि प्रत्येकं नवयोजनसहस्रविस्ताराणि । तत्र नीलगिरिर्मेरुलग्नः नीलस्योत्तरे रमणकं श्वेतस्योत्तरे हिरण्मयं शृङ्गवत उत्तरे समुद्रपर्यन्तमुत्तराः कुरव इत्यर्थः । दक्षिणदिश्यपि संनिवेश एवं बोध्यः । सुमेरोः प्राचीना इति । मेरोः पूर्वदिशि तत्संयुक्तोमाल्यवान् पर्वतः तमेव सीमानं कृत्वा समुद्रपर्यन्तं भद्राश्वनामदेशाः तत्र भद्राश्वनामकमेव वर्षम् । एवं मेरोः पश्चिमदिशि तत्संयुक्तगन्धमादनसीमानः समुद्रपर्यन्ताः केतुमालनामदेशाः वर्षं चैकमेव केतुमालसंज्ञकमित्यर्थः । मध्य इति । छत्राकारसुमेरोरधोभागे वर्षमिलावृतं चतुर्दिक्षु च पर्वताश्छत्रपार्श्वस्थावरणवासइव मेरुपार्श्वेष्वेव संसक्ता इति । तदेवं जम्बूद्वीपस्य नववर्षाणि प्रोक्तानि पर्वतैः सह समयं जम्बूद्वीपस्य प्रमाणमाह । तदेतदिति । तदेतज्जम्बूद्वीपाख्यस्थानं योजनशतसहस्रमितम् । अतश्च सुमेरोश्चतुर्दिक्षु पञ्चाशत्पञ्चाशद्योजनसहस्रेण व्यूढं संक्षिप्तं परिसंख्यातमित्यर्थः । सुमेरुमादायेति शेषः । सुमेरोः परिमाणं च विष्णुपुराणे प्रोक्तम् । चतुरशीतिसाहस्रैर्योजनैरस्योच्छ्रायः ।

> प्रविष्टः षोडशाधस्तात् द्वात्रिंशन्मूर्ध्नि विस्तृतः ।
> मूले षोडशसाहस्रो विस्तारस्तस्य भूभृतः ॥
> मेरोश्चतुर्दिशस्तत्र नवसाहस्रविस्तृतम् ।
> इलावृतं महाभाग चत्वारस्तत्र पर्वताः ॥

इति । एतेन मेरोः पार्श्वद्वये इलावृतस्याष्टादशसाहस्रतया लवण-

मावृता जम्बूद्वीपस्य स्थितेति । जम्बूद्वीपस्य वेष्टनं लवणसमुद्रमाह । स वाप्येति । यथा ।

जम्बूद्वीपं समावृत्य लक्षयोजनविस्तृतः ।
मैत्रेय वलयाकारस्थितः क्षारोदधिर्बहिः ॥

इति विष्णुपुराणात् । समुद्रस्य द्वीपद्विगुणत्वं पार्श्वद्वयेन बोध्यम् । ततो द्विगुण इति । जम्बूद्वीपाद् द्विगुणः शाकद्वीप इत्यर्थः । शाकाच्च द्विगुणः कुशद्वीपः । एवंक्रमेण वृद्धिः । समुद्राश्चेति । स्वस्वद्वीपापेक्षया द्विगुणाः समुद्राणां विशेषणत्रयं सर्षपेत्यादि । सर्षपराशिवन्मध्ये किंचिन्मात्रोच्छूनाः मध्येतरङ्गबाहुल्यात् । तथा कूलद्वयस्थितैर्विचित्रशैलैरवतंसकल्पैः सहिताः तथा इक्षुरसादितुल्योदका इत्यर्थः । सप्तद्वीपानां समुद्रादिसहितानां मिलित्वा परिमाणमाह । सप्तेति । एते सप्तद्वीपाः समुद्रसहिताः सप्तसमुद्राद्बहिःस्थितेन लोकालोकपर्यन्तेन परिवृताः पञ्चाशद्योजनकोटिपरिमिता इत्यर्थः । अलोकभूमिसहिता इत्यपि बोध्यम् । समग्रभूगोलस्यैव पञ्चाशत्कोटिपरिमितत्वस्य पुराणेष्ववगमादिति । तदेतदिति । तदेतत्सर्वं भूगोलकं सुप्रतिष्ठितमसंकीर्णं पञ्चाशत्कोटिपरिमितस्याण्डस्य मध्ये व्यूढं संक्षिप्तम् । इदं च शतकोटिविस्तारमण्डं सप्तावरणसहितमपि प्रकृतेरणुरिव इत्यर्थः । तदुक्तं विष्णुपुराणे प्रकृतिं प्रकृत्य ।

अण्डानां तु सहस्राणां सहस्राण्ययुतानि च ।
ईदृशानां तथा तत्र कोटिकोटिशतानि च ॥

इति । सौरे च ।

ब्रह्माण्डमेतत्सकलं ब्रह्मणः क्षेत्रमुच्यते ।
क्षेत्रज्ञश्च स एवोक्तो विरिंचिश्च प्रजापतिः ॥
सहस्रकोटयः सन्ति ब्रह्माण्डास्तिर्यगूर्ध्वगाः ।
ब्रह्माणो हरयो रुद्रास्तत्रतत्र व्यवस्थिताः ॥
आज्ञया देवदेवस्य महादेवस्य शूलिनः ।
ब्रह्माण्डानामसंख्यानां ब्रह्मविष्णुहरात्मनाम् ॥

Digitized by Google

ब्रह्मणो मध्ये हिरण्मेहदेव इति श्रुतिः ।

इति । नारदीये च ।

सृष्टिस्थित्यन्तकरणे ब्रह्मविष्णुमहेश्वराः ।
यस्यायुतायुतांशांशास्तद्ब्रह्मेत्यभिधीयते ॥

इति । न चास्मिन्वाक्ये परमात्मांशत्वमेवाण्डशरीरिणां गम्यते न तु प्रकृत्यंशत्वं ब्रह्माण्डस्येति वाच्यम् । शक्तिशक्तिमतोरंशांशिभावेन शक्त्योरप्यंशांशिभावसिद्धेः । अग्निविस्फुलिङ्गादिघटितदृष्टान्तेषु तथा दर्शनात् ।

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥

इति श्रुतेश्चेति ।

इदानीं तत्तल्लोकवासिनो देवादीन् कथयति । तत्र पातालइति । देवनिकायाः देवसमूहा असुरादयश्च प्रतिवसन्तीत्यर्थः । देवाश्च मनुष्याश्च देवमनुष्याः । भूर्लोकस्थानुक्त्वा भुवर्लोकस्थानाह । ग्रहनक्षत्रेति । नक्षत्राण्यश्विन्यादिसप्तविंशतिरितराणि तुच्छज्योतींषि तारकाः । एते ग्रहादयः सर्वोपरिस्थिते मेढिकाष्ठवन्निश्चलतया स्थिते अत एव ध्रुवसंज्ञके ज्योतिर्विशेषे वायुरज्ज्वा बद्धा गाव इव हलिकतुल्यचक्रवायोः प्रतिनियतसंचारेण कालविशेषैरवधृतगतयः सुमेरोरुपर्युपरिभावेन संनिविष्टा भुवर्लोके भ्रमन्ति इत्यर्थः । नन्वेवं सुमेरोरुपरि ज्योतिर्मण्डलस्य भ्रमणे कथं मेरुणा ज्योतिश्चक्रावरणं येन रात्रिंदिनव्यवस्थितिरिति चेन्न । वृक्षेण सूर्यव्यवधानवत् मेरोरेकपार्श्वस्थसूर्यादेः पार्श्वान्तरेण व्यवधानसंभवादिति । स्वर्लोकस्थानाह । माहेन्द्र इति । त्रिदशादयो देवानां जातिभेदाः कल्पायुषः । कल्पो ब्रह्मणो दिनं तदायुषः संकल्पमात्रेण कार्येषु समर्थाः संकल्पसिद्धाः वृन्दारकाः देवा औपपादिकदेहाः पित्रोः संयोगं विना स्वकर्ममात्रेणोत्पद्यमानशरीरा इत्यर्थः । महर्लोकस्थानाह । महतीति । महाभूतानां परिणामने स्वतन्त्राः ध्यानाहारा ध्यानत एव तृप्ताः । जनलोकस्थानाह । प्रथम इति । भूतेन्द्रियवशिन इति । इन्द्रियाणां परिणामने स्वातन्त्र्यं पूर्वा-

पेक्षयैषामधिकम् । द्विगुणेति । द्विगुणं द्विगुणरूपमुत्तरमधिकमायुर्येषां ते तथा । ब्रह्मपुरोहितानामायुः कल्पसहस्रात् पूर्वोक्ताद् द्विगुणं तदुत्तरस्य तद्द्विगुणमेवं क्रमेण वृद्धिरित्यर्थः । तपोलोकस्थानाह । द्वितीय इति । ते भूत इति । भूतेन्द्रिययोः प्रकृतेरहंकारस्यापि वशिन इति पूर्वापेक्षयैषामाधिक्यम् । अत्राहंकारेणान्तःकरणसामान्यग्रहणम् । एतेन स्वेच्छयान्तःकरणयोर्निर्माणे चित्तोत्पादनादौ समर्था इति । द्विगुणेति । पूर्वानुसारेण व्याख्येयम् । ऊर्ध्वरेतस इति । प्राणायामवशादूर्ध्वमेव रेतांसि सूक्ष्माणि भूत्वा गच्छन्ति न स्खलन्ति संभोगाभावाद् येषां ते तथा ऊर्ध्वं सत्यलोकादौ ज्ञानमप्रतिहतं यद्यं येषां ते तथा अधोलोकेषु अनावृतो ज्ञानविषयो येषां ते तथेत्यर्थः । सत्यलोकस्थानाह । तृतीय इति । आदौ चतुर्णां साधारणानि विशेषणान्याह । अकृतेति । न कृतो भवनन्यासो गृहनिर्माणं यैस्ते तथा स्वस्मिन्नेवात्मनि गृहे प्रतितिष्ठन्तीति स्वप्रतिष्ठा आत्मवासाः । उपर्युपरिस्थिता इति । अच्युतानामुपरि स्थिताः शुद्धनिवासाः, एवं क्रमेणेत्यर्थः । तथा च सत्यलोकेऽप्यवान्तरलोकभेदाः सन्तीत्यायातम् । प्रधानवशिनः प्रकृतौ स्वतन्त्रा ईश्वराद्द्विपरार्द्धायुषः । तेषां चतुर्णां संज्ञाभेदमवान्तरविशेषं चाह । तत्राच्युता इति । अच्युतसंज्ञकाः सवितर्कयोगेनैव सुखिनः शुद्धनिवासादयोऽप्येवं व्याख्येयाः । तेऽपि चत्वारोऽपि त्रैलोक्यमध्ये चतुर्दशभुवनमध्य एव तिष्ठन्ति न ब्रह्माण्डाद्बहिरित्यर्थः । नन्वेवमण्डस्य सर्वजीवसाधारण्यात् कथं ब्रह्माण्डसंज्ञेत्याकाङ्क्षायामाह । तएव इति । तएते सप्तलोका अवान्तरं चतुर्दशधा भिन्नाः सर्वेश्वरादिपुरुषस्य ब्रह्मणो लोका ब्रह्मणो हिरण्यगर्भस्य लिङ्गदेहेन सर्वलोकव्यापनात् पितापुत्रवदंशांशिभावेन सर्वजीवानां ब्रह्माभेदाच्चेति भावः । ननु असंप्रज्ञातसुखिनौ यौ विदेहप्रकृतिलयौ 'भवप्रत्ययो विदेहप्रकृतिलयानां'मिति सूत्रोक्तौ तयोर्लोकः कथं नोक्तः तत्राह । विदेहेति । तेषां मुक्तप्रायत्वादीश्वरकोटित्वाच्च ब्रह्माण्डस्यान्तर्बहिः स्वातन्त्र्येण व्यापारतया शास्त्रे न ते लोकमध्ये लोकवासिजनमध्ये गणिता इत्यर्थः । तदेवं संक्षेपतो भुवनशब्दार्थं व्याख्याय सूत्रवाक्यार्थमाह । एतद्योगिनेति ।

सूर्ये सूर्यद्वारे संयमं कृत्वा योगिनैतद्भुवनं साक्षात्कर्त्तव्यम् । अत्र योग-शास्त्रान्तरदर्शनेन द्वारशब्दः पूरित इत्युन्नीयते सूर्यद्वारं च ब्रह्मणो लोक-द्वारभूतं 'सूर्यान्तश्चित्तं स आदित्यमाक्रामति तस्मै स तत्र विजिहीते । यथा भास्करस्य खन्तेन स ऊर्ध्वमाक्रमत' इति श्रुतौ, 'सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मे'ति श्रुतौ च तद्वाच्यकता तथा व्याख्यातत्वात् ।

अनन्ता रश्मयस्तस्य दीपवद्यः स्थितो हृदि ।

ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् ॥

ब्रह्मलोकमतिक्रम्य तेन यान्ति परां गतिम् ।

इति स्मरणाच्चेति । न केवलं सूर्यद्वारसंयमस्यैव भुवनज्ञानं फलं किं तु योगशास्त्रोक्तसंयमान्तरस्यापि इत्यतो रागवशार्थम् । अन्यत्र संयमेनापि समस्तभुवनं साक्षात्कर्त्तव्यम् इत्युपदिशति । ततोऽन्यत्रापीति । ततः सूर्य-द्वारादन्यत्रापि एवं संयमं तावदभ्यसेत् यावदिदं भुवनं दृष्टं भवे-दित्यर्थः ॥

चन्द्रे ताराव्यूहज्ञानम् ॥ २६ ॥

भाष्यं सुगमम् ॥

ध्रुवे तद्गतिज्ञानम् ॥ २७ ॥

तारास्वरूपाणि ज्ञात्वैव तासां गतिज्ञानं संभवतीत्याशयेन भाष्ये तत इत्युक्तम् । ताराव्यूहज्ञानान्तरमित्यर्थः । भाष्यं सुगमम् । अस्मिन्नेव प्र-सङ्गे योगशास्त्रान्तरोक्तात् भुवर्लोकस्थवस्त्वन्तरसंयमात् सिद्धिं स्वयं पूर-यति । ऊर्द्धेति । ऊर्द्धं विमानेष्वादित्यादिरथेषु कृतः साक्षात्कारपर्यन्तः संयमो येन स तानि विमानानि रथान् जानीयादित्यर्थः । ननु विमाने संयमस्येत्र विमानसाक्षात्कारः सिद्धिरत्रोक्ता साक्षात्कारपर्यन्तस्यैव संय-मस्य सर्वत्र सिद्धिकथनात् संयमानां स्वस्वविषयसाक्षात्कारहेतुतायाः सामान्यत एव सिद्धत्वाच्च ॥

नाभिचक्रे कायव्यूहज्ञानम् ॥ २८ ॥

Digitized by Google

शरीरमध्यवर्त्ति नाभिकन्दरूपं चक्रं कदलीमूलवद्दशदलं यतः शाखाप्रशाखादिवच्छिरःपादादिकमवयवजातम् ऊर्ध्वमधश्चाविर्भवति । तस्मिन्नाभिचक्रे संयमात् साक्षात्कृते कायस्थं पदार्थव्यूहं वातपित्तश्लेष्मादिरूपं साक्षात् क्रियतइत्यर्थः । भाष्ये वाह्यमिति । शुक्रस्य मज्जा बाह्येति । एवमादिरेषां सप्तानां क्रमः विन्यासः शरीरसंस्थानम् ॥

कण्ठकूपे क्षुत्पिपासानिवृत्तिः ॥ २९ ॥

तन्तोरधस्तादिति । अनेनोपरि छिद्रं वारितं कूपादध उरसीत्यागामिभाष्येण च उरःपर्यन्तत्वं कण्ठकूपस्य लप्स्यते तथा च जिह्वाधःस्थस्य तन्तोर्मूलादारभ्य उरःपर्यन्तं छिद्रं कण्ठकूपः कूपाकारश्छिद्रमिति । तत्रेति । तस्मिन् प्रदेशे संयमादशेषविशेषतः साक्षात्कृते सति क्षुत्पिपासानिवृत्तिरूपा सिद्धिर्भवतीत्यर्थः । एवंविधेषु च संयमेषु भावनाप्रकारो योगशास्त्रविशेषात् गुरुमुखाच्च प्रत्येतव्यः ।

कूर्मनाड्यां स्थैर्यम् ॥ ३० ॥

कूर्माकारेति । कुण्डलितसर्पवदवस्थिततया कूर्माकारं हृदयपुण्डरीकाख्यं नाडीचक्रं तत्र कृतसंयमो योगी स्थिरपदं स्थिरां चित्तवृत्तिं लभतइत्यर्थः । नाड्याः कूर्माकारत्वे दृष्टान्तद्वयं यथा सर्पो गोधा वेति कुण्डलित इति शेषः ।

मूर्द्धज्योतिषि सिद्धदर्शनम् ॥ ३१ ॥

शिर इति । शिरःकपालमध्येऽन्तश्छिद्रं छिद्रस्यान्तः प्रभास्वरं स्वप्रकाशकं ज्योतिरस्तीत्यादिरर्थः । शिरःकपालमध्ये छिद्रं प्रभास्वरत्वाज्ज्योतिरिति प्रामादिकपाठेऽप्ययमेवार्थो लक्षणया कार्यः । शेषं सुगमम् ।

प्रातिभाद्वा सर्वम् ॥ ३२ ॥

प्रातिभमिति । प्रातिभं स्वप्रतिभोत्थम् अनौपदेशिकं ज्ञानं संसारतरणोपायत्वात् तारकमिति । तारकं सर्वविषयमिति सूत्रे व्याख्यास्यते । तच्च विवेकजस्य वक्ष्यमाणस्य सार्वज्ञस्य पूर्वलिङ्गम् । तत्र दृष्टान्तो यथा ।

सूर्योदयस्य पूर्वलिङ्गं प्रभेति तेन वा प्रातिभज्ञानेन सर्वं पूर्वोक्तमतीतानागतादिसिद्धपर्यन्तं योगी जानाति पूर्वोक्तात्संयमात् विनापीत्यर्थः । तेनेत्येतद्विवृणोति । प्रातिभस्य ज्ञानस्योत्पत्ताविति । द्वारान्तरापेक्षा नास्तीति भावः । यद्यपि तारकं सर्वविषयमित्यागामिसूत्रे विवेकजज्ञानमेव प्रातिभं तारकं च व्याख्यास्यते तथाप्यत्र प्रातिभादितिहेतुत्ववचनात् विवेकजज्ञानस्य पूर्वरूपमेव तत्तथा प्रातिभं तारकं चेति व्याख्येयम् । ननु संयमसिद्धिमध्ये कथं प्रातिभज्ञानजा सिद्धिरुच्यतइति चेत्, न । प्रातिभस्यापि क्षणतत्क्रमादिसंयमादिजन्यतया वक्ष्यमाणत्वेन उक्तसिद्धेरपि परम्परया संयमसिद्धित्वादिति । संयमस्य क्षुद्रसिद्धय उक्ता इदानीं संयमस्य सत्त्वपुरुषान्यताख्यातिरूपां मुख्यां सिद्धिं विवक्षुरादौ तत्संयमहेतुभूतयाश्चित्तसंविदः कारणमाह ।

हृदये चित्तसंवित् ॥ ३३ ॥

हृदयपदं व्याचष्टे । यदिदमिति । अस्मिन् ब्रह्मणः परमात्मनो जीवस्य च पुरे शरीरे यदिदं दहरं सगर्त्तं पुण्डरीकाकारं ब्रह्मणो वेश्म तत्र विज्ञानं विज्ञानशक्तिकमन्तःकरणं ब्रह्मणः सिंहासनकल्पं तिष्ठति अतस्तस्मिन् हृदयाख्ये वेश्मनि संयमाच्चित्तसाक्षात्कारो भवतीत्यर्थः । चित्ते ज्ञाते चित्ताद्विवेकेनात्मसाक्षात्कारो भवतीति क्रमानुसारेणाह ।

सत्त्वपुरुषयोरत्यन्तासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थात्स्वार्थसंयमात्पुरुषज्ञानम् ॥ ३४ ॥

सत्त्वाधिकरणात्सत्त्वं बुद्धिः । परार्थादिति पञ्चमी चान्यपदमध्याहृत्य व्याकरिष्यति । तथा च बुद्धिपुरुषयोरत्यन्तविधर्मणोः प्रत्ययद्वयाविवेको भोगशब्दार्थः । तयोः प्रत्यययोर्मध्ये परार्थाद्विवेकेन स्वार्थे पौरुषेयप्रत्यये संयमात् साक्षात्कृते सति स्वयमेव पूर्वोक्ताशेषविशेषैः पुरुषस्य साक्षात्कारो भवति तादृशसंयमाभ्यासेनेत्यर्थः । यद्यपि पौरुषेयः प्रत्ययः पुरुषातिरिक्तो न भवति तथापि वृत्त्युपरागेण परिच्छिन्नांश एव प्रत्ययः घटाद्यवच्छिन्नं पुरुषस्यापरिच्छिन्नो महाकाशवत् इत्यनयोर्भेद इत्यतः प्रत्यये साक्षा-

स्वार्थपर्यन्तासंयमस्यापरिच्छिन्नत्वाद्ध्यंशमात्राधिक्येन फलं पुरुषसाक्षात्कार उक्त इति । नन्वत्र सूत्रे भोगलक्षणस्य किं प्रयोजनमिति चेत् । उच्यते । भोगरूपेणैव बुद्धिपुरुषधर्मयोरविवेकात् धर्मिणोः सांख्यमतो भोग्यमत्यएव तद्धर्मयोर्विवेकाय संयमः कार्य इति प्रतिपादयितुम् अनेन सूत्रेण भोगोपि लक्षितः तत्रैतत्सूत्रस्थात्यन्तशब्दस्याभिप्रेतमर्थं प्रकटयति । बुद्धिसत्त्वमित्यादिना । अयमर्थः । न केवलं बाह्याद्याकारबुद्ध्या सहासंकीर्णः पुरुषोपि तु यद्बुद्धिसत्त्वं प्रख्याशीलतया समानसत्त्वाधीनवृत्तिके रजस्तमसी अभिभूय सत्त्वपुरुषान्यतासाक्षात्काररूपेण परिणतं भवति । तस्माच्च । तस्मादपि प्रकृष्टज्ञानैश्वर्यानन्दादिमयाद्बुद्धिसत्त्वादात्माकारतयात्मकल्पात् परिणामिनोऽत्यन्तविधर्मो पुरुषो विशुद्धः परिणामशून्योऽतोऽन्यश्चितिमात्ररूप इति । अत्यन्तशब्दार्थं व्याख्याय भोगप्रतिपादकं सूत्रार्थं व्याचष्टे । तयोरिति । तयोर्बुद्धिपुरुषयोरत्यन्तविधर्मणोरपि प्रत्ययाविशेषः प्रत्यययोर्विविच्याग्रहणं भोगः । अगृहीतविवेकौ प्रत्ययाविति यावत् । अयमप्यविवेको बुद्धिधर्म इति स्मर्त्तव्यम् । तत्र बुद्धेः प्रत्ययः सुखादिमती विषयाद्याकारचित्तवृत्तिः पुरुषस्य प्रत्ययो बुद्धिवृत्तिप्रतिबिम्बावच्छिन्नचैतन्यांशः सुखाद्यात्मकसत्त्वाऽनुभवनामा । तयोरविवेके हेतुमाह । पुरुषस्य दर्शितविषयत्वादिति । यतो बुद्ध्या पुरुषे प्रतिबिम्बमर्पितं ततो जपास्फटिकयोरिव धर्मसंक्रान्तेरविवेक इत्यर्थः । तथा च स्मर्यते

> शुद्धोऽप्यात्मातिसामीप्याद्बुद्धेर्यद्धर्मान् पृथग्विधान् ।
> कर्त्तृत्वभोक्तृत्वमुख्यान्मन्यते स्वान्स्वनीचितान् ॥
> जीवो बहिरितीचित्वा स्फुटभिन्नानपि स्वतः ।
> नेमान्वेत्यन्तरासत्वात् मुखसक्तां मसीमिव ॥

इति । स्फुटभिन्नानपि धर्मान् जीव ईक्षित्वा स्वस्माद्बहिरिति स न वेत्ति यत ईक्षणाम्यथानुपपत्त्या आन्तरासत्वात् प्रतिबिम्बितान्, तत्र दृष्टान्तो मुखसक्तां मसीमिवेत्यर्थः । परार्थादित्याद्युत्तरार्धं संयमसिद्धिप्रदर्शकं व्याचष्टे । स भोगप्रत्यय इत्यादिना जायते इत्यन्तेन । सोऽविभागापन्न

उभयात्मको भोगाख्यः प्रत्ययः सत्त्वस्यांशः परार्थत्वात् परप्रयोजनकत्वात् दृश्यः । यस्तु तस्मात् परार्थादन्यो विशिष्टः स्वार्थः परस्य बुद्ध्यादेरदृश्यः साक्षाद्दृश्यश्च चैतन्यमात्रः पौरुषेयः पुरुषांशः प्रत्ययः भोगाख्यः तत्र यथोक्तविवेकेन संयमात्साक्षात्कारपर्यन्तात् पुरुषसाक्षात्कारो भवतीत्यर्थः । अत्रान्यपदाध्याहारः कृतः तदनेन सूत्रेण भोगापवर्गावपि व्याख्यातौ स्वयं च मुख्य एव भोगोऽविविक्तप्रत्ययद्वयात्मको लोकव्यवहारसिद्धः विवेकग्रहे सति परकीयसुखादिसाक्षात्कारइव स्वीयसुखादिसाक्षात्कारेऽपि भोगव्यवहारायोगात् सोऽयं भोगोऽविवेकप्राधान्येन कुत्र चित् बुद्धेरेवेत्यप्युच्यते । तथा सोऽयं भोगोंऽशभेदेनोभयोरेव भवति । तत्रैव गौणो भोगः सांख्ये प्रोक्तः 'चिदवसानो भोग' इति । स च पुरुषस्यैव न बुद्धेः पुरुषोऽस्ति भोक्तृभावादिति सांख्यवाक्यात् । अन्यस्तु विपाकान्तर्गतो भोगः सुखाद्याकारवृत्तिः स च बुद्धेरेव तावेतौ भोगापवर्गौ बुद्धावेव वर्तमानाविति भाष्यात् । स हि तत्फलस्य भोक्तेति तत्र तत्र भाष्यकृता विपाकफलस्य सुखदुःखादेर्भोगान्तरवचनाच्चेति स्मर्तव्यम् । ननु पुरुषज्ञानं भवतीत्युक्तं तत् पुरुषज्ञानं किं बुद्धिसत्त्वस्य भवति, किं वा पुरुषस्य भवति, आद्ये बुद्धेरपि चेतनत्वापत्तिः स्वोक्तपरादृश्यत्वानुपपत्तिश्च । तथा ते तं न पश्यन्ति स पश्यते तानि इत्यादिवाक्यशतविरोधश्च । अन्त्ये स्वस्य स्वज्ञेयत्वेन कर्मकर्तृविरोधः सदैव स्वज्ञानप्रसङ्गश्च । पुरुषस्यापरिणामिचिन्मात्रत्वादिति तामिमामाशङ्कां परिहरति । न च पुरुषस्येति । पुरुषाकारप्रत्ययेन बुद्धिसत्त्वधर्मेण पुरुषो न दृश्यते न भास्यते तस्य जडत्वात् । अपि तु पुरुष एव तं प्रत्ययं स्वस्वरूपाकारं पश्यति बुद्ध्यारूढमात्मानं पश्यतीत्यर्थः । स्वस्मिन्प्रतिबिम्बितमिति शेषः । तथा च स्वप्रतिबिम्बितस्वाकारबुद्धिवृत्तिदर्शनमेव पुरुषस्य पुरुषज्ञानम् । यथा स्वप्रतिबिम्बितघटाकारबुद्धिदर्शनमेव पुरुषस्य घटदर्शनमिति । न चात्र कर्मकर्तृविरोधः । कर्मकर्तृविरोधे हि स्वस्मिन् स्वसंबन्धानुपपत्तिरेव बीजं प्रकाशसंबन्धस्यैव प्रकाश्यतारूपत्वात् । अनुभवप्राप्त्योरेकार्यत्वाच्च । स च संबन्ध एकस्मिन्नपि बिम्बप्रतिबिम्बाख्यरूपभेदेनोपपन्न इति । अथैवमपि परसमवेतक्रियाफलभागित्वरूपं कर्मलक्षणं पुरुषे न घटत-

इति शेषः । विशिष्टाविशिष्टरूपेण ज्ञातृज्ञेययोर्भेदसत्त्वात् । आत्माकारवृत्त्य-वच्छिन्नस्य ज्ञातृत्वात् केवलस्य ज्ञेयत्वात् । न चैवमेकवृत्त्यवच्छिन्नबुद्धेर्वृ-त्त्यन्तरावच्छिन्नबुद्ध्या ग्राह्यत्वसंभवात् पुरुषकल्पना व्यर्थेति वाच्यम् । अनव-स्थादिदोषैः सूत्रेण निरस्यत्वादिति । यत्तु आधुनिकवेदान्तिब्रुवानुसारेणा-स्मदीयोऽपि कश्चित् आत्मनो ज्ञेयत्वाभावमेव वदति तत् यथाश्रुतसूत्रभाष्य-विरोधादुपेक्षणीयम् । स्वप्रकाशत्वं चात्मनः स्वज्ञेयत्वमेव 'चेतनात्मा स्ववेद-न' इत्यादिस्मृत्यनुसारात् । शब्दस्य योगार्थपरित्यागानौचित्याच्च । बुद्ध्या-दिवदर्थव्यावृत्तेस्तेनैव संभवाच्चेत्यादिकं ब्रह्ममीमांसायां प्रतिपादित-मस्माभिः । यदपि वृत्तिव्याप्यत्वमात्मनोऽभ्युपेत्य फलव्याप्यत्वं वेदान्तिब्रुवैर-पलप्यते तदपि मोहादेव फलव्याप्यत्वस्य सामान्यतो व्यवहारहेतुतायाः क्लृप्तत्वेन चैतन्यांश्यफलव्याप्यतां विना चैतन्यव्यवहारानुपपत्तेः । अन्यथा घटादिव्यवहारस्यापि वृत्तिव्याप्यत्वेनैवोपपत्तेः विश्वप्रकाशकतया चैतन्य-कल्पनावैयर्थ्यात् । 'यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सहेत्यादि' वा-क्यानि च लौकिकमनआदिवृत्त्यगोचरत्वमेव प्रतिपादयन्ति । मनसैवानुद्रष्ट-व्यमित्यादिश्रुत्यन्तरात् । अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति इत्यादिश्रुत्या योगिमनोविषयत्वावगमाच्च । न तु फलव्या-प्यत्वं निराकुर्वन्ति मनआदीनां जडत्वेन फलानाधारत्वात् । फलं विना शास्त्रादीनां ब्रह्मणो प्रमाणत्वादिदोषासंभवा * दिति दिक् । पुरुषस्यैव स्वज्ञातृत्वमित्यत्र श्रुतिं प्रमाणयति । तथा ह्युक्तमिति । ईश्वरेणेति शेषः । आत्मा यदि न नित्यज्ञानरूपस्तर्हि केन ज्ञानान्तरेण-विज्ञातारमात्मानं लोको विजानीयादित्यर्थः । यद्वा मोक्षकाले बुद्ध्या-दिविलयात् केन करणेन तदानीं विज्ञातारमात्मानं पुरुषो विजानीया-दित्यर्थः । अत्र हि श्रुतौ करणेन पुरुषस्यैव स्वज्ञेयत्वमवगम्यते । अज्ञेय-त्वे च विज्ञातारं को विजानीयादित्येवोच्येतेति । इयं श्रुतिः पुरुषस्य सर्व-देवाज्ञेयत्वं वदन्तीति कश्चित् तन्न । यतो न प्रेत्य संज्ञास्तीति पूर्ववाक्ये

---

* प्रमाणत्वादिदोषेत्यत्र प्रमाणत्वासंभवादित्येव पाठान्तरं युक्तं भाति । न क्वापि पुस्तके तथा दृश्यते ।

याज्ञवल्क्येन मोक्षकाले ज्ञानस्वरूपोऽपि पुरुषो न जानातीत्युक्तम् सकलदुःखभोगनिवृत्तिरूपपरमपुरुषार्थमोक्षं प्रदर्शयितुम् । तत्र विशेषं दृष्ट्वा मूढाया मैत्रेय्यास्तद्विरोधपरिहारायैवेदं वाक्यं प्रवर्त्तते न तु पुरुषस्याज्ञेयत्वप्रदर्शनाय अप्रकृताभिधानप्रसङ्गादिति । ननु भवन्मतेऽपि पराज्ञेयत्वेन कथं मैत्रेय्याः शङ्कापगच्छतीति चेन्न । 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदि'ति पूर्वश्रुत्यैव विरोधस्य परिहृतत्वात् । स्वयं ज्ञानस्वरूपोऽपि सर्वकार्याविद्यायान्मोक्षकाले किमपि न विजानातीति तत्र च मैत्रेय्या कदाचिदाशङ्क्येत मोक्षकालेऽनभिव्यक्तया आत्मा ज्ञानस्वरूप एव मास्त्विति तत्रोक्तं वाक्यं प्रवर्त्तते येनेदं सर्वं विजानाति तं केन विजानीयात् विज्ञातारमरे केन विजानीयादिति । आत्मा यदि ज्ञानस्वरूपो न भवति तद्विषयकज्ञानान्तरकल्पनेऽनवस्थादिकमिति श्रुतेराशयः । स्वार्थप्रत्ययसंयमेन पुरुषसाक्षात्कारे जाते सति तल्लिङ्गरूपाणि विवेकज्ञानस्य च पूर्वरूपाणि प्रतिभाद्याः*सिद्धयो भवन्ति ताश्च पुरुषैकाग्रतापरिपन्थित्वेनासंप्रज्ञातयोगविघ्नभूता एवेति प्रतिपादयितुमादौ ताः प्रदर्शयति ।

ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायन्ते ॥ ३५ ॥

ततः पुरुषसाक्षात्काराद् मनआदीनां प्रातिभादिसंज्ञिकाः सिद्धयः सामर्थ्यविशेषरूपा भवन्ति यस्मात्सामर्थ्यान्मनआदिषु व्यवहितादिज्ञानं भवतीत्यर्थः । अत्र कश्चित् । तत इति तच्छब्देन पुरुषज्ञानं न परामृश्यते । तद्दर्शनप्रत्यनीकत्वादित्यागामिसूत्रभाष्ये पुरुषदर्शनप्रतिबन्धकत्ववचनादपि तु स्वार्थसंयम एव परामृश्यते तथा च पूर्वसूत्रोक्तसंयमस्यैवेदं पुरुषज्ञानात्प्राक्तनं सिद्ध्यन्तरमिति । तन्न । एकस्याः पुरुषज्ञानरूपसिद्धेरुक्ततया चकाराद्यभावेन सिद्ध्यन्तराकाङ्क्षाविरहात् । पुरुषज्ञानस्यैव मुख्यतयोपस्थितत्वेन परामर्शौचित्याच्च । अतस्तच्छब्देनात्र पुरुषज्ञानस्यैव परामर्शः पुरुषसाक्षात्काररूपपुरुषैकाग्रताप्रत्यनीकतया तु भाष्यकारः प्रतिभादेरसंप्रज्ञातसमाधावेवोपसर्गत्वं वक्ष्यतीति । प्रातिभादिशक्तीः स्वकार्यैर्लक्षयति भाष्यकारः ।

* प्रतिभाद्या इति पा० २ ।

Digitized by Google

प्रातिभादिति । प्रतिभा उपदेशादिनैरपेक्ष्येण सूक्ष्मादीनां मानसं यथार्थज्ञानं तत्सामर्थ्यं प्रातिभम् एवं श्रावणाद्यपि व्याख्येयम् । वेदनाद्यास्तु संज्ञास्त्वक्चक्षूरसनघ्राणानां सामर्थ्येषु बोध्याः । नित्यमिति । कामनां विनापि जायन्तइत्यर्थः । समाधौ विघ्नरूपास्वेतासूपेक्षां कृत्वा पुरुषदर्शनाभ्यास एव कर्तव्य इत्येतत्प्रतिपादयितुमाह ।

ते समाधावुपसर्गा व्युत्थाने सिद्धयः ॥ ३६ ॥

ते प्रातिभादयः समाधिनिष्पत्तावसंप्रज्ञातरूपायाम् उपसर्गा अन्तराया अतो व्युत्थानापेक्षयैवैते सिद्धयः पुरुषार्था इत्यर्थः । भाष्ये तद्दर्शनेति । तस्य समाहितस्य यद्दर्शनं पुरुषैकाग्र्यं तत्प्रतिबन्धकत्वादित्यर्थः । तदेवं ज्ञानादिरूपाः संयमसिद्धीः प्रदर्श्य क्रियादिरूपा अपि विभूतीः संयमफलान्याह सूत्रजातेन ।

बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः ॥ ३७ ॥

बन्धशब्दार्थमाह । लोलीभूतस्येति । चञ्चलस्वभावस्यात एवाप्रतिष्ठस्यैकत्रानवस्थितस्यापि मनसो धर्माधर्मवशादेव शरीरे या प्रतिष्ठा ज्ञानहेतुः संबन्धविशेषः स बन्ध इत्यर्थः । संयमसिद्धित्वोपपादनायाह । तस्येति । तस्य कर्मणः शैथिल्यं भावनेन दृढबन्धनाक्षमता समाधिसामर्थ्यबलाद्भवतीत्यर्थः । तथा च प्रागुक्तं कर्मबन्धनानि श्लथयतीति । प्रचारेति । अनया नाड्या एवंप्रकारेण चित्तं शरीरे प्रविशति निर्गच्छति चेत्यादिविशेषैश्चित्तगतिसाक्षात्कारः प्रचारसंवेदनम् । तदपि समाधिसामर्थ्यादेव भवतीत्यर्थः । सूत्रवाक्यार्थमाह । कर्मेति । कर्मनिमित्तकस्य निर्गमप्रतिबन्धसंयोगविशेषस्य क्षयादित्यर्थः । शेषं सुगमम् । योगशास्त्रोक्तसंयमविशेषेणोदानजयात्सिद्धिमाह ।

उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च ॥ ३८ ॥

उदानं विवेचयितुं प्राणादीन् पञ्चैव स्वरूपतोऽवान्तरभेदतश्च प्रतिपादयति । समस्तेति । जीवननाम्नी सर्वेन्द्रियाणां वृत्तिः प्राणनापानना-

द्विरूपेत्यर्थः । अत्रेन्द्रियशब्देन स्थूलसूक्ष्मोभयपरतया करणमात्रग्रहणम् । समस्तशब्दोपि सामान्यवचनः सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्चेति सांख्ये दर्शनात् । तेन सुषुप्तौ चक्षुराद्युपरमेपि प्राणादिवृत्तयो जीवनयोनियत्नवशादन्तःकरणस्यैव भवन्ति निद्रावृत्तिवदिति । न चैवं चित्तमात्रस्यैव लाघवात्प्राणादिवृत्तिकत्वमस्त्विति वाच्यम् । चक्षुराद्युपचयापचयाभ्यां प्राणानामुपचयापचयदर्शनात् । अथ वा सुषुप्तेपीन्द्रियाणां ज्ञानकर्मलक्षणवृत्त्योरेव प्रतिषेधात् प्राणनादिवृत्तिसत्त्वेप्यक्षतिः । ननु बाह्यवायुभिरन्तःप्राणानां समानलक्षणत्वात् वायुसंस्थानविशेषा एव प्राणाः सन्तु किमर्थं करणानामपि वायुतुल्यः क्रियादिः कल्प्यत इति चेन्न । 'प्राणाज्जज्ञे वायु'रित्यादिश्रुतिषु वायोः प्राणकार्यत्वश्रवणात् 'न वायुक्रिये पृथगुपदेशा'दिति ब्रह्मसूत्रे वायुतत्संचाराभ्यामतिरेकस्य प्राणेऽवधारणाच्च । श्रुतिस्मृत्यनुगृहीता युक्तिश्चात्रास्ति यदि करणप्राणौ भिन्नौ स्यातां तदा करणवियोगेपि मृतदेहवत् कदा चित् प्राणा अपि तिष्ठेरन् । किं चान्तःकरणस्य शोकादिना प्राणस्य कम्पादिर्दृश्यते तच्च लाघवात्सामानाधिकरण्येनैव कार्यकारणभावो युक्तो ऽन्यधर्मेणान्यपरिणामेतिप्रसङ्गात् । अदृष्टकल्पनापत्तेश्च । अपि च लिङ्गशरीरस्य देहशृङ्खलया बन्ध एव कर्मादीनां हेतुत्वं कल्प्यते न तु वायुबन्धनेपि, गौरवात् । उद्गारादिवायूनां जीवदेहपरित्यागदर्शनाच्च वायुगतवैजात्यादिकल्पनायां चातिगौरवादिति लिङ्गशरीरस्योर्ध्वाधः संचारादुत्पद्यमानेन वायुना सहाविवेकात्तु तप्तायःपिण्डवत्प्राणेषु वायुव्यवहारः । अनेनैव व्यवहारेण सांख्येपि प्राणाद्या वायवः पञ्चेत्युक्तम् । अपि च श्रुतिस्मृत्योः करणप्राणयोः भेदव्यवहारो वृत्तिभेदादेव मन्तव्यः । ऊर्ध्वाधोगतिलक्षणाः करणानां परिणामभेदाः प्राणा इत्युच्यन्ते । तत्र च वायुरधिष्ठात्री देवता सूर्यश्चक्षुर्वातः प्राण इत्यादिश्रुतेः । ज्ञानादिहेतुपरिणामास्तु करणान्युच्यन्त इति विभागः । अतो देवतया सहाभेदादपि सूर्यश्चक्षुरितिवत् वायुः प्राण इति व्यवहारो युक्त इति । कश्चित्तु अत्र प्राणादिजीवनशब्दाभ्यां प्राणनादिनामकवायुक्रियाविशेषहेतुः प्रयत्नभेद एवोक्तः स च करणनिष्ठ इति भाष्यार्थमाह । तन्न । विवरणभाष्ये प्राणादीनां

मत्यादिवचनस्य विरोधात् अत्रापि सांख्यकारिकाब्रह्ममीमांसैकवाक्यत्वौचित्यात् । वायोः प्राणत्वस्य क्वापि दर्शने सूत्रकारानुक्तत्वाच्च । अत एव च लिङ्गशरीरमध्ये प्राणा न गण्यन्ते करणे ऽप्रवेशादिति । तस्येति । तस्य करणसामान्यस्य साधारणी क्रिया पञ्चतयी क्रियोपलक्षितपरिणामभेदः पञ्चतय इत्यर्थः । समुन्नयनादिति । सममनुरूपं नाडीषु रसानां नयनात्समानः । अस्य च हृदयान्नाभिपर्यन्तं वृत्तिः । अपेति । मूत्रपुरीषगर्भादीनामपसरणहेतुरपानः । अस्यानाभेः पादतलपर्यन्तं वृत्तिः । उन्नयनादिति । ऊर्ध्वगतिमत्त्वात् रसादेरूर्ध्वनयनाच्च उदानः । अस्य च मुखनासिकादिकमारभ्य ब्रह्मरन्ध्रपर्यन्तं वृत्तिः । व्यापीति । सर्वदेहव्यापिवृत्तिको बलवत्कर्महेतुर्व्यानः । ननु सर्वेषां वृत्तिभेदात् कथं पञ्च प्राणा इत्युच्यन्ते तत्राह । एषामिति । प्राणो यदश्नाति पिबति तेनैवान्येषां धारणं भवतीति ह्येतेषां प्राणो मुख्यः । अतो मुख्यस्य नामादिभिर्गौणानां व्यवहारो राजानुगतेषु राजव्यवहारवदिति भावः । तदेवमुदानं व्याख्याय सूत्रं व्याचष्टे । उदानजयादिति । उदानसंयमादन्यसंयमाद्वोदानवायोः स्वायत्ततायां सत्यां जलपङ्ककण्टकादीनाम् उपरि संचरतोपि तेष्वसङ्गो भवति तैर्विकारहेतुः संयोगो न भवति तथा अर्चिरादिमार्गे गमनाय स्वेच्छयोत्क्रान्तिर्भवतीत्यर्थः । प्रसङ्गादाह । तामिति । तामूर्ध्वमुत्क्रान्तिमुदानवशित्वं विना न लभते इत्युदानजयी स्यादित्यर्थः ।

समानजयाज्ज्वलनम् ॥ ३९ ॥

संयमविशेषजात्समानजयात् ज्वलनं भवतीत्यर्थः । भाष्ये उपध्मानम् उत्तेजनं कृत्वा ज्वलति सतीवत्स्वशरीरं दहतीत्यर्थः ।

श्रोत्राकाशयोः संबन्धसंयमाद्दिव्यं श्रोत्रम् ॥ ४० ॥

भाष्यकार आकाशशब्दार्थं तत्र प्रमाणं च दर्शयति । सर्वश्रोत्राणामिति । यद्यपीन्द्रियाण्याहंकारिकाण्येव न भौतिकानि इन्द्रियाणां प्रकाशात्मकतया प्रकाशात्मकान्तःकरणोपादानकत्वस्यैवौचित्यात् । तथाप्याकाशाश्रिततयाकाशप्रतिष्ठत्वं यथान्नाश्रिततया मनसोन्नमयत्वमिति । एतेनान्येषामपीन्द्रि-

याणां भौतिकत्वं श्रुतिस्मृत्युदितं व्याख्यातम्। तत्तद्भूतसंसृष्टतया इन्द्रियोत्पत्त्या तत्तद्भूतेभ्य एव तत्तदिन्द्रियाभिव्यक्तेः । अत एव दिगात्मकाकाशादीनि पृथिवीपर्यन्तानि पञ्च श्रोत्रादिदेवाः श्रूयन्त इति। शब्दानां चाकाशोपादानत्वमेवास्ति तथा च श्रोत्रशब्दयोराश्रय आकाशमित्यर्थः । श्रोत्राणामाकाशाश्रयत्वे पूर्वाचार्यसंमतिमाह । यथोक्तमिति । कालभेदेन तुल्यदेशानि श्रवणव्यञ्जनानि येषां पुंसां तेषामेकश्रुतित्वमेकदेशावच्छिन्नश्रोत्रकत्वं तत्तत्काले भवतीत्यर्थः । स चैको देश आकाशमेवेति भावः । आकाशे प्रमाणमप्याह । तच्चैतदिति । तच्चैतत् श्रोत्रं शब्दश्चाकाशस्य लिङ्गमनुमापकं नहि सूक्ष्ममिन्द्रियमनाश्रयं स्थातुमर्हति गन्धवत् कर्णशष्कुली च न तस्याधारो लोकान्तरगमनादिकाले कर्णशष्कुल्यभावात् कर्णविवरपिधानेऽपि शब्दश्रवणप्रसङ्गाच्च । न च विवरपिधाने सति शब्दा एव श्रोत्रे न गच्छन्तीति वाच्यम् । भित्त्यादिवत् कर्णच्छिद्रस्थद्रव्याणामपि शब्दागमनाप्रतिबन्धकत्वात् । नापि शून्यमाधारोऽभावानभ्युपगमात् । अभावस्य भावाधारत्वासंभवाच्च । नापि कर्णशष्कुल्यवच्छिन्नः पुरुषादिराधारः विवरपिधानेऽपि तदवच्छेदेन चैतन्याद्यभिव्यक्त्या पुरुषादेरनावृततया शब्दग्रहणप्रसङ्गात् । तस्मात् पिधानयोग्यमेकं द्रव्यं श्रोत्राधारतयापेक्षितं तच्च परिशेषात् कर्णशष्कुल्यवच्छिन्नं नभ एव श्रोत्रगोलकतया सिद्ध्यतीति भावः । शब्दाधारतायामप्यत्र परिशेषः कर्त्तव्यः । तथाहि । अवकाशस्य शब्दकारणत्वं तावत् सर्वसिद्धम् अवकाशश्च नावरणाभावमात्रम् अभावस्य भावानाधारत्वात् अन्यथा सर्ववस्तूनामभावमात्रमूलकत्वापत्तेः । नापि पुरुषादिः । तेषां स्वस्वव्यापाराप्राप्यदेशेऽवकाशासंभवात् । आवृतत्वाभिमतदेशेऽपि शब्दानुत्पत्तिप्रसङ्गात् । नापि वायुः । द्रव्यान्तरपूरितेऽपि वेश्मादौ वायुसंयोगेन शब्दप्रसङ्गात् । न च छिद्रवायुसंयोगोऽपि शब्दकारणं, तथा सति संयोगाधारतया छिद्रस्य द्रव्यत्वसिद्धौ तस्यैव शब्दाश्रयत्वं युक्तं शब्दोत्पत्तावकाशस्यैवाधिक्येनोपयोगदर्शनादिति । तस्मादावरणीयतयाकाशद्रव्यं सिद्ध्यतीति । अनावरणं चाकाशस्य लिङ्गं पूर्वाचार्यैरुक्तमित्याह । अनावरणं चेति । अनावरणमवकाशः । यदि ह्यवकाशरूपमाकाशं न स्यात् तदा मूर्तद्रव्येषु स्वास्याविच्छिन्नस्तेजआदिप्रवेशो न स्यात् । अत्याभावश्चा-

Digitized by Google

क्वाशस्तत्संभावस्य भावाश्रितत्वनियमेनाकाशसिद्धेः । अस्माभिरभावा-नभ्युपगमाच्च । आत्मादिश्चावकाशो न संभवति आवरणासंभवादित्यु-क्तमिति । आकाशस्य विभुत्वमपि प्रसङ्गात्साधयति । तथेति । मूर्त्तत्वं परिच्छिन्नत्वम् अनावरणमनावृतत्वम् असमानदेशत्वमिति यावत् । तथा चान्यत्र पृथिवीजलादिस्थले मूर्त्तस्य परिच्छिन्नस्य मूर्त्तान्तरासमानदेशत्वद-र्शनात् घटादिसमानदेशकस्याकाशस्य विभुत्वं सिध्यति आकाशस्य परि-च्छिन्नत्वे मूर्त्तयोः समानदेशताविरोधादित्यर्थः । क्वाचित्कस्तु तथामूर्त्त-स्यापीत्यपिशब्दः प्रामादिको ऽर्थासंभवात् । आकाशस्य विभुत्वे च ‘आका-शवत्सर्वगतश्च नित्य’ इति श्रुत्यादयः प्रमाणमिति । नन्वाकाशस्य विभुत्वे कथं कार्यत्वं घटते कथं वा गामिभाष्येप्याकाशपरमाणुकथनमिति चेत् । उच्यते । आकाशं ह्यन्तःकरणवत् वैशेषिकाणां पृथिव्यादिवत् कार्यकारण-रूपेण द्विविधं तत्र कारणाकाशं तमोगुणविशेषतयैव व्यवह्रीयते तदानी-माकाशताव्यञ्जकशब्दादिविशेषगुणाभावात् कारणपृथिव्यादिवत् तच्च कारणाकाशं गुणान्तरोपसृष्टं* सदंशत आदौ शब्दजननयोग्यार्थरूपेण परिण-मते क्षीराब्धिरिवामृतमथ ऐशतो दधिरूपेण ततश्चाणुसंघातेन पृथिवीवदेव महाभूताकाशमहंकारापेक्षया परिच्छिन्नं वायोरावरणम् उत्पद्यते इति । एतेनान्तःकरणोत्पत्तिरपि व्याख्याता इत्थमपि श्रुतिस्मृतिप्रसिद्धं महतो कार्यकारणरूपत्वमवगन्तव्यम् । आकाशं प्रसाध्य श्रोत्रे प्रमाणं दर्शयति । शब्दग्रहणानुमितमिति । तदेव विवृणोति । बधिरेति । एतेन चक्षुरादि-ष्वप्यन्वयव्यतिरेकौ प्रमाणमिति सूचितम् । अन्तःकरणे तु स्मृत्याद्यन्वयव्य-तिरेकौ प्रमाणमिति । इदानीं सूत्रं योजयति । श्रोत्रेति । संबन्धश्चास्माभि-र्व्याख्यातः । उपलक्षणं चैतत् त्वग्वातयोश्चक्षुस्तेजसो रसनोदकयोर्घ्राण-पृथिव्योः संबन्धसंयमाद्दिव्यं त्वगादीत्यपि बोध्यम् । दिव्यत्वं च तन्मा-त्रादिसूक्ष्मगोचरसंयमनैरपेक्ष्येण स्वभावादेव तन्मात्रादिरूपसूक्ष्मशब्दादि-ग्राहकत्वमिति । (शेषमग्रे)

काशीस्थराजकीयप्रधानपाठशालायां { सांख्ययोगाध्यापकस्तात्याशास्त्र्यपरनामा पटवर्धनोपाह्वो रामकृष्णशास्त्री । ज्यौतिषशास्त्राध्यापकः केशवशास्त्री च ।

* गुणान्तरोपसंसृष्टमिति पाठ० ।

Digitized by Google

॥ अथ विचारमाधुकर्यां ॥

२–वैष्णवमतविचारः ।

(Continued from page 372. VOL. VI.*)*

अयं निजः परो वेति गणना लघुचेतसाम्–महाभारतम् ।

१–भृगुर्वा भृगुर्वा भृगुरसुरः । वरुणपुत्रत्वात्तस्य चासुरदेवतात्वात् ।

प्रपातस्त्वतटो भृगुरित्यमरः । तत्प्रायः क्षुद्रो जनपदविशेषो भृगुः । यथा जनपदशब्दाः क्षत्रियास्तथा जनपदशब्दा[१] ब्राह्मणा अपि । ततस्तद्‌-
द्रुहुर्ष्वास्त्रियां लुक् । भृग्वादीनां पुरुषविशेषाभिधायकत्वं त्वंगादीनामिव केवलं पौराणिकविजृंभितमिति पाणिन्यादिविरोधादुपेक्ष्यम् । न ज्ञायते किं मंडाहारियो भंडारिवदानस्य मस्य भादेशेन भगस्थानशिला[२]लेखेषु प्रसिद्धस्य भृगोर्भृगुसिद्धिरुताऽन्य एव भृगुर्भृगोरिति । भृगूणां स्वतः परतो वा ब्राह्मणकालीनब्राह्मणपरिचये तु संदेहो न युक्तः । ऐतरेय[२]कश्रुतिमा- माण्यात् । भृगोर्भृगुसिद्धिरस्तु मा भूद्वा भृगोरसुरत्वं तु श्रुतिसिद्धत्वेन सर्व- संमतम् । भृगुपुत्रस्य शुक्रस्यासुरगुरुत्वेन सर्वत्र प्रसिद्धत्वादसुरो भृगुः । श्रौतं च भृगोर्वरुणपुत्रत्वं । असुरेति च प्रायः श्रुतिषु वरुणसंबोधनम् । अनसुरत्वे भृगोः सर्वमेतन्न घटत इत्यसुरो भृगुः ।

२–अंगिरसो गंधर्वाः । गंधर्वाप्सरसां पत्या तत्कुलीनस्य पुरोहितत्वान्नामान्वर्थत्वादग्नेस्तत्कोपोत्पन्नत्वाद्दैवेन तत एवाग्नियागसंपादनप्रसिद्धेश्च ।

१—पृ॰ २३०, Vol. X. J. R. A. S. G. and I. आंग्लानां लिप्या "मर्गुश्" इति लिखितम् । यथा कुरुस् इति सुलोपाभावेन रूपं ततः कुरुश् इत्यपभ्रंशस्तथा भर्गो- र्भगुस् मर्गुस् वा रूपांतरं मर्गुश् इति चापभ्रंशः । एवं द्रुहुस् इत्येतस्य दर्यवुश (Daryavush) इत्यपभ्रंशस्तेष्वेव शिलालेखेषु । मर्गुश् इतिञ्ज नपदः काश्यपं सरो (Caspian Sea) दक्षिणेनावस्थितो मार्गियाना (Margiana) इति चांग्लानां विज्ञेयः।

२–ग्रंथं खंडं पंचिका सप्तमी । तत्र मार्गवेयो राम इति श्रुतिः । भृगुन्वियस्य तदभिजनस्य वा गोत्रापत्यं मार्गवी तस्याः पुत्रो मार्गवेयः ।

इंद्रस्य गंधर्वाप्सरसां पतित्वं सुप्रसिद्धम्। न विना गंधर्वाप्सरस इंद्रो नेंद्रं विना गंधर्वाप्सरसः पुराणादिषु। आंगिरः कुलपुत्रो बृहस्पतिः। तस्य गंधर्वेंद्र- तिना पुरोहितत्वादंगिरसो गंधर्वा भवितुमर्हंति। सोमो राजा गंधर्वेष्वासी- दिति समामनंति। आंगिरसो जन्मना शुनः शेपः सोमयागद्रष्टेत्याहुः। आंगि- रसा एवं गंधर्वावयवाः। अग्निः पूर्वं गंधर्वेष्वासीत्। अग्निना चांगिरसां संबंधो युक्त इत्यंगिरसो गंधर्वाः। अग्निरप्यंगिरोगोत्रोत्पन्न इति श्रूयते। ऐलेन गंधर्वेभ्य एवा- ग्निर्लब्धः। अग्निश्चांगिरोगोत्रोत्पन्न इति गंधर्वा एवांगिरसः। अप्सरसो गंधर्वस्त्रियः। अग्निमातोर्वशी वैदिकी। माता पूर्वरूपम्। गंधर्व्यो मातु- र्वातस्यांगिरोगोत्रवत्त्वमित्यप्यंगिरसो गंधर्वाः।

३–केकयपरिसरारण्यवासिनो गंधर्वाः। पोतवणिजोऽसुरा- स्ततोऽर्वाचीनाः

केकयानामोत्तरात्वं वराहमिहिररामायणकर्त्रोरभिमतम्। गंध- र्वाणामपि तत्त्वं तत्परिसरवासित्वं च रामायणे कंठरवेणोक्तम्। सोमो गंध- र्वेष्वासीत्। पर्वतौषधिः सोमः। अतः पर्वतीया गंधर्वाः। पर्वतभिद् राजा गंधर्वाणाम्। तस्मात् पर्वतीया गंधर्वाः। उत्तरान् कुरून् समया गंधर्वाणां गंधर्वभूयिष्ठो विषयः। तस्य विषयस्य पर्वतप्रायत्वात् पर्वतीया गंधर्वाः। गंधर्वाणामुदीच्यामेव संबंधनियतत्वस्य सर्वत्र सुप्रसिद्धत्वेन तस्याः पर्वतमयीत्वेन च तेषां पर्वतप्रायभूमिनिवासत्वं न शंकास्थानम्। असुरा वरुणप्रियाः। अपां पतिर्वरुणः। असुराणां गुरुर्वारुणिः। वरुणोऽप्य- सुर इति सर्वथा वरुणमयाः सर्वतोऽसुराः पोतवणिजो भवितुमर्हंति। पोतवाणिज्यस्य गंधर्वानुत्तरेणाऽसंभवात्ततो दक्षिणेनैव तेषां विषयपरि- ग्रहो नाऽसंभवी।

४–इंद्रो गंधर्वाप्सरसामीश्वरः। आदावसुराणामपि स एव।

३–पृ० ८१, श्रा० २५, बृहत्संहिता (कलिकत्ता मुद्रिता)। विपाशादीर्नदीस्तीर्त्वा- गतो मातुलयर्हं प्राप्त (स० ६, ८, अयो० कां० वाल्मी० रामा०) इति निर्दिष्टायामेव- दिशि केकया अन्वेष्टव्याः।

४–श्लो० ११, स० १००, उत्तर कां०।

इदि ऐश्वर्ये । इंद्रो राजेत्यनर्थांतरम् । असुराणां देवत्वं न निवा-र्येत इति तेषामपि पुरा स एवेश्वरो भवितुमर्हति । यथाऽऽदित्या देवा-स्तथा दैत्या अपीत्याधानश्रुतितोऽनुमीयते ।

५–भरतैर्गंधर्वासुराः प्रत्यगुदक्च प्रस्थापिताः ।

भारततोऽपि प्राचीनं रामचरितम् । रामः सप्तमो विष्णोरवतार इत्याहुः । अष्टमः कृष्णः । त्रेतायां रामः । द्वापरांते कृष्णः । कुलगुरुत्वं रघूणां वसिष्ठेषु । कुलगुरुजन्मतः परं तदपत्यानि न ततः प्रागिति राम-चरितमेव प्राचीनम् । अरण्यप्राया मगधा रामकाले । त एव कृष्णकाले बृहद्रथवंशचूडामणिनाऽबृहद्रथपुत्रेण पराक्रमिणा जरासंधेन राजन्वंतः । राजगृहं केकयानां राजधानी रामकाले न मगधैः सह तस्य संबंधोऽणुतो-ऽपीति वेदितव्यम् । चेदिप्रधाना जनपदा रामकाले दंडकांतःपातिनो दंडकावस्था भवितुमर्हंति । कृष्णकाले तेषां पशुधान्यधनवत्त्वं सर्वसंम-तम् । पांडवसमानकालीनबृहद्बलांतो वंशो रघूणामित्याहुः । तद् भार-ततः प्राचीनत्वे रामचरितस्य घटते नार्वाचीनत्वे । आदिकाव्यत्वेन राम-चरितस्य भारततः प्राचीनत्वं निःशंकम् । वाल्मीकेर्निश्वासाभिज्ञनमोचा-दिगतयथार्थज्ञानाभावोऽपि रामचरितस्य प्राचीनत्वे प्रमाणत्वेन न्यसनीयः । बौद्धानां जैनानामिव दशरथपांडवाद्यन्यथाकरणादिप्रयासः केवलं तत-स्ततो रामचरितस्य प्राचीनत्वं व्यवस्थापयति । शूद्रकोक्तिरपि तत्तद्विदि-तानेकेतिवृत्तादरवती ततो निःसंदेहमर्वाक्तनी । एवं सति ततोऽपि तदु-भयार्वाक्करणप्रयत्नः प्रतीच्यानामेव विप्रलापपारीणानां शोभत इत्यलमे-तयाऽप्रसक्तानुप्रसक्त्या । वस्तुतः प्राच्या भरताः । वैयाकरणानां संप्रदा-योऽपि तादृशः । अतो ब्राह्मणेषु तेषु तेषु स्थलेषु भरतपदस्य प्राच्यपरता-ऽध्यवसेया । रामभ्रातृभरतसंबंधेन पुत्रभूतत्वाद् भरताः । पुरूरवसो गोत्रजातस्य भरतस्य संबंधेन भारतत्वं वर्षादेर्युधिष्ठिरादीनां वंशस्य महत्त्वारोपणे यत्नः । भरतपुत्रो तक्षपुष्कलौ तक्षशिलायां पौष्कलावते च

५–स० १०१, १०२ स, उत्तरकांड, रामा० ।

प्रतिष्ठितौ । उत्तरापथे स्थिरीभूतयोरपि तत्प्रभवतनूजन्मनोः पुष्कलस्य च पौरवाणां कुतोऽपि तयोर्गंधर्वेष्वंतर्भावः। ततः क्वचित् तक्षकः । तत्र भरता एवोपसिंधु निविष्टाः । ततस्तैराकुलीकृतानां गंधर्वाणां पुनः प्रत्यगुदक्च प्रस्थानम् ।

६–कियताऽपि कालेन केकयपरिसराः काश्यो नाम जनपदाः समुदिताः ।

न ज्ञायते काशिव्युत्पत्तिः । खसो वा खशो वा शैलपर्यायः । तदपभ्रंशजनकः कश्चिच्छब्दः पुरातन आसीत् स कालेन लुप्तः । काश्यः शैलप्रायभूमिनिवासा इत्यर्थः । काशयश्च ते मीराश्चेति काश्मीरव्युत्पत्तिः । मीरः समुद्रो जलप्रायमिति यावत् । जलप्रायत्वं तीव्रवेगया वितस्तया । पुरूरवसो राजधानी प्रतिष्ठानम् । सा राजधानी काशिनां भवितुमर्हति । गंगायमुनयोः संभेदे सेति फलं मगधानभि काशित्वारोपस्य । काशी नाम्ना वा राजधानी पुरा तेषां काचिदासीदिति वक्तव्यम् ।

७–उर्वशीनिमित्तं कृतवैरैस्तदधीश्वरैरिंद्रपदं कामयमानैः पुनरपि गंधर्वाः प्रत्यगुदगवाक्च प्रस्थापिताः ।

उर्वश्याः पौत्रो नहुषः । तेन गंधर्वाणां पदं कतिपयानि वर्षाणि भुक्तमित्याहुः । स्वातंत्र्यहानिमनिच्छद्भिर्गंधर्वैरिंद्रपदात् प्रसभं प्रच्यावितो नहुषः । पुनरपि ययातिनाऽसुरराजश्वशुरेण कृतयत्नेनापि नैंद्रपदोपभोगो लब्धः । नहुषस्य ययातेश्च विजिगीषुत्वेन गंधर्वाणां विषयत्यागो नानुमेयः ।

८–काशीश्वराणां प्रायो मानवैः सह संबंधः ।

ययातेरूर्ध्वं गंधर्वैरसुरैर्वा कलहो न स्मर्यते । ततोऽनुमीयते तेषामात्मानं दक्षिणेनैव संबंधः प्राय आसीदिति । कालेन दक्षिणस्यां हस्तिना हास्तिनपुरनिवेशनं तद्वंशोद्भवस्य संवरणस्य राज्यतः पांचालेन

६–मध्यास्ये काश्गर् इति प्रसिद्धाः । काशीनां गृहाः काशिगृहाः । तस्यापभ्रंशः काश्गर् इति काश्कार् इति वा ।

प्रभंशनं तत्पुत्रेण कुरुणा महाप्रतापेन पांचालस्य पराभवः पितृपैतामह-राज्याधिगमस्य तथान्या विषयव्यवहरणं चेति सर्वं मानवैः सह संबंधं द्योतयति । मानवा मनोः प्रसूतिः ।

९—भारतयुद्धादूर्ध्वं प्रायः पृथिवी सर्पैराकुलीकृता ।

सृप गतावित्यस्मात् सर्पः । सर्पितया धर्मेण तथा व्यवहारः । तक्षकः सर्पश्चेति संज्ञे एकस्यैव संज्ञिन इत्याहुः । तक्षकाणां सर्पैः सह योनसंबंधेन तत्त्वं तदभेदापादनं चेति युक्तम् । भरतास्तथाः । अभरताः सर्पाः । तेषां संकरः । सर्पकल्पानां सर्पाणां बाहुल्येन तक्षकाणां प्रायस्तदं-तर्भावः । कश्यपप्रसूतित्वेन स्मरणादमानवाः सर्पाः । कश्यपप्रसूतित्वं तत्परिसरवासित्वात् । आकुलीकरणानुमानं तन्मुनेस्तिरस्कर्तुः परिचितो वधप्रसंगात् । सर्पसत्रत्वेन वर्णनं सर्पवधस्य यज्ञविद्याप्रियाणां वाग्वि-लासः । सर्पाणामयनं नाम सर्पैर्विहितः सत्रविशेषः । एतेन व्याख्यातान्यं-गिरसामयनादीनि । सर्पाणामयनस्य सर्पाहुतित्वेऽगिरसामयनादीनामपि तथात्वप्रसक्त्या बह्वनिष्टापत्तिः । सा तथाप्यनिष्टेत्युक्तदिशैव निर्वाहो न्याय्यः ।

१०—असुरैरपि तत्परिचरस्तैः प्रत्यगवाक्प्रस्थानेन नवं नं राज्यं संप्रवर्तितम् ।

न ज्ञायते । कदा गंधर्वेभ्यो विभक्ता असुरा इति । ययातिकाले वृषपर्वणोऽसुराभिधानात् तद्विभक्तत्वे न शंकागंधोऽपि । कश्यपी क्षिति-रशेषाऽपि सर्पैराकुलीकृता । काश्यपं सरः समया दक्षिणेन गंधर्वाणाम-वकाशलाभः । तान् दक्षिणेनासुराणां भूमिः । भगदत्तस्यासुरत्वं पौराणि-कैरिंद्रसख्यविरोधित्वेनापन्हुतं प्रतीयते । प्राग्ज्योतिषाधिपतेरसुरत्वं वरुण-संबंधश्चान्यतः सिद्ध इत्यकिंचित्कर एषोऽपन्हवः । गंधर्वासुराणां भारत-काले निर्दिष्टायामेव दिश्यवस्थानं तत आसिंधुनदं ततः पूर्वं च निरव-काशत्वात् । निरवकाशत्वं त्वग्रे स्फुटीभविष्यति । नवीनं राज्यं निनी-

Digitized by Google

क्षीति । राज्यप्रवर्तकस्यासुरत्वेन स्मरणाद्विषयस्यापि तन्नाम्नाऽभिधानमु- तेरसुर एवासुराणां यः कश्चन भवितुमर्हति । अतो नैष विषयः पुराऽसु- राणामासीदित्यनुमीयते ।

११–ऋष गतावित्येतस्मादृषिः । ऋषयो गामुका ब्राह्मण- क्षत्रिया यज्ञविद्यापितरः ।

स्वयंभूर्वेदपुरुषस्तानभ्यानर्षेति तेषामृषित्वमिति ब्राह्मणोक्तं निर्व- चनं तदितरन्निर्वचनवद् यत्किंचित् प्रलपनमिति नोपादेयम् । ब्रह्म मंत्रा यज्ञविद्येत्यनर्थांतरम् । बृहि विस्तारे । बृंहणाद् ब्रह्म । मंत्रसमाम्नाय इति यावत् । शामित्रप्रधाना यज्ञविद्या मंत्रसमाम्नायश्चेति द्वयोः पूर्वेषां धर्मतत्त्वं परिसमाप्यते । तद् धर्मतत्त्वं ब्रह्म । नैषा व्युत्पत्तिरश्रौती । एतेनाग्ने ब्रह्मणा वावृधस्वेत्यादिश्रुतिप्रामाण्यात् । ब्रह्मवादिनो वदंति किं चतुर्होतॄणां चतुर्होतृत्वमित्यादिषु शतशो ब्रह्मपदस्य तत्परत्वनिश्च- यात् । अधीहि भगवो ब्रह्म तदेव ब्रह्म त्वं विद्धीत्यादिषु वेदांतेषु लौकिकालौकिकत्वेन ब्रह्मणो द्विविधत्वाऽऽपत्तेऽपि सिद्धं वैदिकं ब्रह्म वेदांतगतब्रह्मणो भिन्नमिति । जन्मादिसूत्रारंभतोऽपि तदेव सिध्यति । यदि हि श्रुतिप्रतिपाद्यं ब्रह्म न विप्रतिपत्तिविषयत्वेनाभ्यमंस्यत सिद्धसा- धनत्वेन यत्न एव सूत्रकारस्य वृथैवाऽभविष्यत् । विप्रतिपत्तिविषयस्त्विति युक्त एव सूत्रारंभः । उपनिषत्सु पुरुषस्य ब्रह्मत्वेन ग्रहात् तासां वेदांत- त्वेनाऽभ्यर्हणा । अन्यथा श्रुतीनामविद्यात्वमपरविद्यात्वं वा प्रतिपादयंत्य उपनिषदः पाखंडशास्त्रत्वेनैवोदलापयिष्यंत । उभयोरसंबद्धयोर्वस्तुतः संबंधाधायी ब्रह्मशब्द इति नृणां कामधेनुः खलु शब्दशास्त्रम् । तादृशं प्राचीनं ब्रह्माधीते वेद वा ब्राह्मणाः । क्षत्रं बलम् । तदस्यास्तीति क्षत्रियः । ब्राह्मणत्वक्षत्रियत्वयोः सामानाधिकरण्याद् ब्राह्मणक्षत्रिया इति तत्पु- रुषो न द्वंद्वः । त एते ब्राह्मणक्षत्रिया ऋषयो यज्ञविद्याया न केवलं जनकाः प्रसारका अपि । ब्राह्मणक्षत्रियत्वमन्यत्रैव प्रायः प्रसरे निमित्तम् । उशि- गादीनां तदुभयवत्त्वं तु श्रुतितः सुग्रहम् ।

७–पृ॰ १८, Twenty-Ninth Annual Report, 1852 R. A. S. G. B. & I.

१२—रक्षोभिः सान्तर्निविष्टानां मनुषां मध्ये लादेशेन नाम्नो ऽपभ्रंशः कृतः ।

यथा यदवो रघवस्तथा मनुषः । मनुष्वदित्यादिषु श्रुतिषु सान्तं प्रातिपदिकम् । अतो मनुषामिति प्रयोगस्य नाऽसाधुत्वं शंकनीयम् । भिन्नानि रक्षांस्यसुरेभ्यः । अपहता असुरा रक्षांसि वेदिषद इति यदद्भिर्भेदो ऽभ्युपगत एव । अञ्जनाभानि रक्षांसि । असुराः सुवर्णवर्णाः । देवैः शाश्वतविरोधभाजोऽसुराः । रक्षसां क्वचित् साहाय्यदानेनाऽऽप्ता रक्षो रक्षसां भाग इत्यादिश्रुतिषु भागहरत्वम् । रक्षांसि न मनोः सृष्टिः । नाप्यसुराणां मनुः स्रष्टा गीतः । मानवा भरता इत्यनर्थान्तरम् । रक्षःसु निविष्टाः केचिन्मनुषः । रक्षोभिस्तन्नाम्नो मनुस् इत्येतस्य मलुक् मलुख् वेत्यपभ्रंशः कृतः । अन्त्यस्य सकारस्य कादेशः खादेशो वा वक्तव्यः । असुरस् इत्येतस्य असरक् असरख् इत्यपभ्रंशो भवति । नस्य लादेशे नीला इत्येतस्य लेला लीला वा पनिस् इत्येतस्य पलिस् कृष्ण इत्येतस्य कन्ह ततः काल कार वेत एतादृशाश्चान्ये प्रमाणयितव्याः । रक्षोभिरेव मलुक् मलुख् वा राजपर्यायितः । पदाऽऽक्रम्य स्वभुजबलेन तानि पशुग्रासं ग्रसतां मनुषां कालेन तैः संकरस्तेषु देवत्वलाभश्च स्वनुमेयः । पितृमर्त्योऽसुरस्याप्येवं देवपदभाक्त्वम् ।

१३—तैः संकीर्णा असुराः ।

रक्षांसि मनुभिः संकीर्णानि । तादृशेषु जनपदेषु नवीनं राज्यमसुरैः संप्रवर्तितम् ।

१४—एवमागमनोत्तरमेव वा विरोचनो देवपदं प्रापितो रक्ष-लादेशेनापभ्रष्टश्च ।

विशेषेण रोचत इति विरोचनः । विभक्तानामसुराणां राजा विरोचनपदभाक् । यथा देवानामिंद्रस्तथा विरोचनोऽसुराणाम् । सूर्योऽपि विरो-

८—पाश्चात्यानामागमेषु मोलख् (Molooh) इति प्रसिद्धः शब्द एतस्यैवापभ्रंशः ।

९—पितृमत्स्वे पृ॰ २४, Rawlinson's Comment. on Cuneif. Inscript. प्रमाणयितव्यम् ।

यन: । राजविशेषाख्यामपि क्वचिद् विभाकरादिवद् विरोचनोऽभिधायकः । विरोचनोऽसुरेषु चार इति परिशेषितः । चार: सुर इत्यऽदेवतात[10]रमि- त्याहुः । सुरः सूर्य इति यावत् । प्रतापित्वेन द्वयोरभेदाध्यवसायः । क्रमेण तस्यैव बलिरिति परिणामः । उपनिषत्सु विरोचनप्रसिद्धिः । बलिस्तु पौराणिकानां परिचितः । वैरोचनिर्बलिरिति । तत्र पूर्वं विरोचन: सकल वाणीवंशविरहितो वा । ततो रस्य लादेशेन बलिसिद्धिरिति तत्पुत्रत्वम् । एतत्तु सुदुर्निर्णेयम् । असुरैर्नवीनं राज्यं संप्रवर्त्याचिरेणैव कालेन विरोचनस्य देवतात्वमापादितमुत शंकरादिभ्यस्तत् फलितमिति । द्वितीयस्य युक्त- त्वे तु न शंका ।

१५–भृग्वंगिरोभिरग्नियागोऽनेकत्र प्रवर्तितः । प्रथमं सर्पा दीक्षिताः । ततो गर्गाः किंनरावयवाः । एवमासिंधुन- दमग्नियागः प्रवृत्तः । स तत्र वसिष्ठैः परिगृहीतः ।

अनेकत्र प्रवर्तितत्वाद्भृगूणामंगिरसां तपसा तप्यध्वमिति यजनप्रधा- नेन वेदेन तदादरः । अत एव भृगूणामंगिरसां च वर्णोत्तमेषु विशेषाधानम् । अग्नेरप्यंगिरोगोत्रोत्पन्नत्वं तत्पूजार्थम् । वामदेवेन प्रथां प्रापितानां ब्राह्मण- क्षत्रियाणामंगिरस्त्वकामुकत्वमप्यन्यथा नोपपद्यते । उशिजादीनां चांगि- रस्त्वं स्मर्यत एवेति परःसहस्राः शरदो ब्रह्महिताय तपस्तप्यमाना यदि केचित् तेंऽगिरस एव भवितुमर्हंति । भृगूणां तु माहात्म्यं पारेवाचां यत- स्तद्गोत्रजन्मनः पादरेणुं भगवान् यज्ञपुरुषोऽपि भूषणत्वेन वक्षसि दधे यतश्च तत्पुत्रं पुरोधायासुरैर्नैकान् वारान् मानो यज्ञपुरुषायजस्यापि हृद- याद्विर्वासितः । आंगिरसेनापि देवपुरोहितेनापि कोऽन्यो विदितसारः कस्य वाऽन्यस्य ततः पूर्वं जन्म वारुणित्वं च । आंगिरसो भार्गवश्चेति प्रधानौ प्रवरौ द्वावेव । काश्यपस्य त्र्यायुषमित्यादिश्रुतिभ्यः सर्पाणां दीक्षा प्रथमा भवितुमर्हंति । सर्पाः सत्रमासत सर्पाणामयनमिति च श्रूयते । ततो- ऽपि काश्यपानां यज्ञविद्याप्रियत्वमनुमीयते । भृग्वंगिरोभिः समभिव्याहारा-

[10]–Note 4, p.24, Rawlinson's Comment. on Cuneif. Inscript.

भावात् कश्यपानां तैः समशीर्षिकत्वं तु न न्याय्यम् । अतस्तेषां दीक्षांगीकारो युक्तः । सर्पबल्यादिस्मरणाच्च पूर्वं तेषामतत्त्वेन क्वचिदुपद्रावकत्वं कालेन प्रायस्तत्त्वेनाऽतथात्वमिति तत्त्वम् । आख्यायिकाऽपि केषांचित् सर्पाणां यज्ञपुरुषानुकूलत्वं केषांचित् तत्प्रतिकूलत्वं बोधयंत्यत्रानुसंधेया । सर्पाणामाशीविषत्वापादने यत्र ऐतरेय[११]स्य श्रूयत इति ब्राह्मणकालेऽपि तत्त्वप्रस्मरणं निःसंदेहम् । तच्च प्रस्मरणं दीक्षायाः प्राचीनत्व एव घटते नान्यथा । गर्गाणामृषित्वमाश्वलायनेन स्मर्यते पाणिनिनाऽपि । गार्गी च वाचक्नवी बृहदारण्यकविदां विदिता । काश्यपं सरः समया ग[१२]र्गाणामपि निवासः । तेषामंगिरोभिः संबंधो न भृगुभिः । यत्र गर्गाणां वासः सा किंनराणामपि प्राची[१३]ना भूमिः । मरो मर्य इत्यनर्थांतरम् । किंमर इत्येतस्यैव रूपांतरं किंनरः किंपुरुषश्चेति । कुत्सितो मरः किंमरः । कुत्सितत्वं विकृतवदनत्वादिना । एतैर्भृगुभिरंगिरोभिः कश्यपैर्गर्गैरन्यैश्च ब्राह्मणवर्चियैर्ऋषिभिरग्नियागोऽनेकत्र सिंधुनदमभिव्याप्य प्रवर्तितः । इक्ष्वाकुरिति जनपदनाम । इक्ष्वाकुभिर्वसिष्ठानां संबंध इत्याहुः । भरतास्तर्हि वसिष्ठा भवितुमर्हंति । नैतेषामंगिरोभिर्भृगुभिः कश्यपैर्वा संबंधः । रघुभिः सह सिंधुनदमभि वसिष्ठानां प्रस्थानं निवेशश्च । तत्र कुरुपितुः संवरणस्य कुतोऽपि कल्याणकरत्वं महाभारतादधिगंतव्यम् । शतद्रूश्च विपाशा चेति नामनी वसिष्ठनिमित्तके इति वसिष्ठानां तत्परिसरसंबंधे शंकाऽनुपपन्ना । विपाडिति पाणिनिर्विदितं नदनाम । तत्परिसरवासित्वादेव भरतेषु वसिष्ठानामग्नियागे दीक्षाप्राथम्यम् ।

१६–पशुयागस्तु तित्तिरीणामनुग्रहः ।

यजुर्यजनादिति यज्ञकांडप्रतिपादको यजुर्वेदः प्रधानम् । काशीनामुदीच्याः प्राच्याश्च तित्तिरयः । तेषां मुद्ग[१४]लादयोऽवांतरभेदाः । हिम-

११–खं १, अ० १, पंचि० ६ ।

१२–Georgia शब्दे शब्द एषोऽस्यत्वेनान्वेष्टव्यः ।

१३–Chapt. 11 and 12, BK 4, Carey's Herodotus.

१४–मुग्गल इति मुद्गलापभ्रंशः ।

Digitized by Google

वासिभिरनग्निपरिचितैर्मरुप्रायनिवासैः क्रव्याशिभिस्तित्तिरिभिर्विना को नाम पशुयागप्रियः पृथिव्याम्। पशुविशसनादि प्रधानमाध्वर्यवं यजूंषि विहाय कस्यान्यस्यर्त्विजः। तादृशमेव निर्वचनमध्वर्यायास्कस्याभिप्रेतम्। यज्ञस्य मात्रां विमिमीत इति श्रुतिरप्याध्वर्यवनिरूपणपरा प्रमाणयितव्या। आध्वर्युवेदे फलभेदेन पुरुषोऽपि नानाविधः पशुः स्यपीति सोऽघोरघंटव-द्विसेकरुचीनां तित्तिरीणामेव पुरा सर्वस्वं भवितुमर्हति। सर्पाणामिव तित्तिरीणां तिर्यक्त्वापादनमर्वाक्कालिकं संज्ञासादृश्यं च तन्तूक्तम्। याज्ञ-वल्क्येन वांतानि यजूंषि तित्तिरीभूय चेतरैस्तानि वांतान्यशितानीति पौरा-णिकानामपूर्वनिर्वचनचणानां प्रलापः। (शेषमग्रे)

१५—अत्रैषोऽपि चतुर्थः प्रपाठको (कां ३, तैत्ति॰ ब्राह्मण॰) द्रष्टव्यः।

सटीकसंक्षेपशारीरकम्।

(Continued from page 360. Vol. VI.)

मू॰ ॥ तथा हि संबन्ध्युपमर्दबुद्धये
समर्थमुत्सर्गमपेत्य नञ्पदम् ॥
न पर्युदासाय विनापवादकं
ततो निवृत्त्यर्थपरं तदिष्यते ॥ ४४४ ॥

टी॰ ॥ कुत इत्यत आह। तथाहीति। नञ्संबन्धिपदार्थस्य य उपमर्दोऽभावस्तद्बुद्धये उत्सर्गे मुख्यवृत्तिमपेत्य औत्सर्गिकस्वभावेन। तर्हि किं नञः पर्युदासोनार्थे इत्याशङ्क्य यत्रोत्सर्गप्राप्तमुख्यार्थस्याभावस्याप-वादकं बाधकं किंचिदस्ति तत्र पर्युदास आश्रीयते न च प्रकृते तदस्ती-त्याशयेनाह। न पर्युदासायेति। फलित माह। तत इति। ततः कारणा-त्पूर्वोक्तमार्गेण प्रार्थनानिवृत्तिपरं निषेधवाक्यमित्यर्थः ॥ ४४४ ॥

मू॰ ॥ अतः प्रसज्यप्रतिषेधसंभवा-
न्न पर्युदासाश्रयणं प्रशस्यते ॥

न पर्युदासाश्रयणं विना भवे-

दनिष्टहेतुत्वनञर्थकल्पना ॥ ४४५ ॥

टी० ॥ ननु कथमिष्टसाधनस्य भक्षणादेस्तत्र निषेधः कथं वा तदनिष्टसाधनतावगमं विना प्रवृत्त्युन्मुखस्य ततो निवृत्तिर्भवेदिति तदाशयं दूषयन्नुपसंहरन्नाह । अत इति । यतो मुख्यार्थबाधे सत्येव पर्युदासलक्षणा अत इत्यर्थः । प्रसज्यप्रतिषेधसंभवाद्धिति । निवृत्तेरप्येतदुपलक्षणं कलञ्जदनिष्टानुबन्धीष्टसाधनत्वस्य निषेध्यस्य तत्र भ्रान्त्या प्रसक्तत्वेन निषेधसंभवाद्विशिष्टनिषेधसामर्थ्याद्बलवदनिष्टसाधनत्वस्यापि सिद्धेर्निवृत्तेरप्युपपत्तेर्न पर्युदास आश्रयणीय इत्यर्थः । माभूत्तर्हि पर्युदास इत्याशङ्क्य तदा भवदिष्टं न सिध्यतीत्यतीत्याह । न पर्युदासाश्रयणमिति ॥ ४४५ ॥

मू० ॥ अभीष्टहेतुत्वलिङर्थपूर्वतो

ह्यनर्थहेतुत्वनञर्थकल्पना ॥

न पर्युदासं परिहृत्य कल्प्यते

न पर्युदासः प्रतिषेधसंभवात् ॥ ४४६ ॥

टी० ॥ द्वितीयार्द्धार्थमेव विवृणोति । अभीष्टहेतुत्वेति । अभीष्टहेतुत्वस्य लिङर्थत्वात्तद्धति तन्निषेधायोगेन पश्चात्प्रसुते नञोऽनर्थहेतुत्वकल्पना वाच्या, सा च न पर्युदासलक्षणां विना संभवति सापि मुख्यार्थसंभवे न युक्तेत्यर्थः । नन्विष्टहेतुत्वस्य प्रत्यक्षविरोधादेव निषेधासंभवात्पर्युदास आश्रीयतामिति चेन्न । इष्टं प्रति साधनत्वांशनिषेधासंभवेऽपि इक्तांशस्य प्रमाणमूलत्वनिषेधसंभवस्योक्तत्वात् । तस्मान्निषेधवाक्यं निवृत्तिपरमेवेतिसिद्धम् ॥ ४४६ ॥

मू० ॥ प्रमाणमिच्छन्प्रतिषेधचोदनां

समस्तवेदस्य न कार्यगोचरम् ॥

प्रमाणभावं प्रतिपन्नमीश्वरो

निषेधवाक्ये तदसंभवादतः ॥ ४४७ ॥

टी० ॥ एवं निषेधवाक्यस्य प्रतिषेधमात्रनिष्ठत्वे सिद्धे सति वेदवाक्यस्य कार्यगोचरत्वनियमाभावात्तद्वदेव वेदान्तवाक्यमप्युक्तन्यायेन सिद्धब्रह्मपरं स्वीकर्तव्यमित्युपसंहरति । प्रमाणमिति सार्द्धेन । कुतो नेश्वरस्तत्राह । निषेधवाक्य इति । तदसंभवाद्वेदस्य कार्यार्थत्वानियमो यतः अत इत्युत्तरेण संबन्धः ॥ ४४७ ॥

मू० ॥ अतो न वेदान्तवचस्सु विद्यते
विधिर्नियोगो न च शब्दभावना ॥
न कर्मकाण्डेऽपि नियोगतोऽस्त्यसौ
यतो निषेधेषु न विद्यते विधिः ॥ ४४८ ॥

टी० ॥ विधिः कर्तुरिष्टाभ्युपायः। एतदेव कैमुतिकन्यायेनाप्याह । न कर्मकाण्डेऽपीति । नियोगतो नियमतः । असौ विधिः ॥ ४४८ ॥

मू० ॥ उपेत्यवादं परिगृह्य चोच्यते
नियोगनिष्ठाऽस्तु निषेधगीरपि ॥
तथापि वेदान्तवचःसु विद्यते
विधेर्न गन्धोऽपि विरोधकारणात् ॥ ४४९ ॥

टी० ॥ इदानीं निषेधवाक्यस्य निवृत्तिविधिनिष्ठत्वमुपेत्यापि वेदान्ते विध्यसंभवमाह । उपेत्यवादमिति । अभ्युपगमवादमित्यर्थः । तमेव प्रकटयति । नियोगनिष्ठेति । गन्धो लेशः उत्पत्त्यादिरूप एकोपि विधिर्न संभवतीत्यर्थः । विरोधकारणादिति । वेदान्तानामद्वैते तात्पर्यग्राहकप्रमाणविरोधादित्यर्थः ॥ ४४९ ॥

मू० ॥ ज्ञानं विधातुं हि न शक्यमेत-
न्न शक्यते कर्तुमकर्तुमेतत् ॥
अतोऽन्यथा कर्तुमशक्यमेत-
त्प्रमाणमेयैकनिबन्धनत्वात् ॥ ४५० ॥

टी० ॥ प्रकारान्तरेणापि तदसंभवमाह । ज्ञानं विधातुमिति । न तावद्वेदान्तानां कर्मविधिपरत्वं संभवति । तत्प्रतिपाद्यस्यात्मनः कर्मशेषत्वासंभवेन विनियोजकप्रकरणाद्यभावेन तेषां तदयोगात् । नापि वेदान्तावगतोपासनाविधिशेषत्वम् । मुमुक्षोरुपासनया प्रयोजनाभावेन तमधिकृत्य प्रवृत्तानां तेषां तदनुपपत्तेः । अस्तु तर्ह्यात्मन्येवात्मानं पश्येदिति श्रुतज्ञानविधिपरत्वं ज्ञाने मुमुक्षोरेवाधिकारादिति चेन्न । एतदलौकिकाद्वयात्मविषयकं ज्ञानं हि यतो विधातुं न शक्यम् । कुतो विधातुं न शक्यं तत्राह । न शक्यत इति । यद्धि कर्तुमकर्तुं शक्यते पुरुषप्रयत्नेन निष्पाद्यते तदभावे च न यथाऽतिरात्रे षोडशिग्रहणम् । यच्चान्यथापि कर्तुं शक्यं यथाऽनुदितहोम उदितहोमादिलक्षणस्तदेव विधेयम्, ज्ञानं नैवं तस्य प्रमाणप्रमेयैकतन्त्रतया पुरुषेच्छायत्तत्वाभावादित्यक्षरार्थः । विधिजन्येषु साधनताज्ञानाधीना यत्र चिकीर्षा इति तज्जन्यया कृत्या यत्साध्यते तद्विधिविधेयम् यथाऽग्निहोत्रादि, ज्ञानं च नैवं न हि ज्ञानं चिकीर्षया निष्पाद्यते अनिच्छतोऽपि तद्दर्शनाद्यापि कृत्या अयतमानस्यापि तद्दृष्टेरिति ज्ञानस्याविधेयतया न वेदान्तास्तद्विधिपरा इति भावः ॥ ४५० ॥

मू० ॥ ब्रह्मज्ञानं जानता ब्रह्मबुद्धेः
कर्त्तव्यत्वं शक्यते ज्ञातुमेतत् ॥
न ह्यज्ञात्वा ब्रह्मबुद्धिं तदीयं
कर्त्तव्यत्वं कश्चिदर्हेत् ग्रहीतुम् ॥ ४५१ ॥

टी० ॥ किं चात्मानं पश्येदिति वाक्यार्थावगमात्प्राग्विधेयात्मज्ञानं न ज्ञातं किं वा ज्ञातम्, आद्योऽनुपपन्न इत्याह । ब्रह्मज्ञानमिति । ज्ञानस्य विधिसंसर्गरूपवाक्यार्थनिश्चयहेतुत्वेन तदभावे स न स्यादित्यर्थः ॥ ४५१ ॥

मू० ॥ ब्रह्मज्ञानं ब्रह्मणि ज्ञायमाने
ज्ञातुं शक्यं नान्यथा तच्च तद्वत् ॥
विज्ञातं चेद् ब्रह्मणस्तत्त्वमस्य
प्राप्ता मुक्तिर्नास्ति कृत्यं विधीनाम् ॥ ४५२ ॥

टी० ॥ द्वितीयेऽपि तद्विषयो ब्रह्म ज्ञातमिति वाच्यम्, अन्यथा विषयनिरूपणज्ञानस्य ज्ञातुमशक्यत्वात्, एवं च ब्रह्मणो यत्तत्त्वज्ञानं मोक्षाय विधीयते तदपि ज्ञानवद्विज्ञातमित्यस्याधिकारिणो ज्ञानान्मुक्तिः प्राप्तेति नास्ति विधीनां प्रयोजनमित्याह । ब्रह्मज्ञानमिति ॥ ४५२ ॥

मू० ॥ दृशो विराट्सूत्रशरीरगोचरं
परस्पराध्यासमबोधसंभवम् ॥
अनर्थमाहुः श्रुतिमस्तके स्थिता-
स्ततोऽस्य विद्यासमयेव मुक्तता ॥ ४५३ ॥

टी० ॥ ब्रह्मणि ज्ञाते ज्ञानं विधीयते इति पक्षे न केवलं प्रयोजनाभावान्न ज्ञानविध्यसंभवः किं तु तन्निमित्तप्रमातृकर्तृकरणादिभेदासंभवादपि विधिर्न संभवति इत्याह । दृशो विराडिति । परस्य दृशः प्रत्यक्चैतन्यस्य विराट् स्थूलभूततत्कार्यात्मस्थूलप्रपञ्चः, सूत्रं सूक्ष्मभूततत्कार्यलिङ्गशरीरमस्मदादीनाम्, शरीरं व्यष्टिरूपं तद्गोचरं परस्पराध्यासमहं ममेत्यवभास्यावभासात्मकमनर्थमबोधादज्ञानात्संभवं श्रुतिमस्तके वेदान्ते स्थिताः परिनिष्ठिता आहुः । उक्ताध्यासस्याज्ञानसमुत्थत्वे फलितमाह । तत इति । अस्याधिकारिणो ज्ञातुः । विद्यायाः समय एवोत्पत्तिसमयो यस्याः सा तथा मुक्तता अविद्यातत्कार्यसंसारराहित्यम् । ततो भेदाभावात्कथं विध्यर्थावगमोऽनुष्ठानं वाधिकारिणो भवेदिति भावः ॥ ४५३ ॥

मू० ॥ अनाद्यविद्यापटनेत्रबन्धनं
प्रसह्य वेदान्तनिबन्धना मतिः ॥
स्वजन्ममात्रेण दृढात्मगोचरा
समूलदाहं दहतीति हि श्रुतिः ॥ ४५४ ॥

टी० ॥ ननु विद्यासमयेव मुक्ततेति कथं ज्ञानसहकारिणां तदानीं नियमेनासंभवाच्च श्रमहतमेव किं चित्कार्ये जनयदृष्टमित्याशङ्क्यान्यत्रैव, ज्ञानं स्वाविद्यानिवृत्तौ स्वोत्पत्तिमात्रेण समर्थमित्याशयेनाह । अनाद्यविद्येति । अविद्यायाः स्वरूपप्रकाशकार्यप्रतिबन्धकत्वात्पटवत्सा नेत्र-

बन्धनमित्युक्तं ज्ञानोत्पत्त्यनन्तरं तद्विरोधेनानादिरप्यविद्या तत्कार्यं वा स्थातुं न शक्नोतीति प्रसह्येति सूचितम् । आपातज्ञानव्यावृत्तये दृढेति. समूलदाहं मूलं संसारमूलं विविधवासनास्तद्वाहसहितं यथा स्यात्तथा दहति नाशयतीति श्रुतिः 'भिद्यते हृदयग्रन्थिः', 'तरति शोकमात्मविदि'त्याद्या दर्शयतीत्यर्थः ॥ ४५४ ॥

मू० ॥ विज्ञाते ब्रह्मणि स्याद्विधिरयमफलः प्रत्यये तस्य तद्व-
न्नाऽज्ञातब्रह्मकर्मा विधिविषय इति प्रत्ययो बुद्धियोग्यः ।
ब्रह्मात्मप्रत्ययेऽतो विधिरनवसरः सर्वथा चिन्त्यमान-
स्तस्माद् ब्रह्मात्मवस्तुन्यवसितमखिलं विद्धि वेदान्त-
वाक्यम् ॥ ४५५ ॥

टी० ॥ नन्वस्तु ब्रह्मणि वाक्यात्परोक्षनिश्चये सति तज्ज्ञाने विधिरिति चेन्न तावत्तदेव ज्ञानं विधेयं सिद्धस्य साध्यत्वायोगात्, नापि तज्जातीयान्तरं तस्य पूर्वज्ञानवद्विधिं विनैव शब्दात्संभवात्, फलं च तस्य न दृश्यते मोक्षस्य विधिफलत्वेऽनित्यत्वापत्तेः, नापि साक्षात्कारस्तत्फलं तस्य प्रमाणैकफलत्वेनानैयोगिकफलत्वात्, अत एव साक्षात्कारोऽपि न विधेय इत्याशयेनाह । विज्ञात इति । शब्दतो विज्ञातेऽपीत्यर्थः । तस्य प्रत्ययेऽयं विधिरफलः स्यादिति संबन्धः । यदा परोक्षमपरोक्षं वा ब्रह्मणि ज्ञाते तज्ज्ञानं वाक्यावगतमपि न विधेयं तदात्यन्ताज्ञातब्रह्मकर्मकं ज्ञानमवाक्यनिरूपणत्वात्सुतरां न विधेयमित्युक्तमेव स्मारयति । तद्वन्नाज्ञातेति । अज्ञातं ब्रह्म कर्म विषयो यस्य प्रत्ययस्य स विधिविषय इति बुद्धियोग्यो न स्यादित्यर्थः । उक्तरीत्या ज्ञानविधिविषयानिरूपणफलमाह । अतो ब्रह्मात्मप्रत्यय इति । अनवसरः अयुक्तः सर्वथा स्वरूपतो विषयतश्च ज्ञातत्वाज्ञातत्वाभ्यां परोक्षत्वापरोक्षत्वाभ्यां च विचारार्हविषयासंभवादयुक्त इत्यर्थः । सिद्धसंभवफलमाह । तस्मादिति । इदमत्र कर्मकाण्डस्य नियोगार्थत्वेऽपि उक्तन्यायेन वेदान्तेषु तदसंभवात्तेषां सिद्धे ब्रह्मण्येव पर्यवसानमिति भावः ॥ ४५५ ॥

मू० ॥ विरुद्धत्रिकस्य द्वयापत्तिदोषा-
न्न शक्यं विधानं धियः संग्रहीतुम् ॥
यथा वाजपेये गुणस्येह तद्व-
त्ततो नास्ति वेदान्तवाक्ये विधानम् ॥ ४५६ ॥

टी० ॥ प्रकारान्तरेणापि सदृष्टान्तं ज्ञानविध्यसंभवमाह । विरु-द्धत्रिकस्येति । विरुद्धानां त्रयाणां समूहो विरुद्धत्रिकं तस्येत्यर्थः । वक्ष्य-माणप्रकारेण विरुद्धत्रिकस्य यद् द्वयं तदापत्तिस्तत्प्रसङ्गः स एव दोषस्त-स्माद्धियो विधानं संग्रहीतुम् अवगन्तुम्, वाजपेये वाजपेयनाम्नि कर्मणि, गुणस्य वाजपेयाख्यगुणस्य । दार्ष्टान्तिकमाह । इहेति । तद्वद्वाजपेयगुणवत् । ततो विरुद्धत्रिकद्वयापत्तेः । विधानं ज्ञानस्येति शेषः । यथा वाजपेये वक्ष्य-माणविधया विरुद्धत्रिकद्वयप्रसङ्गेन गुणस्य विधानमङ्गीकर्तुं न शक्यते तद्वत्तत एव दोषादिह वेदान्तवाक्ये धियो विधानं नास्तीत्यर्थः ॥ ४५६ ॥

मू० ॥ उद्दिश्यमानत्वमनूद्यमान-
भावः प्रधानत्वमितीदमेकम् ॥
तथाप्युपादेयविधेयशेष-
भावप्रभेदं त्रिकमन्यदत्र ॥ ४५७ ॥

टी० ॥ किं तद्विरुद्धत्रिकद्वयमिति जिज्ञासायामाह । उद्दिश्यमा-नत्वमिति । किं चिद्विधातुं सिद्धवद्व्यपदिश्यमानत्वमित्यर्थः । प्रागवगतस्य पश्चाद्वादोऽनुवादस्तद्विषयोऽनूद्यमानस्तस्य भावः । प्रधानत्वं शेषित्वमनू-द्यमानभावश्च प्रधानत्वं चेति समाहारैकवचनम्, अनूद्यमानभाव इति सवि-सर्गः पाठः सुगमः । इति अनेन प्रकारेण एकं त्रिकमिति शेषः । उपादे-यम् अनुष्ठेयतया निर्दिश्यम् । विधेयम् अज्ञातं सज्ज्ञाप्यम् । शेषं गुणभूतं तेषां भावस्तत्प्रभेदा यस्मिंस्त्रिके तत्तथा, भावशब्दस्योपादेयादिभिः प्रत्येकं संबन्धः । अपिशब्दस्यान्यदपीति संबन्धः । अत्र त्रिकद्वयसमुदाये ज्ञान-विधौ वाजपेयगुणविधौ चोद्दिश्यमानत्वमनूद्यमानत्वं प्रधानत्वं चेतीत्य-

Digitized by Google

मदमेकं चिकं तथोपादेयस्यविधेयस्यशेषस्यप्रभेदमन्यदपि तद्विरुद्धं चिकं स्यादित्यर्थः ॥ ४५७ ॥

मू० ॥ एकेन वाक्येन धियो विधाने
प्रत्यक्प्रमित्सा च यदि प्रतीचि ॥
चिकद्वयं तत्र विरुद्धमेत-
त्प्रसज्यते कष्टमतः किमन्यत् ॥ ४५८ ॥

टी० ॥ ननु वाजपेयपूर्वपक्ष इवात्मा वा अरे द्रष्टव्य इत्यत्र गुणविद्या-श्रवणात् कथं विरुद्धत्रिकद्वयप्रसङ्गः, स च वाजपेय इव धात्वर्थेऽन्यत्र वेत्यपि न ज्ञायत इत्याशङ्क्य सत्यं गुणविधिप्रयुक्तं प्रज्ञाते न वैरूप्यं किं त्वन्यथा, तथा हि ज्ञानविधिमभ्युपगच्छतः किं तेनैव वाक्यजन्यविधेय-ज्ञानेन ब्रह्मणः सिद्धिरभिमतोतान्येन, न तावदन्येन संभवति ब्रह्मणा-प्रत्यक्त्वादयोग्यत्वात्, नापि वाक्यान्तरजन्यज्ञानेन तस्यापि लिङ्गादियुक्तत्वे प्रस्तुतस्तुल्यत्वात्, तच्च लिङ्गादिराहित्ये वा सिद्धमेव तर्हि वेदान्तानां ब्रह्मनिष्ठत्वं ततश्च प्रयोजनलाभ इति किं ज्ञानविधिना, तस्माद्यद्वा-क्यजं ज्ञानं विधेयं तत एव ब्रह्मणः सिद्धिर्वक्तव्या, तत्र चोक्तवैरूप्यप्रसङ्ग इत्याशयेनाह । एकेन वाक्येनेति । धिय आत्मज्ञानस्य । प्रतीचः प्रमातुमि-च्छा प्रत्यक्प्रमित्सा प्रमित्सितप्रत्यक्सिद्धिरित्यर्थः । यदि भवेदिति शेषः । तत्र तदा प्रतीचि एतद्विरुद्धत्रिकद्वयं प्रसज्यते, तस्मादन्यत्किं कष्टमनिष्ट-मित्यर्थः ॥ ४५८ ॥

मू० ॥ उद्दिश्यमानं तदनूद्यमान-
भूतं प्रधानं च धियो विधाने ॥
प्रमीयमाणं पुनरात्मवस्तु
तदास्पदं स्यादितरत्रिकस्य ॥ ४५९ ॥

टी० ॥ ननु विधेयज्ञानस्य ब्रह्मसाधकत्वे प्रतीचि किं त्रिकं कथं प्रसज्यत इति वीक्षायां विभज्य तदुभयत्रिकप्रसङ्गं दर्शयति । उद्दिश्यमा-

नमिति । आत्मवस्तु धियो विधानेऽभ्युपगम्यमाने उद्दिश्यमानं भवति । एवं तदात्मवस्त्वनूद्यमानभूतं तथा प्रधानं चेत्येकस्य त्रिकस्य प्रतीचि प्रसङ्ग इत्यर्थः । इतरत्रिकप्रसङ्गमाह । प्रमीयमाणमिति विधेयज्ञानेन प्रसाध्यमानं पुनस्तदात्मवस्त्वितरत्रिकस्योपादेयत्वविधेयत्वशेषत्वरूपत्रिकस्याश्रयत्वं स्यादिति संबन्धः । एतदुक्तं भवति । मुमुक्षुभिलषितं प्रत्यग्ब्रह्मात्मकं मोक्षमुद्दिश्य मुमुक्षुरात्मानं जानीयादिति ज्ञानविध्यभ्युपगमे मोक्षात्मकब्रह्मणः सिद्धवन्निर्दिश्यत्वरूपमुद्देश्यत्वं तावत्सिद्धं तच्च तस्य प्रागनवगतस्य न संभवतीति तदनुवादपूर्वमेव वक्तव्यम् इति तस्यानूद्यमानत्वं च स्यादेवमुद्दिश्यमानस्य फलतया प्राधान्यं चेत्येकं त्रिकम् । तथा विधेयज्ञानप्रमेयत्वे उद्देश्यत्वविरुद्धमुपादेयत्वं प्रमितिजन्यफलवत्तयाऽनुष्ठेयत्वं तथा ज्ञानज्ञातस्यैव प्रमेयतया तस्यानूद्यमानत्वविरुद्धमप्राप्तत्वमेवं तस्य प्रधानत्वविरुद्धं विधेयज्ञानक्रियाविशेषणतयाऽप्रधानत्वं चेति मुमुक्ष्वभिलषितमोक्षोद्देशेन ज्ञानविधौ ब्रह्मणि वैरूप्यं प्रसज्यत इति ॥ ४५९ ॥

मू० ॥ प्रथमत्रिकं यजिनिगद्यागतं
गुणसंगतेरवगमे भवति ॥
चरमत्रिकं यजिनिगद्यागतं
फलसंगतेरवगमे तु पुनः ॥ ४६० ॥

टी० ॥ इदानीं दृष्टान्तेऽपि विरुद्धं त्रिकद्वयं विविच्य दर्शयति । प्रथमत्रिकमिति । उद्दिश्यमानत्वादिकत्रिकमित्यर्थः । यजिनिगद्यो यागः तद्गतमित्यर्थः । गुणसङ्गतेरवगमे गुणविधिपरत्वाभ्युपगम इत्यर्थः । वाजपेयेन स्वाराज्यकामो यजेतेत्यत्र पूर्वपक्षे यज्यर्थं यागमुद्दिश्य वाजपेयाख्यगुणसंबन्धविधानेऽभ्युपगम्यमाने यागगतमुद्देश्यत्वादित्रिकं भवेत् । एवं फलसङ्गतेरवगमे स्वाराज्यफलोद्देशेन तद्यागविधाने चरमत्रिकमुपादेयत्वादित्रिकं भवेदेवेत्यर्थः ॥ ४६० ॥

मू० ॥ सकृदुच्चरन्यजतिरेष गुणं
न फलं च सङ्गमयितुं क्षमते ॥

कथितत्रिकद्वयविरोधवशा-

द्यजिवस्तुनीति ननु नीति विदः ॥ ४६१ ॥

टी० ॥ ननु फलं प्रति यागस्य साधनत्वं गुणं प्रति साध्यत्वमित्यन्या-ऽन्यनिरूपितयोस्तयोरेकत्र न विरोधः न हि दण्डसाध्येन घटेनोदकमानयेति न व्यवह्रियते, अत एव फलं प्रत्युपादेयत्वं फलसाधनतयाऽज्ञाततारूपं विधेयत्वं च गुणं प्रत्युद्देश्यत्वानूद्यमानत्वाभ्यां न विरुद्ध्येत इत्याशङ्क्याह । सकृदुच्चरितेति । सकृदुच्चार्यमाणा इति यावत् । सकृच्छ्रुतो हि यजतिः सकृदेव यागं प्रकाशयेत्, स यदि यागेन स्वाराज्यं भावयेदिति करणत्वविशिष्टतया यागमुपस्थापयति तदा करणेन तेन गुणस्य करणतयाऽन्वयासंभवात्तदर्थं तदानीमेव तं साध्यतयाऽप्युपस्थापयतीति वाच्यम्, अन्यथाकाङ्क्षायोग्यतयोरसंभवात्, करणत्वं च तदा सिद्धसत्ताकस्यैव धर्मः साध्यत्वं च तदाऽसिद्धसत्ताकस्येति तयोरन्यनिरूपितयोरपि युगपदसंभवात्स्वरूपतः प्रतीतितश्च विरोध एव, अये पूर्वमिति च शब्दाभावान्नुपफलसमभिव्याहृतयजिना तत्साध्यत्वसाधनत्वविशिष्टयोरभेदप्रतीतेस्तयोरपि यौगपद्यस्य वक्तव्यत्वात्, दण्डसाध्येत्युक्तदृष्टान्तेपि विशिष्टयोर्विरोधः एवमुपादेयत्वोद्देश्यत्वयोरपि सिद्धासिद्धधर्मयोर्युगपद्विरोध एव, तथा विधेयत्वानूद्यमानत्वयोरिति यजिना सकृत्प्रकाशिते वर्णितं त्रिकद्वयं नान्वेतुमर्हति । अथ करणत्वादित्रितयविशिष्टविषया प्रतीतिरन्याऽन्या च साध्यत्वादित्रिकविषयेति चेन्न । सकृच्छ्रुतयजेस्तदयोगात्, वैरूप्ये च तन्त्रानवतारादतः स्वाराज्यकामो यजेत यजेत वाजपेयेनेति यज्यावृत्त्या प्रतीतिद्वये वाक्यभेदः स्यात्,स चैकवाक्यत्वसंभवे न युक्तः, तस्माद्वाजपेयेनेति न गुणविधिः किं तु कर्मनामेति प्राचि तन्त्रे स्थितम्, तदिदं नीतिविद आहुरिति दर्शितम् । अक्षरार्थः स्फुट एव सङ्गमयितुं यजिवस्तुनीति संबन्धः ॥ ४६१ ॥

मू० ॥ इति वाजपेयगतनीतिवशा-

दपि नात्मवस्तुविषयाऽवगतो ॥

विधिरस्ति तेन विधिशून्यतया
परमात्मवस्तुविषयोपनिषत् ॥ ४६२ ॥

टी० ॥ यथा वाक्यार्थे वैरूप्यप्रसङ्गादुपासाविधिर्न संभवति । एवमात्मावगतावपि तत एव विधिर्न संभवतीत्युक्तमुपसंहरति । इति वाक्यार्थेति । विध्यसंभवफलमाह । तेनेति ॥ ४६२ ॥

मू० ॥ सगुणवाक्यमपीह समन्वितं
भवति निर्गुणवस्तुनि सर्वशः ॥
न खलु निर्गुणवस्तुसमन्वयं
न सहते सगुणस्य समन्वयः ॥ ४६३ ॥

टी० ॥ एवं निर्गुणवाक्यानां विधिशून्ये स्वप्रधाने ब्रह्मणि समन्वयो निरूपितः । इदानीं सर्वं खल्विदं ब्रह्मेत्यादिसगुणवाक्यानामपि निर्गुणे ब्रह्मणि समन्वये तात्पर्य्यमस्त्येव, वस्तुतो निर्गुणब्रह्मण एव मायया गुणवत्तया प्रतीतेरित्याशयेनाह । सगुणवाक्यमिति । इह वेदान्ते सर्वशः सर्वसगुणब्रह्मवाक्यमिति संबन्धः । ननु सगुणविषयवाक्यस्य निर्गुणतात्पर्यं विरुद्धमित्याशङ्क्य वक्ष्यमाणविधया नास्ति विरोध इत्याशयेनाह । न खल्विति । सगुणस्य तद्विषयवाक्यस्य ॥ ४६३ ॥

मू० ॥ सत्यासत्यवपुस्तथा हि सगुणं ब्रह्मास्य विद्या तथा
तद्वत्तद्विषयस्य वेदवचसस्तात्पर्य्यमेवंविधम् ॥
तेनावान्तरमस्य वेदवचसस्तात्पर्य्यमन्यादृशं
चान्यन्निर्गुणवस्तुतत्त्वविषयं संकीर्त्यते भागशः ॥ ४६४ ॥

टी० ॥ ननु सगुणं कथं वस्तुतो निर्गुणं येन वाक्यस्य तत्र तात्पर्यं तत्रापि तद्वदेवेत्याशङ्क्य निर्गुणे गुणसंसर्गस्याध्यस्तत्वेन तदधिष्ठानस्य तदापि निर्गुणत्वानपायादित्याशयेनाह । सत्यासत्येति । न खलु निर्गुणवस्त्वित्यादिनोक्तमर्थं तथाहीति परामृशति । तथा हि सगुणं ब्रह्म सत्यासत्यवपुस्तस्य विद्या तद्गोचरं ज्ञानं तथा सत्यासत्यवपुः सत्यासत्यविषये-

ति यावत् । तदुक्तं ज्ञानवत्तद्विषयस्य सगुणब्रह्मविषयस्य वेदवचसस्तात्पर्यमप्येवंविधं सगुणनिर्गुणविषयं सगुणज्ञानस्योभयविषयत्वात्तज्जनकवाक्यार्थरूपं तद्वाक्यतात्पर्यमपि तथेत्यर्थः । नन्वेकस्य वाक्यस्यैवं तात्पर्यभेदो न युक्तः तद्भेदप्रसङ्गादित्याशङ्क्यैकमेव सगुणविषयं तात्पर्यं विषयोपाधिना भिन्नम् । तत्रापि गुणांशस्य कल्पितत्वात्परमपुरुषार्थत्वाभावाच्चावान्तरं ब्रह्मांशे तु तत् परमपुरुषार्थसाधनतया सत्यविषयतया च परममिति न तात्पर्यस्य स्वतो भेदो न वा तदुभयत्र तुल्यमतो न वाक्यभेद इत्याशयेनाह । तेनेति । अस्य सगुणविषयस्यान्यादृशं निर्गुणवाक्यतात्पर्याद्विलक्षणगुणम् गुणांश इति शेषः । भागशो भिन्नविषयप्रयुक्तभेदेनेत्यर्थः ॥ ४६४ ॥

मू० ॥ रूप्यज्ञानं रजतमिदमित्येवमुत्पद्यमानं
सत्यासत्यं विषयमपृथग्दर्शयत्येकमेव ॥
तद्वन्मानं सगुणविषयं सत्यमिथ्यावभासं
संसृष्टार्थद्वयमिति दृढं दर्शयत्येकमेतत् ॥ ४६५ ॥

टी० ॥ सगुणवाक्यजन्यं ज्ञानं ब्रह्मणि गुणविशिष्टं निर्गुणं ब्रह्म च विषयीकरोतीत्येतत् लौकिकभ्रमदृष्टान्तेनाह । रूप्यज्ञानमिति । एकमेव रूप्यज्ञानमिति संबन्धः । सत्यं चासत्यं चेति द्वन्द्वैकवद्भावः । अपृथक्कल्पिताभेदम् । दार्ष्टान्तिकमाह । तद्वन्मानमिति । सत्यमिथ्यावस्तुनोरवभासो यस्मान्मानात्तत्सत्यमिथ्यावभासम् । ननु किं पृथक्पृथक्तयोरवभासः नेत्याह । संसृष्टार्थद्वयमिति । परस्परं संसृष्टमर्थद्वयमित्यर्थः । इति शब्दो दार्ष्टान्तिकोपसंहारार्थः । दृढं निःसंदिग्धम् । तद्वत् रूप्यज्ञानवदेतदेवं सगुणविषयं सत्यमिथ्यावभासमानं संसृष्टार्थद्वयं दृढं दर्शयतीति संबन्धः ॥ ४६५ ॥

मू० ॥ तद्बुद्धिमात्रफलतैव च तत्परत्वं
वेदान्तवादिसमये न तु शेषभावः ॥
शेषत्वमप्यरफलापगतासिमात्रं
प्रत्येव नाध्ययनमर्थधियोऽपि शेषः ॥ ४६६ ॥

टी० ॥ एवं वेदान्तानां सगुणनिर्गुणब्रह्मप्रतिपादकत्वेऽपि निर्गुणे ब्रह्मण्येव तात्पर्य्यमित्युपपादितम्, ननु भवन्मते वेदस्य तात्पर्य्यमेव न सिद्ध्यति तत्प्रतीतीच्छयोच्चरितत्वं हि शब्दे तात्पर्य्यम्, न चापौरुषेये तत्संभवतीत्याशङ्क्य तत्र तात्पर्य्यस्वरूपमाह । तद्बुद्धिमात्रेति । शब्दस्य यत्रार्थे तात्पर्य्यं संमतं तद्बुद्धिमात्रानुकूलशक्तिरेव तत्र तात्पर्य्यमित्यर्थः । इदमेव शब्दस्य तात्पर्य्यं न तु वक्तुरिच्छा, वेदे तदभावात् । लौकिकवाक्येऽपि तद्बुद्धिमात्रानुकूलशक्तिविशेषस्यैव तत्तात्पर्य्यत्वे संभवति व्यधिकरणेच्छायास्तत्कल्पनायोगात्, इच्छयोच्चरितत्वस्यापि सापेक्षत्वात्, निरपेक्षशक्तिविशेषस्यैव तस्योचितत्वात्, लौकिकवाक्ये वक्तुरिच्छा तात्पर्यग्राहकतयाऽपेक्षितेति नोन्मत्तादिवाक्ये तत्प्रसक्तिरिति लोके वेदे च तद्बुद्धिमात्रफलतैव तात्पर्य्यमित्यर्थः । अर्थवादादीनां स्वार्थप्रतीतिफलत्वेऽपि विधावेव तात्पर्य्याभ्युपगमात्तत्रातिव्याप्तिपरिहाराय मात्रेत्युक्तम् । एवं च तेषां तद्बुद्धिमात्रं न फलमपि तु विधिवाक्यार्थबुद्धिरिति न स्वार्थे तात्पर्य्यप्रसङ्ग इति भावः । महातात्पर्य्याभिप्रायं वा मात्रपदम् । बुद्ध्यन्तराशेषफलवद्बुद्धिफलकत्वं महातात्पर्य्यम् । प्रत्येकमङ्गप्रधानवाक्यार्थानामन्तरतात्पर्य्ये प्रसक्तिवारणाय बुद्ध्यन्तराशेषेति । अङ्गप्रधानवाक्यैकवाक्यरूपमहावाक्यस्यैव महातात्पर्य्यं तच्चोक्तरूपमेवेति नासंभवः । नन्वध्ययनविधेरर्थावबोधफलत्वाद्वेदस्यार्थावबोधशेषतैवार्थे तात्पर्य्यमिति जैमिनीयैराश्रितम्, एवं भवद्भिरपि तदेव किमिति नाङ्गीक्रियते इत्याशङ्क्याह । वेदान्तवादीति । वेदान्तप्रामाण्यवदनशीलानां सिद्धान्त इत्यर्थः । कुत इत्यत आह । शेषत्वमिति । अध्ययनस्येति शेषः । अक्षरकलापः अक्षरसमूहस्तदवाप्तिमात्रं प्रत्येवेत्यर्थः । अध्ययनविधेः स्वाध्यायावाप्तिमात्रफलतया तां प्रत्येव तस्य शेषत्वमिति न तद्बलाद्वेदस्यार्थावबोधशेषत्वमित्यर्थः । एवकारव्यवच्छेद्यमाह । नाध्ययनमिति ॥ ४६६ ॥

मू० ॥ तच्छेषभावमनपेक्ष्य च तत्फले स्या-
दाधानवद्धि तदङ्गमिह क्रतूनाम् ॥
आरभ्यकुप्तमेव हि तदिष्टमथापि तस्य
सर्वक्रतुप्रकृतिः फलमभ्युपेतम् ॥ ४६७ ॥

टी०॥ नन्वक्षराप्तेरपुरुषार्थत्वात्कथमध्ययनविधेस्तच्छेषत्वम्, न चा-वाप्तेभ्योऽक्षरेभ्योऽर्थावबोधो भवतीति वाच्यम्, तर्ह्यर्थावबोधशेषत्वमेवो-चितमिति चेन्न। पक्षवादिवत्परंपरया पुरुषार्थस्यापि भाव्यत्वसंभवेनाध्य-यनस्य तच्छेषत्वात्। वस्तुतोऽध्ययनस्यार्थावबोधः फलं तथाऽपि न तस्य तच्छेषत्वं मानाभावात् अर्थावबोधफलवादिनाप्यध्ययनस्य तथावगतं स्वाध्यायशेषत्वमपरित्यज्यैव तत्फलशेषत्वस्यैव वक्तव्यत्वात्तत्फलतायास्त-च्छेषत्वेनाव्याप्तत्वाच्चेत्याशयेनाह। तच्छेषभावमिति। तदर्थज्ञानं फल-मस्याध्ययनस्य तत्तत्फलम्। तत्फलस्यापि तदशेषत्वे उदाहरणमाह। आधा-नवदिति। अग्न्याधानवदित्यर्थः। दृष्टान्तं निषेधमुखेन विशदयति। न हीति। हिर्हेतौ। यदाधानं क्रतूनां दर्शपूर्णमासादियागानां यस्मादा-धानं न दर्शादिक्रतुप्रकरणे विहितमनारभ्याधीतत्वात्, नापि पर्णतान्यायः स्वतो व्यापाररूपत्वात् अग्निशेषत्वाच्च। तस्मात्तद्दर्शादेर्नोक्तं किन्त्वग्नीनि-ति श्रुत्या अग्नीनां शेषित्वावगमात्तदङ्गमेव तदिष्टम्। एवमपि तदधी-नाग्न्यायत्ता उत्तरक्रतूनां सिद्धिः साग्नीनुद्दिश्यैव दर्शादिविधानात्। चैवर्णि-कानां तेष्वधिकृतिश्च तत्फलं मीमांसकैरभ्युपेतमिति न तत्फलता तच्छेष-त्वनियता येनाध्ययनस्यापि तच्छेषत्वं भवेदिति भावः॥ ४६७॥

मू०॥ मन्त्रार्थवादगतमध्ययनं तदर्थ-
मात्रप्रतीतिफलमित्यपि नाभ्युपेतम्॥
विद्धार्थबुद्धिमनुसृत्य फलावसानां
या तद्गतीति तदतत्परतोपपत्तिः॥ ४६८॥

टी०॥ तद्बुद्धिमात्रफलतैवेति तात्पर्यलक्षणे मात्रचो व्यावर्त्यमर्थ-वादादीति यदवादिष्म तदर्थमर्थवादादेः स्वार्थे तात्पर्याभावं दर्शयति। मन्त्रार्थवादेति। इषेत्वेत्यादिर्मन्त्रः, वायुर्वै क्षेपिष्ठेत्यादिरर्थवादः, तद्विषय-कमध्ययनं तस्य मन्त्रादेः शब्दशक्त्या प्रतीयमानो योऽर्थः तन्मात्रे मन्त्रा-दिजन्या या प्रतीतिस्तदेव फलं यस्य तत्तथा नाभ्युपेतम्, मीमांसकादिभि-रितिशेषः। कुत इत्यत आह। विद्धार्थबुद्धिमिति। शाखाच्छेदवायव्यश्वेता-

स्तम्भनादिविध्यर्थबुद्धिं स्वतः फलावसानामनुसृत्य तद्द्वारेण सा मन्त्राद्यर्थप्रतीतिस्तद्वती फलवतीति यतोऽतस्तस्यार्थवादादेरतत्परता स्वार्थपरताभावस्तस्योपपत्तिरित्यर्थः । मन्त्रार्थवादाभ्यां यत्स्वार्थे ज्ञानं जन्यते तदेव तत्फलमिति केनापि नाभ्युपेयते येन तयोः स्वार्थपरता भवेत्किं तु मन्त्रस्यानुष्ठेयार्थस्मृतिद्वाराऽर्थवादस्य विधेयप्राशस्त्यधीद्वारा फलावसानत्वमिति तत्रैव तयोस्तात्पर्य्यमित्यस्वार्थपरतोपपद्यत इति भावः ॥ ४६८ ॥

मू० ॥ सप्रयोजनकबुद्धिकारणं
वाक्यमाहुरिह तत्परं बुधाः ॥
सप्रयोजनकबुद्धिशेषधी-
हेतुमन्यपरमाश्रयन्ति च ॥ ४६९ ॥

टी० ॥ नन्वर्थवादादेः स्वार्थप्रतीतिजनने किमिति सा प्रतीतिर्न तत्फलं तज्जन्यस्यैव तत्फलत्वादतस्तयोः स्वार्थेपि तात्पर्य्यं भवेदित्याशङ्क्याह । सप्रयोजनकेति । इह लोके वेदे च शब्दजन्या प्रतीतिर्यद्विषया सती समीहितपर्य्यवसायिनी भवति स शब्दस्तत्पर इति बुधा आहुरित्यर्थः । एवमतत्पराणामपि स्वरूपं बुधसंमतमाह । सप्रयोजनकबुद्धिशेषेति । अर्थवादार्थबुद्धिः प्रशस्तविधेयबुद्धिद्वारा फलवती भवति । एवं मन्त्रार्थधीरनुष्ठेयार्थस्मृतिद्वारा तथा, एवं च सप्रयोजनकबुद्धिं प्रति शेषभूता याऽर्थवादादिजन्या धीस्तद्धेतुं वाक्यमन्यपरं विधेयपरमेव बोऽवधारणे न स्वार्थपरमाश्रयन्तीत्यर्थः । यस्मिन्नर्थे वाक्यजन्यमपि ज्ञानं पुरुषार्थहेतुर्न भवति तद्वाक्यं तत्परं न भवति परं तु यमन्यमाश्रित्य फलपर्य्यवसायि स्यात्तत्परमेवेत्यर्थः ॥ ४६९ ॥

मू० ॥ मन्त्रार्थवादवचसामपि गोचरेषु
सावेष्ववान्तरमुशन्ति च तत्परत्वम् ॥
केचित्त्रयीशिरसि खिन्नधियो मुनीन्द्रा-
स्तद्बुद्धयो विधिषु शेषतया निवेशात् ॥ ४७० ॥

टी० ॥ एवं मीमांसकानां मते मन्त्रार्थवादादिमात्रस्य स्वार्थे तात्पर्या-
भावमुक्त्वा स्वमते मानान्तराविरुद्धतदसिद्धार्थवादादेः स्वार्थेऽवान्तर-
तात्पर्यमस्तीत्याह । मन्त्रार्थवादवचसामिति । देवताविग्रहादेः स्वर्गो-
देश्च प्रतिपादकमन्त्रार्थवादवचसामित्यर्थः । शेषेषु स्वीयेषु । अवान्तरं फल-
वद्बुद्धिशेषबुद्धिफलकत्वमवान्तरत्वम्, तत्परत्वं तात्पर्यं तच्च फलवद्बुद्धिफल-
कत्वमिति विभागः । उशन्ति अङ्गीकुर्वन्ति । के विद्युर्यासिकमतानुसारिणः ।
त्रयीशिरसि वेदान्ते । विशदधियः परिश्रमशालिनः । ननु किमिति तर्हि
मन्त्रादेर्विध्यर्थे तात्पर्यं कल्प्यते तदभावे च विधिना स्वैकवाक्यत्वादिति
न्यायविरोधस्तत्राह । तद्वदिति । स्वार्थवद्विधिष्वपि मन्त्रार्थवादवचसां
तत्परत्वमित्यनुषङ्गः । तत्र हेतुः धियः शेषतया निवेशादिति । मन्त्रादि-
जन्यतदर्थज्ञानस्य ध्यानाग्निहोत्रादिविधेयानुष्ठानशेषतया निवेशादि-
त्यर्थः । अत एव मन्त्राद्यर्थज्ञानं फलवद्भवेत् । अथ वा मन्त्रादेः स्वार्थे-
ऽवान्तरतात्पर्ये हेतुमाह । तद्धिय इति । मन्त्राद्यर्थविषयिण्या धिय
इत्यर्थः । तथा च मन्त्रार्थज्ञानस्यापि विधिद्वारा फलवत्त्वादुक्तं तत्र
तात्पर्यलक्षणमस्त्येवान्यद्वारा च तदिति विधिसमर्पणापेक्षया तदवान्तरं
चेत्यर्थः । तद्वदिति पाठे तद्धियो देवताविग्रहस्वर्गादिधिय इत्यर्थः ।
देवताधिकरणे देवतानामपि ब्रह्मविद्याधिकारव्यवस्थापनमपि मन्त्रार्थ-
वादप्रतीतविग्रहादिमत्त्वं बादरायणादिभिराश्रितमिति मन्त्रादेः स्वार्थे-
ऽवान्तरतात्पर्यं तत्संमतम्, परमतात्पर्यं तु मन्त्रादिजन्यतदर्थज्ञानस्य
विध्यर्थे शेषतया प्रवेशात्तत्रैवेति भावः ॥ ४७० ॥

मू० ॥ श्रेयःसाधनता लिङर्थ इति च प्रागुक्तमत्यादरा-
च्छ्रेयःसाधनयागदानहवनाद्यर्थैकनिष्ठं ततः ॥
सर्वं कर्मवचो नियोगपरता तस्यापि नालोचने
वक्तव्या किमुतास्य वेदशिरसः सा नेति भूयोऽपि नः ॥४७१॥

टी० ॥ एवं वेदान्तानां सिद्धे ब्रह्मणि तात्पर्यमुक्तं तात्पर्यं च
शब्दस्य स्वाभिमतं निरूपितमिदानीं वेदस्य सिद्धार्थनिष्ठत्वे जैमिनीय-

Digitized by Google

वचनविरोधं परिहर्तुं प्रागुक्तमर्थमनुवदति। श्रेयःसाधनतेति। न इत्यादी द्रष्टव्यम्। अत्यादराध्यायपूर्वम्। ततः किं तत्राह। श्रेयःसाधनयागेति। ततः श्रेयःसाधनतायाः लिङर्थत्वव्युत्पादनात्सर्वं हि कर्मवाक्यं लिङा-द्यर्थनिष्ठं लिङादेश्च श्रेयःसाधनमर्थ इत्युक्तमेवं च सर्वं कर्मवचः श्रेयः-साधनयागाद्यर्थनिष्ठमेवमवश्यमभ्युपेयमित्यर्थः। एकेति नियोगनिष्ठता-निराकरणं कृतं सूचयति। ततश्च नः अस्मान्प्रति भूयः पुनरपि तस्य कर्मवचसोऽप्यर्यालोचने नियोगपरता न वक्तव्या न शङ्कितुं युक्ता अस्य वेदशिरसः सा नियोगपरता न वक्तव्येति किमुतेति संबन्धः॥ ४७१॥

मू॰। श्रेयःसाधनयागदानहवनाद्यर्थेषु काऱ्यात्मसु
सर्वं कर्मवचः प्रमाणमिति तु ग्राह्यं वचो जैमिनेः।
भाष्यं पश्यत शाबरं स्फुटतरं यो यागमित्यादिकं
श्रेयःसाधनयागमात्रवचनं धर्माभिधानं वदत्॥ ४७२॥

टी॰। नन्वाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामित्यादिसूत्रैः सिद्धार्थस्यापि वेदस्य जैमिनिर्नियोगनिष्ठत्वमवोचत्तत्कथं वेदस्य तदर्थ-ताशङ्का न कर्तव्या, कथं वा वेदान्तानां सिद्धार्थत्वमित्याशङ्क्य, जैमिनेरा-म्नायशब्दः कर्मभागमात्रपरस्तदर्थस्यैवाथातो धर्मजिज्ञासेति विचार्यतया तदुपक्रमात्तत्रापि तदभिमता क्रिया श्रेयःसाधनं यागादिरेव तदन्यस्या-संभवादित्याशयेनाह। श्रेयःसाधनेति। काऱ्यात्मसु कृतिसाध्यस्वभावेषु। सर्वं कर्मवच इति सूत्रस्याम्नायशब्दार्थ उक्तः। तु शब्दोऽवधारणे। सर्वं कर्मवाक्यं श्रेयःसाधनयागादिकार्येषु प्रमाणमित्येतावत्येवार्थे जैमिनेर्वचो ग्राह्यं न तु सर्वः स्वाध्यायो नियोगे प्रमाणमिति तत्सूत्रार्थो ग्राह्य इत्यर्थः। ननु किंबलादेवं तत्सूत्रं व्याख्यायत इत्याशङ्क्य जैमिनिनोक्तचोदनाप्रमेय-धर्मस्य तद्भाष्यकारेण यागादिरूपस्याभिधानबलादित्याशयेनाह। भाष्यं पश्यतेति। स्फुटतरं स्पष्टार्थम्। भाष्यमेवाह। यो यागमिति। यो यागमनुतिष्ठति तं धार्मिकमित्याचक्षत इत्येवंरूपम्। नन्वत्र धार्मिकमिति यागकर्तुर्नियोगनिष्ठत्वमेवोच्यते धर्मशब्दस्य नियोगात्मापूर्ववचनत्वादि-

त्याशङ्क्याह । श्रेयःसाधनयागमात्रेति । धर्म इति शब्दः श्रेयःसाधनया-गमात्रस्य वचनमिति वदच्छाबरं भाष्यमिति संबन्धः । यागानुष्ठातुर्धर्मि-त्वकथनाद्यागमेव भाष्यकारो धर्म इति वदतीति भावः ॥ ४७२ ॥

मू० ॥ पुल्लिङ्गताऽपि घटते क्रतुवाचिनोऽस्य
सूक्ष्मात्मना भवति हि क्रतुरप्यपूर्वम् ॥
तेन क्रतोरुपचरन्नभिदां पुमान्स्या-
त्क्लीबस्तु धर्ममिति हि क्रतुवाचकत्वे ॥ ४७३ ॥

टी० ॥ ननु चोदनालक्षणोऽर्थो धर्म्म इति पुल्लिङ्गो धर्मशब्दो जैमि-निना प्रयुक्तः स चापूर्ववचन एव पुल्लिङ्गधर्मशब्दस्य तदेतत्त्वचस्य चत्वं यज्ञुमे इत्यादिवेत्रे तत्रैव प्रयोगात् अतो भाष्यं तदनुसारेणैव नेतव्यम्, यद्यपि क्रतावपि धर्मशब्दोऽस्ति तथापि स नपुंसक एव । तानि धर्माणीति तस्यैव तत्र श्रुतौ दर्शनादित्याशङ्क्याह । पुल्लिङ्गतापीति भाष्यकारो-त्त्यैव सूत्रार्थस्य प्रत्येतव्यत्वादेतद्भाष्यबलात्पुल्लिङ्ग एव धर्मशब्दोऽपूर्व-वाची तत्तादात्म्यात्क्रतावुपचरितो जैमिनिनेत्यपूर्वस्य क्रतुसूक्ष्मरूपत्वेन हेतुना क्रतोरपूर्वणाभिदामभेदमुपचरन्पुमान्पुल्लिङ्गः स्याद्धर्मशब्द इति शेषः । क्रतुवाचकत्वे तु विवक्षिते धर्ममिति क्लीबः स्याच्च त्वौपचारिकप्रयोगेऽपि, अतः सूत्रकारस्य पुल्लिङ्गधर्मशब्दप्रयोगोऽपि तस्य नियोगाश्रयं न सूचय-तीति भावः ॥ ४७३ ॥

मू० ॥ इष्टाभ्युपायवचनो लिङिति स्थितो च
स्याद्भावनावचनताऽस्य यदा तदा च ॥
कर्त्तुर्भवेदधिकृतिस्तु नियोगवादे
स्वाम्ये स्थिते सति भवेदथ कर्त्तृभावः ॥ ४७४ ॥

टी० ॥ ननु सूत्रकारेणैव षष्ठाद्ये स्वर्गकामपदस्य नियोज्यपरत्वं वदता प्रत्ययार्थो नियोगोऽभ्युपेतो नियोगकार्य्यताबोद्धुरेव नियोज्यत्वेन तेन विना व्युत्पादनायोगादित्याशङ्क्य सत्यं प्राभाकरैरेवं तदधिकार-स्यार्थे उक्तः स न तथाऽधिकारित्वव्युत्पादनस्यैव स्वर्गकामपदस्य कत-

परत्वव्युत्पादनेन तत्र विवक्षितत्वात् । नन्वधिकारित्वमेव स्वर्गकामस्य नियोज्यत्वपूर्वकमिति चेत्सत्यं नियोगवादे तथैव श्रेयःसाधनस्य वाक्या- र्थत्वादेतस्य कर्त्रन्वयपूर्वक एव तदन्वय इत्याशयेनाह । इष्टाभ्युपा- येति । स्थितौ मते । प्रधानपदार्थाकाङ्क्षानुसारेण पदान्तराणामर्थबोधकत्वं वाच्यम् । लिङाद्यर्थः श्रेयःसाधनं च प्रधानं स च धात्वर्थः कर्तृव्यापारात्म- क्रियारूपः क्रिया च कर्तारं प्रथममपेक्षत इति क्रियाक्षिप्तं कर्तारं स्वर्ग- कामपदं विशिनष्टीति प्रथमं स्वर्गकामः कर्तृत्वेनान्वयं प्राप्य पश्चाच्छ्रे- यसो भोक्त्रपेक्षायां स एव स्वर्गकामः स्वाभिलषितस्वर्गसाधने धात्वर्थे मदर्थमिदं कर्मेत्यवगच्छन्नधिकारित्वमपि प्रतिपद्यते तदिदमाह । कर्तुर्भे- वेदधिकृतिरिति । किं च जैमिनीयमताभियुक्तैर्भट्टैरप्येवमाश्रितत्वात्त- स्यापि तदेव संमतमित्याशयेनाह । स्याद्भावनेति । अस्य लिङादेर्भावनाया- मपि क्रियारूपत्वेनोक्तरूपेणैव स्वर्गकामोऽन्वेतीति भावः । तर्हि नियोगवादे कथं तदन्वयवैलक्षण्यमित्याशङ्क्याह । नियोग इति । तत्र हि नियोगा- काङ्क्षयैव स्वर्गकामस्यान्वय इति ममायं नियोग इति स्वामित्वं प्रतिप- द्यैव तद्विषये यागेऽपि नियोगबलादधिकारान्वयं तत्पूर्वकं कर्तृत्वं च प्राप्नोतीति तत्र वैपरीत्यमिति भावः । स्वाम्ये स्वर्गकामस्येति शेषः । यथानन्तरम् ॥ ४७४ ॥

मू० ॥ इष्टाभ्युपायो विधिरात्मनीच्छा-
मुत्पादयन्प्रेरकतामुपैति ॥
इष्टाभ्युपायेऽवगते लिङादे-
रिच्छाफलादेनमुपेति सद्यः ॥ ४७५ ॥

टी० ॥ ननु नियोगानङ्गीकारे कथं स्वर्गकामस्य यागे प्रवृत्तिः स हि तत्प्रेरित एव प्रवर्तेत इत्याशङ्क्य पुरुषार्थकामनाप्रयुक्ता हि तत्प्रवृत्तिः पुरुषार्थस्य श्रेयःसाधनं यागादिरतस्तदधीनचिकीर्षयैव स प्रवर्तते न तु नियोगेनापुरुषार्थेनेत्याशयेनाह । इष्टाभ्युपाय इति । विधीयत इति विधिः । आत्मनि स्वस्मिन्यागादेः श्रेयःसाधनत्वेन लिङादिनावगमा-

तच्चिकीर्षा भवति ततः प्रवर्तेत इत्यर्थः । ननु यागादेः क्लेशात्मकत्वा-त्कथं नियोगं विना स्वतन्त्रस्य तत्प्रेच्छा भवेदित्याशङ्क्य स्वर्गादेः स्वत इष्ट-त्वात्तस्य साधनानुष्ठानमन्तरेण सिद्धेः तत्साधनतया लिङादिनावगते यागादौ तत्फलेच्छा तच्चिकीर्षा भवतीति नोक्तदोष इत्याशयेनाह । इष्टा-भ्युपायेऽवगत इति । लिङादेः शब्दाद्विष्टाभ्युपायेऽवगत इति संबन्धः । फलात्फलेच्छानन्तरमेव तत्साधनतयाऽवगते चिकीर्षा भवतीति फलादित्यु-क्तम् । एवं धात्वर्थमिच्छा सद्यस्तत्क्षणमेव नियोगनिमित्तमनपेक्ष्य उपैति तच्चेच्छा भवेदित्यर्थः । फलेच्छा साधनेच्छाहेतुः साधनेच्छा च प्रवृत्तिहेतुः सा च साधनज्ञानाधीनेति न नियोगः प्रवृत्तावुपयुज्यत इति भावः ॥ ४७५ ॥

मू० ॥ नियोगकोट्यापि नरो न कश्चि-

दिच्छां विना दुःखनिदानभूतम् ॥

करोति कर्मेह पुमर्थरागा-

त्प्रवृत्तिरेवेति हि राजमार्गः ॥ ४७६ ॥

टी० ॥ एवं स्वपक्षे यागादौ स्वतन्त्रचेतनप्रवृत्तिमुपपाद्य नियोग-वादे तदसंभवमाह । नियोगकोट्यापीति । अनेकनियोगैरित्यर्थः । नरः स्वतन्त्रः स्वर्गकामादिः स्वतः क्लेशात्मके यागादौ स्वाभिलषितस्वर्गसा-धने इच्छासंभवात्स्वतन्त्रस्तत्र करोतीत्यर्थः । इह जगति । स्वमते प्रागुक्त-रीत्या यागादौ प्रवृत्तौ लोकानुसारमाह । पुमर्थ इति । भोजनादिव्यापारे दुःखसाधनेऽपि पुमर्थसाधनतयाऽवगते इच्छया लोकप्रवृत्तिरस्त्येवेति राज-मार्गः सर्वदोषरहितः प्रसिद्धः पन्थाः, निर्दुष्टोऽयमुपाय इत्यर्थः ॥ ४७६ ॥

मू० ॥ इष्टाभ्युपाययस्यां च कार्यभावः

अन्वयव्यतिरेकावगतयोर्यतः ॥

स चावसेयो वचनाल्लिङादेः

प्रत्यक्षतो रागनिबन्धनस्तु ॥ ४७७ ॥

(शोधमये)

॥ अथ चित्सुखी ॥

॥ तत्र चतुर्थपरिच्छेदावशेषः ॥

(Continued from page 392. Vol. VI.)

न च तेषामप्यज्ञतया भानात् ताः कल्प्या इति वाच्यम्, अद्वैतवादिमतसिद्धभेदभानस्य प्रामाणिकत्वाभावात्, अप्रामाणिकस्य चैकाविद्ययैव सिद्धेर्नान्यस्या अविद्याः कल्पनीयाः ।

किंच यथान्तरैवार्थान्तराण्यविद्यान्तरं च स्वप्ने चराचरं जगत् त्वदविद्ययैव ते भाति तथा जाग्रत्यपि किं न भायात् ।

अपिच उत्पन्नविद्यस्यात्मान्तरमोहस्तत्कार्याणि भान्ति नवा, आद्ये निवृत्ताविद्यस्यापि भेदभानेन भूमलक्षणब्रह्माप्राप्तिः, द्वितीये तु शिष्याद्यभानाद् गुरोरुपदेशादिक्रिया न भवेत् ।

किंचैकस्य मोहो मोहान्तराणां तत्कार्याणां च भानहेतुरुत कल्पकः ।

नाद्यः, मोहस्य प्रकाशरूपत्वाभावात् ।

न द्वितीयः, त्वन्मोहकल्पितस्य संप्रतिपन्नत्वन्मोहकल्पितवदन्यमोहत्वतत्कार्यत्वानुपपत्तेः ।

न चान्यमोहकल्प्यत्वम्, क्लृप्तत्वात् ।

न च त्वत्कल्पितस्यान्यमोहस्यान्यमोहकल्पकत्वम्, कल्पितत्वात्, रजतादिवन्मोहान्तरतत्कार्याणां चान्यदृश्यत्वे संप्रतिपन्नवत् तन्मोहत्वं तत्कार्यत्वं च स्यात्, अन्यमोहतत्कार्याणां चान्यदृश्यत्वस्यासंप्रतिपन्नत्वात्, स्वमोहकार्याणां च स्वदृश्यत्वस्योभयवादिसिद्धत्वात् ।

न चेन्द्रजालादेर्बहुमोहकल्पितस्य बहुद्रष्टृकस्यैकस्य प्रसिद्धत्वाद् दृष्टान्तासिद्धिः, तत्तन्मोहकल्पितस्य तत्तद्दृष्टस्य च भिन्नत्वात्, तदेव मया दृष्टं मयादृष्टमिति संवादस्य चैकरूपभ्रमोत्पादात् तन्निमित्तहर्षशोकादिकार्याणामेकरूपत्वाच्चोपपत्तेः, एकदृष्टोत्पातिकसवित्सुख्यादावन्येषां विसंवादादेकमोहकल्पितत्वस्य सिद्धेः, एकस्यैव प्रपञ्चस्य बहुमोहकल्पितत्वे चैकस्य धिया तन्नाशे सर्वमुक्तिः, अनाशेऽप्येकस्याप्यमुक्तिः ।

न चैकमेव पुरुषभेदेन नष्टमनष्टं चेति युक्तम्, विरोधात्, अविरोधे वा तमेव प्रति युगपदेकमेव नष्टमनष्टं च स्यात्, द्विचन्द्रादेश्च युगपन्नष्टानष्टत्वस्यासंप्रतिपन्नत्वात्, भ्रान्तपुरुषभेदेन तस्यापि भेदात् ।

तस्मान्नाविद्याभेदो नापि तद्भेदाज्जीवभेदसिद्धिरिति स्थितम् ।

अत्रोच्यते, यस्तावदेकैवाविद्येति पक्षे दोषः सोऽनभ्युपगमादेव परास्तः, अस्माभिः एवैकस्य तत्तदनाद्यनन्ताविद्यावच्छेदेनानन्तजीवनिर्भासास्पदत्वाभ्युपगमात्, सति च कल्पके कल्पनागौरवस्यादोषत्वात्, एकस्यापि च जीवस्यानेकाविद्यासद्भावाभ्युपगमात्, इष्टसिद्धिकारैरपि यावन्ति ज्ञानानि तावन्त्यज्ञानानीत्यनेकाविद्यास्वीकारात् ।

नन्वपारमार्थिकत्वे भेदभानस्यैकाविद्ययैव तत्सिद्धेरविद्यान्तरकल्पना व्यर्था, न व्यर्था, विद्वदविद्वद्गुरुशिष्यबन्धमोक्षादिव्यवस्थासिद्धेरेव प्रयोजनत्वात् ।

एकाविद्यापक्षेऽपि स्वप्न इव व्यवस्था सिध्यत्येवेति चेत्, तत् किं स्वप्नकल्पिकैवाविद्या जाग्रद्व्यवहारकल्पिका उतान्या, आद्ये प्रबोधे स्वप्नकल्पकाविद्यानिवृत्तौ जाग्रद्व्यवहारोऽपि सर्वो निवर्ततेति विनैव ब्रह्मविद्यां मुक्तिः स्यात्, अनिवृत्तौ वाऽविद्यायास्तत्त्वज्ञानात् तन्निवृत्तौ दृष्टान्ताभावाद्ब्रह्मज्ञानादज्ञाननिवृत्तिर्न सिध्येत् ।

ननु तत्त्वावभासविरोधिनोरग्रहणमिथ्याज्ञानयोः शुक्त्यादितत्त्वज्ञानान्निवृत्तेर्दृष्टत्वाद्ब्रह्मतत्त्वावभासविरोधिनोऽज्ञानस्य ब्रह्मतत्त्वज्ञानान्निवृत्तिरवगन्तुं शक्यत इति चेत्, किमिदमनुमानमाहोस्विदर्थापत्तिरथवा दृष्टान्तदर्शनात् संभावनामात्रम् ।

आद्ये तेनैवाज्ञानेनानैकान्तता, प्रबोधेऽपि तस्य निवृत्त्यनभ्युपगमात् ।

न द्वितीयः, ज्ञाननिवर्त्यत्वमन्तरेणैव तत्त्वावभासविरोधित्वस्य स्वप्नाविद्यावदुपपत्तेः ।

न तृतीयः, स्वप्नाविद्यावद्वैपरीत्यस्यापि संभवात् ।

आद्ये श्रुतिप्रामाण्यात् ज्ञानादज्ञाननिवृत्त्यध्यवसायः, तर्हि "भूयश्चान्ते विश्वमाये"त्यादिश्रुतिप्रामाण्यादनेकान्यज्ञानानि तन्निवृत्तयश्च क्रमेणेति स्वीक्रियन्ताम् ।

द्वितीये तु तत्राप्यनेकाविद्याकल्पनादोषस्तदवस्थः ।

कार्यभेददर्शनस्य तत्तत्कल्पकस्य भावाददोष इति चेत्, तत् किं भेददर्शनं पारमार्थिकमुत न ।

आद्ये विरोधाच्च कल्पनासिद्धिः ।

द्वितीये त्वेकयैव तत्सिद्ध्यर्थानेकाविद्याकल्पनेति त्वदुक्ता दोषास्त्वामेवोपहन्युः ।

कल्पितत्वाविशेषेऽपि किंचिद्व्यावहारिकं यद्ब्रह्मात्मभावादिनिश्चितैकात्मसाक्षात्कारपर्यन्तमनुवर्तते किंचित् प्रातिभासिकं यत् प्रमातृत्वादिव्यवहारे सत्येव निवर्तत इत्यवान्तरभेदसिद्धयेऽविद्याभेदः कल्पनीय इति चेत् । तर्हि ।

अविद्या कल्प्यते नैका जाग्रत्स्वप्नविभेदिनी ।
यथा तथैव कल्प्यन्तामनन्ताः सति कल्पके ॥ ६ ॥

ममापि मुक्तामुक्तादिरूपेण व्यावहारिकानन्तजीवानां शुकवामदेवपाराशरप्रभृतीनां प्रतिभासनात् तदुपपत्तये तत्तद्धेतुभूतानेकाविद्याभ्युपगमेऽपि न दोषः ।

न चाद्वैतवादिनो भानतस्तेषामभानाद् भ्रान्तिसिद्धानां चैकयैवाविद्यया सिद्धेर्नानन्ताविद्याकल्पना युक्तेति वाच्यम्, विकल्पासहत्वात् ।

तत् किं तत्त्वावेदकभानस्यागम्यत्वमुत व्यावहारिकस्य ।

न प्रथमः, जाग्रत्स्वप्नव्यवहारभेदस्यापि तथात्वेन तत्राप्यविद्याभेदस्यासिद्धेः ।

न चरमः, जीवभेदानामनुमानादिव्यावहारिकभानसिद्धत्वस्येष्टत्वात्, एतेन स्वप्ननिदर्शनेनैकाविद्ययैवालमिति प्रत्यवस्थानं परास्तम् ।

यच्चोत्पन्नविद्यस्याविद्यान्तरतत्कार्याणां भानाभानयोर्दोषा उक्ता-

चितः स परस्यापि तुल्यः, तन्मते विदुषो द्वैतभाने भूमलक्षणब्रह्मप्राप्त्यभावप्रसङ्गात्, अभावे च "यावदधिकारमवस्थितिराधिकारिकाणां" "भोगेन त्वितरे क्षपयित्वा संपद्यन्ते" इति सूत्रविरोधात्, अविद्यालेशस्वीकारवैयर्थ्यप्रसङ्गाच्च ।

न चाविद्यान्तराणां तत्कार्याणां च तदविद्यात्वं तत्कल्पितत्वं वान्तरेणैव तस्य भानानुपपत्तिः, त्वदभ्युपगताविद्यान्तरतत्कार्ययोरपि पर्यनुयोगसाम्यात्, स्वप्नाविद्यातत्कार्याणां जाग्रदविद्यात्वं तत्कार्यत्वं वान्तरेण भानाभ्युपगमात् ।

यच्चाविद्यान्तरतत्कार्याणामन्यदृश्यत्वे संप्रतिपन्नवत् तदविद्यात्वं तत्कार्यत्वं च स्यादिति, तदपि जाग्रत्स्वप्नकल्पकाविद्याभेदेनैव व्याख्यातम्, एकपुरुषसंबन्धित्वेऽपि परस्परं भेदात्, अस्माभिरप्यविद्यानामेकब्रह्मसंबन्धित्वाभ्युपगमाच्च, इन्द्रजालादिनिदर्शनं च पूर्वोक्तन्यायेन परास्तम्, परकल्पितस्य परं प्रत्यपरोक्षत्वाभावेऽपि परोक्षतावभाससंभवस्योक्तत्वात्, एतेन सवितृसुषिनिदर्शनमपि परास्तम्, तत्रापि तद्वचनात् परोक्षत्वोपपत्तेः ।

तथापि गुरुशिष्ययोः परस्परमपरोक्षत्वाभावे कथमुपदेशः क्रियत इति चेत्, मैवम्, भूतभौतिकप्रपञ्चस्य कृत्स्नस्येश्वरमायाविनिर्मितत्वेऽपि सर्वापरोक्षत्वोपपत्तेः, "यतो वा इमानि भूतानी"ति "अहं कृत्स्नस्य जगतः प्रभवः" "जन्माद्यस्य यत" इति श्रुतिस्मृतिसूत्रभाष्यादिभिरस्यार्थस्य प्रतिपादितत्वात्, अन्यथा शुक्तिरजतादिवज्जीवाविद्यामात्रनिर्मितत्वेऽपि जगतो जीवादिकर्तृकत्वनिरासप्रयासवैयर्थ्यात्, जीवाविद्याकल्पितत्वे चेश्वरस्य जीवानामीश्वरो नियन्तेत्यादिश्रुतिस्मृतीनामप्रामाण्यप्रसङ्गात्, एकस्य प्रपञ्चस्य बहुमोहकल्पितत्वानङ्गीकारादेव तत्रोक्तदोषाणां दूरपरास्तत्वात्, स्वीयस्वीयविद्यया च स्वस्वाविद्याविनिर्मितकर्तृत्वभोक्तृत्वादेर्बन्धस्य सकारणस्य निरासेन नित्यशुद्धबुद्धमुक्तस्वभावात्मब्रह्मप्राप्तिलक्षणमुक्तेरप्युपपत्तेः ।

ननु स्वस्वाविद्येति कथं जीवनिष्ठत्वेनाविद्या व्यपदिश्यते ब्रह्माश्रयत्वादविद्यानामिति चेत्, सत्यम्, ब्रह्मसंबन्धित्वेऽपि तासामवच्छिन्नजीवरूपपक्षपातितया प्रतिभानात्, दृष्टं हि लोके मुखमात्रसंबन्धिनोऽपि दर्पणस्य प्रतिबिम्बपक्षपातित्वम्, दृश्यते च घटस्याकाशमात्रसंबन्धिनोऽप्यवच्छिन्नाकाशपक्षपातित्वम्, तस्मान्न किंचिदवद्यमिति ।

अपि च सूत्रभाष्यादिवाक्यानां श्रुतिस्मृतिगिरामपि मुख्यार्थत्वोपपत्त्यै व्यवस्थैवाभ्युपेयताम्, एवं च सति "नेतरोऽनुपपत्तेस्तु", "न शारीरः कर्मकर्तृव्यपदेशात्", "परात् तु तच्छ्रुतेः", "कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः", "यावदधिकारमवस्थितिराधिकारिकाणाम्" "पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ", "प्रकाशादिवच्चैवं परः", "असंततेश्चाव्यतिकर" इत्येवमादीनि सूत्राणि तद्व्याख्यानपराणि च भाष्याणि च सामञ्जस्येनोपपन्नार्थानि भवन्ति, "तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत् तथा ऋषीणां तथा मनुष्याणाम्", "तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च" तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः "अभयं वै जनक प्राप्तोऽसि एतावदरे खल्वमृतत्व"मिति होक्त्वा याज्ञवल्क्यः प्रवव्राज "तद्धास्य विजज्ञौ" "एकशतं ह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्यमुवास भृगुर्वै वारुणिर्वरुणं पितरमुपससार स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राहे"त्येवमादिश्रुतिस्मृतीतिहासपुराणवाक्यानि च मुख्यार्थे प्रामाण्यमश्नुवीरन्, तस्मादेकमपि ब्रह्मानेकोपाधिभिरवच्छिन्नं लब्धनानाजीवभावं तत्र बद्धमिव यत्र यत्र विद्यया अविद्योपाधिनिवृत्तिस्तत्र तत्र मुक्तमिव भवतीति नानाजीववादेऽपि बन्धमुक्तिव्यवस्थोपपद्यत इति केचिदाचार्याः प्रतिपेदिरे ।

का पुनरविद्यानिवृत्तिः ।

न तावत् सती, आत्मव्यतिरिक्तत्वे तस्याः सद्वैततापत्तेः, अव्यतिरेके चात्ममात्रत्वे सदा निवृत्तेः संसारानुपलब्धिप्रसङ्गात्, तन्मात्रत्वे चात्मनस्तत्त्वज्ञानजन्यतया पूर्वमभावात्, अज्ञानस्य स्वातन्त्र्यप्रसङ्गात् ।

नाप्यसती, तुच्छत्वे शशविषाणादिवज्ज्ञानाधीनत्वासंभवात्, अभावत्वे च तस्य निर्वाच्यत्वे द्वैतापातात्, अनिर्वाच्यत्वे च तत्कारणाविद्यावस्थानादनिर्मोक्षप्रसङ्गात्, भावस्याभावो निवृत्तिरभावस्य च भावः, भावाभावविलक्षणस्याज्ञानस्य कथमभावो निवृत्तिः स्यात्, नाप्यनिर्वचनीया, अविद्यातत्कार्ययोरन्यतरत्वापातात् ।

न चाविद्यातत्कार्ययोरन्यतरत्वे निवृत्तिमत्त्वमुपाधिः, अनिर्वचनीयत्वेन निवृत्तिमत्त्वस्यापि साधनात् ।

न च निवृत्तेर्निवृत्तिमत्त्वेऽनवस्था, निवृत्तिमत्प्रध्वंसपक्षे प्रध्वंसमात्रावदुपपत्तेः, प्रध्वंसप्रध्वंस इव प्रतियोगिनो बन्धस्यानुन्मज्जनादेवापुनरावृत्तिश्रुतेरप्यव्याकोपात्, तस्मादनिर्वचनीयत्वेऽविद्यातत्कार्ययोरन्यतरत्वं प्रसज्यत एव ।

नापि पञ्चमप्रकारा, सदसद्विलक्षणतया तस्या अप्यनिर्वचनीयत्वप्रसङ्गात्, सदसद्विलक्षणमनिर्वचनीयमिति लक्षणाङ्गीकारात् ।

ननु नेदं लक्षणम्, किंतु ज्ञाननिवर्त्यमनिर्वचनीयम् ।

न चाज्ञाननिवृत्तिर्ज्ञाननिवर्त्या, ज्ञानजन्यत्वात्, ज्ञानानिवर्त्यापि च सा बाधगोचरा, अतो न प्रपञ्चमिथ्यात्वसाधनं सव्यभिचारम्,

"नेह नानास्ति किंचने"ति हि प्रतिपन्नोपाधौ निषेधात्मबाधोऽज्ञाननिवृत्तेरपि तुल्य इति चेत्, मैवम्, अज्ञाननिवृत्तेर्ब्रह्मज्ञानरूपतया तज्जन्यत्वाभावात्, ज्ञातोऽर्थस्तज्ज्ञप्तिर्वा ज्ञानहानिरितीष्टसिद्धिकारैरभिधानात्, विद्यैव चाद्वया शान्ता तदस्तमय उच्यत इति ब्रह्मसिद्धिकारैरप्युक्तत्वात्, ज्ञानजन्ये संस्कारे च ज्ञाननिवर्त्ये व्यभिचारात् ।

ननु तत्र ज्ञानान्तरेण ज्ञानान्तरजन्यसंस्कारो निवर्तते न तु तेनैवेति वैषम्यमिति चेत्, मैवम्, ईश्वरज्ञानजन्यस्य जगतस्तज्ज्ञानेनैव निवर्त्यत्वाङ्गीकारात्, उत्पाद्य घटं नाशयिष्यामीत्यभिसंधानस्थले कुलालज्ञानजन्यघटस्य तेनैव ज्ञानेन निवर्त्यत्वदर्शनाच्च, अज्ञाननिवृत्तेश्च ज्ञानानिवर्त्यत्वे प्रपञ्चमिथ्यात्वसाधनस्य तत्र व्यभिचारात् ।

Digitized by Google

ज्ञानानिवर्त्यत्वेऽपि बाध्यत्वाच्च व्यभिचार इति चेत्, न, ज्ञाननिवर्त्यत्वमन्तरेण बाध्यत्वस्यानिरूपणात्, सविलासाज्ञाननिवृत्तिबाधत्वाङ्गीकरणात् ।

नाप्यात्मैवाज्ञाननिवृत्तिः, आत्मनः सदातनत्वेनाज्ञाननिवृत्तेरपि तथात्वे संसाराभावप्रसङ्गात्, आत्मनस्तत्त्वज्ञानसाध्यत्वप्रसङ्गाच्च ।

ज्ञात आत्मा अज्ञाननिवृत्तिर्न स्वरूपेणैवेति चेत्, न, ज्ञानस्य विशेषणत्वे नित्यत्वे च मोक्षदशायामप्यन्तःकरणादेरवस्थानप्रसङ्गात्, अनित्यत्वे चाज्ञाननिवृत्तिरूपाया मुक्तेरप्यनित्यत्वापातात् ।

न च ज्ञानोपलक्षित एवात्मा अज्ञाननिवृत्तिः, उपलक्षितत्वस्य नित्यत्वानित्यत्वयोः प्राचीनदोषानुषङ्गात्, तस्माचाज्ञाननिवृत्तिरुपपद्यत इति ।

अत्रोच्यते ।

निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः ।
उपलक्षणनाशेऽपि स्यान्मुक्तिः पाचकादिवत् ॥ ७ ॥

यथा लोके सकारणस्य कलधौतविभ्रमस्य ज्ञाता शुक्तिरेव निवृत्तिः, न च तत्रापि नेदं रजतमित्यन्योन्याभावज्ञानं तन्निवर्तकमिति युक्तम्, अपरिज्ञाते शुक्तिशकले धर्मिप्रतियोगिसव्यपेक्षस्य तस्यैवासंभवात्, परिज्ञाते तु तेनैव तदुपपत्ताविरस्य कल्पकस्य वैयर्थ्यात्, इदमाकारपरिज्ञानस्य च भ्रान्तौ विद्यमानस्य तदविरोधात्, तथेहाप्यनृतजडदुःखानात्मद्वैतविरोधिसत्यज्ञानानन्दानन्ताद्वयलक्षणं ब्रह्मैव वेदान्तवाक्यजनितब्रह्मैकाकारान्तःकरणपरिणामदर्पणप्रतिबिम्बितं सविलासाज्ञाननिवृत्तिरिति युक्तमभ्युपगन्तुम् ।

न च ज्ञाततालक्षणोपलक्षणनाशे तेन घटितस्य मुक्तस्याभावप्रसङ्गः, पाचकादिवदवस्थानोपपत्तेः, नहि लोके पचनलवनादिक्रियायामनिवृत्तायां देवदत्तः पाचको लावको वा न भवति, न वा तथा व्यवह्रियते, एतेनाज्ञाननिवृत्तेऽनित्यत्वे पुनरज्ञानस्य संसारस्य चोन्मज्जनापत्तिरित्यादयो दोषाः प्रत्युदस्ताः, शुक्तिशकलादौ ज्ञाननाशेन ज्ञातत्वोपलक्षणनाशेऽपि

निवृत्तस्याज्ञानस्य तद्विलासस्य वा पुनरुन्मज्जनादर्शनात्, पुनरुद्भवतो रज्ज्वादिविभ्रमस्याज्ञानान्तराधीनत्वात्, यावन्ति ज्ञानानि तावन्ति संनिवर्त्यान्यज्ञानानीत्यभ्युपगमात्, इह च "भूयश्चान्ते विश्वमायानिवृत्ति"रिति श्रुतेरशेषाज्ञाननिरासात् पुनः संसारशङ्कातङ्कानवकाशात् ।

तस्मात्,

विगीताज्ञानहानिः स्याज्ज्ञानाधिष्ठानमात्रकम् ।
तत्त्वाद्यदित्थं तन्न तादृग्यथा शुक्त्यादिकं मितम् ॥ ८ ॥

एवं सति "यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः", "यत्र त्वस्य सर्वमात्मैवाभू"दित्याद्याः श्रुतयः सर्वस्य द्वैतजातस्यात्ममात्रतया प्रविलयमुपपादयन्त्यो मुख्यार्थतामश्नुवीरन्, इतरथाऽनिर्वचनीयस्य पञ्चमप्रकारस्य वा अज्ञाननिवृत्तिरूपस्याङ्गीकारे संसारदशायामिव केवलात्ममात्ररूपेणावस्थानासंभवादुदाहृताः श्रुतय उपचरितार्थाऽक्षर्दर्थिताः स्युः, तस्मादुत्पन्नात्मविज्ञानस्य ज्ञात आत्मैव सविलासाज्ञाननिवृत्तिरितिस्थितम् ।

ननु ज्ञात आत्मैव चेत् सविलासाज्ञाननिवृत्तिः, तदोत्पन्नविज्ञानस्य शरीरादिप्रतिभासानुवृत्तिर्न स्यात् ।

न चाविद्यालेशात् तदनुवृत्तिः, निवर्तकतत्त्वज्ञानोदये तल्लेशस्यापि निवृत्तेः ।

प्रारब्धकर्मणा प्रतिबद्धं तत्त्वज्ञानं शरीरादिप्रतिभासहेतुमविद्यालेशं न निवर्तयतीति चेत्, मैवम्, कर्मणोऽप्यविद्याकार्यतया तन्निवृत्तौ निवृत्तेः, अनिवृत्तौ च कर्मणस्तत्कार्यस्य च शरीरादेः सत्यत्वप्रसङ्गात्, "क्षीयन्ते चास्य कर्माणी"त्यविशेषेणाशेषकर्मणां ज्ञानात् प्रक्षयश्रवणाच्च ।

न च "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति" विदुषो देहपातावधिश्रवणात् प्रारब्धकर्मव्यतिरिक्तकर्मविषयैषा श्रुतिरिति वाच्यम्, तस्याः परोक्षज्ञानविषयत्वात् ।

ननू"पदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन" इत्यपरोक्षज्ञानिन एवोपदेष्टृत्वं दर्शयन्तीश्वरस्तत्त्वदर्शिनामपि शरीरादेस्तद्धेतूनां च कर्मणा-

मवस्थानं सूचयतीति चेत्, मैवम्, ज्ञानिन इति परोक्षनिश्चयवतस्तत्त्वदर्शिन इति च तत्त्वदर्शनाभ्यासशीलस्य तत्र प्रतिपादितत्वात् ।

न चापरोक्षे परोक्षज्ञानं विभ्रमः, स्वात्मनि सुखादौ च परकीयानुमानादिज्ञानस्याविभ्रमत्वात् ।

कश्चायमविद्यालेशः, किमविद्याया एकदेशः किंवा तदाकारान्तरम् ।

नाद्यः, अविद्याया घटादिवत् सावयवत्वानङ्गीकारात् ।

नापि द्वितीयः, स्वाकारनिवृत्तौ तदाकारावस्थानानुपपत्तेः ।

अस्तु तर्हि संस्कारादेव द्वैतप्रतिभासानुवृत्तिः, विनिवृत्तसर्पविभ्रमस्यापि संस्काराद्भयकम्पाद्यनुवृत्तिदर्शनात्, "तिष्ठति संस्कारवशाच्चक्रभ्रमवद्धृतशरीर" इति च तन्त्रान्तरेऽप्यभिधानादिति चेत्, मैवम्, तस्याप्यविद्याकार्यत्वात् तन्निवृत्तौ तन्निवृत्तेः, अतथात्वे वा सत्यत्वे द्वैतसत्यत्वापत्तेः, मिथ्यात्वे च भावरूपकार्यस्योपादानमन्तरेणानुपपत्तेः, निराश्रयत्वानुपपत्तेश्च ।

न चात्मैवाश्रयः, निरविद्यासङ्गस्य स्वतः कार्याश्रयत्वानुपपत्तेः ।

न च स्थितप्रज्ञगुणातीतलक्षणानां जीवन्मुक्तविषयत्वम्, साधकस्यैवावस्थाविशेषं प्राप्तस्य तत्राभिधानात्, अतो न जीवन्मुक्तिर्युक्तिमतीति ।

अत्र वदामः ।

अविद्यालेशशब्देन मोहाकारान्तरोक्तितः ।
ज्ञानस्य प्रतिबन्धाच्च प्रवृत्तारब्धकर्मभिः ॥ ९ ॥
लेशानुवृत्तौ तज्जन्यकर्मादेरनुवृत्तितः ।
उत्पन्नात्मावबोधस्य जीवन्मुक्तिः प्रसिध्यति ॥ १० ॥

एवं हि न्यायसुधायामाराध्यपादैरुपपादितम्, संसारमूलकारणभूताविद्या यद्यप्येकैव तथापि तस्याः सन्त्येव बहव आकाराः, तत्रैकः प्रपञ्चस्य परमार्थसत्त्वभ्रमहेतुः, द्वितीयोऽर्थक्रियासमर्थवस्तुकल्पकः, तृतीयस्त्वपरोक्षप्रतिभासविषयाकारकल्पकः, तत्राद्वैतसत्यत्वाध्यवसायेन समस्तद्वैतसत्यत्वकल्पकाकारो निवर्तते, अर्थक्रियासमर्थप्रपञ्चोपादानमाया-

कारस्तत्त्वसाक्षात्कारेण विलीयते, अपरोक्षप्रतिभासयोग्यार्थाभासजनकस्तु मायालेशो जीवन्मुक्तस्यानिवृत्तः समाध्यवस्थायां तिरोहितोऽन्यदा देहाभासजगदाभासहेतुतयानुवर्तते, प्रारब्धकर्मफलोपभोगावसाने तु निवर्तते, श्रुतिरपी"न्द्रो मायाभिः पुरुरूप ईयत" इत्याद्या मायां विविधाकारां दर्शयति ।

न च लेशस्यापि विरोधितत्त्वज्ञानोदयान्निवृत्तिः किं न स्यादिति वाच्यम्, प्रबलैः प्रारब्धकर्मभिर्ज्ञानस्य प्रतिबद्धत्वात्, तथाहि विद्यार्थानि कर्माणि कर्मान्तरारब्धशरीरे फलं जनयन्ति, अन्यथा ज्ञानार्थानामपि कर्मणां भोगार्थत्वप्रसङ्गात्, तथा च शरीरारम्भककर्माण्युपजीव्य ज्ञानार्थानि कर्माणि तदविरोधेन स्वफलं प्रयच्छन्तीति युक्तम्, तथा च तैः प्रतिबद्धशक्तित्वात् तत्त्वज्ञानमविद्यालेशं न निवर्तयति ।

न च कर्मणामप्यविद्याकार्यतया तन्निवृत्तौ निवृत्तिः, तज्जनकाविद्यालेशस्यानिवृत्तेः ।

नन्वेवं सतीतरेतराश्रयत्वम्, तत्त्वज्ञानशक्तिप्रतिबन्धककर्मणामवस्थानादविद्यालेशानुवृत्तिः, तदनुवृत्तौ च कर्मणामनुवृत्तिरिति, मैवम्, "भूयश्चान्ते विश्वमायानिवृत्ति"रित्यत्र भूयो निवृत्तिरिति विशेषणादुभयविधमायाकारनिवृत्तेराकारान्तरानुवृत्तेश्च मानान्तरेणाधिगमात् प्रतीतावितरेतराश्रयत्वाभावात्, अन्ते विश्वमायानिवृत्तिरिति च श्रवणात्, प्रारब्धफलकर्मलक्षणस्य विद्याशक्तिप्रतिबन्धकस्य फलोपभोगेन निवृत्तौ प्रतिबन्धाभावे तत्त्वज्ञानान्निःशेषाविद्यानिवृत्तिरिति प्रतीतेश्च, अत एव "क्षीयन्ते चास्ये"ति सामान्यश्रुतेः प्रारब्धकर्मव्यतिरिक्तकर्मनिवृत्तिपरत्वोपपत्तिः, "तस्य तावदेव चिर"मिति विदुषः प्रारब्धकर्मतत्कार्ययोरवस्थानाधिगमाच्च, "तद्धास्य विजज्ञा"विति स्पष्टज्ञानोपजननस्याश्चर्यवत् प्रतिपादनात् परोक्षज्ञानविषयत्वानुपपत्तेः, अन्यथा श्रुतवाक्यस्य परोक्षज्ञानस्यावश्यंभावितया तत्प्रतिपादनवैयर्थ्याच्च । (शेषमग्रे)

काशीस्थराजकीयप्रधानपाठालयीयसंख्यावान् ।

सांख्याध्यापनकारी वेचनरामोऽस्मि कान्यकुब्जोऽहम् ॥ १ ॥

॥ पं० वेचनरामत्रिपाठी ॥

॥ श्रीः ॥

॥ योगवार्त्तिकम् ॥

(*Continued from page* 409. Vol. VI.)

कायाकाशयोः संबन्धसंयमात् लघुतूलसमापत्तेश्चाकाशगमनम् ॥ ४१ ॥

चकारो ऽत्र विकल्पार्थकः । कीदृशः संबन्ध इत्याकाङ्क्षायामाह । यत्रेति । यत्रासनादौ शरीरं तिष्ठति तत्र शरीरावच्छेदेनाप्याकाशं तिष्ठति । तत्र हेतुः तस्याकाशस्यावकाशदातृत्वादिति, अतः कायस्याकाशेन संबन्धः प्राप्तिरूपो व्यापनमिति यावत् इत्यर्थः । तत्रेति । तत्र संबन्धे कृतसंयमः तत्संबन्धं जित्वा साक्षात्कारेण स्वेच्छाधीनं कृत्वा लघुर्भवतीत्यागामिनान्वयो भविष्यति । द्वितीयहेतुं व्याचष्टे । लघुषु वेत्यादिना जितसंबन्ध इत्यन्तेन । समापत्तिं तत्स्थतदञ्जनतां जितसंबन्धः स्वायत्तीकृतकायाकाशसंबन्ध इत्यर्थः । आकाशगतावुपायद्वयसाधारणं क्रममाह । लघुरित्यादिना । प्रथमं लघुर्भवति ततो लघुतया जले पृथिव्यामिव पद्भ्यां संचरतीत्यादिः क्रम इत्यर्थः । सुगममन्यत् ।

बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः ॥ ४२ ॥

योगशास्त्रोक्तसंयमविशेषात् वक्ष्यमाणा बहिरकल्पिता वृत्तिर्महाविदेहाख्या सिद्धिर्भवति । ततश्च सत्त्वप्रकाशावरणभङ्ग इत्यर्थः । महाविदेहां व्याख्यातुमादौ सामान्यविदेहामाह । शरीरादिति । मनसो बहिर्वृत्तिलाभेन स्वशरीरस्येव बहिर्वस्तूनां संकल्पादिवशता सा च बहिरधिष्ठानरूपा धारणा विदेहासामान्यमित्यर्थः । धारणेति च तान्त्रिकी संज्ञा तस्या अवान्तरभेदमाह । सा यदीति । शरीरनिरपेक्षेति । त्यक्तशरीरेत्यर्थः । अनयापि परशरीरावेशो लिङ्गदेहस्य भवतीति प्रसङ्गादाह । ययेति । तत इत्यादि सूत्रावयवं व्याचष्टे । ततश्चेति । क्लेशेति । क्लेशाश्च

कर्म च विपाकत्रयं च यद्रजस्तमोमूलकं सत्त्वस्यावरकं तस्य च समूलस्य क्षयो भवतीत्यर्थः । तेषां क्षये च निरावरणं योगिनः चित्तं स्वेच्छया विहरति विजानाति चेति, च शब्दः स्वोक्तं परशरीरावेशं समुच्चिनोति । तदेवं परिणामत्रयसंयमादित्यारभ्योच्चावचविषयकसंयमानां ज्ञानक्रियारूपाः सिद्धय उक्ता इदानीं वितर्कविचारेत्यादिसूत्रैः स्वशास्त्रे मुख्यतः प्रकृतेषु ग्रहीतृग्रहणग्राह्येषु ये संयमास्तेषां सिद्धयो वक्तव्याः तत्र ग्रहीतृग्रहणयोः ग्राह्यनिरूप्यत्वादादौ ग्राह्यविषयकसंयमस्य सिद्धिमाह ।

स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः ॥ ४३ ॥

स्थूलं च स्वरूपं च सूक्ष्मं चान्वयश्चार्थवत्त्वं चेति स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वानि तेषु संयमात्साक्षात्कारपर्यन्तात्तत्तद्रूपाणां क्षयो वशवर्त्तिता भवतीत्यर्थः । स्थूलं व्याचष्टे । तत्रेति । सामान्यविशेषसमूहरूपाणां पृथिव्यादिपञ्चभूतानाम् एकदेशाः शब्दादयो विशेषाः धर्मधर्म्यभेदात् तद्वन्तः पदार्था वक्ष्यमाणैराकारादिधर्मैः सह स्थूलशब्देन शास्त्रे परिभाषिता इत्यर्थः । तन्मात्रव्यावर्त्तनाय विशेषपदं, ते च विशेषाः षड्जगान्धारादयः शीतोष्णादयो नीलपीतादयो मधुराम्लादयः सुरभिदुर्गन्धादयश्चेति । एते हि नामकर्मभिरवान्तरं विभज्यन्त इति विशेषाः । आकारादयश्च धर्मा पृथिव्यादीनां क्रमेण शास्त्रे परिपठिताः । यथा

आकारो गौरवं शैत्यं* वरणं स्थैर्यमेव च ।
वृत्तिभेदः† क्षमा कार्श्यं काठिन्यं सर्वभोग्यता ॥
स्नेहः सौक्ष्म्यं प्रभा शौक्ल्यं मार्दवं गौरवं च यत् ।
शैत्यं रक्षा पवित्रत्वं संधानं चौदका गुणाः ॥
ऊर्ध्वभाक् पाचकं दग्धृ पावकं लघु भास्वरम् ।
प्रध्वंस्योजस्वि वै तेजः‡ पूर्वाभ्यो भिन्नलक्षणम् ॥
तिर्यग्यानं पवित्रत्वमाक्षेपो नोदनं बलम् ।
चलमच्छायता रौक्ष्यं वायोर्धर्माः पृथग्विधाः ॥

* रौक्ष्यमिति पा० २ । † वृत्तिर्भेद इति पा० २ । ‡ पूर्वाभ्यामिति पा० २ ।

Digitized by Google

सर्वतोगतिरव्यूहो ऽविष्टम्भश्चेति ते त्रयः ।
आकाशधर्मा व्याख्याता पूर्वपूर्वविलक्षणाः ॥

इति । आकारोऽवयवसंस्थानं वृत्तिः सर्वभूताधारता भेदो विदारणं क्षमा सहिष्णुता धारणं सामर्थ्यमिति यावत् । रुक्षा आवरणादिना रुक्षत्वम् आक्षेपः पातनं सर्वतोगतिर्विभुत्वम् अव्यूहः सर्वपदार्थानां प्रविरलीकरणम् अविष्टम्भो ऽवकाश इति । प्रथमं रूपमिति । सूत्रोक्तं पञ्चरूपेष्वाद्यं रूपमित्यर्थः । स्थूलं व्याख्याय स्वरूपं व्याचष्टे । द्वितीयं रूपमिति । स्वसामान्यं स्वस्वसामान्यमिति साधारणं लक्षणम् । कस्य किं सामान्यं तद्दर्शयति । मूर्त्तिर्भूमिरित्यादिना । मूर्त्तिः सांसिद्धिकं काठिन्यं तद्व्याप्या पृथिवीत्वजातिः कार्यरूपेणाकाशस्याप्यनेकत्वादिति । अत्र सामान्यविशेषयोरभेदप्रतिपादनाय मूर्त्तिर्भूमिरित्याद्यभेदनिर्देशः । कस्य विशेषस्येदं सामान्यमित्याकाङ्क्षायामाह । अस्येति । शब्दादयः पूर्वोक्ताः मूक्षतारमन्द्रादिभेदेन सामान्यस्य जातेरेकदेशाद्व्यावर्त्तकतया विशेषा इत्यर्थः । अत्र पूर्वाचार्यसंवादमाह । तथा चोक्तमिति । एकजातिसमन्वितानामेषां पृथिव्यादीनां शब्दादिधर्ममात्रेण व्यावृत्तिः सजातीयान्तरादित्यर्थः । एकजातिसमन्वितानामिति । समूहे समूहिवृत्त्यभिप्रायेण प्रयोगः । यत्तु वैशेषिकाः सामान्यविशेषयोराश्रयमेव द्रव्यं मन्यन्ते न तु तयोर्भेदमपि, तन्मताद्विविच्य स्वसिद्धान्तमाह । सामान्येति । अत्र दर्शने सामान्यविशेषयोः समूहो द्रव्यम् अतिरिक्तावयव्यभ्युपगमेपि तयोरभेदस्यापि अभ्युपगमात् । अन्यथा घटो मृत् तन्तुः पटः शुक्लः पट इत्याद्यभेदप्रत्ययानुपपत्तेरित्यर्थः । ननु समूहमात्रस्य द्रव्यत्वे वनस्याप्येकद्रव्यत्वापत्तिरित्याशङ्कां परिहर्त्तुमादौ समूहस्य द्वैविध्यमाह । द्विष्ठो हीति । द्वाभ्यां प्रकाराभ्यां तिष्ठतीति द्विष्ठः । तत्रैकं प्रकारमाह । प्रत्यस्तमितेति । प्रत्यस्तमितः शब्देनानुपस्थापितो भेदोऽवान्तरविभागो येषामवयवानां तादृशेष्ववयवेष्वनुगत इत्यर्थः । तस्योदाहरणचतुष्कमाह । शरीरमिति । आद्यं द्वयमेकद्रव्यरूपस्य समूहस्योदाहरणमन्त्यद्वयमनेकद्रव्यरूपसमूहस्येति भेदः यूथादौ च विशिष्टस्यातिरिक्तत्वाभिप्रायेणावयवानुग-

तत्त्वमुपपादनीयम् । द्वितीयं समूहस्य प्रकारमाह । शब्देनोपात्तेति । अस्योदाहरणम् उभयेति । अत्रोभयशब्दवाच्यस्य समूहस्यावान्तरभेदौ देवमनुष्यशब्दाभ्यामुपात्तौ बहुवचनाभ्यां च तयोरप्यनेकभेदा उपात्ता इति शब्देनोपात्तभेदत्वं संक्षेपात् स्वयमाह । समूहरूपस्य देवा इति । भागो भेदः, ताभ्यां भेदाभ्याम् । स चेति । स च द्विविधोऽपि समूहो भेदाभेदाभ्यां प्रयोक्तृभिर्विवक्षितो भवति । आम्राणां वनमिति षष्ठ्या भेदेन आम्रवणमिति च कर्मधारयादभेदेन विवक्षा । एवमन्यत्रापि, तथा च समूहसमूहिनोर्भेदाभेदौ स्त इति प्रतिपादितम् । स पुनरिति । स द्विविधोऽपि समूहः पुनर्द्विविधो भवति । द्वैविध्यमेवाह । युतेति । हलिकादिष्वपि संयुक्ततया संबद्धतया सिद्धा अपवादस्य समूहस्य यूथवनादेः स तथा । अयुतेति । अयुतसिद्धावयवः समूहः संघातस्तस्य विवरणं शरीरमित्यादि । लौकिकेष्वसंयुततया एकीभावेनैव सिद्धा अवयवा यस्य समूहस्य शरीरवृक्षादेः स तथेत्यर्थः । परमाणुरिति । परमाणूनामपि पञ्चचतुरादितन्मात्रासमूहतायां वक्ष्यमाणत्वादिति भावः । तदेवं समूहभेदान् प्रदर्श्य तेष्ववयविद्रव्यरूपं समूहं विशिष्यावधारयति । अयुतेति । संयोगविशेषावच्छिन्नेष्ववयवविशेषेषु अनुगतः सामान्यविशेषसमूहोऽवयव्याख्यं द्रव्यमित्यर्थः । अवयवसाधारणं तु सामान्यतो द्रव्यलक्षणं सामान्यविशेषसमुदायत्वमात्रमिति, उपसंहरति । एतत्स्वरूपमित्युक्तमिति । एतत्सामान्यं स्वरूपशब्देन परिभाषितमित्यर्थः । स्वरूपपरिभाषा च स्थिरतामात्रेण विशेषाणामागमापायितया न द्रव्यस्य स्वरूपहानीति । यत्तु पूर्वपादे स्थूलस्वरूपे एकीकृत्यावयविद्रव्यमेव वितर्कानुगतयोगस्य विषयः स्थूलमित्युक्तं तल्लौकिकस्थूलव्यवहारानुसारेण । अत्र तु तान्त्रिकव्यवहारेण तस्यैव द्विधा विभागः । एवमेव विचारानुगतविषयस्य सूक्ष्मस्यैवात्र सूक्ष्मादित्रैविध्यं वक्ष्यतीति द्रष्टव्यम् । स्वरूपं व्याख्याय सूक्ष्मं व्याख्यातुं पृच्छति । अथेति । एषां भूतानाम् । उत्तरं, तन्मात्रमिति । तत्र सूक्ष्मपरिभाषाबीजमाह । भूतकारणमिति । साक्षात्कारणत्वमेव हि सूक्ष्मत्वमत्र विवक्षितमित्याशयः । भूतकारणत्वप्रकारं दर्शयति । तस्येति । तस्य भूतस्य एकश्चरमोऽवयवः

परमाणुः सोपि च घटादिवदेव सावयवः । अन्यथा स्थूलत्वानुपपत्तेः । शान्तघोरमूढत्वरूपविशेषानुपपत्तेश्च । इत्येवमित्यतः सर्वतन्मात्राण्येव भूतकारणानि अवयवान्तरासंभवादित्यर्थः । उपसंहरति । एतत्तृतीयमिति । एतत्तन्मात्रं तृतीयं भूतानां रूपमित्यर्थः । अन्वयाख्यं चतुर्थं रूपं व्याचष्टे । अथेति । अथानन्तर,मुच्यतइति शेषः । त्रिविधा गुणा एवान्वयशब्देनोक्ताः तत्र हेतुः कार्यस्वभावानुपातिन इति । कार्यरूपो यः स्वो यो भावः स्वात्मकः पदार्थः तत्रानुगता अतोन्वया इत्यर्थः । ननु भूतेषु प्रख्याशीलस्य सत्त्वस्यानुगमे किं प्रमाणमिति चे,दन्नमयं हि सोम्य मन 'इत्यादि'-श्रुतयो ऽन्वयव्यतिरेकौ चेति प्रतीहि । प्रकाशात्मकतया सात्त्विकानि हि मनश्चक्षुरादीन्यन्नरसाद्युपचयापचयाभ्यामुपचयापचयवन्ति दृश्यन्ते अतः पृथिव्यादिभूतेषु मनआदिकं तदुपष्टम्भकसत्त्वं वानुगतमित्युन्नीयतइति । पञ्चमं रूपमाह । अथैषामिति । गुणेषु वर्तमानं यद्भोगापवर्गजातं भोगविवेकख्यातिरूपं तदेव पञ्चमं रूपमर्थवत्त्वाख्यमित्यर्थः । नन्वेवं गुणेषु वर्तमानमर्थवत्त्वं कथं भूतानां रूपं स्यात्तत्राह । गुणास्तन्मात्रेति । ननु भोगापवर्गौ शब्दाद्युपलब्धिविवेकख्याती ते चान्तःकरणएव वर्त्तेते न साक्षाद्गुणेष्विति चेन्न । अनागतावस्थया वासनारूपेण वा तयोरपि प्रलयकाले गुणेष्वेवावस्थानात् कारणक्रमेणैव कार्येष्वनुगतयोरभिव्यक्तेरिति । पञ्चरूपाणि व्याख्याय सूत्रवाक्यार्थमाह । तेष्विति । इदानीं भूतेषु इदानीमुत्पन्नेषु इदानींतनेषु स्थूलभुतेष्वित्यर्थः । तन्मात्रादिषु पञ्चरूपत्वाभावात् इदानीं भूतेष्वित्युक्तं स्वरूपदर्शनं च संयमस्य जयहेतुत्वे द्वारमुक्तं जयो वशीकारः । तत्र पञ्चेति । एकैकमात्रजये हि गौणो भूतजयः सामस्त्येनाजयादिति भावः । वशीकारमेव कार्यद्वारा लक्षयति । तज्जयादिति । भूतप्रकृतयो भूतकारणानि त्रिगुणातत्स्थपुरुषार्थपर्यन्तानीत्यर्थः, न तु तन्मात्राण्येव केवलानि गुणपुरुषार्थयोरपि संयमेन साक्षात्कृतत्वादिति । भूतजयस्य फलं प्रतिपादयति ।

ततोणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च ॥ ४४ ॥

तत्र त्रिषु मध्ये ऽणिमाद्यष्टसिद्धीर्व्याचष्टे । अणिमेति । स्वेच्छया यदणुपरिमाणशरीरो भवति तदणिमा । संकल्पमात्रेण तत्क्षणादेवावयवापचयेन सौक्ष्म्यं देहस्य भवति, भूतप्रकृतिवशित्वादिति । एवं सर्वे त्वणिमाद्याश्च शास्त्रे गणिताः ।

अणिमा महिमा चैव *लघिमा प्राप्तिरिन्द्रियैः ।
प्राकाम्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता ॥
गुणेष्वसङ्गो वशिता यत्कामस्तदवस्यति ।

इति । लघिमानमाह । लघुरिति । गुरुतरशरीरोऽपीषिकातूलवल्लघुर्भवतीत्यर्थः । स्पृशतीति । भूमिष्ठ एवेति शेषः । अवयवोपचयेनाङ्गुलिदैर्घ्यादिति । एताश्चतस्रः स्थूलसंयमसिद्धयः । स्वरूपसंयमस्य सिद्धिमाह । प्राकाम्यमिति । इच्छानभिघात इति । सत्यामिच्छायां नास्य रूपं भूतस्य रूपैर्मूर्त्यादिभिर्विहन्यते । भूतस्वरूपाणां जितत्वादित्यर्थः । तस्योदाहरणं भूमाविति । उन्मज्जति जलमिव भूमिमुद्भिद्योत्तिष्ठति निमज्जति जलइव भूमौ प्रविशति चेत्येवमादिः प्राकाम्यमित्यर्थः । सूक्ष्मसंयमस्य सिद्धिमाह । वशित्वमिति । भूतभौतिकेष्विति । भूतेषु व्यष्टिषु भौतिकेषु तत्कार्येषु समष्टिमहाभूतेषु ब्रह्माण्डादिषु चेति व्याख्येयम् । जगद्व्यापारवर्जमिति वेदान्तसूत्रेण सिद्धेष्वादिसर्गसामर्थ्याभाववचनादिति । वशीभवति स्वेच्छया परिणामने समर्थो भवति तत्कारणतन्मात्रविजयात् । तथा तेषामवश्योऽपि भवति । रागा† दित्यर्थः । अन्वयसंयमस्य सिद्धिमाह । ईशित्वमिति । तेषामिति । तेषां भूतानां तन्मात्रद्वारकोत्पत्तिविनाशयोर्व्यूहाख्यसंस्थानविशेषे च समर्थो भवति भूतानां मूलप्रकृतिविजयादित्यर्थः । अर्थवत्त्वसंयमस्य सिद्धिमाह । यत्रेति । यत्र कामावसायित्वमिति । तान्त्रिकी परिभाषा पुराणेष्वप्येवमवगमात् । भूतप्रकृतीनां गुणतन्मात्रादीनामवस्थानं परिणामविशेषः । विजितार्थसंबन्धो हि योगी यद्यदर्थतया यद्यद्वस्तु संकल्पयति तत्तद्वस्तु तदर्थकमेव भवति विषमप्यमृतत्वार्थे संकल्प्य भोजयन् जीवलोकं सुखाकरोतीति । नन्वेवं योगी

* मूर्त्तिरिति पा० २ । † रागादिनेति पा० २ ।

वतमपि तेजः कुर्यात् धर्ममप्यधर्मं कुर्यात् इत्यव्यवस्थैव स्यादित्याश-ङ्क्याह। न च शक्तोपीति। पूर्वपूर्वयोगिव्यवहारानुसारेणैव योगी व्यवहरति अन्यथा तुल्यबलविरोधेन व्यवहारासंभवात्। विरोधमेव दर्शयति। अन्यस्येति। पूर्वेषां तथाभूतेषु यथादृष्टेष्वेव संकल्पादिति वाक्यार्थः। तथा च श्रुतिः। धाता यथापूर्वमकल्पयदिति। स्वनियमपालनार्थमन्त-र्यामिणा तथैव सिद्धः प्रेर्यतइति द्रष्टव्यम्। उपसंहरति। इत्यष्टावैश्वर्या-णीति। अणिमाद्यष्टसिद्धिव्याख्यापूरणायैव प्राकाम्यमत्र भाष्यकारैः कथितं न त्वत्र सूत्रे प्राकाम्यमणिमादिमध्ये विवक्षितं तद्धर्मानभिघात इत्यनेनैव प्राकाम्यग्रहणेन पौनरुक्त्यापत्तिरिति। कायसंयमादित्यादि सुगमं, प्रसि-द्धत्वात्सिद्धिद्वयविवेचनानपेक्षया केवलां कायसंपदं सूत्रकारो विवृणोति।

रूपलावण्यबलवज्रसंहननत्वानि कायसंयमात्॥ ४५॥

वज्रस्येव संहननं प्रहारो यस्येति वज्रवद्विबिडो दृढः संघातो यस्येति वा वज्रसंहननः। भाष्यं सुगमम्। ग्राह्यसंयमस्य सिद्धय उक्ताः ग्रह-णसंयमस्य सिद्धीराह।

ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः॥ ४६॥

ग्रहणं च स्वरूपं चास्मिता चान्वयश्चार्थवत्त्वं च तेषु संयमात्साक्षात्का-रपर्यन्तात्* दूपाणामिन्द्रियाणां जयो भवतीत्यर्थः। ग्रहणं व्याचष्टे। सामा-न्येति। वृत्तिरालोचनं विषयाकारपरिणामविशेषः चिन्तावधारणाभिमा-नसंशयरूपादन्तःकरणानामसाधारणवृत्तिचतुष्कादिलक्षणो दर्शनस्पर्शनना-मा यद्यपि सोऽपि स्मरणाद्यनुरोधेनान्तःकरणस्यैव। तथापि चक्षुराद्युपष्ट-म्भेनैव भवतीति कृत्वा दर्शनादिश्चक्षुरादीनामुच्यते। तथा चोक्तं सांख्ये

सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्।
तस्मात्त्रिविधं करणं द्वारि द्वाराणि शेषाणि॥

इति। न तु आलोचनशब्दार्थो निर्विकल्पकं ज्ञानं चक्षुरादिमात्र-वृत्त्यैवेति कल्पनीयम्। एवं सति चक्षुरादिनैव वैशिष्ट्यस्यापि ग्रहणसंभ-

* तत्तदिति पा० २।

Digitized by Google

वात् सर्ववृत्तीनां चित्तनिष्ठत्वस्य भाष्ये प्रोक्तत्वाच्च । ये तु बौद्धा विशेषस्य मनोमात्रस्य गोचरत्वमभ्युपगम्येन्द्रियवृत्तिं सामान्यमात्रविषयिणीमाहुस्तान् प्रत्याचष्टे । न चेति । न च तत् इन्द्रियं सामान्यमात्रेण ग्रहणमाकारो रूपं यस्य तथा भवतीत्यर्थः । तत्र हेतुः कथमित्यादि । स विषयगतो विशेष इन्द्रियेणानालोचितः कथं मनसानुव्यवसीयेत गृह्येत मनसो बहिरस्वातन्त्र्यात् अन्यथा चक्षुराद्यगोचरार्थानां मनसा विशेषग्रहणप्रसङ्गादित्यर्थः । इन्द्रियाणां द्वितीयं रूपमाह । स्वरूपमिति । प्रकाशात्मनो बुद्धिसत्त्वस्य कार्या ये ऽयुतसिद्धा अवयवभेदाः सात्त्विकाहंकाररूपास्तेष्वनुगतः सामान्यविशेषरूपयोः समूहो द्रव्यमिन्द्रियमित्यर्थः । तत्र विशेषाः ग्रहणरूपा नीलपीताद्याकाराः परिणामभेदाः सामान्यं च चक्षुष्ट्वादीति । ननु पूर्वसूत्रवदत्रापि स्वरूपं केवलं सामान्यमेवोचितम् अन्यथा ग्रहणाख्यप्रथमरूपस्याप्यत्रैव प्रवेशापत्तेरिति चेत्सत्यम् । सामान्यप्राधान्येनैव स्वरूपत्वमत्रापि विवक्षितम् । तथापि भूतवदिन्द्रियस्यापि सामान्यविशेषाभ्यामत्यन्तनिषेध* प्रतिषेधायैव समुदायो द्रव्यमित्युक्तम् । तेषां तृतीयं रूपमिति । तेषामिन्द्रियाणां तृतीयं रूपम् । अवयवशब्देनोक्तोऽहंकारः तत्राभिमानाख्यवृत्तिभ्रमनिरासायास्मितालक्षण इति विशेषणम् अस्मितावृत्तिक इत्यर्थः । ननु कथमहंकार इन्द्रियाणां रूपमित्याकाङ्क्षायामाह । तस्येति । यथा तन्मात्रस्य सामान्यस्य भूतानि विशेषा एवमहंकारस्य सामान्यस्य चक्षुरादीनि विशेषाः कार्यत्वात् । अत इन्द्रियेष्वनुगततया अहंकार इन्द्रियाणां रूपं भूतानां तन्मात्रवदिति भावः । इन्द्रियाणां चतुर्थं रूपमाह । चतुर्थमिति । महत्तत्त्वस्यापि चतुर्थरूपमध्ये प्रवेशाय व्यवसायात्मका इति गुणानां विशेषणं व्यवसायाख्यबुद्धिरूपेण परिणतास्तद्विशिष्टा इत्यर्थः । एतेन पूर्वोक्तभूतजयसूत्रेऽप्यन्वयाख्यचतुर्थरूपमध्ये महदहंकारयोः प्रवेश इत्युन्नेयं युक्तिसाम्यादिति । येषामिति । साहंकाराणि सान्तःकरणानि । पञ्चमं रूपमाह । गुणेष्विति । इन्द्रियप्रकृतिगुणेष्वित्यर्थः । सूत्रवाक्यार्थं

* भेदेति पा० २ ।

व्याचष्टे । पञ्चस्विति । यथाक्रमं ग्रहणादिक्रमेण संयमः कार्य इति शेषः । ततश्च तत्रतत्र जयं कृत्वा पञ्चरूपजयात् सर्वरूपैरिन्द्रियजयस्तद्वशीकारो भवतीत्यर्थः । ततश्च वत्सानुसारिण्य इव गावोऽस्य संकल्पानुविधायिन्य इन्द्रियप्रकृतयो भवन्तीति शेषः । इन्द्रियजयात्सिद्धीराह ।

ततो मनोजवित्वं विकरणभावः प्रधानजयश्च ॥ ४७ ॥

व्याचष्टे । कायस्येति । अनुत्तमो मनोवच्छीघ्रतरः कर्मेन्द्रियवृत्तिविजयाद्भवति । विकरणभावस्य स्वरूपमाह । विदेहानामिति । स्थूलदेहसंपर्करहितानामित्यर्थः । इन्द्रियाणामिति । करणसामान्योपलक्षणम् । विकरणभावशब्दस्य योगार्थमाह । अभिप्रेतेति । अभिप्रेतकालदेशविषयापेक्षस्तदपरित्यागी यत्रैव देशादिषु वृत्तिलाभ इष्यते तत्रैव भवतीत्यर्थः । तथा च विकरणभावो विकीर्णतास्वभावो व्यापितेति यावत् । य एवंविधकरणभावोपपन्ना योगिनस्त एव स्थानेस्थाने विदेहा इत्युक्ताः । सर्वेति । सर्वासां व्यक्तिभेदेनानन्तानां भूतेन्द्रियप्रकृतीनां सत्त्वादिगुणानां तद्विकाराणां च सर्वेषां स्वेच्छयानुविधानं प्रधानजय इत्यर्थः । ननु भूतप्रकृतिजयो भूतजयो वा कथमिन्द्रियजयादिति चेत् न । भूतजयरूपपूर्वभूमिकायामेव तयोर्जितत्वेनोत्तरभूमिकायामेकीकृत्य सर्वजयकथनादिति । एतएव च प्रधानजयिनः पूर्वं स्थानेस्थाने प्रकृतिलया इत्युक्ताः प्रकृत्या सहैकतां गता इति प्रकृतिलयाः प्रकृतिवशिनः । एतास्तिस्र इति । अत्र सिद्धिर्विशेषाणामेव मधुप्रतीकसंज्ञावगमाद्योगभूमिचतुष्टयस्य पृथगेव पश्चाद्व्याख्यास्यमानत्वाच्च । योगभूमेर्मधुप्रतीकसंज्ञेति कस्य चिद्व्याख्यानमबोधमूलत्वादुपेक्षणीयम् । तत इति सोत्रं पदं व्याचष्टे । एताश्चेति । नन्विन्द्रियजये कथं प्रकृतिमहदहंकाराणां जय इति चेन्न । इन्द्रियरूपेष्वन्तिमरूपत्रयत्वात्तेषामिति । तदेवं ग्राह्यग्रहणसंयमयोः सिद्धिमुक्त्वा ग्रहीतृसंयमस्य सिद्धिमाह ।

सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च ॥ ४८ ॥

मात्रशब्देन संयमरूपा ख्यातिर्लब्धा तथा सत्त्वपुरुषान्यतासंयमस्य धर्मधर्म्यभेदात् तद्वतश्चित्तस्य सर्वभावेषु प्रकृतितत्कार्यपुरुषेषु अधि-

ष्ठातृत्वं स्वेच्छया विनियोक्तृत्वं स्वदेहइव भवति । तथा प्रकृतिपुरुषादिसर्वज्ञातृत्वं च भवतीत्यर्थः । अत्रापि संयमः साक्षात्कारपर्यन्तो बोध्यः संयमनिष्पत्तेरेव सिद्धिहेतुत्वात् । ननु परार्थात्स्वार्थसंयमादितिसूत्रोक्तसंयमतो ऽस्य को भेदः येन तत्र पुरुषज्ञानं सिद्धिरत्र अन्या सिद्धिरिति सिद्धिभेदः स्यात् । उच्यते । तत्र पौरुषेयप्रत्यये सुखाद्यनुभवरूपे परिच्छिन्न एव संयम उक्तः न तु अपरिच्छिन्ने पुरुषे । अत्र तु तेन संयमेन ज्ञाते परिपूर्णे पुरुषे बुद्धिविवेकसंयम उच्यते इति विशेष इति । ननु सत्त्वेति-विशेषवचनमनुचितं गुणपुरुषान्यतेत्यादेव वक्तुमुचितमिति चेन्न । रजस्तमोभ्यां पुरुषे साक्षादविवेकाभावात् बुद्धिसत्त्वाविवेकद्वारैव देहेन्द्रियादिष्वविवेकात् स्वप्नबाधियोद्यवस्थासु चेतने देहेन्द्रियादिविवेकस्य योगारम्भकालएव बालकैरप्यवधृतत्वाच्चेति । तदिदं सूत्रं व्याचष्टे । निर्धूतेति । परवैशारद्यं परमस्वच्छता अतिसूक्ष्मवस्तुप्रतिबिम्बोद्ग्रहणसामर्थ्यमिति यावत् । परमवशीकारसंज्ञा च परमाणुपरममहत्त्वान्तोस्य वशीकार इत्युक्ता । रूपेण प्रतिष्ठस्य रूपप्रतिष्ठस्य । सर्वभावाधिष्ठातृत्वं विवृणोति । सर्वात्मान इति । सर्वात्मान इत्यस्य विवरणं व्यवसायव्यवसेयात्मका इति करणतद्विषयात्मका इत्यर्थः । अशेषदृश्येति । संकल्पमात्रेण पुरुषैः संयुक्ता असंयुक्ताश्चाशेषभोग्यवस्त्वाकारेण परिणता भूत्वोपतिष्ठन्ते योगिनं तत्र हेतुगर्भविशेषणं स्वामिनं क्षेत्रज्ञमिति । यतोसौ भोक्तृत्वात्प्रेरको ऽतस्तम् अयस्कान्तलोहवदुपतिष्ठन्तइत्यर्थः । यद्वा यतोसौ स्वामी ईश्वरः क्षेत्रज्ञश्च परिणामक्षेत्राणि गुणादीनि प्रवर्त्तयति परिणामनप्रकारं जानाति चेत्यर्थः । यद्यपि सर्वे पुरुषाः सर्वगुणानामविशेषेण स्वामिनस्तथापि पापादिप्रतिबन्धात्सर्वे गुणाः सर्वदा सर्वपुरुषाणां भोग्यत्वेनोपतिष्ठन्तइति भावः । तथा च श्रुतिः । 'स यदि पितृलोककामः संकल्पादेवास्य पितरः समुत्तिष्ठन्ती'त्यादिरिति । क्रियैश्वर्यरूपां सिद्धिं व्याख्याय ज्ञानैश्वर्यरूपां व्याचष्टे । सर्वज्ञातृत्वमिति । सर्वात्मनां सर्वपुरुषाणां बद्धमुक्तेश्वराणां शान्तादिरूपधर्मविशिष्टगुणानां चैकदैव ज्ञानं सर्वज्ञातृत्वमित्यर्थः । तस्य संज्ञा विवेकजमिति । विवेकेन ज्ञायमानं यथार्थसाक्षात्कार इति यावत् ।

अथ वा प्रकृतिपुरुषविवेकाज्जायमानमित्यर्थः। सान्वयेयं संज्ञेति। विशेषसंज्ञाया अन्वर्थतामाह। यां प्राप्येति। क्षीणक्लेशबन्धनत्वात् शोकशून्यतेति भावः। सर्वसिद्धिमूर्द्धन्यं विवेकख्यातिरूपसंयमस्य परवैराग्यद्वारा मोक्षाख्यं सिद्ध्यन्तरमाह।

तद्वैराग्यादपि दोषबीजक्षये कैवल्यम्॥ ४९॥

अपिशब्दः कैवल्यमित्यनेनान्वेति। तथा च विवेकख्यातिनिष्ठात एव विवेकख्यातौ तस्यां यथोक्तसिद्धौ च वैराग्ये सति असंप्रज्ञातयोगेन दुःखदोषस्य बीजानामखिलवासनाकर्मणां चित्तेन सह लये सति पुरुषस्य कैवल्यं पुनर्गुणासंयोगरूपमपि भवतीत्यर्थः। वैराग्यकारणमाह। यदेति। क्लेशकर्मक्षयरूपकर्त्तव्यसमाधौ यदा योगिन एवं भवति एवं विचारो भवति। एवंशब्दार्थमाह। सत्त्वस्येत्यादिना सत्त्वादीत्यन्तेन। वैराग्यकारणमुक्त्वा कैवल्ये पुरुषार्थं प्रतिपादयति। एवमस्येत्यादिना न भुङ्क्त इत्यन्तेन। अत्र न भुङ्क्त इति वचनात् भोगाभाव एव पुरुषार्थ इति स्मर्त्तव्यं, दुःखाभावस्तु परम्परया पुरुषार्थ इति भावः। इदानीं सूत्रार्थं व्याचष्टे। तदेतेषामिति। तत् तदा यदेत्युक्तेनान्वयः। तदा परवैराग्यावस्थायां संस्काररूपाणां दुःखबीजगुणानां सत्त्वादिगुणस्थानां कार्यावस्थमनसि क्लेशादिरूपेणाभिव्यक्तिस्वभावकानां चरितार्थानां समाप्तपुरुषार्थानां प्रतिप्रसवे मनसा सह लये सति पुरुषस्यात्यन्तिको गुणवियोगः कैवल्याख्यो भवतीत्यर्थः। मोक्षेण पुरुषस्य परिणाममपाकरोति। तदेति। कैवल्याख्यसिद्ध्यर्थिनो योगिनो यथोक्तवैराग्यवदेव साधनान्तरमाह, अथ वा संप्रति कैवल्यप्रसङ्गतः कैवल्यसाधने प्रवृत्तस्य योगिनस्तत्प्रत्यूहसंभवे तन्निराकरणप्रकारमाह।

स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात्॥ ५०॥

स्थानिनः स्वर्गादिलोकाधिकारिणो देवा इन्द्रादयः तेषां स्वर्लोके नयनाय योगिनो निमन्त्रणे सति तत्र सङ्गस्मयाकरणमुपायः। सङ्गे स्मये च का क्षतिस्तत्राह सङ्गस्मयाभ्यां पुनरपि संसारप्रसङ्गात्। सङ्गः प्रीतिः स्मयश्च

देवानां प्रार्थनेनात्मनि कृतार्थताभिमान इत्यर्थः। तत्र यस्यां भूमिकायां स्थान्युपनिमन्त्रणं भवति तां वक्तुं योगिनां भूमिकाचतुष्टयमाह । चत्वार इति । प्रथमकल्पिकस्य स्वरूपमाह। तत्राभ्यासीति। प्रवृत्तमात्रं न तु निश्चलज्योतिर्ज्ञानं यस्य स तथा सवितर्कादिरूपापरप्रत्यक्षवान् न तु ऋतंभरप्रज्ञ इत्यर्थः । मधुभूमिकस्य स्वरूपमाह । ऋतंभरेति । ऋतं सत्यमेव बिभर्तीति व्युत्पत्त्या परप्रत्यक्षमेव ऋतंभरा प्रज्ञात्र विवक्षिता सा च परिशेषात् निर्वितर्करूपा भूमिकैव तदुत्तरभूमिकानां तृतीयादावेवान्तर्भावादिति । प्रज्ञाज्योतिषः स्वरूपमाह । भूतेति । ऋतंभरप्रज्ञातोऽस्य विशेषमाह । सर्वेष्विति । सर्वेषु भावितेषूत्पादितेषु निर्वितर्कादियोगेषु कृतो रक्षारूपो बन्धो येन स तथा, तथा भावनीयेषु उत्पादनीयेषु विशोकादिसिद्ध्यादिष्वसंप्रज्ञातपर्यन्तेषु विहितसाधनवानित्यर्थः । अतिक्रान्तभावनीयस्य स्वरूपमाह । चतुर्थ इति । चित्तप्रतिसर्गोऽसंप्रज्ञातसमाधिना चित्तविलयमात्रं कर्त्तव्यमवशिष्यत इत्यर्थः । प्रज्ञाज्योतिषोऽस्य विशेषमाह । सप्तविधेति । प्रज्ञा जातेति शेषः । युक्तासु योगभूमिषु स्थान्युपनिमन्त्रणस्य भूमिमवधारयति । तत्रेति । प्रथमभूमिकायां तावन्महेन्द्रादीनामेतादृशानुग्रह एव न भवति तृतीयचतुर्थभूमिकयोस्तु देवादय उपेक्षणीया एव भवन्ति अतो मधुभूमिकायां द्वितीयायामेव निमन्त्रणं भवतीत्याशयः। साक्षात्कुर्वतः स्वस्येयं मधुमती भूमिका जातेत्यनुभवतः। अनेन भूमिनिष्पत्तिरुक्ता, निश्चमधुभूमिकस्येत्यर्थः । उपनिमन्त्रणप्रकारमाह । भो इहेत्यादिना देवानां प्रियमित्यन्तेन। सङ्गस्मयाकरणं व्याचष्टे। एवमभिधीयमान इति। सङ्गदोषान् विषयप्रीतिजान् । दोषचिन्तनप्रकारमाह । घोरेष्वित्यादिना कुर्यामित्यन्तेन । सङ्गं त्यक्त्वा यत् कर्त्तव्यं तदाह । स्वस्तीत्यादिना । भावयेत् कुर्यात् । स्वयं विकृणानस्तत्काराणदोषमाह। एवमहमिति। न भावयिष्यति न चिन्तयिष्यति यत्नोपचर्यः यत्नप्रतीकार्यः। सङ्गस्मयाकरणस्य फलमाह । एवमस्येति। सर्वज्ञत्वेपि वैराग्यान्मोक्ष इत्युक्तं यदि च रागस्तिष्ठति तदा तद्रागनिवृत्तये पूर्ववत्सर्वज्ञतासाधकं संयमान्तरमाह।

Digitized by Google

क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम् ॥ ५१ ॥

विवेकात्पूर्वसूत्रोक्तात्सत्त्वपुरुषान्यताख्यात् जायमानं विवेकजं ज्ञानम् इतरव्यावृत्ततया सर्ववस्तूनामशेषविशेषैः साक्षात्करणमिति यावत् । तत् क्षणतत्क्रमयोः संयमादपि भवतीत्यर्थः । प्रतिक्षणं सर्वं वस्तु परिणमते अतः क्षणेषु तत्क्रमेषु च संयमेन साक्षात्कारे सति सर्ववस्तूनां सर्वपरिणामतत्क्रमयोरपि ज्ञानात् सर्वस्य वस्तुनो विवेकेन ज्ञानं भवतीति भावः । यद्यपि अपिशब्दः सूत्रे नास्ति तथापि ततश्च विवेकजं ज्ञानमित्यागामिभाष्यगम्यः । क्षणशब्दार्थं दृष्टान्तेन प्रतिपादयति । यथेति । यथा लोष्टादेर्भिद्यमानस्य यस्मिन्नवयवे परिमाणापकर्षकाष्ठा सोपकर्षावधिः सत्त्वादिगुणविशेषः परमाणुः । एवं कालस्यापकर्षावधिभूतो ऽवयवविशेषः पूर्वापरांशशून्य इत्यर्थः । क्षणस्य लक्षणान्तरमाह । यावता वेति । लक्ष्यादित्यनेनैकं लक्षणं संपद्येतेति च लक्षणान्तरम् । अन्यथा वैयर्थ्यात् । अवयविद्रव्यस्य देशत्यागो बहुक्षणेनापि कदाचिद्भवति अवयवानां क्रमेण संचारादित्युक्तम् । परमाणुरिति । अवयविनो देशस्य क्रियया अनेकक्षणेन जनितं देशत्यागादिकं व्यावर्तयितुं चलित इत्युक्तम् अत्र दृष्टान्तादिना परसूत्रेण च साक्षादेवाचार्येण परमाणुवचनात् । वैशेषिकोक्तपरमाणवोऽप्यस्माभिरभ्युपगम्यन्ते ते चास्मद्दर्शने गुणशब्दवाच्या इत्येव विशेषः । न चानेकात्मकपृथिव्यादिभूतपरमाणुरेवात्र वाक्ये परमाणुशब्दार्थो युक्तः । अत्र भूतरूपविशेषस्याप्रकृततया द्रव्यशब्दस्य विशेषपरत्वे प्रमाणाभावात् सावयवस्य पृथिव्यादिपरमाणोर्निरवयवकालपरमाणुदृष्टान्तानुपपत्तेश्च । न च प्रकृतेरणुपरिमाणासिद्धिः । परंपरया पृथिव्यादिभावापन्नानां गुणानां परिमाणाकाङ्क्षायां न्यायवैशेषिकसिद्धाणुपरिमाणस्यैव ग्रहणौचित्यात् स्वशास्त्रानुक्ततया परोक्तमविरोधि चेति न्यायेन परोक्तपरिमाणस्यैवादर्त्तव्यत्वात् । न चास्मद्दर्शने गुणाख्यप्रकृतेर्विभुत्वमेवावगम्यतइति वाच्यम् । अन्तःकरणाकाशहेतुगुणानां विभुत्वेन तदुपपत्तेः । सर्वगुणानां विभुत्वे सत्याद्यपरिणामहेतुक्षोभसंयोगाद्यसंभवादिति । तस्मात्सिद्धमणुपरिमाणा अपि

Digitized by Google

गुणाः सन्तीति तेषु पृथिवीत्वव्यञ्जकगन्धाद्यनङ्गीकारेणास्मत्सिद्धान्ते पृथिवीत्वादिकं नास्तीति विशेष इति । क्षणं व्याख्याय क्रमं व्याचष्टे । तत्प्रवाहेति । तेषां क्षणानां यः प्रवाह उत्तरोत्तरभावेनावस्थानं तस्या विरलता क्रम इत्यर्थः । इदानीं क्षणातिरिक्तः कालो नास्ति मुहूर्त्तादिरूपो महाकालपर्यन्त इति प्रसङ्गात्स्वशास्त्रसिद्धान्तमवधारयति । क्षणतत्क्रमयोरिति । क्षणेषु तत्क्रमेषु चाव्यवहितानन्तर्यरूपेषु वस्तुभूतः समाहारो मिलनं नास्ति अतो मुहूर्त्ताहोरात्रादयो बुद्धिकल्पितसमाहार एवेत्यर्थः । नन्वेवं स्थूलकालाभावे कथं लोकानां तद्यथार्थबुद्धिरिति तच्च विकल्पतया समाधत्ते । स खल्वयमिति । नन्वेवं क्षणोपि विकल्पमात्रो भवतु कालव्यवहाराविशेषात्क्षणव्यवहारस्य च परमाणुक्रियादिभ्य एव संभवादिति तत्राह । क्षणस्त्विति । क्षणाख्यस्तु कालो वस्तुकोटौ प्रविष्टः यतः क्रमावलम्बी क्रमेण लक्ष्यते आश्रीयते क्षणरूपप्रतियोग्यनुयोगिघटितत्वात्क्रमस्येत्यर्थः । तत्र हेतुमाह । क्रमश्चेति । क्रमो ह्यानन्तर्यरूप इत्यर्थः । ननु यः क्षणो वस्तुभूतः स किंस्वरूप इत्याकाङ्क्षायामाह । तं कालेति । तस्य च कालस्य क्षणद्वयावस्थायिद्रव्यान्तरेभ्यो विभाग इति भावः । कालनित्यत्वश्रुतिस्मृतयश्च प्रवाहरूपकालपराः । स च क्षणाख्यः कालः सत्त्वादीनां द्रव्यरूपः परिणामविशेष इति । बौद्धमताच्चास्माकमयं विशेषो यदस्माभिर्धर्मिग्राहकप्रमाणबलात् क्षण एवास्थिर इष्यते । क्षणस्थैर्यप्रत्यभिज्ञाद्यभावात् न क्षणातिरिक्तः क्षणिकः पदार्थः कश्चिदिष्यते तैस्तु क्षणमात्रस्थाय्येव पदार्थः सर्व इष्यत इति तच्च स्थानेस्थाने निराकृतं कार्यकारणव्यवस्थानुपपत्त्यादिभिरिति । तदस्मिन् शास्त्रे क्षण एव काल इति सिद्धान्तः । कालोत्र नाभ्युपगम्यत इति कस्यचित् प्रलापस्तु भाष्यार्थाविवेकमूल इति । यत्तु पूर्वदेशसंयोगाद्यवच्छिन्नः परमाणुक्रियादिरेव क्षणः कालस्तु तदतिरिक्तो नित्य इति वैशेषिका आहुः । तन्न । विशिष्टस्यातिरेकानतिरेकयोरुभयोरुभयतस्पाशादतिरेके स्वसिद्धान्तविरोधात् अस्मन्मतप्रवेशाच्च । अस्माभिस्तादृशस्यैव गुणपरिणामस्य क्षणत्ववचनात् । अनतिरेके विशेषणविशेष्यतत्संबन्धानां त्रयाणामपि स्थिरत्वेन क्षणव्यव-

हारजननाक्षमत्वात् नित्यकालेऽपि च प्रमाणं नास्ति इदानीमित्याद्यखिलव्यवहाराणां खण्डकालमात्रविषयकत्वात् कार्यकारणभावादीनामपि क्षणघटितत्वादिति । एतेन नित्या दिगप्यप्रामाणिकी व्याख्याता, सामान्यतो दिग्व्यवहाराभावात् । पूर्वादिव्यवहारस्य च पराभ्युपगतदिगुपाधिभिरेव संभवात् सामान्यतः कालदिग्व्यवहारसत्त्वेऽपि आकाशादेव तदुपपत्तेश्च, अन्यथा पृथिवीजलतेजआदिभिरुपाधिभिर्देशाद्यतिरिक्तपदार्थः स्यादिति, कालाच्च दिश्ययं विशेषः यत् कालः क्षणरूप इष्यते दिक्तु सर्वथैव नेष्यत इति । शास्त्रे दिक्सामान्यव्यवहारस्तु पूर्वपश्चिमनियामकोपाध्यवच्छिन्नाकाशेन बोध्यः स्थित्याधारत्वेन देशव्यवहारवदिति । अत एव श्रुत्यादिषु कुत्र चिदाकाशाच्छ्रोत्रं क्व चिच्च दिशः श्रोत्रमिति वचनमन्योन्यमविरुद्धं दिगाकाशयोरेकत्वादिति दिक् । क्षणतत्क्रमयोर्नास्ति वस्तुसमाहार इति यत्प्रागुक्तं तत् प्रपञ्चयति । न चेत्यादिना नास्ति तत्समाहार इत्यन्तेन । सहभावाभ्युपगमेऽपि क्रमो न संभवतीत्याह । क्रमश्चेति । असंभवे हेतुमाह । पूर्वस्मादिति । तस्मात्सर्वदैव वर्त्तमानलक्षणः सत्त्वेक एव क्षणस्तिष्ठति न पूर्वोत्तरे क्षणा इत्यतो नास्ति तयोः क्षणतत्क्रमयोर्वास्तवं मिलनं मुहूर्त्तादिरूपमित्यर्थः । वक्ष्यमाणोपपादकमादौ वक्ति । ये त्वित्यादिना सर्वधर्मा इत्यन्तेन । ये पुनर्भूतभाविनः क्षणास्ते सर्वेऽपि सर्ववस्तुपरिणामाधारा एकदैव बाधकादर्शनतः क्षणपर्यायकालत्वेनैव परिणामहेतुत्वादित्युत्तरपादे क्षणप्रतियोगीत्याद्युत्तरसूत्रे व्याख्येयाः, तेन हेतुना एकैकेन क्षणेन कृत्स्नो लोकः परिणाममनुभवति प्राप्नोति । यतः तत्क्षणोपारूढा एकैकक्षणोपारूढाः धर्माः पदार्था इत्यर्थः । ततः किमित्यत आह । तयोः क्षणेति । ततश्चेति । ततश्च क्षणतत्क्रमसाक्षात्कारादखिलपरिणामतत्क्रमसाक्षात्कारद्वारा सर्ववस्तूनामन्योन्यव्यावृत्ततया स्वरूपावधारणं भवतीति सूत्रार्थ उक्तः । उत्तरसूत्रमवतारयति । तस्येति । तस्य विवेकजज्ञानस्य सर्वविषयकस्य शिष्यव्युत्पादनाय एकमुदाहरणमुपन्यस्यत इत्यर्थः ।

Digitized by Google

जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः ॥५२॥

जातिलक्षणदेशैरन्यतानवच्छेदात् भेदावधारणस्यासंभवात् ततो विवेकज्ञानादेव प्रतिपत्तिर्विवेकेन साक्षात्कारः पौरुषेयो भवतीत्यर्थः । तत्रादौ जात्यान्यतावच्छेदस्यासङ्कीर्णमुदाहरणमाह । तुल्ययोर्देशेति । कालभेदेन समानदेशस्थयोर्हि समानरूपयोर्गोगवययोर्भेदो जातिभेदादेवानुमातुं शक्यत इति । अत्र वडवाशब्देनातिसारूप्याद्गवयो लक्षितः सारूप्याधिका वडवैवेति । लक्षणेनान्यत्वावच्छेदनस्यासंकीर्णोदाहरणमाह । तुल्यदेशेति । लक्षणमभिव्यक्तो धर्मभेदः । देशेनान्यत्वावच्छेदनस्यासंकीर्णोदाहरणमाह । द्वयोरिति । देशभेदप्रकारमाह । पूर्वमिदमुत्तरमितीति । इदानीं जात्यादिभिर्यत्रान्यतानुमानं न संभवति तादृशविवेकज्ञानस्यासंकीर्णमुदाहरणमाह । यदा त्विति । यदा तु पूर्वदेशस्थितमामलकं विषयान्तरव्यग्रस्य ज्ञातुर्विवेकं करिष्यतो योगिन उत्तरस्मिन् देश उपावर्तते संबध्यते दैवादिना तदा द्वयोरामलकयोरेकदेशत्वे सति पूर्वदेशोपलक्षितमिदमुत्तरदेशोपलक्षितं चेदमिति विवेकानुपपत्तिः । आमलकयोर्जात्यादित्रिकसाम्यात् । असंदिग्धतत्त्वज्ञानं चोद्देश्यम् इत्यत उक्तं सूत्रकारेण ततो विवेकजज्ञानात्प्रतिपत्तिरितीत्यर्थः । ननु क्षणतत्क्रमयोः संयमात् कथमामलकयोर्विवेकज्ञानमिति पृच्छति । कथमिति । उत्तरं, पूर्वेति । आमलकस्य क्षणेन सह वर्तत इति आमलकसहक्षणः । चैत्रसहोदर इतिवत् । एवंविधः पूर्वो देश आमलकान्तरेण सहक्षणादुत्तरदेशाद्भिन्नो ऽतः स्वदेशक्षणप्राप्त्या ते आमलके भिन्ने एकस्य एकदा विरुद्धदेशसंबन्धासंभवादिति । एवं तयोर्भेदं प्रसाध्यैकदेशसंबन्धदशायां विवेकग्रहणोपायमाह । अन्येति । अन्ययोर्भिन्नयोः पूर्वोत्तरदेशसंबन्धक्षणयोरनुभवः साक्षात्कारस्त्वामलकयोरन्यत्वे हेतुर्यथोक्तविवेकग्रहे कारणमित्यर्थः । अत्र चोदाहरणे क्षणसंयमादेव विवेकजं ज्ञानं दर्शितम् एतदनुसारेण क्षणक्रमसंयमादपि विवेकजज्ञानस्योदाहरणमुन्नेयमिति भावः । तद्यथा द्वित्रिक्षणमात्रेण ज्येष्ठकनिष्ठयोर्ज्येष्ठकनिष्ठताविवेकज्ञानं क्षणक्रमसाक्षात्कारं विना न संभवति अतः क्षणक्रमसं-

भ्रमसूत्रकारणमिति । एतेनैव स्थूलदृष्टान्तेन परमसूक्ष्मेष्वपि क्षणतत्क्रमानुभवात् विवेकज्ञानमनुमेयमित्याह । एतेनेति । तुल्यजातिलक्षणदेशस्य परमाणुसामान्यस्यान्योन्यम् अन्यत्वप्रत्ययो विवेकप्रत्ययः पूर्वयोः परमाणुदेशसाहित्यक्षणयोः साक्षात्करणात् ईश्वरस्य प्रकृत्यादिप्रेरणमभीप्सोर्योगिनो भवतीत्यन्वयः । तत्र हेतुरुक्त उत्तरस्य परमाणोरित्यादिना । यत उत्तरस्य परमाणोः पूर्वदेशानुपपत्त्योत्तरस्य स्वदेशप्राप्तिः पूर्वस्य स्वदेशप्राप्तितो भिन्ना तयोः सहक्षणभेदात्साहित्यक्षणयोर्भिन्नत्वादित्यर्थः । तदेवं जात्यादिभेदात् देशसंबन्धक्षणभेदाच्च तुल्ययोरन्यताप्रत्ययं प्रतिपाद्य परमतेप्येतत्समानमिति प्रतिपादयितुं तन्मतमाह । अपरे त्विति । अपरे वैशेषिका वदन्ति नित्यद्रव्यवृत्तयोऽन्त्या विशेषा इति । अन्त्याः प्रलयकालस्थाः मुक्तेषु ह्यात्मसु सर्वेषु तुल्यजातिलक्षणदेशेष्वन्योन्यं विभाजकान्तरासंभवेन विशेषनामा भेदकः कश्चन पदार्थोऽवश्यं वाच्यः । तथा च परमाण्वादिष्वपि स एवान्यताप्रत्ययं करोतीति तेषामाशयः । तत्रापीति । तन्मतेपि देशादीनां योगबुद्धिगम्यक्षणान्तानां भेदोऽप्यण्वादीनामन्यत्वे हेतुरस्त्येवेति समानमित्यर्थः । मूर्त्तिः संस्थानं व्यवधिः व्यवहितता एतद् द्वयमधिकमत्रोक्तम् । अत इति । यतो मूर्त्तिव्यवधिजात्यादिर्नित्यद्रव्येष्वप्यस्ति भेदकोऽतः परैरुक्तं मूलपृथक्त्वं मूलेषु नित्यद्रव्येषु विशेषपदार्थो नास्ति मूर्त्तिव्यवधिजातिभ्यो भेदेनातिरेकेण पृथक्त्वस्याभावात् तैरेव पृथक्त्वव्यवहारोपपत्तेरिति वार्षगण्य आचार्यो मन्यत इत्यर्थः । ननु वार्षगण्यमते मुक्तपुरुषेषु मूर्त्याद्यभावात्कथं विभागव्यवहारः स्यादिति चेन्न । बद्धावस्थायां ये मूर्त्यादयः स्थितास्त एव मुक्त्यवस्थायामपि योगिभिर्दृश्यमाना अन्योन्यभेदव्यवहारं जनयन्तीति अभ्युगमसंभवादन्यदेशादिरूपाणां तु परमाण्वादीनां प्रलये भेदव्यवहारः स्वगतसूक्ष्मकार्यभेदात् यथोक्तक्षणभेदादिभ्यश्चेति । अत्र वार्षगण्यमतस्याप्रतिषेधादिदमेव स्वमतमिति मन्तव्यम् । विवेकजज्ञानस्यैकं विषयं प्रदर्श्येदानीं सहेतुकां विवेकजज्ञानस्य मोक्षोपयोगितामाह ।

तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानम् ॥ ५२ ॥

इतिशब्दो हेत्वर्थे । यतो विवेकजं ज्ञानं सर्वविषयादिरूपम् अतः सर्वत्र दोषसाक्षात्कारेण उक्तवैराग्यद्वारा संसारतारकं भवतीत्यर्थः । एतेन विवेकजज्ञानस्येदं लक्षणं बोध्यम् । अत एवानेन लक्षणेन सत्त्वपुरुषान्यताख्यातिजन्यसर्वज्ञताया अपि संग्रहात्तत्र सूत्रे सापि विवेकजज्ञानशब्देन भाष्यकारैरुक्तेति । तत्र भाष्यकारः प्रत्येकं विशेषणानि व्याचक्षाणः तारकशब्दस्यार्थापत्तिलब्धमर्थमाह । तारकमितीति । लौकिकसामग्रीं विनैव यथार्थज्ञानसामग्र्यै सत्त्वपुरुषान्यतासंयमक्षणतत्क्रमसंयमाभ्यामुद्बोधितं प्रतिभा तदुत्थं स्वप्रतिभोत्थं तदेव हि संसारतारकं घटते अतोऽर्थापत्त्या स्वप्रतिभोत्थमेव तारकशब्दार्थः । प्रतिभोत्थत्वे हेतुमाह । अनौपदेशिकमिति । नहि सर्वथा सर्वविषयकं ज्ञानं शाब्दं भवितुं युज्यते शब्दस्य सामान्यमात्रविषयकत्वात् परिच्छिन्नविषयकत्वाच्चेति । सर्वविषयमित्यत्र सर्वशब्दोऽसंकुचित इत्याह । सर्वविषयमिति । सर्वविषयकत्ववचनादित्यर्थः । अतीतेति । अतीतादिरूपं सर्वमित्यनुवादोऽन्वयार्थः पर्यायैः स्वगतविशेषैः सर्वथा निःशेषैः विषयीकरोतीत्यर्थः । नास्ति क्रमः पौर्वापर्यं यत्र ज्ञानइत्यक्रमम् । अक्रमान्तविशेषणैरेकं वाक्यतात्पर्यार्थमाह । एकक्षणोपारूढमित्यादिना । आरोहोऽज्ञाताद्बुद्धिवृत्ताविति । विवेकजज्ञानस्याखिलसिद्धान्ते निर्वचनस्य बीजमाह । एतदिति । परिपूर्णशब्दार्थं स्वयं व्याचष्टे । अस्यैवांश इति । अस्यैव सूर्यतुल्यस्य विवेकजज्ञानस्यांशो योगप्रदीपः, कः इत्याकाङ्क्षायामाह । मधुमतीति । स्थान्युपनिमन्त्रणसूत्रे ऋतंभरप्रज्ञाख्यद्वितीयभूमौ योगी मधुभूमिक इत्युक्तं सैव च भूमिकाच मधुमतीति निर्दिष्टा तामादाय सप्तधा प्रान्तभूमिप्रज्ञेति पूर्वोक्तं संप्रज्ञातसमाप्तिपर्यन्तभूमिकाजातं योगप्रदीप इत्यर्थः । ते हि भूमिव्यूहा विवेकजज्ञानविषयैकदेशप्रकाशका अतोंऽशा इति भावः । ननु सवितर्कादिरूपास्तथा परिणामत्रयसंयमादिरूपाश्च याः संप्रज्ञातयोगभूमयः पूर्वोक्तास्ता

कथं योगप्रदीपतया विवेकजज्ञानांशतया च न निर्दिष्टा इति चेन्न । योग-सिद्धिकथनत्वेन तेषामत्यल्पत्वस्य विवक्षितत्वात् । प्रकृष्टभूमितया योगप्रदीपानामासामंशत्वेनैव च कथातुल्यभूमीनामंशांशत्वमपि प्राप्तमिति भावः । विष्णुपुराणे च सर्वेषामेवेतरज्ञानानां प्रदीपतुल्यत्वविवक्षया ब्रह्मविवेकजज्ञानस्य सूर्यतुल्यत्वं प्रोक्तम्

अन्धं तम इवाज्ञानं दीपवच्चेन्द्रियोद्भवम् ।
यथा सूर्यस्तथा ज्ञानं यद्विप्रर्षे विवेकजम् ॥

इति । इन्द्रियोद्भवमित्यन्येषामपि ज्ञानानामुपलक्षणम् । तदेवं संयमानां सिद्धिरूपा विभूतयो ऽतीतानागतज्ञानाद्या विवेकजज्ञानान्ता ज्ञानक्रियैश्वर्यरूपा विस्तरेणोक्ताः । तत्रायं संशयः किमेतासां विभूतीनामनन्तरमेव मोक्षो भवति आहोस्विदेतद्व्यतिरेकेणापीति । तत्र निर्णायकतयोत्तरसूत्रमवतारयति । प्राप्तविवेकेति । सूत्रेण सहान्वयः । विवेकजज्ञानाख्योत्तमसिद्ध्यपेक्षयैव सुतरामितरसिद्ध्यनपेक्षा कैवल्य इति भाष्याशयः ।

सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम् ॥ ५४ ॥

बुद्धिसत्त्वस्य पुरुषेण सह समाना यदा शुद्धिर्वक्ष्यमाणरूपा विवेकसाक्षात्काराद्भवति तदैव मोक्षो न तत्र सिद्ध्यपेक्षेत्यर्थः । इति शब्दः सूत्रान्ते तिष्ठति स च हानोपायव्यूहसमाप्तिसूचनार्थः । शुद्धिसाम्यं हेतुतः स्वरूपतश्च व्याचष्टे । यदेति । निर्धूतो रजस्तमोद्रव्यरूपो मलो यस्य तत्तथा । अत एव विवेकख्यातिमात्रे ऽधिकारः कर्त्तव्यता यस्य न तु सिद्ध्यादौ तत्तथा ततश्च दग्धानि अनागतक्लेशरूपाणि विपाकाख्यसंसारबीजानि यत्र तत्तथा । एवं यदा बुद्धिसत्त्वं भवति तदा शुद्ध्या पुरुषस्य स्वरूपमिव तत् भवति अनेन शुद्धिसाम्ये हेतुरुक्तः बुद्धेर्दुःखाद्यात्मकत्वान्नात्यन्तं शुद्धिसाम्यं कदापीत्येतत्प्रतिपादनायेवशब्दप्रयोगः । यस्मिन्नंशे साम्यं तदाह । पुरुषस्येति । बुद्धिधर्मत्वात्पुरुषे उपचरितमात्रस्य प्रत्ययाविशेषाख्यभोगस्याभावः पुरुषस्य शुद्धिः *बुद्धेरपि जीवन्मुक्तदशायां विवेकित्वेन

* बुद्धिधर्मत्वादित्यादि शुद्ध्यन्तं पुस्तकान्तरे नास्ति ।

तादृशो भोगो नास्तीति शुद्धिसाम्यमित्यर्थः । अत्र साक्षितामात्ररूपभोग- व्यावर्त्तनतयोपचरितेत्युक्तं पुरुषस्य प्रत्ययाविशेषरूप एव हि भोग उपचरितो ऽविवेकस्योपाधिधर्मत्वात् । चिदवसानतारूपस्तु सांख्यसूत्रोक्तो भोगः स्वत इति, तथा च साक्षी निरभिमान एवं चित्तस्य निरभिमानत्वमेव मोक्षहेतु नैश्वर्यादिकमिति पर्यवसितोऽर्थः । एतस्यामिति । एतस्यां शुद्धिसाम्यावस्थायां जातायां प्रारब्धप्रतिबन्धनिवृत्त्यनन्तरं कैवल्यं भवति ईश्वरानीश्वरादिसाधारण्येनेत्यर्थः । स्वतन्त्रज्ञानक्रियाशक्तिमानत्रेश्वरः । ज्ञाने पुनरिति । ज्ञानान्तरे काप्यपेक्षा नास्तीत्यर्थः । ननु विवेकसाक्षात्कारहेतौ तत्संयमे सत्यवश्यमेव सार्वज्ञादिकं भविष्यति तत्कथमनीश्वरस्य वेत्युच्यत इति चेत् न । संयमे सत्यपि कामनां विना सिद्ध्यनुत्पत्तेः यागे सत्यपि स्वर्गानुत्पत्तिवत् । किं च यमनियमाद्यङ्गवैगुण्यादपि सिद्ध्यनियमः तादृशाङ्गवैगुण्येऽप्यभिमाननिवृत्त्याख्यदृष्टद्वारा कदर्यवन्मोक्षः संभवत्येवेति । ननु चेत् कैवल्ये सिद्ध्यपेक्षा नास्ति तर्हि किमर्थं मोक्षाख्यहानस्योपायमध्ये सिद्धीनां कथनमित्याशङ्कायामाह । सत्त्वशुद्धिद्वारेणेति । सत्त्वस्य बुद्धिसत्त्वस्य शुद्धिर्वैराग्यादि तद्द्वारेण मोक्षोपयोगितयेति शेषः । ऐश्वर्यं क्रियाशक्तिरणिमादि ज्ञानं विवेकज्ञानान्तमुपक्रान्तं प्रोक्तं सूत्रजातेन । परमार्थतस्तु सत्त्वपुरुषान्यताज्ञानादेवाज्ञाननिवृत्त्यादिदृष्टद्वारा कैवल्यमित्यर्थः । अत्र चरितार्थाधिकारा इत्यादिना कैवल्यस्वरूपमुक्तं कैवल्ये पुरुषार्थमाह । तदेति । तदा सुखदुःखमोहात्मकसत्त्वादिगुणादर्शने चित्तज्योतिर्वियोगात्स्वरूपमात्रज्योतिरतो दुःखादिप्रतिबिम्बरूपमलरहितः सन् केवली भवति केवलेषु मुक्तेषु नित्यमुक्त ईश्वरे वा ऽविभागं गच्छतीत्यर्थः । तथा च दुःखभोगनिवृत्तिरेव पुरुषार्थ इति । व्याख्यातानि हानोपायस्य विवेकख्यातेः साधनानि योगस्य चाङ्गानि यमादीनि ससिद्धीनि ॥

इति श्रीपातञ्जलभाष्यवार्त्तिके श्रीविज्ञानभिक्षुनिर्मिते विभूतिपादस्तृतीयः ॥ ३ ॥

(शेषमये)

काशीस्थराजकीयप्रधानपाठशालायां { सांख्ययोगाध्यापकतात्याशास्त्र्यपरनामा पटवर्धनोपाह्वो रामकृष्णशास्त्री । ज्योतिषशास्त्राध्यापकः केशवशास्त्री च ।

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 381. VOL. VI.)

दल विशरणे ॥ दलति । णौ घटादित्वाद्दलयति । दाडिमम् । दालशब्दात् घञन्तात्तेन निवृत्तमित्यत्र विषये भावप्रत्ययान्तादिमज्वक्तव्य इतीमच्, डलयोश्चाभेदः । कुं दलतीति कुद्दालः पृषोदरादिः । अयं घटादावपि ॥ ५३९ ॥

श्वल श्वल्ल आशुगमने ॥ श्वलति । शश्वाल । अश्वालीत् । शिश्वलिषति । शाश्वल्यते । श्वालयति । अशिश्वलत् । श्वल्लति । अश्वल्लीत् । अत्रालृकारात्परस्य लकारस्याकारसमीपत्वाभावादतो ल्रान्तस्येति वृद्धिर्न भवति ॥ ५४१ ॥

खोल्ल खोर्ऋ गतिप्रतिघाते ॥ खोलति । चुखोल । खोलयति । अचुखोलत् । ऋदित्त्वान्नोपधाह्रस्वः । खोडः खञ्जः । पचाद्यच् डलयोरभेदः । एवं खोरतीत्यादि ॥ ५४३ ॥

धोर्ऋ गतिचातुर्ये ॥ धोरति । धोरिता । अदुधोरत् । धोरितकोऽश्वानां गतिविशेषः । निष्ठान्तात्संज्ञायां कन् ॥ ५४४ ॥

त्सर छद्मगतौ ॥ त्सरति । तत्सार । तत्सरतुः । त्सरिता । अत्सारीत् । 'अतो ल्रान्तस्ये'ति वृद्धिः । तित्सरिषति । तात्सर्यते । तात्सरीति । तात्सर्ति । तात्सर्षि । अतात्सः । त्सरुः 'भृमृशीतृचरित्सरितनिधनिमस्जिभ्य उरि'ति उप्रत्ययः । त्सरौ कुशलः त्सरुकः 'आकर्षादिभ्यः कन्' इति सप्तम्यन्तात् कुशल इत्यर्थे कन् ॥ ५४५ ॥

क्मर हूर्छने ॥ क्मरति । चक्मार । क्मरिता । अक्मारीदित्यादि पूर्ववत् ॥ ५४६ ॥

अभ्र वभ्र मभ्र चर गत्यर्थाः चरतिर्भक्षणार्थोऽपि ॥ अभ्रति । आनभ्र । अभ्रिता । मा भवानभ्रीत् । अलृकारात्परस्य रेफस्याकारसमीपत्वाभावा'दतो ल्रान्तस्ये'ति न वृद्धिः । अबिभ्रिषति । अभ्रयति । आबिभ्रत् । आबभ्रत् । इत्यत्र रेफस्य हलः परत्वादयम्परत्वाच्च हलो यमामिति पाक्षिको लोपो न भवति,

तत्र यथासंख्याश्रयणात् तथा चोत्तरसूत्रे सवर्णग्रहणमर्थवत् । उक्तं च वृत्त्यादौ सवर्णग्रहणस्य फलं शिण्ढीत्यादौ यथासंख्यनिरासः । अभ्रम् । अच् । अमो वा व्युत्पादयिष्यते । अभ्री इनन्तः काष्ठकुद्दालः । अभ्रकम् । संज्ञायां कन् । बभ्रति । बबभ्र । बभ्रिता । बिबभ्रिषति । बाबभ्र्यते । उक्तो रेफे लोपाभावः । बाबभ्र्ति । भकाररेफतकाराः संयुज्यन्ते । 'अनचि चे'ति यकारस्य पक्षे द्विर्वचने 'झलां जश् झशी'ति पूर्वस्य जश्त्वेन बकारभकाररेफतकाराः द्रष्टव्याः । लङि तिप्सिपोर्हल्ङ्यादिलोपे संयोगान्तलोपे च 'झलां जशोन्त' इति जश्त्वे च 'वावसान' इति चर्त्वे अबाबब् । अबाबप् । एवं मभ्रतीत्यादि । चरति । चचार । चेरतुः । चेरुः । चरितेत्यादि । अचारीत् । 'अतो ल्रान्तस्येति' वृद्धिः । चिचरिषति । चर्य्यते । लुपसदचरेति भावगर्हायामेव यङ् । 'चरफलोश्चे'त्यभ्यासस्य नुकि 'उत्परस्यात' इत्युत्वे तस्य हल्परत्वे 'हलि चे'ति दीर्घः । चञ्चुरीति । चञ्चूर्ति । अत्र दीर्घस्य पूर्वत्रासिद्धत्वेन प्राप्तो लघूपधगुणः उदिति तपरकरणसामर्थ्याच्च भवति तपरत्वं हि विकारनिवृत्त्यर्थम् । यद्येवं दीर्घोपि निवर्त्तेत इति न मन्तव्यम् । यतस्तपरत्वेन निवृत्तौ प्रसक्तायामपि दीर्घत्वमसिद्धम् । अचञ्चूः । लङि तिप्सिपोर्हल्ङ्यादिलोपे रेफस्य विसर्ज्जनीयः । यदायमुत्पूर्वः सकर्म्मकस्तदा 'उदश्चरः सकर्मकादि'ति तङ् गुरुवचनमुच्चरन्त इति उत्क्रम्य गच्छन्तीत्यर्थः । तथा समुपसृष्टा 'त्समस्तृतीयायुक्ता'दिति तङ् अश्वेन सञ्चरत इति । सम इतीयं षष्ठी तेन व्यवहितेपि भवति अश्वेन समुदाचरत इति । चर्य्यम् । गदमदचरेति भावकर्मणोर्यत् । अनुपसर्गे इति वचनात्सोपसर्गे उपचार्य्यमिति ण्यदेव । आचर्य्यो देशः 'चरेराङि चागुराविति' यत् । गुरौ त्वाचार्य्य इति ण्यदेव, आचार्य्यस्य स्त्री आचार्य्यानी । इन्द्रवरुणेत्यादिना ङीषानुकौ । 'आचार्य्यादणत्वं चे'ति णत्वाभावः । चरतीति चरः । चरडिति पचादिपाठादच् टित् । स्त्रियां चरी । चरस्य गोत्रापत्यं चारायणः । 'नडादिभ्यः फगि'ति षष्ठ्यन्ताद्गोत्रापत्ये फक् फस्यायनादेशः । चराचरः । 'चरिचलिपतिवदीनां वा द्वित्वमच्याक्चाभ्यासस्ये'ति अचि पक्षे द्विर्वचनम् । अभ्यासस्यागागमः, आगमसामर्थ्याच्च हलादिशेषः । अन्यथादेशमेव कुर्यात् । दीर्घोच्चारणसा-

मध्यमेन ह्रस्वः । कल्याणाचारः । कल्याणाचारा । शीलिकामीत्यादिना कर्म्मण्युपपदे णः । कुरुषु चरतीति कुरुचरः 'चरेष्ट' इत्यधिकरणे उपपदे टप्रत्ययः । टित्त्वात् स्त्रियां । कुरुचरी भिक्षाचरः । 'भिक्षासेनादायेषु चे'ति भिक्षादिषूपपदेषु टप्रत्ययः । एवं सेनाचरः आदायचर इत्यनधिकरणार्थमिदं सूत्रम् । चरिष्णुः । अलंकृञित्यादिना इष्णुच् । अतिचारी । अपचारी । संपृचादिना ताच्छीलिको घिनुण् । ब्रह्म वेदस्तदर्थं व्रतं चरतीति ब्रह्मचारी । सुप्यजाताविति णिनिः समानो ब्रह्मचारी सब्रह्मचारी । 'चरणे ब्रह्म चारिणी'ति चरणे गम्यमाने समानस्य सभावः । चरणशब्दः शाखाध्यायिषु रूढः सब्रह्मचारिण इमे साब्रह्मचाराः । 'नान्तस्य टिलोपे सब्रह्मचारिपीठसर्प्पिकलापिकौथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यान'मिति टिलोपः । चर्य्यतेऽनेनेति चरित्रम् । अर्त्तिलूधूसूखनसहचर इत्र इतीत्रः करणे प्रज्ञादिपाठात्स्वार्थे ऽणि चारित्रम् । गोचरो विषयः सञ्चरो मार्गः । गोचरसञ्चरेत्यधिकरणे घञ्प्रत्ययान्तो निपात्यते । अत्र सञ्चरत्यनेनेति सञ्चर इति वृत्तिः । तत्र सुधाकरः । 'समस्तृतीयायुक्तादिति' तङ्भाव्यमिति । परिचर्य्यापरिसर्य्येत्यादिना स्त्रियां भावे शे यक् । चरितं तदिति चर्म । 'मनि'ति मन् । अयं 'चोणादयो बहुलं' 'भूतेपि दृश्यन्त' इति भूते । चर्माण्यस्याः सन्ति चर्मण्वती नदी । 'आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती'ति मतुपि नलोपाभावो णत्वं च संज्ञायां निपात्यन्ते । चर्मी । 'व्रीह्यादिभ्यश्चे'ति मत्वर्थ इनिः नस्तद्धित इति टिलोपः । चर्मिणोऽपत्यं चार्मिकायणिः । 'वाकिनादीनां कुक्चे'ति फिञ् कुगागमः । कुकि नान्तत्वाभावेऽपि चर्मिणोर्नलोपश्चेति वचनाच्चलोपः । सर्वचर्मणा कृतः सर्वचर्मीणः । सार्वचर्मीणः । 'सर्वचर्मणः कृतः खखञावि'ति कृत इत्यर्थे तृतीयान्तात् अस्मात् खखञौ सर्वचर्मणा इत्यसमर्थः समासः यतः सर्वस्य कृत इत्यनेन सम्बन्धो भृत्यादावुक्तः । चर्मणः कोशश्चार्मः । 'चर्मणः कोशउपसंख्यानमि'ति टिलोपः अन्यथा 'नि'ति प्रकृतिभावाच्चार्मणं चरुः । चारु । सनिजनिचरीत्युण् प्रत्ययः । चरुः । भूमृशीङ्चरीत्युप्रत्ययः । अयं हि भीमादित्वादपादाने चरन्त्यस्मादिति हि व्युत्पत्तिः । चरकः । वुक् । चरकेण प्रोक्तमपि चरकम् ।

तेन प्रोक्तमित्यण् 'कठचरकाल्लुगि'ति लुक् चरको नाम वैशम्पायनः । उक्तं च कलापिवैशम्पायनान्तेवासिभ्यश्चेत्यत्र अलबिश्चरकः प्राचां पतिलिटिकमलाद्दुभावात्युपादाय चरको नाम वैशम्पायन इति तत्राभेदविवक्षायां भव्यादीनामिदं विशेषणं चरकाय हितं चारकीणम् । 'माणवचरकाभ्यां खञि'ति तस्मै हितमिति विषये खञ् । चर सञ्चयनइति चुरादौ ॥ ५५० ॥

ष्ठिवु निरसने ॥ सुब्धातुष्ठिवुष्वष्कतीनां प्रतिषेधइति प्रतिषेधः सत्वस्य । अस्य द्वितीयस्थकारष्ठकारो वेति वृत्तिः आचार्येण शिष्येभ्य उभयथा प्रतिपादनात् उभयमपि प्रमाणमिति व्याख्यातारः । ष्ठीवति । 'ष्ठिवुक्लमुचमां शिती'ति दीर्घः । तिष्ठेव । तिष्ठिवतुः । अभ्यासे खयः शेषः । ष्ठेविता । ष्ठेविष्यति । ष्ठीवतु । आशिषि ष्ठीव्यात् । 'हलि चे'ति दीर्घः । अष्ठेवीत् । तिष्ठेविषति । तुष्ठ्यूषति । सनीवन्तर्धे ति सनः पक्षे इडागमः तदा च 'हलन्ताच्चे'ति सनः कित्वं वलि लोपं बाधित्वा च्छ्वोः शूडिति ऊठि यणादेशे द्विवचनम् । अत्र वर्णमात्राश्रयत्वेन चान्तरङ्गे यणि कर्तव्ये बाह्यप्रकृतिप्रत्ययाश्रयत्वेन बहिरङ्गस्योठोऽसिद्धत्वं न भवति नाजानन्तर्यइति निषेधात् । तेष्ठीव्यते । ष्ठेवयति । अतिष्ठिवत् । ऊड्भाविनां वकारान्तानां यङ्लुङ्नास्तीति तेवतावुक्तम् । ठकारपक्षे सर्वत्राभ्यासे टकार उदाहार्यः । टिष्ठेवेत्यादि । ष्ठेवित्वा । ष्ठ्यूत्वा । उदित्त्वादिड्विकल्प इति 'न क्त्वासेडि'ति कित्त्वनिषेधाद्गुणः अन्यदा तु कित्त्वादूठि यणादेशः । ष्ठ्यूतः । ष्ठ्यूतिः । 'यस्य विभाषा'ति तुत्रेत्यनिट्त्वम् । ष्ठीवनम् । ष्ठेवनम् । पृषोदरादित्वात्पक्षे दीर्घः । तथा च चान्द्रसूत्रम् । ष्ठिवुसिवोर्दीर्घश्चेति । अयं दिवादावपि ॥ ५५१ ॥

जि जये ॥ अत्र मैत्रेय उत्तरधातुसादृश्यानुरोधेनाजन्तोप्यत्र निर्दिश्यतइति । इह जय उत्कर्षप्राप्तिरित्यकर्मकोयम् । यस्त्वयेऽभिभवार्थः स सकर्मकः । यदाह देवः । जयिजयाभिभवयोराद्येर्थे ऽसावकर्मकः । उत्कर्षप्राप्तिराद्योर्थो, द्वितीयार्थे सकर्मक इति । जयति । जिगाय । जिग्यतुः ।

जिगयिथ । जिगेथ । जिग्यिव । 'सन्लिटोर्जे'रित्यभ्यासादुत्तरस्य कुत्वं चकारः । अजन्तत्वादनिट्त्वे क्रादिनियमादिट्, थलि तु भारद्वाजनियमादिड्विकल्पः । अजादौ क्ङिति लिटि एरनेकाच इति यण् । जेता । जेष्यति । जयतु । अजयत् । जयेत् । जीयात् । अकृत्सार्वधातुकयोरिति दीर्घः । अजैषीत् । जिगीषति । 'इको झलि'ति सनः कित्त्वान्न गुणः । 'अज्झनगमां सनि' अजन्तानां हन्तेर्गमेश्च झलादौ सनि दीर्घः । पूर्ववदभ्यासात्परस्य कुत्वम् । जेजीयते । जेजयीति । जेजेति । जेजितः । जेज्यति । अजादौ क्ङिति यण् जापयति । 'क्रीङ्जीनांणा' वित्येचः स्थाने आत्वे पुगामः । अजीजपत् । विजयते । पराजयते । 'विपराभ्यां जे'रिति तङ् । अयं प्रकृतिग्रहणन्यायेन यङ्लुगन्तादपि इति विजेजिते पराजेजितइति । यङ्लुगन्तात्सनि 'सन्लिटोर्जे'रिति कुत्वं न भवति, तत्र प्रत्यासत्त्या सन्लिङ्निमित्तस्यैवाभ्यासस्य ग्रहणात् तथा च वृत्तिः । सनि लिटि च प्रत्यये जेरङ्गस्य योऽभ्यास इति । विपराभ्यामिति अत्रोपसर्गयोर्ग्रहणात् परा जयति सनेत्यादौ तङ् न भवति । अस्याकर्मकत्वात्सर्वे कृतो न सन्तीति तन्वेधान्तिभवार्थे प्रदर्शयिष्यन्ते ॥ ५५२ ॥

जीव प्राणधारणे ॥ प्राणलक्षणस्य कर्मणो धात्वर्थेनोपसंग्रहणादकर्मकोयम् । जिजीव । जीवितेत्यादि । जिजीविषति । जेजीव्यते । वकारान्तानामूठ्भाविनां यङ्लुङ् नास्तीति देवतावुक्तम् । जीवयति । अजिजीवत् । अजीजिवत् । भ्राजभासेत्यादिना णौ चङ्युपधाह्रस्वविकल्पः । यावज्जीवम् । 'यावति विन्दजीवो'रिति यावत्युपपदे णमुल् । जीविका । 'धात्वर्थनिर्देशे ण्वुल् वक्तव्य' इति ण्वुल् । जीवनस्य मूतो जीमूतः । पृषोदरादिपाठाज्जीभावः । उणादौ तु जेर्मुट् चोदात्त इति जयतौ व्युत्पादितः । जीवातुः 'जीवेरातु'रित्यातुप्रत्ययः । जैवातृकः । 'जीवेरातृकन् वृद्धिश्चे'ति आतृकनि वृद्धिः । जीवन्तः । 'नन्दिनन्दिजीविप्राणिभ्यो झच् षिदुदाशिषी'ति झच्, षिद्वद्भावात् स्त्रियां ङीषि जीवन्ती । जीवन्तस्य गोत्रापत्यं, जैवन्तायनः । 'द्रोणपर्वतजीवन्तादन्यतरस्या'मिति गोत्रापत्ये वा फक् । तदभावे इञि जैवन्तिः ॥ ५५३ ॥

पीव मीव तीव णीव स्थौल्ये ॥ पीवति । पिपीव । पीविता । पिपीविषति । पेपीव्यते । पीवयति । अपीपिवत् । एवं मीवति । तीवतीत्यादि । प्रणीवति । उपसर्गादसमासेपीति णत्वम् । पीवरः स्थूलः । मीवरः मानी । 'तीवरो निषादः । निवरो वणिक् । चित्वरेत्यादौना वरचि वलि लोपे निपात्यन्ते । टित्वात् स्त्रियां ङीपि पीवरीत्यादि । उत्वा-दिवृत्तौ तु पा पाने तेवृ देवने मार्ग मार्गणे णीञ् प्रापणइत्येतेभ्य एते ष्युत्पादिताः ॥ ५५७ ॥

च्छिवु निरसने ॥ च्छीवतीत्यादि । उदित्त्वात् क्त्वायामिड्विकल्पः । च्छीवित्वा । च्यूत्वा । इडभावे ऊठि यणादेशः । निष्ठायां 'यस्य विभा-षे'तीड्निषेधात् च्यूतः । चेवुनिरसनइति चन्द्रः । चेवतीत्यादि ॥ ५५८ ॥

उर्वी तुर्वी थुर्वी धुर्वी दुर्वी हिंसार्थाः ॥ ऊर्वति । ऊर्वांचकार । ऊर्विता । ऊर्विष्यति । ऊर्वतु । और्वत् । ऊर्वेत् । ऊर्व्यात् । और्वीत् । ऊर्विविषति । ऊर्वयति । मा भवानूर्विवत् । रेफोपधत्वा'दुपधायां चे'ति सर्वत्र दीर्घः । ऊर्णः । ऊर्णवान् । ईदित्त्वाचिष्ठायामनिट्त्वे झलादिप्रत्ययपरत्वा'द्राल्लोप'इति वलोपे रेफस्य हल्परत्वाद्'हलि चे'ति दीर्घः । रषाभ्यामिति निष्ठानस्य णत्वम् एवं क्विप्यपि । 'राल्लोप' इति वलोपे 'र्वोरुपधाया इति पदत्वे दीर्घः ऊः उरौ उरः इत्यादि । तूर्वति । तुतूर्व । तूर्विता । तुतूर्विषति । तोतूर्व्यते । हलो यमामिति वकारस्य लोपो यथासंख्याच भवति । तोतूर्वीति । तोतोर्त्ति । तोतूर्त्तः । तोतूर्वति इत्यादि । पित्वचनेष्वनिट्त्वं वकारस्य झल्परत्वेनानुनासिका-दिप्रत्ययपरत्वेन च राल्लोपे लघूपधगुणः । 'हलि चे'ति दीर्घत्वं तु गुणे पूर्वत्रासिद्धम् । ङित्स्वनेनैव दीर्घः । तोतूर्वतीत्यत्र परत्वाचित्यत्वाद् राल्लोपात्पूर्वमद्भावे कृते झल्परत्वाभावाच राल्लोपः । 'उपधायां चे'ति रेफोपधत्वाद्दीर्घः । तोतूर्त इत्यत्र वलि लोपे 'हलि चे'ति दीर्घः । अझलादित्वादननुनासिकत्वाच्च राल्लोपस्य न प्रसङ्गः । तोतोर्तु । तोतू-र्तात् । तोतूर्हि । तोतूर्त्तम् । उत्तमे राल्लोपस्यानित्यत्वादाडागमः । लुङि

तिप्सिपोः परत्वाद्राल्लोपे हल्ङ्यादिलोपे अतोतोरिति । अतातूर्वुरित्यत्र परत्वाद् जुसि झल्परत्वाभावाच्च राल्लोपः । तूर्वयति । अतुतूर्वत् । तूर्वित्वा । तूर्णः । तूर्णवान् । ईदित्वान्निष्ठायामनिट्त्वम् । एवं थूर्वति, दूर्वति, धूर्वतीत्यादि । धूः । धुरौ । भ्राजभासेत्यादिना क्विपि राल्लोपः । पदत्वे र्वोरिति दीर्घः । धूर्ष्वित्यत्र खरवसानयोरिति विसर्जनीयो 'रोः सुपि' रोरेव सुपीति नियमाच्च भवति । धूर्पतिः । 'अहरादीनां पत्यादिषु उपसंख्यान'मिति विसर्जनीयापवादः पक्षे रेफः । उभयत्राप्यादिशब्दः प्रकारइति हरदत्तः । रेफाभावे विसर्जनीयो धूःपतिः । अत्र विसर्जनीयस्य 'कुप्वोः ≍क≍पौ चे'ति पवर्गपरत्वेन पक्षउपध्मानीय उदाहार्यः । 'इणः ष'इति षत्वमपदादिकवर्गपवर्गपरविसर्जनीयविषयमितीह न भवति । धुर्यो धौरेयः । 'धुरो यड्ढकावि'ति द्वितीयान्ताद्वहतीत्यर्थे यड्ढकौ । धुर्यमित्यत्र 'हलि चे'ति दीर्घस्य 'न भकुर्छुरामि'ति प्रतिषेधः । र्वोरिति दीर्घस्तु 'यचि भ'मिति भत्वेन पदत्वस्य बाधान्न भवति । सर्वधुरं वहति सर्वधुरीणः । 'खः सर्वधुरादि'ति खः । ख इति योगविभागादुभयधुरीणः । उत्तरधुरीण इति वृत्तिः । योगविभागस्येष्टसिद्ध्यर्थत्वाद् धुरीण इत्यपि द्रष्टव्यम् । अत्र 'ऋक्पूरब्धूःपथामानक्षे' इति ऋगाद्यन्ते समासे ऽकारस्य समासान्तस्य विधाना'त्परवल्लिङ्गं द्वन्द्वतत्पुरुषयो'रिति परवल्लिङ्गतया सर्वधुराया इति निर्देष्टव्ये सर्वधुरादिति निर्देशः शब्दरूपापेक्ष इति वृत्तावुक्तम् । अनक्ष इति वचनादक्षस्य धूरक्षधूः दृढा धूरस्य दृढधूरक्ष इत्यादावकारो न भवति । सुधूरतिधूः किंधूरधूरित्यत्र 'न पूजनात्' 'किमः क्षेपे' 'नञस्तत्पुरुषादि'ति समासान्ताभावः । पूजायां स्वती परिगणितौ । 'किमः क्षेप' इत्यत्र न्यासान्तरेणापि क्षेपग्रहणं लक्षणाप्रतिपदोक्तपरिभाषया 'किं क्षेप' इति विहितस्य क्षेपविषयस्यैव तत्पुरुषस्य लाभे तत्करणात्सा च नेहास्तीति कुत्सिता धूरस्य किंधूः शकट इत्यत्रापि समासान्तो नेत्युक्तं पदमञ्जर्यां, तद्भाष्यविरोधादुपेक्ष्यमिति । अयं चाकारः समासार्थादुत्तरपदादक्षत एव समासे भवति तेन द्विधुरीत्यादावकारान्तोत्तरपदत्वाद् 'द्विगो'रिति ङीप्सिद्धः । एतच्च जेमतावुपपादितम् । एकधुरं

वर्त्तते, एकधुरीणः । एकधुरः । 'एकधुराल्लुक् चे'ति लुक् खस्य पक्षे । धूर्त्तो हस्ती । भूमृयिपवामित्यादिना तन् । पक्षेषु धूर्त्तः । 'सप्तमी शौण्डे'रिति सप्तम्यन्तं शौण्डादिना समस्यते, ब्राह्मणधूर्त्तः पोटायुवतीत्यादिना समासः ॥ ५६२ ॥

गुर्वी उद्यमने ॥ मुर्वी बन्धने ॥ गूर्वति । मूर्वतीत्यादि । गूर्वा । गुरेश्चे-त्यकारप्रत्ययः । मौर्वी । 'तस्य विकार' इत्यण् ङीप् ॥ ५६४ ॥

(शेषमग्रे)

सटीकसंक्षेपशारीरकम् ।

(*Continued from page* 438 VOL VI.)

टी० ॥ नन्विष्टसाधनताज्ञानस्य चन्द्रादौ सत्त्वेऽपि न कश्चित्तत्र प्रवर्त्तेत इति कथं तत्प्रवर्त्तकमित्याशङ्क्य, कृतिसाध्येष्टसाधनताज्ञानं प्रवर्त्तकं तच्च न चन्द्रादावस्तीति न तत्र तस्य व्यभिचार इत्याशयेनाह । इष्टाभ्युपायस्येति । च उक्तशङ्कानिवर्त्तकः । कार्यभावः कार्यत्वम् । ननु कृत्युद्देश्यस्यैव कार्यत्वं तच्च स्वतः पुरुषार्थस्यैवेति न धात्वर्थस्य तदस्तीत्याशङ्क्याह । प्रयत्ननिष्पाद्यतयेति । तृतीयेत्थंभावे प्रयत्ननिष्पाद्यतारूपः स तस्योपपन्न इत्यर्थः । ननु कार्यभावो लिङादिना ज्ञायते चेत्स एव लिङर्थोऽस्तु किमिष्टाभ्युपायत्वस्यापि तदर्थत्वकल्पनयेत्याशङ्क्य प्रयत्ननिष्पाद्यतारूपकार्यभावज्ञानस्यातिप्रसङ्गेनाप्रवर्त्तकत्वात्प्रवर्त्तकस्यैव लिङर्थत्वात्तद्विशेषितेष्टसाधनत्वं लिङर्थ इत्याशयेनाह । स चेति । कृतिसाध्येष्टाभ्युपाय एवेत्यर्थः । ननु यागादेरिष्टसाधनतया कृतिजनकेच्छाविषयतारूपकृत्युद्देश्यताप्यस्तीति तदात्मकमेव कार्यत्वं लिङर्थः किं न स्यादित्याशङ्क्य तस्य प्रत्यक्षसिद्धत्वान्न शब्दार्थत्वमित्याह । प्रत्यक्षत इति । रागनिबन्धनः फलेच्छानिबन्धनः, फलेच्छयैव हि साधनेच्छा भवतीति तथोक्तम् ॥ ४७७ ॥

मू० ॥ कार्यत्वमिच्छावशवर्त्ति किं चि-
दिष्टाभ्युपाये नियमस्य किं चित् ।
नित्यं लिङादेरवसेयमस्य
साक्षिप्रसादादितरप्रतीतिः ॥ ४७८ ॥

टी० ॥ उक्तं कार्यताद्वैविध्यं विशदयति । कार्यत्वमिति । इष्टाभ्युपाये यागादौ किं चित्कृत्युद्देश्यतारूपं कार्यत्वम् । इच्छावशवर्त्ति फलरागनिमित्तम् । नित्यं स्वाभाविकं कृतिसाध्यत्वरूपम् । तस्य धात्वर्थस्वरूपक्रियार्थप्रयुक्तत्वाविनत्वम् । अस्येष्टाभ्युपायस्य । कार्यत्वं विभज्य तत्र लिङर्थमाह । नित्यमिति । अस्येतीष्टाभ्युपायत्वं सूचितं कृतिसाध्येष्टाभ्युपायत्वं लिङाद्यवसेयमित्यर्थः । प्रत्यक्षतो रागनिबन्धन इत्युक्तं स्पष्टयति । साक्षिप्रसादादिति । प्रत्यक्षत इत्यर्थः । इतरप्रतीतिः । कृत्युद्देश्यतारूपकार्यत्वप्रतीतिः । चिकीर्षितत्वं हि कृत्युद्देश्यत्वं चिकीर्षा तु रागः स च जायमान एव नियतविषयः सन् साक्षिणावभास्यमान एव जायते मनसावसेयतया वेति प्रत्यक्षत इतरप्रतीतिरित्यर्थः ॥ ४७८ ॥

मू० ॥ ज्ञानात्यर्थे लिङ्पदं गौणमाहु-
र्ज्ञानात्यर्थः कर्तृतन्त्रो न हीष्टः ॥
यागाद्यर्थे कर्तृतन्त्रे हि मुख्यौ
लिङ्लोडादिः श्रेयसो हेतुभूते ॥ ४७९ ॥

टी० ॥ ननु कृतिसाध्येष्टसाधनत्वं कथं लिङाद्यर्थः आत्मानं पश्येदित्यादौ लिङस्तदर्थत्वायोगाच्च हि ज्ञानं कृतिसाध्यमित्याशङ्क्य, सत्यमत एव ज्ञाने न विधिः किं तु तत्र लिङ्पदं गौणमेवेत्याह । ज्ञानात्यर्थे इति । ज्ञान इत्यर्थः । तत्र हेतुः । ज्ञानात्यर्थः कर्तृतन्त्र इति । हिर्हेतौ । यस्माज्ज्ञानात्यर्थः कर्तृतन्त्रः कर्तुरिच्छाधीनो न तस्मात्तत्र लिङ्पदं गौणमित्यर्थः । तर्हि यागादावपि तत्तथैवास्त्वित्याशङ्क्य मुख्यत्वे संभवति तस्य न गौणत्वं न्याय्यमित्याह । यागाद्यर्थे इति ॥ ४७९ ॥

मू० ॥ ज्ञानात्यर्थे श्रेयसो हेतुभाव-
भागोऽबुद्धो बोध्यते लिङ्पदेन ॥
यागाद्यर्थे श्रेयसो हेतुभावो
मुख्यो बोध्यः कर्तृतन्त्रो न गौणः ॥ ४८० ॥

टी० ॥ केन तर्हि मुख्यार्थगुणेन ज्ञाने लिङ्पदप्रवृत्तिरिति जिज्ञासायामाह । ज्ञानात्यर्थे श्रेयस इति । लिङर्थे हि कृतिसाध्यत्वं श्रेयः साधनत्वं चेति भागद्वयमस्ति तत्रात्मज्ञाने सर्वानर्थमूलाविद्यानिवृत्तिरूपश्रेयःसाधनत्वभागो लिङ्पदेनान्यतोऽनवगतो बोध्यत इति कृतिसाध्यताभागाभावादेव तत्तत्र गौणमित्यर्थः यागादौ तु तद्वयमस्तीति तत्र तन्मुख्यमेवेति प्रागुक्तं विशदयति । यागाद्यर्थ इति । कर्तृतन्त्र इत्यनेन यागादौ कृतिसाध्यत्वमपि सूचितमतस्तत्र मुख्य एव लिङर्थ इत्यर्थः ॥ ४८० ॥

मू० ॥ यागाद्यर्थे मुख्यता यद्वदस्य
ब्रह्मज्ञानस्यान्तरङ्गेषु तद्वत् ॥
तर्कादीनां कर्तृतन्त्रत्वहेतो-
र्ज्ञानादर्वाग्गौणता हेत्वभावात् ॥ ४८१ ॥

टी० ॥ तर्हि किं वेदान्ते ज्ञान इव न क्वापि विधिरित्याशङ्क्य ज्ञानोपाये श्रवणादौ पुरुषेच्छावशवर्तिनि सोऽस्तीति सदृष्टान्तमाह । यागाद्यर्थे मुख्यतेति । मुख्यता मुख्यार्थता । अस्य लिङादिपदस्य । अन्तरङ्गेषु प्रवृत्तिपर्यन्तमुत्तानन्तरमवश्यानुष्ठेयेषु श्रवणादिषु । तत्र हेतुमाह । तर्कादीनामिति । श्रवणं ह्यद्वितीये ब्रह्मणि वेदान्तानां तात्पर्यावधारणहेतूपक्रमोपसंहारैक्याद्युपपत्तिप्रतिसंधानम् । एवं वियदादेश्चेतनं कर्तारं विना कार्यत्वाद्यनुपपत्तिज्ञानं मननम्, तच्च ब्रह्मणि तर्क एवेति तथोक्तम् । एवमद्वैतब्रह्मणो निरन्तरानुसन्धानरूपं निदिध्यासनमपि कर्तृतन्त्रमेव । तथा च ब्रह्मज्ञानसाधने श्रवणादौ तर्करूपेण कृतिसाध्यताभागस्यापि भावाद्यागादाविव लिङादेर्मुख्यार्थतेति भावः । नन्वद्वैतब्रह्मा-

Digitized by Google

वर्णतिसमये क्रियाकारकाद्यभावात्कथं लिङादिमुख्यार्थसंभवस्तत्राह । ज्ञानादर्वागिति । अविद्यादशायां विधिनिमित्तं सर्वमस्त्येव । न चैवमात्मनः श्रवणादिविधिशेषत्वापत्तिः, तेषामेव तच्छेषत्वेनात्मनोऽनन्यशेषत्वादिति भावः ॥ ४८१ ॥

मू० ॥ भूतस्य भव्याय यथोपदेशः
क्रियापरे वस्तुपरे तु काण्डे ॥
न ह्रीष्टमेवं विपरीतमस्मि-
न्भव्यस्य भूताय सदोपदेशः ॥ ४८२ ॥

टी० ॥ ननु भूतं भव्यायोपदिश्यत इति शबरस्वामिवचनात्सिद्धस्य सर्वस्य भव्यार्थत्वप्रतीतेः कथमात्मनोऽनन्यशेषत्वमित्याशङ्क्य प्रागुक्तमर्थं व्यवधानेन तद्विस्मरणसंभवात् स्मारयति । भूतस्येति । ब्रीहिकपालादेरित्यर्थः । वस्तुपरे ब्रह्मपरे । विपरीतं भूतभव्यपरत्वविपरीतम्, भव्यस्य यज्ञादेः श्रवणादेश्च भूताय सिद्धस्वरूपमोक्षाय ॥ ४८२ ॥

मू० ॥ भव्यप्रतीतावुपयोगभाजो
भवन्ति कार्त्स्न्येन च सिद्धवादाः ॥
क्रियाप्रधानेन तथाऽत्र किं तु
भूतप्रतीतौ खलु भव्यवादाः ॥ ४८३ ॥

टी० ॥ उक्तविभागमेवोपपत्तित उपपादयंस्तद्वाक्ययोरपि तथैव शेषशेषितेत्याशयेनाह । भव्यप्रतीताविति । ब्रीहिकपालादेर्हि साक्षात्परंपरया वा यागादिक्रियानिर्वृत्तिद्वारा कार्यार्थत्वमस्तीति क्रियाप्रधाने कर्मकाण्डे भूतं भव्यार्थमुक्तमिति न्यायमूलं तद्वाक्यं तद्विषयतयोपपन्नमत्र तु तन्न्यायाभावाच्च तद्वाक्यं प्रवर्तेत इत्याशयेनाह । न तथेति । अत्र ब्रह्मकाण्डे अद्वैतब्रह्मणः कुत्रापि कथमपि कार्ये उपयोगाभावात्प्रत्युत ब्रह्मसाक्षात्कार एव श्रवणादेर्भव्यस्य पर्य्यवसानमिति तन्न्यायवैपरीत्यमेव युक्तमितिभावः ॥ ४८३ ॥

Digitized by Google

मू० ॥ भव्यप्रतीतौ न हि कश्चिदर्थो
भूतप्रतीतौ पुनरस्ति मुक्तिः ॥
श्रोतव्य इत्यादि ततो विधानं
भूतोपदेशानुगुणं समस्तम् ॥ ४९४ ॥

टी० ॥ नन्वात्मप्रतीतेर्भव्यतया तदर्थश्रवणादेः कथं भूतशेषत्व-मित्याशङ्क्य तत्प्रतीतेरपि तदभिव्यञ्जकतया तदर्थत्वात्तद्धेतोरपि तदर्थ-त्वमेवेत्याशयेन भूतप्रतीतौ खलु भव्यवादा इत्युक्तमेव विवृणोति । भव्यप्रतीतौ न हीति । अर्थो मुख्यप्रयोजनम् । फलितमाह । श्रोतव्य इति । ततः श्रवणादेः स्वतो मुख्यप्रयोजनत्वात् । श्रोतव्य इत्यादिरूपं समस्तं विधानं सिद्धाद्वैतब्रह्मोपदेशानुगुणमिति तच्छेषमित्यर्थः ॥ ४९४ ॥

मू० ॥ आदाय मुख्यगुणलक्षणिकप्रवृत्ती-
र्भव्यप्रतीतिजनकैः सह भूतवादाः ॥
संबन्धिनो विधिवचःसु तथात्र सर्वे
भव्यार्पणाः परिबृढप्रतिपादकेन ॥ ४९५ ॥

टी० ॥ एवं भव्यानां भूतानां च काण्डद्वयेऽपि परस्परं विपरीतं शेषशेषित्वमुपपाद्य तद्वाक्ययोस्तु वायुर्वै क्षेपिष्ठत्वादेर्भव्यार्थत्वाभावेन तदभावमाशङ्क्य तदुपपादयति । आदायेति । विधिवचस्सु विधिप्रकर-णेषु ये भूतवादा भूतार्था अर्थवादादयस्ते मुख्यगुणलक्षणिकवृत्तीरादाय मुख्याद्यन्यतमया वृत्त्या स्वर्गाद्यादित्यादिसादृश्यप्राशस्त्यादि बोधयन्तो भव्यप्रतीतिजनकैरनुष्ठेयार्थविधायकैः सह संबन्धिनो भवन्ति संबध्यन्ते यथा तथात्र काण्डे भव्यार्पणा भव्यबोधकाः श्रोतव्यादिशब्दाः परिबृढस्य प्रभोर्ब्रह्मणः प्रतिपादकेन वाक्येन संबन्धिन इत्यनुषङ्गः ॥ ४९५ ॥

मू० ॥ सिद्धार्थवादिवचनेषु न गौणतादि-
दोषाय कर्मपरवाक्यगतेषु यद्वत् ॥

कार्यार्थवादिवचनेषु न गौणतादि-
दोषस्तथोपनिषदीति समानमेतत् ॥ ४८६ ॥

टी० ॥ एवं ब्रह्मात्मादिशब्दानां वेदान्तगतमुख्यार्थशब्देभ्यः प्राधान्यमुपपाद्य तत्फलं गुणे त्वन्याय्यकल्पनेति न्यायेन ब्रह्मादिपदानुगुण्येनैव मुख्यं नेयमिति सदृष्टान्तमाह । सिद्धार्थवादीति । कर्मपरवाक्यानि विद्धयुद्देशास्तद्गतानि तदेकवाक्यतामापन्नानि यानि सिद्धार्थबोधकपदानि तेष्वित्यर्थः । न गौणतादिर्दोषायेति तेषां गुणभूतार्थत्वाद्गुणवचने च प्रधानानुरोधेन गौणतादिर्न दोषायेत्यर्थः । दार्ष्टान्तिकमाह । कार्यार्थवादीति । ब्रह्माप्येति ब्रह्मैव भवतीत्यादिवचनेष्वित्यर्थः । एतद्गुणेऽन्याय्यवृत्तिकल्पनम् ॥ ४८६ ॥

मू० ॥ मानेन मेयावगतिश्च युक्ता
धर्मस्य जाड्याद्विधिनिष्ठकाण्डे ॥
मेयेन मानावगतिस्तु युक्ता
वेदान्तवाक्येष्वजडं हि मेयम् ॥ ४८० ॥

टी० ॥ किं च यथा मानमेयभावः काण्डद्वये विपरीत एवं भूतमुख्ययोर्गुणप्रधानभाववैपरीत्यमपि न्याय्यमेवेत्याशयेनाह । मानेनेति । श्रुत्यादिप्रमाणेनेत्यर्थः । मेयस्य धर्मस्यावगतिः । चोऽवधारणे । मानेन सम्बध्यते । तत्र हेतुः । धर्मस्य जाड्यादिति । मेयेन स्वप्रकाशचैतन्येनैव वेदान्तप्रतिपाद्येन मानस्य वेदान्ततज्जन्यवृत्त्यादेरवगतिर्युक्ता चैतन्येनैव हि जडस्यावगतिर्घटादौ दृष्टेत्यर्थः । मेयान्मानावगतौ हेतुं मनसि निधायाह । वेदान्तेति । यद्यपि स्वाविद्यानिवृत्तौ वेदान्तं तज्जन्यवृत्तिं वापेक्षते ब्रह्म, तथापि स्वसिद्धौ नापेक्षते अप्रतिबद्धस्वप्रकाशसाक्षिणस्तस्यानपेक्षत्वाज्जडं च सर्वं तद्भास्यमिति वेदान्तादपि तेनैवावगन्तव्यमित्यर्थः ॥ ४८० ॥

मू० ॥ कर्मप्रधानेऽतिमते च काण्डे
वाक्यत्वमाख्यातपदप्रयुक्तम् ॥
ब्रह्मप्रधाने श्रुतिमस्तकेऽस्मि-
न्नामप्रधाने वचनं समस्तम् ॥ ४८८ ॥

टी० ॥ नन्वस्तिर्भवन्तीपरः प्रयोक्तव्य इतिकात्यायनवचनात् क्रियापदनिमित्तैव पदानामेकवाक्यता, वेदान्ते च न क्रियापदं भवद्भिरिष्यते, अतो वेदान्तवाक्येष्वजडं हि मेयमित्यनुपपन्नमित्याद्याशङ्कां निराकृतामपि विस्मरणशीलं प्रति पुनर्निराकरोति । कर्मप्रधान इति । अतिमते अतिक्रान्ते । नामप्रधानं ब्रह्मात्मादि सुबन्तपदप्रधानम् । कात्यायनवाक्यं हि वृद्धव्यवहारमूलम्, वृद्धाश्च यत्र क्रियां तत्संसृष्टं वा प्रतिपिपादयिषन्ति तत्रैव आख्यातपदं प्रयुञ्जते यत्र तु नैवं किं तु संबन्धिविशेषं प्रकारविशेषं वा विजिज्ञापयिषन्ति तत्र देवदत्तस्येदं गृहं कुसुमितं वनमिति च तेन विनैव प्रयुञ्जतेऽतः कर्मकाण्डस्य क्रियाप्राधान्यात्तत्रैव वाक्यत्वं क्रियापदनिमित्तमिति कात्यायनस्याप्याशयः । ब्राह्मे काण्डे तु नामार्थप्राधान्यान्नामपदमेवैकवाक्यतायां निमित्तमित्याशयः ॥ ४८८ ॥

मू० ॥ कार्यप्रधानमखिलं च पदं सुबन्त-
माख्यातमेव फलतः खलु कर्मकाण्डे ॥
तद्वत्तिङन्तमपि वेदशिरःसु सर्वं
नामैव तद्धि परिनिष्ठितवस्तुनिष्ठम् ॥ ४८९ ॥

टी० ॥ ननु वेदान्तेऽप्यस्त्यादिक्रियाश्रवणात्सर्वत्र क्रियापदनिमित्तमेव वाक्यत्वमस्त्वित्याशङ्क्य यथा कर्मकाण्डे सुबन्तमपि पदं भव्यार्थं फलत आख्यातव्यवहारार्हमेव भवति । एवमत्र तिङन्तमपि फलतो नामैवातः साध्यार्थक्रियापदाभावान्नामप्रधानमेव वेदान्तवाक्यमित्याशयेनाह । कार्यप्रधानमिति । अनुष्ठेयार्थप्रधानं सुबन्तं सुबन्तमप्याख्यातम् आख्यातव्यवहारार्हम् । फलतोऽनुष्ठेयार्थप्रतीतेः । तिङन्तं तिङन्ततया प्रतीयमानम् । नाम नामव्यवहारार्हम् । अत्र हेतुस्तद्धीति ॥ ४८९ ॥

मू० ॥ आग्नेयमाश्विनमथैन्द्रमितीदृशं हि
सर्वं सुबन्तमपि भव्यपरं प्रसिद्धम् ॥
साऽस्येति तद्धितसमन्वितसन्निधाने
नामेव तद्भवति यद्भवतीति तद्वत् ॥ ४९० ॥

टी० ॥ किं नाम पदं भव्यार्थं सदाख्यातं दृष्टान्ते विवक्षितमिति जिज्ञासायामाह । आग्नेयमिति । अग्निर्देवताऽस्येत्याग्नेयः पुरोडाशः । एवमाश्विनादावपि । तथा च सुबन्तेनापि तेन द्रव्यदेवतासंबन्धद्वाराऽनुष्ठेययागप्रतीतेस्तदाख्यातवद्भव्यपरमित्यर्थः । इदानीमाख्यातपदस्यापि नामत्वे दृष्टान्तमाह । साऽस्येतीति । साऽस्य देवतेति सूत्रेण विहितो यस्तद्धितस्तत्समन्वितं यदाग्नेयादिपदं तत्सन्निधाने भवतीति यत्पदं तन्नामेव भवति । तदर्थस्यान्यव्यापारत्वेनाननुष्ठेयत्वादिति यद्वत्तद्वदित्यर्थः ॥ ४९० ॥

मू० ॥ अस्त्यस्म्यसीति च तिङन्तपदानि सन्ति
वेदान्तवाक्यनिलयानि तथापि तानि ॥
नाख्यातशब्दनिजशक्तिधुरं वहेयु-
रस्तित्वमात्रविषया हि निषक्तिरेषाम् ॥ ४९१ ॥

टी० ॥ तद्वदिति सूचितं दार्ष्टान्तिकमाह । अस्त्यस्म्यसीति । आख्यातशब्दस्य या निजा शक्तिस्तस्या धुरं भव्यार्थप्रकाशं न वहेयुरित्यर्थः । कुतो न वहेयुस्तत्राह । अस्तित्वमात्रेति । अस्तिप्रकृत्यर्थमात्रनिष्ठा ह्येषां पदानां निषक्तिः संबन्ध इत्यर्थः ॥ ४९१ ॥

मू० ॥ पूर्वापरीभूतपदार्थनिष्ठ-
माख्यातमाख्यातविदो वदन्ति ॥
कूटस्थसत्तावगतिप्रधान-
माख्यातवत्साधु तिङन्तमाहुः ॥ ४९२ ॥

टी० ॥ कस्तर्हि आख्यातपदस्य मुख्योऽर्थो यस्य नाख्यातशब्दनिजशक्तिधुरं वहेयुरित्यनेनास्त्यादिशब्दात्प्रतीतिर्निषिद्धेत इत्याकाङ्क्षाया-

माह । पूर्वापरीभूतेति । गच्छति पचतीत्यादिना हि गम्यादिधात्वर्थः पूर्वापरीभूतानेकक्षणनिचयरूपः प्रतीयत इति स एवाख्यातान्तपदस्य मुख्योऽर्थ इत्याख्यातविदो वैयाकरणा वदन्तीत्यर्थः । एवं चात्मस्वरूपसत्तापर्य्यवसाय्यस्त्यादपि चाख्यातवत्साधु शब्ददोषरहितं तिङन्तमात्रं भवति न तु पचत्यादिरिव मुख्यार्थमित्याह । कूटस्थसत्तेति ॥ ४९२ ॥

मू० ॥ अस्तित्ववस्तुविषयोपनिषन्निषत्ति-
राश्रीयते यदि तदा प्रमितं प्रमेयम् ॥
तस्यास्तदापतति मानमितत्वमेव
ह्यस्तित्वमात्मगतमभ्युपयन्ति धीराः ॥ ४९३ ॥

टी० ॥ कूटस्थसत्तावगतिमात्रनिष्ठमस्त्यादिसमभिव्याहृतमपि वेदान्तवाक्यमित्युक्तमाक्षिपति । अस्तित्वेति । अस्तित्ववस्तु सत्ता, वेदान्तानां तन्निष्ठत्वे मानान्तरप्रमितप्रमेयता तत्सिद्धानुवादता तव प्रसज्येत । कुतस्तत्राह । मानमितत्वेति । मानविषयत्वमेव हि सर्वत्रास्तित्वमिति धीरा धृष्टाः प्राभाकराः अङ्गीकुर्वन्तीत्यर्थः । आत्मगतमिति तु प्रस्तुताभिप्रायम् ॥ ४९३ ॥

मू० ॥ अथ वा मितियोग्यतास्तिता
निरवद्यास्तु समस्तवस्तुषु ॥
परमात्मनि तत्प्रतीतये
सकलं वेदशिरः प्रवर्त्तताम् ॥ ४९४ ॥

टी० ॥ ननु मानविषयत्वस्यास्तित्वे सुषुप्त्यादावात्मादेरसत्त्वापत्तिरित्यरुचेराह । अथ वेति । निरवद्या निर्दुष्टा सुषुप्त्यादावात्मादेः सत्त्वोपपत्तेरित्यर्थः । एवं चास्त्यर्थनिष्ठत्वे वेदान्तानां परमात्मनि तदनुवादायैव सकलं वेदशिरः प्रवर्त्ततां प्रवर्त्तते तच्चानुपपन्नम् । अप्रामाण्यप्रसङ्गादस्त्यर्थनिष्ठा वा तेषां माभवत्विति क्रियानिष्ठैवास्त्वित्याशयः ॥ ४९४ ॥

मू० ॥ तदसुन्दरमात्मसंविदो-
रपि सत्ता भवताभ्युपेयते ॥
न तयोर्विषयत्वहीनयो-
र्मितियोग्यत्वमितित्वसंभवः ॥ ४६५ ॥

टी० ॥ सिद्धान्ती तद् दूषयति । तदसुन्दरमिति । एवं वदता प्राभाकरेणाप्यात्मनस्तत्समवायिज्ञानस्य च सत्ताभ्युपेयेतैव । सैवं सति न सिद्ध्येत्तयोरविषयत्वात् । अत एतद्योग्यताभावाज्ज्ञानस्य स्वप्रकाशत्वादा-त्मनस्तदाश्रयतया त्वया भानस्याभ्युपेयत्वादित्यर्थः ॥ ४६५ ॥

मू० ॥ क्षितिजलदहनानिलाम्बराणां
जनिमनुमाय विभक्तताबलेन ॥
जगति हि जनिमद्विभज्यमानं
घटघटिकादि समीक्ष्यते समस्तम् ॥ ४६६ ॥

टी० ॥ नन्विदं समन्वयनिरूपणं निरालम्बनं कर्तुं कथं शक्यम्, न च ब्रह्मैवालम्बनमिति वाच्यम्, तस्याप्रसिद्धत्वात्, न हि गवादिवत्तत्प्रसिद्ध-मस्ति, न च समन्वयनिरूपणात्प्राक् शब्दतोऽपि तत्सिद्धम्, न चासंभावितं प्रमाणेन निश्चेतुं शक्यम्, तदुक्तम् ‘संभावितः प्रतिज्ञायां पक्षः साध्येत हेतु-ना न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हत” इति, न च जगत्कार्यतल्लिङ्गा-नुमानात्तत्सिद्धिः, समन्वयनिरूपणवैयर्थ्यात्; महापृथिव्यादेः कार्यत्वासिद्धे-श्चेति । मैवम् । प्रपञ्चाख्यकार्यलिङ्गतर्कसंभावितचेतनकारणस्यैवाद्वयनित्य-शुद्धज्ञानानन्दादिस्वरूपेण वेदान्तैः प्रतिपाद्यमानत्वान्नोक्तदोष इत्याशयेन जन्माद्यस्य यत इति सूत्रन्यायं व्युत्पादयितुमुपक्रमते । तत्र श्रोतृजिज्ञा-सानुरोधेन साक्षात्पुरुषार्थतया च प्रत्यगभिन्ने ब्रह्मणि तत्त्वमादिवाक्यार्थे न्यायतो निरूपिते तस्यैव तदर्थे तत्पदवाच्यतल्लक्ष्यस्वरूपन्यायजिज्ञासा-नुसारेण व्युत्क्रममाश्रित्य द्वितीयसूत्रन्यायमवतारयन् प्रथमं चेतनं जगत्का-रणमनुमातुं कार्यत्वलिङ्गस्य वियदादिपक्षधर्मत्वसिद्ध्यर्थं वियदादेः

कार्यत्वं साधयति । क्षितिजलदहनेति । जनिमुत्पत्तिं विभक्ततामा मित्वस्य बलं जनिव्याप्तिपक्षधर्मत्वयोर्ज्ञानं तेन तत्र तस्य पक्षधर्मत्वं सिद्धमिति व्याप्तिं दर्शयति । जगतीति । हिर्हेतौ । यस्माज्जगति विभज्यमानं घटघटिकादि समस्तं जनिमत्समीक्ष्यते ततोविभक्ततावलेन क्षितिजलादीनां जनिमनुमाय तर्कयन्ति । अधिकारिणश्चेतनकारणमित्यर्थिमेव संबन्धः । क्षित्यादिमहाभूतानि जायन्ते विभक्तत्वाद् घटादिवत् । ननु ब्रह्मणि व्यभिचारस्तस्यापि प्रपञ्चाद्विभक्तत्वात् । न च परमार्थतो विभक्तत्वं हेतुस्तत्र नास्तीति वाच्यम् । पक्ष(दृष्टान्त)योरपि सिद्धान्ते तदभावादिति चेत् । स्वसमानसत्ताकविभक्तत्वस्य हेतुत्वात् । प्रपञ्चे तस्य सत्त्वाद्ब्रह्मणि च तन्नास्तीति नोक्तदोषः । न चैवमप्यविद्यादौ व्यभिचार इति वाच्यम् । साध्यस्यापि तत्र सत्त्वादध्यस्तता हि जन्म वियदादेः साध्यम्, न तु प्रागसतः सत्तायोगित्वम्, तस्य क्वाप्यभावात् । न चाध्यस्तत्वमपि घटादौ परस्यासंप्रतिपन्नमिति वाच्यम्, स्वार्थानुमानस्यैवमप्यविरोधात्प्रसिद्धमस्य परं प्रति दृष्टान्तत्वसंभवाच्च । न चैवं वियदादेरप्यज्ञानवदध्यस्तत्वसंभवेन ततश्चेतनकारणानुमानं वक्ष्यमाणं न स्यादिति वाच्यम् । चेतनाधिष्ठानत्वस्यैव वक्ष्यमाणप्रतिज्ञयाभिप्रेतत्वात् । न चाप्रयोजकतास्य हेतोरिति वाच्यम् । श्रुत्यवधृताद्द्वितीयत्वस्य विपक्षे बाधप्रसङ्गात् । अथ वा वियदादिमहाभूतानि भूजत्वे सत्यनादीनि न भवन्ति विभक्तत्वाद् घटादिवत् । एवं च साध्यं ब्रह्मण्यज्ञाने च विशेषणाभावकृतमस्त्येव, परप्रसिद्धं च निषेध्यमिति न कोऽपि दोषः । विपक्षे बाधकं चोक्तमेवाचाप्यनुसन्धेयमिति भावः ॥ ४८९ ॥

मू० ॥ क्षितिजलदहनेषु तत्प्रदेशा-
स्त्वनिशमिहितानुपलभ्य तद्बलेन ॥
क्षितिजलदहनत्वलिङ्गमार्गा-
दपि जनिमेष्वनुमाय तर्कयन्ति ॥ ४९० ॥

टी० ॥ किं च महापृथिवी जन्मवती क्षितित्वात् जातपृथिवि-

तैजसेऽव्यात् । एवं महत्त्वं पवनवज्जलत्वमप्यनुक्रान्ताविस्तृतजलवत् । तं भवनादुद्भूतवदनादिदृष्टान्तेन महतस्तेजःप्रभृतेरपि तदनुमेयमित्याह । क्षितिजलपवनैर्व्याप्ति । स्पष्टम् ॥ ४९७ ॥

मू० ॥ जनिमदवयवत्वं चेतनादेव हेतो-
र्घटवदिति पुनस्तत्कारणे चेतनत्वम् ॥
अनुमिमत उदर्के कार्यतालिङ्गतोऽमी
जगति हि परिदृष्टं चेतनादेव कार्यम् ॥ ४९८ ॥

टी० ॥ एवं कार्यत्वहेतोः पक्षधर्मत्वे सिद्धे तद्धेतुकं तर्कयन्तीति सूचितं चेतनकारणानुमानं दर्शयति । जनिमदिति । एतन्महापृथिव्यादीति पक्षनिर्देशः । जनिमदिति तत्र सिद्धे हेतुनिर्देशः । पुनः शब्दः सिद्धान्ते विशेषद्योती । तमेव विशेषमाह । चेतनादेवेति ॥ विमतमुपादानाभिज्ञचेतनप्रभवं कार्यत्वात्संमतवत् । घटादेरपि सिद्धान्ते तथात्वान्न साध्यवैकल्यम् । कुलालादिकं च परं प्रति दृष्टान्तोऽस्त्विति तत्कारणे चेतनत्वं तस्य पृथिव्यादेश्चेतनकारणकत्वम् । उदर्के पक्षे हेत्वसिद्ध्यनन्तरं मुमुक्षवोऽनुमिमत इत्यर्थः । तत्रापि घटादौ कुलालादिजन्ये उक्तसाध्यव्याप्तिरस्तीत्याशयेनाह । जगतीति । हिः प्रसिद्धौ कार्यलिङ्गमनुमानमपि चेतनकारणस्वरूपावधारणे न निरपेक्षं समर्थमपि तु तत्स्वरूपं प्रसाधयन्त्याः श्रुतेरुक्तविधया चेतनकारणमुपस्थापयदर्थं संभावयतीति तर्क एवेति तर्कयन्तीति सूचितम् ॥ ४९८ ॥

मू० ॥ जगदुदयनिमित्तं चेतनं किं नु नाना
किमु भवतु तदेकं सर्ववित्सर्वशक्ति ॥
इति भवति तु पश्चात्कारणे चेतनेऽस्मि-
न्ननवगतिनिमित्तः संशयो दुर्निवारः ॥ ४९९ ॥

टी० ॥ नन्वनुमानाच्चेतनकारणसिद्धौ वैशेषिकादिमत इव तदेव सर्वज्ञसाधकं तत्र प्रमाणमस्तु किं तस्य तर्कताभ्युपगमेन तत्राह वेदान्त-

वैयर्थ्यमित्याशङ्क्य यद्यप्युक्तविधया तेन सामान्यतश्चेतनरूपं किं चिज्जगतो निदानं सिध्यति तथापि तस्मिन्नेकत्वनानात्वसंशयानिवृत्तेस्तत्सर्ववित्सर्वशक्ति किं वा विपरीतमित्यादिसंशयो न निवर्तेत तन्निदानस्य तदेकत्वाज्ञानस्यानिवर्तितत्वात् । एवं जगदुपादानस्य निर्विशेषत्वादिसिद्धिरपि ततो न स्यादिति तर्क एव तदित्याशयेनाह । जगदुदयेति । जगत्कारणे चेतने अनुमानात्सिद्धेऽपि तस्मिन्पश्चात्तत्स्वरूपानवगतिनिमित्त इतीत्थं संशयो दुर्निवारो भवत्येवेत्युक्तं संशयप्रकारमभिनयेनाह । जगदुदयनिमित्तमिति । यदि तदेकं भवेत्तदा फलितं सिद्धान्तलाभमाह । सर्ववित्सर्वशक्तीति । ननूक्तानुमानादेव लाघवसहकृतात्कारणैकत्वसिद्धेस्तत्सर्वज्ञं सर्वशक्ति चेति सिध्यतीति कथमनुमानानन्तरं तदेकत्वादिसंशय इति चेत् । सत्यम् । यद्यनुमानात्तदेकत्वं निश्चीयेत स न संभवति लोके च विचित्रप्रासादादेर्बहुकर्तृकत्वदर्शनेन तदनुसारिलिङ्गेन तद्विपरीतनिश्चयसंभवात् । संभवल्लघुविषये हि लाघवतर्कोऽपि प्रवर्तेत । न च लोके कर्तॄणामसर्वज्ञासर्वशक्तितया विचित्रकार्ये एकस्य कर्तुरसंभवेऽपि सर्वज्ञेश्वरस्य तत्संभवाल्लाघवावकाशोऽस्तीति वाच्यम् । एवं सत्यन्योन्याश्रयात्कथमपि लाघवप्रवृत्तेः प्राक् तस्मिन्सर्वज्ञत्वादिसंभावनातुषस्याप्यभावात् । किं च कर्त्रैकत्वं यद्येकत्वसंख्या तर्हि तन्नानात्वेऽपि सा सिध्यतीति कुतस्ततः सर्वज्ञत्वादिसिद्धिः । यदि च कर्त्रभेदस्तदेकता तर्ह्यस्मादनुमानात्प्राक्क्षितिजलादीनां कर्त्रसिद्धेस्तत्प्रतियोगिकभेदस्यानुपस्थितस्याभावो नानुमितिविषयः स्यात् । न हि प्रतियोगिज्ञानं विना भेदस्तदभावो वा सिध्येत् । तस्मादनुमानात्कर्त्रैकत्वानिश्चयात्संशय एवेति सर्वज्ञत्वादिसिद्धिः कथमपि ततो न भवेदिति भावः ॥ ४९९ ॥

(शेषमग्रे)

पञ्चदशी ।

चित्रदीपः ।

(*Continued from page* 272. Vol. VI.)

यथा चित्रपटे दृष्टमवस्थानां चतुष्टयम् ।
परमात्मनि विज्ञेयं तथावस्थाचतुष्टयम् ॥ १ ॥
यथा धोतो घट्टितश्च लाञ्छितो रञ्जितः पटः ।
चिदन्तर्यामिसूत्रात्मा विराडात्मा तथेर्यते ॥ २ ॥
स्वतः शुभ्रोऽत्र धोतः स्याद् घट्टितोऽन्नविलेपनात् ।
मष्याकारैर्लाञ्छितः स्याद्रञ्जितो वर्णपूरणात् ॥ ३ ॥
स्वतश्चिदन्तर्यामी तु मायावी सूक्ष्मसृष्टितः ।
सूत्रात्मा स्थूलसृष्ट्यैव विराडित्युच्यते परः ॥ ४ ॥
ब्रह्माद्याः स्तम्बपर्यन्ताः प्राणिनोऽत्र जडा अपि ।
उत्तमाधमभावेन वर्तन्ते पटचित्रवत् ॥ ५ ॥

1. Just as four conditions are observed in the canvass of a painting, so four modes may be discriminated in the highest (impersonal) Self.

2. As the canvass is washed, smeared, marked and coloured; so the highest Self may be regarded as Chit, Antaryámin, Sútrátman and Viráṭ.

3. The canvass is said to be washed, when it is in its natural state (i.e. free from colour);—smeared, when rubbed over with rice; marked, when marked with figure-outline in ink; coloured, when overlaid with colour.

4. The highest Self (paras) is designated thus:—in the absolute state as Chit; as Antaryámin, when conditioned by inexplicable Máyá; when viewed in connexion with the creation of the subtile bodies as Sútrátman; and in relation to the creation of the gross bodies as Viráṭ.

5. In the highest Self (atra) living things from Brahmá and the rest down to the blade of grass, and insentient things too, exist in higher and lower grades, in the same way that they may be represented upon the canvass of a picture.

चित्रार्पितमनुष्याणां वस्त्राभासाः पृथक् पृथक् ।
चित्राधारेण वस्त्रेण सदृशा इव कल्पिताः ॥ ६ ॥
पृथक् पृथक् चिदाभासाश्चैतन्याध्यस्तदेहिनाम् ।
कल्प्यन्ते जीवनामानो बहुधा संसरन्त्यमी ॥ ७ ॥
वस्त्राभासस्थितान् वर्णान् यद्वदाधारवस्त्रगान् ।
वदन्त्यज्ञास्तथा जीवसंसारश्चिद्गतं विदुः ॥ ८ ॥
चित्रस्थपर्वतादीनां वस्त्राभासो न लिख्यते ।
सृष्टिस्थमृत्तिकादीनाञ्चिदाभासस्तथा न हि ॥ ९ ॥
संसारः परमार्थोऽयं संलग्नः स्वात्मवस्तुनि ।
इति भ्रान्तिरविद्या स्याद्विद्ययैषा निवर्त्तते ॥ १० ॥
आत्माभासस्य जीवस्य संसारो नात्मवस्तुनः ।

6, 7. Just as the garments of men in a picture appear to be distinct from each other (and) are imagined to share the nature of the cloth, which is the basis of the picture (i. e. to be real garments), so the reflexions of absolute (impersonal) Intelligence, called jívas (personal sentiencies), belonging to bodies surmised in absolute Intelligence, are fancied to exist separately. These personal sentiencies transmigrate under various forms.

8. Ignorant men believe that the phenomenal world, which relates to a personal sentiency (only), belongs to absolute Intelligence (ie that the world is real), just as they say that the colours of picture-garments belong to the canvass, which is the support of the picture.

9. Mountains and like objects are not represented (in a picture) as dressed in clothes, so reflexions of absolute Intelligence (jívas) are not affirmed of things of clay and like created objects.

10. The misapprehension that this world of phenomena is real and attaches to the (impersonal) Self must be regarded as nescience (avidyá). It is destroyed by knowledge.

11. Knowledge is this:—the phenomenal world is relative to the personal (transmigrating) sentiency, which is an appearance

8. The colours of the picture garments are really distinct from though erroneously identified with the picture-canvass.

Digitized by Google

इति बोधो भवेद्विद्या लभ्यतेऽसौ विचारणात् ॥ ११ ॥
सदा विचारयेत्तस्माज्जगज्जीवपरात्मनः ।
जीवभावजगद्भावबाधे स्वात्मैव शिष्यते ॥ १२ ॥
नाप्रतीतिस्तयोर्बाधः किन्तु मिथ्यात्वनिश्चयः ।
नोचेत्सुषुप्तिमूर्च्छादौ मुच्येतायत्नतो जनः ॥ १३ ॥
परमात्मावशेषोऽपि तत्सत्यत्वविनिश्चयः ।
न जगद्विस्मृतिर्नोचेज्जीवन्मुक्तिर्न सम्भवेत् ॥ १४ ॥
परोक्षा चापरोक्षेति विद्या द्वेधा विचारजा ।
तत्रापरोक्षविद्याप्तौ विचारोऽयं समाप्यते ॥ १५ ॥
अस्ति ब्रह्मेति चेद्वेद परोक्षज्ञानमेव तत् ।
अहं ब्रह्मेति चेद्वेद साक्षात्कारः स उच्यते ॥ १६ ॥

(reflexion) of the Self: it does not pertain to the Self, the (one real) substance. This knowledge is obtained through deliberation.

12. One should therefore ever ponder these:—the world of experience, the transmigrating sentiency and the Self. When the existence of the personal sentiency and of the world of phenomena are known (to be false), the Self alone remains behind.

13. The sublation of the first two does not consist in our not being conscious of them, but in the certain knowledge of their unreality. Were this not so, a man would obtain final emancipation, without effort, while in the state of dreamless sleep or in a fainting fit.

14. And that the absolute Self remains behind means a certain knowledge of its reality; not that the world of experience is entirely forgotten. Otherwise emancipation would be impossible for a man while living.

15. Knowledge that comes of deliberation is of two kinds:—mediate and intuitive. Deliberation is at an end when intuition (of the absolute Reality, the Self) has been obtained.

16. "The absolute Reality exists":—such knowledge is mediate. The knowledge "I am the absolute Reality" is intuition, (sákshátkára).

---

13. Cf. śl: 53 and Triptidípa, śl: 263.

तत्साक्षात्कारसिद्ध्यर्थमात्मतत्त्वं विविच्यते ।
येनायं सर्व्वसंसारात् सद्य एव विमुच्यते ॥ १७ ॥
कूटस्थो ब्रह्म जीवेशावित्येवं चिच्चतुर्विधा ।
घटाकाशमहाकाशो जलाकाशाभ्रखे यथा ॥ १८ ॥
घटावच्छिन्नखे नीरं यत्तत्र प्रतिबिम्बितः ।
साभ्रनक्षत्र आकाशो जलाकाश उदीर्यते ॥ १९ ॥
महाकाशस्य मध्ये यन्मेघमण्डलमीक्ष्यते ।
प्रतिबिम्बतया तत्र मेघाकाशो जले स्थितः ॥ २० ॥
मेघांशरूपमुदकन्तुषाराकारसंस्थितम् ।
तत्र खप्रतिबिम्बोऽयं नीरत्वादनुमीयते ॥ २१ ॥
अधिष्ठानतया देहद्वयावच्छिन्नचेतनः ।
कूटवन्निर्विकारेण स्थितः कूटस्थ उच्यते ॥ २२ ॥

17. The real nature of Self is examined in order to gain that intuition of Brahma by which the personal sentiency is at once freed from all further transmigration.

18. Absolute Intelligence may be viewed in four aspects, as Kúṭastha, Brahma, Jíva and Íśvara in the same way that ákáśa (ether?) may be regarded as ghaṭákáśa (ie. ether confined within a jar), or mahákáśa (ie. the infinite or unconditioned expanse of ether), or jalákáśa, or meghákáśa.

19. The jalákáśa (water-ether) is the ákáśa, reflected along with the clouds and stars in the water existing in that ákáśa which is confined within the jar.

20. In the infinite ether the region of clouds is seen. The meghákáśa (cloud-ether) is the name for the infinite ether reflected in the water stored in the clouds (tatra).

21. The water in the clouds lodges there in the form of drops; and the reflexion of the ákáśa upon the water (tatra) is inferred from the fact that water is lodged in the clouds.

22. Kúṭastha is unmodified (impersonal) Intelligence limited by the two kinds of bodies (subtile and gross), in so far as it is the substrate (underlying these); like an anvil it persists, without being modified.

---

22. Cf. Kúṭasthadípa, śl: 21, where Kúṭastha is defined as that which unmodified itself illumines the succession of all internal mental

कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्रतिबिम्बकः ।
प्राणानां धारणाज्जीवः संसारेण स युज्यते ॥ २३ ॥
जलव्योम्ना घटाकाशो यथा सर्वस्तिरोहितः ।
तथा जीवेन कूटस्थः सोऽन्योन्याध्यास उच्यते ॥ २४ ॥
अयं जीवो न कूटस्थं विविनक्ति कदाचन ।
अनादिरविवेकोऽयं मूलाविद्येति गम्यताम् ॥ २५ ॥

23. The phenomenal mind (buddhi) is supposed to exist (as one of the constituents of the two-fold body, subtile and gross) in Kúṭastha. Jíva or the personal sentiency is the reflexion of impersonal Intelligence upon the phenomenal mind, (tatra), and is so called because it is endowed with the vital breaths (práṇa, which are part of the subtile and gross bodies). Jíva is in relation with the world of experience.

24. Just as the ghaṭákáśa is entirely lost to view by reason of the jalákáśa, so Kúṭastha is overpowered by jíva. This is technically termed anyonyádhyása or the erroneous surmisal of one thing in another.

25. This personal sentiency never regards Kúṭastha as distinct from itself. This failure to discriminate is without beginning and must be held to be primal (causal) nescience.

---

modifications and the absence (of these during dreamless sleep, swooning and samádhi).

Kúṭastha is Brahma under another name (cf. Chitradípa : śl 237). It is the impersonal element that underlies and is the truth of personal consciousness; or, to speak more accurately, the relation between the impersonal Kúṭastha and ahamkára is falsely imagined (sambandhádhyása) through Máyá and is inexplicable.

Pítámbarjí (see his Hindi edition of the Pañchadaśí, Vol. I note p. 303) observes that our author, in the Dṛigdṛiśyaviveka, includes Kúṭastha in Jíva as being (a) the absolutely real jíva (páramárthikajíva), (b) the phenomenally real Jíva (vyávahárikajíva) and (c) the dream-world Jíva (prátibhásikajíva).

23. Jíva is not merely the chidabhása (reflexion of Intelligence i. e. of Kuṭastha, but the reflexion *plus* Kúṭastha which is the substrate and enlightener of the unreal mind (buddhi).

Digitized by Google

विक्षेपावृतिरूपाभ्यां द्विधाऽविद्या व्यवस्थिता ।
न भाति नास्ति कूटस्थ इत्यापादनमावृतिः ॥ २६ ॥

अज्ञानी विदुषा पृष्टः कूटस्थं न प्रबुध्यते ।
न भाति नास्ति कूटस्थ इति बुद्ध्वा वदत्यपि ॥ २७ ॥

स्वप्रकाशे कुतोऽविद्या तां विना कथमावृतिः ।
इत्यादितर्कजालानि स्वानुभूतिर्ग्रसत्यसौ ॥ २८ ॥

स्वानुभूतावविश्वासे तर्कस्याप्यनवस्थितेः ।
कथं वा तार्किकंमन्यस्तत्त्वनिश्चयमाप्नुयात् ॥ २९ ॥

बुद्ध्यारोहाय तर्कश्चेदपेक्षेत तथा सति ।
स्वानुभूत्यनुसारेण तर्क्यतां मा कुतर्क्यताम् ॥ ३० ॥

स्वानुभूतिरविद्यायामावृतौ च प्रदर्शिता ।
अतः कूटस्थचैतन्यमविरोधीति तर्क्यताम् ॥ ३१ ॥

26. Nescience is doubly constituted by its projective and concealing powers. Kúṭastha is not present to consciousness nor does it exist:—such an assertion is due to the concealing power of nescience.

27. Questioned by the wise, an ignorant man replies that he is not conscious of Kúṭastha, (and further) that he is conscious that Kúṭastha is not manifest and does not exist.

28. How (it may be asked) can nescience affect that which (in Vedantic tenet) is self-luminous (sc. the Kúṭastha or unmodified Self); how without such nescience, can its concealing power exist? The very deliverance of consciousness (śl: 27—Kúṭastha is not manifest &c.—) destroys (we reply) this net-work of doubts.

29. Since argument is impossible, if no trust be placed in one's own consciousness, pray, how shall the would-be logician attain to certain truth?

30. If argument be necessary to convince the mind (of the existence of Kúṭastha)—and grant that it is—let a man debate in accordance with his own consciousness and not wildly.

31. The consciousness (—Kúṭastha is not manifest and does not exist—) certifies to the existence of nescience and its concealing power. Wherefore absolute Intelligence as Kúṭastha must be regarded as not contradictory (of nescience).

तच्चेद्विरोधि केनेयमावृतिर्ह्यनुभूयताम् ।
विवेकस्तु विरोध्यस्यास्तत्त्वज्ञानिनि दृश्यताम् ॥ ३२ ॥
अविद्यावृतकूटस्थे देहद्वययुता चितिः ।
शुक्तौ रूप्यवदध्यस्ता विक्षेपाध्यास एव हि ॥ ३३ ॥
इदमंशस्य सत्यत्वं शुक्तिगं रूप्य ईक्ष्यते ।
स्वयन्त्वं वस्तुता चैवं विक्षेपे वीक्ष्यते ऽन्यगम् ॥ ३४ ॥
नीलपृष्ठत्रिकोणत्वं यथा शुक्तौ तिरोहितम् ।
असङ्गानन्दताद्येवं कूटस्थेऽपि तिरोहितम् ॥ ३५ ॥
आरोपितस्य दृष्टान्ते रूप्यं नाम यथा तथा ।
कूटस्थाध्यस्तविक्षेपनामाहमिति निश्चयः ॥ ३६ ॥

32. If this were contradictory, by what could the concealing power of nescience be cognised? It is knowledge (springing from a study of the Upanishads) that is indeed contradictory of this (nescience); (and this knowledge) may be observed in the knower of truth.

33. In Kúṭastha, concealed by nescience, the reflexion of Intelligence (i.e. of Kúṭastha) united with the two (gross and subtile) bodies (and this is the personal sentiency) is surmised erroneously, just as silver is falsely imagined in the shell of a pearl-oyster (when the mother-o'-pearl is mistaken for silver). This, forsooth, is the erroneous surmisal effected by the projective power of nescience.

34. (In the false identification expressed by "this thing is silver") the reality belonging to the factor denoted by "this" i. e. nacre is (apparently) seen in the silver (falsely surmised). Thus too, the Self-hood and reality of Kúṭastha (anyagam) appear to exist in that which is projected by nescience (sc. the personal sentiency).

35. As in the case of the oyster-shell, the three-cornered form of its dark outer surface is overpowered and lost to view (during erroneous surmisal), so with Kúṭastha, its unconditioned bliss &c. are suppressed and unperceived.

36. Just as, in the example cited, the name *silver* is given to the object erroneously surmised, so the name *I* stands for that which is projected by nescience and falsely imagined to exist in Kúṭastha.

Digitized by Google

इदमंशं स्वतः पश्यन् रूप्यमित्यभिमन्यते ।
तथा स्वं च स्वतः पश्यन्नहमित्यभिमन्यते ॥ ३७ ॥

इदन्त्वरूप्यते भिन्ने स्वत्वाहन्ते तथेष्यताम् ।
सामान्यं च विशेषश्च ह्युभयत्रापि गम्यते ॥ ३८ ॥

देवदत्तः स्वयं गच्छेत्त्वं वीक्षस्व स्वयं तथा ।
अहं स्वयं न शक्नोमीत्येवं लोके प्रयुज्यते ॥ ३९ ॥

इदं रूप्यमिदं वस्त्रमिति यद्वदिदं तथा ।
असौ त्वमहमित्येषु स्वयमित्यभिमन्यते ॥ ४० ॥

अहंत्वाद्भिद्यतां स्वत्वं कूटस्थे तेन किं तव ।
स्वयंशब्दार्थ एवैष कूटस्थ इति मे भवेत् ॥ ४१ ॥

अन्यत्ववारकं स्वत्वमिति चेदन्यवारणम् ।
कूटस्थस्यात्मतां वक्तुरिष्टमेव हि तद्भवेत् ॥ ४२ ॥

37. (The personal sentiency), beholding the real object itself denoted by "this", falsely imagines it to be silver: similarly, beholding itself in its real form as Kúṭastha, the personal sentiency imagines itself to be the "I".

38. The bare sense of the word "this" differs from that of silver; similarly, we must regard Self-hood as something different from the nature of "I". Thus, in both cases, the words denote generals and particulars respectively.

39. Just as we say—let Devadatta himself go; look you yourself; so, in common parlance,—I myself am unable— is used.

40. Just as "this" occurs in thoughts such as "this is silver", "this is cloth" &c; so "self" is thought along with "this", "thou" and "I" (itself, thyself, myself).

41. Well! grant that the nature of Self differs from that of "I". But what use will you make of this distinction as regards Kúṭastha? We reply that Kúṭastha is just what is meant by Self (svayam).

42. If you object that the notion of Self is intended to exclude the notion of anything different from it, we reply that the exclusion of all differences is the chosen position (of the Vedántin) who holds that Kúṭastha is the Self (Átmá).

स्वयमात्मेति पर्यायौ तेन लोके तयोः सह ।
प्रयोगो नास्त्यतः स्वत्वमात्मत्वं चान्यवारकम् ॥ ४३ ॥
घटःस्वयं न जानातीत्येवं स्वत्वं घटादिषु ।
अचेतनेषु दृष्टं चेद् दृश्यतामात्मसत्त्वतः ॥ ४४ ॥
चेतनाचेतनभिदा कूटस्थात्मकृता न हि ।
किन्तु बुद्धिकृताभासकृतैवेत्यवगम्यताम् ॥ ४५ ॥
यथा चेतनआभासः कूटस्थे भ्रान्तिकल्पितः ।
अचेतनो घटादिश्च तथा तत्रैव कल्पितः ॥ ४६ ॥
तत्तेदन्ते अपि स्वत्वमिव त्वमहमादिषु ।

43. The words svayam and átmá are synonyms: the two, therefore, are not commonly used together. And since they are synonymous, the notions conveyed by svayam and átmá serve (equally) to exclude the idea of difference.

44. If you object that the notion of Self applies to jars and like unconscious objects as in the expression—"the jar itself does not cognise"—(and that therefore svayam and átmá are not identical, for the character of Intelligence ie. átmá, cannot apply to an unconscious jar), we reply that this is admissible, because átmá, absolute Intelligence, underlies (and illumines) such objects.

45. It must be understood that the distinction into conscious and unconscious is effected not by absolute (impersonal) Intelligence viewed as Kúṭastha, but by the reflexion of Intelligence cast upon the phenomenal mind (sc. by the personal sentiency).

46. Just as the reflexion of Intelligence (ie. the personal sentiency) is falsely imagined to exist in Kúṭastha, so jars and like unconscious objects are also falsely surmised in Kúṭastha.

47, 48. The notions of "that" and "this" apply universally just as the notion of self applies in the case of "I" and "thou" &c.;

44-46. Since the distinction into conscious and unconscious holds only in the phenomenal order of things, a jar, being destitute of a phenomenal mind, may be spoken of as an unconscious self. Impersonal Intelligence (Kúṭastha) is the reality of the jar and *illumines* the jar so as to make it an object of thought. Of course the metaphor does not solve the difficulty.

Digitized by Google

सर्वेष्वनुगते तेन तयोरप्यात्मतेति चेत् ॥ ४७ ॥
ते आत्मत्वेऽप्यनुगते तत्तेदन्ते ततस्तयोः ।
आत्मत्वं नैव सम्भाव्यं सम्यक्त्वादेर्यथा तथा ॥ ४८ ॥
तत्तेदन्ते स्वतान्यत्वे त्वन्ताहन्ते परस्परम् ।
प्रतिद्वन्द्वितया लोके प्रसिद्धे नास्ति संशयः ॥ ४९ ॥
अन्यतायाः प्रतिद्वन्द्वी स्वयं कूटस्थ इष्यताम् ।
त्वन्तायाः प्रतियोग्येषोऽहमित्यात्मनि कल्पितः ॥ ५० ॥
अहन्तास्वत्वयोर्भेदे रूप्यतेदन्तयोरिव ।
स्पष्टेऽपि मोहमापन्ना एकत्वं प्रतिपेदिरे ॥ ५१ ॥
तादात्म्याध्यास एवात्र पूर्वोक्ताविद्यया कृतः ।
अविद्यायां निवृत्तायां तत्कार्यं विनिवर्तते ॥ ५२ ॥

therefore, these also are identical with self:—to such an objection we reply that the notions of "that" and "this" apply also to the notion of Self (eg. when we speak of "this" or "that" self-hood) and therefore they cannot be identical with Self, just as goodness, badness &c, are not identical with Self.

49. The notions of "that" and "this," of self and another, of I and thou, are by the usage of the world regarded as reciprocally opposed: there is no doubt of this.

50. Kúṭastha is that Self which is the reciprocal opposite of a something different. The opposite of thou is I (sc. the personal sentiency), which is falsely surmised to exist in the Self (Kúṭastha).

51. Although the distinction between the I and the Self is clear, as (in the erroneous surmisal of silver for nacre) silver is distinct from the object represented by "this" (ie. nacre), infatuated men have held to their identity.

52. The false imagining of the identity (of jíva and Kúṭastha) is indeed wrought by nescience as already expounded in this work. When nescience is at an end its product is destroyed.

47-48. Looking again to phenomena, *that*, *this* &c. are not the self, but only modes of it. The argument from names to concepts, adopted here, is remarkable.

Digitized by Google

अविद्यावृत्तितादात्म्ये विद्ययैव विनश्यतः ।
विक्षेपस्य स्वरूपं तु प्रारब्धक्षयमीक्षते ॥ ५३ ॥
उपादाने विनष्टेऽपि क्षणं कार्यं प्रतीक्षते ।
इत्याहुस्तार्किकास्तद्वदस्माकं किन्न सम्भवेत् ॥ ५४ ॥
तन्तूनां दिनसङ्ख्यानां तैस्तादृक् क्षण ईरितः ।
भ्रमस्यासङ्ख्यकल्पस्य योग्यः क्षण इहेष्यताम् ॥ ५५ ॥
विना क्षोदक्षमं मानं तैर्वृथा परिकल्प्यते ।
श्रुतियुक्त्यनुभूतिभ्यो वदतां किन्नु दुःशकम् ॥ ५६ ॥
आस्तां दुस्तार्किकैः साकं विवादः प्रकृतं ब्रुवे ।
स्वाहमोः सिद्धमेकत्वं कूटस्थपरिणामिनोः ॥ ५७ ॥
भ्राम्यन्ते पण्डितंमन्याः सर्वे लौकिकतैर्थिकाः ।

53. The concealing power of nescience and the erroneously surmised identity (of jíva and Kúṭastha) are indeed destroyed by knowledge; but that which is projected from nescience (sc. jíva, the gross body &c.) awaits the complete working out of the fruits of actions in former births.

54. The logicians hold that a product continues to exist for a moment even after its material cause has been destroyed. Why should not this product of ours (sc. jíva &c.) continue to exist, similarly, for an appreciable time?

55. They admit such an appreciable moment (of duration for the product) in the case of threads (the material cause whose existence) may be computed by days. What we postulate here is a period of duration (for the product) commensurate (with the existence) of an error (sc. nescience, the material cause) not to be reckoned by ages.

56. What these men vainly imagine, without any proof that can stand the test of criticism, shall we find it hard to establish, who speak according to Scripture and reason and consciousness!

57. Let this question burn among those sorry logicians. As regards our point, we say that the (erroneously surmised) identity of Self and I, that is, of Kúṭastha and the changing one (sc. jíva) is clearly made out.

58. Common men and those knowing the Śástras, all think-

Digitized by Google

अनादृत्य श्रुतिं मौर्ख्यात्केवलां युक्तिमाश्रिताः ॥ ५८ ॥
पूर्वापरपरामर्शविकलास्तत्र केचन ।
वाक्याभासान् स्वस्वपक्षे योजयन्त्यप्यलज्जया ॥ ५९ ॥
कूटस्थादिशरीरान्तसङ्घातस्यात्मतां जगुः ।
लोकायताः पामराश्च प्रत्यक्षाभासमाश्रिताः ॥ ६० ॥
श्रौतीकर्तुं स्वपक्षं ते कोशमन्नमयं तथा ।
विरोचनस्य सिद्धान्तं प्रमाणं प्रतिजज्ञिरे ॥ ६१ ॥
जीवात्मनिर्गमे देहमरणस्यात्र दर्शनात् ।
देहातिरिक्त एवात्मेत्याहुर्लोकायताः परे ॥ ६२ ॥
प्रत्यक्षत्वेनाभिमताहंधीर्देहातिरेकिणम् ।
गमयेदिन्द्रियात्मानं वच्मीत्यादिप्रयोगतः ॥ ६३ ॥
वागादीनामिन्द्रियाणां कलहः श्रुतिषु श्रुतः ।

ing themselves wise are deceived: disregarding Scripture, in their folly, they trust to reason alone.

59. Some men, ignoring the connexion between earlier and later portions of Scripture, use quite shamelessly certain texts apparently in favour of their own view.

60. The Lokáyatas and fools, trusting only to the false shows of sense-perception, declare that the whole assemblage of things from Kúṭastha down to the (gross) body are the Self.

61. And to make good their own position according to Scripture, they adduce as authority the tenet of Virochana that the sheath of nutriment (sc. the gross body) is the Self.

62. Other Lokáyatas hold that the Self is certainly distinct from the body, for the dead body is seen, in this world, after the living self has departed.

63. The consciousness, acknowledged by all, of the I, effected by sense-perception must prove that the sense-organs are the Self distinct from the body, as shown in such expressions as I speak, I see &c.

64. The quarrel between the organ of speech and other sense-organs is revealed in many texts. Intelligence, therefore,

61. cf. Chhándogya: VIII, 8.

तेन चैतन्यमेतेषामात्मत्वं तत एव हि ॥ ६४ ॥

हैरण्यगर्भाः प्राणात्मवादिनस्त्वेवमूचिरे ।
चक्षुराद्यक्षलोपेऽपि प्राणसत्त्वे तु जीवति ॥ ६५ ॥

प्राणो जागर्ति सुप्तेऽपि प्राणश्रैष्ठ्यादिकं श्रुतम् ।
कोशः प्राणमयः सम्यग्विस्तरेण प्रपञ्चितः ॥ ६६ ॥

मन आत्मेति मन्यन्त उपासनपरा जनाः ।
प्राणस्याभोक्तृता स्पष्टा भोक्तृत्वं मनसस्ततः ॥ ६७ ॥

मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
श्रुतो मनोमयः कोशस्तेनात्मेतीरितं मनः ॥ ६८ ॥

विज्ञानमात्मेति पर आहुः क्षणिकवादिनः ।
यतो विज्ञानमूलत्वं मनसो गम्यते स्फुटम् ॥ ६९ ॥

अहंवृत्तिरिदंवृत्तिरित्यन्तःकरणं द्विधा ।

belongs to these, and therefore the nature of the Self also must pertain to them.

65. The Hairaṇyagarbhas, who hold that the vital breath is the Self, declare that a man lives so long as vital breath lasts even when the sense-organs, the eye and the rest, are lost.

66. The superiority of the vital breath, with its other characteristics, is declared in revelation, as in the text—the vital breath remains awake while the man sleeps. The sheath of vital breaths has been well explained and thoroughly.

67. Men devoted to (religious) meditation think that the common sensory is the Self. The vital breath (they say) is clearly unable to perceive objects: consciousness of objects, therefore belongs to the common sensory.

68. The common sensory is indeed the cause of the bondage and emancipation of men. A sensational sheath has been revealed: therefore do they declare the common sensory to be the Self.

69. Others, who hold to the theory of a universal flux, maintain that consciousness is the Self, since the common sensory is clearly seen to have its root in consciousness.

70. The internal organ (of knowledge) is two-fold according to its two modifications;—the one in the form of the "I" and the

विज्ञानं स्यादहंवृत्तिरिदंवृत्तिर्मनो भवेत् ॥ ७० ॥
अहंप्रत्ययबीजत्वमिदंवृत्तेरिति स्फुटम् ।
अविदित्वा स्वमात्मानं बाह्यं वेत्ति न तु क्वचित् ॥ ७१ ॥
क्षणे क्षणे जन्मनाशावहंवृत्तेर्मितौ यतः ।
विज्ञानं क्षणिकं तेन स्वप्रकाशं स्वतो मितेः ॥ ७२ ॥
विज्ञानमयकोशोऽयं जीव इत्यागमा जगुः ।
सर्वसंसार एतस्य जन्मनाशसुखादिकः ॥ ७३ ॥
विज्ञानं क्षणिकं नात्मा विद्युदभ्रनिमेषवत् ।
अन्यस्यानुपलब्धत्वाच्छून्यं माध्यमिका जगुः ॥ ७४ ॥
असदेवेदमित्यादाविदमेव श्रुतं ततः ।
ज्ञानज्ञेयात्मकं सर्वं जगद्भ्रान्तिप्रकल्पितम् ॥ ७५ ॥

other in the form of "this" (ie. object). The modification in the form of the "I" is termed consciousness (vijñâna), and the modification in the form of the object is termed common sensory (manas).

71. It is evident that it is the consciousness of the "I" that gives rise to the modification (or consciousness) in the form of the object: for without being conscious of oneself, one cannot cognise an object external to oneself.

72. Modifications in the form of the "I" are known to come and go every moment; wherefore consciousness is momentary. It is self-luminous, for it is self-known.

73. Revealed texts declare that the personal sentiency is the cognitional sheath. All the world of phenomena, with its births and deaths, pleasures and pains &c, relates to this cognitional sheath (ie. these are mere fleeting states of consciousness).

74. Consciousness, fleeting like a flash of lightning, or (shifting) cloud or twinkling eye is not the Self. The Mádhyamikas (therefore) maintain an original blank (as the source of all things), because nothing other than this (blank) is perceived.

75. This blank (they say) is declared in such texts as—"this (phenomenal world) was (previous to creation) that which does not exist (asat)"—&c. Wherefore the whole world of cognitions and cognita is imagined through error.

Digitized by Google

निरधिष्ठानविभ्रान्तेरभावादात्मनोऽस्तिता ।
शून्यस्यापि ससाक्षित्वादन्यथा नोक्तिरस्य ते ॥ ७६ ॥
अन्यो विज्ञानमयत आनन्दमय आन्तरः ।
अस्तीत्येवोपलब्धव्य इति वैदिकदर्शनम् ॥ ७७ ॥

76. (Here we would reply that) the reality of Self is proved, because no such thing as an error destitute of any underlying reality can exist; and because this very blank of yours must have some witness of itself, or else, your avowal of this blank, (asya) cannot stand.

77. The tenet of the Vedas (so some declare) is that a Self within, made up of bliss, other than that made up of consciousness, is to be known as existent. A. V.

(to be continued)

॥ अथ चित्सुखी ॥

॥ तत्र चतुर्थपरिच्छेदावशेषः ॥

(Continued from page 448. Vol. VI.)

न च "ज्ञानिनस्तत्त्वदर्शिन" इति स्मृतिः, परोक्षनिश्चयवतस्तदभ्यसनशीलस्य प्रतिपादकाद्दर्शनशब्देन साक्षात्कारस्यैव रूपादिदर्शनस्येवाभिधानात्, स्वात्मनि चापरोक्षे परोक्षज्ञानस्य विभ्रमत्वात् ।

न च सुखादिविषयपरकीयानुमानादिज्ञाने व्यभिचारः, स्वापरोक्षस्य स्वपरोक्षज्ञानविषयत्वे विभ्रमत्वाङ्गीकारात् ।

न चाकारनिवृत्तौ तदाकारावस्थानासंभवः, सामान्यविशेषघटितस्यापि वस्तुनो विशेषनिवृत्तौ सामान्याकारावस्थानस्य परीक्षकैरभ्युपगमात् ।

न च साधक एवावस्थाविशेषं प्राप्तः स्थितप्रज्ञो गुणातीतश्च, "प्रजहाति यदा कामा"नित्याद्यभिहितविशेषणानां तत्रानुपपत्तेः, नहि सर्वकामानां विमोकः परात्मसाक्षात्कारमन्तरेणोपपद्यः, "रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तत" इति स्मरणात्, "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः", "अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत" इति श्रुतेश्च । तदेवं श्रुतिस्मृतिपुराणादिष्वाघुष्यमाणा जीवन्मुक्तिः प्रद्वेषमात्रेण नापलपितुं शक्यत इति सिद्धम् ॥

इति श्रीगौडेश्वराचार्यपरमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्यश्रीमत्परमहंसपरिव्राजकश्रीचित्सुखमुनिविरचितायां तत्त्वप्रदीपिकायां चतुर्थः परिच्छेदः ॥ ४ ॥ समाप्तश्चायं ग्रन्थः ॥

॥ अथ चित्सुखीनामकग्रन्थस्योपसंहारः ॥

यत्पादाब्जरजः शिरःसु दधते ब्रह्मादयो निर्जराः
स्वे स्वे कर्मणि पूर्णशक्तिसहिताः सृष्ट्यादिकं कुर्वते ।
या चक्रे महिषासुरस्य कदनं धृत्वा सहस्रं भुजान्
तां भक्ताभिमतप्रदाननिरतां स्वाभीष्टसिद्ध्यै नुमः ॥ १ ॥

अथायं चित्सुखीनामा संदर्भो वेदान्तिषु परां सुप्रसिद्धिं समुपागतो महासंदर्भेषु परिगणनार्होऽत्यन्तसुपरिष्कृतश्चिरकालान्मया मुद्रयितुमभिलषितो विद्वद्वरसुविचारचुञ्चुपाठशालाप्रधानाध्यक्षप्रभुवरग्रीफीसाहेबसंमत्या मुद्रयितुमारब्ध इदानीं निर्विघ्नं मुद्रणविधया मया समाप्तिं नीतो विदुषां दृष्टिपथमुपगम्य परमां मुदं तेषामुपनयेदित्याशंसे ।

यद्यपि कठिनोऽयं न सर्वेषामर्थज्ञानपुरःसरमवलोकनार्हो व्याख्यामन्तरेण, तथापि सावधानीकृतचेतोभिर्वेदान्तनिष्णातैर्विद्वद्भिः पुनः पुनरवलोकनेनावश्यमवगमनीय एवेति संभाव्य मया मुद्रणायास्य प्रवृत्तिर्विहिता।

व्याख्या त्वस्य प्रयत्नेनोपलभ्यमानापि मुद्रणावसरे शुद्धा नोपलब्धा किंतु मूलपुस्तकान्येवोपलब्धानि शुद्धानीति तन्मुद्रण एव मया प्रयासो व्यधायि न व्याख्यायाः ।

लब्धेऽवसरे व्याख्यायां शुद्धायां चोपलब्धायां व्याख्याप्यस्य संदर्भस्य मुद्रयिष्यते प्राप्य प्रोक्तचरप्रभुवरसंमतिमिति विदाङ्कुर्वन्तु सुधिय इति ।

अत्र च यानि प्रमादात् पुस्तकानुरोधान्मुद्रकादिदोषाद्वा क्वचित् क्वचिदसंगतानि पदानि वाक्यानि वोपलभ्येरंस्तान्यनुकम्पानिधयः सुधियः क्षाम्यन्तु विरलप्रचारसंदर्भाणां सुप्रचारमात्राय प्रवृत्तधियां नः ।

सोऽयं संदर्भोऽधुना बहूनां विदुषां लोचनपथमुपगत्यास्माकं प्रयत्नसाफल्यमुपनयतु तेषां परमप्रेमोत्पादनेनेति सकलनिजजनमनोरथसाधयित्रीं जगदम्बां सविनयं प्रार्थय इति शिवम् ॥

काशीस्थराजकीयप्रधानपाठशालीयसंख्यावान् ।
सांख्याध्यापनकारी वेचनरामोऽस्त्ययं काण्वकुलः ॥ १ ॥

॥ योगवार्तिकम् ॥

(*Continued from page* 468. Vol. VI.)

अथ चतुर्थपादः । हानोपायान्तं व्यूहत्रयमतिविस्तरतः पादद्वयेन व्याख्याय हानं तु स्वरूपत एव तत्र संक्षेपादुक्तं न तु तस्याशेषविशेषरूपो व्यूह इत्यतो हानविस्तरार्थं चतुर्थपादारम्भः । तत्रादौ कैवल्ययोग्यं चित्तं निर्धारयितुं पञ्चप्रकारां सिद्धिमाह । अनेनैव प्रसङ्गेन जन्मादिसिद्ध्यपेक्षया यथोक्तसमाधिसिद्धेरुत्कर्षोऽपि सेत्स्यति ।

जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः ॥ १ ॥

क्रमेण सिद्धीर्व्याचष्टे । देहान्तरितेति । ऐहिकेन कर्मणा देवादिदेहान्तरे जन्ममात्रेण भवन्ती अणिमादिसिद्धिर्जन्मजेत्यर्थः । औषधिजसिद्धिमाह । औषधिभिरिति । असुरभवनेषु रसायनं यदौषधिद्रव्यं तदुद्भवेत्येवमादिः सिद्धिरौषधिभिरित्यर्थः । असुरभवनेष्विति प्रायिकाभिप्रायेणोक्तम् । अत्राप्यौषधीभिः सुवर्णादिसिद्धीनां भावात् । शेषं सुगमम् । पञ्चविधसिद्धिसाधारण्याय पूर्वपादो विचारितः । सिद्धिप्रकारोऽस्मिन्नेव प्रसङ्गे कियद्भिः सूत्रैः प्रतिपादनीयः तत्रादौ निर्माणकायनिर्माणेन्द्रिययोरुत्पत्तिप्रकारप्रतिपादकं सूत्रं पूरयित्वोत्थापयति । तत्र कायइति । निर्माणचित्तोत्पत्तिप्रकारस्य सूत्रान्तरेण वक्ष्यमाणत्वादत्र कायेन्द्रिययोरेव ग्रहणम् ।

जात्यन्तरपरिणामः प्रकृत्यापूरात् ॥ २ ॥

मनुष्यादिजातिरूपः परिणामः स प्रकृत्यापूराद्भवति न तु संकल्पमात्रादित्यर्थः । मनुष्यादिजातिरूपेण पूर्वं परिणम्य स्थितानां कायेन्द्रियाणां कामरूपतादशायां यो देवतिर्यगादिजातिपरिणामः स प्रकृत्यापूराद्भवति न तु संकल्पमात्रादित्यर्थ इति व्याख्यान्तरम् । अणिमादिरूपपरिणामविशेषश्च प्रकृत्यपगमादित्यपि बोध्यम् । अत्र च जात्यन्तरशब्देन योगिनां गजतुरङ्गादिवैभवं तथा कायव्यूहादिकमपि ग्राह्यम् । आपूरशब्देनापि प्रकृतीनां संहननमपि ग्राह्यम् । कायव्यूहे च श्रुतिः 'स

एकधा भवति त्रिधा भवति पञ्चधा शतं दश चैकश्च सहस्राणि च विंशति”-रित्यादिरिति । प्रकृत्यापूरे हेतुं वदन् सूत्रं व्याचष्टे । पूर्वपरिणामेति । यतो लोके वल्मीकादीनां क्षुद्रपरिणामापाये तदुत्तरमहापरिणामोत्पत्तिर्भूतप्रकृतीनामनुप्रवेशाद्भवतीति दृष्टम् । अतो योगीश्वरादीनामपि देहेन्द्रिययोः परिणामान्तरकाले धर्मादिसापेक्षाः कार्येन्द्रियप्रकृतयः स्वंस्वं विकारमनुगृह्णन्ति स्वस्वजातीयां कार्यादिप्रकृतिमुपकुर्वन्ति आपूरेणानुप्रवेशेनेत्यर्थः । तत्र कायप्रकृतिः पञ्चभूतानि इन्द्रियप्रकृतिश्चास्मितेति । दृष्टश्च लोके तृणराशिनिक्षिप्तस्य वह्निकणस्य क्षणादेव प्रकृत्यापूरेण गगनव्यापी परिणामविशेष इति । एतेन वामनाद्यवतारादीनां क्षणादेव त्रिभुवनव्यापित्वविश्वरूपत्वादिकं मार्कण्डेयादिभ्यो विष्णुना मायाप्रदर्शनं च प्रकृत्यापूरेण तडिन्माला*यामिव क्षणभङ्गुरेणेति व्याख्यातम् । अगस्त्यादीनां समुद्रपानादिकं च तोयादिप्रकृत्यपसरणेनेति व्याख्येयम् । एवमेव विश्वं परमेश्वरस्य मायेति गीयते । ऐन्द्रजालिकवत् क्षणेनैव प्रकृत्यापूरापसारणादिभिर्जगदन्यथयितुमुत्पादयितुं विलापयितुं च परमेश्वरः संकल्पमात्रेण शक्नोति सूक्ष्मदृष्ट्या तु प्रतिक्षणं तथा करोत्येवेति पश्यन्तु योगिनो भगवद्भृत्यमिति दिक् । ननु योगजधर्मैर्बलात् प्रकृतय आकृष्यन्तइति प्रकृतिस्वातन्त्र्यसिद्धान्तहानिः । तथा स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्तीत्यादिश्रुतेरपि प्रकृतिस्वातन्त्र्यहानिरित्याशङ्कायामाह ।

निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् ॥ ३ ॥

व्याचष्टे । नहीति । धर्मादिरूपाणां निमित्तानां प्रकृत्यापूरकत्वे युक्तिमाह । न कार्येणेति । परतन्त्रं स्वतन्त्रस्य प्रवर्तकमयुक्तमित्यर्थः । किं चाकाशे द्व्यणुकारम्भकाण्यनुक्षणमणूनां क्रिया सर्वसंमता । न च तत्र धर्माधर्मौ वा कारणं कस्यापि भोगाहेतुत्वात् । नापि तत्रेश्वरादिसंक-

* तडिन्मालयैवेति सुगमम्

त्यादिः कारणं गौरवात् । अतो निरन्तराणुक्रियोपपत्तये लाघवेन गुणस्वैनैव सामान्यतः प्रवृत्तिकारणत्वात् प्रकृतिस्वातन्त्र्यं सिद्धम् । अपि च कदाचिद्दण्डचक्रादिकं विनापि योगिसंकल्पादेव घटो जायते आदिसर्गे चेश्वरसंकल्पेन बीजान्तराणि विनैव सर्वाणि बीजानि उत्पद्यन्तइति परस्परव्यभिचारान्निमित्तानां न साक्षात्कारणत्वसंभवः । तृणारणिमण्यादिषु चाग्न्यादिकारणत्वे अन्योन्यव्यभिचारो लोकसिद्ध एवास्ति अतः सहकार्यप्रयुक्ता प्रकृतिरेव परिणामे कारणं स्वतन्त्रेति सिद्धम् । ननु प्रकृतिश्चेत् स्वतन्त्रा केन प्रकारेण तर्हि धर्मेश्वरयोगिसंकल्पादीनां प्रकृतिपरिणामहेतुत्वमिति पृच्छति । कथं तर्हीति । सूत्रार्द्धेनोत्तरमाह । वरणभेदस्तु ततः क्षेत्रिकवदिति । अपां पूर्णाद्भिः पूर्णात्, केदारान्तरस्य विशेषणं समीमस्यादिविकम् । अपकर्षति क्षिपति प्रावरणमालबालम् । स्वस्वं विकारमिति । स्वस्वसजातीयं विकारं व्याप्नुवन्ति विकारप्रसूतीनां परिणामान्तरमित्यर्थः । प्रकृतकार्येन्द्रियप्रकृत्यभिप्रायेणोक्तं गुणाद्गुणान्तरमाप्लावयन्तीत्यपि बोध्यम् । क्रियावदारम्भकसंयोगोऽपि प्रकृतेः स्वत एव भवतीत्यपि तेनैव दृष्टान्तेन प्रतिपादयति । यथा चेति । न तु प्रकृतिप्रवृत्ताविति । संयोगविशेषेष्वपीति बोध्यम् । तथा चाधर्मादिप्रतिबन्धनिवृत्तिद्वारेणैव धर्मादिः परिणामकारणमिति सिद्धम् । अयं भावः । यथा संस्कार एव स्मृतिहेतुः सदृशादृष्टचिन्तादयस्त्वननुगततया संस्कारस्योद्बोधकमात्राः । उद्बोधश्च निद्रादिदोषरूपावरणभङ्गः । तथैव प्रकृतिरेव जगत्कारणं कालकर्मेश्वरादयस्तु प्रकृतेः कार्यजननशक्त्युद्बोधकाः तत्र धर्माधर्मौ स्वधर्मविरुद्धधर्मान्तररूपावरणभङ्गेनोद्बोधकौ ईश्वरस्तु साम्यपरिणामादिरूपाखिलावरणभङ्गेनोद्बोधकः कालादयस्तु धर्माद्युद्बोधकतया दण्डादयस्तु कार्यान्तराभिव्यक्तिप्रतिबन्धकतयेत्येवं यथायोग्यमूहनीयम् । अतएव निमित्तकारणतेति गीयते अव्यभिचारात्तु संयोगस्य समवायिकारणत्वमिष्यतएव द्वारत्वात् न तेन प्रकृतेः स्वातन्त्र्यहानिरिति । धर्मस्याधर्मरूपप्रतिबन्धापसारणद्वारा कार्येन्द्रियपरिणामनिमित्तत्वे उदाहरणमाह । अत्र नन्दीति । नन्दिनामा मनुष्य ईश्वरो जात इति नन्दीश्वरः । एवं

नहुषाजगरोपि व्याख्येयः । सिद्धादीनां कायेन्द्रियपरिणामश्चिन्तितः । इदानीं सिद्धानां चित्तपरिणामनिर्णायकं सूत्रमवतारयति । यदेति । एकमनस्का निर्मातृमनोमात्रेणैव व्यवहारभाजः । अनेकमनस्काः निर्मातृमनोतिरिक्तप्रातिस्विकमनोभाजः ।

निर्माणचित्तान्यस्मितामात्रात् ॥ ४ ॥

स्वसंकल्पेन निर्मितचित्तानि निर्माणचित्तान्युच्यन्ते तानि बहूनि निर्माणदेहसमसंख्यानि भवन्ति तेषां कारणमाह । अस्मितामात्रादिति । अहंकारादित्यर्थः । मात्रशब्देन मनोव्यावृत्तिः संकल्पमात्रेण मनसो निर्मितमात्रत्वादिति । अत्र चित्तशब्दो मनोमात्रवाची अहंकारप्रकृतिकत्ववचनाद्बुद्ध्यहंकारा अपि अनेके स्वप्रकृतिप्रधानबुद्ध्यापूराद्भवन्तीति प्रत्येतव्यं युक्तिसाम्यादिति । भाष्ये सचित्तानि शरीराणीत्यर्थः, शेषं सूत्रएव व्याख्यातम् । ननु निर्मातृचित्तस्यैकस्यैव प्रदीपवद्विसारितया कायव्यूहेषु वृत्तिसंभवात् किमर्थं देहभेदेनान्तःकरणभेदो ऽभ्युपगम्यते । न हि नैयायिकानामिवास्माकम् अन्तःकरणभेदेनैश्वरदानवहितनानाशरीराधिष्ठानं नसंभवेदिति । अत्रोच्यते । समाधिभोगयोर्ज्ञानाज्ञानयोश्चैकदैकस्मिंश्चित्ते विरोधेन चित्तभेदः सिद्ध्यति । अत एव सर्वज्ञस्यापि विष्णोः स्वसंकल्पनिर्मितचित्तभेदेन रामशरीरे कियत्कालमज्ञानमुपपन्नमिति । यदा तु योगी जीवभेदानेव स्वेच्छानिर्मितेषु देहेन्द्रियसंघातेषु अनेकेषु योजयति तदा पुनः सुतरामेवानेकान्तःकरणमपेक्षतइति कदाचित्तु योगिनामेकान्तःकरणेनैव नानादेहेषु व्यवहारं न निराकुर्मः स्वतन्त्रेच्छस्य नियन्तुमशक्यत्वादिति । अथैवं सत्यात्मनानात्वकल्पना व्यर्था चित्तभेदेनैव ज्ञानाज्ञानाद्युपपत्तेरिति । मैवम् । वृत्तितद्विरोधादीनामौपाधिकत्वेनाविरोधेपि विषयानुभवाननुभवयोः स्वप्रतिविदितदुःखभोगतदभावयोर्बन्धमोक्षयोश्च साक्षाच्चेतननिष्ठयोर्विरोधेनैवात्मनानात्वसिद्धेरिति दिक् । तदेतच्छरीरभेदेन नानाचित्तैर्विद्धु-नानाकार्यकारित्वं योगिनां स्मर्यते ।

एकस्तु प्रभुशक्त्या वै बहुधा भवतीश्वरः ।
भूत्वा यस्मात्तु बहुधा भवत्येकः पुनस्तु सः ॥

तस्माच्च मनसो भेदा जायन्ते चैतएव हि ।
एकधा तद्विधा चैव त्रिधा च बहुधा पुनः ॥
योगीश्वरः शरीराणि करोति विकरोति च ।
प्राप्नुयाद्विषयान् कैश्चित् कैश्चिदुग्रं तपश्चरेत् ॥
संहरेच्च पुनस्तानि सूर्यो रश्मिगणानिवत ।
इति । अनेकचित्तनिर्माणेपि विशेषमाह ॥

प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम् ॥ ५ ॥

व्याचष्टे । बहूनामिति । तेषां बहूनां कथमेकचित्ताभिप्रायानुसारिणी प्रवृत्तिः स्यादित्याशयेन योगी पूर्वसिद्धं यच्चित्तं तदेव सर्वचित्तानां प्रयोजकं निर्मिमीते नियामकं करोति ततस्तु चित्ताभिप्रायात् तेषामवान्तरचित्तानां प्रवृत्तिरित्यर्थः । ऐश्वर्येनिर्वाहार्थमनेकचित्तेष्वन्तर्यामिविधया स्थितमेकं चित्तं तेषामुत्पत्तिस्थितिसंहारं करोतीति अत्र च प्रमाणं प्रागेव दर्शितं 'संहरेच्च पुनस्तानि सूर्यो रश्मिगणानिवे'ति । एतेन विष्ण्वादीनामंशावतारा अपि व्याख्याताः तेषु ह्यात्मन एकत्वेपि अंशांशिव्यवहार उपाध्योरंशांशिभावेनौपाधिकः न पुनरितरजीवेष्विव स्वत एवेति । तदेवमुक्तेषु पञ्चसु सिद्धचित्तेषु मध्ये ऽपवर्गयोग्यचित्तमवधारयति ।

तत्र ध्यानजमनाशयम् ॥ ६ ॥

ध्यानजं ध्यानसंस्कृतम् आशयाः क्लेशकर्मवासनाः न सन्त्यस्मिन्नित्यनाशयं ध्यानसिद्धं चित्तमेवानाशयं भवति योगेनैव ज्ञानोत्पत्त्या वासनोच्छेदसंभवात् न मन्त्रादिभिरित्यर्थः । व्याचष्टे । पञ्चविधमिति । निर्माणचित्तमत्र निर्माणत्रयचित्तं न निर्मीयमाणं चित्तं तस्य सिद्धकार्यत्वेन सिद्धत्वानियमात् । अनाशयमित्यस्यार्थमाह । तस्यैवेति । रागादेः प्रवृत्तिर्यस्मात्संस्कारात्सरागादिप्रवृत्तिराशयस्तस्यैव नास्तीत्यनाशयमित्यर्थः । अनाशयत्वस्य किं प्रयोजनमित्याकाङ्क्षायामाह । नात इति । सबन्ध उत्पत्तिः । ततश्चापुनर्जन्मरूपो मोक्ष इति शेषः । पापपुण्यानुत्पत्तौ हेतुमाह । क्षीणक्लेशत्वादिति । दग्धक्लेशकर्मवासनत्वादित्यर्थः । अदृष्टोत्प-

त्तावप्यदृष्टान्तरं कारणमदृष्टरूपस्य कर्माशयस्य कार्यमात्रे हेतुत्वात् । तत्रेति निर्द्धारणसप्तम्यर्थमाह । इतरेषामिति । मन्त्रादिसिद्धचित्तानामित्यर्थः । अत्रैव हेतुपरतयोत्तरसूत्रमवतारयति । यत इति ।

कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम् ॥ ७ ॥

योगिनो निष्पन्नयोगस्य क्षीणक्लेशस्य कर्म कायादिव्यापारोऽशुक्लाकृष्णः पुण्यपापाहेतुः । इतरेषामयोगिनां जन्मादिसिद्धानामपि त्रिविधम् । यथायोग्यं कर्म शुक्लकृष्णयोः प्रत्येकसमुच्चयाभ्यां त्रिविधमित्यर्थः । तदेतद्व्याचष्टे । चतुष्पादिति । कर्मसामान्यं चतुरंशकमित्यर्थः । क्रमेण निर्दिशति । कृष्णेति । कृष्णा दुःखफलदा तमोवर्धकत्वात् । शुक्लकृष्णा सुखदुःखफलदा रजोवर्धकत्वात् । शुक्ला सुखफलदा सत्त्ववर्द्धकत्वात् । अशुक्लाकृष्णा च सुखदुःखफलशून्या गुणाहेतुत्वादिति । अत्राशुक्लाकृष्णयोः सुखदुःखफलस्यैव प्रतिषेधेन योगिकर्मणामपि सत्त्वशुद्धिः फलं न निराक्रियते । न च ज्ञानेनैव सत्त्वशुद्ध्याख्यः पापक्षयो भविष्यतीति वाच्यम् । तथापि कर्मणामपि ज्ञानाङ्गतया सत्त्वशुद्धिहेतुत्वात् । आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठ इति साहित्यश्रुतेः ।

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥

इति स्मृतेश्च । अन्यथा वसिष्ठादीनां ज्ञानिनां कर्मानुपपत्तेश्च । न च लोकसंग्रहार्थं तेषां कर्म, लोकसंग्रहस्य स्वतोऽपुरुषार्थतया कैवल्यहेतुसत्त्वशुद्धिद्वारैव पर्यवसानादिति । चतुर्विधं कर्म क्रमेणोदाहरति । दुरात्मनां पापिनां, बहिःसाधनसाध्येति । देहेन्द्रियमनोभ्यो बहिर्याणि साधनानि तत्साध्येत्यर्थः । अज्ञानां सकामानामित्यर्थाल्लभ्यते । ज्ञानिनां निष्कामानां, कर्म सामान्यमेवाशुक्लाकृष्णमिति वक्ष्यमाणात् । ननु बहिःसाधनसाध्यानामपि वेदोक्ततया कथं कृष्णसंकरस्तत्राह । तत्र परेति । बहिर्यागोपकरणसंपादने पिपीलिकादीनामप्यन्ततोऽपरिहार्या पीडा भवतीत्यस्ति तत्र पापकर्माशयः देवतादीनामाराधनादिना अनुग्रहात् पुण्यकर्माशयस्तु

प्रसिद्ध एवेति सांकर्यमित्यर्थः । अन्तर्यागरूपायां शुक्लायां पापासांकर्ये बीजमाह । सा हीति । संन्यासिनामिति । संन्यासस्त्यागः । अभिमानफलयोस्त्यागिनामित्यर्थः ।

कार्यमित्येव यत्कर्म नियतं क्रियतेर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥

इत्यादिस्मृतेः । ननु संन्यासाश्रमिमाचाणामविद्यादिक्लेशसत्त्वे तेषामपि धर्माधर्मोदयात् क्लेशक्षये च गृहस्थादिकर्मणामपि अशुक्लाकृष्णत्वाच्चेति संन्यासिकर्मणामशुक्लाकृष्णत्वे हेतुमाह । क्षीणक्लेशानामिति । क्लेशमूलः कर्माशय इत्युक्तत्वादिति भावः । चरमदेहानामिति, स्वरूपाख्यानम् । स्वोक्तं संन्यासिनामिति हेतुं विवृण्वानः सूत्रं व्याचष्टे । तत्रेति । तत्र चतुर्विधकर्ममध्ये योगिन एवाशुक्लमकृष्णं च कर्म फलत्यागात् अहं करोमीत्यस्वीकाराच्चेत्यर्थः । विहितं हि कामनायां सत्यामेव स्वर्गादिफलं ददाति विहितं निषिद्धं चोभयमप्युपादानाख्याभिमाने सत्येव फलं ददातीति भावः ।

त्यक्त्वा कर्म फलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोपि नैव किंचित्करोति सः ॥
यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमान् लोकान् न हन्ति न निबध्यते ॥

इति शास्त्रमत्र प्रमाणम् । ननु तिष्ठत्वयोगिनां कर्म तथापि वासनानभिव्यक्त्यादिनापि कदाचिन्मोक्षः स्यादिति किमर्थं नियमेन ध्यानजस्यानाशयचित्तस्यापेक्षेत्यत आह ।

ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम् ॥ ८ ॥

तत इतिपदं व्याख्याय तद्विपाकानुगुणानामेवेति गृहीत्वा व्याचष्टे । यज्जातीयस्येति । कर्मविपाकमनुशेरतइति अनुकुर्वन्ति तन्मुखनिरीक्षका इति यावत् । विपच्यमानं फलोन्मुखं चर्चा विचारः । बहुजन्मव्यवहितानामपि वासनानामभिव्यक्तिं कर्मफलान्यथानुपपत्तिप्रमाणेन साधयति ।

जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात् ॥ ९ ॥

जात्यादिभिर्व्यवहितानामपि वासनानामानन्तर्यमव्यवहितवत् कार्यकारित्वं भवति अन्यथा कर्मफलानुपपत्तेः स्मृतिसंस्कारयोरेकरूपत्वादित्यर्थः । एकरूपत्वमेकाकारत्वमिति । तत्रादौ भाष्यकारो जात्यादिव्यवहितत्वमुदाहरन्नेवानन्तर्यं कारणं प्रदर्शयति । वृषेत्यादिना । आरम्भ एवाञ्जनस्यापेक्षणात् उदयपदं तथा च वृषदंशविपाकारम्भः स्वव्यञ्जकेनैवाभिव्यक्तो वर्त्तमानावस्थो भवति न तु पूर्वदेहत्यागमात्रेण झटित्येवेति नियमोऽतः स यदि जातिशतादिव्यवधानेन व्यञ्जकं प्राप्य उदियात् तदा द्रागित्येव शीघ्रं पूर्वप्राप्तवृषदंशविपाकेन जनितान् संस्कारान् गृहीत्वैव व्यक्तो भवति व्यवहितानामपि वासनानां सदृशकर्मव्यङ्ग्यत्वादित्यत आनन्तर्यमेवार्थाद्भवतीत्यर्थः । सादृश्यं चात्रैकजातीयफलकत्वम् । अभिव्यञ्जकमित्यस्य च विवरणं निमित्तीभूतमिति प्रकृतेरेवोपादानत्वादिति भावः । आनन्तर्यं तत्कारणं च व्याख्याय तत्र प्रमाणं पृच्छति । कुत इति । कुतः प्रमाणादित्यर्थः । सूत्रावयवेनोत्तरमाह । स्मृतिसंस्कारयोरिति । ननु मनुष्यजन्मन्येवाव्यवहिते वृषदंशवासनास्तु तत्राह । यथानुभवा इति । नन्वेवं सति मनुष्यवासनयैव वृषदंशविपाको भवत्वव्यवहितत्वादिति तत्राह । ते चेति । ते च संस्काराः कर्माशयानुरूपा एवापेक्षिता इत्यर्थः । नन्वेवमपि मनुष्यसंस्कारादेव वृषदंशविपाकनिर्वाहिका स्मृतिरस्तु तथापि कर्माशयानुरूपस्मृतिहेतुत्वेन कर्मानुरूपोपपत्तिरिति तत्राह । यथेति । एकरूपत्वं प्रसाध्य सूत्रतात्पर्यार्थं व्याचष्टे । इति जातीति । ननु सजातीयवासनैव चेद्विपाकनिर्वाहिका तर्ह्येकविपाककालएव स्मृत्युत्पादेन पूर्वसंस्कारनाशात् कथं पुनस्तज्जातीयं विपाकान्तरमित्याशयेनोक्तं, स्मृतेश्च पुनः संस्कारा इति । परमार्थतस्तु स्मृतेर्वे संस्कारनाशकत्वम् इत्यपि पूर्वोक्तं स्मर्त्तव्यं, स्मृतिसंस्काराः स्मृतिहेतुसंस्काराः कर्माशयवृत्तिलाभात् कर्माशयोद्बोधादिति । नन्वेवं सकलजन्मार्थमेव वासनास्वीकारे ऽनवस्थाप्रसङ्ग इत्याशङ्कामपाकरोति ।

तासामनादित्वं चाशिषो नित्यत्वात् ॥ १० ॥

व्याचष्टे । तासामिति । नित्यत्वात्प्रतिजन्मनियतत्वादित्यर्थः । अनादित्वं च प्रवाहरूपेण बोध्यम् । यद्यप्याशीर्नित्यतया तद्धेतुवासनाया एवानादित्वं सिद्ध्यति न तु भोगहेतुवासनानां तथापि तत्रानवस्थाया: प्रामाणिकत्वेनादोषत्वे तद्दृष्टान्तेनान्यासामप्यनादित्वमनुमेयमित्याशयः । नन्वन्योन्याश्रयवदियमाशीश्चित्तस्य स्वाभाविक्येव भवतु तत्राह । येय-मिति । आशीर्नित्यत्वे तद्वासनानादित्वे तथाशिषोऽस्वाभाविकत्वे वा युक्तिं पृच्छति । कस्मादिति । तत्रादावाशीर्नित्यत्वेन वासनानादित्वं यथा सि-द्ध्यति तदाह । जातेति । जातमात्रोऽनुमानाद्यसमर्थो बालको यदि न पूर्वज-न्मन्यननुभूतमरणधर्मकः स्यात् तथा कथं तस्य द्वेषतत्कारणमरणादुःख-स्मरणाभ्यामेवोत्पाद्यो मरणत्रासो यथोक्ताशीरूपः संभवेत्पूर्वपूर्वभवीयमर-णदुःखवासनां विनेति शेषः । अस्वाभाविकत्वे तु युक्तिमाह । न चेति । नापि स्वाभाविकं वस्तु निमित्तसापेक्षं भवति भयरूपात्तु यथोक्ताशीःखड्ग-प्रहारदर्शनादिनिमित्तमपेक्षते अन्यदानुपपत्तेरतो न स्वाभाविकीति शेषः । सूत्रत्रयार्थं शिष्यावधारणायोपसंहरति । तस्मादनादीति । निमित्तं विपाकोन्मुखं कर्म प्रतिलभ्य गृहीत्वा । ननु वासनाया अनादित्वं तदा भवेत् यदि तदाश्रयं चित्तं नित्यं स्यात् प्रतिशरीरं च भिन्नं न स्यात् । तदेव तु न पुम्प्रकृत्यतिरिक्तस्य सर्वस्य कार्यत्वाभ्युपगमात् । अणुमहच्छरी-रयोः परिणामभेदेन भेदवच्छरीरतुल्यपरिणामचित्तस्यापि भेदसिद्धेश्चेति । तत्रादौ सांख्यपरिमाणमाह । घटेति । प्रतिपुरुषं सर्वशरीरसाधारणमेकैक-मेव चित्तं यथापि घटप्रासादरूपस्वल्पमहदाश्रयभेदेन प्रदीपवत् स्वल्पमह-च्छरीरभेदेन चित्तं स्वल्पं महत्परिमाणं भवति तथा च नित्यत्वमपि तस्य प्रदीपपरमाणुवदेव द्रष्टव्यम् । तच्च परमाणुतुल्यसूक्ष्मावस्थायां प्रकृतेः सत्त्वरूपांशविशेषतां प्राप्नोतीति न प्रकृतिपुरुषातिरिक्तस्य नित्यतेति भावः । एवमपरे सांख्या आहुरित्यर्थः । ननु विभ्वेव चित्तं कथं नेष्यमहत्या-काङ्क्षायामाह । तथा चेति । तथा चाणुत्वस्यापि संभवात् । पूर्वापरसर्गयो-

न्तरा प्रलये ऽभावो लयः संभवति । तथा संसारः संसरणम् इहलोकपर-लोकसंचारश्च सक्रियत्वात्संभवति विभुत्वे चैतदुभयं न घटेतेत्यर्थः । स्वशास्त्रसिद्धान्तमाह । वृत्तिरेवेति । चित्ताकाशवच्चित्तं प्रतिनियतपुरुषभोग्यत्वात् पुरुषभेदेनानन्तञ्च ।

चित्ताकाशं चिदाकाशमाकाशं च तृतीयकम् ।
द्वाभ्यां शून्यतमं विद्धि चिदाकाशं वरानने ॥

इत्यादिभिः शास्त्रेषु चित्तविभुत्वावगमात् । अन्यथा परिच्छिन्नत्वे सतीश्वरोपाधेरपि परिच्छिन्नत्वापत्त्या ईश्वरस्य विभुत्वश्रुतिस्मृति-युक्तिविरोधात् । यथा तु वैशेषिका नैयायिकाश्चाकाशस्य विभुनित्यस्यापि श्रोत्रादिरूपेण कार्यतां देहेन सह गमनादिकं चौपाधिकतयाभ्युपगच्छन्ति तथैव विभुनित्यानां जीवचित्तानां मलिनदर्पणवदविद्याकामकर्मावृत-प्रकाशशक्तीनां मन्दप्रकाशस्वभावानां वा बाह्यसत्त्वान्तरोपष्टम्भाद् ज्ञानादिहेतुः परिणामविशेषः सर्गादौ जायते 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वर' इति श्रुतेः स एव परिणामः स्वल्पमहच्छरीरभेदेन संकोचविकाशशीलो भवति इत्येवमाचार्यः पतञ्जलिरभ्युपगच्छतीत्यर्थः । यच च वृत्तिः प्रदीपशिखावद्द्रव्यरूपः परिणाम इति प्रागेवोक्तम् । न तु यावद्द्रु-यावस्थायी ज्ञानेच्छादिर्गुणः सर्गाद्युत्पन्नचित्तस्य प्राकृतप्रलयपर्यन्तावस्थानस्येहलोकपरलोकगमनादेश्च श्रवणादिभिरस्या वृत्तेर्घटपटाद्याकारतेवानेच्छाज्ञानशब्दवाच्येति । तदेवं वैशेषिकाणामाकाशवत् अस्माकं चित्तमपि नित्यानित्योभयरूपमिति सिद्धं, विशेषस्त्वयं यत्तैराकाशस्य श्रोत्ररूपेण जन्यता कर्णशष्कुल्योपाधिकीष्यते अस्माभिस्तु गुणान्तरसंभेदात् यथार्थ एव महदादिरूपेण प्रकृत्याख्यसूक्ष्मचित्तस्य परिणाम इष्यत इति । एतेन विभुनित्यत्वेप्याकाशस्य कार्यत्वमपि व्याख्यातम् । शब्दादिहेतुपरिणामविशेषरूपेण कार्यत्वं श्रुतिस्मृतिसिद्धं विरोधाभावादिति दिक् । ये तु वैशेषिकाश्चित्तम् अणवेव सर्वदाभ्युपगच्छन्ति । तन्मते एकदा पञ्चेन्द्रियैः पञ्चवृत्त्यनुपपत्तिः चक्षुःश्रोत्रादेर्विप्रकृष्टदेशतया अणोस्तदुभयसंब-

न्यस्य एककालीनौचित्यात् इत्यादीनि दूषणानि ऊह्यानि । 'युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्ग'मिति न्यायसूत्रे च सदा सर्वज्ञत्वाभाव एव मनआख्यकरणे लिङ्गत्वेनोपन्यस्तो न त्वेकदेन्द्रियद्वयवृत्त्यभावः हेत्वसिद्धिदोषापत्तेरिति । वृत्तौ संकोचविकाशयोः कारणमाह । तच्चेति । तच्च संकोचविकाशनं धर्माधर्मादिरूपनिमित्तापेक्षया भवति अनादित्वाच्चात्र नान्योन्याश्रय इति । ननु धर्मादेरेव चेच्चित्तवृत्तिविकाशस्तर्हि शरीरादिधर्मैस्तुतिदानादिभिरेव ज्ञानादिसंभवे दुष्करयोगापेक्षा न युक्तेत्याशङ्कायामाह । निमित्तं चेति । अभिवादनादीति । आदिशब्देन निन्दापरस्वादानातिक्रमादीन्यधर्मसाधनान्यपि गृहीतानि । श्रद्धादीनि श्रद्धादयः पूर्वं व्याख्याताः श्रद्धावीर्यस्मृतिसमाधिप्रज्ञाः तद्विपरीताश्चाश्रद्धादय इत्यर्थः । ननु श्रद्धादिमात्रस्य धर्मनिर्वर्तकत्वे किं प्रमाणं तत्राह । तथा चोक्तमिति । विहारा अयत्नसाध्याः निष्पाद्यधर्मनिर्वृत्तौ हेतुः बाह्यसाधनेति । बाह्यसाधननिरपेक्षस्वभाव इत्यर्थः । तयोरिति । तयोश्च बाह्याध्यात्मिकयोर्मध्ये मानसं कर्म बलीयः । यतो मानसं कर्म ज्ञानवैराग्यरूपतया सर्वातिशायीत्यर्थः । निरतिशयत्वमुदाहरति । दण्डकारण्यं चेति । दण्डकदेशस्तद्राज्ञि* क्रोधान्विते शक्रः सप्तदिनशिलावृष्ट्या जनशून्यं चकार । अन्यत्सुगमम् । तथा च श्रद्धादिसाधनजन्यो योगधर्मो यथा चित्तविकाशसाधनं तथा बाह्यधर्मं इति योगधर्मस्यापेक्षेति । तदुक्तं याज्ञवल्क्येन

सर्वधर्मान्परित्यज्य मोक्षधर्मं समाश्रयेत् ।
सर्वे धर्माः सदोषाः स्युः पुनरावृत्तिकारकाः ॥

इति ।

इज्याध्ययनदानानि तपः स्वाध्यायकर्म च ।
अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् ॥

इति च । गीतायामपि ।

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥

* एतद्वचो ऽनित्यत्वात्कथंचित्साधु । तद्राज्ञे इति तु युक्तम् ॥ रा॰ शा॰

Digitized by Google

इति । यतश्च मानसं कर्मैव बलीयोऽत एव जडभरतादेः समाधिनिष्ठतैव श्रूयते ।

सर्वविज्ञानसंपन्नः सर्वशास्त्रार्थतत्त्ववित् ।
अपश्यत्स च मैत्रेय आत्मानं प्रकृतेः परम् ॥
न पपाठ गुरुप्रोक्तां कृतोपनयनः श्रुतिम् ।
न ददर्श च कर्माणि शास्त्राणि जगृहे न च ॥

इत्यादिनेति । तदेवं मोक्षयोग्यं चित्तं तत्प्रसङ्गेनेतरचित्तस्य बन्धप्रकारश्च दर्शितः पुरुषे चित्तद्वारकबन्धस्य स्वाभाविकत्वे मोक्षासंभवात् कर्मवासनादिमूलकत्वे तु तदुच्छेदतो मोक्षो घटतइति इदानीं मोक्षोपपत्तये ऽनाद्यसंख्यानामपि वासनानामत्यन्तोच्छेद उपपाद्यते ।

हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः ॥ ११ ॥

वासनाहेतुः संसारचक्रं तस्यापि हेतुरविद्येत्यतो ऽविद्यैव हेतुच्छेदार्थं इत्याह । हेतुरित्यादिना इत्येष हेतुरित्यन्तेन । हेतुः संसारचक्रमित्यन्वयः । संसारचक्रस्य ज्ञानकर्मवासनाहेतुत्वे हेतुगर्भविशेषणं प्रवृत्तमिदं षडरमिति । धर्माधर्मसुखदुःखरागद्वेषरूपैरारषट्कैर्यावदविद्यादण्डप्रेरितेन भ्रमितं भवतीत्यतो वासनाहेतुरित्यर्थः । कुलालचक्रस्य हि दण्डेन शलाकाप्रेरणे कृते वेगाख्यः संस्कारो भवति येन कियत्कालं स्वयमपि भ्रमति तद्वदेव भ्रामितं संसारचक्रं वासनाहेतुरिति भावः । चक्रप्रवर्त्तकं दण्डमाह । अस्य चेति । नेत्री भ्रामिका तथा च सर्ववासनोदये ऽविद्यैव मूलकारणम् । अविद्याक्षये च विहितनिषिद्धकर्मणां सत्त्वे ऽपि संसारचक्रभ्रमणाच्च वासनोदय इत्याशयः । हेतुमुपसंहरति । इत्येष हेतुरिति । अविद्या हेतुर्वासनाया इत्यर्थः । फलं त्विति । यं पुरुषार्थमुद्दिश्य धर्माद्युत्पन्नं तदेव वासनानामपि फलं कर्मवासनयोरन्योन्यसहकारित्वादित्यर्थः । ननु फलेन कथं कारणस्य नियमरूपः संग्रहः कथं वा फलाभावे कारणाभावः फलाभावकालेपि कारणस्य सत्त्वादित्याशङ्कायामाह । न त्वपूर्वोपजन इति । अपू-

कस्य सत उपजनो जन्म हि नास्तीत्यर्थः। तथा सत्कार्यस्वीकारेणानागतावस्थकत्वेन व्याप्तो वर्त्तमानहेतुर्भवत्येवेति भावः। आश्रयमाह। मनस्त्विति। साधिकारं पुरुषार्थवत्। अत्र प्रलये वासनासत्त्वस्यानुरोधेन वासनाश्रयमनसो नित्यत्वमभिप्रेत्य साधिकारमिति विशेषणम्। अन्यथाधिकारसमाप्तौ मन एव न तिष्ठतीति विशेषणं व्यर्थमिति। आलम्बनमाह। यदभिमुखमिति। मोक्षकाले कामिनीरूपादीनां रागवासनाव्यञ्जकानां सत्त्वेपि आलम्बनाभावोपपादनायाभिमुखमिति विशेषणं तथा च सन्निकृष्टं वासनाव्यञ्जकमनालम्बनमित्यर्थः। हेत्वादीन् व्याख्याय सूत्रवाक्यार्थमाह। एवमिति। संगृहीताः व्याप्ताः। अत एषामभावेऽत्यन्तोच्छेदे विदेहमुक्तिसमये तदाश्रयाणां तन्नियतानां वासनानामत्यन्तोच्छेद इत्यर्थः। तथा च वासनानामनादित्वेपि मोक्षः संभवतीत्याशयः। सत्कार्याभ्युपगमात् वासनानामत्यन्तोच्छेदो न संभवतीति शङ्कयोत्तरसूत्रमवतारयति। नास्तीति। द्रव्यत्वेन संभवन्त्यः वस्तुत्वेन तिष्ठन्त्यः।

अतीतानागतं स्वरूपतोस्त्यध्वभेदाद्धर्माणाम्॥ १२॥

भवेदप्ययं दोषो यदि स्वरूपापायो वासनानामस्माभिरुच्येत किं स्वत्यन्तातीततामात्रं यतोतीतानागतं वस्तु स्वरूपतोस्ति। नन्वेकदा विरुध्यमानानां धर्माणां कथमेकत्र सत्ताघटेत तत्राह। अध्वभेदाद्धर्माणामिति। भिन्नाध्वकत्वादविरोध इत्यर्थः। वर्त्तमानलक्षणानामेव धर्माणाम् एकदा विरोध इति भावः। अतीतानागतयोः स्वरूपानपाये प्रमाणं दर्शयति भाष्यकारः। भविष्यदिति। भविष्यन्ती व्यक्तिरभिव्यक्तिर्यस्य तत्तथा। त्रयमिति। त्रयमप्येतद्वस्तु स्वरूपसत् यतो योगिनां प्रत्यक्षज्ञानस्य ज्ञेयं विषयः। अत्र तर्कमाह। यदि चेति। नेदमिति। शशशृङ्गादीनां ज्ञानादर्शनादिति भावः। तथा चोक्तं ब्रह्ममीमांसासूत्रेण 'नाभाव उपलब्धे'रिति। ननु शुक्तिरजतादिवत् बुद्धिपरिणामविशेष एव योगजधर्मादिजन्योऽतीतादिस्थले साक्षिज्ञानविषयोस्त्विति चेन्न। योगिना पूर्वानुभूतातीतादेः कालान्तरेपि प्रत्यभिज्ञायमानत्वात्। बाधकाभावेपि वस्तूनां बुद्धिमात्रत्वे

वर्त्तमानावस्थवस्तूनामपि बुद्धिमात्रताप्रसङ्गाच्च । न चानुपलम्भो बाधकः । योगिप्रत्यक्षसिद्धस्य सौक्ष्म्येणानुपलम्भोपपत्तेः । तथा च सांख्यसूत्रं 'सौक्ष्म्यात्तदनुपलब्धि'रिति । नन्वतीताद्यवस्थायां नास्तीति प्रत्ययो बाधक इति । मैवम् । योगिप्रत्यक्षेण लौकिकप्रत्यक्षस्य बाधनात् इदानीं घटोऽतीत इत्यादिप्रतीतिबलात् नास्तीति प्रत्ययस्यातीततादिविषयकत्वाच्चेति । अतीतानागतसत्त्वस्वीकारे बीजान्तरमाह । किं चेति । भोगभागी यस्य भोगसाधनस्य निरुपाख्यमसत् तदुद्देशेनेत्यस्य विवरणं तेन निमित्तेनेति कुशलो निपुणः, कुशलो योगी अनागतं साक्षात्कृत्य तद्वर्त्तमानत्वाय यतते यथार्जुनः कृष्णशरीरे कालात्मके भीष्मादिप्रवेशे भाविनं दृष्ट्वा युद्धे प्रवृत्त इति । नन्वेवं कारणव्यापारो विफलः कार्यस्य नित्यत्वादित्याशङ्कां परिहरन्नेव परमते दूषणान्तरमाह । सतश्चेति । तथा चाव्यक्तावस्थया सतो वर्त्तमानतायां कारणव्यापारसाफल्यं दृष्टं च कारणव्यापारेण सदेवाभिव्यज्यत इति यथा पाषाणेषु सतामेव प्रतिमापट्टादीनां लौकिकव्यापारेणाभिव्यक्तिमात्रमिति । तदुक्तं वासिष्ठे

सुषुप्तावस्थया चक्रपद्मरेखा शिलोदरे ।
यथा स्थिता चितेरन्तस्तथेयं जगदावली ॥

इति । चैतन्ये च जगदावली प्रकृतिपुरुषयोस्तप्तायःपिण्डवदविवेकेन प्रकृतिद्वारोपासनार्थो श्रुतिस्मृत्योरुच्यते सर्वकर्तृत्वसत्यसंकल्पत्वादिवत् । अथ वा गगने वायोरिवाधारत्वमसङ्गेऽनेनैव चैतन्ये जगत उच्यते इति । ननु तथापि कारणनित्यत्वेनातीताद्यवस्थादपि कारणात्सदेव कार्याभिव्यक्तिः स्यात् तत्राह । सिद्धमिति । सिद्धं वर्त्तमानमेव निमित्तमित्यादिरर्थः, सतः कार्यस्योत्पत्तौ कारणवैफल्यशङ्कानिरासायोक्तं विशेषानुग्रहणमिति । परमतं निषेधति । नापूर्वेति । अतो नापूर्वमुत्पादयतीत्यर्थः । अपूर्वोत्पादने च शशशृङ्गाद्यपि कारणव्यापारादुपपद्येत । उत्पत्तेः प्राक् शशशृङ्गादिभ्यो घटादीनां वैलक्षण्याभावादिति अधिकं तु प्रागुक्तम् । अध्वभेदादिति सूत्रावयवं व्याचष्टे । धर्मो चानेकेति । अतो न विरोध

इत्याह । न चेति । अभिव्यक्तिरूपेण विशेषेणैव धर्माणां विरोधो न स्वरूपत इति वाक्यार्थः । व्रूयतः स्वक्रियाकारित्वेन । पृच्छति, कथं तर्हीति । उत्तरं, स्वेनैवेति । व्यङ्ग्येन भाविव्यक्तिकेन । वर्त्तमानस्यैवेत्यादिरध्वनोरित्यन्त उपसंहारः । षष्ठी चात्र सप्तम्यर्थे । ननु तथाप्येकाध्वसमये ऽपराध्वाभावादध्वन्येव स न कार्यहानिरित्याशङ्कायामाह । एकस्य चाध्वन इति । एतच्च एते भूतेन्द्रियेष्वित्यादिसूत्रे सम्यगुपपादितमस्माभिरिति । अभूत्वा भूत्वा चयाणामध्वनां लक्षणानामिति ।

(शेषमग्रे)

काशीस्थराजकीयप्रधानपाठशालायां { सांख्ययोगाध्यापकस्तात्याशास्त्र्यपरनामा पटवर्धनोपाह्वो रामकृष्णशास्त्री । ज्योतिषशास्त्राध्यापकः केशवशास्त्री च ।

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 476. VOL. VI.)

पूर्व पर्व मर्व पूरणे ॥ पूर्वेति । 'उपधायां चे'ति दीर्घः । क्विपि रात्सलोपे पूः । पिपर्त्तौ च व्युत्पादयिष्यते । पुरि भवादि पौरेयम् । 'नद्यादिभ्यो ढगि'ति शैषिको ढक् । तत्र वृत्तौ पूर्वनगरीति पठित्वा केचित्पूर्वनगरीति पठन्ति विच्छिद्य च प्रत्ययं कुर्वन्ति, उभयमपि प्रमाणमित्युक्तम् । द्विपुरी ऋक्पूरब्धूरित्यकारः समासान्तः, स चाकृत एव समास इति जञ्जतावुक्तं, तेनाकारान्तोत्तरपदद्विगुत्वे ङीप् पूर्ववद्वापि । स्वतिकिंनञः परत्वे समासान्तो न भवति । पूर्वः । अच् । 'सर्वादीनि सर्वनामानि' असंज्ञोपसर्जनानि सर्वादीनि सर्वनामसंज्ञानीति सर्वनामत्वे 'सर्वनाम्नः स्मै'इति ङेः स्मैभावः । पूर्वस्मै । 'पूर्वादिभ्यो नवभ्यो वे'ति पूर्वस्मात् । पूर्वात् । पूर्वस्मिन् । पूर्वे । इति पूर्वस्य स्मात्स्मिनो 'आमि सर्वनाम्नः सुडि'ति पूर्वेषामित्यामः सुडागमः, बहुवचने झल्ये'दित्येत्वे षत्वम् । 'जसि च' 'पूर्वपरावरदक्षिणोत्तरापराध-

राणि व्यवस्थायामसंज्ञाया'मिति जसः कार्यं प्रति सर्वनामसंज्ञाविकल्पनात् सर्वनामत्वे 'जसः शी'ति शीभावे पूर्वे । पूर्वाः । जसः कार्यं प्रत्येत्युक्त्वा 'ऽव्ययसर्वनाम्नामकच् प्राक् टे'रित्यकचि संज्ञायां विकल्पनाभावात्पूर्वके । पूर्वका इति भवति । व्यवस्था नाम स्वाभिधेयापेक्षो ऽवधिनियमः । मासेन पूर्वाय मासपूर्वायेत्यत्र पूर्वसदृशेति तृतीयासमासत्वे 'तृतीयासमास'इति सर्वनामत्वाभावः । अत्र समासइति प्रकृते पुनः समासवचनाद्वाक्येपि नेयं संज्ञा । स्त्रियां तु 'सर्वनाम्नः स्याड्ढ्रस्वश्चे'ति । ङित्सुवचनेषु स्याडागमे ह्रस्वत्वे पूर्वस्यै, पूर्वस्याः२, पूर्वस्यामिति । शीभावाद्वानन्तत्वाच्च भवति । पूर्वस्मिन्नहनि, पूर्वेद्युः । 'सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरधरेद्युरुभयेद्युरुत्तरेद्यु'रि'ति द्युप्रत्यये यस्येति लोपो निपात्यते । 'तद्धितश्चासर्वविभक्ति'रिति अव्ययत्वायम् । पुरो वसति । पुरत आगतः पुरो रमणीयम् । 'पूर्वाधरावराणामसि पुरधवश्चैषामि'ति सप्तमीपञ्चमीप्रथमान्तेभ्यः पूर्वादिभ्यो ऽसिप्रत्ययः स्वार्थे तत्संनियोगेनैषां यथासंख्यं पुरादाय आदेशा इत्यसिप्रत्यये पूर्वस्य पुरादेशः पुरस्ताद्वसति । पुरस्तादागतः । पुरस्ताद्रमणीयम् । अस्तीति च अस्तातो परतः पूर्वादिभ्यः पूर्ववत् पुराद्यादेशाः । पूर्वतः । पूर्वत्र 'किं सर्वनामबहुभ्यो ऽद्व्यादिभ्य'इत्यधिकृत्य 'पञ्चम्यास्तसि'ल्' 'सप्तम्यास्त्रलि'ति स्वार्थे तसिल्त्रलौ पुरो भवं पौरस्त्यम् । 'दक्षिणापश्चात्पुरसस्त्यगि'ति शैषिकस्त्यक् पुरस्कृत्य 'पुरोऽव्ययमि'ति क्रियायोगे गतित्वात्कुगतीति समासे क्त्वो ल्यप् । 'नमस्पुरसोर्गत्यो'रि'ति कुप्वोः परतो विसर्जनीयस्य सत्वम् गतिसंज्ञायामव्ययवचनात् पुरः कृत्वेत्यत्रानव्ययत्वेन गतित्वाभावात् सत्वसमासयोरभावः । पूर्वं कृतमनेन पूर्वी 'पूर्वादिनि'रि'ति प्रथमान्तात्पूर्वशब्दादनेनेत्यर्थे इनिः, पूर्वं कृतमनेनेति 'सुप्सुपे'ति समासः कृतपूर्वी कटम् 'सपूर्वाच्चे'तीनिः । सपूर्वाद्विद्यमानपूर्वादित्यर्थः । पूर्वपुरुषः । पूर्वपुरुषः । 'पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्चे'ति समानाधिकरणविशेषणसमासः, पूर्वः कायस्य पूर्वकायः 'पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे' इति एकदेशिना ऽवयविना षष्ठ्यन्तेन पूर्वादीनि सामर्थ्यादवय-

वचनानि समस्यन्त इति तत्पुरुषः । एकाधिकरणइत्युक्तत्वादवयवित्येक- द्रव्ये सत्ययं समासः । तेन पूर्वः छात्राणामित्यत्र समासो न भवति । पूर्वापरम् । पूर्वापरे पूर्वापरौ 'विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्य- श्ववडवपूर्वापराधरोत्तराणाम्' इति द्वन्द्वस्य विभाषयैकवद्भावः । 'स नपुंसकमि'ति विहितैकवद्भावो नपुंसकलिङ्गः पूर्वंपूर्वं पुष्यति पूर्वतरं पुष्यतीत्यर्थः । पूर्वपरयोरर्थातिशयविवक्षायां द्वे भवत इति द्वित्वम् । पर्वति । पपर्व । पर्विता । पिपर्विषति । पापर्व्यते । पापर्ति । लङ्तिप्सिपोर- पापः । क्विपि । राल्लोपः परौ परः । पर्वतः । भृमृभृदृशिपर्वित्यत्र तप्, पर्वते भवो मनुष्यः पर्वतीयः 'पर्वताच्चे'ति शैषिकः छः । भवादावमनुष्ये 'विभाषा ऽमनुष्य' इत्यणि पार्वतमित्यपि भवति । तस्य जन्यं रघोर्घोरं पार्वतीयैर्गणैरभू- दिति प्रयोग'स्तस्येदमि'त्यणि द्रष्टव्यः । पर्वतोऽभिजनोऽस्याः पार्वती । 'सिन्धुतक्षशिलादिभ्योऽणञावि'ति प्रथमान्तादभिजनोपाधिकादस्येत्यर्थे तक्षशिलादित्वादञि ङीप्, यत्र पूर्वैरुषितः सोऽभिजनः । एवं मर्वतीत्यादि । पूर्व निकेतनइति चुरादौ । अत्र देवः । पूर्व्यतीति तु यक् स्वप्रएतत्कण्ड्वा- दिषु दर्शनादित्याह । गणपाठे पुनः पूर्वशब्दो न दृश्यते यस्त्वर्थनिर्देशस- हिते गणे पठ्यते लेट् लोट् धौत्ये पूर्वभावे स्वप्ने चेति सोऽनयोरर्थनिर्देशः । अत एव शकटायनीयायां वृत्तावर्थनिर्देशमन्तरेण कण्ड्वादीनां पाठे पूर्व्व- शब्दो न पठ्यते स्पष्टं चैतत्पुरुषकारे ॥ ५६७ ॥

चर्व अदने ॥ चर्वतीत्यादि । चर्वयति देवदत्तं निगरणचलनेति नित्यं परस्मैपदम् । गतिबुद्धीति प्रयोज्यस्य कर्मत्वम् ॥ ५६८ ॥

भर्व हिंसायाम् ॥ भर्वतीत्यादि । अयमीदित्स्वपि क्व चित्प- ठ्यते ॥ ५६९ ॥

कर्व खर्व गर्व दर्पे ॥ कर्वति । खर्वति । गर्वतीत्यादि । कर्वतीतीदि- त्स्वपि पठ्यते ॥ ५७२ ॥

अर्व शर्व षर्व हिंसायाम् ॥ अर्वति । आनर्व । अर्विता । अर्विविषति । शर्वः शृधातेरौणादिके वप्रत्ययेऽपि । शर्वस्य स्त्री शर्वाणी इन्द्रवरुणेत्यादिना ङीषानुकौ । सिसर्विषतीत्यत्र स्तौतिण्योरेवेत्यषत्वम् । बोपदेवे वयन्तास्सर्वि

सिषर्विषतीति । सर्वः सर्त्तेर्वप्रत्ययेऽपि सर्वनामकार्यम् । सर्वस्मिन्काले सर्वदा 'सर्वैकान्यकिंयत्तदः काले दा' इति काले वर्तमानात्स्वार्थे दाप्रत्ययः 'सर्वस्य सोऽन्यतरस्यां दि' इति पक्षे सभावः सर्वस्मै हितं सार्वम् । सर्वीयम् । सर्वपुरुषाभ्यां णढञाविं'त्यत्र सर्वाण्णस्य वा वचनमिति उक्तत्वाच्चतुर्थ्यन्ताद्धितमित्यर्थे छाणौ । सर्वदेवः 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेने'ति कर्मधारयः सर्वेषां शुक्लतरः सर्वशुक्लः गुणात्तरेण समासस्तरलोपश्चेति तरबन्तस्य तरबन्तेन समासस्तरलोपश्च ॥ ५७५ ॥

इवि व्याप्तौ ॥ इन्वति । इदित्त्वान्नुम् । नुम्विधावुपदेशिवद्वचनादिजादिगुरुमत्त्वादिन्वां चकार । इन्विता । इन्विष्यति । इन्वतु । ऐन्वत् । इन्व्यात् । ऐन्वीत् । इन्विविषति । इन्वयति । ऐन्वित् । इन्वन्तीति इन्वकाः तारकाविशेषाः । संज्ञायां क्वुन् क्षिपकादित्वात्प्रत्ययस्थादितीत्वाभावः ॥ ५७६ ॥

पिवि मिवि णिवि सेवने ॥ अयं पाठो मैत्रेयस्य अन्ये तृतीयं मूर्धन्योष्ठ्यादिं पठन्ति । सेवमर्दात तदर्न्तुरयाम् । पिन्वति । पिपिन्व । पिन्विता । पिपिन्विषति । पेपिन्व्यते । पिन्वयति । अपिपिन्वत् । एवं मिन्वतीत्यादि ॥ ५७९ ॥

हिवि दिवि धिवि जिवि प्रीणनार्थः ॥ अत्र के चिदाक्रमिकारादिं पठित्वा पुनः पाठोऽर्थभेदादिति धातूनामनेकार्थत्वे तु न प्रयोजनमस्ति । तस्मान् मैत्रेयोक्त एव हिवीति पाठोऽन्याय्यः । हिन्वतीत्यादि । जिहिन्व । हिन्विवतेत्यादि पिन्वतिवत् । एवं दिन्वतीत्यादि । धिनोति 'धिन्विकृण्व्योर च' इति शब्विषये उप्रत्ययः अकारश्चान्तादेशः । तस्यातो लोपः । तस्य स्थानिवत्त्वात् उप्रत्ययमपेक्ष्य लघूपधगुणो न भवति तस्य पित्सु गुणः । धिनोति । धिनुतः । धिन्वन्ति । अन्तादेशे यणादेशः । धिनोषि । धिनुवः । धिन्वः । 'लोपश्चास्यान्यतरस्यां म्वोः' ॥ असंयोगपूर्वो य उकारस्तदन्तस्य वकारमकारादौ प्रत्यये वा लोप इति पक्षे उलोपः । पिति तु परत्वाद्गुणे उकारस्याभावः । धिनोतु । धिनु । 'उतश्च प्रत्ययादसंयोगपूर्वात्' । योऽयमुकारोऽसंयोगपूर्वः तदन्तात्प्रत्ययात् परस्य हेर्लुगिति लुक् । धिनवा-

नि । नित्यत्वादुकारलोपात् पूर्वमाट् । अधिनोत् । अधिनुताम् । अधिनोः । अधिनवम् । अधिन्व । अधिनुव । धिनुयात् । अन्यत्र लकारे पूर्ववत् धिन्वयतीत्यादि । जिन्वतीत्यादि इवेने गतम् ॥ ५८३ ॥

रिवि रवि धिवि गत्यर्थाः ॥ रिण्वति । धन्वतीत्यादि । धन्वा । 'कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिव' इति कनिन् । उणादिवृत्तौ धन्विः सौत्रो धातुरुच्यते । नान्तत्वादसंबुद्धौ सर्वनामस्थाने दीर्घः । भसंज्ञायां 'न संयोगाद्वमन्तादि'ति अल्लोपनिषेधात् धन्वन इति । स्त्रियाम् 'अनो बहुव्रीहे'रिति ङीपो निषेधात् । सुधन्वा सुधन्वानावित्यादि । यदा डाबुभ्यामिति डाप् तदा सुधन्वा सुधन्वे इत्यादि । अन्यतरस्यांग्रहणात् अत् डापोऽभ्यनुज्ञानमुक्तं तदुपधालोपिन एवेति जैमतावुक्तम् ॥ ५८६ ॥

कृवि हिंसाकरणयोश्च ॥ चकाराद्गतौ । कृणोति । धिन्विकृण्व्योर चेति सार्वधातुकविषये उकारप्रत्ययोऽकारश्चान्तादेशः । अल्लोपादि सर्वं धिन्विवत् । अयं स्वादौ च ॥ ५८७ ॥

मव बन्धने ॥ मवति । ममाव । मेवतुः । मविता । अमवीत् । अमावीत् । अतो हलादेरिति वा वृद्धिः । मिमविषति । मामव्यते । मामवीति । मामोति । मामूतः । मामवति । मामोषि । मामोमि । मामावः । मामूमः । 'ज्वरत्वरश्रिव्यविमवामुपधायाश्च' । ज्वरादिनामुपधावकारयोः क्वौ झलादावनुनासिकादौ च प्रत्यये परे ऊडित्यूडादेशोऽपीति गुणः । मामवतीत्यत्र परत्वात् नित्यत्वात् अतुवे झलादित्वं पर्यवपन्नमिति ऊण् न भवति । मामावेत्यत्र वलि लोपे 'अतो दीर्घो यञी'ति दीर्घः । ज्वरत्वरेत्यत्र क्व चित् वृत्तिकारैः । क्वौ झलादौ क्ङितीति न पठ्यते तत्र क्ङिद्ग्रहणं संपातायातम् । अवतेस्तुन्योतुरितिदर्शनात् तथा अनुनासिकादिग्रहणं चावश्यमत्रानुवर्त्यम् । अवतेर्मनिन्प्रत्यये तस्य च टिलोपे ओमिति दर्शनात् । तथा च न धातुलोपइत्यत्र कैयटे आसोमाणमिति उपादाय छान्दसत्वादुकारस्य ऊण् न भवती इत्युक्तम् । मामोतु । मामोतात् । मामोहि । मामवानि । नित्यत्वादाटि झलादित्वं पर्यवपन्नमित्यूडभावः । लङितिप्सिपोर्हल्ङ्यादि अमामोत् । अमामोः । मिपि नित्यत्वादमभावे अमामवम् । मावयति । अमीमवत् ।

वकारान्तानामूठ्भाविनां यक्त्वेति यदुक्तं न तत् क्त्वोरिति ऊठ्विषयं द्रष्टव्यम् । क्विपि मूः मुवौ ॥ ५८८ ॥

अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु ॥ अवति । आव । आवतुः । अविता । मा भवानवीत् । अविविषति । आवयति । मा भवानविवत् । क्विपि ज्वरत्वरेत्यादिनोठ् । ऊतिः । ऊतियूतीत्यादिना क्तिनि निपात्यते । स्त्रियां क्तिनि सिद्धे निपातनमुदात्तार्थम् । अविषः । 'अविमह्योष्टिषच्' इति टिषचि टित्वात् स्त्रियामविषी । ऊनः । 'इण्सिञ्जिदीङुष्यविभ्यो नक्' इति नकि कित्त्वादगुणत्वम् । ओम् । 'अवतेष्टिलोपश्चे'ति मन् तस्य च टिलोपः । ऊठ् गुणः ओतुः । सितनीत्यादिना तुनि ऊठि गुणः अश्वोतुः 'ओत्वोष्ठयोः समासे वा' इति वा पररूपम् । अन्यदा 'वृद्धिरेची'ति वृद्धिः । अविः । इवितीन् । अविरेवाविकः 'अवेः क' इति स्वार्थे कप्रत्ययः । अवनिः 'अर्तिसृधृतृजनिभ्यो ऽनि'रित्यनिः अवनी । कृदिकारत्वात् ङीष् । अवीः । 'अवितृस्तृतन्त्रिभ्य ईः' इति ईप्रत्ययः । अव्यादय उदात्तेतो तोऽजयतिवर्जम् ॥ ५८९ ॥

धावु गतिशुद्ध्योः ॥ उदात्तः । स्वरितेत् । 'स्वरितञितः कर्त्रभिप्राये क्रियाफल' इति क्रियाफलस्य प्रधानस्य कर्तृगामित्वविवक्षायां तङ् । धावति । दधाव । दधावतुः । धावितेत्यादि । तङ्पक्षे धावते । इत्यादि । यदा क्रियाफलस्य कर्तृगामित्वमुपपदेन प्रतीयते तदा 'विभाषोपपदेन प्रतीयमान' इति परस्मैपदं भवति । स्वार्थं धावतीति दिधाविषति दिधाविषते 'पूर्ववत्सन' इति क्रियाफलस्य कर्तृगामित्वे तङ् । दाधाव्यते । धावयति । अदीधवत् । धावित्वा । धौत्वा । 'उदितो वे'तीड्विकल्पः । इडभावे च्छ्वोः शूडिति ऊठि 'एत्येधत्यूठ्स्वि'ति वृद्धिः निष्ठायां 'यस्य विभाषे'ति अनिट्त्वात् धौतः । धौतवान् । अत्र मैत्रेयः कथं धावितो धावितवानिति उपक्रम्य कृतिवृतिनृतीनामीदित्त्वं 'यस्य विभाषे'त्यस्यानित्यत्वे ज्ञापकमाह नित्यत्वे ह्येतेषां 'सेऽसिचि कृतचृतच्छृदतृदनृत' इति सकारादाविटो विकल्पनात् निष्ठायामनिट्त्वस्य सिद्धत्वात्किं तदर्थेनेदित्त्वेन ॥ ५९० ॥

अथ ऊष्मान्ता आत्मनेपदिनः । धुक्ष धिक्ष संदीपनक्लेशनजीवनेषु ॥ धुक्षते । दुधुक्षे । धुक्षिता । धुक्षिष्यते । धुक्षताम् । अधुक्षत । धुक्षेत । धुक्षिषीष्ट । अधुक्षिष्ट । दुधुक्षिषते । दोधुक्षीति । दोधुष्टि । अनिटि स्कोरिति कलोपः । तस्यासिद्धत्वात् न लघूपधगुणः दोधुक्षि । अनीट्त्वे स्कोरिति कलोपे 'षढोः कः सी'ति कत्वे सिपः षत्वम् । दोधुष्टु । दोधुड्ढि । अत्र सेर्हिः तस्य धित्वे 'झलां जश् झशी'ति डकारः । दोधुक्षाणि । लङि । तिप्सिपोर्हल्ङ्यादिलोपे पदान्तसंयोगत्वात् कलोपे 'झलां जशोन्ते' इति जश्त्वस्य 'वावसान'इति चर्त्वे अदोधोट् । धुक्षयति । अदुधुक्षत् । धुक्षः । एवं धिक्षत इत्यादि ॥ ५९२ ॥

वृक्ष वरणे ॥ वृक्षते । ववृक्षे । द्विर्वचने उरदत्वे च हलादिशेषः । वृक्षितेत्यादि । विवृक्षिषते । वरीवृक्ष्यते । रीगृत्वत इति रीगागमः । वर्वृष्टि । वरिवृष्टि । इत्यादि । वृक्षयति । अववृक्षत् । वृक्षः । वृक्षाः ॥ ५९३ ॥

शिक्ष विद्योपादाने ॥ शिक्षते । शिशिक्ष इत्यादि धुक्षिवत् । अत्र तरङ्गिणीकारादयः शिक्षेर्जिज्ञासायाम् इति वचनं नियमार्थम् इति व्याचक्षाणा जिज्ञासाया अन्यत्र परस्मैपदमाहुः । तदयुक्तम् । शकेः सन्नन्तस्य विद्यर्थसंभवात् न च विधिसंभवे नियमो युज्यते एवमेव समर्थितः न्यासकैयटपदमञ्जर्यादिषु ॥ ५९४ ॥

भिक्ष भिक्षायाम् अलाभे लाभे च ॥ भिक्षत इत्यादि पूर्ववत् । अयं द्विकर्मकः तत्राप्रधाने दुहादीनामिति वचनात् लङ्कृत्यखलर्थो अप्रधाने भवन्ति पौरवो गां भिक्ष्यते । भिक्षितव्यः भिक्षितः सुभिक्ष इत्यादि । षष्ठी तु द्वितीयावदुभयत्र भवति । भिक्षिता गौः पौरवस्येति । अप्रधाने तूभयथा गोणिकापुत्र इति भाष्यउक्तत्वात् पौरवमिति द्वितीयापि भवति । भिक्षितव्यो राजा देवदत्तेनेत्यत्रानभिहिते कर्मणि कर्तरि च कर्तृकर्मणोरिति षष्ठ्या उभयप्राप्तौ कृति प्रतिषेध इत्युक्तत्वात् न भवति । सर्वमेतद्वाप्यतामुपपादितं तत एवावगन्तव्यम् । भिक्षुः । 'सनाशंसभिक्ष उ'रिति ताच्छीलिक उप्रत्ययः । भिक्षाकः । जल्पभिक्षेति षाकन् षित्त्वात् स्त्रियां भिक्षाकी ॥ ५९५ ॥

क्लेश अव्यक्तायां वाचि ॥ बाधन इति दुर्गः । अत्र स्वामी क्लेश व्यक्तायां वाचि चेति पठन्निमावपि पूर्वधातोरर्थावेवाह । चन्द्रदुर्गमैत्रेयसंमताकारदेवादयस्तु धात्वन्तरमेवाहुः । क्लेशते । चिक्लेशे । क्लेशितेत्यादि । चिक्लेशिषते । क्लेश्यते ॥ ५९६ ॥

दक्ष वृद्धौ शीघ्रार्थे च ॥ दक्षते । ददक्षे । दक्षितेत्यादि । दक्षिणः । द्रुदक्षिभ्यामिनन्निति इनन् पूर्वशब्दवत् सर्वनामत्वं तत्कार्यं च । स्त्रियां तु टापि दक्षिणा । दक्षिणामर्हतीत्यादि दक्षिणीयः । दक्षिण्यः । 'कडंकरदक्षिणाच्छ चे'ति द्वितीयान्तादर्हतीत्यर्थे छयतौ । ग्रामस्य दक्षिणतो वसति । दक्षिणत आगतः । दक्षिणतो रमणीयम् । 'दक्षिणोत्तराभ्यामतसुचि'ति सप्तमीपञ्चमीप्रथमान्तात् स्वार्थेऽतसुच् 'षष्ठ्यतसर्थप्रत्ययेने'ति तद्युक्तात्षष्ठी । अतसर्थप्रत्यय इति सप्तम्याद्यन्तात्स्वार्थे यो विहितः स उच्यते । दक्षिणा ग्रामस्य । 'उत्तराधरदक्षिणादाति'रित्ययमातिरतसुज्विषये पूर्ववत् ग्रामतः षष्ठी । दक्षिणेन ग्रामम् । ग्रामस्येति वा 'एनबन्यतरस्यामदूरे पञ्चम्या' इति उत्तरादिभ्य एनप् प्रत्ययः । अपञ्चम्य इति वचनादयं सप्तमीप्रथमान्तेभ्य उत्तराद्यर्थोऽवधिसापेक्ष इति अवधिमतस्तस्य सामर्थ्यादवध्यपेक्षमदूरत्वम् । अन्यतरस्यांग्रहणं यथाप्राप्तातसुजाद्यभ्यनुज्ञानार्थमितरथा ह्ययं दूरे बाधकः स्यात् 'एनपा द्वितीये'ति तद्युक्तात् द्वितीया षष्ठ्यपीष्यते इति षष्ठी पक्षे । दक्षिणा ग्रामात् 'दक्षिणादाजि'त्याच् एनपो विषये 'अन्यारादितरर्त्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते' इत्यान्त्ययुक्तात्पञ्चमी । अन्य इत्यर्थग्रहणम्, आरादितरर्त्ते इतिस्वरूपग्रहणम् । दिक्शब्दा दिशि दृष्टाः पूर्वादयः । अञ्चूत्तरपदाः प्रागादयः । आजाही प्रत्ययौ दिक्छब्दत्वादेव सिद्धे ऽञ्चूत्तरपदग्रहणमस्तात्यन्तार्थम् । तत्र हि 'षष्ठ्यतसर्थप्रत्ययेने'ति षष्ठी विधीयते एवमाजाह्योरपि । दक्षिणाहि ग्रामात् । 'आहि च दूर'इत्याहिः । पूर्ववदवध्यपेक्षदूरत्वे चकारादाजपि द्रष्टव्यः । सर्व एते 'तद्धितश्चासर्वविभक्ति'रिति अव्ययसंज्ञकाः । दक्षिणा भवः । दक्षिणात्यः । 'दक्षिणापश्चात्पुरसस्त्यगि'ति शैषिकस्त्यक् । दक्षिणाशब्दः पश्चात्पुरोभ्यां साहचर्यादिहाजन्तोऽव्ययं गृह्यते ।

तत एव सर्वनामत्वाभावात् सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति पुंवद्भावो न भवति ॥ ५९७ ॥

दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु ॥ दीक्षत इत्यादि । अनुदात्तेत्त्वेऽपि युच् 'सूददीपदीक्षश्चे'ति निषेधाद्दीक्षितेति सामान्यस्तु न भवति ॥ ५९८ ॥

ईक्ष दर्शने ॥ ईक्षते । ईक्षां चक्रे । ईक्षिता । ईक्षिष्यते । ईक्षताम् । ऐक्षत । ईक्षेत । ईक्षिषीष्ट । ऐक्षिष्ट । ईचिक्षिषते । ईक्षयति । ऐचिक्षत । देवदत्तायेक्षते नैमित्तिकः । पृष्टः सन् शुभाशुभं पर्यालोचयतीत्यर्थः । 'राधीक्ष्योर्यस्य विप्रश्नः' अनयोस्तत्कारकं संप्रदानं यस्य विप्रश्नः । यद्विषयं पृच्छ्यत इत्यर्थः । स्वसंबन्धिनः शुभाशुभस्य विप्रश्नयोगित्वात्कारकमपि तथोच्यते । तदिह धातुरर्थात् शुभाशुभपर्यालोचनवृत्तिः । अन्यत्र देवदत्तमिति द्वितीयैव । सुखं प्रतीक्षते सुखप्रतीक्षः । सुखप्रतीक्षा 'ईक्षिक्षमिभ्यां चेति वक्तव्य'मिति कर्मण्युपपदे णप्रत्ययः ॥ ५९९ ॥

ईष गतिहिंसादर्शनेषु ॥ ईषते । ईषां चक्रे । ईषितेत्यादि । 'तीषसहलुभरुषरिषः' इत्यत्र ह्रस्वादेर्ग्रहणात् ईषितेत्यादौ नेड्विकल्पः । ईषा । मनस ईषा मनीषा पृषोदरादिः । समीष्ट आचार्यः । ईष्व इति वचनस्य निपातनमस्येति मैत्रेयः ॥ ६०० ॥

(शेषमग्रे)

सटीकसंक्षेपशारीरकम् ।

(*Continued from page* 488 Vol VI.)

मू० ॥ श्रुतिवचनविशेषाच्चेतने कारणेऽस्मिन्
यत इति निरवद्यादेकताधीरथागात् ॥
प्रकृतिरिति च तस्मिन्कारणे पञ्चमीयं
जनयति दृढबुद्धिं तद्विधानादिहैव ॥ ५०१ ॥

टी० ॥ कथं तर्हि भवन्मतेऽपि कारणैकत्वं सिद्ध्येदित्याशङ्क्य 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ती'ति जगत्कारणवाक्यगताद्यत इति यच्छब्दैकवचनादनुमानसिद्धकारणानुवादगतात्तत्सिद्धिरित्यभिप्रेत्याह । श्रुतिवचनेति । अथोक्तानुमानानन्तरं यत इति श्रुतिवचनविशेषादेकवचनरूपाच्चिरवशादनुमानोक्तशङ्काकलङ्कशून्यादस्मिन् चेतने जगत्कारणे एकताधीरगादागच्छेत् । यद्यपि यत इति बहुत्वसाधारणम् । तथापि येन जातानीत्युपरितनैकवचनेन तस्याप्येकवचनत्वं निर्णीतमिति भावः । ननु अनुमानसिद्धचेतनकारणानुवादियच्छब्दैकवचनाज्जगत्कर्तुरेकत्वं सिद्ध्येत्तु भवदभिमतं तस्य तदुपादानैक्यमपीत्याशङ्क्याह । प्रकृतिरिति । चकारेणैकताधियं समुच्चिनोति तस्मिन्कारणे इयं पञ्चमी प्रकृतिरिति च दृढबुद्धिं जनयतीति संबन्धः । तत्र हेतुमाह । तद्विधानादिति । जनिकर्तुः प्रकृतिरितिसूत्रेणेह प्रकृतित्वे पञ्चमीविधानादेवेत्यर्थः । यद्यपि पुत्रात्प्रमोदो जायत इत्यादिप्रयोगानुरोधेन निमित्तोपादानसाधारणीह प्रकृतिः । तथापि प्रकृतेऽपेक्षितस्य जगदुपादानत्वस्य ततः प्रतीतिसंभवान्न कश्चिद्दोषः । प्रत्युतापेक्षितनिमित्तत्वमपि ततः सिद्ध्यतीति गुण एव । श्रुत्यन्तरे च तदैक्षत बहु स्यां प्रजायेयेत्येकस्यैव चेतनस्योभयविधं कारणत्वं स्पष्टं श्रूयते । ननूपादानस्य नानात्वनियमादुपादानकर्त्रोश्च तथात्वादेतद्बाधितमिति चेत् । न तावदुपादानत्वं नानात्वनियतं रूपोपादाने घटादौ व्यभिचारात् । न च द्रव्योपादानेऽयं नियमः एकस्या एव रज्ज्वाः सर्पाद्यधिष्ठानत्वात् । रज्जुसर्पादेरिव वियदादेरप्यज्ञातब्रह्मविवर्तत्वेनाविशेषात् । एवमेकस्मादात्मन उपादानाद्द्विविधस्वप्नप्रपञ्चोदयादपि नास्ति सिद्धान्तेऽयं नियमः । अत एवोपादानकर्तृभेदोऽपि न नियतः । किं च सर्वत्र कार्ये चैतन्यस्यैकस्यैव कुलालादिशरीरावच्छेदेन निमित्तत्वं मृदाद्यवच्छेदेनोपादानत्वमिति तद्भेदे नास्त्येवोदाहरणं परमतेऽपि । देवदत्तो जानातीच्छतीत्यादिप्रतीत्यनुरोधेन ज्ञानाद्युपादानस्यैव कर्तृत्वमेवमीश्वरात्मघटसंयोग एकस्यैव तदुभयमिति नैव पराप्रसिद्धमस्माभिरुच्यत इति जगत्प्रकृतिरेका तदधिष्ठात्री चेति सिद्धम् ॥ ५०० ॥

मू० ॥ एकत्वमेकवचनादवगम्यमानं
यच्छब्दवाच्यनिलयं यत इत्यमुष्मिन् ॥
वाक्ये जगत्प्रकृतिगामितया न विद्युः
संख्यां विभक्त्यभिहिते वचनं हि नाह ॥ ५०१ ॥

टी० ॥ एका प्रकृतिरित्येतद्दूषयति । एकत्वमिति । यत इत्यमुष्मिन्वाक्ये एकवचनादवगम्यमानमेकत्वं यच्छब्दवाच्यनिलयं यच्छब्दप्रकृत्यर्थमात्राश्रयं जगत्प्रकृतिगामितया विभक्त्यर्थजगत्प्रकृतित्वविशिष्टाश्रयतया न विद्युः । कुतः वचनं विभक्त्यभिहिते स्वाभिधेयां संख्यां नाह न वदेद्यत इत्येकवचनस्य पञ्चमीविभक्तिप्रतिपाद्यप्रकृतित्वविशिष्टे स्वाभिधेयसंख्यां वक्तुमसामर्थ्यादेका प्रकृतिरिति धीः कुतो भवेदिति भावः ॥ ५०१ ॥

मू० ॥ न हि विभक्त्यभिधेयपदार्थगं
वचनमाह निजं विषयं क्वचित् ॥
वचनवाच्यगतं न वदन्ति च
स्वमभिधेयमशेषविभक्तयः ॥ ५०२ ॥

टी० ॥ वचनस्य विभक्त्यर्थविशिष्टस्वार्थाभिधायित्वं न क्वापि दृष्टमिति न प्रकृतिरेकेति धीः संभवतीत्याह । न हि विभक्तीति । अस्तु तर्हि विभक्तेर्वचनार्थविशिष्टान्वितस्वार्थजगत्कारणत्वाभिधायित्वं तथा चैका प्रकृतिरिति धीर्युक्तैवेत्याशङ्क्याह । वचनवाच्येति । एवं चैकवचनस्य यद्वाच्यमेकत्वं तद्विशिष्टगतं विभक्त्यर्थप्रकृतित्वं प्रस्तुते न सिद्ध्येदित्यर्थः ॥ ५०२ ॥

मू० ॥ प्रातिपदिकार्थगतमेव वचनानि
स्वंस्वमभिधेयमपि धातुमलमर्थम् ॥
प्रातिपदिकार्थगतमेव निजमर्थं
वक्ति च विभक्तिरपि नेह वचनार्थे ॥ ५०३ ॥

टी० ॥ ननु किमिति विभक्तिवचनाभ्यां परस्परार्थान्वितस्वार्थाभिधानं न कर्त्तव्यमित्याकाङ्क्षायामाह । प्रातिपदिकार्थेति । प्रत्ययस्य प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमस्य व्युत्पत्तिसिद्धत्वाद्वचनविभक्त्योः प्रकृत्यर्थान्वितस्वार्थाभिधान एव सामर्थ्यं न तु वचनस्य विभक्त्यर्थान्वितार्थाभिधानेऽपि । एवं विभक्तेरपि न वचनार्थान्विताभिधानेऽपि । तयोः प्रत्ययत्वाविशेषादिति भावः ॥ ५०३ ॥

मू० ॥ पशुनेति पदे तृतीयया
करणत्वं हि पशोर्निवेद्यते ॥
वचनेन पशोरिहैकता
न पुनः सा करणस्य कथ्यते ॥ ५०४ ॥

टी० ॥ ननु पशुना यजेतेति वाक्यात्पशुरेकः करणमिति प्रतीयते तद्वदेका जगत्प्रकृतिरिति शाब्दी प्रतीतिः किमिति न भवेदित्याशङ्क्य दृष्टान्तासंमत्योत्तरमाह । पशुनेतीति । पशुनेति पदे या तृतीया तयेत्यर्थः । इह पशुनेतिपदे । सा एकता । करणस्य तृतीयार्थकरणत्वविशिष्टस्य । इदमपि प्रागुक्तप्रत्ययाश्रितन्यायबलादेवेति द्रष्टव्यम् ॥ ५०४ ॥

मू० ॥ अनुपपत्तिबलेन विधेस्तयोः
करणतैकतयोरवगम्यते ॥
करणतैकपशोरिति संगति-
र्न घटते हि विधिर्विरहय्य ताम् ॥ ५०५ ॥

टी० ॥ कथं तर्हि पशुरेकः करणमिति धीरित्याशङ्क्याह । अनुपपत्तीति । पशुविशिष्टयागविध्यनुपपत्तिबलेनेत्यर्थः । विधेरनुपपत्तिबलेन तयोः करणतैकतयोः करणतैकपशोरित्येवंरूपेण संगतिरवगम्यते हि यस्मात्तां संगतिं विरहय्य विधिर्न घटते तस्माद्विधेरनुपपत्तिबलेनेत्यधस्तनेन संबन्धः ॥ ५०५ ॥

मू० ॥ उपादानतः संख्यया संगतिः स्या-
दवच्छेदकत्वेन संख्यानिवेशात् ॥
पशोरेतयोस्तेन मार्गेण कार्ये
निवेशोपपत्तेरुपादानमानात् ॥ ५०६ ॥

टी० ॥ ननु नियोगस्य तां विना कानुपपत्तिरित्याकाङ्क्षायां विध्यनुपपत्तिनिमित्तां तदुभयसंगतिमुपपादयति । उपादानत इति । विध्यनुपपत्तिबलात्पशोः संख्यया संगतिः स्यात्तत्संगतिविशेषमेव दर्शयन्सामर्थ्यरूपलिङ्गसिद्धं संख्यास्वभावं तच्च हेतुत्वेनाह । अवच्छेदकत्वेन संख्यानिवेशादिति । स्वाश्रयद्रव्यावच्छेदकत्वेन हि सर्वत्र संख्या द्रव्ये निविशते नात्र सा पशोरवच्छेदकत्वेनान्वेतीत्यर्थः । ततः किं तत्राह । एतयोरिति । करणत्वैकत्वयोरित्यर्थः । तेन पश्वन्वयेन । मार्गेण द्वारेण । कार्ये पशुयागकार्ये । निवेशोपपत्तेरित्यनन्तरं पशुरेकः करणमिति धीरुपपद्यत इति शेषः । एतदुक्तं भवति । पशुना यजेतेत्यत्र पशुप्रातिपदिकेन पशुर्विभक्तिवचनाभ्यां करणत्वमेकत्वं चावगम्यते तेषां च विधिनैव संबन्धः सर्वस्यापि तत्प्रकरणेऽवगतस्य तेनैवान्वयात्,संख्या चोपादेयविशेषणतया विवक्षिता तत्र साक्षात्तेषां नियोगान्वयानुपपत्तेर्नियोगस्य च स्वविषयधात्वर्थकरणमन्तरेण कार्यत्वावगमापर्यवसानात्पशुं धात्वर्थकरणतया योजयति । करणीभूतपशोश्चावच्छेदकसंख्याविशेषमन्तरेण विधेः पुनरपि सानुपपत्तिस्तदवस्थेति तत्सामर्थ्यानुसारेण करणपशोरवच्छेदकत्वेन संख्यां गृह्णातीति सिद्धम् । वचनविभक्त्यर्थयोरुपादानमानात्पशुना परस्परं च संसर्गः पशुत्वकरणत्वयोश्च कार्येण संबन्ध इति ॥ ५०६ ॥

मू० ॥ न चैवं विधिः कश्चिदर्पेति न स्या-
दुपादानतः संगतिर्यत्पदार्थे ॥
विभक्त्यर्थसंख्यार्थयोर्नेह कश्चि-
द्यतो वा इमानीति वाक्ये विधिर्नः ॥ ५१० ॥

टी० ॥ नन्वेवं यतो वा इमानीति वाक्येऽपि वचनविभक्त्यर्थयोरेवमेवान्वयोऽस्त्वित्याशङ्क्य नैवं युक्तम् तत्र विधेरभावादित्याह । न चैवमिति । यथा पशुनेति वाक्ये विधिरेवमत्र यत इत्यादिवाक्ये कश्चिदुत्पत्तिविनियोगादिविषयः कोऽपि विधिर्न, भावार्थविषयस्य तस्य शुद्धसिद्धार्थेऽसंभवादित्यर्थः । विध्यसंभवे फलितमाह । न स्यादित्यादिना । संख्याच तद्वाचकं वचनम् । नन्वत्रापि तद्विजिज्ञासस्वेति विधिः श्रूयत इत्याशङ्क्य ब्रह्मस्वरूपवाक्यात्तस्यावान्तरवाक्यभेदाच्च तदाकाङ्क्षया स्वरूपवाक्यस्थपदार्थान्वयो युक्त इत्याशयेनाह । नेह कश्चिदिति । स्वस्याव्युत्पत्तत्वद्योतनाय न इति शिष्यस्योक्तिः । तस्मादेतस्माद्वाक्यादेका प्रकृतिरिति धीर्न संभवतीति भावः ॥ ५०७ ॥

मू० ॥ अवितथमिदमेवमेतदस्मि-

न्न खलु विधेर्वचनं पठन्ति वाक्ये

यत इति घटते तथापि योगो

वचनविभक्तिनिगद्ययोरिहापि ॥ ५०८ ॥

टी० ॥ इदानीं सिद्धान्ती पश्वेकत्वकरणत्वयोरिव प्रकृतेऽपि यत्पदार्थे वचनविभक्त्यर्थान्वयो युज्यते इति तदुक्तं विध्यभावमङ्गीकुर्वन्नाह । अवितथमिति । सत्यमित्यर्थः । पश्वेकत्वकरणत्वयोर्विधिसामर्थ्यादेव परस्परं संसर्ग इत्येतदिदमा परामृशति । यत इति वाक्ये विध्यभाव इत्येतदप्यङ्गीकरोति । एवमेतदिति । एतदप्यवितथमित्यर्थः । अङ्गीकृतमेतदेवाह । अस्मिन्निति । यत इत्यस्मिन्वाक्य इति संबन्धः । कथं तर्हि तयोरन्वयः स्यादित्याशङ्क्याह । घटत इति । यद्यपीह विधेर्वचनं न पठन्ति, तथापि वचनविभक्तिनिगद्ययोर्वाच्ययोरेकत्वप्रकृतित्वयोरिहापि योगो घटत इति संबन्धः ॥ ५०८ ॥

मू० ॥ एकत्वमेववचनेन समर्पितं य-

द्याच्छब्दवाच्यनिलयं यत इत्यमुष्मिन् ॥

पञ्चम्युपात्तमपि यत्प्रकृतित्वमस्मिन्
संगच्छते तदुभयं पशुवस्तुनीव ॥ ५०८ ॥

टी० ॥ ननु प्रतिज्ञामात्रेण न वस्तुसिद्धिः, न चात्र तयोरन्वयप्रापकं हेतुं कं चित्पश्याम इत्याशङ्क्याह । एकत्वमिति । यत इत्यमुष्मिन्वाक्ये एकवचनेन यच्छब्दवाच्यनिलयं यच्छब्दार्थजगत्कारणाश्रयं यदेकत्वं समर्पितम् । एवं यत इति पञ्चम्योपात्तं तदुक्तं यत्प्रकृतित्वं तदुभयमप्यस्मिन् जगत्कारणे परस्परं संगच्छते । तत्र दृष्टान्तः । पशुवस्तुनीति । संख्याकारकत्वयोरिति शेषः । इदं हि वाक्यं वाक्यशेषावगतब्रह्मणो लक्षणं बोधयति तच्च जगत्प्रकृतित्वमात्रेण न सिद्ध्यति । जगत्प्रकृतीनामनेकत्वे एकस्य ब्रह्मणस्तदात्मत्वायोगादिति जगत्प्रकृतित्वविशिष्टस्य वचनार्थैकत्वेन संबन्धो लक्ष्यब्रह्मणापेक्षित इत्येका प्रकृतिरिति सिद्ध्यतीति भावः ॥ ५०९ ॥

मू० ॥ एका या प्रकृतिः समस्तजननी तद्ब्रह्म जिज्ञास्यतामित्यत्रापि हि वस्तुनिष्ठवचने शक्येव तत्संगतिः ॥
विज्ञातुं विधिमन्तरेण च तथाऽऽनर्थक्यभीत्या न हि
स्वाध्यायाध्ययनैकगोचरविधेरायातमर्थं विना ॥ ५१० ॥

टी० ॥ ननु ब्रह्मणो लक्ष्यताबलाद्विभक्तिवचनार्थयोः संगतिरित्युक्तमयुक्तं सिद्धान्ते हि जगत्कारणत्वं वक्ष्यमाणरीत्या तटस्थलक्षणं गृहस्येव काकः । तत्त्वं च तदुज्ज्ञातस्यैवेति वाच्यम् । न च जगत एकप्रकृतित्वमन्यतोऽवगतम्, न चास्मादेव वाक्यात्तदवगमः, एकस्य वाक्यस्य कारणैकत्वतदभिन्नब्रह्मस्वरूपप्रतिपादनायोगादत एव तस्य लक्षणत्वायोगात्कथं तदनुपपत्त्या तत्सिद्धिरित्याशङ्क्यावान्तरतात्पर्यभेदेन यत इत्यादिवाक्यं जगत्प्रकृतावेकत्वं प्रसाध्य तदनुवादेन तद्ब्रह्मेति वाक्येनैकत्वं गच्छद्ब्रह्मस्वरूपपरमिति नोक्तदोष इत्याशयेनाह । एका या प्रकृतिरिति । जिज्ञास्यतामिति विजिज्ञासस्वेति पदार्थो दर्शितः विचार्यतामित्यर्थः । विचार-

विधेरपि ब्रह्मण्येव महातात्पर्यमिति वस्तुनिष्ठवचन इत्युक्तं तयोर्वचनविभक्त्यर्थयोः संगतिर्यथा विधिना ज्ञायते तथा तं विनाप्यानर्थक्यभीत्या प्रयोजनाभावप्रसङ्गभीत्या विज्ञातुं शक्यैवेति संबन्धः । ननु न प्रमाणं प्रयोजनानुसारेण स्वार्थं साधयति येन तदभावप्रसङ्गभयेनालौकिकोऽर्थस्तस्य कल्प्येतेत्याशङ्क्याह । न हि स्वाध्यायेति । न हि यतो वा इत्यादिवचनमर्थं विना स्वस्य श्रोतृसमीहितार्थपर्य्यवसानं विना स्वाध्यायाध्ययनविधेः प्रापकादायातं प्राप्तं स्यादध्ययनविधिर्ह्यध्येतुः फलवदर्थप्रतीतिप्रयोजनमेव वाक्यमध्यापयतीति तद्रहितं वाक्यं नाध्ययनविधिना प्राप्येत । यतो वा इत्यादिवाक्यं चाद्वैतब्रह्मलक्षणज्ञानायैवाध्ययनविधिनाधीतमिति तदभावे तदध्ययनं न फलवद्भवेदतस्तत्परिहाराय तस्य विवक्षितलक्षणतात्पर्य्यसिद्ध्यर्थं तदुभयसंगतिर्द्रष्टव्येति भावः । अथ वा स्वाध्यायाध्ययनविधेरायातो योऽर्थस्तं विना तदभावे आनर्थक्यभीत्या तत्संगतिर्विज्ञातुं न हि शक्या शक्यैवेति काक्वा दर्शयतीति योजनीयम् ॥ ५१० ॥

मू० ॥ वचनार्थविभक्तिवाच्ययो-
रुपपन्नान्वयबुद्धिरर्थतः ॥
पशुनेति पदे यथा तथा
यत इत्यादिपदेऽपि लक्षणे ॥ ५११ ॥

टी० ॥ तथेति सूचितं दृष्टान्तं दार्ष्टान्तिकं च विशदयन्नुक्तमार्गेण तदुभयसंबन्धसिद्धिमाह । वचनार्थेति । वचनार्थश्च विभक्तिवाच्यं च तयोरित्यर्थः । अर्थतः अनुपपत्तितः । पशुनेतिपदे यथा वचनार्थेत्यादिसंबन्धः । लक्षणे अद्वैतब्रह्मलक्षणवाक्ये ॥ ५११ ॥

मू० ॥ विधिनिष्ठवाक्यमपि बोधयति
स्वमपेक्षितं विषयमर्थवशात् ॥
परमात्मनिष्ठमपि तुल्यमिदं
वचयोर्द्वयोरपि तु रूपमतः ॥ ५१२ ॥

टी० ॥ ननु सिद्धार्थवाक्यस्य कथं विधिवाक्येन तुल्यता विधिर्हि स्वसामर्थ्यादलौकिकमर्थराशिं प्रतिपादयेत्, तदुक्तं शबरस्वामिभिः "चोदना हि भूतं भवन्तं भविष्यन्त"मित्यादीत्याशङ्क्य सिद्धवाक्यमपि तात्पर्य्येण यमर्थं प्रतिपादयेत्तदपेक्षितमर्थान्तरमपि कथं न प्रतिपादयेदन्यथा तत्तात्पर्य्यानिर्वाहात् । विधिवाक्यस्यापि तद्बलादेव तथा सामर्थ्यमन्यथा वसन्ते ज्योतिषा यजेतेत्यत्रापि कर्मान्तरं ग्रहं संमार्ष्टीत्यत्राप्येकत्वं विशेषणं किमिति न कल्प्येतेत्याशयेनाह । विधिनिष्ठवाक्यमिति । स्वं स्वीयं परमात्मनिष्ठमपि स्वमपेक्षितं विषयमर्थवशाद्बोधयतीत्यनुषङ्गः । फलितमाह । तुल्यमिति । यत एवमतः सिद्धार्थविधिनिष्ठवचसोर्द्वयोरपीदमर्थान्तरप्रतिपादकत्वं रूपं तुल्यमेवेत्यर्थः ॥ ५१२ ॥

मू० ॥ एकं चेतनमस्य यत्प्रकृतितामापन्नमुत्प्रेक्षते
तद्ब्रह्मेति निशामयेति निपुणं ब्रूते परब्रह्मणः ॥
सिद्धं लक्षणमादरेण महता व्यावर्त्तयद्ब्रह्मण-
स्तत्त्वं तत्त्वमसीति वाक्यनिलयं तच्छब्दलक्ष्यं वचः॥५१३॥

टी० ॥ वस्तुतस्तु जगत्कारणे प्रकृतित्वं विभक्तिर्न प्रतिपादयति तस्यानुमानादेव सिद्धत्वात्प्राप्तानुवादेनानेकार्थविधानासंभवाच्च किं तु वचनार्थमेकत्वमेव तद्वाक्यं प्रतिपादयति । तत्र चेतनमात्रोद्देशेनैकत्वविधानासंभवाज्जगत्कारणत्वेन तदधिष्ठानमेवोद्दिश्य वचनार्थः प्रतिपाद्यत इति नात्र कश्चिद्दोषलेशोपीत्याशयेनाह । एकं चेतनमिति । अस्य वियदादिप्रपञ्चस्य यच्चेतनं प्रकृतितामापन्नमुत्प्रेक्षतेऽनुमिनोति तदेकमिति प्रथममन्वयः । पश्चात्तदप्यनुवाद्यकोटौ निक्षिप्याह । तद्ब्रह्मेति । निशामय शृणु विचारयेत्यर्थस्तद्विजिज्ञासस्वेत्यस्य ग्रहणम् । एवमादिवचोऽत्र प्रागुक्तशङ्काभावान्निपुणं यथा स्यात्तथा परब्रह्मणोऽनुमानसिद्धं जगत्कारणत्वरूपं लक्षणं महतादरेण ब्रूत इति संबन्धः । लक्षणमिति तद्ब्रह्मेत्यादेरुपलक्षणम् । अत एव महतादरेणेत्युक्तम् । ननु यद्येकं जगत्कारणं तद्ब्रह्मेति तद्विजिज्ञासस्वेति हित्यमेनं विजानीहीतिवत् तस्य ब्रह्मसंज्ञा-

परमिदं न लक्षणपरमित्याशङ्क्य तस्योपरिष्टान्निरसिष्यमाणत्वाञ्जगत्कार-णतया सांख्यादिकल्पितप्रधानादिव्यावृत्तये ब्रह्मलक्षणमेवेह सूत्र्यभिप्रेत-मित्याशयेनाह । व्यावर्त्तयदिति । तच्छब्दलक्ष्यं ब्रह्मणस्तत्त्वमद्वयानन्दं प्रधानादिभ्यो व्यावर्त्तयदिति संबन्धः । तटस्थेश्वरस्यैवेदं लक्षणमिति भ्रमा-पनोदनाय तत्त्वमसीति वाक्यनिलयं तदेकवाक्यमिति वचसा विशेषण-मुक्तम् ॥ ५१३ ॥

मू० ॥ लक्ष्यस्य लक्षणमिह त्रिविधं प्रसिद्धम्
लोके स्वलक्षणममुष्य विशेषणं वा ॥
यद्वोपलक्षणमिमानि च लक्षणेन
व्याचक्षयामि पृथगेव तु तत्प्रतीहि ॥ ५१४ ॥

टी० ॥ नन्वेकस्य वस्तुन एकेनैव लक्षणेनेदं प्रयोजनं सिद्ध्यत्यस्ति चात्र श्रुतिप्रसिद्धं सत्सत्यज्ञानादीति किमनेनापि लक्षणेनेत्याशङ्क्यैकस्यैव लोके लक्षणत्रैविध्यप्रसिद्धेरिहाप्यनेकलक्षणं न दोषाय प्रत्युतानेन विना सत्यादिलक्षणमेव दुर्ज्ञानमित्याशयेनाह । लक्ष्यस्येति । त्रैविध्यमेवाह । स्वलक्षणमिति । स्वरूपभूतं लक्षणमित्यर्थः । अमुष्य लक्षणस्य । वेति चार्थे । यद्वेति यच्चेत्यर्थः । लक्ष्यस्य किंचित्स्वरूपभूतं लक्षणं किंचिच्च तस्य विशेषणमन्यच्चोपलक्षणमितीह लोके लक्ष्यस्य त्रिविधं लक्षणं प्रसि-द्धमिति संबन्धः । नन्वेषां किमन्योऽन्यं भेदकमित्याकाङ्क्षायामाह । इमा-नीति । स्वरूपलक्षणादीनीत्यर्थः । व्याचक्षयामि तत्त्वं प्रतीहि जानीही-त्यर्थः ॥ ५१४ ॥

मू० ॥ लक्ष्यार्थनिष्ठमुपलब्धमतोऽन्यतोऽर्था-
न्निःशेषतो यदतिरिच्य तदर्थवस्तु ॥
लक्ष्यं निवेदयति लक्षणमेतदाहुः
सामान्यलक्षणमिदं त्रिषु लक्षणेषु ॥ ५१५ ॥

टी० ॥ प्रथममेतेषां साधारणं लक्षणमाह । लक्ष्यार्थनिष्ठमिति ।

Digitized by Google

लक्ष्यार्थनिष्ठमुपलक्ष्यं सदन्यतः सजातीयादेर्निःशेषार्थादतिरिच्य व्यावर्त्त्य तत्त्वं स्वाश्रयमर्थवस्तुनि वेदयति । तदेतल्लक्षणमित्याहुः । एवं च त्रिष्वपि लक्षणेषु लक्षणत्वसामान्यलक्षणमिति संबन्धः । असंभवाव्याप्ति-दोषदुष्टेऽतिव्याप्तिपरिहाराय लक्ष्यार्थनिष्ठमुपलक्ष्यमिति । यावल्लक्ष्ये प्रती-तमित्यर्थः । निःशेषतो व्यतिरिच्येति विशेषणाच्चातिव्याप्तिदुष्टेऽप्यतिप्र-सङ्गः । नन्विदं स्वरूपलक्षणे नास्ति तस्य स्ववृत्तित्वासंभवादिति चेत्सत्यम् । यत्समितं सह यस्य तत्सजातीयादिभ्यः सर्वेभ्यो व्यावर्त्तकं तत्तल्लक्षणमिति विवक्षितत्वाच्च कोऽपि दोष इत्याशयः ॥ ५१५ ॥

मू० ॥ लक्ष्यस्वरूपमपि सद्यदमुष्य साक्षा-
दर्थान्तराद्भवति भेदकमेतदाहुः ॥
अस्य स्वलक्षणतयेव तु लक्षणं खं
छिद्रं द्रवं जलमितीदृशमत्र लोके ॥ ५१६ ॥

टी० ॥ इदानीं स्वरूपलक्षणस्य स्वरूपमाह । लक्ष्यस्वरूपमिति । साक्षात्स्वभावतो लक्ष्यस्वरूपमपि सद्यदमुष्य लक्ष्यस्यार्थान्तराद्भवति भेद-कमेतत्तु लक्षणमस्य लक्ष्यस्य स्वलक्षणतयेवाहुस्तत्रोदाहरणमाह । खं छिद्र-मिति । लोकप्रतीतिमनुसृत्येदमुदाहृतमिति द्रष्टव्यम् ॥ ५१६ ॥

मू० ॥ स्वानुरक्तमतिजन्मकारणं
यत्पुनर्भवति लक्ष्यवस्तुनि ॥
तद्विशेषणतयाऽस्य लक्षणं
केसरादिकमिवाश्ववस्तुनः ॥ ५१७ ॥

टी० ॥ इदानीं विशेषलक्षणस्य स्वरूपं कीर्त्तयति । स्वानुरक्तेति । यत्पुनर्लक्षणं सल्लक्ष्यवस्तुनि स्वविशिष्टबुद्धिजन्मकारणं भवति तदस्य विशेषणतया लक्षणमाहुरित्यनुषङ्गः । स्वरूपं तटस्थं च लक्षणं व्यावर्त्तयितुं स्वानुरक्तेति लक्ष्यविशेषणतया प्रतीयमानमित्यर्थः । अलक्षणं दण्डादि व्यावर्त्तयितुं लक्षणमिति । उदाहरति । केसरादीति ॥ ५१७ ॥

मू० ॥ स्वानुरक्तमनिजन्महेतुतां
लक्ष्यवस्तुनि निरस्य लक्षणम् ॥
अस्वरूपमपि तस्य यद्भवे-
त्काकवत्तदुपलक्षणं विदुः ॥ ५१८ ॥

टी० ॥ तटस्थलक्षणस्वरूपमाह । स्वानुरक्तेति । विशेषणलक्षणेऽतिव्याप्तिवारणाय निरस्येत्यन्तम् । स्वरूपेऽतिव्याप्तिपरिहाराय अस्वरूपमिति । लक्ष्याविशेषणं सदस्वरूपं लक्षणं तदुपलक्षणं विदुः । तद्गृहीयतत्कालीनगृहवृत्तिकाकसंबन्धस्यानतिप्रसक्तस्य लक्षणतया काकवदित्युदाहरणम् ॥ ५१८ ॥

मू० ॥ विश्वोद्भवस्थितिलयप्रकृतित्वमस्य
चिद्वस्तुनो यदसहायपरिग्रहस्य ॥
तद्वर्णनीयमुपलक्षणमेव कस्मा-
द्ब्रह्मेति लक्ष्यपदशक्त्यविरोधहेतोः ॥ ५१९ ॥

टी० ॥ एवं त्रिविधं लक्षणमुक्त्वा तर्हि जन्मादिकारणत्वं ब्रह्मणः किं लक्षणमित्याकाङ्क्षायामाह । विश्वोद्भवेति । प्रकृतित्वमिति कर्तृत्वस्याप्युपलक्षणम् । अत एवासहायपरिग्रहस्यातिरिक्तसहायापेक्षाशून्यस्यैकस्येति यावत् । अस्य चिद्वस्तुनो विश्वोद्भवादिप्रकृतित्वं यत्तदुपलक्षणमेव वर्णनीयम् । नन्वस्वरूपस्य तस्य विशेषणत्वसंभवात्कस्मादुपलक्षणत्वमुच्यत इत्याशङ्कते । कस्मादिति । यावल्लक्ष्यस्वरूपं तद्धर्मो भूत्वा यल्लक्षयति तदेव विशेषणलक्षणम् । जगत्कारणत्वमपि यावल्लक्ष्यभावि चेद्ब्रह्म परिच्छिन्नं स्यादिति तत्पदशक्तिर्वक्ष्यमाणा बाध्येत तत्परिहारायोपलक्षणत्वमेवास्य युक्तम् । एवं च तल्लक्ष्यमखण्डं सिद्ध्यतीत्याशयेनाह । ब्रह्मेति ॥ ५१९ ॥

मू० ॥ विश्वोद्भवस्थितिलयप्रकृतित्वरूप-
मेकाकिनो यदिह लक्षणमुच्यमानम् ॥

तद् ब्रह्मणो यदि विशेषणरूपमिष्टं
ब्रह्मेति लक्ष्यविषयस्य पदस्य भङ्गः ॥ ५२० ॥

टी० ॥ ननु यत इत्याद्यनेकपदमुख्यार्थानुरोधेन ब्रह्मपदमात्रश- क्तिविरोधोऽपि न दोषः स्यादिति तद्विशेषणत्वमेव न्याय्यम् । अन्यथा काकतत्पदयोरिव बहुषु पदेषु लक्षणैव स्यादित्याशङ्क्य लक्ष्यपदानुरोधेनोप- लक्षणत्वमेव न्याय्यमित्याह । विश्वोद्भवस्थितिलयप्रकृतिस्वरूपमिति । स्पष्टम् ॥ ५२० ॥

मू० ॥ लक्ष्यार्थवाचि पदमत्र हि लक्षणाऽर्थे
वाक्ये प्रधानमितरद्गुणभूतमाहुः ॥
ब्रह्मेति लक्ष्यविषयं च पदं समर्थं
भूमानमेव वदितुं न तु मर्त्यमल्पम् ॥ ५२१ ॥

टी० ॥ यदर्थप्रमित्यर्थं लक्षणं मृग्यते तद्धि प्रधानम् । प्रधाना- नुरोधेन चाप्रधानेषु लक्षणा न्याय्या गुणे त्वन्याय्यकल्पनेति न्यायात् । न त्वप्रधानानेकानुरोधेनापि प्रधानभङ्ग इत्याशयेन सामान्यन्यायपूर्वकमु- क्तमेवोपपादयति । लक्ष्यार्थेति । लक्षणमर्थोऽभिधेयं यस्य तस्मिन् । इतरल्ल- क्षणपदम् । सामान्यन्यायं प्रस्तुते योजयति । ब्रह्मेति । ततः किमित्याशङ्क्य ब्रह्मपदमुख्यार्थमाहेत्याह । भूमानमिति । त्रिविधपरिच्छेदशून्यं तद्धात्व- र्थस्य बृहत्त्वस्य तत्रैव पर्य्यवसानात् । मर्त्यं कालतः परिच्छिन्नम् मर्त्यं वदितुं न समर्थमित्यत्र हेतुतया मर्त्यस्वरूपमाह । अल्पमिति । श्रुतिर्हि यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेति भूमानं निरूप्य तद्ब्राह्मीय तदन्यदल्पमनित्यं चेति निन्दति । अथ यत्रान्यत्पश्यत्यन्यच्छृणो- त्यन्यद्विजानाति तदल्पम् । अथ यदल्पं तन्मर्त्यमिति । एवं च ब्रह्मणि तदतिरिक्तसंसर्गाभ्युपगमे भूमवाचिब्रह्मपदशक्तिर्बाध्येत कथं वा ब्रह्मपद- मल्पं वदितुं समर्थं स्यादत इदं विशेषणलक्षणं न भवतीत्युपलक्षणमे- वेत्यर्थः ॥ ५२१ ॥

मू० ॥ तस्मात्प्रधानपदभङ्गभयाद्गुणानां
युक्तं ग्रहीतुमुपलक्षणगोचरत्वम् ॥
ब्रह्मेति चेत्तदुपलक्ष्यसमर्पणार्थ-
मेवं समञ्जसमिदं पदजातमस्मिन् ॥ ५२२ ॥

टी० ॥ उक्तमर्थं न्यायपूर्वकमुपसंहरति । तस्मादिति । उक्तन्यायात्प्रधानपदं ब्रह्मपदं तस्य भङ्गभयात्तद्वर्तिभङ्गप्रसङ्गेन गुणभूतानां लक्षणपदानामुपलक्षणगोचरत्वमेव ग्रहीतुं युक्तमेवं ब्रह्मेत्येतत्पदं चोपलक्ष्यसमर्पणप्रयोजनकं ग्रहीतुं युक्तमिति संबन्धः । एवं च सति न शेषिपदभङ्गप्रसङ्ग इत्याह । एवं समञ्जसमिति । अस्मिन् यत इत्यादिलक्षणवाक्ये ॥ ५२२ ॥

मू० ॥ लक्ष्यस्वरूपकथनाय न लक्षणानि
भाष्यस्य वाचकमिदं पदमित्यमुष्मै ॥
व्यावृत्तमेतदखिलादितरार्थजाता-
दित्येतदेव वदितुं ननु लक्षणानि ॥ ५२३ ॥

टी० ॥ एवं जन्मादिकारणत्वस्य तटस्थलक्षणत्वमुपपाद्य तस्य व्यावृत्तिप्रयोजनकत्वं पराभिमतं व्यावर्तयत् ब्रह्मलक्षणत्वमित्यत्राभ्युपेतमुपपादयितुमुपक्रमते । ननु व्यावर्तयद्ब्रह्मलक्षणत्वमित्युक्तमयुक्तं लोके लक्षणवाक्यानां लक्ष्यस्वरूपज्ञानाय गवादिपदेन व्यवहारसिद्धये वा प्रयोगदर्शनादित्याशङ्क्यासिद्धो हेतुरित्याह । लक्ष्यस्वरूपेति । लक्षणानि तद्वाक्यानि यस्य लक्ष्यस्येदं गवादिपदं वाचकपदमित्यमुष्मै ज्ञापनायेत्यर्थः । सास्नादिमती गौर्गन्धवती पृथ्वीत्यादिलक्षणेन न गवादिस्वरूपं प्रतिपाद्यते । गवादेः प्रत्यक्षसिद्धत्वेन तद्बोधस्य वैयर्थ्यात् । नापि सास्नादिमती व्यक्तिर्गवादिशब्दवाच्येत्यपि प्रतिपाद्यम् । सास्नादेस्तदर्थत्वाभावात् । न वा तदा सास्नादिमती गौरिति प्रतीतिः स्यादतो नेदमुभयं लक्षणवाक्यप्रयोजनमिति व्यावृत्तिबोध एव तत्प्रयोजनं वक्तव्यमित्याशयेनाह । व्यावृत्तमिति । नन्विति निश्चये ॥ ५२३ ॥ (शेषमग्रे)

॥ श्रीः ॥

॥ श्रीगणेशादिभ्यो नमः ॥

॥ नमस्कुर्वे नृसिंहाय ॥

नमः परमहंसपरिव्राजकाचार्यश्री६विशुद्धानन्दसरस्वतीपूज्यपादेभ्यः सुधीवरेभ्यः श्री६बालशास्त्रिश्री६कैलासचन्द्रशर्म्मशिरोमणिद्विवेदश्री६देवदत्तशर्म्मचरणेभ्यश्चाज्ञानध्वान्तप्रचण्डमार्त्तण्डेभ्यो गुरुवरेभ्यः ॥

॥ श्रीमद्भागवतस्य प्रस्तावना ॥

यस्मै सर्वमभीष्टं स्याद् यः स्वरूपेण भासते ।
अभावाप्रतियोगीशो भासतां सर्वहृन्मयम् ॥ १ ॥
सुतादिवाञ्छोर्म्मिभिदोलितां मे मनोजबाणाहितरन्ध्रपूर्णाम् ।
अनेकजन्मार्ज्जितपुण्यपापभाराभारैः सुविदीर्य्यमाणाम् ॥ २ ॥
तारुण्यनक्रावधनादिलाभस्वातन्त्र्यदंष्ट्रावलिगर्भमाप्ताम् ।
स्वाम्याबलापाङ्गतिमिङ्गिलौघपुच्छावलीजर्ज्जरितार्द्धभागम् ॥ ३ ॥
कुलक्रतुप्रकटसंगृहीतशास्त्रावलीवेपथुकम्प्यमानाम् ।
संसारवात्सल्यमहाहिगीर्णांसद्गुर्वैरिवार्त्तुं विशालदेहाम् ॥ ४ ॥
स्वमान्तवात्सल्यकृपाणभिन्नवैराग्यसत्कूपकमाकमूलाम् ।
पापात्तरम्याखिलकर्म्ममाध्वीपानप्रमत्तानयितवाहाम् ॥ ५ ॥
संसाररत्नाकरदुर्न्निवारनारीजनावर्त्तविघूर्णमानाम् ।
क्रोधादियादोगणवज्रदंष्ट्रागृहीततत्त्वविजयोऽग्रभागाम् ॥ ६ ॥
पापादिकर्म्मार्ज्जितभद्रदुःखसमूहभारोद्वहनेन जीर्णाम् ।
लोकैषणाहस्तभतीक्ष्णझञ्झावाताचिताऽस्वस्थतिकां मनीषाम् ॥ ७ ॥
निमज्जतीं सुद्रुतारं भवाब्धौ हाहाऽशरण्यां मलिनाङ्ककीर्णः ।
लोकोत्तराचारतपःप्रभावाद्विचित्रविद्याधरकर्णधारात् ॥ ८ ॥

अनाथदेहोद्धरणैकहेतुगृहीतकाशीस्थसुपूज्यमूर्त्तेः ।
श्रीदविश्वनाथाद्गुरुपूज्यतातात् कोऽन्यो भवेत् पारयितुं समर्थः ॥ ९ ॥

॥ पद्याष्टकमेकक्रियान्वयि ॥

घटादिकं स्वावयवप्रतिष्ठाभावस्य सिद्धं प्रतियोग्यपीत्थम् ।
स्ववृत्तिधर्म्मात् सदिवावभाति यत्सत्तया तत्परमं महोऽहम् ॥ १० ॥

स खलु भगवान् सर्वान्तर्यामी जगत्साक्षी सच्चिदानन्दमूर्त्तिः स्वीयाऽनाद्यविद्याविस्फूर्जितं समस्तं स्थावरजङ्गमात्मकं परमार्थतो बाधितमप्यधिष्ठानभावेन स्वेच्छयैव परिकल्पयन्ननुभवन्निव कल्पितेनैव त्रितययासम्बन्धेनान्तःकरणवृत्तिसुखदुःखादीन्, परिच्छेदमल्पज्ञतादिकं चाप्त इवेति सर्वजनीनः सहजः प्रसिद्धोऽनुभवः ।

एवं दीनभावमाप्तस्येव जगत्प्रभोर्विस्मृतस्वकण्ठगतहारप्राप्तिरूपपुरुषार्थं प्राप्तपरपुरुषवाक्यानीव स्वस्वरूपप्रकाशलक्षणपरमपुरुषार्थं परमार्थतः सद्रूपेऽप्यसन्त्यपि गुरुवेदान्तवाक्यादीनि मार्त्तण्डमण्डलगतरन्ध्रवत्स्वाप्नशुभाशुभसूचकनानाविधपदार्थवच्च पराभिमतसद्रूपतत्तच्छुभाशुभेष्विवोपयुज्यन्त इत्यपि बहुषु वेदान्तमहामान्यनिबन्धेषु विस्तरेणाऽभ्यधायि ।

एवं ते वेदान्तमहामान्यनिबन्धाः प्राचीनतरसंस्कृतभाषायामेवोपनिबद्धा इत्यपि सुप्रसिद्धमेव ।

एवं च तद्भाषाज्ञानप्रधानोपायभूतव्याकरणस्य वेदाङ्गमुख्यत्वं महाभाष्यकाराद्यभिहितं युक्ततममेव ॥

अथ सर्वजनकमनीयस्वस्वरूपप्रकाशमारुरुक्षूणां प्रथमकक्षाभूतं व्याकरणमर्थाधिजिगमिषूणां यथा परिभाषेन्दुशेखराभिधानो ग्रन्थ उपकरोति यावत्यश्चास्य टीका या च तत्संपादनानुसंधानादेर्मूलग्रन्थविषयपरिशोधनोपयोगिता यावांश्च तत्संपादने परिश्रमो या च तासां टीकानां सत्त्वेऽप्यभिनवटिप्पण्या आवश्यकता यश्चानया ज्ञानवृद्ध्यादिस्तत्सर्वं सारासारविवेकाख्यां सपरिकरपरिभाषेन्दुशेखरव्याख्यां निर्मातुं मुद्र-

यितुं च प्रारिप्सवो महतीं भूमिकामास्थापयन्तो गुरुवरबालशास्त्रिण एव षट्पञ्चाशदुत्तराष्टादशशततमख्रीष्टशकदशममासप्रकाशिते पण्डितपत्रे मुद्रयित्वा प्राकाशयन्, निरमिन्वन्नमुद्रयंश्च यथावकाशं तृतीयपरिभाषापर्यन्तामुक्तव्याख्याम् ॥

अधुना मद्गुरुवराणां प्रागुक्ताऽयोगापूर्तिलक्षणं बहुजनमनःशल्यं तत्सौहार्दपारवश्येनोद्धारयितुं बद्धपरिकराणां माननीयप्रधानानां श्रीयुतपण्डितवरवेचनरामशर्म्मत्रिपाठिनां प्रोत्साहनमेवैकमवलम्ब्य सारासारविवेकप्रौढधिषणाशततमांशमनीषाविकलोऽलभमानश्च तावतीष्टीका मुद्रिता अपि भैरवीशाङ्करीत्रिपथगामान्युद्देवीरुद्रपूर्त्त्यादिव्यापारव्यग्रचित्ततया सर्वत्रानवलोकमानोऽवलोकमानश्च स्थलेस्थलेऽत्यल्पमनीषतया याथार्थ्येन तत्तात्पर्य्यमनधिगच्छन्नप्यहमन्वर्थनामकप्रकाण्डताण्डवाभिधानं मूलग्रन्थस्वरूपविवरणं चतुर्थीं परिभाषामारभ्य यथावकाशं सङ्कलयितुं समीहे ॥

संयाचे च मान्यविद्वज्जनान्, मदीयं साहसमनाकलयन्त एतदक्षरशोऽवलोकयन्तोऽस्य सारासारौ विवेचयन्त आविष्कुर्वन्तश्च मयि पूर्णदयां परिशोधयन्तश्चास्य रभसादिलिखितस्थलान्येतदध्याप्ययन्यगणनानर्हमप्यध्याप्यवर्गं स्वकीयाशीराशिभिर्निवेशयन्त्विति ॥

यतो भवेच्चेदेतेनापि कस्य विज्ञानवृद्धिस्तर्हि सर्वस्याप्युद्योगस्य मदीयस्य संभाव्यते साफल्यम् ॥

आशासे चैतस्य निर्विघ्नपरिसमाप्त्या, संस्कृतविद्यावर्द्धनासाधारणरसिककाशीस्थराजकीयप्रधानपाठालयाध्यक्षप्रधानप्रभुवरङ्काक्टरथीबोसाहेबमहाशयस्यैतदसाधारणकारणरूपया परमयोक्त्या च बोधस्वरूपः सर्वान्तर्यामी परमात्मा प्रसीदत्वितीति ॥

॥ संप्रार्थ्यते ॥

काशीस्थराजकीयप्रधानपाठालयाध्यापकः श्रीद्विवेदहरिनाथमनीषी॥

॥ श्रीः ॥

॥ श्रीग्रन्थकारेभ्यो गुरुभ्यो नमः ॥

शिवदेव्यास्तपोमूर्त्तेर्मातुः पादाब्जजन्मनः ।
पितुः श्रीहरिविश्वनाथस्य कृपाल्लेश्याद्वरान्मुहुः ॥ १ ॥
भक्त्या ध्यानेन वर्द्धिष्णु गुरुदर्शितसत्पथम् ।
भूयाद्वृत्तस्य भव्याय भवस्याकाण्डताण्डवम् ॥ २ ॥

इदानीं संज्ञाविशेषविषयिकासु परिभाषासु निरूपणीयास्वित्सं- ज्ञायाः कौमुद्यां प्रथममभिधानात्तन्मूलकत्वाच्च प्रत्याहारज्ञानप्रयो- ज्यशास्त्रवाक्यार्थज्ञानस्य, तत्संबद्धपरिभाषां प्रथममवतारयति । इत्संज्ञका इति (१) ।

एतच्चानुबन्धपदार्थस्वरूपप्रदर्शनायोक्तम् । तेन पौनरुक्त्यं नोद्भाव- नीयम् । उच्चारणार्थेष्वनुबन्धत्वस्य नव्यनयेऽप्यनिष्टत्वे त्वित्संज्ञाप्रयुक्तलो- पान्यकार्यप्रयोजकत्वमनुबन्धत्वं वक्तव्यमिति केचित् ।

अवयवेति (२) । अनेकान्तत्वे साध्ये एकान्ता न वेति संशयस्य कस्य चिन्मते पक्षतात्वं नास्तीत्यतः साध्यद्वयेऽप्यनुबन्धानां पक्षतासंपत्तये संश- यस्य कोटिद्वयं तत्तद्रूपेण प्रदर्शितम् । सानुबन्धाद्विभक्त्युत्पत्तेः प्रदेशेषु दृष्टत्वेन लक्ष्ये चानुबन्धानां क्व चिदप्यदर्शनेन च सानुबन्धे बोधकत्वमाहो- स्वित् तद्विनिर्मुक्त इति बोधकत्वसंशयप्रयोज्यो भवत्यनुबन्धेषु बोधकावय- वत्वामवयवत्वसंदेह इति भावः ।

विधेये कदेति (३) । अनुबन्धपदके बोधकनिरूपितावयवत्वाभावे साध्ये बोध्ये कदाप्यनुपलभ्यमानत्वं हेतुरिति भावः । मानुषशरीरावयवा- नुपलभ्यमानत्वस्य वृक्षादिनिरूपितावयवत्वाभावसिद्धावप्रयोजकत्वमिव

(१) इत्संज्ञका अनुबन्धाः । मू० ॥

(२) तेष्ववयवानवयवत्वसन्देह आह । (अनेकान्ता अनुबन्धाः) । अनेकान्ता अनवयवा इत्यर्थः । यो ह्यवयवः स कदा चित्तत्रोपलभ्यत एव । अयन्तु न तथा । मू० ॥

(३) तदर्थभूते विधेये कदाप्यदर्शनात् । मू० ॥

बोधकानवयवत्वसिद्धौ बोध्येऽनुपलभ्यमानत्वस्याप्रयोजकत्वं तु न शङ्कनीयम् । स्वं रूपमित्येतच्छास्त्रजन्मनो बोध्यबोधकयोः समानानुपूर्वीकत्वनिश्चयात्मकस्यानुकूलतर्कस्य प्रकृते जागरूकत्वात् । लोकेऽपि समानरूपत्वप्रकारकनिश्चयविशेष्ययोर्यज्ञदत्तविष्णुमित्रयोरन्यतरस्मिन्नेतराहित्यनिर्णयस्योभयत्र नेतराहित्यनिर्णयप्रयोजकत्वप्रसिद्धेः । विधेय इति सप्तम्याः कारकविभक्तितया तदर्थघटकत्वस्यादर्शनपदार्थैकदेशे दर्शन एवान्वयः । एवञ्च विधेयघटकत्वप्रकारकोपलब्धिविषयत्वाभावात्मको हेतुः पक्षेऽव्याहत एव । एतेन विधेयवृत्तित्वविशिष्टोपलब्धिविषयत्वाभावत्वस्यानुबन्धनिरूपितवृत्तितानवच्छेदकतया हेतोः पक्षावृत्तित्वेन स्वरूपासिद्धिरित्यपास्तम् ।

स्यादेतत् । हेतुदले प्रतियोगिविधया प्रविष्टं विधेय उपलभ्यमानत्वं यत्किञ्चिद्विधेय उपलभ्यमानत्वं विधेयसामान्य उपलभ्यमानत्वं वा विवक्षितम् । आद्ये सनवयवसकारेऽपि यङादिविधेयेऽनुपलभ्यमानत्वसत्त्वाद्व्यभिचारः । यदि साध्यदलेऽपि प्रतियोगिविधया प्रविष्टं बोधकावयवत्वं यत्किञ्चिद्बोधकावयवत्वमेव विवक्षितमित्युच्यते । तर्ह्येतादृशसाध्यस्य प्रमेयत्वसमनियततया तत्साधनं सिद्धसाधनमेव । द्वितीये तु यदि प्रत्युच्चारणं शब्दो न भिद्यते तर्हि सनवयवनकारादौ सर्वत्रैवानुबन्धे वनु याचन इत्यादिविधेय उपलभ्यमानत्वस्यैव सत्त्वात्स्वरूपासिद्धिः । प्रत्युच्चारणं शब्दानां भेदेऽङ्गीकृते तु बोधकसन्शब्दावयवसकारादावपि विधेयेऽनुपलभ्यमानत्वसत्त्वाद्व्यभिचारः । विधेयसामान्यघटकत्वेनोपलब्धिविषयतावच्छेदकधर्म्माभावस्य हेतुत्वं विवक्षितं चेदुक्तस्वरूपासिद्धेरपरिहारः । तद्विधेयघटकत्वेनोपलब्धिविषयतावच्छेदकधर्म्माभावस्य तद्बोधकानवयवत्वसिद्धौ हेतुत्वं विवक्षितं चेत्तत्त्वस्याननुगततया व्याप्तिज्ञानासंभवः । मनिनन्त्यनकारस्यापि पक्षकोटिप्रविष्टतया तत्र हेतोरसत्त्वाद्भागासिद्धिश्चेति कथं प्रकृतानुमानं सङ्गच्छतामिति चेत् ।

अत्राहुः । अनुबन्धपक्षकेऽनुमाने स्वघटितघटकप्रयोज्यविषयताप्रयोजकानवयवत्वं साध्यम्, हेतुस्तु स्वघटितघटकप्रयोज्यविधेयताश्रयघट-

कत्वप्रकारकोपलब्धिविषयतावच्छेदकधर्म्माभावः । तस्य लोप इत्यस्य विधेयतावच्छेदकधर्म्मसंकोचकत्वतात्पर्य्यकत्वे सिद्धान्तभूतपक्षे तु स्वघटितघटकप्रयोज्यविधेयतावच्छेदकधर्म्माभाव एव हेतुः । गुणशब्दावयवगकारादौ हेतोः सत्त्वात्साध्यस्य चासत्त्वाद्व्यभिचारवारणाय साध्यदलप्रविष्टविषयतायां स्वघटितघटकवृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्म्मावच्छिन्नत्वं विशेषणं देयम् । तथा चेत्थं प्रयोगः । अनुबन्धाः स्वघटितघटकवृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्म्मावच्छिन्नविषयताप्रयोजकानवयवाः, स्वघटितघटकप्रयोज्यविधेयतावच्छेदकधर्म्माभावादिति । एवं च गुणादिपदानां सङ्केतसंबन्धेन गुणादिपदावच्छिन्नविषयताप्रयोजकत्वेन तादृशविषयताप्रयोजकानवयवत्वरूपसाध्यस्यापि गकारादौ सत्त्वेन न व्यभिचारः । अत्र निरुक्तधर्म्मावच्छिन्नत्वं विषयतायां साक्षादेव विवक्षितम् । अन्यथा गुणपदावच्छिन्नाया अपि विषयतायाः परम्परया गुणपदवृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्म्मावच्छिन्नत्वेन तत्प्रयोजकगुणपदानवयवत्वस्य च गकारेऽसत्त्वेन व्यभिचारो दुर्वार एव । गुणशब्दस्यात्त्वेङ्त्वान्यतररूपेण शक्तिस्वीकारे तु साध्यदलप्रविष्टविषयतावच्छेदकतायां भेदानवच्छिन्नत्वं साध्यघटकविषयतायां भेदघटितधर्म्मानवच्छिन्नत्वं वा निवेशनीयम् । अतएङ्एतदन्यतरत्त्वेन शक्तौ स्वीकृतायामपि न गुणपदप्रयोज्यविषयतायाः साक्षादत्त्वाद्यवच्छिन्नत्वम् परम्परयाऽवच्छिन्नत्वं तु पूर्वमेव निराकृतम् । अदेङ्गुण इत्येतद्घटकगुणशब्दघटकगकारे तु हेतोरसत्त्वान्न व्यभिचारः । तत्र सङ्केतसंबन्धेन गुणपदस्यैव विधेयतया गकारादौ निरुक्तविधेयतावच्छेदकधर्म्मसत्त्वात् । तत्र गुणपदमुद्दिश्यादेङ्बोधकत्वविधानाङ्गीकारेऽपि गुणपदप्रयोज्यविषयतावच्छेदकधर्म्मस्य गकारादौ सत्त्वेन निरुक्तहेतौ च विधेयत्वस्थाने विषयताया एव निवेशेन तादृशहेतोश्च गकारादावसत्त्वेन न व्यभिचारः ।

केचित्तु गुणशब्दावयवगकारादौ व्यभिचारवारणाय स्वरूपबोधकानवयवत्वं साध्यमाहुः ।

तच्चेदं वक्तव्यम् । स्वरूपबोधकानवयवत्वसिद्धावपि अनुबन्धा

अवयवा न वेति संशयस्यानुच्छेदः । तद्धर्म्मावच्छिन्नप्रकारताकनिश्चयस्य तद्धर्म्मावच्छिन्नप्रकारताकसंशयं प्रत्येव प्रतिबन्धकत्वस्य क्लृप्ततया स्वरूपबोधकाघटकत्वप्रकारकनिश्चयस्य बोधकानवयवत्वप्रकारकसंशयाप्रतिबन्धकत्वात् । नाद्यनुबन्धानां स्वरूपबोधकानवयवत्वेऽप्यनुबन्धविनिर्म्मुक्तसादिबोधकानवयवत्वस्य संदिग्धत्वाच्चेति ।

हेतुदले प्रतियोगिविधया प्रविष्टो विधेयतावच्छेदकधर्म्मश्च यावद्विशेष्यविशेषणदलघटितलोपनिबद्ध एव विवक्षितः । एवन्तु मकारोत्तराकारोत्तरनत्वस्य तादृशधर्म्मस्य मनिनन्त्यनकारेऽपि सत्त्वान्न भागासिद्धिः । अन्यथा नत्वात्मकविधेयतावच्छेदकधर्म्मस्य तत्र सत्त्वाद्भागासिद्धिः स्पष्टैव । हलादिपदैश्च हादिपदवत्त्वेनैवोपस्थितिर्हकारादीनामिति तदवयवहकाराकारादौ साध्यस्यापि सत्त्वान्न व्यभिचारः शङ्क्यः । तद्विधेयताया हत्वावच्छिन्नत्वाभावात् । ककारादिपदे च कस्यैव बोधकत्वं कारस्य च द्योतकत्वमिति कारप्रत्ययावयवके साध्यस्यापि सत्त्वान्न व्यभिचारः । साध्यघटकनिरुक्तधर्म्मावच्छिन्नविषयता च शास्त्रीयैव विवक्षिता । तेन तद्बोधकतच्छब्दावयवतकारे न व्यभिचारः । साध्यस्याप्यसत्तेः ।

न चानुबन्धेषु स्वघटितघटकवृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्म्मावच्छिन्नविषयताप्रयोजकानवयवत्वस्य पूर्वोक्तानुमानेन निर्णयेऽपि तस्य निर्णयस्य सामान्यतो बोधकानवयवत्वप्रकारकसंशयाप्रतिबन्धकत्वं पूर्ववत्तदवस्थमिति वाच्यम् ।

उक्तानुमानेन सनन्त्यवनकारादौ निरुक्तानवयवत्वनिर्णये सनाद्यवयवनकारादयो, बोधकानवयवाः, निरुक्तानवयवत्वविशिष्टनकारादिघटितघटकवृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्म्मेतरधर्म्मावच्छिन्नविषयताप्रयोजकपदाघटितपदाघटकत्वादित्यनुमानेन सामान्यतो बोधकानवयवत्वनिर्णयप्रसिद्धोक्तसंशयप्रतिबन्धाव्याघातात् ।

नन्वेवमपि कुङ्मुमन्त्यानुबन्धयोर्हेतोरसत्त्वाद्भागासिद्धिरिति चेन्न । पक्षकोटावनुबन्धे कुगाद्यन्त्यावयवातिरिक्तत्वस्य बोधकसमभिव्याहृतत्वस्य च विशेषणस्य विवक्षितत्वात् । बोधकसमभिव्याहारश्च बोधकनिरूप-

ताव्यवहितपूर्वत्वपरत्वलक्षणः । कुगाद्यवयवककारादौ निरुक्तसाध्यसाधकन्तु बोधकावयवोत्तरत्वविशिष्टबोधकानवयवोत्तरत्वात्मकं हेत्वन्तरमेवोपन्यसनीयम् । तथा चेत्थं प्रयोगः । कुङ्मुमन्त्यानुबन्धो निरुक्तसाध्यवान् बोधकावयवत्वविशिष्टो यो बोधकानवयवस्तदुत्तरत्वादिति । कुगवयवोकारादौ बोधकानवयवत्वनिर्णयस्तु सनादिघटकनादिवदेव । कुदाद्यवयवाविघटकदकारादौ व्यभिचारवारणायाचत्यहेतुदलप्रविष्टो बोधकानवयवो बोधकावयवोत्तरत्वेन विशेषितः । निरुक्तहेतुबोधकावयवोत्तरत्वविशिष्टबोधकानवयवोत्तरत्वैतदन्यतरहेतुकेनैकेनैवानुमानेन सनाद्यवयवनकारे कुगाद्यवयवककारे चानवयवत्वं तु न साधयितुं शक्यम् । अन्यतरत्वस्यातिगुरुत्वात् । अनुमानात्प्राक्कुगवयवोकारादौ बोधकानवयवत्वानिश्चयेन हेतुतावच्छेदकरूपेण हेतोरप्रसिद्धेश्चेति ।

अन्ये त्वनुबन्धत्वावच्छेदेन निरुक्तसाध्यसाधने स्वाभावो हेतुः, अभावप्रतियोगितावच्छेदकः संबन्धस्तु स्वघटितपदाघटितपदघटकत्वयोर्व्यविधेयतावच्छेदकधर्मवत्त्व स्वघटितपदाघटितपदघटकबोधकावयवोत्तरत्वविशिष्टविधेयतावच्छेदकधर्माभाववदनुत्तरत्वैतदुभयात्मकः । एवञ्च प्रथमसम्बन्धेन स्वविशिष्टेऽपि कुगन्त्यककारे, द्वितीयसम्बन्धेन स्वविशिष्टेऽपि सनवयवनकारे उभयसंबन्धेन वैशिष्ट्याभावादुभयसम्बन्धावच्छिन्नप्रतियोगिताकस्वाभावात्मकहेतोः सत्त्वान्न भागासिद्धिः । कुदाद्यवयवदकारादौ तु निरुक्तसम्बन्धद्वयेन स्ववैशिष्ट्यसत्त्वादुक्तहेतोरसत्त्वान्न व्यभिचार इत्याहुः ।

केचित्तु निरुक्तसाध्यकानुमितौ विधेयताश्रयनिरूपितमुख्यावयवत्वाभावो हेतुः, साध्यदलप्रविष्टमनवयवत्वमपि मुख्यावयवत्वाभावरूपमेव । एवञ्च कुगाद्यवयवप्रथमककारादौ साध्यस्यापि सत्त्वान्न व्यभिचार इत्याहुः ।

अपरे तु कुगाद्यवयवोकारादौ पूर्वोक्तानुमानेन बोधकानवयवत्वनिश्चये तत एव परककारादौ बोधकावयवत्वाभावो निर्णीतः । उकारविशिष्टे बोधकत्वाभावनिश्चये व्यवहितवर्णवृत्त्यानुपूर्व्या बोधकतावच्छे-

दकारस्य च विदप्यदृष्टत्वात् । एवञ्च तत्रोत्तरककारादौ संशयाभावादेव नानुमानप्रवृत्तेरुपयोगः । अन्यत्र तु पूर्वोक्तानुमानेनैवोक्तसाध्यसिद्धिः भागासिद्धिस्तु पक्षकोटौ प्रागुक्तदिशा विशेषणनिवेशेनैव परिहरणीयेति वदन्ति ।

कश्चित्तु निरुक्तपदसाध्यकेऽनुमाने स्वघटितघटकप्रयोज्यविषयताश्रयत्वेन परिशेषितत्वप्रकारकशास्त्रप्रयोज्यबुद्धिविषयताशून्यत्वमेव हेतुर्वक्तव्यः । बोध्यबोधकयोर्भेदेऽपि अनुबन्धविनिर्मुक्तांश एव विधेय इति तत्त्वमित्यासत्त्वात्समन्वयः कथञ्चिद्भविष्यतीति वदति ।

सम्प्रदायविदस्तु अनुबन्धेषु स्वविशिष्टपर्य्याप्तश्रावणप्रत्यक्षविषयतावच्छेदकधर्म्मावच्छिन्नविषयताप्रयोजकानवयत्वं साध्यम् । हेतुस्तु स्वविशिष्टविधेयतावच्छेदकधर्म्माभावः । साध्यदले वैशिष्ट्यं स्वेतरत्व स्वघटितपदाघटितपदघटकत्व स्वघटितपदाघटितपदघटकानुबन्धेतरत्वैतत्त्रितयसंबन्धेन । हेतुदले स्वघटितपदाघटितपदघटकप्रयोज्यत्व स्वघटितपदाघटितपदपर्य्याप्तश्रावणप्रत्यक्षविषयतावच्छेदकधर्म्मावच्छिन्नत्वैतदुभयसम्बन्धेन ।

ततश्च स्वशब्देन सन्शब्दावयवनकारे ध्रियमाणे तद्भिन्नत्वं तद्घटितपदाघटितसन्पदघटकत्वं तद्घटितपदाघटितसन्पदघटकनकारात्मकानुबन्धेतरत्वं च सन्शब्दावयवसकारेऽस्तीति निरुक्तसम्बन्धत्रयेण सशब्दस्य नकारविशिष्टतया तत्पर्य्याप्तसकारोत्तराकारत्वात्मकश्रावणप्रत्यक्षविषयतावच्छेदकधर्म्मावच्छिन्नविषयताप्रयोजकानवयवत्वं साध्यते । तत्रान्यविधेयतायाः नघटितसन्पदपर्य्याप्तसकारोत्तराकारोत्तरनत्वात्मकश्रावणप्रत्यक्षविषयतावच्छेदकधर्म्मावच्छिन्नत्वाभावेनोक्तसम्बन्धद्वयेन सुतरां विशिष्टत्वाभावेन तदवच्छेदकधर्मस्य नकारे सुतरामसत्त्वेन हेतोरपि सत्त्वात् ।

नन्वेवमनुबन्धेषु सानुबन्धकपदपर्याप्तश्रावणप्रत्यक्षविषयतावच्छेदकधर्म्मावच्छिन्नत्वघटितवैशिष्ट्यवद्विधेयत्वाप्रसिद्ध्याऽप्रसिद्धप्रतियोगिकाभावाङ्गीकर्तॄणां वैयाकरणानामेव मते निरुक्तहेतोः सङ्गमनीयतया सनवयवसकारादावपि तथाविधहेतोः सत्त्वाद्व्यभिचार इति वाच्यम् ।

साध्यदलीयस्वपदेनानुबन्धेतरस्मिन् ध्रियमाणे तद्विशिष्टपर्य्याप्त-

श्रावणप्रत्यक्षविषयतावच्छेदकधर्म्मावच्छिन्नविषयत्वस्याप्रसिद्ध्या तत्प्रयोजकावयवत्वस्याप्यप्रसिद्ध्या तत्प्रतियोगिकाभावात्मकसाध्यस्यापि सकारादौ सत्त्वात् ।

तादृशानवयवत्वस्य च सकारोत्तराकारत्वावच्छिन्नविषयताप्रयोजकावयवत्वाविरोधित्वेन न क्वापि प्रकृते क्षतिः ।

साध्यदलीयस्वपदेनानुबन्धेतु ध्रियमाणे स्वविशिष्टस्य सशब्दस्य तत्पर्य्याप्तश्रावणप्रत्यक्षविषयतावच्छेदकधर्म्मावच्छिन्नविधेयतायास्तत्प्रयोजकस्य तन्निरूपितानवयवत्वस्य च प्रसिद्ध्या तत्साधनमनुबन्धेषु न सिद्धसाधनम् ।

परन्तु समुदायस्य सन्निरूपत्वाभावादित्याद्युक्तदिशा वैयाकरणैः प्रत्येकभेदस्य समुदायेऽङ्गीकृततया साध्यदलीयस्वपदेन सनवयवाकारे ध्रियमाणे स्वेतरत्त्वादिघटिततद्वैशिष्ट्यस्य सशब्देऽसत्त्या तत्पर्य्याप्तश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविषयताप्रयोजकानवयवत्वस्य साध्यस्यासत्त्वाद्धेतोश्च सत्त्वाद्व्यभिचारवारणाय साध्यदलीयवैशिष्ट्यघटकीभूतं स्वेतरत्त्वं स्वघटितेतरत्त्वं बोध्यम् । इत्थं तु पूर्वोक्तदिशा साध्यस्यापि सशब्दे सत्त्वान्न व्यभिचारः ।

किञ्च साध्यदलीयविषयतायां निरुक्तधर्म्मावच्छिन्नत्वं निरुक्तधर्म्मपर्य्याप्तावच्छेदकताकत्वम् । अन्यथा साध्यदलीयस्वशब्देन सनवयवसकारे ध्रियमाणे तद्वैशिष्ट्यस्य निरुक्तसंबन्धत्रयेण सनवयवाकारेऽपि सत्त्वात्तद्वृत्तिरत्त्वात्मको यः श्रावणप्रत्यक्षविषयतावच्छेदको धर्मस्तद्धर्म्मावच्छिन्नत्वं सकारोत्तराकारत्वावच्छिन्नविषयतायामप्यक्षतमेवेति तत्प्रयोजकानवयवत्वात्मकस्य साध्यस्य सकारेऽसत्त्वेन हेतोश्च सत्त्वेन व्यभिचारो दुर्वार एव । उक्तरीत्या तु पूर्वोक्तदिशा साध्यस्यापि सत्त्वान्न व्यभिचारः ।

साध्यदलीयवैशिष्ट्ये प्रथमः सम्बन्धस्तु साध्यदलीयस्वपदेन कुणवयवप्रथमककारे ध्रियमाणे द्वितीयतृतीयसम्बन्धेन तद्वैशिष्ट्यस्य तत्रैव सत्त्वात्तत्पर्य्याप्तककारत्वात्मकश्रावणप्रत्यक्षविषयतावच्छेदकधर्म्मावच्छिन्नविषयताप्रयोजकानवयवत्वात्मकसाध्यस्य तत्रासत्त्वाद्धेतोश्च सत्त्वाद्व्यभिचारः स्यादिति तद्वारणायोपात्तः ।

तृतीयस्तु संबन्धः साध्यदलीयस्वपदेन कुगवयवप्रथमककारे ध्रियमाणे प्रथमद्वितीयसंबन्धेन तद्वैशिष्ट्यस्य कुगन्त्यककारेऽपि सत्त्वात्तत्पर्य्याप्तप्रावच्छिन्नत्वविषयतावच्छेदको यः कत्वात्मको धर्मस्तदवच्छिन्नविषयताप्रयोजकानवयवत्वात्मकस्य साध्यस्य प्रथमककारेऽसत्त्वेन हेतोश्च सत्त्वेन व्यभिचारः स्यादित्युपादीयते । एवन्तु पूर्वोक्तरीत्या साध्यस्यापि सत्त्वान्न व्यभिचारः ।

द्वितीयः संबन्धस्तु साध्यदलीयस्वपदेन सनवयवनकारे ध्रियमाणे प्रथमतृतीयसम्बन्धेन तद्वैशिष्ट्यस्य यङवयवयशब्दादावपि सत्त्वेन तत्पर्य्याप्तताकृत्स्नधर्म्मावच्छिन्नविषयताप्रयोजकानवयवत्वस्य तत्र सिद्धत्वेन तत्साधनं सिद्धसाधनकल्पम् । तत्साधनेऽपि सत्त्वावच्छिन्नविषयताप्रयोजकावयवत्वादिप्रकारताकसंशयाप्रतिबन्धश्चेत्युपात्तः ।

यदि तु साध्यदलीयं निरुक्तानवयवत्वं तादृशावयवत्वसामान्याभावरूपस्य च नानुमानं विना सिद्धिः, न वा तन्निर्णयस्य तादृशसंशयाप्रतिबन्धकत्वं तादृशसामान्याभावनिर्णये नकारे सत्त्वावच्छिन्नविषयताप्रयोजकानवयवत्वस्य निर्णीतत्वेन सुतरां तादृशसंशयप्रतिबन्धकत्वोपपत्तेरित्युच्यते । तर्हि नोपादीयतां साध्यदले द्वितीयः सम्बन्धः ।

हेतुदले द्वितीयः सम्बन्धस्तु स्वपदेन कुगवयवान्त्यककारे ध्रियमाणे तद्घटितपदप्रयोज्यकत्वावच्छिन्नविधेयतावच्छेदककत्वात्मकधर्म्मस्यैव तत्र सत्त्वात्तदभावात्मकहेतोस्तत्रासत्त्वेन भागासिद्धिः स्यादित्युपादीयते । उक्तसम्बन्धद्वयेन तु तत्रत्यविधेयताया वैशिष्ट्याभावेन प्रागुक्तदिशा हेतोस्सत्त्वान्न सा ।

प्रथमः सम्बन्धस्तु हेतुदलीयस्वपदेन कुगन्त्यककारे ध्रियमाणे तद्वैशिष्ट्यस्य कुक आदान इत्यत्रत्यविधेयतायामपि सत्त्वेन कथं चित्तदवच्छेदकत्ववतः कत्वस्य कुगन्त्यककारेऽपि सत्त्वेन तदभावात्मकहेतोरसत्त्वाद्भागासिद्धिः स्यादित्युपादीयते ।

यदि तु निरुक्तहेतुभूतोऽवच्छेदकधर्म्माभावः पर्य्याप्तिसंबन्धावच्छिन्नप्रतियोगिताकः, एवं हेतुदलीयवैशिष्ट्यघटकीभूतविषयतावच्छेदकत्वं तादृ-

शब्विषयतानिरूपितावच्छेदकतापर्याप्त्यधिकरणत्वम् । एवन्तु कुक् आदान इत्यत्र विधेयतावच्छेदकस्य कुक्त्वस्याभावः कुगन्त्यककारोऽस्ति कत्वे च तादृशविषयतावच्छेदकत्वं नास्तीति न भागासिद्धिप्रसक्तिरित्युच्यते तर्हि नोपादेयोऽयमपि ।

अनुबन्धा बोधकानवयवाः, बोधकानवयवानुबन्धान्यतरत्वादित्यनुमानन्तु, अनुबन्धा बोधकावयवाः बोधकावयवानुबन्धान्यतरत्वादित्यनुमानेन सत्प्रतिपक्षितत्वान्न किं चित्साधयितुं प्रभवति । एतेनैव पूर्वहेतोरपि सत्प्रतिपक्षिततया पूर्वोक्तसाध्यासाधकत्वं तु न वक्तव्यम् । तथा सति सदनुमानमात्रस्यैवोच्छेदापत्त्या पक्षसपक्षान्यतरत्वहेतोस्तादृशहेत्वतिरिक्तहेतुकानुमाननिष्ठसत्प्रतिपक्षितत्वाप्रयोजकत्वनियमाभ्युपगमात् ।

अनुबन्धेषु स्वविशिष्टपर्याप्त्याख्यावच्छिन्नप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविषयताप्रयोजकानवयवत्वनिर्णयस्य सामान्यतो बोधकावयवत्वादिप्रकारकसंशयप्रतिबन्धकत्वं तु प्रागुक्तदिशाऽनुसन्धेयम् ।

हयवरेत्यादावुच्चारणार्थाकारादीनामपीत्संज्ञयैव निवृत्तिरिति कल्पे साध्यदलीयस्वपदेनाकारे ध्रियमाणे निरूपितत्वसंबन्धेन तद्विशिष्टस्य हकारे सत्त्वात्तत्पर्याप्त्याख्यावच्छिन्नप्रत्यक्षविषयतावच्छेदकहत्वावच्छिन्नविषयताप्रयोजकानवयवत्वस्य तत्रापीष्टत्वेन न व्यभिचारः । प्राचीनमते तु हयवरेत्यादिघटकहादिशब्दानां संकेतसम्बन्धेन हकारवदुपस्थापकत्वमङ्गीकृत्य तत्रत्यविषयतायाः साक्षात्कारप्रत्यक्षविषयतावच्छेदकधर्मानवच्छिन्नतया पूर्वोक्तदिशा साध्यस्यापि सत्त्वान्न व्यभिचारः । यद्वा हादिशब्दानां समवायसंबन्धेन हत्वं तादात्म्यसंबन्धेन हं इत्येतदन्यतरावच्छिन्ने शक्तिः । एवन्तु साध्यदलीयविषयतायां भेदघटितधर्मानवच्छिन्नत्वं निवेश्य तत्रत्यविषयतायाश्च तथाविधत्वाभावात्प्रागुक्तदिशा साध्यस्यापि सत्त्वान्न व्यभिचारः । हादिपदानामेवं शक्तिकल्पने च सत्त्वं द्वित्वमित्यादौ प्रकारीभूतधर्मवाचकत्वप्रत्ययेन सुतरां णकारबोध इत्यपरमनुकूलम् । (शेषमग्रे)

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

अथ पाशुकपदार्थानां नामान्युच्यन्ते ।

(*Continued from page* 74. VOL. VI.)

१ उत्तरायणं शुक्लपक्षो देवनक्षत्रं रेवती वा ऽमावास्या यजनीयदिनं वा ऽनुष्ठानसमयः । अयं पशुबन्धकाल इत्युच्यते ॥

२ आद्यप्रयोगे तु पूर्वेद्युर्नान्दीश्राद्धं रात्रावुदकशान्तिः प्रतिसरबन्धश्च क्रियते । परेद्युःस्नानादिपञ्चकानन्तरं पुण्याहवाचनम् । तत्र पशुदेवतायाः प्रथमान्तं नामोच्चार्य प्रीयतामिति यथार्थमूहनीयम् । इदं प्रथमप्रयोगपूर्वाङ्गमित्युच्यते ॥

३ दर्शपौर्णमासयागकालो यजनीयदिनमित्युच्यते ॥

४ गार्हपत्यस्य पश्चात्सपत्नीको यजमानो दर्भेष्वासीनो दर्भान् धारयमाणः पवित्रपाणिः प्राणानायम्य विष्णुं स्मृत्वा यः पुरस्तादित्यादि पठित्वा स्वर्गकामः श्रीपरमेश्वरप्रीत्यर्थं वा ऐन्द्राग्नेन निरूढपशुबन्धेन यक्ष्ये इति त्रिरुपांशु त्रिरुच्चैर्वदति । अयं पशुबन्धसङ्कल्प इत्युच्यते ॥

५ प्रतिप्रस्थातृप्रशास्तृसहितान् षडृत्विजो वृत्वा ऽर्हयित्वा प्रथमानुष्ठाने पशुना यक्ष्यमाणो ऽन्वारम्भणीयया यक्ष्य इति सङ्कल्पपूर्वकं अन्वारम्भणीयां समाप्याग्नीनरण्योः समारोप्योदवसाय मन्थति । यक्ष्ये करिष्ये इत्यादिपदोच्चारणसमकालीनदक्षिणहस्तकरणकपात्राधिकरणकजलप्रक्षेपसहितकरिष्यमाणकर्मानुष्ठानप्रतिज्ञा सङ्कल्प इत्युच्यते ॥

६ समारोपिताग्निमदरणीग्रहणपूर्वकं देवयजनदेशं प्रति गमनमुदवसानमित्युच्यते ॥

७ मन्थनानन्तरमध्वर्युरग्नीन् विहृत्य गार्हपत्ये स्मार्तवदाज्यं संस्कृत्य स्रुचि चतुर्गृहीतं गृहीत्वा आहवनीये मनस्वत्या हुत्वा उद्धरणापत्ते पुनर्विहृत्य षड्ढोतारं मनसाद्रुत्यान्वारब्धे यजमाने चतुर्गृहीतेनाहवनीये जुहोति । स्रुवेण चतुर्वारं गृहीतमाज्यादि चतुर्गृहीतमित्युच्यते ॥

८ सूर्यन्ते चक्षुरित्यादीनि नव वाक्यानि षड्ढोतेत्युच्यन्ते ॥

९ वाचस्पतये ब्रह्मण इदं न ममेति यजमानस्य त्यागः । पुनर्विहृत्योपस्थानवरदानान्तः कूष्माण्डहोमः । पुनर्विहृत्य प्रत्येकं चतुर्गृहीतेन सारस्वताहुती पुनर्विहृत्य चतुर्गृहीतेनोरु विष्णो विक्रमस्वेत्यृचा जुहोति विष्णव इदमिति त्यागो यजमानस्य । इयमाहुतिः करिष्यमाणयूपग्रहणार्थत्वाद्यूपाहुतिरित्युच्यते ॥

१० अध्वर्युः पुनश्चतुर्गृहीतं गृहीत्वा सस्रुवामाज्यस्थालीं बर्हिर्हिरण्यमुदपात्रं चादाय सपरशुं तक्षाणमाहूय एहि यजमानेत्युक्त्वा पूर्वद्वारेण शालाया बहिर्निष्क्रम्य यस्माद्वृक्षाद्यूपग्रहणं चिकीर्षितं तस्य समीपं गत्वा प्रतीच्यां दिशि प्रह्वां शाखां स्वयं प्राङ्मुखोऽत्यन्यानगानित्यादियजुर्मन्त्रेणोपतिष्ठते । इदं यूपयोग्यशाखोपस्थानमित्युच्यते ॥

११ तत आज्यस्थाल्याः स्रुवेणोपहृत्य शाखामूलमनक्ति । देवस्त्वा सवितामध्वेत्यादियजुषा । इदं यूपशाखाञ्जनमुच्यते ॥

१२ तत ओषधे त्रायस्वैनमितिमन्त्रेण यूपमूले ऊर्ध्वाग्रं बर्हिरनूच्छ्रयति । तदुपरि स्वधितिना तिर्यक् छिनत्ति स्वधिते मैनꣳ हिंसीरिति मन्त्रेण । आज्यस्थाल्यादेः सकाशात्स्रुवादिना पात्रान्तरे आज्यादेर्ग्रहणं उपहननमित्युच्यते ॥

१३ शाखाच्छेदनकाले यः प्रथमः शकलः परापतति तं यूपावटे प्रक्षेपार्थं क्व चित् प्रज्ञातं स्थापयति । कस्य चिदपि पदार्थस्य उपयोगकाले शीघ्रलाभार्थं क्वेदं मया स्थापितमस्तीति शीघ्रस्मृतिजनकवक्ष्यमाणः प्रज्ञातमित्युच्यते ॥

१४ यूपशाखां छित्त्वा ऽप उपस्पृश्य प्राच्यामुदीच्यां वापतन्तं यूपं दिवमग्रेण मालेखीरित्यादियजुषा ऽनुमन्त्रयते । वृक्षस्य छेदनदेशे हिरण्यं निधाय परिस्तीर्य परिषिच्य पूर्वाहुतेन चतुर्गृहीतेन वनस्पते शतवल्शमित्यादियजुषा स्वाहान्तेन जुहोति । वनस्पतयइदमिति यजमानस्य त्यागः । अयं छेदनप्रयुक्तहोम उच्यते ॥

१५ सहस्रवल्शा वीति पादेन स्वहृदयमभिमृशति । ततो ऽप उपस्पृश्य काष्ठुनक्षणा परशुना मूलादारभ्याग्रपर्यन्तं यूपशाखायाः सर्वा अवान्तरशाखा अध्वर्युश्छेदयति यं त्वायं स्वधितिरित्यादियजुषा । सकृन्मन्त्रपाठो न प्रत्यवान्तरशाखम् । हस्तपरिच्छिन्नादनधिकं प्रादेशपरिमाणादनूनं उपरेण पञ्चारत्निं चषालस्थापनार्थं चतुरङ्गुलाधिकमग्रतश्छिनत्त्यच्छिन्नो रायःसुवीर इति मन्त्रेण । छिन्नशेषस्य मूले चतुरङ्गुलमात्रमुपरं त्यक्त्वा ऽवशिष्टमष्टाश्रिं चतुरश्रिं वा तक्षति । स्वर्वेष्टमेकं शकलमधिमन्थनार्थं चोषि शकलानि स्थापयति । यूपाहृतिप्रभृत्येतावदन्तं कर्मयूपाहरणमित्युच्यते ॥

१६ तदनन्तरं पाशुकवेदिमानं उत्तरवेदितन्नाभ्योर्मानं चात्वालमानं उत्करकरणं च वक्ष्यमाणप्रकारवत्करोति । पाशुकवेदिमग्निवत्परिस्तृणाति । इदानीं यजमानो भोजनं वपनं नवनीताभ्यञ्जन-

मन्त्रोच्चारणं च करोति । इदानीं देवतासङ्कल्पं करोमीति केषां चिन्मतम् । अध्वर्युरिडाजपं कृत्वाऽग्नीन् विहृत्यान्वाधाय प्रणयहरणान्ते शाखाहरणपदे इषेत्वेत्यादियजुषा शाखामाच्छिनत्ति । तूष्णीं प्रशाखामाच्छिद्योभे शाखे तूष्णीमाहृत्य तूष्णीं यजमानमवेक्ष्य तिष्ठतीति यजमानस्येत्यादिप्राकृतमन्त्रेण । ततो बर्हिः संभरणादि । एवमौ विधृती भवत इति केचित् । पञ्चविधं बर्हिः । कार्ष्मर्यमयाः परिधयः । सप्तदश सामिधेन्यः । शाखापवित्रकरणान्ते पशुं हव्यं करोतु मे इति विशेषः । आघारमग्निहोत्रहोमानन्तरमुत्तरेण गार्हपत्यं दर्भान् संस्तीर्य तेषु पशुकुम्भीं शाखापवित्रं च त्रिगुणां त्रिव्यायामां यूपरशनां द्विगुणां द्विव्यायामां पशुरशनां च कार्ष्मर्यमय्यौ वपाश्रपण्यौ विशाखामेकामपरामविशाखां कार्ष्मर्यमयं हृदयशूलं यजमानमुखसम्मितं मेथावटाच्छकलं चेति द्वन्द्वं सादयति । ततस्तान्युत्तानानि कृत्वा कमण्डलुगताभिरद्भिः शुन्धध्वमित्यादिप्राकृतमन्त्रेण प्रकृतिवत्प्रोक्षति । पशोरङ्गानां हृदयादीनां श्रपणार्थं भाण्डं पशुकुम्भीत्युच्यते ॥

१७ यूपस्य वेष्टनार्थं या रज्जुः सा यूपरशनेत्युच्यते ॥

१८ पशुबन्धनार्था रज्जुः पशुरशनेत्युच्यते ॥

१९ वपा श्रप्यते यस्यां सा वपाश्रपणीत्युच्यते ॥

२० यस्मिन् शूले पशुहृदयं प्रोतं भवति तत् हृदयशूलमित्युच्यते ॥

२१ अपरेद्युः प्रातरग्निहोत्रहोमानन्तरमन्वाधानवर्जमाहितं बर्हिर्लवनादिक्लृप्तवतर्पणान्तामाग्नेयीमिष्टिं करोति । सा च सर्वापि प्रकृतिवत् क्रियते । इयं पशुपूर्वेष्टिरित्युच्यते ॥

Digitized by Google

२२ पश्वनुष्ठानस्य सद्यस्कालत्वपक्षे तु नान्दीश्राद्धादिवेदिमानं च पूर्वेद्युरेव क्रियते । अपरेद्युः स्नानादिपश्वन्तं ततः पशुसङ्कल्पानन्तरमन्वारम्भणीयेष्टिः क्रियते । अग्नीनरण्योः समारोप्य प्रत्यवान्वा देवयजनदेशं प्रति नयति । मन्थनपक्षे ऽग्नीन्विहृत्य मनस्वत्या हुत्वा पुनर्विहृत्य षड्ढोतृकूष्माण्डसारस्वतहोमान्तं समानम् । तदनन्तरमग्निदेवत्यां अग्न्यन्वाधानादिब्राह्मणतर्पणान्तां पशुपूर्वेष्टिं करोति । ततो यूपाहुत्यादिपाशुकवेदिपरिस्तरणान्तं करोति । ततः पशुदेवतासंकल्पं कृत्वा ऽन्वाधानादिकुम्भ्यादिप्रोक्षणान्तं करोति इति विशेषः । अयं सद्यस्कालपशुप्रकार इत्युच्यते ॥

२३ अपरेद्युराग्नेय्यामिष्टेरनन्तरं यजमानो देवतासङ्कल्पं करोति । पाशुकं हविः । पशुपुरोडाशाङ्गानि हवींषि । एकादश प्रयाजाः । अग्नीषोमावाज्यभागौ । इन्द्राग्नी पशुदेवता । वनस्पतिः पृषदाज्यदेवता । देवा आज्यपाः । अग्निः स्विष्टकृत् । एकादशानुयाजाः । एकादशोपयाजाः । सूक्तवाकशंयुवाकौ । चत्वारः पत्नीसंयाजाः । एवमात्मकेन साङ्गोपाङ्गेन कर्मणा सद्यो यक्ष्ये इति । अयं पशुदेवतासंकल्प इत्युच्यते ॥

२४ ततः पात्रासादनादि । अग्नीन् परिस्तीर्याहवनीयस्य पुरस्ताद्दर्भान् संस्तीर्य तेषु स्फ्यमग्निहोत्रहवणीं जुहूं अथाहोमहवनीमुपभृतं पृषदाज्यग्रहणीं स्रुवं स्वधितिं ध्रुवां प्राशित्रहरणमिडां वेदमाज्यस्थालीं दधिस्थालीमपूर्णामप्स्थालीं शोक्तं वैशसं घृष्टिं उपवेषमिध्मप्रव्रश्चनान् मन्वाहार्यस्थालीं च द्वन्द्वं सादयति ॥ इति पात्रासादनमुच्यते ॥

२५ इमानि स्फ्यादीन्येकविंशतिसंख्याकानि पूर्वेद्युर्गार्हपत्यस्योत्तरत आसादितानि पशुकुम्भ्यादीनि चाष्टौ पाशुकपात्राणीति कथ्यन्ते ॥

२६ एतत्पाशुकपात्रासादनानन्तरं ब्रह्माणं दक्षिणतस्तूष्णीमुपवेश्य पृष्ठ्यांस्तीर्त्वा पवित्रे कृत्वा यजमान वाचं यच्छेत्युक्त्वा वेषाय त्वेत्यग्निहोत्रहवणीमादाय प्रत्युष्टमित्यादिमन्त्रेण गार्हपत्ये प्रकृतिवत्प्रतितप्य प्रोक्षणीः संस्कृत्य प्रोक्षिताः स्थेत्यन्तं कृत्वा पाशुकपात्राणि प्रकृतिवत्प्रोक्ष्याज्यं निरुप्य तूष्णीं दधि निरुप्या-पृषदाज्यं च निर्वपति । आज्यमधिश्रित्य पर्यग्नि करोति । पशुपूर्वेद्युर्यजतो तु एतस्मिन् काले स्मार्तवत्संस्कृताज्येन चतुर्गृहीतेन अग्निपदं चतुर्थ्यन्तमुद्दिश्य स्वाहान्तेन पूर्णाहुति-होममात्रं भवति । निर्वापानन्तरं प्राकृतमन्त्रेण वेदं गृहीत्वा प्रकृतिवत्पाशुकीं वेदिं त्रिः सम्मार्ष्टि । तस्याः पश्चादुपविश्य स्फ्यादानादि अग्नीदितस्त्रिर्हरेत्यन्तं प्रकृतिवत्करोति । अथ स्फ्यमुद्यम्य बर्हिः शम्यामित्येतत्समादाय यजमानपत्नीभ्यां सह चात्वालदेशं गत्वा वक्ष्यमाणप्रकारेण चात्वालं कृत्वा उत्तरवेदिनाभिप्रच्छादनान्तं करोति । ततो । देवस्य त्वेत्यादिना-ऽभ्रिमादाया ऽभ्रिरसि नारिरसीत्यभिमन्त्र्य तया ऽर्धमन्तर्वेदि अर्धं बहिर्वेदि पदमात्रविष्कम्भं यूपावटं परिलिखति । परिलिखि-तमित्यादि यजुषा सकृत् द्विस्तूष्णीम् । यूपरोपणार्थं यो गर्तः खन्यते स यूपावट इत्युच्यते ॥

२७ इदं यूपावटपरिलेखनमुच्यते ॥

२८ अथाग्नीध्रं संप्रैषमाह । अग्नीदेहीमं यूपावटं खनोपरसम्मितं प्राक् पुरीषमुद्वपताच्चतुरङ्गुलेनोपरमति खनतात् इति । आग्नीध्रो यूपा-

Digitized by Google

चटं खनति आनयति वा । अध्वर्युर्यद्वा चात्वालकरणादिना-
भिप्रच्छादनान्तं करोति तद्वा प्रतिप्रस्थाता विप्रादेशप्रमाणैर्निय-
तकाष्ठैरिध्मं बध्वा ऽग्निप्रणयनार्थमाहवनीये प्रक्षिप्य ज्वलयति ।
चात्वालकरणादि उत्तरवेदिनाभिप्रच्छादनान्तं वरुणप्रघासपर्वोक्तं
कर्म सौत्तरवेदिकमित्युच्यते ॥

२८ यूपावटपरिलेखनानन्तरमाग्नीध्रश्चात्वालमृदा पूरितां पात्रीमन्यु-
द्धरणपात्र्युपयमनार्थमग्निसमीपे स्थापयति । अध्वर्युस्तूष्णीमु-
त्पूताः प्रोक्षणीः प्रतिप्रस्थात्रे प्रयच्छतीत्यादियजमानकर्तृकाहु-
तिचयहोमान्तं कर्म वरुणप्रघास पर्वोक्तं अग्निप्रणयननामकमि-
दानीं करोति । अग्निप्रणयनानन्तरं ब्रह्मा पांशुकवेद्या दक्षिणत-
उत्तरवेद्यावेवेन मन्त्रेणोपविशति । तस्य पश्चाद्यजमानः ।
अध्वर्युरुत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चं स्फ्यं प्रकृति-
वत् स्तब्ध्वा सम्प्रेषमाह । प्रोक्षणीरासादयेध्माबर्हिरुपसादय
स्रुवं च स्वधितिं च स्रुचश्च संमृड्ढि तूष्णीं पृषदाज्यग्रहणीं पत्नीं
सन्नह्याज्येन दध्ना चोदेहीति । प्रोक्षण्यासादनादिप्रकृति वत्
संमार्जने विशेषः । शालामुखीये प्रतितप्य स्रुववत् स्वधितिं जुहू-
वद्वसाहोमहवन्या उपभृद्वत्पृषदाज्यग्रहण्याश्च सम्मार्गः । जुह्वा-
माज्यग्रहणपर्यन्तं प्रकृतिवत् । उपभृति चतुर्गृहीतं गृहीत्वा
महीनां पयोसीति मन्त्रेण पृषदाज्यग्रहण्यामाज्येनोपस्तृणीते ।
विश्वेषां देवानां तनूरिति द्वितीयमुपस्तरणम् । ऋद्ध्यासमद्येत्या-
दियजुषा तस्यां दर्भद्वयान्तर्धानेन दधि गृह्णाति । बर्हिर्द्वयं
दूरीकृत्य विष्णो हृदयमसीति प्रथममभिघारयति । एकमिषेत्या-
दिमन्त्रेण द्वितीयमभिघारणम् । यजमानश्चरोस्त्वेत्यादि चतुर्भिरु-
पभृदाज्यग्रहानुमन्त्र्योत्तरैश्चतुर्भिर्मन्त्रैः पृषदाज्यग्रहानुमन्त्र-

Digitized by Google

यते । अध्वर्युः पञ्चविधं बर्हिः पाशुकवेद्यां स्तीर्त्वा काष्मर्य-
मयान् परिधीन् उत्तरवेद्यां परिधाय विधृत्योराश्वबालं प्रस्तरं
निधायोपभृदनन्तरं तन्मन्त्रेणोपभृत उत्तरतः पृषदाज्यवहनी-
मासाद्य तदुत्तरतो ध्रुवामासादयति । एतत् जुह्वाद्यासादनं
पाशुकस्रुगासादनमित्युच्यते ॥

३० आज्यस्थाल्याज्यपूरितं स्रुवं स्वधितिं चाग्रेण स्रुचां दक्षिणतो
नीत्वा प्रस्तरे जुह्वा दक्षिणतः सादयति । प्राकृते स्रुवासाद-
नमन्त्रे स्योनमित्यादिपदानां यथार्थमूहो द्विवचनमेकवचनस्थाने भव-
ति । स्रुवस्वधिती यथा दक्षिणतो नीतौ तथैवोत्तरत आनीय
ध्रुवायामवदधाति । अत्रापि प्रकृतिप्राप्तमन्त्रे ऊहयोग्यानामृषभादि
पदानां यथार्थं द्विवचनान्तता भवति । स्वधितेर्द्वितीयस्य
सत्त्वात् । सर्वाज्याभिमन्त्रणान्तं प्रकृतिवत् । अन्वाधानप्रभृत्ये-
तावदन्तं कर्म पश्वङ्गप्राकृतमुच्यते ॥

३१ (अथकेवलपाशुकम् ।) प्रदक्षिणमावृत्त्या प्रत्यङ्ङुद्द्रुत्य तूष्णीं
संस्कृता यवमतीः प्रोक्षणीर्बर्हिर्मुष्टिं सस्रुवां स्मार्ताज्यस्थालीं
स्वरुं रशने मेषावहणदण्डं प्रथमपतितयूपशकलं हिरण्यमुदपात्रं
चादायोत्तरवेदिसमीपे निधायोदपात्रोदकेन यूपं प्रक्षालयति यत्ते
शिक्वः परावधीदित्यृचा । एतद्यूपप्रक्षालनमुच्यते ॥

३२ ततश्चात्वालोत्करयोर्मध्यमार्गेण यूपमानीय यूपावटस्य पुर-
स्ताद्यूपं प्रागग्रं शाययित्वोत्तरवेद्या उत्तरतस्तिष्ठन् पृथिव्यै त्वे-
त्यादिमन्त्रेण यवमतीभिः प्रोक्षणीभिर्मूलादारभ्याग्रपर्यन्तं सकृ-
देव प्रोक्षति । एतद्यूपप्रोक्षणमित्युच्यते ॥

(शेषमग्रे)

॥ योगवार्त्तिकम् ॥

(*Continued from page* 519. Vol. VI.)

तदेवं मोक्षयोग्यं चित्तं तदन्यचित्तानां बन्धप्रकार उक्तस्तस्य च मोक्षानुपपत्तिः परिहृता इतः परं मोक्षकारणस्य विवेकज्ञानाख्यसम्यग्ज्ञानस्य विषयो लक्षणादिकं चातिविस्तरेण प्रतिपादनीयं विशेषदर्शन इत्यादिसूत्रत्रयपर्यन्तैः सूत्रैः तत्र चादौ सदसत्त्ववैधर्म्येण कार्यकारणयोर्विवेकं सम्यग्ज्ञानविषयैकदेशं दर्शयति ।

ते व्यक्तसूक्ष्मा गुणात्मानः ॥ १३ ॥

ते धर्मा यद्यपि नित्यास्तथापि कालभेदेन व्यक्ताः सूक्ष्मा वा भवन्तु सर्वएव गुणात्मानः सत्त्वादिगुणमात्रस्वरूपा एव भवन्ति सदा वर्त्तमानत्वेन गुणा एव तदपेक्षया सत्या इत्यर्थः । व्याचष्टे । ते खल्विति । अत्र सूक्ष्मात्मान इत्यस्यानन्तरं षड्विशेषा इति पाठः क्वचित्तिष्ठति स तु प्रामादिकत्वादुपेक्षणीयः सर्वविकाराणामेव गुणात्मकत्वस्य वक्तव्यतया षड्विशेषमात्रनिर्देशानौचित्यादिति । अयमर्थः । ते धर्मा व्यक्तस्वरूपाः सूक्ष्मस्वरूपाश्च महदादिघटपटान्ताः परमार्थतो गुणात्मानो गुणरूपेणैव सन्तो न तु स्वरूपेण यतः सर्वमिदं धर्मजातं सत्त्वादीनां संनिवेशः संयोगस्तद्विशेषमात्रं तद्विलये विलयात् तद्वर्त्तमानतायां वर्त्तमानत्वात्तच्चियर्तमिति । तदुक्तम् । आद्यन्तयोर्यदसदास्त तदेव मध्ये इति त्रिगुणात्मकमायैव जगत्परमार्थ इति च । अपारमार्थिकत्वं चानित्यतामात्ररूपासत्त्वम् अन्यथा सृष्ट्यादिप्रतिपादकसूत्रादिविरोधात् । अत्रावयवसंयोगातिरिक्तो धर्मो नास्तीति न भाष्यार्थः । अवयव्यवयवद्रव्यस्यातिरिक्तस्य स्थानेस्थाने व्यवस्थापितत्वादिति । उक्तार्थे शास्त्रं प्रमाणयति । तथा चेति । परमं पारमार्थिकं नित्यमिति यावत् । मायेव लौकिकमायावत् सुतुच्छकम् अत्यन्ततुच्छम् अल्पसारं स्थिरांशाभावादिति । अत्र सुशब्देन परिणामितया गुणानामपि तुच्छत्वं सूचितं गुणा एव परिणामितया कूट·

स्यानित्यापेक्षया तुच्छाः । गुणकार्यं तु दृश्यमानं गुणापेक्षयापि तुच्छम् । अतः सुतुच्छमिति । यद्यपि मायाशब्दो मिथ्यावस्तूनां कारणे मुख्यः 'मायां तु प्रकृतिं विद्यादि'ति श्रुतेः । 'विश्वस्य बीजं परमासि माये'तिस्मृतेश्च । मायात्वं हि मृषाविकारेण व्यामोहकत्वं तच्च प्रकृतावेव मुख्यं 'प्रकृत्या सर्वमेवेदं जगदन्धीकृतं विभो'रिति । 'जगन्मोहात्मकं विद्धि अव्यक्तं व्यक्तसंज्ञक'मिति भारतात् । तथापि कार्यकारणाभेदान्मायाशब्दः कार्येपि प्रयुक्तः 'दैवी ह्येषा गुणमयी मम माया दुरत्यया' इत्यादाविवेति मन्तव्यम् । नन्वेवं प्रपञ्चोपि प्रकृत्याख्यमूलमायाकार्यत्वान्मायेव अन्यथा

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।
मूलमायाभिधानं तत्सा शक्तिर्मयि तिष्ठति ॥

इति कौर्मादिषु मूलेतिविशेषणवैयर्थ्यात् । तत् कथमिवशब्दः प्रयुक्त इति मैवम् । लौकिकस्येन्द्रजालादेरेवात्र दृष्टान्तत्वेनेवशब्दोचित्यादिति । प्रपञ्चस्य मूलकारणमात्रत्वे श्रुतिरपि 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्य'मित्यादिरुदाहर्त्तव्या । तथा विष्णुपुराणमपि ।

शिबिका दारुसंघातो रचना स्थितिसंस्थितिः ।
अन्विष्यतां नृपश्रेष्ठ तद्भेदे शिबिका त्वया ॥

एवं छत्रशलाकादिपृथग्भावो विमृश्यताम् ।
क्व जातं छत्रमित्येष न्यायस्त्वयि तथा मयि ॥

इत्यादि । एवंविधेषु च वाक्येषु विकाराणामनित्यतयैव विवेकवैराग्ययोस्तात्पर्यं न तु कार्यखण्डने कार्यकारणभावप्रतिपादकवाक्यविरोधात् । न च तदनुवादमात्रं महदादिसृष्टेर्लौकिकप्रमाणानधिगतत्वेन अनुवादासंभवात् । प्रमाणान्तरसत्त्वे च तेन सहापि विरोधस्यान्याय्यत्वात् । किं च सर्वविकारस्य मिथ्यात्वे प्रमाणस्यापि मिथ्यात्वनिश्चयेन श्रुतिप्रमाणावधृतेपि कारणत्वाभिमतब्रह्मादौ पुनः संशयः स्यात् प्रामाण्यसंशयाहितार्थसंशयादिवदिति दिक् । सूत्रान्तरमवतारयति । यदेति । यदि सर्वे विकारा

नानेकसुखमाचा: तदा कथमेकं शब्दतन्मात्रम् एकं चक्षुरिति लोकशास्त्रयोर्व्यवहार इति शङ्कावाक्यार्थः । तत्र सिद्धान्तसूत्रम् ।

परिणामैकत्वाद्वस्तुतत्त्वम् ॥ १४ ॥

परिणामस्यैकत्वाद्वस्तूनां गुणानां तत्त्वमेकत्वमिति योजना । परमार्थतो नानात्वेऽपि व्यावहारिकेणानित्येन परिणामरूपेण वस्तूनां गुणानामेकत्वव्यवहार इत्यर्थः । अत एव श्रुतिर्व्यावहारिकस्याम्यावयविन एकस्यावयवविभागे सति नानात्वमेव पारमार्थिकमुक्तवती 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्य अपागादग्नेरग्नित्वं त्रीणि रूपाणीत्येव सत्यमि'ति । परिणामस्यैकत्वं भाष्यकारो दर्शयति । प्रख्येति । प्रकाशात्मकानां सात्त्विकान्तःकरणरूपेण परिणतानां ग्राहकत्वभावेन श्रोत्रमित्येकः परिणाम इत्यर्थः । तेन महदहंकाररूपेणापि परिणामैकत्वकथनाच्च न्यूनता । अत्र श्रोत्रशब्देनान्यान्यपि ज्ञानेन्द्रियाण्युपलक्षणीयानि । ग्राह्यात्मकानामिति । तामसान्तःकरणरूपेण परिणतानामित्यर्थः । अत्र शब्द इति । शब्दतन्मात्ररूपं द्रव्यं मूर्त्तिसमानजातीयानामित्यागामिभाष्येण द्रव्यत्वलाभात् । एतदपि रसादितन्मात्राणामुपलक्षणम् । एवं कर्मात्मकानां राजसान्तःकरणरूपेण परिणतानां कारणान्तर्भावेनैकैकः परिणामो वागादीन्द्रियमित्यपि बोध्यम् । अतः परं स्थूलभूतरूपेणैकं परिणामं दर्शयति । शब्दादीनामिति । मूर्त्तिः काठिन्यं पृथिवीत्वमिति यावत् । मूर्त्या सजातीयानां शब्दादितन्मात्राणाम् एकः परिणामः पृथिवीपरमाणुः स्थूलपृथिव्याः परमसूक्ष्मावस्थेत्यर्थः । इदं चाग्रे प्रतिपादयिष्यामः । अयमेव सूक्ष्मशब्देन सांख्ये प्रोक्तः 'सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्यु'रित्यत्र । अयं च परमाणुर्वैशेषिकैस्त्रसरेणुशब्देनोच्यते । अस्माभिस्तु प्रत्यक्षपृथिव्याः परमसूक्ष्मत्वात्पृथिवीपरमाणुरिति । गुणेषु पृथिवीत्वादिव्यवहाराभावेनाणुत्वेऽपि न पृथिव्याद्यणुव्यवहार इति । तस्य च पार्थिवपरमाणोर्निरवयवत्वभ्रमनिरासाय पञ्चतन्मात्राण्येवावयवा इत्याह । तन्मात्रावयव इति । बहुव्रीहिविग्रहः ।

महाभूतादिरूपपरिणामेष्वप्येकत्वं दर्शयन्ति । तेषामिति । एवमिति । एवं भूतान्तरेष्वपि जलादिषु स्नेहादिजातीयानि जलत्वतेजस्त्ववायुत्वाकाशत्वजातीयानि तन्मात्राणि गृहीत्वा सामान्यं सजातीयानामनेकेषां धर्मभूत एकविकारारम्भभूत उपपादनीय इत्यर्थः । तद्यथा । गन्धतन्मात्रं वर्जयित्वा चतुस्तन्मात्राणां स्नेहजातीनाम् एकः परिणामो जलपरमाणुस्तेषां च महाजलादिः । एवं गन्धरसौ वर्जयित्वा औष्ण्यजातीयानाम् त्रितन्मात्राणां तेजोऽणुस्तेभ्यो महातेजआदि । एवं गन्धरसरूपाणां वर्जनाद् द्वाभ्यां वाय्वणुस्तेभ्यो महावाय्वादिः । एवं शब्दतन्मात्रादहंकारांशसहकृतादाकाशाणुस्तेभ्यो महाकाशादिरिति । इदमत्रावधेयम् । शब्दादीनां मूर्त्तिसजातीयानामित्यादिवाक्यादत्र दर्शने ऽयं सिद्धान्तः शब्दादितन्मात्रपञ्चके काठिन्यस्नेहादिव्यङ्ग्याः पृथिवीत्वादिजातयः सन्ति । तत्र पृथिवीजातीयैः शब्दादिगन्धान्तपञ्चतन्मात्रैः पृथिवीपरमाणुरारभ्यते पृथिव्यां पञ्चगुणोपलम्भात् । एवं जलजातीयैः शब्दादिरसपर्यन्तैश्चतुस्तन्मात्रैर्जलपरमाणुः । एवं तेजोजातीयैः शब्दादिरूपान्तैस्त्रितन्मात्रैस्तेजःपरमाणुः । एवं वायुजातीयाभ्यां शब्दस्पर्शतन्मात्राभ्यां वायुपरमाणुः । एवमाकाशजातीयाच्छब्दतन्मात्रादहंकारसहकृतादाकाशाणुर्जायते । एवं परमाणुगणोत्पत्त्यनन्तरं तेभ्य एवाकाशादिक्रमेण पञ्चमहाभूतान्युत्पद्यन्ते । श्रुतौ चाकाशादिक्रमेण महाभूतोत्पत्तिसिद्धेरिति । समानतन्त्रन्यायेन च सांख्येपीत्थमेव सिद्धान्त उन्नीयते । विष्णुपुराणादौ तु शब्दतन्मात्रादाकाशमाकाशात् स्पर्शतन्मात्रं तस्माद्वायुरेवंक्रमेण सृष्टिः स्मर्यते । यथा विष्णुपुराणे ऽहंकारसृष्ट्यनन्तरं

यथा प्रधानेन महान्महता स तथावृतः ।
भूतादिस्तु विकुर्वाणः सर्गं तन्मात्रिकं ततः ॥
ससर्ज शब्दतन्मात्रादाकाशं शब्दलक्षणम् ।
शब्दमात्रं तदाकाशं भूतादिः स समावृणोत् ॥
आकाशस्तु विकुर्वाणः स्पर्शमात्रं ससर्ज ह ।
बलवानभवद्वायुस्तस्य स्पर्शो गुणो मतः ॥

इत्यादिक्रमेण पञ्चभूतसृष्टिरुक्ता । तस्या अयमर्थः । योऽहंकारो महत्तावृतः आपूरितः यथा पृथिवी जलेनानुविद्धा भवति तद्वत् । ततो महत्तापूरणाद्वाभ्यां मिलित्वा भूतादिस्तामसाहंकारः तन्मात्रिकं सर्गे तन्मात्राणां सृष्टिं ससर्ज चकार तदनन्तरं स एव भूतादिः शब्दतन्मात्रा-त्स्वद्वितीयात् शब्दगुणकम् आकाशं ससर्जेत्यनुषज्यते तथा चाहंकारशब्द-तन्मात्राभ्यां मिलित्वाकाशं सृज्यते न तु तन्मात्रान्तरमपेक्ष्यतइति सिद्धम् । तच्च शब्दगुणकमाकाशं भूतादिनाहंकारेणापूरितं भूत्वा स्पर्शमात्रं ससर्ज, अत्र चाकाशेऽहंकारस्यापि कारणत्ववचनादपरभूतचतुष्केऽपि तत्त-न्मात्राणामहंकारसहितानामेव हेतुत्वमवगम्यते युक्तिसाम्यात् । एतत्सू-चनायैव भूतादिशब्देनाहंकारोपन्यासः ततश्च स्पर्शतन्मात्राद् बलवान्म-हावायुरभवदिति । एवंक्रमेण तत्तन्मात्राधिक्येन तेजआदिभूतत्रयोत्पत्ति-वाक्यान्यपि तत्र व्याख्येयानि । कार्यकारणयोर्विवेकप्रकारः प्रदर्शितः । इदानीं यथोक्तं कार्यकारणरूपं सर्वं वस्त्वसत् चित्तकल्पितमात्रं स्वप्नवदिति यदाहुस्तन्निषिध्य चित्ततदर्थयोर्विवेकप्रकारं दर्शयिष्यति सूत्रकारः । तत्सूत्रमवतारयितुमुपक्रमते । नास्त्यर्थ इति । विज्ञानवादिन आहुः । बाह्यवस्तुनः प्रातीतिक्येव सत्ता परमार्थतस्तु गुणा वा तत्परिणामो वा अतीतादिकं वा किमपि नास्ति ।

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥
यथा रथादयः स्वप्ने भान्तीव नैव सन्ति ते ।
तथा जाग्रदवस्थायां भूतानि च न सन्ति वै ॥

इत्यादिश्रुतिस्मृतिपरम्परयैव बाह्यवस्तुनिराकरणात् । तथा युक्ति-रप्यस्ति । स्वप्नादौ तावत् विषयं विनापि ज्ञानमुभयवादिसिद्धमनुभववि-षयत्वं विना हि विषयः परैरपि न स्वीक्रियते अत उभयवादिसिद्धेन ज्ञाने-नैव स्वप्नादिवत्सर्वव्यवहारोपपत्तौ ज्ञानातिरिक्तार्थकल्पने गौरवमिति तामिमां युक्तिं प्रदर्शयन् स्वमतमुपन्यस्यति । नास्त्यर्थ इत्यादिना । वि-ज्ञानविसदृशो विज्ञानाभावकालीनोऽर्थ उभयवादिसिद्धो नास्ति । ज्ञानं तु सर्वा-

भावकालीनं स्वप्नादौ कल्पितमुभयवादिसिद्धमित्यनया दिशा एतच्छ्रुति-मार्गेण ये वस्तुस्वरूपमत्यन्तमपह्नुवते । य इत्याद्यपह्नुवतइत्यन्तं विवृणो-ति । ज्ञानेत्यादिना आहुरित्यन्तेन । विकल्पश्चसूचिताश्च पराभिप्रेतश्रु-त्यादयः पूर्वोक्ताः तथा युक्त्यन्तराणि च ।

सहोपलम्भनियमादभेदो नीलतद्धियोः ।
भेदश्च भ्रान्तिविज्ञानैर्दृश्य इन्दाविवाद्वय ॥

इत्यादीनि । तन्मतं स्वयमादौ निराकरोति । ते तर्येति । ते विज्ञा-नवादिन एवासन्त इत्यर्थः । तत्र हेतुमाह । प्रत्युपस्थितमित्यादिना स्युरि-त्यन्तेन । अस्यार्थः । इदं सर्वं वस्तु स्वमाहात्म्येन सन्निकर्षादिनैवोपस्थितं न तु दोषादिना स्वप्नवदत्यन्तबाधादर्शनात् । अतः कथं वस्तुस्वरूपं गृहीत्वापि प्रमाणरूपेण स्वप्नज्ञानरूपदृष्टान्तबलेन वस्तुस्वरूपमपलपन्तः श्रद्धेयवचनाः स्युः । तेषां ज्ञानस्यापि भ्रमत्वेन तद्वाक्यस्य यथार्थवाक्या-र्थज्ञानाजनकत्वात् तद्वाक्यार्थस्यापलापाच्च । तद्वाक्यस्याश्रद्धेयत्वा-दित्यर्थः । नहि जाग्रज्ज्ञानस्य स्वप्नदृष्टान्तेन विषयापलापे क्रियमाणे स्वाभिप्रेतस्य यत्किंचिज्ज्ञानस्य विषयः सन्नित्यप्यभ्युपगन्तुं शक्यते प्रामाणिकैरित्यतस्त एव नास्तिकाः न पुनरर्थो नास्तीति भावः । एतेनाधुनिकानां दृष्टिसृष्टिवादिनां वेदान्तिब्रुवाणामपि मतं प्रच्छन्ना-स्तिकतयोपेक्षणीयम् । स्वप्नादिदृष्टान्तेन श्रीहर्षादीनामसत्त्वखण्डनेन च वेदान्तज्ञानतज्जन्यज्ञानयोरपि भ्रमत्वापत्त्या वेदान्तप्रामाण्यासिद्धौ तत्प्र-तिपाद्यब्रह्मासिद्धिप्रसङ्गादिति । नन्वनुभवस्वरूपस्यात्मनः स्वप्रकाश-त्वात् न तत्र प्रमाणापेक्षेति चेत् न । तथा सति वेदान्तश्रवणवैयर्थ्यापत्तेः । अथापूर्वत्वसद्वितीयत्वभ्रमनिरासार्थं श्रवणापेक्षेति चेत् न । अप्रमाणीभूतेन वेदान्तेनापूर्वत्वाद्यभावस्यासिद्ध्यापत्तेः । ननु श्रुत्या स्वार्थे बोधिते सति पश्चात्तद्बाधेऽप्यक्षतिः श्रुतिप्रवृत्तेः प्राक् अबाधितमेव सर्वमिति । नैवम् । श्रुतिप्रामाण्यग्राहकानुमानादीनामप्यप्रामाण्ये स्वप्रमाणीभूतां बाधितां च श्रुतिम् उत्पादितज्ञानामपि प्रामाण्यसंशयाहितः स्वार्थसंशयः कथं नाशा-

मलस्तनवत् विफलीकुर्यादिति दिक् । विज्ञानवादे दूषणान्तरपरतयोत्त-
रसूत्रमवतारयति । कुतश्चेति । चशब्दो हेत्वन्तरे कुतोपीत्यर्थः ।

वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पन्थाः ॥ १५ ॥

एकस्मिन्नेव विषये चित्तान्तरवियोगे चित्तान्तरालम्बनदर्शनात्त-
योश्चित्तार्थयोर्विभक्तः पृथगेव पन्थाः स्वरूपभेदोऽयनवर्त्म विरुद्धधर्मद्वय-
रूपमेकानेकस्वरूपमित्यर्थः । स्वग्राह्यविज्ञानमेव परेषां चित्तमित्यतः चित्ता-
द्भेदेनैव विज्ञानभेदोऽर्थेषु सिद्ध इति भावः । तत्रादौ भाष्यकारोऽनुभव-
बलात् हेतुं साधयति । बहुचित्तालम्बनीभूतमेकं वस्तु साधारणमिति ।
प्रत्यभिज्ञासिद्धमिति शेषः । सोऽत्रानुमाने तर्कमादौ दर्शयति । तत् खल्वित्या-
दिना प्रतिष्ठमित्यन्तेन । नैकेति । न एकमात्रीयपुरुषचित्तात्मकं तथा
नानेकपुरुषीयचित्तात्मकम् अपि तु स्वप्रतिष्ठं चित्तातिरेकेणैव स्वातन्त्र्ये-
णैव स्थितमित्यर्थः । सिद्धहेतुं योजयितुं पृच्छति । कथमिति । उत्तरं,
वस्त्विति । आदावेकपुरुषीयचित्तकल्पितत्वानुपपत्तिमुक्तहेतुना प्रतिपाद-
यति । धर्मापेक्षमिति । पुरुषभेदेनैकस्मिन्नेव योषिद्वस्तुनि धर्मनिमि-
त्तात्सुखज्ञानं सुखवती स्त्र्याकारवृत्तिर्भवति । अधर्मनिमित्ताच्च दुःखवती
स्त्र्याकारवृत्तिरित्येवमादिरूपश्चित्तभेदोऽस्ति अतः कस्य पुरुषस्य चित्तेन
तत् कल्पितं स्यात् न कस्यापीत्यर्थः । नन्वेवं भवत्वनेकपुरुषचित्तपरि-
कल्पितमिति द्वितीयः पक्षः तत्राह । न चान्येति । नाप्यन्यपुरुषचित्ता-
त्मकेन वस्तुना ऽन्यस्य चित्तउपरागः संभवति । परस्वप्नस्य परेणा-
ज्ञानादित्यर्थः । तर्कं प्रदर्श्य सूत्रार्थं व्याचष्टे । तस्मादिति । ग्राह्यग्रहण-
योर्भेदेन वैधर्म्येण भिन्नयोरित्यर्थः । ननु चित्तातिरिक्तार्थवादिनाम् अर्थस्य
स्थिरत्वान्निरन्तरमेव कथं ज्ञानं भवति । कथं वा एक एवार्थः स्वप्नादि-
भेदभिन्नासु वृत्तिषु हेतुः स्यात् । नह्यविलक्षणात् कारणात् कार्यभेदो
घटत इत्याशङ्कायामाह । सांख्यपक्ष इति । सांख्यानुसारिमते सुखदुःख-
मोहात्मकं भवति वस्तु चित्तं चलस्वभावमतो धर्मादिनिमित्तवशात्सु-
खाद्यर्थमेव चित्तैर्वस्तु संबध्यत इति न सर्वदा ज्ञानं तथा धर्मादि-

निमित्तानुरूपं सुखाद्यात्मकप्रत्ययं प्रति सुखाद्यात्मकत्वेनैव वस्तु हेतुर्भवतीति कारणतावच्छेदकभेदाच्च द्वितीयोऽपि दोष इत्यर्थः । बौद्धवादान्तरनिरासकसूत्रान्तरमवतारयितुं तन्मतमुपन्यस्यति । के चिदाहुरिति । के चिदाहुः । अस्तु ज्ञानाद्भिन्नोऽर्थः तथापि ज्ञानसमकालीन एव सोऽस्तु अन्यदा प्रमाणाभावात्, प्रयोगश्चायं ज्ञानसहभूरेवार्थो भोग्यत्वात् सुखादिवदिति । अत्र सुखदृष्टान्तस्तन्मतेनैव अस्मन्मते सुखस्यापि विषये स्थिरत्वात् । रागद्वेषादिश्चोभयसिद्धो दृष्टान्त इति । अर्थस्य ज्ञानसहभावित्वेन यत् सिध्यति तदाह । तएतयेति । ते च एतेनानुमानेन विषयस्य पुरुषान्तरसाधारण्यं बाधमाना ज्ञानपूर्वोत्तरक्षणेषु विषयमपलपन्तीत्यर्थः । ततश्चाननुभूयमानतया न मोक्षसिद्धिरिति भावः । तत्र प्रत्युत्तरं सूत्रमिदम् ।

न चैकचित्ततन्त्रं वस्तु तत्प्रमाणकं तदा किं स्यात् ॥ १६ ॥

वृत्त्याख्यज्ञानातिरिक्तं तेषां चित्तं नास्तीति ज्ञानमेवात्र चित्तं तत्तन्त्रं तन्नियतं तथा च नापि वस्तु एकज्ञाननियतमिति प्रतिज्ञा । तत्र हेतुः, तदित्यादि । तदा तर्हि तच्चित्तप्रमाणकं वस्तु किं स्यात् चित्तापाये कुत्र विलीयेत न कुत्रापीत्यतो वस्तु स्थिरमिति शेषः । अयं भावः । यदि चित्तस्य कारणे विलीयत इत्युच्यते तदा घटादिरूपार्थानां लाघवाच्चित्ताभेदापत्त्या विज्ञानवादिमत एव प्रवेशः तच्च दूषितं यदि च मृदादिषूच्येत तदा विनाशकारणाकाङ्क्षायां परिदृष्टस्य मुद्गरपातादेरेव नाशकारणत्वेन चित्तनाशसमकालं घटादिवस्तुनाशानुपपत्तिरिति । हेतुपदस्येममेवार्थं भाष्यकार आह । एकेति । एकचित्तनियतं चेद्वस्तु स्यात्तदा तच्चित्ते विषयान्तरसञ्चारिणि निरुद्धे वा सति अस्वरूपमेव तद्वस्तु अतस्तदानीं तत्किं स्यात् शेषमस्वरूपत्वे हेतुः । अप्रमाणकमित्यस्य विवरणं केन चिदगृहीतस्वभावकमिति । स्वयमधिकं पूरयति । संबध्यमानं चेति । चित्तेन समकालं भावित्वा*त्तत उत्पद्येत न कुतोऽपीत्यर्थः । पूर्ववदयं भावः । यदि चित्तस्य कारणादेवोत्पत्तिरुच्यते तदा

* समकालभावभावित्वादिति प्रा० २ ।

चित्ताभेद एव स्यात् यदि च बाह्यकारणात् भेदाच्चित्तव्यभिचारेऽपि स्यात् स्वतन्त्रकारणेनोत्पादनात् परिदृष्टानां दण्डचक्रादीनामेव कारणौचित्येन चित्तव्यभिचारसिद्धिश्चेति । बाधकान्तरमाह । ये चास्येति । अस्यार्थस्य दृश्यमानस्याप्रतीयमाना ये च पृष्ठाद्यंशास्तेऽप्यप्रामाणिकत्वादसन्तः स्युः । एवं च पृष्ठाद्यभावादुदरं प्रतीयमानमपि न दृश्येत, सत्यतयेति शेषः । उदरस्य पृष्ठादिव्याप्ततया पृष्ठाद्यभावेनोदराभावसिद्धेरिति भावः । परमतमपाकृत्य स्वमतमुपपत्तयोपसंहरति । तस्मादिति । उभयत्र स्वतन्त्रशब्दो ऽन्योन्यनैरपेक्ष्यबोधनाय । भोग इति । वियोगाच्चानुपलब्धिर्मात्र इति शेषः । चित्ततदर्थयोर्विवेकप्रकारो दर्शितः । इदानीं ज्ञातविषयत्वसदाज्ञातविषयत्वाभ्यां चित्तात्मनोर्विवेकप्रकारमाह सूत्राभ्याम् । अस्यैव च मोक्षहेतुज्ञानविषयस्य विवेकस्योपोद्घातसंगत्या कार्यकारणयोश्चित्तार्थयोरत्र विवेकः पूर्वं दर्शितः यावद्धि कार्यभिन्नं कारणं न सिद्ध्यति न तावद्विकारितया चित्तं स्थिरं सिध्यति येन ज्ञाताज्ञातविषयत्वं चित्तस्य स्यात् यावद्वा चित्तार्थयोर्भेदोऽपि न सिध्यति न तावदपि चित्तस्य ज्ञाताज्ञातविषयत्वं सिध्यति ततः कुतो ज्ञाताज्ञातविषयत्वसदाज्ञातविषयत्वाभ्यां चित्तात्मनोर्विवेक इति भावः ।

तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम् ॥ १७ ॥

चित्तस्य कालभेदेन ज्ञातमज्ञातं च वस्तु भवति । कुतः । अर्थाकारतारूपोपरागसापेक्षत्वात् अर्थज्ञानइति शेषः । अतो ज्ञाताज्ञातविषयतया चित्तं परिणाम्यपीति भावः । नन्वर्थाकारतातिरिक्तं किं बुद्धेर्ज्ञानमस्ति यत्र तस्या अपेक्षोच्यतइति चेन्न । भूतप्रकाशवत्सत्त्वस्यापि कश्चन प्रकाशोऽस्ति सुषुप्त्यादिव्यावृत्तोऽनुभवसिद्धः तस्यैवान्याकारावच्छिन्नस्य बुद्धिधर्मज्ञानत्वादिति । उपरागप्रकारप्रदर्शनपूर्वकं सूत्रं व्याचष्टे । अयस्कान्तेति । अयस्कान्तमणिवदाकिर्षका एव विषया अयोवत् क्रियाशीलं चित्तं स्वमहिमाकृष्य स्वस्मिन् संयोज्य तदुपरञ्जयन्ति स्वाकाराकारयन्तीति लाक्षारसइव वस्त्रम् अतो येन विषयेणोपरक्तं यच्चित्तं स विषयस्तस्य ज्ञात इत्यर्थः ।

इतरे चाज्ञाता इत्यर्थः । यद्यपि चित्तस्य जडत्वाच्च ज्ञानं चैतन्यस्यैव ज्ञानत्वात् तस्य च पौरुषेयत्वात् उभयत्र ज्ञानकल्पने गौरवात् सत्त्वस्य प्रकाशरूपता च प्रतिबिम्बग्रहणक्षमनैर्मल्यमात्रं तथापि तत्कार्यो व्यवहारतो बुद्धिसत्त्व-प्रकाशोऽपि ज्ञानशब्देनोक्तः । सूत्रतात्पर्यविषयं पुरुषाद्वैधर्म्यान्तरं हेयताया विवेकस्य च बीजं चित्तस्य च दर्शयति । वस्तुन इति । अतो ज्ञाताज्ञातव-स्तुकत्वान्यथानुपपत्त्या चित्तस्योपरागाख्यपरिणामः सिद्ध इत्यर्थः । घटा-दीनामपि साक्षात्पुरुषविषयत्वे पुरुषस्यापि ज्ञाताज्ञातविषयत्वं स्यादित्या-शयेन पूरयित्वोत्तरसूत्रमुत्थापयति । यस्य त्विति ।

सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामात् ॥ १८ ॥

यस्य तु तदेव विषयोपरक्तमेव चित्तं विषयो नान्यत् अतस्तस्य तत्प्रभोश्चित्तसाक्षिणः पुरुषस्य विषयाश्चित्तवृत्तयः सदा ज्ञाताः पुरुषस्या-परिणामादित्यर्थः । परिणामित्वे हि कदाचित्पुरुषस्यान्ध्यापत्त्या विद्य-मानापि चित्तवृत्तिर्न ज्ञायेत । तदा च तस्यापि ज्ञाताज्ञातोभयरूपत्वे अहं सुखी न वा दुःखी न वेच्छामि न वेत्यादिसंशयः स्यात् एतादृशश्च संशयो न दृश्यते अतो वृत्तेरज्ञातसत्ता नास्ति ततश्च पुरुषोऽपरिणामीत्यायातम् । ननु पुरुषस्यापरिणामित्वस्य व्यवस्थापने किमिति सांख्ययोगयोराग्रह इति चेत् शृणु । यदि हि पुरुषस्य ज्ञानादिलक्षणधर्मः कश्चन मोक्षे नश्येत् तदा व्ययदोषेण दारिद्र्यवत् मोक्षो न परमपुरुषार्थः स्यादिति अस्मिन् सूत्रे बुद्धिवृत्तिरेव पुरुषस्य विषय इति लब्धम् । अत एव 'पुरुषो विषयी नित्यं सत्त्वं च विषयः स्मृत' इत्यनुगीतायां नित्यमित्यनेन सत्त्वाख्याया बुद्धिवृत्तेरेव पुरुषविषयत्वमुक्तम् । सूत्रतात्पर्यविषयं चित्ताद्वैधर्म्यं भाष्यकार आह । यदीति । भाष्यं सुगमम् । ननु यदि चित्तमेव पुरुषस्य विषयस्तर्हि शब्दा-दिप्रकाशः कथं स्यात् चित्तस्याचेतनत्वेन विषयताम् चेत्र प्रकाशासंभवा-दिति चेन्न । चित्तारूढतयैव शब्दादीनां पुरुषे भावादिति । ननु सर्वसंब-द्धत्वाविशेषेऽपि चित्तमेव पुरुषस्य विषयो नान्य इत्यत्र का युक्तिरिति चेच्छृणु । अर्थाकारतैव विषयविषयिभावो न तु संयोगमात्रम् अतीन्द्रियेषु

Digitized by Google

संयोगसत्त्वेपि चित्तविषयत्वाभावात् सा चार्थाकारता प्रतिबिम्बरूपैव पुरुषे स्वीकार्या स्वतोऽपरिणामित्वस्य साधितत्वात् अतः पुरुषे प्रतिबिम्बसमर्पणसामर्थ्यं वृत्तिमत्त्वचित्तस्यैव फलबलात् कल्प्यते यथा जलादौ प्रतिबिम्बनसामर्थ्यं रूपवत् स्थूलद्रव्यस्यैवेति । तदेताभ्यां सूत्राभ्यां चित्तविधर्मतया चित्तातिरिक्तो मोक्षभागी पुरुषः प्रतिपादितः । आभ्यां च सूत्राभ्यामज्ञानमिच्छादिविकारजातं च चित्तनिष्ठमेव न तु पुरुषनिष्ठमित्यवगन्तव्यम् । ननु पुरुषस्य सदाज्ञातविषयत्वेन ज्ञानपरिणामो मास्तु इच्छासुखादिपरिणामे तु किं बाधकमिति चेच्छृणु । पुरुषस्य सदाज्ञातविषयत्वे सिद्धे लाघवाच्चित्प्रकाशस्वरूपमेकैकमेवात्मद्रव्यं सिध्यति ततश्चाज्ञानस्य चित्तधर्मतया अज्ञानकार्यं धर्मादिकं तत्कार्यं चेच्छासुखादिकमपि चित्तस्यैव सामानाधिकरण्यप्रत्यासत्तो लाघवादिति भावः । चित्तस्यैव स्वग्राहकतया सदाज्ञातविषयकत्वं चित्तभोक्तृसिद्धमित्याशङ्कानिरासकं सूत्रान्तरमवतारयति । स्यादाशङ्केति । वैनाशिकानां चित्तात्मवादिनामिति शेषः । चित्तमेव स्वस्य विषयस्य च प्रकाशकमग्निवद्भविष्यति कृतमपरिणामिनान्येनेत्याशङ्का वैनाशिकानां स्यादित्यर्थः । अत्राग्निचित्तयोः साधारणं प्रकाशकत्वम् अखण्डोपाधिः प्रकाश इति व्यवहारहेतुः स्वाभासतारूपसाध्ये प्रवेशनीयः । तेनाग्निचेतनयोरेकरूपप्रकाशाभावेपि न क्षतिः । तथा च श्रुतिस्मृत्योरपि आत्मनि नान्यादित्यादिदृष्टान्तानुपपत्तिरिति तामिमामाशङ्कां सूत्रेण परिहरति ।

न तत्स्वाभासं दृश्यत्वात् ॥ १९ ॥

व्याचष्टे । यथेतराणीति । अन्तःकरणस्यैकत्वाच्चित्तमेव मन इत्युक्तवान् । अत्रायं प्रयोगः । चित्तं न स्वाभासं स्वगोचरवृत्त्यभावकाले न स्वप्रकाश्यं दृश्यत्वात् इन्द्रियशब्दादिवदिति । तथा च स्वगोचरवृत्त्यभावकाले चित्तभानार्थं पुरुषः सिध्यतीति भावः । वृत्तिभानार्थं नियमेन वृत्तिकल्पने चानवस्थां सूत्रकार एव वक्ष्यति स्वप्रकाश्यत्वं च पुरुषे प्रसिद्धम् । पुरुषस्य स्वज्ञेयतायाः प्रागुक्तत्वेन व्यभिचारः स्यादतः साध्ये काल इत्यन्तम् ।

अन्यादौ च स्वभासत्वमेव नास्तीति वक्ष्यति । अतो न तत्रापि व्यभिचारः दृष्टान्ते च सर्वदैव स्वप्रकाश्यत्वाभावोऽस्तीति । अत्र च कर्मकर्तृविरोधो विपक्षबाधकस्तर्कः कर्मकर्तृविरोधे च स्वस्मिन्स्वसंयोगानुपपत्तिस्तर्कः । तथा च वक्ष्यति । प्रकाशश्चायं प्रकाश्यप्रकाशसंयोगे दृष्टो न स्वरूपेऽस्ति संयोग इति । तथा परसमवेतक्रियाफलभागित्वरूपकर्मत्वं न क्रियाश्रये कर्तरि संभवतीति । आधुनिकवेदान्तिब्रुवास्तु चित्तादिकं न द्रष्टृ दृश्यत्वादित्येवं प्रयुञ्जते । पुरुषस्तु कर्मकर्तृविरोधाद्दृश्य एव न भवति पुरुषगोचरस्तु व्यवहारः पुरुषसत्तैव पुरुषेण भवति प्रकाशगोचरव्यवहारे प्रकाशान्तरानपेक्षादर्शनादित्याहुः । तन्न । चित्तवृत्तावप्येवं परैर्दृश्यत्वस्य सुवचतया चित्तातिरिक्तपुरुषसिद्ध्यनुपपत्तेः । वृत्तिगोचरव्यवहारस्यापि स्वरूपसत्त्या वृत्त्यैव वक्तुं शक्यत्वात् प्रकाशगोचरव्यवहारमात्रे प्रकाशानपेक्षेत्येव हि दृष्टं तत्र चित्तं वा पुरुषो वेति न कश्चन विशेषः । अपि च स्वप्रकाशं निरञ्जनमित्यादिश्रुतिस्मृत्युक्तं स्वप्रकाशत्वमप्यदृश्यत्वे सति पुरुषस्य यथाश्रुतं नोपपद्येत यौगिकार्थत्यागात् । किं च पुरुषनिष्ठफलाजनकत्वेनात्मतत्त्वाकारा चित्तवृत्तिः प्रमाणमेव न स्यादित्यादिदोषप्रसक्तिरिति । कर्मकर्तृविरोधस्तु पुरुषस्य ज्ञेयत्वेऽपि नास्ति चेतनप्रतिबिम्बितबुद्धिवृत्तिव्याप्यत्वरूपस्यैव ज्ञेयत्वस्य परादिवदेव बुद्धिवृत्त्यारूढरूपो दृश्यो दर्पणारूढमुखवत् केवलस्तु द्रष्टेति प्रकारभेदात्कथं कर्मकर्तृविरोध इति दिक् । कर्मकर्तृविरोधस्तु बौद्धमत एव भवति चित्तातिरिक्तद्रष्ट्रनभ्युपगमेन करणान्तरानभ्युपगमेन च द्रष्टरि साक्षादेव स्वप्रतिबिम्बादेरनुपपत्तिरिति चित्तस्य स्वाभासत्वेऽग्निवदिति परोक्तदृष्टान्तस्यासिद्धिमाह । न चाग्निरत्रेति । अत्र स्वाभासत्वे न ह्यग्निरिति यत्राग्निः पूर्वं तमसा पिहितः पश्चादात्मानं प्रकाशयतीति क्व विदृष्टं स्यात्तदाग्नेः स्वप्रकाश्यत्वं पुरुषस्येव सिद्ध्येत् तदेव तु नास्तीत्यर्थः । ननु पुरुषोऽपि प्रकाशस्वरूप एव सर्वदा तमस्तु बुद्धिवृत्तेरेव प्रतिबन्धकमिति चेत्सत्यम् । तथापि बुद्धिवृत्त्यावरणाभावकाले स्वात्मानमविषयीकृत्य करणकाले विषयीकरोतीत्यधमविषये विशेषोऽस्त्येवातः प्रकाशस्वरूपतादिसाम्येऽपि पुरुषः स्व-

प्रकाश्यो नाग्निरिति न केवलं प्रमाणाभावादेवाग्नेः स्वप्रकाश्यत्वाभावोऽपि तु प्रकाश्यत्वव्यवहारकारणाभावादपीत्याह । प्रकाशस्यायमिति । प्रकाशोत्र प्रकाश्यत्वव्यवहारो ऽन्यथा प्रकाशसंयोगस्यैव प्रकाश्यत्वरूपतया तस्य संयोगजन्यत्वानुपपत्तिरिति संयोगे प्रतिबिम्बसाधारणसंबन्धो यदि चाग्नेः साक्षादेव स्वप्रतिबिम्बादिरिष्यते तदा दृष्टविरोध इतिभावः । अग्नेः स्वप्रकाशत्वं तु प्रकाशान्तरनैरपेक्ष्येण स्वत एव प्रकाशरूपत्वं घटादयस्तु प्रकाशसंबन्धादेव प्रकाशन्ते अग्निदृष्टान्तेन चेदृशमेव स्वप्रकाशत्वं पुरुषस्य शास्त्रेषूच्यते चित्ताद्विवेकाय चित्तस्य हि प्रकाशः पुरुषोपाधिक एव अयसो दग्धृत्ववदिति । यत्तु अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वं स्वप्रकाशत्वमित्याधुनिकवेदान्तिब्रुवाणां प्रलपनं तत्प्रागेव निराकृतम् । विस्तरतस्तु ब्रह्ममीमांसायामपीति दिक् । नन्वेवमप्रकाश्यत्वरूपमेव स्वाभासत्वं चित्तस्यास्माभिरभ्युपेयं तथा चाग्निदृष्टान्त उपपन्नः स्यात्तत्राह । किं चेति । अन्वार्थः स्वाभासशङ्कार्थः संभवतीति शेषः । एवं च सतीदं दूषणमित्याह । स्वबुद्धिप्रचारेत्यादिना । बुद्धेः प्रचारो वृत्तिः तस्याः संवेदनात् क्रोधाद्यनुभवात् तद्धानार्थं सत्त्वानां प्राणिनां प्रवृत्तिर्दृश्यते तच्च स्वबुद्ध्यग्रहणे युक्तं न भवतीति बुद्धेर्ग्राह्यत्वमवश्यं वक्तव्यमित्यर्थः । नन्वहं क्रुद्ध इत्यादिप्रत्यये पुरुषस्यापि ग्रहणात् स्वाभासत्वं न स्यादिति चेत्सत्यम् । अग्राह्यत्वरूपस्य स्वाभासत्वस्य पुरुषेप्यनङ्गीकारादिति । यद्यप्यादौ क्रोधादीनां स्वरूपतो निर्विकल्प एव बोधः पौरुषेयो भवति क्रुद्धोहमित्यादिस्तु अहंकारस्यैव व्यक्तिपुरुषस्य भ्रान्तत्वात् कूटस्थतया बुद्धिवृत्त्याकारातिरिक्ताकारासंभवाच्च तथापि पौरुषेयेण क्रोधनिर्विकल्पेन जनिता क्रुद्धोहमिति यान्तःकरणस्य विशिष्टवृत्तिस्तत्साक्षिको बोधश्च तद्ग्राह्यत्वेनैवात्र चित्तस्याग्राह्यत्वं प्रतिषिध्यते क्रोधादीनां पौरुषेयनिर्विकल्पकस्य शब्दागोचरत्वेनोपन्यस्तुमशक्यत्वात् पुरुषसाधकं तु चित्तग्रहणं वृत्तिगोचरनिर्विकल्पकमनुमानगम्यमेव तस्य हि चित्तधर्मत्वं संभवति नियमेन सर्ववृत्तिगोचराया अन्यनिर्विकल्पकधारायाः स्वीकारे ऽनवस्थापत्तेः । अज्ञातवृत्तिस्वीकारे च क्रुद्धोहं न वेत्यादिसंशयाद्यापत्तेः । क्रोधादिगोचरनित्य-

Digitized by Google

निर्विकल्पकैकज्ञानस्वीकारे च विशिष्टप्रत्यक्षसामग्र्या बलवत्याः प्रतिबन्धात् संशयाद्यभावः । संप्रज्ञातयोगेऽपि वृत्तिः स्वरूपतो भासत एवेत्यभ्युपेय-मिति । चित्तस्य स्वाभासतावादिमते तन्मतमालम्ब्यैवान्यदूषणमाह ।

एकसमये चोभयानवधारणम् ॥ २० ॥

सूत्रार्थमाह । न चेत्यादिना युक्तमित्यन्तेन । न च नाप्येकस्मिन्नु-त्पत्तिक्षण एव स्वपरावधारणं युक्तं पूर्वं सत एव प्रत्यक्षगोचरत्वात् स्वस्य च प्रागसत्त्वादित्यर्थः । नन्वेवं स्वोत्पत्त्यनन्तरं स्वग्रहणमस्तु तत्राह । क्षणिकेति । क्षणिकवादिमते या वस्तुन उत्पत्तिः सैव क्रिया तस्य कार्यं सैव च तस्य कर्त्रादिकारकवर्गः तन्मते सर्ववस्तूत्पत्तिमात्र-फलकं निर्हेतुकं स्वयमेव भवतीति सिद्धान्तः । तथा चोक्तं 'भूतिर्येषां क्रिया सैव कारकं सैव चोच्यत' इति । अत्र उत्पत्त्यनन्तरं चित्तस्य स्वग्रहणार्था क्रिया न संभवतीत्यर्थः । अस्मन्मतेऽपि शब्दबुद्धिकर्मणां विरम्य व्यापारा-भावादेकस्या वृत्तेर्द्व्यर्थग्राहकत्वं न संभवतीति भावः । उत्तरसूत्रमवतार-यति । स्यान्मतिरिति । मतिरभ्युपगमः । ननु स्वाभासशब्देन स्वसंतान-भास्यत्वं वक्तव्यं तथा च स्वरसेन विनाशस्वभावेन निरुद्धं नष्टमपि चित्तमुत्तरोत्तरमुत्पद्येन चित्तान्तरेण ग्राह्यमित्यभ्युपगमः स्यादिति कर्मकर्तृ-विरोधादिदोष इत्यर्थः । तत्र सिद्धान्तसूत्रम् ।

चित्तान्तरदृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसंकरश्च ॥ २१ ॥

वृत्तिरूपचित्तान्तरेण वृत्तिरूपचित्ते दृश्येऽभ्युपगम्यमाने तु बुद्धिबुद्धे-र्वृत्तिवृत्तेरतिप्रसङ्गो ऽनवस्था । एतद्व्याचष्टे । यथेति । बुद्धिबुद्धिश्चित्तगोचरं चित्तं परेषां वृत्त्यतिरिक्तचित्ताभावेन वृत्तिचित्तयोः पर्यायत्वात् । ननु नेयमनवस्था सर्वमेव चित्तं ग्रहीतव्यमिति नियमाभावादिति चेन्न । वृत्तेर-ज्ञातसत्ताङ्गीकारे जानामि न वेत्यादिसंशयापत्तेः । योग्यानुपलब्ध्या ज्ञाना-द्यभावप्रत्यक्षानुपपत्तेश्च । किं च मा भवत्वनवस्था वृत्तिगोचरानन्तवृत्ति-कल्पनागौरवं त्वपरिहार्यमेव । अस्माभिर्लाघवेन सकलवृत्तिगोचरैकविभु-ज्ञानकल्पनादिति । एतेन चित्तनित्यत्वाभ्युपगमिनामपि न्यायवैशेषिका-

चामुत्तरोत्तरज्ञानेन पूर्वपूर्वज्ञानग्रहणकल्पना परास्ता अनवस्थागौरवाभ्यामितिमन्तव्यम् । अतिप्रसङ्गं व्याख्याय स्मृतिसंकरं व्याचष्टे । स्मृतिसंकरश्चेति । बुद्धिबुद्धेरिति शेषः । संकरशब्दार्थमाह । यावन्त इति । विषयानुभवकाले ज्ञानधारा जातेति विषयस्मृतिकालेपि अनन्तानां तज्ज्ञानानां स्मृतिरेकदैव भविष्यति । घटो मया पुरा ज्ञातो घटज्ञानं तज्ज्ञानं चेत्येवमनन्ताकारः सोयं स्मृतिसंकरः प्राप्त इत्यर्थः । अस्मन्मते च पौरुषेयबोधस्य नित्यतया निर्विकल्पमात्रतया च न स्मृतिहेतुत्वमिति । नन्वेतादृशसंकरे को दोष इति तत्राह । तत्संकराच्चेति । संकराभ्युपगमे च घटो मया ज्ञात इत्येकमात्राकारस्मृत्यनुभवो न स्यादित्यर्थः । अन्यान्यपि दूषणानि सूचयन्नास्तिकमतं तिरस्करोति । एवं बुद्धीति । सर्वं बन्धमोक्षधर्माधर्मादिव्यवस्थादिकम् । तदेवं चित्ताद्विविच्य मोक्षो व्यवस्थापितः चित्तस्य च स्वाभासत्वं निराकृतम् । इदानीं परेषामिष्टोक्तात्मतत्त्वावधारणस्य स्वाभ्युपगमविरोधेनाप्यन्यायतामाह । ते त्विति । भोक्तृस्वरूपं न न्यायेन संगच्छन्ते न्यायविरुद्धा इत्यर्थः । तेषां विज्ञानवादशून्यवादश्चेति मुख्यं मतद्वयं तत्रादौ विज्ञानवादिनां क्षणिकत्वाभ्युपगमविरोधान्न्यायविरुद्धत्वं दर्शयति । के चिदिति । सत्त्वमात्रं क्षणिकविज्ञानरूपं चित्तमात्रं परिकल्प्य स्वीकृत्य तस्यैव मोक्षं वदन्ति । अस्ति स सत्त्वविशेषो य एतान् सांसारिकान् पञ्च स्कन्धान् हित्वा अन्यांश्च पञ्चस्कन्धान् युक्तोऽनुभवतीति ततश्च तत एव स्वाभ्युपगमात् पुनस्त्रस्यन्ति चित्तस्यैर्यापत्त्येत्यर्थः । अतो न्यायविरुद्धास्तइति, पञ्चस्कन्धाश्च विज्ञानवेदनासंज्ञानरूपसंस्काराख्याश्चित्तस्यैव शाखाभेदा न तु चित्ताद्भिन्नाः । तत्र विज्ञानं विषयानुभवः वेदना दुःखं संज्ञारूपे शब्दार्थाविति यावत् संस्कारो वासना एतेष्वेषामपि सुखादीनां प्रवेश इत्यखिलं वस्तु चित्तमेवेति शून्यवादेष्याह । तथेति । तथान्ये के चित् स्कन्धानां महानिर्वेदाय महानिर्वेदाख्यवैराग्यायापुनर्जन्मरूपप्रशान्तये च जीवन्मुक्तस्य गुरोरन्तिके ब्रह्मचर्यं ब्रह्माभ्यासं साक्षात्कारपर्यन्तं करिष्यामीत्युक्त्वा शिष्यतामापन्ना नास्तिका गुरूपदेशात् सत्त्वस्याहंशब्दार्थस्यापि सत्तामपलपन्ति शून्यवा-

द्विमो भवन्ति इत्यर्थः । तेपि न्यायविरुद्धा भोक्तुः सत्त्वस्यापलापेन स्वाभिप्रेतस्य मोक्षस्याहंशब्दार्थस्य ब्रह्मणयाद्दीनां वा सत्तास्वीकारात् सेयमुक्तिरुस्वविस्मृति कथं मूढा न लज्जयतीति । एतेनाधुनिकवेदान्तिब्रुवा अपि न्यायविरुद्धा मन्तव्याः । तेपि हि मोक्षार्थं गुरुमुपासका ब्रह्मातिरिक्तं सर्वं शुक्तिरजतवदत्यन्ततुच्छमिति गुरूपदेशान्मोक्षतत्साधनादिकमेवापलपन्तीति । अपि चोपदेशानन्तरमक्षतसाक्षात्कारस्य मननादिसाधनानुष्ठानाभ्युपगमेऽपि तेषां न न्याय्यो ऽसतोपदेशेन फलतत्साधनेषु सर्वेष्वेवाविश्वासात् । अप्रवृत्त्या कृतेनापि फलानुदयाच्च । किं बहुना श्रुत्यादिप्रामाण्यबाधनेन ज्ञानप्रामाण्यसंशयाख्याहितेः संशये योगान्तेपि ब्रह्मणि स्यात् । न च स्वप्रकाशतया ब्रह्मणि न प्रमाणापेक्षेति वाच्यम् । प्रकाशतस्तस्य तत्सिद्धेः कर्मकर्तृविरोधादितिसांख्यसूत्रोक्तदोषात् स्वाभ्युपगतश्रवणादिवैयर्थ्यापत्तेश्च मोक्षसाधनविषयस्य विवेकस्यास्वप्रकाशत्वाच्च । यत्तु अवेद्यत्वेपि प्रत्यक्षव्यवहारयोग्यत्वं स्वप्रकाशत्वमिति प्रलपनं तत् शशशृङ्गवन्नन्तश्यम् । वेदनस्य व्यवहारं प्रति सामानाधिकरण्येन हेतुत्वात् द्रष्टव्यत्वादिश्रुतिविरोधाच्चेति । सैषातिनास्तिकता दृश्यतेपि बहिर्मुखानां यतिमानिनामिति । आधुनिकानां वेदान्ते विवर्त्तवादो यथा यथा विचार्यते तथा तथा न्यायविरोधेन सिकतासेतुवद्विदीर्यते । स्वमते तु नास्त्ययं न्यायविरोधः मोक्षभागिनोऽहंशब्दार्थस्य भोक्तुः स्थिरस्य स्वीकारादित्याह । सांख्ययोगादयस्त्विति । आदिशब्देन ब्रह्ममीमांसादयो ग्राह्याः । प्रकृष्टा वादाः प्रवादाः स्वशब्देनाहं स्वमात्मेत्यादिशब्दजातेन न त्वन्यः । कथमन्यस्यात्माहमित्यादिवृत्तिगोचरः स्यात्तत्राह । चित्तस्य स्वामिनमिति । स्वामी ह्यात्मा लोके व्यवह्रियते यच्चाप्नोति यदादत्ते इत्यादिश्रुतेश्चेति । अपरिणामिनि यथेष्टविनियोक्तृत्वाभावात् कथं स्वामित्वं तत्राह । भोक्तारमिति । अत्र च स्वतोऽपि पुरुषस्य भोगोस्तीत्यवधारणीयम् ।

(शेषमये)

काशीस्थराजकीयप्रधानपाठशालायां { सांख्ययोगाध्यापकस्तात्याशास्त्रपरनामा । पटवर्धनोपाह्वो रामकृष्णशास्त्री ज्योतिषशास्त्राध्यापकः केशवशास्त्री च ।

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page 527. Vol. VI.*)

उणादिवृत्तौ त्विषु इच्छायामिति तौदादिकस्य निपातनमुच्यते एषु इति ह्रस्वादिः । तन्मतेयमुञ्छार्थः । परस्मैपदिषु इषु गताविति दिवादौ,वयमिच्छार्थः तुदादौ । आभीक्ष्ण्यार्थः क्र्यादौ ॥ ६०१ ॥

भाष व्यक्तायां वाचि ॥ भाषते । बभाषे । भाषिता । भाषिष्यते । बाभाष्यते । बाभाष्टि । भाषयति । अबभाषत् । अबीभषत् । आजभासेत्युपधाह्रस्वविकल्पः । भाषकः । निन्दहिंसेत्यादिना वुञ् ताच्छीलिकः ॥ ६०२ ॥

वर्ष स्नेहने ॥ दन्त्योष्ठ्यादिः । वर्षते । ववर्षे । वर्षिता । विवर्षिषते । वावर्ष्यते । वावर्ष्टि । लङि तिप्सिपोरवावर्ट् । 'रात्सस्ये'ति नियमाच्च संयोगान्तलोपः । वृषु सेचनइत्ययं परस्मैपदी । शक्त्यर्थश्चुरादौ ॥ ६०३ ॥

गेषृ अन्विच्छायाम् ॥ ग्लेषृ इति मैत्रेयः । अन्विच्छान्वेषणम् । गेषते । जिगेषे । गेषिता । जिगेषिषते । जेगेष्टि । जेगेष्टः । गेषयति । अजिगेषत् । ऋदित्त्वाच्चोपधाह्रस्वः ॥ ६०४ ॥

एषृ प्रयत्ने ॥ एषतइत्यादि ॥ ६०५ ॥

जेषृ णेषृ एषृ प्रेषृ गतौ ॥ जेषते । नेषते । प्रणेषते । एषते । एषां चक्रे । एषिता । एषिष्यते । एष्ययति । मा भवानेषिषत् । प्रेषते ॥ ६०६ ॥

रेषृ ह्रेषृ अव्यक्ते शब्दे ॥ रेषते । अयं स्वभावाद्वृकविषयः । ह्रेषते । अयमश्वविषयः ह्रेषृ इति सरेफश्चायं द्रष्टव्यः । यदाह केशवस्वामी । कोकेर्दतीति पर्दते गुदरवे रेषेति वार्के हसे बुक्केति श्वरवे भषेति हयजे ह्रेषेति हेषेति चेति । तथा हेषा ह्रेषा च निःस्वने इत्यमरः ॥ ६०७ ॥

कासृ शब्दकुत्सायाम् ॥ कासते । कासां चक्रे । कास्प्रत्ययादित्याम् । कासिता । कासिष्यते । कासताम् । अकासत । कासेत । कासिषीष्ट । अकासिष्ट । चिकासिषते । चाकास्यते । चाकास्ति । लोटि हेर्धिभावे 'धि

चे'ति सलोपे बाकाधि॥ न च 'धि चेत्यत्र भाष्ये सिजपेक्ष्यते। तर्हि तिपि हल्ङ्यादिलोपे प्रत्ययलक्षणेन तिप्परत्वात् 'तिप्यनस्तेरि'ति अस्तिवर्जितस्य सान्तस्य पदस्य तिपि परे दकार इति दकारे तस्य चर्त्वे ऽचकात्। सिपि तु 'सिपि धातोरुर्वे'ति सान्तस्य अस्तिवर्जितस्य धातोः पदस्य पक्षे रुत्वे अचकाः इत्यपि भवति । कासयति । अचकासत् । ऋदित्त्वाच्चोपधाह्रस्वः। कासः। 'हलश्चे'ति संज्ञायां घञ् । कासारः । शीकादिकौ बाहुलकादारः । कासूः शक्तिः । कासूतरी । 'कासूगोणीभ्यां ष्टरजि'ति अल्पत्वे द्योत्ये ष्टरच् । षित्त्वात् ङीष् । अस्मादेव निर्देशादूकारप्रत्ययः। कसतीति ज्वरादौ गत्यर्थः। कस इति गतिशासनयोरादादिकस्य तत्रान्ये निदित्यादिना कः कसूः इत्याहुः। अन्ये तु तालव्यान्तं पठन्तः कष्टइति ॥ ६१० ॥

भासृ दीप्तौ ॥ भासते । इत्यादि कासिवत्। भासयति। अबीभसत्। अबभासत्। भाजभासेत्युपधाह्रस्वविकल्पः। एवं चास्य ऋदित्त्वं तद्व्मात्रफलम् । अनुबन्धान्तराकरणं तु प्रकरणानुरोधात् । भास्वरः स्थेशभासेत्यादिना तच्छीलादौ वरच्। भाः। भासौ। भासः। भ्राजभासेति ताच्छीलिकः कर्तरि क्विप् ॥ ६११ ॥

णासृ रासृ शब्दे॥ नासते। प्रणासते। रासतइत्यादि कासिवत्। नासा । अकारः । नासिका संज्ञायां कनि 'केण'इति ह्रस्वः। प्रत्ययस्थादितीत्वम् । नासायां भवं तस्यै हितं नास्यम् । 'शरीरावयवाद्य'ति यत् । नासिकाशब्दात्तु यति 'नस् नासिकाया यत्तस्क्षुद्रेष्वि'ति नसभावे नस्यमिति। एवं नस्तो नःक्षुद्र इत्यादि। आद्यादिभ्य उपसंख्यानमिति सार्वविभक्तिकस्तसिः। 'अपादाने चाहीयरुहोरि'ति वा अपादाने या पञ्चमी तदन्तात्स्वार्थे तसिः। हीयरुहोः प्रयोगे नेति नःक्षुद्र इत्यत्र नासिकयाक्षुद्र इति पूर्वसदृशेत्यादिना समासस्तृतीयायाः। तत्र ऊन इत्यर्थग्रहणम्। नासिक्यो वर्णः। नासिक्यं नगरमित्यत्र यति 'वर्णनगरयोर्ने'ति नसभावप्रतिषेधः वाध्रीव नासा यस्य वाध्रीणसः। अत्रविशेषः। 'अञ् नासिकायाः संज्ञायां नसं चास्थूलादि'ति नासिकान्ताद्बहुव्रीहेः संज्ञायामच्

समासान्तः । नासिकायाश्च नसादेशः । अस्थूलादिति स्थूलनासिक इत्य-त्राऽनसभावो न भवतः । खुरणाः 'खुरखराभ्यां नस् वक्तव्य' इति नस्-भावः । आदेशान्तकरणं प्रत्ययानिवृत्त्यर्थमिति कैयटपदमञ्जर्यादौ । अत्र वृत्तावप्युपीष्यत इति तेन खुरणसः खरणस इत्यपि भवति । प्रगता नासिका अस्य प्रणसः । उपसर्गाच्च ॥ उपसर्गपूर्वनासिकान्ताद्बहुव्रीहेरच्-प्रत्ययः नासिकायाश्च नसभावः 'उपसर्गाद्बहुलमि'ति उपसर्गस्थान्निमित्ता-त्परस्य नसो नकारस्य णत्वम् । उभयत्रोपसर्गग्रहणं प्रादयुपलक्षणार्थम् । विगता नासिका अस्य विग्रः । 'वेर्ग्रो वक्तव्य'इति ग्रादेशो नासिकायाः । यद्यहं नाथनीयास्मि विनसा हतबान्धवा इति भट्टिप्रयोगे विशेषविहि-तेन ग्रादेशेन भाव्यमिति मन्वानो न सहन्ते । के चित्तु वार्त्तिकं वेः खो वक्तव्य इति पठन्तो विख इति उदाहरन्ति । तुङ्गनासिका । 'नासिकोदरो-ष्ठजङ्घादन्तकर्णशृङ्गाच्चे'ति नासिकाद्यन्ताद्बहुव्रीहेर्वा ङीष् । रासः । क्रीडा-विशेषः । रासभः । 'रासिवल्लिभ्यां चे'ति अभच् । रास्ना । रास्नासास्नास्थूणा-वीणा इति नप्रत्यये निपातितः ॥ ६१३ ॥

णस कौटिल्ये ॥ नसते । प्रणसते । नेसे । नसितेत्यादि । नास-यति । अनीनसत् ॥ ६१४ ॥

भ्यस भये ॥ भ्यसते । बभ्यसे । भ्यसिता । भ्यसिष्यते । बाभ्य-स्यते । बाभ्यस्ति । भ्यासयति । अबिभ्यसत् । बाभ्यधि इत्यत्र हेर्धि-भावे 'धि चे'ति सलोपस्तस्यासिद्धत्वादतो हेरिति लुक् न भवति । एवं नसेरपि नानधि इति भवति ॥ ६१५ ॥

आङः शसि इच्छायाम् ॥ आङः शसितिप्रयोगादयमाङ्पूर्व एव प्रयोक्तव्यः तथा च काश्यपः । अयमाङः पर एव प्रयोक्तव्य इति संमतायां न च केवलो नाप्युपसर्गान्तरपूर्व इति । आशंसते । आशशंसे । आशं-सिता । आशिशंसिषते । आशाशंस्यते । इदित्त्वान्नुम् नलोपाभावश्च । आशाशंस्ति । आशाशन्धीत्यत्र 'धि चे'ति सलोपेनुस्वारपरसवर्णौ । लङि तिप्सिपोर्हल्ङ्याब्भ्यादिलोपे संयोगान्तलोपे चाशाशन् । आशंसयति । आश-शंसत् । आशंसुः । 'सनाशंसभिक्ष उरि'त्युप्रत्ययः । आशंसितः । आशं-

स्यप् । भावस्य । लवो ल्यप् । मैत्रेयस्तु नोपधमनिदितं पठति । स्वामी च । तेषां नलोपाभावे विशेषः । शंस स्तुतावित्यत्र परस्मैपदिषु। आङः शासु इच्छायाम् । शासु अनुशिष्टाविति तुयमदादौ ॥ ६१६ ॥

ग्रसु ग्लसु अदने ॥ ग्रसते । जग्रसे । ग्रसितेत्यादि पूर्ववत् । ग्रासयति पिण्डं देवदत्तः । निगरणार्थत्वाच्चित्यं परस्मैपदम् । प्रयोज्यस्य कर्मत्वं च । ग्रसित्वा । ग्रस्त्वा । उदित्त्वादिड्विकल्पः । ग्रस्तः । 'ग्रस विभाषे'ति अनिट्त्वम् । ग्रास्यतइति ग्रासः कवलः । पिण्डं ग्रसते पिण्डग्रः अत्वसन्तेति दीर्घोऽधातोरिति प्रतिषेधाच्च भवति । ग्रसिष्णुरिति हेलाराजीये लिङ्गनिर्देशे प्रयुज्यते । भुवश्चेत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वात् भ्राजिवद्विबोध्यः । अत एव भुवश्चेत्यत्र वृत्तौ चकाराद् भ्राजेश्च भाषायामिति चशब्दः क्रियते । एवं ग्लसतीत्यादि ॥ ६१८ ॥

ईह चेष्टायाम् ॥ ईहते । ईहां चक्रे । ईहिता । ईहिष्यते । ईहताम् । ऐहत । ईहेत । ईहिषीष्ट । ऐहिष्ट । ईजिहिषते । ईहयति । मा भवानीजिहत् । ईहा । ऐही । पर्यैही । आङ् पूर्वाच्चेनन्तात् शार्ङ्गरवादिपाठान्ङीन् ॥ ६१९ ॥

बहि महि वृद्धौ ॥ बंहते । बबंहे । बंहिता । बंहिषीष्ट । बिबंहिषते । बाबंह्यते । इदित्त्वान्नुम् । नलोपाभावः । बाबण्ढि । झलि पदान्ते च 'हो ढ' इति हकारस्य ढकारः । 'झषस्तथोर्धोऽध' इति तकारस्य धकारे 'ष्टुना ष्टु'रिति ष्टुत्वे 'ढो ढे लोप' इति पूर्वस्य लोपः । अत्र ष्टुत्वे आश्रयात् सिद्धेनकारस्यानुस्वारपरसवर्णौ । बाबण्ढः । बाबंहति । बाभण्ढि । ढत्वे 'एकाचो बशो भष् झषन्तस्य स्ध्वोरि'ति बकारस्य भष्भावेन भकारः । 'षढोः कस्सी'ति कत्वम् । बाबंक्षि । बाबंहुः । लङि तिप्सिपोर्ढत्वात् पूर्वं हल्ङ्यादिलोप इति झषन्तत्वाभावान्न भष्भावः । बंहयति । अबबंहत् । एवं मंहतइत्यादि । अयं भाषार्थेश्चुरादाविति स्वामी । मह पूजायामिति इहैवाग्रे परस्मैपदिषु । महीयतइत्यादि महीङितिकण्ड्वादिपाठात् ॥ ६२१ ॥

अहि गतौ ॥ अंहते । आनंहे । अंहिता । अञ्जिहिषति । 'कुहोश्चु'रिति हकारे 'अभ्यासे चर्चे'ति जश्त्वेन जकारे मकारस्यानुस्वारपरसवर्णौ । अंहयति । आञ्जिहत् । अंहः । अकुत् । चुरादौ भाषार्थः ॥ ६२२ ॥

गर्ह गल्ह कुत्सायाम् ॥ गर्हते । जगर्हे । गर्हिता जिगर्हिषते । जागर्ह्यते । जागर्हीतीत्यादि अंहिवत् । लङि तिप्सिपोर्हल्ङ्यादिलोपे 'रात्सस्ये'ति नियमात् संयोगान्तलोपाभावाद्धकारस्य ढकारे झलन्तत्वात् चर्त्वविषयत्वाच्च भष्भावे अजागर्ट् । प्रथमापुरुषेऽपि । गल्ह इत्यादि पूर्ववत् । यङ्लुकि तिप्सिपोर्लोपे संयोगान्तलोपे अजागल् ॥ ६२४ ॥

बर्ह बल्ह प्राधान्ये ॥ ओष्ठ्यादी । बर्हते । बल्हते इत्यादि । बर्हते सर्वेष्ववयवेषु प्रधानं भवति । बर्ह बर्हिणः । 'फलबर्हाभ्यामिनच्' इतीनच् । बर्ही मत्वर्थीय इनिः । इमौ भाषार्थौ चुरादौ । बर्हिर्हिंसायामपि तत्रैव, बृह विद्धावित्यत्रैवाये परस्मैपदिषु ॥ ६२६ ॥

वर्ह वल्ह परिभाषणहिंसाच्छादनेषु ॥ दन्त्योष्ठ्यादी । वर्हते । वल्हते । ववर्हे ववल्हे इत्यादि । अत्र धनपालमैत्रेयौ परिभाषणादावोष्ठ्यादित्वं चाहतुः । छादयत्यनेनेति बर्हः । घञिति वदन् शाकटायनोऽप्यत्रैवानुकूलः । यथाऽऽह तथा स्वामी । यदाह बर्हबल्हप्राधान्ये मुनिबर्हणमिति । एवं मुनिप्रबर्हा इति प्राधान्ये प्रयोग उपपद्यते । प्रवल्हिकेति च भाषार्थे । तदुक्तं पुरुषकारे प्रवल्हिका प्रहेलिकेति चात्रैवानुकूलं भाषाविशेषत्वात् । प्रवल्हेति । तथा बह्वृचब्राह्मणं प्रवल्हिकाः सति प्रवलिकाभिर्देवा असुरान् प्रवल्ह्यैनान्ययेतान् । व्याख्यातं चैतत् गोविन्दस्वामिना प्रवल्ह्य प्रकृतभाषया इति । यदुक्तं शाकटायनेन आच्छाद्यतेऽनेनेति बर्हः घञिति नैतदोष्ठ्यादित्वे साधकं सर्वेष्ववयवेषु प्रधानं भवतीत्येवं व्युत्पादितत्वात् । वृह उद्यमने चुरादौ ॥ ६२९ ॥

प्लिह गतौ ॥ प्लेहते । पिप्लिहे । पिप्लिहिषते । प्लिहित्वा । प्लेहित्वा । रलो व्युपधादिति विकल्पः । प्लेढा । 'श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्'ति कनिनन्तेषु

विपर्मतिलः । उणादिवृत्तौ तु स्निहन्शब्दपूर्वाद्धन्तेष्टिलोपे व्युत्पादितम् । यथा वयं तथा मैत्रेयः प्लीहानावित्यादौ हन्हन्पूर्वेति नियमो हन्शब्द-स्यानर्थकत्वाच्चेति भाष्यादौ स्थितम् ॥ ६२९ ॥

वेहृ जेहृ बाहृ प्रयत्ने ॥ आद्यौ दन्त्योष्ठ्यादिः । अन्त्यः केवलो-ष्ठ्यादिः । उभावपि केवलोष्ठ्यादी इत्येके । दन्त्योष्ठ्यादी इत्यन्ये । वेहते । जेहते । बाहत इत्यादि, ऋदित्वाण्णौ चङि ह्रस्वाभावः । अविवेहत् इत्यादि । वेहत् गर्भोपघातिनी गौः । संश्चत्कृपद्वेहदिति अतिप्रत्यये निपा-त्यते । गोवेहत् । पोटायुवतिस्तोकेत्यादिना कर्मधारयः । बाढा । अजन्तत्वाट्टाप्, बाढं, क्षुब्धेत्यादिना निष्ठायामिडभावो भृशार्थेऽन्यत्र बाहितम् । जेहितिर्गत्यर्थोऽपि उक्तं च रेणुभिर्जेहमानं भट्टभास्करी-यम् ॥ ६३२ ॥

द्राहृ निद्राक्षये ॥ द्राहते । निक्षेप इति केचित् । यङ्लुकि 'दादेर्धा-तोर्घ' इति झलि पदान्ते चेति हस्य घकारे झषस्तथोरिति धत्वे जश्त्वे च दाद्राग्धि । दाद्राग्ध इत्यादि । सिपि भष्भावेन दकारस्य धकारः । 'खरि च' इति धकारस्य चर्त्वे सिपः सकारस्य षत्वे दाधाक्षि । लङि हल्ङ्यादिना तिप्सिपोर्लोपः भष्भावजश्त्वचर्त्वेषु अदाधाक् ॥ ६३३ ॥

काशृ दीप्तौ ॥ काशते । चकाशे । काशिता । काशिष्यते । काशताम् । अकाशत । काशेत । काशिषीष्ट । अकाशिष्ट । अकाशिष्यत । चिका-शिषते । चाकाश्यते । चाकाष्टि । व्रश्चादिना षत्वे ष्टुत्वे चाकाक्षि । चाकाश्मि । चाकाश्वः । चाकाश्मः । चाकाड्ढीत्यत्र हेर्धिभावे व्रश्चा-दिना षत्वे ष्टुत्वे जश्त्वम् । लङि अचाकाट् । काशयति । अचकाशत् । काशः । अचि घञि वा । नीकाशः । 'इकः काशे' इति इगन्तस्योपसर्गस्य काशउत्तरपदे दीर्घः । काशिः । काशी । क्तिचन्तत्वात् वा ङीष् । काशिषु भवा काशिका । 'काश्यादिभ्यष्ठञ्ञिठावि'ति शैषिकौ ठञ्ञिठौ । ठञि टिड्ढेति ङीप् । काशिकी । काष्ठम् । हनिकुषिनीरमिकाशिभ्यः क्थन्निति क्थन् । आकारोपधप्रकरणादयमिह पठितः । अयं दिवादौ च काश

र्वतिशासनयोरित्यादादौ । अन्ये दन्त्यान्त्यमिदितं पठन्ति । अनिदित्‍मपरे ॥ ६३४ ॥

ऊह वितर्के ॥ वितर्कः संभावनम् । ऊहते । ऊहां चक्रे । ऊहिता । ऊहिष्यते । ऊहताम् । औहत । ऊहिषीष्ट । औहिष्ट । ऊजिहिषति । ऊहयति । औजिहत् । समूहति । समूहते । 'उपसर्गादस्यत्यूह्योर्वावचन'-मिति उपसृष्टादस्मात्परस्मैपदम् । समुह्याद्वित्यत्र किदाशिषीति कित्त्वे 'उपसर्गाद्ध्रस्व ऊहते'रिति यकारादौ क्ङिति ह्रस्वः । एवं यकापि समु-ह्यतइति । यद्यप्युपसर्गादस्यत्यूह्योरिति वार्त्तिकमकर्मकाधिकारपठितं तथापि वृत्तिकैयटादौ सकर्मकसाधारणमुक्तम् । अनुत्तमप्यूहति पण्डितो जन इति प्रयोग आङ्पूर्वस्येति सुधाकरः । एवं च सति ओहतीति गुणः पठितव्यः । ओह्यतइत्यत्रान्तादिवद्भावेनोपसर्गात्परत्वेनो'पसर्गाद्ध्रस्व ऊह-ते'रिति ह्रस्वो न भवति । उभयतश्चाश्रये नान्तादिवद्भाव इति वचनात् । यद्वाचाण इति वर्त्तते स च सामर्थ्यात्पूर्वेण णकारेणेति ह्रस्वाप्रसङ्गः । एवं च समोह्यतइत्यादावप्यादिवद्भावे ह्रस्वो न भवति ॥ ६३५ ॥

गाहू विलोडने ॥ गाहते । जगाहे । जघाढे । 'धासः से' झलि 'हो ढ' इति ढत्वे भष्भावे कत्वम् । ध्वमि ढत्वभष्भावयोः ष्टुत्वे ढलोपः । आर्द्धधातुकनियमस्य प्रतिषिद्धविषयत्वादिट्पक्षे जगाहिध्वेत्यादि । गाढा । गाहि-ता । घाक्ष्यते । गाहिष्यते । गाहताम् । अगाहत । गाहेत । गाहिषीष्ट । अगाढ । अघाक्षाताम् । अघाक्षत । अगाढाः । अघाढ्वम् । अघाक्षि । झलादौ सिज्लोपे ढत्वधत्वष्टुत्वढलोपाः । प्रत्ययलक्षणेन सादिप्रत्ययपर-त्वाद्भष्भावो नाशङ्क्यः सिज्लोपस्य प्रत्ययलक्षणे पूर्वत्रासिद्धत्वात् अत एव सिद्धत्वात्सिज्लोपात्पूर्वं न भष्भावः ध्वमि तु परत्वाद्भष्भावः । इट्-पक्षे अगाहिष्टेत्यादि । जिघाक्षते । जिगाहिषते । जागाह्यते । जागा-ढि । गाहयति । अजीगहत् । गाढ्वा । गाहित्वा । गाह्य । गाहः गाह-इति पचादौ पाठात् । टित्वात् स्त्रियां गाही । गह्वरम् । छित्वरेत्या-दिवरचि ह्रस्वे निपात्यते । उणादिवृत्तौ तु गाधतेर्निपातनमुक्तम् ।

गहनं करोति गहनायते । सत्रकक्षेत्यनेन कण्वचिकीर्षायां क्यङ् । कण्वं पापं सत्रादयश्च वृत्तौ पापवचना इति हरदत्तादिभिरुक्तमत्रैव वार्त्तिके निर्देशात् ल्युटि ह्रस्वः । गहे भवं गहीयम् । गहादिभ्यश्चेति शैषिकोऽत्र छः । गह इति निर्देशादत्रापि ह्रस्वः ॥ ६३६ ॥

गृहू ग्रहणे ॥ गर्हते । जगृहे । जगृहिषे । जघृक्षे । जगृहिढ्वे । जघृढ्वे । गर्हिता । गर्ढा । गर्हिष्यते । घर्क्ष्यते । गर्हताम् । अगर्हत । गर्हिषीष्ट । घृक्षीष्ट । 'लिङ्सिचावात्मनेपदेष्वि'त्यनिट्पक्षे न गुणः । अगर्हिष्ट । अघृक्षत । अगर्हिषाताम् । अगर्हिषत । अघृक्षाताम् । अगर्हिष्ठाः । अघृक्षथाः । अगर्हिढ्वम् । अगर्हिध्वम् । अघृक्षध्वम् । अगर्हिषि । अघृक्षि । अगर्हिष्वहि । अघृक्षावहि । अनिट्पक्षे 'शल इगुपधादनिटः क्सः' 'क्सस्याचि'त्यल्लोपः । यङादौ 'घते दीर्घो यङी'ति दीर्घः इत्यादि तु पूर्ववत् । जिघर्हिषते । जिघृक्षते । इडभावे 'हलन्ताच्चे'ति सनः कित्त्वम् । जरीगृह्यते । रीगृत्वत इति रीक् । जरीगृहीति । जर्गर्ढि । जर्गृढः । इत्यिकारप्युदाहार्यम् । गर्हित्वा । गृढ्वा । गृहम् । इगुपधलक्षणः कः । अत्र मैत्रेयः । 'गेहे कः' इति गृह्णातेः कविधानं तस्यापि गृहमिति यथा स्यादिति । अयं क्वचित्कोषे पिह इदुपधः पठ्यते तदनार्षं यदाह देवः । ण्यन्तस्य गृहणे गर्हेर्गर्हयते तथाऽनदन्ताद्गृहेर्भूवादेः अपि गर्हते श्नि प्रत्यये गृह्णाति अगृह्णीत चेति । अत्र पुरुषाकारे गृह इत्यनेनैव पूर्वस्मादद्दन्तत्वमात्रविशेषः । गृहीत्वा विशिष्टमिति दर्शनिनां गृहपाठाशङ्का निरवकाशतां नीता । ग्लह इति स्वामिकाश्यपसम्मताकारादयः पठन्ति तदपि ग्राह्यम् । तथा च 'अक्षेषु ग्लह' इत्यत्र वृत्तिः । ग्लहिः प्रकृत्यन्तरमिति । ग्लहत इत्यादि पूर्ववत् । ग्लहोऽक्षस्य । 'अक्षेषु ग्लह' इत्यप् । अक्षादन्यत्र ग्लाह इति घञ् । एषां तु निपातनं ग्रहेरेतदिति तेषामनक्षे ग्रह इति प्रत्युदाहार्यम् । तस्याभावो विशेषः ॥ ६३७ ॥

(शेषमग्रे)

Digitized by Google

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

अथ पाशुकपदार्थानां नामान्युच्यन्ते ।

(*Continued from page* 560. Vol. VI.)

३३ शुन्धतां लोक इत्यादिमन्त्रेण यूपावटेऽतिषिक्ताः प्रोक्षणीर्निनयति । यवोऽसि यवयेत्यादिमन्त्रेण यूपावटे यवान् प्रक्षिपति । प्राचीनावीती बर्हिर्मुष्टिं द्वेधा कृत्वा एकं भागं प्रागग्रमपरं दक्षिणाग्रं च कृत्वा द्वयोर्भागयोर्मध्यं यूपावटस्य मध्ये यथा स्यात्तथा भागद्वयं निदधाति पितृणां सदनमसीति मन्त्रेण । तस्य मध्ये हिरण्यं निधाय तस्योपरि पितृभ्यः स्वाहेति मन्त्रेण स्रुवाहुतिं जुहोति । यजमानोऽपि प्राचीनावीती भूत्वा पितृभ्य इदं न ममेति त्यागं पठति । अध्वर्युर्यज्ञोपवीती प्रथमपतितं यूपशकलं यूपावटे प्रक्षिपति द्यावेशोऽस्यग्रेगा इत्यादिमन्त्रेण । अयं यूपशकलप्रक्षेप इत्युच्यते ।

३४ ततः सस्रुवां स्मार्ताज्यस्थालीं स्वरुं यूपरशनां मेषावहत्यद्य-मुदपात्रं चादाय एहि यजमानेति यजमानमामन्त्र्याग्रेण यूपं परीत्य दक्षिणत उदङ्मुखस्तिष्ठति । यजमानो यूपस्यावटस्य च मध्येनोत्तरतो गत्वाऽग्रेण यूपं परीत्याध्वर्योर्यूपस्य च मध्येन पश्चाद्गत्वोदङ्मुखस्तिष्ठति । पत्नी तु अध्वर्योरुत्तरतो यजमानस्य दक्षिणतः पश्चाद्गत्वोदङ्मुखी तिष्ठति । यूपसमीपे अध्वर्युश्चषालमुन्मुच्याज्येन यूपाग्रे प्रवेशानक्ति देवस्त्वा सवितेत्यादिमन्त्रेण । चषालमन्तरतो बाह्यतश्च स्वभ्यक्तं कृत्वा यूपाग्रे प्रतिमुञ्चति सुपिप्पलाभ्यस्त्वेत्यादिमन्त्रेण । चषालो यूप-

कटक इति कोशात् पञ्चारत्निपरिमाणयूपस्य अग्रभागे अधिके चतुरङ्गुलोच्चे सन्तक्षिते कटकवत् यः प्रवेश्यते स चतुरङ्गुलमात्रः सुबिलः चषाल इत्युच्यते ॥

३५ ततस्तस्मिन्काले चिह्नितामग्निष्ठामश्रिं स्रुवेणाभिघारयन्नाह । यूपायाज्यमानायानुब्रू३हीति । अञ्जनप्रभृति स्वरुमूहनपर्यन्तं पत्नीयजमानौ यूपं नोत्सृजेताम् । अध्वर्युरुपर्याज्यमानयति । यजमानस्तेनाज्येन यूपमुपरवर्जं सर्वतः समनक्ति । पश्चादुपरमनक्ति । अथ पञ्चारत्निपरिमाणयूपस्य मूलप्रदेशे प्रथमोरत्निपरिमितो भागो योयूपावटे रोप्यते स उपर इत्युच्यते ॥

३६ अयं यूपायेत्यादिप्रैषो यूपाञ्जनप्रैष इत्युच्यते ॥

३७ यूपस्य चतस्रोऽष्टौ वाऽश्रयो भवन्ति तत्राग्निसंमुखाश्रिः अग्निष्ठाश्रिरित्युच्यते ॥

३८ अध्वर्युरवटाद्बहिर्यूपमुच्छ्रयन्नाह । उच्छ्रीयमाणायानुब्रू३हीति । अयं यूपोच्छ्रयणप्रैष इत्युच्यते ॥

३९ अध्वर्युर्यजमानेन सह यूपमुच्छ्रयति उद्दिवं स्तभानेत्यादिमन्त्रेण । तेतेधामानीति द्वाभ्यामृग्भ्यां यूपमवटे प्रवेशयति । अग्निष्ठामश्रिमाहवनीयस्याभिमुखीं करोति । एतद्यूपोच्छ्रयणमित्युच्यते ॥

४० ततः स्थिरस्य यूपस्य चषालं यजमानमवेक्षयति तद्विष्णोरित्यृचा । इदं चषालावेक्षणमित्युच्यते ॥

४१ ततो ब्रह्मवनिन्त्वेत्यादिमन्त्रेणावटे प्रदक्षिणं मृत्तिकां प्रवेशयति । मैत्रावरुणदण्डेन यूपमभितः संहन्ति ब्रह्म दृंह क्षत्रं दृंहेत्यादिमन्त्रेण । इदं यूपसंहननमित्युच्यते ॥

४२ अवटं पार्श्वभूम्यपेक्षयाऽन्यूनमनतिरिक्तं पुरीषेण प्रच्छाद्य तस्योदपात्रोदकं प्रदक्षिणं निनीय यूपरशनामादाय त्रिः संभृज्य मध्यमेन गुणेन यूपं नाभिदघ्ने त्रिः प्रदक्षिणं परिव्ययन्नाह । परिवीयमाणायानुब्रूहीति । अयं परिव्ययणप्रैष उच्यते ॥

४३ ततः परिवीरित्यृचा परिव्ययति । यूपसमीपमारभ्य परस्पर-संलग्नं कृत्वाऽन्तं प्रवेश्य कुशलक्रियया ग्रन्थिं कृत्वा रशनाग्रं निर्भिद्य रशनामूलं प्रवेश्याग्निष्ठायामभ्र्यां मध्यमं रशनागुणं निर्भिद्य तत्र स्वरुं प्रवेशयति । अन्तरिक्षस्येत्यादि गूहामीत्य-न्तेन मन्त्रेण । यूपतक्षणकाले पतितं शकलं प्रकृते गुह्यमानं स्वरुपदवाच्यम् ॥

४४ यूपप्रक्षालनप्रभृत्येतावदन्तं कर्म यूपसंस्कार इत्युच्यते ॥

४५ अथैनं पशुं हरिद्रामलकादिभिः स्नापितमन्तरेण चात्वालो-त्करौ प्रपाद्य यूपाहवनीययोर्मध्येन दक्षिणतो नीत्वा यूपस्य पुरस्तात् प्रत्यङ्मुखं यः कश्चिद्धारयति । पशोरुक्तो यो वर्णो विधिवाक्ये यथा वायव्यं श्वेतमालभेतेत्यादौ श्वेतवर्णस्तादृ-शवर्णविशिष्टपश्वभावे अथ वा पशोः प्रतिषिद्धत्वेऽध्वर्युर्नि-त्याज्यस्थाल्याज्येन वपाहोमहवन्या प्रायश्चित्ताहुतीर्जुहोति । अग्निर्मूर्धेत्यृचा । अग्नय इदं न ममेति त्यागो यजमानस्य । अग्नाविष्णू सजोषसेत्यृचा । अग्नाविष्णुभ्यामिति त्यागः । इन्द्रं विश्वा अवीवृधन्नित्यृचा । इन्द्रायेदमिति त्यागः । वायो शतं हरीणामित्यृचा । वायव इदमिति त्यागः । प्रजापते न त्वदित्यृचा । प्रजापतय इदमिति त्यागः । एता आहुतयः पशुप्रायश्चित्ताहुतय उच्यन्ते ॥

Digitized by Google

४६ एकशफश्छिन्नकर्णोऽन्धो भग्नदन्तो वामनश्छिन्नपुच्छः शिपिविष्टो बधिरः कर्मण्यनियुक्त शकबुरश्च पशुः प्रतिषिद्धपशुरुच्यते ।

४७ प्रतिबर्हिर्मन्त्रं षदन्निषेत्स्वेति मन्त्रेण द्वे बर्हिषी गृहीत्वा पशोः शृङ्गयोर्मध्ये बर्हिर्भ्यामन्वारभ्येन्द्राग्निभ्यां त्वा जुष्टमित्यादिमन्त्रेण यजमानेन सह मनसा सङ्कल्प्योपाकरोति उपवीरसीत्याद्यृचा प्रजापतेर्जायमाना इत्यृचा इमं पशुं पशुपते इत्यृचा अनुमन्यस्वेति यजुषा च । इदं पशूपाकरणमित्युच्यते ।

४८ बर्हिषी अन्यैः पदार्थैरसंसृष्टे प्रज्ञाते निधायोत्तरवेदिसमीपे पूर्वपरिगृहीतशकलत्रयमध्ये एकमधिमन्थनशकलं प्रागायतं निदधाति अग्नेर्जनित्रमसीतिमन्त्रेण । तस्य पार्श्वयोः प्रागायतौ वृषणौ हस्ताभ्यां युगपदन्वञ्चौ निदधाति वृषणौ स्थ इति मन्त्रेण । उर्वश्यस्यायुरसीत्यादिमन्त्रेण दक्षिणेन हस्तेनोत्तरारणिं सव्येनाधरारणिमादत्ते । घृतेनाक्ते इत्यादिमन्त्रेणारणिद्वयमपूर्वाज्यस्थाल्यां समनक्ति । अधिमन्थनशकले अरणी निधाय प्रजातीयं यजमानं वाचयति । गायत्रं छन्दोनुप्रजायस्वेत्यादियजुर्मन्त्रः प्रजात्यै अग्निप्रजननाय हितमिति व्युत्पत्त्या प्रजातीय इत्युच्यते ।

४९ मन्थन्नाह । अग्नये मथ्यमानायानुब्रू३हीति । अयं मन्थनप्रैष उच्यते ।

५० अग्नौ जाते सत्याह । जातायानुब्रू३हीति । यजमानान्वारब्धोऽध्वर्युर्जातमग्निमाहवनीये अभवतं नः समनसावित्यृचा प्रहरति । अस्मात्प्रहरणात्पूर्वं प्रह्रियमाणायानुब्रू३हीति प्रैषो होतारं प्रति सप्रहरणप्रैष इत्युच्यते ।

५१ अपूर्वोज्येन सकृद्गृहीतेन आहवनीये प्रहृतस्याग्नेरुपरि अग्नावग्निश्चरतीत्यृचा जुहोति । ततो देवस्य त्वेति मन्त्रेण द्विगुणां रशनामादाय तया सव्यशृङ्गवर्जं पशुं अक्ष्णया शिरसि बध्नाति ऋतस्य त्वा देवहविरित्यादिमन्त्रेण । द्विगुणायाः पशुरशनायास्त्रिगुणाया यूपरशनायाश्च प्रान्तानेकीकृत्य धर्षा मानुषानितिमन्त्रेण बध्नाति इदं कर्म पशुनियोजनमित्युच्यते ॥

५२ अद्भ्यस्त्वौषधीभ्य इत्यादिमन्त्रेण तूष्णीं संस्कृताभिरद्भिः पशुं प्रोक्षति । पाठान्तरे जलमानीय अपां पेरुरसीतिमन्त्रेण पशुं पाययति । तूष्णीं संस्कृताभिरद्भिः पशुमुपरिष्टात्प्रोक्ष्य स्वात्तं चिदित्यादिमन्त्रेण अधस्तात्प्रोक्षति प्रोक्षणीर्निदधाति । एतत्पशुप्रोक्षणमित्युच्यते ॥

५३ अथेध्मात्समिधमाददान आह अग्नये समिध्यमानायानुब्रूहीत्यादि जोहवाघारपर्यन्तं प्रकृतिवत् । तदनन्तरमुदङ्ङागत्याघारशेषजोहवाज्येन पशुं ललाटे समनक्ति सन्ते प्राणो वायुनेत्यादिमन्त्रेण । सं यजत्रैरङ्गानीति मन्त्रेण ककुदि । सं यज्ञपतिराशिषेति मन्त्रेण दक्षिणश्रोण्याम् । इदं पशुसमञ्जनमित्युच्यते ॥

५४ ततो ध्रुवां समज्य यथायतनं स्रुचौ सादयित्वा प्रवरं प्रवृणीते । तत्र होतुःप्रवरानन्तरं आश्राव्य प्रत्याश्राविते मित्रावरुणौ प्रशास्तारौ प्रशास्तादित्युक्त्वा मैत्रावरुणस्य नाम गृह्णाति । अमुकशर्मा मानुष इति । घृतवतीशब्दश्रवणानन्तरं जुहूपभृतावादायात्याक्रम्याश्राव्य प्रत्याश्राविते आह समिद्भ्यः प्रेष्येति । द्वितीयादिप्रयाजेषु प्रेष्येत्येव वदति प्रशास्तृप्रैषान्ते तेन

सह यजेति वदति न वा चतुर्थाष्टमयोः प्रयाजयोरौपभृद्दाज्यस्य जुह्वां समानयनम् । स्वाहा कृतीभ्यः संस्रावस्य जुह्वां रणयां पञ्चमप्रयाजे यो यजमानस्य त्यागः स एव षष्ठादिषु । दशप्रयाजानिष्ट्वोदङ्ङत्याक्रम्य स्वरुं स्वधितिञ्चादाय तौ सह जुह्वां समज्य ताभ्यां सहैव पशुं समनक्ति घृतेनाक्तौ पशुं त्रायेथामिति मन्त्रेण । स्वधितिं शमितुर्हस्ते प्रयच्छति स्वरुं रशनायामवगूहति । यथायतनं स्रुचौ सादयित्वाह । पर्यग्नये क्रियमाणायानुब्रू३हि इति । अयं पर्यग्निकरणप्रैष इत्युच्यते ॥

५५ तत आग्नीध्र आहवनीयादुल्मुकमादायान्तरेण चात्वालोत्करावुत्तरेण शामित्रमयेण पशुं जघनेन स्रुच इत्येवंरीत्या त्रिः प्रदक्षिणं पर्येति । यथोल्मुकमन्तर्भवति स्वयं बहिर्भवति तथा । इदं पाशुकपर्यग्निकरणमुच्यते ॥

५६ ततोऽध्वर्युः पूर्वाज्यात्सकृद्गृहीतेन परिसरणत्रयमध्ये प्रथमे एकं उत्तरयोः परिसरणयोर्द्वे द्वे एवं पञ्चापाव्यानि जुहोति । प्रजानन्त इत्येका येषामीशे पशुपतिरिति द्वितीया ये बध्यमानमिति तृतीया य आरण्याः पशव इति चतुर्थी प्रमुञ्चमाना इति पञ्चमी । एता ऋचोपाव्यानीत्युच्यन्ते ॥

५७ प्रजापतय इदमिति प्रथमयोस्त्यागः । अग्नये वायवे विश्वेभ्यो देवेभ्य इति क्रमेण तृतीयादीनाम् । आग्नीध्रस्य पर्यग्निकरणार्थं प्रदक्षिणं गमनं परिसरणमित्युच्यते ॥

५८ अथ वा परिसरणानुसरणं विना यथासम्भवं होमः । अयमपाव्यहोम इत्युच्यते ॥

५९ आग्नीध्र आहवनीयसमीपे उल्मुकं निधाय यथागतस्त्रिः पुनः पर्येति । तदनन्तरं प्रतिप्रस्थाता उपवेषेण पुराणगार्हपत्यादु-

दीयाङ्गारान्निरूहति मातरिश्वनो घर्मोऽसीति मन्त्रेण । तानादाय दक्षिणया द्वारा दक्षिणेन विहारं ब्रह्मयजमानयूपानामन्तरेण आहरन् स्वयं बहिर्गच्छन् अन्तरेण चात्वालोत्करावुदग्गत्वा शामित्रशालायां निदधाति । अयं निहितोऽग्निः शामित्र इत्युच्यते ॥

६० आग्नीध्रः यूपोत्तरवेद्योर्मध्येन शामित्रशालां प्रतिनीयमानस्य पशोरग्रत उल्मुकं गृहीत्वा गच्छति । अध्वर्युर्यजमानश्च पशुं वपाश्रपणीभ्यामन्वारभेते । अध्वर्युराश्राव्य प्रत्याश्राविते आह । उपप्रेष्यहोतर्हव्या देवेभ्यः इति । अयमुपप्रैष इत्युच्यते ॥

६१ अन्तरेण चात्वालोत्करावुदञ्चं नीयमानं पशुमनुमन्त्रयते नाना प्राणो यजमान इति मन्त्रेण । आग्नीध्र उदङ्मुखं निष्क्रम्य किञ्चित्प्रागात्वा शामित्रसकाशे उल्मुकं निदधाति । अध्वर्युस्तस्योल्मुकस्योत्तरतः प्राग्वोदग्वोपाकरणबर्हिषोर्मध्ये एकं बर्हिरुपास्यति पृथिव्याः संपृचः पाहीति मन्त्रेण । पूर्वं येन बर्हिर्द्वयेन पशोरुपाकरणं कृतं तदुपाकरणबर्हिरुच्यते ॥

६२ अध्वर्युः शमितारं प्रत्याह । अकृण्वन्तं मायुं संज्ञपयतेति । अयं शमितृप्रैषइत्युच्यते ॥

६३ तस्मिन् बर्हिषि प्रतीचीनशिरसमुदीचीनपादं पशुं शाययित्वा शमितारः संज्ञपयन्ति एवंरीत्या पशोर्मारणं संज्ञपनमित्युच्यते ॥

६४ यजमान ऋत्विजश्च संज्ञप्यमानं पशुमनवेक्षमाणाः सन्तः संज्ञपनकाले पृषदाज्यसमीपे आसते इह प्रजा विश्वरूपा रमन्तामित्यृचं च जपन्ति । शमितारः संज्ञपनानन्तरं संज्ञप्त इत्याहुः । अध्वर्युरुपाकरणप्रभृति संज्ञपनपर्यन्तं पशोर्बोधने

वेपने पलायने मरणे शकृत्कृतौ मूत्रकरणे च प्रतिनिमित्तं निमित्तक्रमेण तिस्रस्तिस्र आहुतीर्जुहोति यदस्य पारे रजस इत्यादिभिस्तृभिर्ऋग्भिः । तत्र द्वितीयस्यामृचि वाशने निमित्ते यस्माद्भीषा वाशिष्ठा इति पाठः । वेपने तु वाशिष्ठा इति पदस्य स्थाने वेपिष्ठा इति पदमूहनीयम् । एवं सर्वनिमित्तेषु । अग्नये वैश्वानरायेदमिति यजमानस्य त्याग आद्ये । अन्त्ययोस्तु रुद्राय मीढुष इति । उदकोपस्पर्शश्च । एता वाशनादिनिमित्ताहुतय उच्यन्ते ॥

६५ ततोऽपूर्वाज्यात्सकृद्गृहीतेन यत्पशुर्मायुमकृतेत्यादिमन्त्रेण जुहोति । अग्नय इति त्यागो यजमानस्य इयं संज्ञप्ताहुतिरित्युच्यते ॥

६६ शमितार उपेत्यादिमन्त्रेण पश्वभिमुखं गच्छन्ति । अदितिः पाशमित्यादि मन्त्रेण पाशात्प्रमुच्यमानं पशुमनुमन्त्रयते । अविशाखया वपाश्रपण्या पाशमादायारातीयन्तमित्यादिमन्त्रेण नैर्ऋत्यां दिशि निरस्यति । अथ प्रतिप्रस्थाता पत्नीमुत्थाप्योदककमण्डलुं धारयित्वा नमस्त आतानेतिमन्त्रेणादित्यमीक्षयति । अन्तरेण चात्वालोत्करौ पत्नीमुदङ्ङुपनिष्क्रमय्य प्राचीमुदानयन्ननर्वाप्रेहीत्यादिमन्त्रं वाचयति । अध्वर्युः पशुसमीपे अपो वीक्षमाणां पत्नीं आपो देवीरित्यादिमन्त्रं वाचयति । स्वयमेव मन्त्रं ब्रुवाणा पत्नी जलं सिञ्चन्ती सती क्रमेण पशोरङ्गान्याप्याययति । वाक् त आप्यायतामितिमन्त्रेण वाचं प्राणस्त इति नासिके । एवं चक्षुस्त इति चक्षुषी । श्रोत्रं त इति श्रोत्रे । चक्षुरादेर्द्वित्वात् मन्त्रे एकवचनान्तप्रयोगात्प्रतिस्थानं मन्त्रावृत्तिरिति केचित् । या ते प्राणाञ्छुगित्यादिमन्त्रं सकृदेव

वदति । पूर्वमाप्यायितानि वागादीन्यङ्गानि संमृशति । ततो नाभिस्तआप्यायतामिति नाभिम् । पायुस्तइति गुदम् । ततः शुद्धाश्चरित्रा इत्यादिमन्त्रेण पशोश्चतुरः पादानेकीकृत्य प्रक्षालयति अतिशिष्टा अपः पशोः पृष्ठमूलादारभ्यापपर्यन्तं निनयति शं महोभ्यामिति मन्त्रेण । एतावत्कर्म संज्ञपनाप्यायनमित्युच्यते ॥

६७ अध्वर्युः पत्नीमन्यत्र गमयित्वा पशोर्दक्षिणपार्श्वे द्वितीयमुपाकरणबर्हिः ओषधे त्रायस्वैनमितिमन्त्रेण प्रागग्रं निदधाति । स्वधिते मैनं हिंसीरिति मन्त्रेण तस्योपरि स्वधितिं तिर्यञ्चं निदधाति । बर्हिषा सह त्वचं छित्वा बर्हिषोऽग्रं दक्षिणहस्ताङ्गुल्यन्तराले सक्तं कृत्वा बर्हिषोऽधोभागस्योभावन्तौ सह गृहीत्वा रुधिराक्तं छिन्नप्रदेशं नैरृत्यां दिशि रक्षसां भागोसीत्यादिमन्त्रेण निरस्यति । इदं त्वक्छेदनमित्युच्यते ॥

६८ ततोऽप उपस्पृश्य छिन्नप्रदेशं पुनर्विस्तीर्णं कृत्वा इषेत्वेतिमन्त्रेण वपामुद्धरति । इदं वपोद्धरणं वपोत्खेदनमिति चोच्यते ॥

६९ हृन्मेदस्तु वपा वसेतिकोशात् मेदोविशेषः सर्वोदरव्यापी पोलिकाकारोतिश्वेतवर्णो वपेत्युच्यते ॥

७० तया वपया वपाख्यां वपाश्रपणीं घृतेनेत्यादिप्रोर्णवाथामित्यन्तेन मन्त्रेण प्रच्छादयति । अविशाखया वपाश्रपण्या वपाया अधोभागं गृहीत्वा वपां स्वधितिनाऽच्छिन्नो राय इत्यादिमन्त्रेण छिनत्ति । प्राङ्मुखः पर्यावृत्य वपामद्भिः प्रक्षालयति । एतद्वपाप्रक्षालनमित्युच्यते ॥

७१ अथैनां वपां शामित्राग्नौ प्रतितपति । एतद्वपाप्रतितपनमुच्यते ॥

७२ आग्नीध्रः शामित्रदेशात् पूर्वनिहितमुल्मुकमादायान्तरेण चात्वालोत्करावुत्तरवेद्यभिमुखो गच्छति । तस्य पश्चादध्वर्युः उर्वन्तरिक्षमन्विहीतिमन्त्रेण गच्छति । यजमानो वपाश्रपणीमन्वारभते । आग्नीध्रस्तदुल्मुकमाहवनीये प्रक्षिपति । इदं पशूल्मुकप्रक्षेपणमित्युच्यते ॥

७३ अध्वर्युराहवनीयस्योत्तरपार्श्वस्थोऽङ्गारेषु पूर्वमग्न्यन्तराले स्थापितं बर्हिषोऽग्रं प्रक्षिपति वायो वीहीत्यादिमन्त्रेण । अयमुपाकरणबर्हिरग्रप्रक्षेप इत्युच्यते ॥

७४ प्रदीप्तस्य बर्हिरग्रस्य ज्वालायां वपां वपाश्रपण्या किञ्चित्प्रतितप्य यूपाहवनीययोरन्तरेण नीत्वा दक्षिणतः प्रतिप्रस्थात्रे प्रयच्छति । प्रतिप्रस्थाता आहवनीयस्य दक्षिणतः उदङ्मुखः स्थित्वा वपां श्रपयति । अध्वर्युरासीनः श्रप्यमाणाया वपाया उपरि ध्रुवाज्येन त्वामु ते दधिर इत्यृचा स्रुवाहुतिं जुहोति । जातवेदसेऽग्नय इदमिति यजमानस्य त्यागः । इयं स्तोकाहुतिरित्युच्यते ॥

७५ अथाध्वर्युर्होतारं सम्प्रेष्यति । स्तोकेभ्योऽनुब्रू३हीति । इदं वपाश्रपणमुच्यते ॥

७६ वपायां शृतायां सत्यां पात्रान्तरे ध्रुवाज्येन उपस्तीर्य वपाश्रपणीसकाशाद्वपामुपाहृत्य तस्मिन्पात्रेऽवधायाग्नावधिश्रित्य ध्रुवाज्येनाभिघार्योदगुद्वास्य तेनैवाज्येन सान्नाय्यवन्मन्त्रेणालङ्करोति । इदं वपालङ्करणमुच्यते ॥

७७ स्रुचां दक्षिणतः पञ्चहोत्रा वपामासादयति । इदं वपासादनमुच्यते ॥ (शेषमग्रे)

पञ्चदशी ।

चित्रदीपः ।

(*Continued from page* 503. Vol. VI.)

अणुर्महान्मध्यमो वेत्येवं तत्रापि वादिनः ।
बहुधा विवदन्ते हि श्रुतियुक्तिसमाश्रयात् ॥ ७८ ॥
अणुं वदन्त्यान्तरालाः सूक्ष्मनाडीप्रचारतः ।
रोम्णः सहस्रभागेन तुल्यासु प्रचरत्ययम् ॥ ७९ ॥
अणोरणीयानेषोऽणुः सूक्ष्मात्सूक्ष्मतरं त्विति ।
अणुत्वमाहुः श्रुतयः शतशोऽथ सहस्रशः ॥ ८० ॥
बालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेय इति चाहापरा श्रुतिः ॥ ८१ ॥
दिगम्बरा मध्यमत्वमाहुरापादमस्तकम् ।
चैतन्यव्याप्तिसन्दृष्टेरानखाग्रश्रुतेरपि ॥ ८२ ॥

78. With reference to the Self, some hold that it is atomic or commensurable or infinite in extent, and dispute according to their several views, having recourse to Scripture and argumentation.

79. The Antarálas declare that the Self is atomic because it moves through subtile arteries. The Self moves (they say) in arteries as narrow as the thousandth part of a hair's breadth.

80. Smaller than an atom: this (Self) is an atom: more subtile than the subtile:—thus Scripture reveals, again and again, the atomic character of Self.

81. And another passage declares that the personal soul is to be known as part of the hundredth part of the point of a hair, divided into a hundred parts.

82. The Digambaras hold to the finite character of Self (as being confined) between head and foot, because of our experience that the pervasion of Intelligence (is thus limited in our bodies) and because of the text—"Extending to the extremity of the nails."

80. 81. cf. Śvetáśv: III. 20, V. 9.

सूक्ष्मनाडीप्रचारस्तु सूक्ष्मैरवयवैर्भवेत् ।
स्थूलदेहस्य हस्ताभ्यां कञ्चुकप्रतिमोकवत् ॥ ८३ ॥
न्यूनाधिकशरीरेषु प्रवेशोऽपि गमागमैः ।
आत्मांशानां भवेत्तेन मध्यमत्वं विनिश्चितम् ॥ ८४ ॥
सांशस्य घटवन्नाशो भवत्येव तथा सति ।
कृतनाशाकृताभ्यागमयोः को वारको भवेत् ॥ ८५ ॥
तस्मादात्मा महानेव नैवाणुर्नापि मध्यमः ।
आकाशवत्सर्वगतो निरंशः श्रुतिसम्मतः ॥ ८६ ॥
इत्युक्त्वा तद्विशेषे तु बहुधा कलहं ययुः ।
अचिद्रूपोऽथ चिद्रूपश्चिदचिद्रूप इत्यपि ॥ ८७ ॥
प्राभाकरास्तार्किकाश्च प्राहुरस्याचिदात्मताम् ।

83. But the entrance of Self into the subtile arteries must be regarded as effected by means of its subtile parts, just as we, speak of the gross body entering a vest (which entrance is effected really) by the two hands.

84. There can be an entrance of Self into bodies large and small by means of the increase and decrease of its parts: therefore the finite character of Self is beyond doubt.

85. Of that which possesses parts there is destruction, as in the case of a jar. If this be so (i. e. if the Self can be destroyed), what is to prevent the cessation of results from actions done (in a former birth) and the bestowal (on the personal sentiency) of results from actions which it never performed?

86. Therefore the Self is indeed infinite, not finite nor atomic. It is, as declared in Scripture, all pervading and without parts like ether.

87. Having thus declared themselves, these men debate as to the (various) attributes of Self, thus:—whether Self is Intelligence or not, or whether it is both intelligent and unintelligent.

88. The Prábhákaras and Naiyáyikas declare for the unintelligent nature of Self, Self, they say, is a substance and has

Digitized by Google

आकाशवद्द्रव्यमात्मा शब्दवत्तद्गुणश्चितिः ॥ ८८ ॥
इच्छाद्वेषप्रयत्नाश्च धर्माधर्मौ सुखासुखे ।
तत्संस्काराश्च तस्यैते गुणाश्चितिवदीरिताः ॥ ८९ ॥
आत्मनो मनसा योगे स्वादृष्टवशतो गुणाः ।
जायन्तेऽथ प्रलीयन्ते सुषुप्तेऽदृष्टसंक्षयात् ॥ ९० ॥
चितिमत्त्वाच्चेतनोऽयमिच्छाद्वेषप्रयत्नवान् ।
स्याद्धर्माधर्मयोः कर्ता भोक्ता दुःखादिमत्त्वतः ॥ ९१ ॥
यथात्र कर्मवशतः कादाचित्कं सुखादिकम् ।
तथा लोकान्तरे देहे कर्मणेच्छादि जन्यते ॥ ९२ ॥
एवं च सर्वगस्यापि सम्भवेतां गमागमौ ।
कर्मकाण्डः समग्रोऽत्र प्रमाणमिति तेऽवदन् ॥ ९३ ॥
आनन्दमयकोशो यः सुषुप्तौ परिशिष्यते ।

intelligence as its attribute, just as ether is a substance and has sound for its attribute.

89. Desire, hatred, volition, merit and demerit, pleasure and pain, and the impressions of all these (stamped upon the mind), they hold to be attributes of the Self, just as intelligence is.

90. These attributes are produced in accordance with the unseen results of one's previous actions through the connexion of self with a mind. These, again, are lost during dreamless sleep when the unseen results of former actions have passed away.

91. The Self, possessing desire, hatred and volition, is intelligent for it possesses intelligence; it is a doer of good and evil; a patient, for it feels pleasure and pain &c.

92. Just as in this world pleasure, pain &c. are produced temporarily through actions, so in another world desire and the rest are produced in a body as the result of action.

93. And so coming and going are also possible for the all-pervading (Self). Of this the whole ceremonial portion of the Veda is a proof. Thus have these teachers maintained.

94. The sheath of bliss, which remains during dreamless sleep and whose intelligence is unmanifested, the first (of the five

असङ्गचित्स्व आत्मैषां पूर्वकोशोऽस्य ते गुणाः ॥ ९४ ॥
गूढं चैतन्यमुत्प्रेक्ष्य जडबोधस्वरूपताम् ।
आत्मनो ब्रुवते भाट्टाश्चिदुत्प्रेक्षोत्थितस्मृतेः ॥ ९५ ॥
जडो भूत्वा तदाऽस्वाप्समिति जाड्यस्मृतिस्तदा ।
विना जाड्यानुभूतिं न कथञ्चिदुपपद्यते ॥ ९६ ॥
द्रष्टुर्दृष्टेरलोपश्च श्रुतः सुप्तौ ततस्त्वयम् ।
अप्रकाशप्रकाशाभ्यामात्मा खद्योतवद्युतः ॥ ९७ ॥
निरंशस्योभयात्मत्वं न कथं चित् घटिष्यते ।
तेन चिद्रूप एवात्मेत्याहुः साङ्ख्या विवेकिनः ॥ ९८ ॥
जाड्यांशः प्रकृते रूपं विकारि त्रिगुणं च तत् ।
चितो भोगापवर्गार्थं प्रकृतिः सा प्रवर्तते ॥ ९९ ॥

sheaths), is the Self of these philosophers. To this Self belong those qualities (sc. desire &c.)

95. Surmising an unmanifested intelligence, the Bháṭṭas hold that the Self is both conscious and unconscious. Their surmisal of a conscious (Self) follows from the recollection of the man who waking (from dreamless sleep is conscious that he knew nothing during such sleep).

96. During dreamless sleep (tadá) I was unconscious and slept well:—such is the recollection of that unconscious state. This recollection could in no way result except through a consciousness during dreamless sleep of that unconscious state.

97. The non-destruction of the seeing of the seer during dreamless sleep has been revealed. The Self therefore, like a fire-fly, possesses the power of shining and not shining.

98. The Sáṅkhya philosophers hold that the (above-mentioned) two-fold character can in no way apply to that which is destitute of parts. Self, therefore, is intelligence only.

99. (They further hold) that the portion of Self (regarded by other schools as) unconscious is Prakṛiti, (nature), is modified, and is made up of the three qualities (sattva, rajas and tamas) This Prakṛiti is concerned with the transmigratory life and final emancipation of intelligence (sc. the purusha of the Sáṅkhya).

असङ्गायाश्चितेर्बन्धमोक्षौ भेदाग्रहान्मतौ ।
बन्धमुक्तिव्यवस्थार्थं पूर्वेषामिव चिद्भिदा ॥ १०० ॥

महतः परमव्यक्तमिति प्रकृतिरुच्यते ।
श्रुतावसङ्गता तद्वदसङ्गो हीत्यतः स्फुटा ॥ १०१ ॥

चित्सन्निधौ प्रवृत्तायाः प्रकृतेर्हि नियामकम् ।
ईश्वरं ब्रुवते योगाः स जीवेभ्यः परः श्रुतः ॥ १०२ ॥

प्रधानक्षेत्रज्ञपतिर्गुणेश इति हि श्रुतिः ।
आरण्यके सम्भ्रमेण ह्यन्तर्याम्युपपादितः ॥ १०३ ॥

अत्रापि कलहायन्ते वादिनः स्वस्वयुक्तिभिः
वाक्यान्यपि यथाप्रज्ञं दार्ढ्यायोदाहरन्ति हि ॥ १०४ ॥

100. Bondage and emancipation are affirmed of Purusha (soul, chitteh), which (in reality) is out of all relation, because the distinction (between Purusha and Prakṛiti) is not recognised. In the Sáṅkhya school, as in those previously mentioned, a plurality of souls is maintained to account for bondage and emancipation.

101. "The unmanifested is beyond mahat" (buddhi, mind): thus is Prakṛiti declared. So too, "(Purusha) is unrelated"; wherefore the unrelatedness of Purusha is made clear in Revelation.

102. The followers of the Yoga system maintain a God, the regulator of Prakṛiti which becomes active through its proximity to intelligence. God (they say) is revealed as distinct from the jívas (personal souls).

103. For Scripture thus declares: "Master of Pradhána (nature) and of personal souls: Lord of the (three) qualities." In the Bṛihadáraṇyaka an internal ruler is with reverence set forth.

104. Men keep arguing about God, each with his own argument; and, following their understandings, quote Scripture to make good their positions.

103. cf. Śvetáśv: VI, 16.
" " Bṛihadár: III. 7.

क्लेशकर्मविपाकैस्तदाशयैरप्यसंयुतः ।
पुंविशेषो भवेदीशो जीववत्सोऽप्यसङ्गचित् ॥ १०५ ॥

तथापि पुंविशेषत्वाद्घटतेऽस्य नियन्तृता ।
अव्यवस्थौ बन्धमोक्षावापतेतामिहान्यथा ॥ १०६ ॥

भीषाऽस्मादित्येवमादावसङ्गस्य परात्मनः ।
श्रुतं तद्युक्तमप्यस्य क्लेशकर्माद्यसङ्गमात् ॥ १०७ ॥

जीवानामप्यसङ्गत्वात् क्लेशादिर्न ह्यथापि च ।
विवेकाग्रहतः क्लेशकर्मादि प्रागुदीरितम् ॥ १०८ ॥

नित्यज्ञानप्रयत्नेच्छागुणानीशस्य मन्वते ।
असङ्गस्य नियन्तृत्वमयुक्तमिति तार्किकाः ॥ १०९ ॥

105. There is a God, a special kind of soul, untouched by evils, actions, results of actions or desires for these:—(thus Patañjali declares). God too, like the personal soul, is unrelated Intelligence.

106. The rulership of God, however, is consistent (with his being unrelated Intelligence), for he is a special kind of soul. If there were no ruler, the transmigration and emancipation of this world would be disordered.

107. The rulership of the unrelated highest Self is revealed in the passage "Through fear of this one the wind blows &c," (and) quite consistently, for the highest Self is not touched by evils and the rest.

108. Although evils and the rest do not (really) belong to personal souls, for these are unrelated Intelligence, yet evil and action &c, as before described, attach to the personal soul because its true nature is not discriminated.

109. The Naiyáyikas hold that to God belong the eternal attributes of cognition, will and desire; and that the office of ruler cannot rightly belong to that which is unrelated.

105. Yogasútra I, 24.

107. Taittiríy: II, 8.

Digitized by Google

पुंविशेषत्वमप्यस्य गुणैरेव न चान्यथा ।
सत्यकामः सत्यसङ्कल्प इत्यादिश्रुतिगोचरः ॥ ११० ॥
नित्यज्ञानादिमत्त्वेऽस्य सृष्टिरेव सदा भवेत् ।
हिरण्यगर्भ ईशोऽतो लिङ्गदेहेन संयुतः ॥ १११ ॥
उद्गीथब्राह्मणे तस्य माहात्म्यमतिविस्तृतम् ।
लिङ्गसत्त्वेऽपि जीवत्वं नास्य कर्माद्यभावतः ॥ ११२ ॥
स्थूलदेहं विना लिङ्गदेहो न क्वापि दृश्यते ।
वैराजो देह ईशोऽतः सर्वतो मस्तकादिमान् ॥ ११३ ॥
सहस्रशीर्षेत्येवं च विश्वतश्चक्षुरित्यपि ।
श्रुतमित्याहुरनिशं विश्वरूपस्य चिन्तकाः ॥ ११४ ॥
सर्वतः पाणिपादत्वे क्रिम्यादेरपि चेशता ।
ततश्चतुर्मुखो देव एवेशो नेतरः पुमान् ॥ ११५ ॥

110. God is said to be a special kind of soul by reason of these attributes only and not otherwise. "He whose desires are true, whose will is true"—thus Scripture declares.

111. If God (asya,) possesses eternal cognition and the rest, the creation of the world must be eternal. Hence (some maintain that) Hiraṇyagarbha is God (and) is possessed of a subtile body.

112. In the Bráhmaṇa of the Sámaveda this Hiraṇyagarbha is extolled at great length. Although he is associated with a subtile body, the nature of personal soul does not belong to him, because to him do not belong action and the rest.

113. The subtile body is nowhere known without the gross body. Wherefore the body of Virát̩, possessing parts on all sides, (e. g. a head &c.,) is God.

114. Those who ever ponder on (Brahmá in its pervading form as) Viśva (i. e. Virát̩), cite such passages as "He who has a thousand heads" and "He whose eye is everywhere."

115. If possessing hands and feet on all sides (constitutes Godhead), then insects also and the like must be God. To meet this objection (some hold that Brahmá), the four-faced God, is God alone and no other soul.

110. cf. Chhándogya. III.

Digitized by Google

पुत्रार्थं तमुपासीना एवमाहुः प्रजापतिः ।
प्रजा असृजतेत्यादि श्रुतिं चोदाहरन्त्यमी ॥ ११६ ॥
विष्णोर्नाभेः समुद्भूतो वेधाः कमलजस्ततः ।
विष्णुरेवेश इत्याहुर्लोके भागवता जनाः ॥ ११७ ॥
शिवस्य पादावन्वेष्टुं शार्ङ्ग्यशक्तस्ततः शिवः ।
ईशो न विष्णुरित्याहुः शैवा आगममानिनः ॥ ११८ ॥
पुरत्रयं सादयितुं विघ्नेशं सोऽप्यपूजयत् ।
विनायकं प्राहुरीशं गाणपत्यमते रताः ॥ ११९ ॥
एवमन्ये स्वस्वपक्षाभिमानेनान्यथान्यथा ।
मंत्रार्थवादकल्पादीनाश्रित्य प्रतिपेदिरे ॥ १२० ॥
अन्तर्यामिणमारभ्य स्थावरान्तेशवादिनः ।
सन्त्यश्वत्थार्कवंशादेः कुलदेवतदर्शनात् ॥ १२१ ॥
तत्त्वनिश्चयकामेन न्यायागमविचारिणाम् ।

116. The men who worship Brahmá for the sake of offspring thus declare, and cite such passages as "Prajápati created offspring".

117. Brahmá, born on a lotus, sprang from the navel of Vishṇu: therefore the Bhágavatas declare that Vishṇu alone is God.

118. Vishṇu was unable to reach Śiva's feet. Śiva therefore is God; not Vishṇu. Thus declare the Śaivas following (their own) Scriptures.

119. Again, Śiva, wishing to conquer three cities, adored Gaṇeśa. Therefore the Gáṇapatyas declare that Gaṇeśa is God.

120. Thus others, through a conceit of their own views, give different opinions (about God), having recourse to mantra and arthaváda passages and kalpas.

121. Believers in a God there are,—from those who hold that he is the internal ruler down to those who take him to be a stock or stone;—for some men are known to regard the pippala or arka tree or bamboo as their household deity.

122. For those who, prompted by a desire to know the

एकैव प्रतिपत्तिः स्यात्साप्यत्र स्फुटमुच्यते ॥ १२२ ॥
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
अस्यावयवभूतेस्तु व्याप्तं सर्वमिदं जगत् ॥ १२३ ॥
इतिश्रुत्यनुसारेण न्याय्यो निर्णय ईश्वरे ।
तथा सत्यविरोधः स्यात्स्थावरान्तेशवादिनाम् ॥ १२४ ॥
माया चेयं तमोरूपा तापनीये तदीरणात् ।
अनुभूति तत्र मानं प्रतिजज्ञे श्रुतिः स्वयम् ॥ १२५ ॥
जडं मोहात्मकं तच्चेत्यनुभावयति श्रुतिः ।
आबालगोपं स्पष्टत्वादानन्त्यं तस्य साऽब्रवीत् ॥ १२६ ॥
अचिदात्मघटादीनां यत्स्वरूपं जडं हि तत् ।
यत्र कुण्ठी भवेद्बुद्धिः स मोह इति लोकिकाः ॥ १२७ ॥

truth, deliberate in accordance with reason and Scripture there can be but one conclusion. And that is clearly put forth here.

123.—"Know that inexplicable Máyá is Nature and the Máyá-associated one is the great Lord. The whole world is filled with his parts."

124. By thus following Scripture a just knowledge of the Lord is gained. And then there will be no contradictions in the various opinions about the Lord.

125. This Máyá is in the form of darkness (ignorance) as declared in the Nṛisimhatápaní Upanishad. The proof of this the passage itself declares to be the consciousness of man.

126. Scripture declares our consciousness in "And this (the phenomenal world) is insentient and consists in delusion." The universality (of our consciousness) of this (i. e. of an insentient and delusive world), as being present even to children and cowherds, Scripture has declared.

127. Ordinary men take the nature of jars and like unintelligent things to be insentient (jaḍa), and that to be delusion where the mind is dulled.

---

126. Nṛisimha : Up : 9 : Biblio : Indio : p. 227.

इत्थं लौकिकदृष्ट्यैतत्सर्वैरप्यनुभूयते ।
युक्तिदृष्ट्या त्वनिर्वाच्यं नासदासीदिति श्रुतेः ॥ १२८ ॥
नासदासीद्विभातत्वान्नो सदासीच्च बाधनात् ।
विद्यादृष्ट्या श्रुतं तुच्छं तस्य नित्यनिवृत्तितः ॥ १२९ ॥
तुच्छाऽनिर्वचनीया च वास्तवी चेत्यसौ त्रिधा ।
ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः ॥ १३० ॥
अस्य सत्त्वमसत्त्वं च जगतो दर्शयत्यसौ ।
प्रसारणाच्च सङ्कोचाद्यथा चित्रपटस्तथा ॥ १३१ ॥
अस्वतन्त्रा हि माया स्यादप्रतीतेर्विना चितिम् ।
स्वतन्त्रापि तथैव स्यादसङ्गस्यान्यथा कृतेः ॥ १३२ ॥
कूटस्थासङ्गमात्मानं जगत्त्वेन करोति सा ।

128. Thus, from the ordinary stand-point, Máyá is known by all men. But in the light of argument, Máyá is inexplicable, as set forth in the passage "Non-entity was not."

129. "Non-entity was not"—for Máyá is present to consciousness: "Entity was not"—for Máyá is proved (by true knowledge) to be false. Looking at it in the light of knowledge, nescience (Máyá) is revealed as an empty nothing, since it is proved to be false in all time.

130. Máyá may be regarded in three ways, as an absurdity or a mystery or a reality, according to the three sources of knowledge, viz, revelation, argument and the unphilosophic consciousness.

131. Máyá makes this world of phenomena appear and disappear, just as the folding or unfolding of the picture-canvass (exhibits or conceals the picture)

132. Máyá cannot be an independent entity, for apart from Intelligence it cannot be present to consciousness. Again, it may be regarded as independent in that it modifies (seemingly) the unrelated (Reality).

133. Máyá makes the impersonal, unchanging, unrelated

128, 129. For Mádhaváchárya's exposition of the Násadíyasúkta see Gough's "Ancient Indian Metaphysics" Calcutta Review. No, CXXVI.

Digitized by Google

चिदाभासस्वरूपेण जीवेशावपि निर्ममे ॥ १३३ ॥

कूटस्थमनुपद्रुत्य करोति जगदादिकम् ।
दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः ॥ १३४ ॥

द्रवत्वमुदके वह्नावौष्ण्यं काठिन्यमश्मनि ।
मायाया दुर्घटत्वं च स्वतः सिध्यति नान्यतः ॥ १३५ ॥

न वेत्ति लोको यावत्तां साक्षात्तावच्चमत्कृतिम् ।
धत्ते मनसि पश्चात्तु मायैषेत्युपशाम्यति ॥ १३६ ॥

प्रसरन्ति हि चोद्यानि जगद्वस्तुत्ववादिषु ।
न चोदनीयं मायायां तस्याश्चोद्यैकरूपतः ॥ १३७ ॥

चोद्येऽपि यदि चोद्यं स्यात् त्वच्चोद्ये चोद्यते मया ।
परिहार्यं ततश्चोद्यं न पुनः प्रतिचोद्यतां ॥ १३८ ॥

विस्मयैकशरीराया मायायाश्चोद्यरूपतः ।
अन्वेष्यः परिहारोऽस्या बुद्धिमद्भिः प्रयत्नतः ॥ १३९ ॥

Self appear under the form of the phenomenal (sc. personal consciousness &c.), and creates God and the personal soul by means of a reflection (upon itself) of absolute Intelligence (chit, the reality).

134. Without doing violence to the impersonal, unchanging Self, Máyá produces the phenomenal world. Can we doubt, wonderingly, of Máyá, the great worker of things difficult!

135. (Just as) fluidity in water, heat in fire, hardness in stone (are taken to be natural attributes), so the power in Máyá of producing things difficult is self-proved, and in no other way.

136. A man wonders so long as he does not clearly know this power; but when knowledge has come, he rests satisfied with—this is the inscrutable Máyá.

137. Objections start against those who maintain the reality of the world. No question can be raised against Máyá, which is essentially a questioning.

138. If you question my question, I will question yours. Set questions aside, therefore, nor raise counter-questions.

139. And since Máyá, consisting pre-eminently of wonder, is in the form of a question, let wise men diligently seek to overthrow it.

मायात्वमेव निश्चेयमिति चेत्तर्हि निश्चिनु ।
लोकप्रसिद्धमायाया लक्षणं यत्तदीक्ष्यताम् ॥ १४० ॥

न निरूपयितुं शक्या विस्पष्टं भासते च या ।
सा मायेतीन्द्रजालादौ लोकाः सम्प्रतिपेदिरे ॥ १४१ ॥

स्पष्टं भाति जगच्चेदमशक्यं तन्निरूपणम् ।
मायामयं जगत्तस्मादीक्षस्वापक्षपाततः ॥ १४२ ॥

निरूपयितुमारब्धे निखिलैरपि पण्डितैः ।
अज्ञानं पुरतस्तेषां भाति कक्षासु कासु चित् ॥ १४३ ॥

देहेन्द्रियादयो भावा वीर्येणोत्पादिताः कथम् ।
कथं वा तत्र चैतन्यमित्युक्ते ते किमुत्तरम् ॥ १४४ ॥

वीर्यस्यैव स्वभावश्चेत्कथं तद्विदितं त्वया ।
अन्वयव्यतिरेकौ यौ भग्नौ तौ वन्ध्यवीर्यतः ॥ १४५ ॥

140. But (-you may object-) it is the very nature of Máyá that we would know for certain. Well then, deliberate and examine the definition of Máyá as known in the world.

141. That which cannot be explained and yet is clearly manifest is Máyá. This is what ordinary men accept with regard to magic and the like.

142. The phenomenal world is clearly manifest; an explanation of it is impossible. Regard it impartially, therefore, as made by Máyá.

143. When even all the wise start to give an explanation, nescience (Máyá), in some one quarter or another, appears before them.

144. How are the body, its organs and the rest produced from a germ: in these how springs intelligence? What reply have you, when questioned thus?

145. This is the nature of a germ, you reply. Pray, how have you discovered this? The inductive method of conjoint agreement and difference fails in this instance; for there are such things as sterile germs.

Digitized by Google

न जानामि किमप्येतदित्यन्ते शरणं तव ।
अतएव महान्तोऽस्य प्रवदन्तीन्द्रजालताम् ॥ १४६ ॥

एतस्मात्किमिवेन्द्रजालमपरं यद्गर्भवासस्थितम् ।
रेतश्चेतति हस्तमस्तकपदप्रोद्भूतनानाङ्कुरम् ॥
पर्यायेण शिशुत्वयौवनजरावेषैरनेकैर्वृतम् ।
पश्यत्यत्ति शृणोति जिघ्रति तथा गच्छत्यथागच्छति ॥ १४७ ॥

देहवद्वटधानादौ सुविचार्य विलोक्यताम् ।
क्व धाना कुत्र वा वृक्षस्तस्मान्मायेति निश्चिनु ॥ १४८ ॥

निरुक्तावभिमानं ये दधते तार्किकादयः ।
हर्षमिश्रादिभिस्ते तु खण्डनादौ सुशिक्षिताः ॥ १४९ ॥

अचिन्त्याः खलु ये भावा न तांस्तर्केषु योजयेत् ।
अचिन्त्यरचनारूपं मनसापि जगत्खलु ॥ १५० ॥

अचिन्त्यरचनाशक्तिबीजं मायेति निश्चिनु ।

146. Your refuge will be in "I know nothing." Hence the wise ascribe a magical character to this world.

147. What greater magic than this that a germ taking up its abode in a womb should become conscious, gifted with the offshoots springing from it—head, hand and foot—and passing in order through the stages of childhood, youth and old age, should see, hear, smell and come and go!

148. Pondering well the case of the seed and tree, like that of our body, look now at the tiny seed and now at the mighty banian tree! This, therefore, is Máyá, rest assured.

149. Those Naiyáyikas and others, boastful of their own explanation of things, were taught a severe lesson by Harsha Misra in his Refutation, and by others.

150. Things unthinkable we should not force into our deliberations. The world, forsooth, as a product is unthinkable by the mind.

151. Be assured that the cause, endowed with the power of

मायाबीजं तदेवैकं सुषुप्तावनुभूयते ॥ १५१ ॥

जाग्रत्स्वप्नजगत्तत्र लीनं बीज इव द्रुमः ।
तस्मादशेषजगतो वासनास्तत्र संस्थिताः ॥ १५२ ॥

या बुद्धिवासनास्तासु चैतन्यं प्रतिबिम्बति ।
मेघाकाशवदस्पष्टचिदाभासोऽनुमीयताम् ॥ १५३ ॥

साभासमेव तद्बीजं धीरूपेण प्ररोहति ।
अतो बुद्धौ चिदाभासो विस्पष्टं प्रतिभासते ॥ १५४ ॥

मायाऽभासेन जीवेशौ करोतीति श्रुतौ श्रुतम् ।
मेघाकाशजलाकाशाविव तौ सुव्यवस्थितौ ॥ १५५ ॥

मेघवद्वर्तते माया मेघस्थिततुषारवत् ।
धीवासनाश्चिदाभासस्तुषारस्थखवत्स्थितः ॥ १५६ ॥

producing unthinkable things, is Máyá. This cause, Máyá, is alone present to consciousness during dreamless sleep.

152. The waking and dreaming worlds are resolved (during dreamless sleep) into Máyá their germ, just as the tree exists in its seed. Hence the mental retenta of the whole series of phenomena exist in their germ, Máyá (during dreamless sleep.)

153. Impersonal Intelligence is reflected in these mental retenta. This reflection of Intelligence (is) unperceived (and) must be inferred, as in the case of the cloud-ether (see śl : 21, supra).

154. That germinal Máyá with that very reflection upon it of impersonal Intelligence is modified (into personal consciousness) in the form of the phenomenal mind. Hence it is that the reflection of Intelligence clearly shines upon the mind.

155. "Máyá produces the personal soul and God by means of a reflection" (upon itself of Intelligence): thus it has been revealed. These two (God and the personal soul) are practically like the cloud-ether and water-ether.

156. Máyá is like the cloud. The mental retenta are like the drops of water in the cloud. The reflection of Intelligence (in these mental retenta) is like the (reflection of) ether in the drops of water.

मायाधीनश्चिदाभासः श्रुतो मायी महेश्वरः ।
अन्तर्यामी च सर्वज्ञो जगद्योनिः स एव हि ॥ १५७ ॥
सौषुप्तमानन्दमयं प्रक्रम्यैवं श्रुतिर्जगौ ।
एष सर्वेश्वर इति सोऽयं वेदोक्त ईश्वरः ॥ १५८ ॥
सर्वज्ञत्वादिके तस्य नैव विप्रतिपद्यताम् ।
श्रौतार्थस्याऽवितर्क्यत्वान्मायायां सर्वसम्भवात् ॥ १५९ ॥
अयं यत्सृजते विश्वं तदन्यथयितुं पुमान् ।
न कोऽपि शक्तस्तेनायं सर्वेश्वर इतीरितः ॥ १६० ॥
अशेषप्राणिबुद्धीनां वासनास्तत्र संस्थिताः ।
ताभिः क्रोडीकृतं सर्वं तेन सर्वज्ञ ईरितः ॥ १६१ ॥
वासनानां परोक्षत्वात्सर्वज्ञत्वं न हीक्ष्यते ।
सर्वबुद्धिषु तद्दृष्ट्वा वासनास्वनुमीयताम् ॥ १६२ ॥

157. That reflection of Intelligence which has Máyá as its subordinate is revealed as the Máyá-associated one, the great Lord. The same is the internal ruler, the omniscient, the source of the world.

158. Referring to (the Intelligence reflected in) the sheath of bliss, during dreamless sleep, Revelation thus declares:—"This is Lord of all." This is the Lord declared in the Veda.

159. There should be no argument with reference to his omniscience and other attributes; because what Scripture declares is beyond debate, and all is possible with Máyá.

160. All that this one (the Lord) creates no man can alter. He is therefore declared Lord of all.

161. During dreamless sleep, in the sheath of bliss (tatra), reside the mental retenta of all living things. By these retenta the whole universe is embraced. Hence he is declared omniscient.

162. His omniscience is not present to our consciousness, because the mental retenta are beyond our consciousness. Having observed Intelligence (tat) in all minds, we can infer Intelligence in the mental retenta (of which minds are products).

Digitized by Google

विज्ञानमयमुख्येषु कोशेष्वन्यत्र चैव हि ।
अन्तस्तिष्ठन् यमयति तेनान्तर्यामितां व्रजेत् ॥ १६३ ॥
बुद्धौ तिष्ठन्नान्तरोऽस्या धियाऽनीक्ष्यश्च धीवपुः ।
धियमन्तर्यमयतीत्येवं वेदेन घोषितम् ॥ १६४ ॥
तन्तुः पटे स्थितो यद्वदुपादानतया तथा ।
सर्वोपादानरूपत्वात्सर्वत्रायमवस्थितः ॥ १६५ ॥
पटादप्यान्तरस्तन्तुस्तन्तोरप्यंशुरान्तरः ।
आन्तरत्वस्य विश्रान्तिर्यत्रासावनुमीयताम् ॥ १६६ ॥
द्वित्र्यान्तरत्वकक्षाणां दर्शनेऽप्ययमान्तरः ।
न वीक्ष्यते ततो युक्तिश्रुतिभ्यामेव निर्णयः ॥ १६७ ॥
पटरूपेण संस्थानात् पटस्तन्तोर्वपुर्यथा ।
सर्वरूपेण संस्थानात्सर्वमस्य वपुस्तथा ॥ १६८ ॥

163. (The Lord), residing within the sheaths of which the congnitional is the first, and within other (sc. insentient) things rules them. Hence he is called the internal ruler.

164. Residing in the mind; within the mind; unperceived by mind; whose body mind is: (who) rules the mind:—thus the Veda proclaims (an internal ruler).

165. Just as threads reside in the cloth as its material cause, so the internal ruler resides in all things as the material cause of all.

166. Within the cloth there is the thread; within the thread is the filament. Where our conception of containing and contained ends, there, by inference, must we posit the internal ruler.

167. Though we observe some two or three things, one within the other, this (the ruler) within (all, sc. the inmost) is not thus observed. Hence certainty (regarding him is to be gained) by argument and Scripture.

168. Just as cloth is the body of the threads, because (these exist) in the form of cloth, so the universe is the body of the Lord, for he exists in the form of the universe.

164. cf. Bṛihadár. III. 7. 22.

Digitized by Google

तन्तोः सङ्कोचविस्तारचलनादौ पटो यथा ।
अवश्यमेव भवति न स्वातन्त्र्यं पटे मनाक् ॥ १६९ ॥
तथान्तर्याम्ययं यत्र यया वासनया यथा ।
विक्रियेत तथावश्यं भवत्येव न संशयः ॥ १७० ॥
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ १७१ ॥
सर्वभूतानि विज्ञानमयास्ते हृदये स्थिताः ।
तदुपादानभूतेशस्तत्र विक्रियते खलु ॥ १७२ ॥
देहादिपञ्जरं यन्त्रं तदारोहोऽभिमानिता ।
विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ॥ १७३ ॥
विज्ञानमयरूपेण तत्प्रवृत्तिस्वरूपतः ।
स्वशक्त्येशो विक्रियते मायया भ्रामणं हि तत् ॥ १७४ ॥

169. 170. Just as in compressing, expanding and moving the threads, the cloth is of necessity affected in like manner—the cloth is not in the least independent of the threads—so the world necessarily conforms to the mental retenta by which this internal ruler is modified. Of this there can be no doubt.

171. "The Lord dwells in the hearts of all creatures, Arjuna! making all creatures revolve by his power, as if mounted on a machine."

172. All creatures are the cognitional sheaths. These reside in the heart. Here the Lord, who is the material cause of these sheaths, is indeed modified (in the form of the cognitional sheaths).

173. The body as a cage is the machine, the mounting on which is personal consciousness. Activity with regard to things good and bad is the revolution.

174. The Lord is modified by his own power in the form of the cognitional sheaths, according to the activities belonging to these. This is what is meant by his making all creatures revolve by his power.

171. Bhagavad Gítá XVIII, 61.

अन्तर्यमयतीत्युक्त्याऽयमेवार्थः श्रुतौ श्रुतः ।
पृथिव्यादिषु सर्वत्र न्यायोऽयं योज्यतां धिया ॥ १७५ ॥
जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः ।
केनापि देवेन हृदिस्थितेन यथा नियुक्तोऽस्मि तथा करोमि॥१७६॥
नार्थः पुरुषकारेणेत्येवं मा शङ्क्यतां यतः ।
ईशः पुरुषकारस्य रूपेणापि विवर्तते ॥ १७७ ॥
ईदृग्बोधेनेश्वरस्य प्रवृत्तिर्मैव वार्यताम् ।
तथापीशस्य बोधेन स्वात्मासङ्गत्वधीजनिः ॥ १७८ ॥
तावता मुक्तिरित्याहुः श्रुतयः स्मृतयस्तथा ।
श्रुतिस्मृती ममैवाज्ञे इत्यपीश्वरभाषितम् ॥ १७९ ॥
आज्ञाया भीतिहेतुत्वं भीषाऽस्मादिति हि श्रुतम् ।
सर्वेश्वरत्वमेतत्स्यादन्तर्यामित्वतः पृथक् ॥ १८० ॥

175. This same sense (of the Lord's making all creatures revolve) is revealed in the declaration—"he rules within." This method (of explanation) must be applied universally to earth and like (insentient) things.

176. I know the right and do it not. I know evil and renounce it not. As I am urged by a certain deity within my heart so I act.

177. The effort of man then is futile:—doubt not thus, for the Lord is modified in the form of human effort.

178. The energy of the Lord is not to be rejected because of such knowledge (sc. that he is modified in the form of human effort). For, it is through such knowledge of the Lord that there arises a consciousness of the unrelatedness of Self.

179. Śruti and Smṛiti declare that final emancipation comes through the knowledge (of the unrelatedness of Self). "Śruti and Smṛiti are indeed my commands"—thus spoke the Lord.

180. Scripture declares that his command produces fear, as in "Through fear of him the wind blows." His supreme lordship is distinct from his character as the internal ruler.

(to be continued)

A. V.

॥ श्रीः ॥

॥ परिभाषेन्दुशेखरस्याकाण्डताण्डवम् ॥

(*Continued from page* 488 VOL VI.)

एवमेव ककारादिपदघटककारप्रत्ययावयवककारे साध्यदलीयस्वपदेन ध्रियमाणे तद्वैशिष्ट्यस्य निरुक्तसम्बन्धत्रयेण प्रकृत्यवयवककारे सत्त्वेऽपि व्यभिचारो वारणीयः । कारप्रत्ययस्य द्योतकत्वं बोधकत्वं प्रकृतेरेवेति पक्षे तु न कापि शङ्का ।

एवं साध्यदलीयविषयतायां शास्त्रघटकपदप्रयोज्यत्वमपि विशेषणं बोध्यम् । अन्यथा तवाचकतच्छब्दावयवतकारे साध्यदलीयस्वपदेन ध्रियमाणे तद्वैशिष्ट्यस्य निरुक्तसम्बन्धत्रयेण तशब्देऽसत्त्या तत्पर्याप्तश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविषयताप्रयोजकानवयवत्वात्मकसाध्यस्य तत्रासत्त्वेन हेतोश्च सत्त्वेन व्यभिचारो दुर्वारः । उक्तरीत्या तु तत्रत्यविधेयतायास्तथाविधत्वाभावेन प्रागुक्तदिशा साध्यस्यापि सत्त्वाच्च व्यभिचार इति दिगिति वदन्ति ।

केचित्तु अनुबन्धा अनेकान्ता इत्यत्र विधेये कदाप्यदर्शनं न हेतुः । शरीरादावदर्शनस्य वृत्ताद्यनवयवत्वासिद्धिं प्रत्यप्रयोजकत्वात् । गुणशब्दावयवगकारे व्यभिचाराच्च । योऽत्रावयव इत्याद्युदाहरणप्रदर्शनानन्तरं हेतुप्रदर्शनस्यासाम्प्रदायिकत्वाच्चेति प्रकृतेऽनुमानद्वयम् । तत्र प्रथमानुमाने साध्यं बोधकानवयवत्वम्, हेतुस्तु बोधकघटकत्वेनोपलब्धिविषयत्वाभावः । बोधकघटकत्वेनोपलब्धिविषयत्वाभावनिर्णयं प्रति च बोध्यघटकत्वेनोपलब्धिविषयत्वाभावो हेतुः । प्रथमानुमानहेतुश्चातिप्रसिद्धत्वाच्चोक्त इति न काप्यनुपपत्तिरित्याहुः ।

तत्रेदं वक्तव्यम् । द्वितीयानुमितिहेतावप्रयोजकत्वादिशङ्कानिरासाय स्वं रूपमित्येतच्छास्त्रजन्यबोध्यबोधकसमानानुपूर्वीकत्वनिश्चयात्मकतर्कादेरवश्याभ्युपेयतया प्रथमानुमानहेतावेव तद्रीत्याऽप्रयोजकत्वशङ्कानिरासः कुतो नाङ्गीक्रियत इति ।

अन्ये तु विधेये कदाप्यदर्शनं विधेयानवयवत्व एव हेतुरिति वदन्ति ।

तत्रेदं वक्तव्यम् । अनुबन्धविनिर्मुक्तपदार्थोपस्थितिमभ्युपगच्छतां नवीनानां मतेऽनुबन्धरहित एव बोध्यत्वनिर्णयेऽनुबन्धेषु तदनवयवत्वस्य सिद्धतया तत्साधनाय कथमनुमानं प्रवृत्तमिति ।

नन्वनुबन्धानामनवयवत्वे शिदादिपदानामवयवित्वेनान्यपदार्थबोधकत्वानुपपत्तिरत आह । शिदिति (१) ।

व्याख्यानत (२) इति । दघ्रवश्चकारवैयर्थ्यमूलकादित्यर्थः ।

अत्र केचित् । उक्तज्ञापकेनैकस्यानुबन्धस्य न पूर्वपरोभयोपकारकत्वमिति कल्प्यत इत्याहुः ।

तत्रेदं वक्तव्यम् । तावतापि कृणवयवणकारस्य परोपकारकत्वमेव कुतो नेति ।

केचित्त्वन्त्यत्वप्रयुक्तेत्संज्ञाभाजां पूर्वोपकारकत्वमादित्वप्रयुक्तेत्संज्ञाभाजां परोपकारकत्वमित्याहुः ।

तत्रेदं वक्तव्यम् । कृणो णकारस्यान्त्यत्वप्रयुक्ताऽऽदित्वप्रयुक्ता वेत्संज्ञेत्यस्य किं निर्णायकमिति ।

अन्ये तु स्वघटितपदाघटितपदघटके स्वनिरूपितावयवत्वमारोप्यत इत्याहुः ।

तत्रेदं वक्तव्यम् । लोपशित्यत्रत्यशकारस्य लोपशब्दघटितपदाघटितपदघटकत्वाभावेन तत्र तन्निरूपितमवयवत्वं नारोप्यतेति भाष्या (३) सङ्गतिः । एवमध आ अटित इत्यत्राकारस्याटधातुघटितपदाघटितपदघटकत्वाभावेन तत्र तन्निरूपितावयवत्वारोपाप्रसक्त्या तत्र दोषदानपरभाष्या- (४) सङ्गतिश्चेति ।

(१) शित्किदित्यादौ समीपेऽवयवत्वारोपेण समासो बोध्यः । मू० ॥

(२) घुस्कृणाकठेत्यादौ णित्त्वप्रयुक्तं कार्य्यं पूर्वस्यैवेत्यादि तु व्याख्यानतो निर्णेयम् । मू० ॥

(३) इदं भाष्यं प्रथमाध्यायप्रथमपादनवमाह्निकान्तस्थालोन्त्यादितिसूत्रस्थम् ॥

(४) इदं प्रथमाध्यायतृतीयपादप्रथमाह्निकान्तःस्थोपदेशेऽजनुनासिक इत्येतत्सूत्रस्थं भाष्यम् ॥

Digitized by Google

सम्प्रदायविदस्तु स्वविशिष्टे स्वनिरूपितावयवत्वमारोप्यते स्ववैशिष्ट्यं च स्वसमभिव्याहृतत्व'स्वाघटितानुबन्धेतरघटितपदाघटकत्वोभयसंबन्धेन । इत्थं च कवैशिष्ट्यस्य इणो ण्यकारेऽसत्त्वेन तत्र तन्निरूपितावयवत्वस्य नारोपः । लोपशब्दवैशिष्ट्यस्य शकारेऽटधातुवैशिष्ट्यस्य चाकारेऽसत्त्वा तत्र तन्निरूपितावयवत्वस्य चारोपेण पूर्वोक्तभाष्यस्यापि नासङ्गतिरिति दिगित्याहुः ।

परसमीपे(१)ति । परश्चासौ समीपश्चेति कर्म्मधारयः । समीपवर्त्तिनोऽपि परस्यावयवत्वेन बोधस्तु सामीप्यमूलकावयवत्वारोपेणेति भावः । एवमेव शित्कित्इत्यादौ बहुव्रीहेरप्युपपत्तिर्बोद्धव्या ।

अनेकान्तत्वपक्षे उदीचां माङ इति क्त्वात्वनिर्देशो ज्ञापकोऽवयवत्वेति विहितस्य सर्वादेशत्वाभावः फलमिति केचित् ॥ ४ ॥

नन्वेवमप्यस्यानुमानस्य चक्रकग्रस्तत्वम् । तथाहि । अनवयवत्वनिर्णयोऽनुमित्यधीनः । अनुमितिस्तु निरुक्तविधेयतावच्छेदकधर्म्माभावज्ञानाधीना । तादृशधर्म्माभावज्ञानं च तस्य लोप इत्येतद्वाक्यार्थज्ञानाधीनम् । वाक्यार्थज्ञानं च तत्पदार्थेत्संज्ञावज्ज्ञानाधीनम् । इत्संज्ञाज्ञानं च हलन्त्यमित्येतद्वाक्यार्थज्ञानाधीनम् । तद्वाक्यार्थज्ञानं च परसमीपादौ लक्षणाज्ञानाधीनम् । लक्षणाज्ञानं चानवयवत्वनिश्चयाधीनमिति ।

किञ्चानङ्वयवनकारे गणधात्वन्त्यवाकारे च तादृशहेतोः सत्त्वात्साध्यस्य चासत्त्वाद्व्यभिचारः । तादृशविधेयतावच्छेदकधर्म्माभावस्य क्वचिदपि लक्ष्ये श्रूयमाणत्वेनैव निर्णयतया प्रकृतेऽपि तन्निर्णयात् । तादृशविधेयतावच्छेदकधर्म्माभावनिर्णयस्य तस्य लोप इत्येतच्छास्त्रीयोद्देश्यतावच्छेदकावच्छिन्नत्वनिर्णयप्रयोज्यत्वाङ्गीकारेऽप्युक्तचक्रकापरिहाराच्चेत्यतोऽवयवत्वसाधिकामनुमितिं न्याय्यतया प्रतिजानीते । वस्तुत (२) इति ।

बोधकावयवत्वं ह्यत्र पक्षे साध्यम् । लक्ष्ये त्वनुबन्धविनिर्मुक्तस्यैव पदार्थस्य प्रक्षालनादिति न्यायेनोपस्थित्योभयपक्षेऽपि बोध्यानवयवत्वमनुबन्धानां सिद्धमेव ।

(१) हलन्त्यमित्यत्रान्त्यशब्दः परसमीपबोधकः ॥ ४ ॥ मू० ॥

(२) वस्तुतस्तु (एकान्ता इत्येव न्याय्यम्) । मू० ॥

Digitized by Google

तत्र हेतुमाह । शास्त्र(१) इति । तत्रोपलम्भमात्रस्य हेतुतायां काकादीनामपि वृक्षादिषूपलम्भसत्त्वात्तद्‌घटकत्वात्मकसाध्यस्य चासत्त्वाद्व्यभिचारः स्यादतोऽन्यत्रानुपलम्भविशिष्टस्य तत्रोपलम्भस्य तदवयवत्वसाधकतयोपन्यासः ।

अत्रापि हेतौ व्यतिरेकव्याप्तिमुदाहरति । अनवयव(२) इति ।

एवमपि छिन्नशाखादे रथ्यादावुपलम्भाद्दृष्टान्तासङ्गतिस्सनवयवनकारादीनामप्यवच्छेदकत्वादिनाऽन्यत्राप्युपलभ्यमानत्वेन हेतोः पक्षतावच्छेदकावच्छेदेनावृत्तितया स्वरूपासिद्धिश्चेत्यत उक्तमेकजातीयेति । एवञ्च समानजातीयसंबन्धेनान्यत्रोपलम्भाभावविशिष्टस्य तत्रोपलम्भस्य तद्घटकत्वविषयकानुमितिहेतुत्वम् । ततश्च छिन्नशाखादेर्न समानजातीयसम्बन्धेन रथ्यादावुपलम्भः । काकादेस्तु समानजातीयसंयोगसंबन्धेनैव वृक्षातिरिक्तघटादावप्युपलम्भसत्त्वान्न व्यभिचारोऽपीति भावः । यद्यप्युत्पन्नविनष्टघटादेश्चक्रादेरन्यत्र संयोगसंबन्धेनानुपलभ्यमानत्वात्ततो व्यभिचारः प्रसज्यते । तथापि हेतुदलप्रविष्टोऽन्यत्रोपलम्भाभावोऽन्यत्रोपलब्धियोग्यत्वाभावो बोध्यः । एवञ्चोत्पन्नविनष्टघट एकजातीयसंबन्धेनान्यत्रोपलम्भस्यासत्त्वेपि तद्योग्यत्वसत्त्वेन हेतोरसत्त्वान्न व्यभिचारः । गुणक्रिययोः स्वाश्रयातिरिक्ते तुल्यजातीयसंबन्धेन नोपलभ्यमानत्वमाश्रयभेदेन गुणादिभेदादिति तत्र व्यभिचारः स्यादिति न शङ्क्यम् । साङ्ख्यमत इव गुणक्रियासमुदायस्यैव वैयाकरणमतेऽपि द्रव्यत्वाङ्गीकारेण तत्र साध्यस्यापि सत्त्वात् । न च बोधकघटकत्वेनोपलब्धिविषयत्वघटितहेतोरसिद्धिः । बोधकत्वस्यानुबन्धसहितेऽनिश्चयादिति वाच्यम् । समुदायाद्विभक्तिदर्शनस्यैवानुबन्धविशिष्टे बोधकत्वनिश्चायकत्वात् । एवं चावयवत्वसाध्यकानुमाने समुदायाद्विभक्तिदर्शनस्यैव फलतो हेतुत्वं पर्य्यवस्यति ।

निगमयति । नैव(३)मिति । (शेषमग्रे)

काशीस्थराजकीयप्रधानपाठालयाध्यापकः श्रीद्विवेदहरिनाथमनीषी ।

---

(१) शास्त्रे तत्रोपलम्भादन्यत्रानुपलम्भाच्च । मू० ॥

(२) अनवयवो हि काकादिरेकजातीयसंबन्धेन यद्वृक्षादिषूपलभ्यते । मू० ॥

(३) नैवमयम् । मू० ॥

Digitized by Google

॥ योगवार्त्तिकम् ॥

(*Continued from page* 576 Vol VI.)

प्रकृतोपपत्तये चित्तस्य स्वाभासत्वं निराकृतम् इदानीं सदाज्ञाता-श्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामादिति सूत्रस्योपपादकं सूत्रमेतेनैव प्रसङ्गेनोत्थापयति । कथमिति । नन्वपरिणामित्वे विषये संचाराभावात्त-दाकारपरिणामाभावाच्च कथं चित्तज्ञातृत्वरूपं चित्तभोक्तृत्वं पुरुषस्य स्यात् । चित्तस्थले हि घटादिविषयग्रहणं चित्तस्य संचारात्तदाकारपरि-णामाच्च दृष्टमित्यर्थः । तत्र सिद्धान्तसूत्रम् ।

चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम् ॥२२॥

अप्रतिसंचारायाा अपि चितेः स्वीयबुद्धिवृत्तिदर्शनं बुद्धिवृत्त्याकार-तापत्त्यैव भवतीत्यर्थः । अयं भावः । ज्ञातुः संचारो न साक्षादेव ज्ञाने हेतुः किं त्वर्थाकारता हेतुः सन्निकर्षद्वारा । अन्यथा स्वप्नादौ मनःसंचाराभावे-नार्थभानायोगात् । अतो विभुत्वेनैव सर्वत्र सन्निकृष्टस्यात्मनः संचारो नापेक्ष्यतइति । आपत्तिग्रहणं च पुरुषस्य पारमार्थिकाकारप्रतिषेधार्थम् । यथा हि विषयासन्निकर्षकालेपि स्वप्नादौ तद्भानायोगत्या चित्तस्य तदा-कारः परिणाम इष्यते नैवं पुरुषस्य चित्तवृत्त्यभावेपि तद्भानं भवति येन पुरुषेपि वृत्त्याकारः परिणाम इष्येत किं तु स्फटिके सन्निकृष्टजपालौहि-त्यस्येव चित्तवृत्तेः प्रतिबिम्बमेव लाघवादिष्यते उभयत्राकाराख्यपरिणाम-कल्पने गौरवात् स्फटिकदर्पणादेः स्वप्रतिबिम्बितवस्तुप्रकाशकत्वस्य सिद्ध-त्वाच्चेति तदिदं वृत्तिबिम्बितमेव*वृत्त्याकारापत्तिरित्युक्तं सूत्रकारेणेति । भाष्यकारः पुरुषस्य बुद्ध्याकारतां प्रतिपादयितुमादौ बुद्धेरेव रूपमाह । अप-रिणामिनीति । भोक्तृशक्तिः पुरुषाख्या ऽपरिणामिनी अतो नापि गतिमती ततो न स्वप्रजायतोश्चित्तस्येव पुरुषस्य ज्ञानं संभवति किं तु वृत्तिसरूपप-रिणामिन्यर्थे चितिः प्रतिसंक्रान्तेव प्रतिबिम्बरूपेण संचरितेव सती तद्वृत्ति-मनुपतति तद्वृत्तिं चेतनवत्करोतीत्यर्थः । अन्यथा हि घटमहं जानामीति

* वृत्तिबिम्बितत्वमेवेति चेद्भविष्यत्साधुतरम् ॥

Digitized by Google

बुद्धिवृत्त्यनुपपत्तिः । बुद्धेरनहंत्वात् अचेतनत्वाच्चेत्युत्तरसूत्रे वक्ष्यति । अथा-विवेकादेवैतादृशी बुद्धिवृत्तिरिति चेत्सत्यं, तथाप्यविवेक एव प्रतिबिम्बमूलकः दोषान्तराभावात् तथा चेतनभानार्थमपि वृत्तौ तत्प्रतिबिम्बः कल्प्यते बुद्ध्यारूढतयैव शब्दादिवदात्मनोऽपि भानादिति । इदमेव प्रतिबिम्बबुद्धेश्चिच्छायापत्तिरित्युच्यते तथा बुद्धेरर्थाकारतावत् आत्माकारतेत्यप्युच्यतइति मन्तव्यम् । यद्यपि घटाद्याकारपरिणामवदात्माकारपरिणाम एव बुद्धेर्भवति तथापि प्रतिबिम्बतुल्यतया स एव प्रतिबिम्बमप्युच्यते । बुद्धेरूपं प्रदर्श्य पुरुषस्य तदाकारतापत्तिं दर्शयति । तस्याश्चेति । हिशब्दोऽत्रावधारणे तस्या अपि चितेर्ज्ञानरूपा वृत्तिर्बुद्धिवृत्त्यविशिष्टेवेत्याख्यायते व्यवह्रियते । तत्र हेतुः प्राप्तेत्यादि । प्राप्तश्चैतन्योपग्रहश्चैतन्यप्रतिबिम्बं येन एतादृशं रूपं यस्या बुद्धिवृत्तेस्तदनुकारिमात्रतया तत्प्रतिबिम्बाधारतामात्रेणेत्यर्थः । द्रष्टा दृशिमात्र इति सूत्रेपीदमेव वाक्यं भाष्यकारैः प्रमाणत्वेनोपन्यस्तं, वृत्तिसारूप्यमितरत्रेत्यत्राप्येतदुक्तमिति स्मर्त्तव्यम् । ननु जानाम्यहं क्रुद्धोऽहं भीतोऽहमित्यादिरूपता वृत्तेरेवेति प्रागेवोक्तं तर्हि निर्विकल्पकस्य वृत्तिबोधस्य स्वरूपं कीदृशमिति । उच्यते । यादृशं ज्ञानक्रोधादिवृत्तीनां रूपं तादृशमेव बिम्बप्रतिबिम्बोद्ग्रहणात् तदेव वृत्तिबोधस्य रूपं, स च वृत्तिबोधो वृत्त्यविवेकेन जानामीतिवृत्त्यन्तरस्य विषय एव भवति ज्ञान-चितिबोधादिशब्दानां पर्यायत्वादिति । एकाकारतापत्तावागममपि प्रमा-णयति । तथा चोक्तमिति । न पातालमित्यादेरयमर्थः । गुहाहितं गह्वरेष्ठं पुराणमित्यादिश्रुतिस्मृतिषु यस्यां गुहायां गुह्यं शाश्वतं ब्रह्म अंशांश्यभे-दात् । आत्मसामान्यं निहितं संगुप्तम् इति गीयते । सा गुहा न पा-तालादि किं तु ब्रह्मवृत्त्यविशिष्टां बुद्धिवृत्तिमेव कवयः पण्डिताः पश्य-न्तीति । अविशिष्टता च परस्परं प्रतिबिम्बनादुभयोरेव विषयाकारत्वचेत-नसाम्यमित्युक्तम् । अतो विविच्य ग्रहणायोग्यतयाऽवस्थितिरेवात्मनः संगोपनं बुद्धाविति श्लोकतात्पर्यार्थः । तदेतदेकाकारत्वमादित्यपुराणेप्युक्तं

नित्यः सर्वगतो ह्यात्मा बुद्धिसन्निधिसत्तया ।
यथा यथा भवेद्बुद्धिरात्मा तद्वदिहेष्यते ॥

इति । ननु भवतु चितेः स्वबुद्धिसंवेदनं शब्दादिसंवेदनं तु कथं भवेत् बुद्धिवच्छब्दादीनामपि चितौ प्रतिबिम्बनसामर्थ्याङ्गीकारे सर्वदेव सर्वार्थभानप्रसङ्गात् । कथं वा चितेः स्वसंवेदनम् । उक्ता ह्यनवस्था चित्तवत् पुरुषेपि समानेत्याशङ्कानिरासायोत्तरसूत्रं प्रवर्त्स्यते तत्सूत्रं भाष्यकारः प्रकारान्तरेणोत्थापयति । अतश्चेति । अतो बुद्धिपुरुषयोर्वेद्यवेदृभावाच्च तदन्यथानुपपत्तेश्चेति यावत् । एतत् आगामिसूत्रप्रतिपाद्यम् । अङ्गीक्रियतइत्यर्थः । चकारोऽस्मदुक्तप्रयोजनसमुच्चयार्थः ।

द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम् ॥ २३ ॥

सर्वे ग्रहीतृग्रहणग्राह्याः पुरुषस्यार्था भोग्या अस्मिन्निति सर्वार्थम् । अयं घट इत्यनन्तरं घटमहं जानामीति बुद्धेर्वृत्त्यन्तरस्य ग्रहीतृग्रहणग्राह्याकारस्यायं घट इति वृत्तिवदेव साक्षिभास्यस्य प्रायशो दर्शनात् । सर्वार्थत्वे हेतुः द्रष्टृदृश्योपरक्तमिति । द्रष्टृदृश्योभयाकारमित्यर्थः । बाधकं विना सन्निकृष्टवस्त्वाकारतास्वाभाव्यस्य चित्ते सर्वसंमतत्वादिति भावः । तथा च बुद्धिसंवेदनमेव बुद्धिस्थस्य शब्दादेः स्वस्य च संवेदनं यद्वि शब्दादिपुरुषोभयाकारा बुद्धिवृत्तिः पुरुषे प्रतिबिम्बिता भासते इदमेव शब्दादेः पुरुषस्य च दृश्यत्वं बुद्धेर्दृश्यत्ववदित्यतो न पुरुषदर्शनार्थं द्रष्ट्रन्तरापेक्षा नापि कर्मकर्तृविरोधो ऽन्तःकरणद्वारत्वादिति भावः । एतेन सर्वार्थित्वेन भाष्यकारोक्तं बुद्धिपुरुषयोरविशिष्टाकारत्वमपि सिद्धम् । बुद्धेः पुरुषाकारतातिरेकेण पुरुषवत्त्वासंभवात् । पुरुषस्य बुद्ध्याकारतायाश्च पूर्वसूत्रेष्वेवोक्तत्वादिति । वेद्यत्वान्यथानुपपत्त्या यः सिध्यति तं बुद्धौ पुरुषोपरागं प्रतिपादयन्सप्तमसूत्रं व्याचष्टे । मनो हीति । उपरक्तं तदाकारम् । अन्यथा ग्रहणानुपपत्तेः । युक्तिपूर्वकं द्रष्टुपरागमाह । यत्स्वयं चेति । तन्मनः स्वयमपि पुरुषस्य विषयत्वात् स्वीयचैतन्यलक्षणवृत्तिविशिष्टेन पुरुषेण विषयिणा संबद्धम् आकारितं सन्निकर्षस्य ग्रहणहेतुत्वात् । बुद्धिवृत्तौ च पुरुषस्यासङ्गस्य प्रतिबिम्बातिरेकेणानित्यसन्निकर्षासंभवादिति । तस्मादेतच्चित्तमेवोभयोपरक्ततया शब्दादिविषयरूपेण विषयिपुरुषरूपेण च निर्भासते । साक्षिणि प्रतिबिम्बितं सदिति विषयविषयिनिर्भासं, तत्र हेतुः

चेतनाचेतनरूपापन्नं तदाकारम् । एतदेव विवृणोति । विषयात्मकमप्यविषयात्मकमिवेति अचेतनमपि चेतनमिवेति । इवशब्दार्थं दृष्टान्तेनाह । स्फटिकमणिकल्पमिति । यथा एक एव स्फटिकमणिः पार्श्वद्वयस्थयोर्जवेन्द्रनीलयोः प्रतिबिम्बनात्स्वीयरूपेण सह त्रिरूप इव भवतीति । एवं चित्तमपि विषयात्मनोः प्रतिबिम्बनात् ग्रहीतृग्रहणग्राह्यात्मकरूपावयववदिव भवति, अतः सर्वार्थमित्युच्यत इत्यर्थः । चित्तमेवेत्येवकारेणान्येषां सन्निकर्षसत्त्वेऽप्याकारग्रहणसामर्थ्यं नास्तीत्युक्तम् । अत्र च स्फटिकदृष्टान्तो न सर्वांशे बुद्धेः स्वार्थाकारपरिणामस्यैव स्वप्रानुरोधेनेष्टत्वात् स्फटिके च प्रतिबिम्बमात्रस्य स्वीकारात् । किं तु तत्तद्वस्तुसन्निकर्षेण तत्तद्रूपतया प्रतीयमानतामात्रांशे स्फटिकस्य दृष्टान्त इति मन्तव्यम् । यदेतदुक्तं चित्तस्य द्रष्टृदृश्यसारूप्यम् इदमेव भवबीजाविवेकस्य कारणमिति प्रतिपादयति । तदनेनेति । केचिद्बाह्यार्थवादिनः चिन्नातिरिक्तचेतनानभ्युपगन्तारो वैनाशिकाः । अपरे विज्ञानवादिनः । लोक्यत इति लोकः । तदुक्तं विज्ञानवादिभिः ।

अभिन्नोपि हि बुद्ध्यात्मा विपर्यासितदर्शने ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥

इति । तेषां च वादिनामयं भावः । चित्तस्य चेत्सर्वरूपता स्वीकृता तर्ह्यलं पुरुषेण बाह्यार्थेन वा अनादिवासनावशात् स्वत एव चित्तस्यानन्तपरिणामस्वीकारसंभवात् । दुग्धस्य दधिरूपतावदिति । अनुकम्पामुखेन तेषु समाधानमाह । अस्ति हीति । इत्यन्तं बीजमित्यर्थः । एतेन यदाधुनिका वेदान्तिब्रुवा आहुः । विषयदोषात् करणदोषाद्वा चैतन्ये भ्रमो न भवति विषयकरणदोषयोर्भ्रममात्रकल्पितत्वेन भ्रमात्पूर्वं तयोरभावात्, अपि त्वनिर्वचनीयाविद्यामात्रादिति । तद्धेयम् । चैतन्येऽपि चित्तवदेव सकलवस्तुप्रतिबिम्बेन सारूप्यस्यैव विषयगतदोषस्य प्रपञ्चारोपहेतुतालाभात् सर्ववस्तूनां भ्रममात्रकल्पितत्वस्य चासिद्धेः शुक्तिरजतादिस्थले क्लृप्तेन सारूप्यदोषेणैवाध्यासोपपत्तावध्यासहेतुतया तदभिमतानाद्यविद्यायां कल्पनानवकाशाच्चेति । तत्रादौ विज्ञानवादिनं बोधयति । समाधीत्यादिना रूपमवधार्यत इत्यन्तेन । भ्रमस्थले ज्ञेयार्थस्य चित्तमात्रताया

Digitized by Google

अस्माभिरप्यभ्युपगमात् । समाधिप्रज्ञायां प्रज्ञेय इत्युक्तमर्थस्य सत्यत्वला-भाय । तथा चायमर्थः । विवादगोचरोऽर्थश्चित्ते प्रतिबिम्बितो योऽनुभूयते स तस्य चितस्यानम्बनीभूतत्वाच्चित्तादन्यः । तत्र हेतुः । स चेदिति । स चेदर्थश्चित्ताकारमात्रं स्यात् कथं तर्हि प्रज्ञयैव प्रज्ञाकारो गृह्येत कर्मक-र्तृविरोधात् पुरुषस्यानङ्गीकारात् । पुरुषप्रज्ञया पुरुषसिद्धिरर्थप्रज्ञया अर्थ-स्यापि सिद्ध्यौचित्यादिति । अतो विज्ञानातिरिक्तो विज्ञेयोऽर्थः सिद्धः । अनयैव युक्त्या पुरुषानभ्युपगन्तारं बाह्यार्थवादिनमपि बोधयति । तस्मादिति । तस्मात्प्रज्ञारूपस्य प्रज्ञाग्राह्यत्वाभावादेव प्रज्ञायां प्रति-बिम्बीभूतः प्रतिबिम्बरूपेण जातोऽर्थो ज्ञानाकारो येन गृह्यते स पुरुष इत्यपि सिद्धमित्यर्थः । ननु स्वमगृहीत्वैव स्वस्य प्रज्ञारूपं गृह्णातु आका-शावरणेऽपि शब्दवदिति चेन्न । शब्दवत्केवलस्याकारस्याग्रहणात् । अयं घट इति ज्ञानमभूदित्यादिरूपेण रूपादिवद्धर्मिपुरस्कारेणैवाकारानुभवादिति । ननु कर्मकर्तृविरोधः सूत्रकारेणैवोक्तो न तत्स्वाभासमित्यनेनातो भाष्य-कारस्य पौनरुक्त्यमिति, मैवम् । तत्र चित्तस्य चित्तग्राह्यत्वं निराकृतमत्र चित्ताकारस्य चित्तग्राह्यत्वं निराक्रियते इति विशेषादिति । पुरुषचित्तत-दर्थानां यथोक्तप्रकारैर्विवेकज्ञानमेव तत्त्वज्ञानमिति वेदान्तोक्तोपासनादि-व्यावृत्त्यर्थं नास्तिकादिज्ञाननिरसनार्थं चावधारयति । एवं ग्रहीत्रिति । ग्रहीत्रादित्रितयं परस्परविजातीयतया ये विभजन्ति विवेचयन्ति तएव सम्यग्दर्शिनः तैरेव पुरुषो लब्धः । अन्ये तु भ्रान्ता इत्यर्थः । तथा च श्रुतिः ।

यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥

'अथात आदेशो नेतिनेति' 'न ह्येतस्मादिति नेत्यन्यत्परमस्ती'त्यादिः ॥

स्मृतिश्च ।

अव्यक्ताद्ये ऽविशेषान्ते विकारेऽस्मिंश्च वर्तते ।
चेतनाचेतनान्यत्वज्ञानेन ज्ञानमुच्यते ॥

इत्यादि । 'आत्मैवेदं सर्वं' 'ब्रह्मैवेदं सर्वं' 'वासुदेवः सर्वमि'त्यादिश्रु-तिस्मृतयस्तु शक्तिमदादावभेदेनैवोपासनार्थं प्रवर्तन्त इति न तद्विरोधः । एतेन

जीवात्मप्रकरणेषु आत्मैक्यश्रुतीनामवैधर्म्यलक्षणाभेदेन विवेकएव तात्पर्यमिति द्रष्टव्यम् । विवेकज्ञानस्यैव सम्यग्ज्ञानतया मोक्षहेतुत्ववचनात् । परमात्मप्रकरणे तु जीवादपि विवेकेन परमात्मन एकस्यैवात्मत्वे तात्पर्यमिति मन्तव्यम् । द्वितीयपादे विवेकख्यातिरविप्लवा हानोपाय इत्येवोक्तम् । अत्र तु विवेकज्ञानस्यैव सम्यग्ज्ञानत्वोपपादनेन मोक्षहेतुत्वं प्रभावितम् । विवेकस्वरूपं च परीक्ष्यतइति विवेकः । चित्तादात्म्यविवेके हेत्वन्तरप्रदर्शकतया सूत्रमवतारयति । इतश्चेति । इतश्च चित्तातिरिक्तः । पुरुष इति शेषः ।

तदसंख्येयवासनाभिश्चित्र*मपि परार्थं संहत्यकारित्वात् ॥२४॥

यदुक्तं चित्तस्य सर्वात्मकत्वाङ्गीकारे असंख्यवासनावशात् स्वत एव चित्तस्यापि परिणामोऽस्तु किं पुरुषेणेति । तन्न । यतस्तच्चित्तमसंख्येयवासनाभिश्चित्रितमपि परार्थं परस्यान्यस्य भोगापवर्गार्थैव विना तौ न स्थातुं परिणमितुं वा क्षमते संहत्यकारिपदार्थानां लोके परार्थत्वदर्शनादित्यर्थः । तथा च पुरुषार्थसमाप्तौ चित्तविलयेन मोक्षोपपत्तिरित्यत्रापि सूत्रतात्पर्यम् । सूत्रं व्याचष्टे । तदेतदिति । भोगापवर्गार्थं सुखादिसाक्षात्कारार्थम् । संहत्यकारित्वात् इतरसाहाय्येनार्थक्रियाकारित्वात्, गृहवदिति । गृहं हि शयनादिकार्यमास्तरणशरीरादिसाहाय्येनैव करोति पुरुषस्तु नित्यचैतन्यरूपतया चैतन्यार्थं नान्यमपेक्षते अन्या चार्थक्रिया पुरुषस्य नास्तीति स न संहत्यकारीत्याशयः । यत्तु संघातपारार्थ्यादिति सांख्ये प्रोक्तम् । तत्र संहननमारम्भकं संयोगो विवक्षितः स चावयवावयव्यभेदात् शय्यासनगृहादिषु सत्त्वादिषु चास्ति न तु पुरुषइति । ननु चित्तं संहत्यापि करिष्यति स्वार्थमपि भविष्यति कः खलु विपक्षबाधकस्तर्क इत्याकाङ्क्षायामाह । संहत्यकारिणेति । न सुखचित्तमिति । सुखचित्तं भोगचित्तं न सुखार्थं न चित्तस्य भोगार्थं तथा तत्त्वज्ञानचित्तमपवर्गचित्तं न चित्तस्यापवर्गार्थं चित्तस्यभोगापवर्गयोरपि कार्यतया सार्थकत्वनियमेनानवस्थाप्रसङ्गात् । यत्कार्यं तत्स्वार्थकमिति हि सर्वसंमतम् । अतश्चित्तस्यैतदुभयमपि परार्थमित्यर्थः । पुरुषस्य च भोगापवर्गौ स्वरूपचैतन्यरूपतया न कार्याविति नानवस्था

* चित्तमिति पाठो बहुसंमतः ।

पुरुषार्थत्वस्याविनामिति भावः । पुरुषस्य भोगो हि सुखादिसाक्षात्कारः ।
अपवर्गश्च विवेकख्यातिसाक्षात्कारो वा स्वरूपावस्थानं वा सर्वथैव
चैतन्यमात्रा एव अपरिणामित्वान्निर्धर्मत्वाच्चेति । ननु परार्थतामात्रेण
न पुरुषसिद्धिर्विनाशादीनामपि परत्वसंभवात् विनाशार्थमेवोत्पत्तेः परैर-
भ्युपगमादित्याशङ्कायामाह । यश्चेति । भोगापवर्गार्थवानेवात्र परः साध्ये
प्रविष्टोऽतो न सामान्येन येन केन चित्परेण सिद्धसाधनमर्थान्तरं
चेत्यर्थः । स्वोत्पत्त्यनन्तरक्षणिकचित्तस्य भोगार्थकतया पराभिप्रेतं सिद्धसाध-
नमपाकरोति । यस्तु किं चिदिति । स्वरूपेण आत्मरूपेण भोक्तृतयेति
यावत् । यस्त्विति । यस्त्वसौ विशेषः पुरुषाख्यः परः स कूटस्थनित्यत्वात्
न संहत्यकारीति न तस्य परार्थत्वापत्त्यानवस्थितिरित्यर्थः । तदेवं बुद्धि-
पुरुषविषयाणां विवेकं प्रदर्श्य एतज्ज्ञानाद्वाच्यं मोक्षमादौ प्रतिपादयति ।

विशेषदर्शिन आत्मभावभावनाविनिवृत्तिः ॥ २५ ॥

मातृमानमेयात्मकस्याखिलप्रपञ्चस्य तप्तायःपिण्डवदेकीभावा-
पन्नस्य यथोक्तप्रकारैरन्योन्यं विशेषदर्शिनो विवेकसाक्षात्कारिणश्चित्त-
स्यात्मभावे भावना स्वसत्ताजिज्ञासा कोऽहमासमित्यादिरूपा भाष्ये व्या-
ख्येया । तस्या भयशोकप्रवृत्तिनिवृत्त्याऽनर्थहेतोर्निवृत्तिरात्मनो मोक्षो भवती-
त्यर्थः । स्वर्गनरकमोक्षादिभिर्हि विचित्ररूपता चित्तस्यैव भवति न तु
सदैकरूपचिन्मात्रस्य न ममेत्यवधारणे सति नैवात्मभावचित्ततोदेतीति
भावः । तथा च श्रुतिः । 'एतं ह वाव न तपति किमहं साधु नाकरवं
किमहं पापमकरव'मितीत्यादिः । तदेतदुक्तं पञ्चशिखाचार्यै'रात्मस्तु
मोक्षो ज्ञानेने'ति । अत्रादौ भाष्यकार आत्मभावभावनामेव सकारणां
प्रतिपादयति । यथेत्यादिना । तत्रास्मीति । पुरुष इति शेषः । विशेषदर्शन-
बीजमिति । आत्मभावजिज्ञासाद्वारेति शेषः । इत्यनुमीयत इति । विवि-
दिषन्ति यज्ञेनेत्यादिश्रुतेः । पापक्षयाद् शुद्धमतिर्बाह्येति ज्ञानमुत्तममिति
स्मृतेश्चेति शेषः । तस्य यथोक्तकर्मवतः स्वाभाविकी ऐहिकसाधननिर-
पेक्षा, तथा च यथोक्तं कर्म आत्मभावनायाः कारणम् । तत्र च नैहिकत्वानि-

यम इत्यायातम् । ऐहिकसाधनशून्यस्य प्राक्तनतथाविधकर्माभावे च सा भावना नोदेति प्रत्युत देहाद्यात्मतायामेकरुचिर्भवतीति, अत्र पूर्वाचार्यवाक्यं प्रमाणयति । यस्याभावादिति । यस्य कर्मणोऽभावादिदं वक्ष्यमाणं फलमुक्तं पूर्वाचार्यैः । तदेवाह । स्वभावमिति । स्वभावमात्मभावं त्यक्त्वा एषां सत्कर्मशून्यानां पूर्वपक्षे नित्यदेहाद्यात्मतायामेव रुचिः श्रद्धातिशयो भवति । अरुचिश्च तत्त्वनिर्णयइत्यर्थः । आत्मभावनायाः कारणमुक्त्वा स्वरूपमाह । तत्रात्मेति । कोऽहमासं किं नरादिरूप आसं कथमासं दुःखेन दंशनः* वासं किं स्विदिदं वर्त्तमानमपि मम स्वरूपं किं देहो वा मन आदिर्वा कथं स्विदिदं केन वा प्रकारेण पुण्यपापादिना तिष्ठतीत्यादिरर्थः । के भविष्याम इत्यात्रैकत्वएव बहुवचनं, तथा च यज्जिज्ञासोत्थभयादिनिवृत्तये विशेषदर्शनं पुरुषः संपादयति सैवात्मभावनेत्यर्थः । आत्मभावनामस्य षतो व्याख्याय सूत्रवाक्यार्थमाह । सा त्विति । विशेषदर्शनात्कुतो निवृत्तिरिति प्रश्नस्योत्तरमाह । चित्तस्येति । एष भावरूपो विचित्रः परिणाम आत्मनो न भवति किं तु चित्तस्यैवाविद्याजन्यत्वात् । अविद्यायाश्च चित्तधर्मत्वात् पुरुषस्त्वविद्याशून्यत्वाच्छुद्धः पापपुण्यविवर्जितः । ततश्च चित्तधर्मैर्जन्ममरणसुखदुःखादिभिरपरामृष्टः कदाप्यसंबद्ध इति । तत इति विशेषदर्शनादस्य कुशलस्यात्मभावना निवर्त्ततइत्यर्थः । तन्निवृत्तेः स्वर्गनरकादिषु रागद्वेषादिनिवृत्तिः फलमिति । तस्य विशेषदर्शिनो लक्षणं संप्रज्ञातयोगं वक्ष्यमाणमुक्तेश्च कारणभूतमाह ।

तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम् ॥ २६ ॥

कैवल्ये प्राग्भारो यस्य तत्कैवल्यप्राग्भारम् । कैवल्याभिमुखमिति यावत्, व्याचष्टे । तदानीमिति । तदानीं विशेषदर्शनावस्थायां स्वर्गादिवैराग्यवशात् चित्तमन्यथा भवतीत्यनेनान्वयः । विषयप्राग्भारं विषयाभिमुखम् अज्ञाननिम्नमज्ञानमार्गसंचारि एवमुत्तरत्र, न चानेन कोमलकपटकवत् उत्पन्नमात्रेण विशेषदर्शनेनैव कृतकृत्यता भवति पूर्वसंस्कारवशात् अन्तरान्तरा मोहाख्यानां भवदुःखबीजवृत्तीनामनुवृत्तेरित्याह ।

* दुःखेनेदृशेन वासमिति कल्प्यम् ।

तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः ॥ २७ ॥

व्याचष्टे । विवेकेति । विवेकप्रत्ययनिम्नस्येत्यस्य विवरणं सत्त्वेत्यादि । सत्त्वपुरुषान्यतामात्रेण प्रवहणशीलस्येत्यर्थः । तच्छिद्रेषु स्थानेषु अविद्यारूपाणां प्रत्ययानामाकारा अस्मीत्याद्याश्च प्रदर्शिताः । अस्मीति । देवमनुष्यादिरूपोस्मीत्यर्थः । केवलास्मितायाः संप्रज्ञातयोगेपि सत्त्वात् क्षीयमाणेभ्यो बीजेभ्यः क्षीयमाणबीजेभ्यः । एतस्य विशेष्यं पूर्वं संस्कारेभ्य इति । ननु ज्ञाने जातेपि चेत् पूर्वसंस्कारवशाद्व्युत्थानदशायां कदा चिदविद्योदयः कथं तर्हि संप्रज्ञातप्रवाहेणापि अविद्यानिवृत्तिः स्यात्तत्राह ।

हानमेषां क्लेशवदुक्तम् ॥ २८ ॥

एषां संस्काराणां हानं दाहः स्वकार्यासामर्थ्यं क्लेशानामिवोक्तं पूर्वाचार्यैरित्यर्थः । 'ध्यानहेयास्तद्वृत्तयः' 'ते प्रतिप्रसवहेयाः सूक्ष्मा' इति सूत्राभ्यां यथा स्थूलसूक्ष्मक्लेशानां तत्त्वज्ञानचित्तलयाभ्यां दाहनाशौ प्रोक्तौ तथा तत्संस्काराणामपीति फलितार्थः । एतदेव व्याचष्टे । यथेति । यथा संप्रज्ञातयोगिनो व्युत्थानदशायां पूर्वसंस्कारजाः क्लेशा अविद्यादिवृत्तयो दग्धबीजतुल्याः सन्तो न संस्कारं जनयन्ति तथा पूर्वसंस्कारा अपि संप्रज्ञातपरंपराजनितेन निष्ठारूपेण ज्ञानाग्निना दग्धबीजतुल्याः सन्तः प्रत्ययं न प्रसवन्तइत्यर्थः । पूर्वसंस्कारः प्राचीनः क्लेशसंस्कारः ज्ञानकाले ज्ञानसंस्कारेण प्रतिबन्धात्संस्कारो नोत्पद्यतइत्याशयेन पूर्वपदम् । अत्र ज्ञाननाशोपि क्लेशवदुपलक्षित इति । नन्वेकदा चेद्दृष्टं मम जन्म मरणं दुःखादिकं नास्तीति तर्हि कदा चिदन्तरान्तरा मोहेपि तद्धानार्थं प्रवृत्तिर्नोपपद्यते मोहस्यापि चित्तधर्मतायाः पूर्वं निश्चितत्वादिति चेन्न । चित्तस्य मोहसत्त्वे पुनश्चित्तस्य भवदुःखोत्पत्त्या पुरुषस्य दुःखभोगः स्यादित्याशयेनैव ज्ञानिभिरपि चित्तस्यात्यन्ततो मोहनिवृत्त्यर्थं यतनात् । भोगश्च चिन्मात्रस्यैवेत्यसकृदावेदितमिति । ननु संस्कारत्वाविशेषात्तत्त्वज्ञानसंस्कारा अपि किं संप्रज्ञातनिष्ठया नश्यन्ति, नेत्याह । ज्ञानसंस्कारास्त्विति । अविरुद्धत्वादिति शेषः । तर्हि कथं तेषां नाशः स्यादिति, तत्राह । इति

तच्चित्यन्तइति । अधिकारसमाप्तौ चित्तेन सहैव तेषां नाशात्तत्साध-नचिन्ता नास्तीत्यर्थः । आशु मुमुक्षूणां त्वसंप्रज्ञातेनापि तन्नाशश्चिन्तित इति भावः । उक्तस्य संस्कारहानस्य प्रकारमाह सूत्रद्वयेन ।

प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः ॥ २९ ॥

प्रसंख्यानं विवेकसाक्षात्कारः तत्रापि यो ऽकुसीदः कुसीदवत् सर्वभावाधिष्ठातृत्वादिरूपां सिद्धिं न प्रार्थयते तस्य योगविघ्नाभावेन सर्वथा निरन्तरं विवेकख्यात्युदयाद् धर्ममेघनाम्नी संप्रज्ञातयोगस्य परा काष्ठा भवतीत्यर्थः । तदेतद्व्याचष्टे । यदेति । तत्रापि तत्फलेऽपि, सर्वथाशब्दार्थ-माह । संस्कारेति । संस्काररूपस्य बीजस्य क्रमेण क्षयाद्वाहाद्धीयमानाद्धेतोः प्रत्ययान्तराणि अविद्यान्तराणि* यदा न जायन्ते तदा धर्ममेघसमाधिरि-त्यर्थः । क्लेशकर्मादीनां निःशेषेणोन्मूलकं धर्मं मेहति वर्षतीति धर्ममेघः । अस्याः समाधेर्धर्मद्वारकफलं द्वितीयमोक्षमाह ।

ततः क्लेशकर्मनिवृत्तिः ॥ ३० ॥

निवृत्तिर्दाहसमाप्तिः । व्याचष्टे । तल्लाभादिति । समूलकाषमिति । मूलं क्लेशसंस्कारास्तैः सह क्लेशा अभिनिवेशातिरिक्ताश्छिन्ना भवन्ति अत एव कर्माशयाश्च प्रारब्धातिरिक्ताः क्लेशाख्यमूलेन सह हताः स्युरतो न पुनरुत्पद्यन्त इत्यर्थः । ननु दुःखात्यन्तनिवृत्तिरेव मोक्षो जीवतश्चावश्यं दुःखम् । ‘न ह वै सशरीरस्य प्रियाप्रिययोरपहतिरस्ति’ इति श्रुतेः, तत्कथं जीवन्मुक्तिरित्याशयेन पृच्छति । कस्मादिति । उत्तरं, यस्मादिति । तथा च दुःखनिदानात्यन्तोच्छेदस्य गौणमुक्तित्वमिति भावः । अत्र प्रमाणमनुपल-ब्धिमाह । नहीति । तदुक्तं गौतमाचार्यैः ‘वीतरागजन्मादर्शना’दिति । अयमपि मोक्षः पञ्चशिखाचार्यैरुक्तो द्वितीयो रागक्षयात्†दिति । अत्र जीव-न्मुक्तस्य सवासनक्लेशात्यन्तदाहनिर्णयात् आधुनिकवेदान्तिनामविद्या-लेशस्वीकारो ऽविद्यामूलक एवेति स्मर्तव्यम् । इदानीं मुक्तस्य जीवन्मु-क्तस्य परममुक्तिप्रकारमाह सूत्रद्वयेन ।

* अविद्याक्षणानि इति पा० २ । † क्षयादिति पा० २ ।

तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्यात् ज्ञेयमल्पम् ॥ ३१ ॥

तदा तस्यां जीवन्मुक्तावस्थायां * क्लेशकर्मणोर्ज्ञानावरकमलयोरपगमेन हेतुना ज्ञानस्य सत्त्वप्रकाशस्यानन्त्याद्विभुत्वात् ज्ञेयं प्रकाश्यमल्पं तदपेक्षया भवतीत्यर्थः । यदि हि पञ्चविंशतितत्त्वातिरिक्तमन्यदपि वस्तु तिष्ठेत् तदा तदपि प्रकाश्येत ज्ञेयस्यैव तु अल्पतया अन्यन्न प्रकाश्यते न तु सत्त्वस्याल्पतयेति भावः । तदेतद्व्याचष्टे । सर्वैरिति । अनन्तं स्वभावतो व्यापकं ज्ञानं सत्त्वमिति भूतसत्त्वव्यावर्त्तनायोक्तं प्रवर्त्तितमिति अस्य विवरणम् सुघाटितमिति । शेषं भाष्यं सुगमम् । अत्र तमोभिभवानन्तरमेव वृत्त्युत्पत्तिवचनाद्वृत्तेस्तमोनाशकत्वमाधुनिकवेदान्तिनामपसिद्धान्त इति स्मर्त्तव्यम् । एतादृशं सर्वज्ञत्वं लोके ऽतीवाश्चर्यमन्धमणिवेधादिवदिति बौद्धोपहासमुखेन दर्शयति । यत्रेदमिति । यत्र क्षुद्राणामपि जीवानां योगबलादेतादृशसार्वज्ञे बौद्धैरिदं दृष्टान्तजातमसंभवदर्शनायोक्तमुपहसद्भिरित्यर्थः । किं तत् तदाह । अन्ध इत्यादि । अविध्यत्सच्छिद्रमकरोत् तं मणिमङ्गुलिहीनो ऽवावयत् ग्रथितवान् तं मणिं ग्रीवाशून्यः प्रत्यमुच्यत कण्ठाभरणमकरोत् तं कण्ठाभरणं जिह्वाशून्यस्तुतवानितीत्यर्थः । दृष्टान्तचतुष्टयस्यायमाशयः । अनाद्यविद्यामूढचित्तः सांख्याद्यभिमतसूक्ष्मार्थानामवधारणरूपं वेधनमेवादावशक्यं ततश्च तस्य सूक्ष्मार्थस्याविरलवृत्तिसत्ता च सूत्रेण ग्रथनमप्यशक्यम् । ततोपि सर्वथा विवेकख्यातिरतीवाशक्या ततश्च तादृशचित्तस्य परिपूर्णज्ञानत्वेन स्तुतिरप्यशक्येति । आस्तिकैस्तु श्रुतिस्मृतिप्रामाण्येनैतत्सर्वं श्रद्धेयमिति भावः । यथोक्तसार्वज्ञात् परवैराग्योदयेनासंप्रज्ञातपरंपराजन्यं प्रारब्धभोगासमाप्तिजन्यं वा तृतीयं मुख्यमोक्षमाह ।

ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम् ॥ ३२ ॥

ततो धर्ममेघोदयात् क्लेशकर्मनिवृत्त्या ज्ञानस्यानन्त्ये सति परवैराग्येण पुरुषार्थसमाप्त्या कृतार्थान् पुरुषान् प्रति गुणानां सत्त्वादीनां परिणा-

* जीवन्मुक्तावस्थायामिति पा० २ ।

मक्रमः समाप्यते कृतार्थपुरुषाणां भोगापवर्गकः परिणामः पुनर्न भवतीत्यर्थः । क्रमश्चाविरलधारेत्युत्तरसूत्रेण व्याख्यास्यते । तत्र इतिपदं व्याचष्टे । तस्य धर्ममेघस्योदयादिति । कृतार्थानामिति । पुरुषाणामिति शेषः । तथा च कृतार्थपुरुषस्वामिको गुणानां परिणामक्रमः समाप्यत इत्यर्थः । न तु गुणानामखिलस्य परिणामक्रमस्य समाप्तिश्चोक्ता कृतार्थं प्रति नष्टमप्यनष्टमित्युत्तरसूत्रादिति । समाप्तौ हेतुमाह । नहीति । नहि सत्त्वादयो गुणाः कृतभोगापवर्गा अत एव समाप्तक्रमाः तं पुरुषं प्रति क्षणमप्यवस्थातुं समर्थाः स्थितिहेतुपुरुषार्थाभावादिति । यदि च सूत्रभाष्ययोर्गुणशब्देनात्र बुद्ध्यादय एव पुरुषोपकरणान्युच्यन्ते तदा यथाश्रुतमेव व्याख्येयम् । अत्राचेतनानां चेतनार्थतया चैतन्याधीनसत्ता वेदान्तिभिरुच्यमाना सिद्धेति स्मर्त्तव्यम् । इयमपि तृतीया मुक्तिः पञ्चशिखाचार्यैरुक्ता 'कर्मक्षयात्* तृतीयस्तु व्याख्यातं मोक्षलक्षण'मिति । अत एव तत्त्वसमाससूत्रं 'त्रिविधो मोक्ष' इति । इदमत्रावधेयम् । यदेताभ्यां सूत्राभ्यां ज्ञानस्यानन्त्यात्सार्वज्ञाख्यात् मोक्ष उच्यते इदं मुख्यकल्पाभिप्रायेणोक्तम् । वैराग्यादेव सुखेन मोक्षसिद्धेः । न तु सार्वज्ञादिकं विना मोक्षो न भवतीत्याशयेन । यतः सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति सूत्रे भाष्यकृता ईश्वरस्यानीश्वरस्य प्राप्तविवेकज्ञानस्येतरस्य वेत्यनेनासर्वज्ञस्यापि अभिमाननिवृत्तिमात्रादेव मोक्ष उक्त इति । तथा चोक्तं 'विवेकख्यातिरविप्लवा हानोपाय' इति । 'सति मूले तद्विपाको जात्यायुर्भोगा' इति च । संसारबीजं हि अनात्मन्यात्मरूपाऽविद्या रागद्वेषधर्माधर्मतद्विपाकादिहेतुत्वात् सा चेद्विवेकख्यात्या नाशिता तर्हि तत एव संसारोच्छेदे सार्वज्ञाद्यपेक्षा नास्तीति । तथा च विष्णुपुराणम् ।

अनात्मन्यात्मबुद्धिर्या अर्थं स्वमिति या मतिः ।
अविद्यातरुसंभूतिबीजमेतद्द्विधा स्थितम् ॥

इति । ननु परिणामसमाप्तिरिति वक्तव्ये क्रमशब्दः परिणामानां प्रतिक्षणमुत्पादविनाशकथनेन वैराग्योत्पादनाय प्रयुक्तः । स चायमर्थः कथं

* कर्मक्षयादिति पा० २ ।

क्रमशब्दाल्लभ्यते क्रमशब्दस्य पौर्वापर्यमात्रवाचित्वादित्याशयेन क्रमशब्दार्थं पृच्छति । अथेति । अयमेतत्सूत्रीयः । अत्र प्रत्युत्तरं सूत्रम् ।

क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः ॥ ३३ ॥

क्षणप्रतियोगी क्षणस्यावसरस्य विरोधी क्षणेनाप्यनन्तरित इति यावत् । एवंरूपोऽत्र क्रमो विवक्षितो न तु पौर्वापर्यमात्रमिति विशेष्यदलार्थः । परिणामश्च पूर्वधर्मापाये धर्मान्तरोत्पत्तिरित्युक्तमेव, ईदृशे च क्रमे प्रमाणप्रदर्शनपरं परिणामापरान्तनिर्ग्राह्य इति विशेषणम् । भाष्यकारस्तु क्षणप्रतियोगीत्यस्य पर्यवसितमर्थमाह । क्षणानन्तर्यात्मेति । क्रम इत्युत्तरेणान्वयः क्षणानन्तर्यात्मा क्षणानन्तर्यधर्मकः । आनन्तर्यं चाव्यवधानं क्रमस्तु पूर्वापरीभावः । तथा च क्षणाव्यवहितपरिणामधारा पूर्वसूत्रे परिणामक्रमशब्दार्थः । अनवच्छिन्नधारायाः प्रमाणप्रदर्शकं सूत्रावयवं व्याचष्टे । परिणामस्येति । पूर्वान्तापेक्षया वस्त्रादिरूपस्य परिणामस्यापरान्तेन चरमावस्थया अनवच्छिन्नपरिणामधारा अनुमीयत इत्यर्थः । अत्र युक्तिमाह । नहीति । अननुभूतोऽप्राप्तो यथोक्तक्रमो यैरेवंभूताः क्षणा यस्याः साऽननुभूतक्रमक्षणा पुराणता, तथा च वस्त्रस्यान्तकाले दृश्यमाना पुराणता नह्यननुभूतक्रमक्षणा संभवतीत्यर्थः । अतः पुराणतायाः सूक्ष्मतमसूक्ष्मतरसूक्ष्मस्थूलादिरूपैः परिणामक्षणेष्वविरलः क्रमोऽनुमीयत इति । नन्वपरान्तेनानित्येष्वेव क्रमः सिद्धो न तु प्रधानेऽपि तस्य चरमावस्थाया अभावादतो गुणानां परिणामक्रमे किं प्रमाणं येन तत्समाप्तिः पूर्वसूत्रोक्ता घटेत तत्राह । नित्येषु चेति । नित्येषु स्वतोऽपरान्ताभावेऽपि विकाराणामपरान्तैरेव प्रतिक्षणपरिणामो दृष्टोऽनुमित इत्यर्थः । धर्मिविक्रियैवैषा धर्मद्वारा प्रपञ्च्यत इति प्रागुक्तत्वादिति भावः । ननु परिणामक्रमाङ्गीकारे नित्यत्वहानिरित्याशङ्कायामाह । द्वयी चेति । तथा च परिणामित्वेन कूटस्थनित्यतैव विरुध्यते न नित्यतासामान्यमित्याशयः । नित्यस्य सामान्यलक्षणमाह । यस्मिन्निति । तत्त्वं न विहन्यते स्वरूपं नातीतं भवति अत्र चातीतताशून्यत्वमात्रं नित्यस्य सामान्यलक्षणमिति बोध्यम् । तच्चोभयसाधारणमित्याह । उभय-

स्येति । गुणपुरुषयोरित्यर्थः । पूर्वसूत्रे परिणामशब्देन व्यावर्त्य स्वरूपास्तिताक्रमं दर्शयितुं क्रमसामान्यं विभजते । तत्रेति । बुद्ध्यादिषु महदादिषु लब्धपर्यवसानो विनाशित्वादित्यर्थः । गुणेष्विति । अत्रापि परिणामापरान्तनिर्ग्राह्य इत्यन्वेति । परिणामस्य क्रमं द्विधा व्याख्याय तृतीयं स्वरूपास्तितायाः क्रममसंकीर्णोदाहरणेनाह । कूटस्थेति । बद्धानां चित्ताविवेकेन कदा चित्परिणामाध्यासोपि स्यादित्याशयेन स्वरूपमात्रप्रतिष्ठेत्युक्तं तस्यैव स्वरूपाख्यानं मुक्तपुरुषेष्विति । स्वरूपास्तिता च तत्तत्क्षणमात्रं तत्क्रमश्च पुरुषेष्वप्यस्ति । इदानीं स्थित्वा पश्चात्स्थास्यतीति व्यवहारात् । अन्यथा सर्वकालसंबन्धरूपनित्यतानुपपत्तेश्चेत्यतस्तत्राप्यलब्धपर्यवसान इति क्रम इति शेषः । नन्वेवमात्मनोपि अस्तिताक्रमस्वीकारे षड्भावविकारशून्यत्वसिद्धान्तविरोध इत्याशङ्कां परिहरति । शब्दपृष्ठेनेति । स च क्रमोस्त्याख्यक्रियामादायैव शब्दपृष्ठेन शब्दानुसारिणा व्यवहर्त्रा कल्पितो भवति । न तु जन्मोत्तरकालीनमस्तितापरिणाममादायेत्यर्थः । तथा चास्तित्वाख्यक्रियैव षड्भावविकारान्तर्गता पुरुषे निषिद्धेत्याशयः । सा च क्रियारूपिण्यस्तिता वृद्धिहेत्ववयवोपचयरूपेति विभागः । गुणेष्वलब्धपर्यवसानः परिणाम इति श्रुत्वाक्षिपति । अथेति । अस्य संसारस्य जन्मादिपरिमाणजातस्य स्थित्या गत्या च गुणेषु वर्त्तमानस्य सृष्टिप्रलयप्रवाहेणावस्थितस्य क्रमसमाप्तिरस्ति न वा । आद्ये अलब्धपर्यवसानोक्तिविरोधः । अन्त्ये परिणामक्रमसमाप्तिर्गुणानामिति पूर्वसूत्रविरोधः, तथा भूयश्चान्ते विश्वमायानिवृत्तिरितिश्रुतिविरोधश्चेति । पूर्वसूत्रे कृतार्थपुरुषं प्रत्येव परिणामक्रमसमाप्तिर्गुणानामुक्ता न तु सामान्यत इत्याशयेन समाधत्ते । अवचनीयमेतदिति । प्रत्युत्तरानर्हमेतद्वद्वचनमित्यर्थः । उक्तप्रश्नस्योत्तरानर्हत्वं प्रतिपादयितुम् आदावुत्तरार्हं द्विविधप्रश्नं दर्शयति । अस्ति प्रश्न इति । सर्वो जातो मरिष्यतीति एकान्तवचनीयो ऽविभज्यवचनीयः प्रश्नः । अस्य च अम्भो इति प्रतिवचनं सत्यं भो इत्यर्थः । ओं भो इति पाठस्तु समीचीनः । अविभज्यवचनीयं प्रश्नं प्रदर्श्य विभज्यवचनीयं प्रश्नान्तरं प्रदर्शयति । अथ सर्वो मृत्वा जनिष्यतीति विभागेन वचनं प्रत्युत्तरं दर्शयति ।

Digitized by Google

प्रत्युदितेति । विभज्यवचनीयप्रश्नं लौकिकमपि दर्शयति । तथा मनुष्येति । उक्तप्रश्नस्तु यथाश्रुत एकान्तत एवावचनीय इत्याह । अयं त्विति । अयमित्युक्तं विशिष्याह । संसार इति । अवचनीयत्वमेवोपपादयति । कुशलस्येत्यादिना दोषइत्यन्तेन । कुशलस्य कुशले गुणकृतस्य संसारक्रमस्य समाप्तिरस्ति नेतरस्मिन्नित्यतो गुणसृष्टिप्रलयप्रवाहोच्छेदानुच्छेदान्यतरावधारणे दोषः । आद्ये बाधेन्त्ये कस्यापि मुक्तिर्नास्तीति शिष्यमोहापत्तिरित्यर्थः । अस्यापि प्रश्नस्य विकल्प्योत्तरं देयमित्याह । तस्मादिति । तस्मादुत्तरदानार्थमादौ विकल्पेन व्याख्येयोयं प्रश्न इत्यर्थः । तद्यथा । यदि च गुणानां सृष्ट्याद्युच्छेदः पृच्छ्यते तदा नास्तीत्येव वक्तव्यम् ।

अनादिर्भगवान् कालो नान्तोस्य द्विज विद्यते ।
अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसंयमाः ॥

इत्यादिवाक्यशतेभ्यः सृष्टिप्रवाहस्यानादित्ववदनन्तत्वस्यापि सिद्धेः शुष्कतर्कस्याप्रयोजकत्वात् । अन्यथा संसारहेत्वदृष्टस्य सर्वस्यैव सादित्वात्संसारस्यानादित्वमपि तर्कविरोधेन न सिध्येत् । भूयश्चान्ते विश्वमायानिवृत्तिश्चेति श्रुतिश्च मायाख्यप्रकृतेः प्रलये व्यापारोपरमाख्यां निवृत्तिमेव वदति । एतेन सर्वमुक्तिरप्रामाणिकीति सिद्धम् । यदि पुरुषस्य संसारोच्छेदः पृच्छ्यते तदा कुशलस्यास्ति नेतरस्येति प्रश्नवाक्यं विकल्प्य प्रतिवचनं संभवतीति उत्तरसूत्रमवतारयति । गुणाधिकारेति । गुणाधिकारः परिणामविशेषस्तत्क्रमपरिसमाप्तौ कैवल्यमिति । ततः कृतार्थानामित्यादिसूत्रेण तात्पर्यतः प्रोक्तं तस्य कैवल्यस्य स्वरूपमवधार्यतइत्यर्थः । पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति । कृतकर्त्तव्यतया पुरुषार्थशून्यानां गुणानां पुरुषोपकरणानां लिङ्गशरीरात्मकानां प्रतिप्रसवः स्वकारणे अत्यन्तविलयः स बुद्धेः कैवल्यम् एतदेव च प्रधानस्यापि ज्ञानिपुरुषं प्रति कैवल्यमुच्यते तेन पुरुषेण सह पुनरसंयोगात् या तु धर्मधर्म्यभेदाच्चितिशक्तिः स्वरूपिणी स्वरूपप्रतिष्ठा बुद्धिसत्त्वोपाधिकरूपशून्यतारूपा जपापाये स्फटिकस्य रूपप्रतिष्ठावत् सा पुरुषस्य कैवल्यमित्यर्थः ।

Digitized by Google

परस्परवियोगो हि उपाध्युपाधिमतोरुभयोरेव केवलता एकाकिता भवति ते चोभे एव दुःखभोगनिवृत्त्याख्यपुरुषार्थसाधने भवत इति द्वे एव कैवल्ये लक्षिते तयोश्चाद्यं कैवल्यं पुरुषस्योपचरितमित्युक्तम् । सांख्यकारिकायाम् ॥

तस्मान्न बध्यतेद्धा न मुच्यते नापि संसरति पुरुषः ।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥

इति । ननु स्वरूपप्रतिष्ठारूपं कैवल्यं दुःखभोगात्यन्तनिवृत्तिरूपो वा पुरुषार्थः पुरुषस्य तत्र निराकृतः मोक्षस्यान्यमात्रनिष्ठत्वे पुरुषार्थत्वे मोक्षार्थं प्रवृत्त्यनुपपत्तेः पुरुषार्थं हि करणानां प्रवृत्तिरिति । इतिशब्दः शास्त्रसमाप्तिसूचनार्थः । भाष्ये कार्यकारणात्मनामिति कार्यकारणभावापन्नानां महदादिसूक्ष्मभूतपर्यन्तानां लिङ्गशरीरघटकानामित्यर्थः न तु कार्यमात्रस्थूलशरीरं तत्सत्त्वेपि कैवल्योदयादिति । ननु स्वस्य स्वप्रतिष्ठत्वानुपपत्त्या कथं स्वप्रतिष्ठत्वं तत्राह । स्वरूपेति । पुरुषस्य पुनर्बुद्धिसत्त्वासंबन्धात् केवला चितिशक्तिरेव स्वरूपप्रतिष्ठेत्यर्थः । तस्या इति । स्वरूपप्रतिष्ठायां सदैवावस्थानं पुनरप्रच्यवः कैवल्यं द्वितीयमिति शेषः ॥

योगग्रन्थसहस्राणां सर्वोपनिषदां तथा ।
सतां च यत्र तात्पर्यं सोर्थो व्यासेन भाषितः ॥
व्याख्यातश्च यथाशक्ति निर्मत्सरधिया मया ।
एतेन प्रीयतामीशो य आत्मा सर्वदेहिनाम् ॥

इति श्रीविज्ञानभिक्षुविरचिते पातञ्जलभाष्यवार्तिके कैवल्यपादश्चतुर्थः ॥ ४ ॥

॥ समाप्तं चेदं दर्शनम् ॥

॥ श्रीविश्वनाथो विजयतेतराम् ॥

काशीस्थराजकीयप्रधानपाठशालायां { सांख्ययोगाध्यापकस्तात्याशास्त्र्यपरनामा पटवर्धनोपाह्वो रामकृष्णशास्त्री । ज्योतिषशास्त्राध्यापकः केशवशास्त्री च ।

Digitized by Google

॥ श्रीं श्रीगणेशाय नमः ॥

॥ खण्डनखण्डखाद्यम् ॥

अथ प्रथमः परिच्छेदः ।

मू० अविकल्पविषय एकः, स्थाणुः—

हरिशङ्करयोः (१) सितासितं, भुजगारातिभुजङ्गलाञ्छनम् ।
वपुरस्तु मुदे विरुद्धयोरपि संसर्गे न भिन्नतां गतम् ॥ १ ॥
विरुद्धधर्मद्वयसन्निपातेऽप्यभेद एवेति विभावयन्तम् ।
पुनातु भेदप्रतिभासशून्यं स्त्रीपुंसरूपं शिवयोः (२) शरीरम् ॥ २ ॥
भवनाथ (३) सूक्तिगुम्फनमिह खण्डनखाद्यटीकायाम् ।
श्रीशङ्करेण विदुषा, विदुषामानन्दवर्द्धनं क्रियते ॥ ३ ॥

प्रारिप्सितप्रतिबन्धकदुरितनिवारणकारणेष्टदेवतानमस्काररूपं मङ्गलं कुर्वन्नेव प्रेक्षा (४) वत्प्रवृत्त्यङ्गप्रयोजनाभिधेयसम्बन्धप्रतिपादनपरः परमतनिराकरणचिकीर्षया स्वमतं ब्रह्माद्वैतमास्थायुको (५) वैतण्डिकोपि स्वप्रौढिप्रकटनाय (६) सूचयन्नाह—। "अविकल्प"—इति॥ "एकः पुरुष" इति। 'अद्वितीयं ब्रह्मे(७)त्यर्थः, श्रुतिषु तथा श्रुतत्वात्, यद्यथा श्रुतिषु श्रुतं, तत्तथा;

---

(१) विरुद्धयोरपि हरिशङ्करयोः संसर्गे वपुर्मुदेऽस्त्वित्यन्वयः। संसर्गेऽप्यस्यैव विवरणं—न भिन्नतां गतमिति, तदुक्तं "स ब्रह्मा स शिवः स हरिः" "शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः" इति । उक्तं विरोधमेव स्फुटयति सितेत्यादिना ; सितः=श्वेतः शङ्करः, असितः=कृष्णवर्णो हरिः ; भुजगारातिर्गरुडस्तल्लाञ्छनः=तद्वाहनो हरिः, भुजङ्गलाञ्छनः=भुजङ्गभूषितस्तु शङ्कर इति विवेकः ।

(२) शिवा, शिवश्च, शिवौ ; तयोः शिवयोः गौरीशङ्करयोरित्यर्थः ।

(३) भवनाथस्य मत्पितुर्याः सूक्तयः=सुव्याख्यानानि तासां गुम्फनमित्यर्थः ।

(४) हेयोपादेयगोचराबुद्धिः प्रेक्षा, तद्वन्तः प्रेक्षावन्तः ।

(५) अत्र "लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ्" (अ० ३ पा० २ सू० १५४) इति पाणिनीयसूत्रेण "आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु" (अ० ३ पा० २ सू० १३४) इति तत्साधुकारित्वेऽर्थे उकञ्प्रत्ययस्तथा च "ब्रह्माद्वैतमास्थायुक" इत्यस्य ब्रह्माद्वैतव्यवस्थापनसाधुकारीत्यर्थः। अत्रौत्सर्गिकषष्ठीविरहस्तु "न लोकाव्ययनिष्ठाखलर्थ तृनाम्" (अ० २ । पा० ३ । सू० ६९) इति पाणिनीय सूत्रेण । "ब्रह्माद्वैतमास्थापकः" इतिपुस्तकान्तरे प्रायिकः पाठस्तु प्रामादिकः, प्रकृतानुपयुक्तार्थाभिधायित्वात्, प्राचीनपुस्तकविरुद्धत्वात्. द्वितीयाया असम्भवाच्च ।

(६) वैतण्डिकस्यापि मङ्गलाचरणं स्वमतस्य च व्यवस्थापनं स्वप्रौढिप्रकटनम्। स्वमतं सूचयन्नित्यन्वयः ।

(७) 'प्रसिद्धोद्देशेनाप्रसिद्धं विधीयते' इति न्यायेन ब्रह्माद्वितीयमित्यन्वयः ।

Digitized by Google

यथा ब्रह्मणः आनन्दमयत्वं, तथा चाऽद्वितीयं ब्रह्म' इति स्थापनसूचना। तमीश्वरं वन्दे यः अविकल्पविषयः, विकल्पः=संशयस्तदऽविषय इत्यर्थः। विरुद्धनानाप्रकारकं हि ज्ञानं संशयः स चाद्वैते न संभवति न वा सर्व-विदि संशयावकाश इति भावः। यद्वा विकल्पः=विशिष्टज्ञानं, तदविषय इत्यर्थः, अद्वैते प्रकाराभावात् सप्रकारकज्ञानानुत्पत्तेरिति भावः। यद्वा अविकल्पः=निर्विकल्पकं, तद्विषयः तन्मात्रविषय इत्यर्थः। अद्वैते प्रकारा-भावेन सविकल्पत्वाऽभावादिति भावः। यद्वा विकल्पस्य=कल्प(१)नायाः अविषयः पारमार्थिकत्वात्। यद्वा अविकल्पः=निर्विकल्पकज्ञानं (२), तद् विषयो यस्येति बहुव्रीहिः, ब्रह्मणः स्वप्रकाशचिद्रूपत्वात्। एकः, अद्वितीय इत्यर्थः॥ "स्थाणुरि"ति। स्थिर इत्यर्थः,

मू० पुरुषः श्रुतोऽस्ति यः श्रुतिषु। ईश्वरमुमया न परं वन्दे नु मयापि तमधिगतम्॥ १॥

टी० कूटस्थनित्यत्वात्। यद्वा स्थाणुरिव स्थाणुः सुखदुःखाद्युपाधि-सम्भेदरहित इत्यर्थः। पुरुषः=क्षेत्रज्ञः, तेन क्षेत्रज्ञाऽभेदो ध्वनितः॥ तत्रैव प्रमाणमाह—। "श्रुत" इति। 'श्रुतिषु'—इति(३) सर्वाः श्रुतीराह, तथा च कर्म-काण्डस्यापि ब्रह्मपरत्वमिति ध्वनितम्। 'अस्ति'—इति स्वसाक्षिकविश्व-मानैकरूपतामाह॥ उमाया इव स्वस्यापि भगवदेकताननतामाह—उमया परमधिगतमेव न, किन्नाम श्रवणादनु=पश्चान्मयापि=श्रीहर्षेणाप्यधिग-तमेवेति। नु-शब्दः सम्बन्धने(४)वा। अधिगमस्त्वत्र मननमेव। उमाऽनु मे=विद्याविद्ये वा। ताभ्यां स्वर्गिसंसारदशाविशेषेणाधिगतत्वा(५)द्विषयी-

(१) कल्पनायाः=मिथ्याज्ञानस्येत्यर्थः।

(२) ब्रह्मात्मकं ज्ञानं ब्रह्माकारं वा।

(३) 'बहुवचनम्' इति शेषः पूरणीयः

(४) न केवलमुमयैवाधिगतं, परं मयाप्यधिगतमित्युभयोरप्यधिगमस्य सम्बन्धने= समुच्चये, नु शब्द इत्यर्थः। 'सम्बोधने' इति त्वपपाठः, सम्बोध्यस्य देवदत्तादेरनुपल-भ्यमानत्वात्।

(५) विद्यया=उपासनया स्वर्गिदशाविशेषेणाधिगतत्वादविद्यया च संसारिद-शाविशेषेणाधिगतत्वादिति विभागः। यद्वा ब्रह्मात्मैकत्वप्रतिपत्तिरेव मुख्यो विद्याप-दार्थः; एतत्पक्षे स्वर्गिपदेन सुखरूप आत्मैव ग्राह्यः। अथ यद्यपि स्वर्गिसंसारदशावि-

ज्ञातत्वात्। यद्वा उमया=गौर्या, मया=च लक्ष्म्या, अधिगतम्=आश्लिष्टं। तेन विष्णुगौरीश्वराभेद उक्तः "मा मातरि च माने च, मा च लक्ष्मीः प्रकीर्तिता" इति कोशात्। विरोधाभासश्चालङ्कारोऽयं, तथाहि–'एकः, स्थाणुः पुरुषश्च' इति विरुद्धं; 'स्थाणुः पुरुषः, संशयाविषयश्च' इति विरुद्धं; 'श्रुतिषु श्रुतश्च, विशिष्टज्ञानाऽविषयश्च' इति विरुद्धम्; उमयाऽधिगतस्याऽनुमाधिगतत्वं च विरुद्धम्; यथा च न विरोधस्तथा व्याख्यातमेव। अत्र पुरुषसमभिव्याहृतस्यैकपदस्य कैवल्यार्थकतया पुरुषकैवल्यं परमप्रयोजनमुक्तं, सङ्ख्यार्थतया(१)पुरुषस्य ब्रह्मणा एकत्वमद्वैतमभिधेयमुक्तम्, अवान्तरप्रयोजनं चाऽनुमया=मननेनाधिगतत्वमुक्तं वेदितव्यम्॥ १॥

शिवं नत्वा शक्तिं नमस्यति–। "मानापनोदन"–इति। हे भवानि!=भवस्य पत्नि!, घनं=निरन्तरं यथा स्यादेवं,तवाङ्घ्रिसरोजयोश्चरणकमलयोर्न-

मू॰ माना(२)ऽपनोदनविनोदनते गिरीशे
भासेव सङ्कुचितयोरुचितं तदिन्दोः।
भेत्तुं भवाऽनिशचितं दुरितं भवानि
नम्रीभवानि घनमङ्घ्रिसरोजयोस्ते॥ २॥

म्रीभवानि=अवनतः स्याम्। किंविशिष्टयोरङ्घ्रिसरोजयोः? गिरीशे=महेशे, मानापनोदनविनोदनते=मनस्वितानिराकरणक्रीडानम्रे, तदिन्दोः=तन्मौलिचन्द्रस्य, भासेव=ज्योत्स्नयेव, उचितं यथा स्यादेवं सङ्कुचितयोः=उपजातसङ्कोचयोः। भर्त्तरि प्रणिपाताय उद्यते लज्जया चरणसङ्कोचस्तावदुचितः

शेषेणेत्येव बहुषु पुस्तकेषु पाठ उपलभ्यते तथापि पाठसाकल्यानुरोधेन स्वर्गिसंसारिदशाविशेषेण इति, स्वर्गसंसारदशाविशेषेणेत्येव वा पाठ उचितः।

(१) यद्यपि "आदशतः सङ्ख्याः सङ्ख्येये" इत्यनुशासनेनैकशब्दस्य सङ्ख्येयार्थकतया सङ्ख्यार्थकताऽऽख्यानमप्राप्तं, तथापि "द्व्येकयोर्द्विवचनैकवचने" इत्यादाविव भावप्रधाननिर्देशत्वेन सङ्ख्यार्थकतयेत्युक्तम्। "सङ्ख्येयार्थकतया" इति क्वाचित्कः पाठस्तु केवलं भ्रमविजृम्भितः; अन्यथा "ब्रह्मणा एकत्वमुक्तम्" इत्यग्रिमग्रन्थस्य स्थाने "ब्रह्मणोक्तम्" इत्येव परिपठितं स्यात्।

(२) भवानीमनादृत्य भवेन सपत्न्या गङ्गायाः अपकर्षं धारणं भवान्या मानजनकं बोद्धव्यम्॥

तव तदिन्दोर्भासेवेत्युत्प्रेक्षा । दवीय (१) स्यपि चन्द्रमसि सरोजसङ्कोचो नेदीय (२) सि सुतरामित्युत्प्रेक्षाद्दीपनम् । किं कर्तुं ? भवानिसञ्चितं दुरितं भेत्तुं; संसा (३) राविश्रान्तसञ्चितकल्मषनिरासायेत्यर्थः। यद्वा हे भवानि! अहं त्वच्चरणयोर्नम्रीभवानि, त्वं पुनरनिशचितं दुरितं भेत्तुं भव=प्रभवेत्यर्थः। एतेन जगद्वन्दनीयस्यापि गिरीशस्य वन्दनीययोर्भवानीचरणकमलयोरत्यन्तवन्द्यत्वमुक्तम् । अथवा (४) "हे ब्रह्माद्वैतोपदेशक! त्वं ममानिशञ्चितं दुरितं भेत्तुं भव=प्रभव, अहं त्वदङ्घ्रिसरोजयोर्नम्रीभवानि" इति गिरीशे=वादिनि (५) मानापनोदनविनोदनते,=वादित्वाभिमानखण्डनाभिलाषिणि सति, अहं भवानि, अर्थादनुमतवादिदुरितभेत्ता भवानि=भविष्यामि; तथा तत्त्वमुपदिशानि यथाऽनुमतवादिनो दुरितं भङ्क्ष्यती(६)ति वन्यकृतः स्वंप्रत्याशंसा । तदिन्दोर्भासा सङ्कुचितयोः, स चासाविन्दुश्चेति तदिन्दुर्वादी पराजयकलङ्कवानित्यर्थः ; तस्य भासा=जितत्वेन मन्दया प्रभयेत्यर्थः, भवति हि स्वव्यवसायेन भग्नं वादिनं दृष्ट्वा साधोः सङ्कोचः "विप्रं निर्जित्य वादत" इत्यादिनिन्दाश्रवणात् ॥ २ ॥

मू० शब्दार्थनिर्वचनखण्डनया नयन्तः
सर्वेच निर्वचनभावमखर्वगर्वान् ।

(१) दवीयसि=अतिदूरस्थे ।

(२) नेदीयसि=अतिसमीपस्थे ।

(३) संसारेऽविश्रान्तं=निरन्तरं सञ्चितानि=उपार्जितानि यानि कल्मषाणि तन्निरासायेत्यर्थः ।

(४) चतुर्थपदमंशेन स्वप्रौढिविख्यापयिषया प्रदर्शितोऽयमर्थो श्रोतुर्जितवाद्यन्तरीत्याङ्घ्रिसरोजयोर्विशेषणत्वेन तदिन्दोर्भासा सङ्कुचितयोरित्येतदुपादाय स्वरसतो योजयितुमशक्यत्वेनाऽस्वारस्यकोऽपि कथञ्चिदङ्घ्रिसरोजयोरित्येतत्पदान्तरं प्रकल्प्यानुकरोत्येवेत्युपपादनीयः-तदिन्दोर्भासोत्तरोत्तरं सङ्कुचितयोर्मेऽङ्घ्रिसरोजयोः "तेऽङ्घ्रिसरोजयोर्नम्रीभवानि" इति गिरीशे मानापनोदनविनोदनते सति तदीयं दुरितं भेत्तुमहं भवानीति ।

(५) गिरामीशो गिरीश, इति व्युत्पत्त्या गिरीशो वादी ।

(६) "भञ्जो आमर्दने" इति स्मरणात् मर्दितं विनाशितं भविष्यतीत्यर्थः ।

Digitized by Google

धीराः यथोक्तमपि कौरवदेतदुक्त्वा
लोकेषु दिग्विजयकौतुकमातनुध्वम् ॥ ३ ॥

अथ कथायां वादिनो नियममेताहृशं मन्यन्ते—'प्रमाणादयः(१) सर्वतन्त्रसिद्धान्ततया सिद्धाः पदार्थाः सन्तीति कथकाभ्यामभ्युपेयम्' तद् (२) अपरे न क्षमन्ते, तथाहि—प्रमाणादीनां सत्त्वं यदभ्युपेयं कथकेन, तत्कस्य हेतोः ?

टी० वीतरागाणामेतद्ग्रन्थप्रवृत्त्योपयिकं मननलक्षणं प्रयोजनं दर्शयित्वा रागिणामपि विजिगीषूणां विजयलक्षणं प्रयोजनमाह—। "शब्दार्थे"—इति । हे धीराः! कौरवदेतद्=अस्मदुक्तं खण्डनमुक्त्वा, लोकेषु=भुवनेषु, दिग्विजयकौतुकमातनुध्वं=विस्तारयत; किं कुर्वाणाः ? सर्वत्र विवादपदेषु शब्दार्थयोः= शब्दतदर्थयोर्निर्वचनं = निरुक्तिस्तत्खण्डनया=तदनुपपन्नत्वव्यवस्थापनेन, निर्वचनभावं=मूकत्वम्, अखर्वगर्वान्=प्रौढाहङ्कारान्,नयन्तः=प्रापयन्तः सन्त इत्यर्थः । अनुक्तस्य खण्डनस्य सर्ववादिविजयः फलमिति ध्वनितम् ॥ नन्वद्वैतव्यवस्थापनं विजयो वा यत्फलद्वयमुक्तं तत् कथासाध्यं, कथायां च न वैतण्डिकस्य प्रवेशः, तस्याः (३) प्रमाणादिसत्त्वाभ्युपगमाधीनत्वात्, तस्य (४) च प्रमाणाद्यनभ्युपगन्तृत्वात्, प्रमाणाद्यभ्युपगमे च नाद्वैतव्यवस्थापनं; न चाऽद्वैतलक्षणस्वपक्षरक्षणाधीनो विजयः? इति प्रमाणाद्यभ्युपगमाधीनत्वं कथायाः खण्डयितुमुपक्रमते— । "अथे"ति । अथेति मङ्गलम्, "ओङ्कारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा, कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ" इति स्मरणात् । कथायां कर्तव्यायां तत्पूर्वं 'प्रमाणादीनि सन्ति'—इति द्वाभ्यामपि वादि-

(१) आदिपदेन, "प्रमाण—प्रमेय—संशय—प्रयोजन—दृष्टान्त—सिद्धान्त—अवयव—तर्क—निर्णय—वाद—जल्प—वितण्डा—हेत्वाभास—छल—जाति—निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" इति न्यायदर्शनोक्तप्रमेयादयो ग्राह्याः ।

(२) 'तद् अपरे न क्षमन्ते' इति मूलग्रन्थस्य 'अपरे, क्षमन्ते' इति पदयोरर्थप्रदर्शनपूर्वकं प्रतीकमुपादायेदानीं तत्स्वार्थं वर्णयति—तदिति ।

(३) तस्याः=कथायाः ।

(४) तस्य=खाण्डनिकस्य ।

भ्यामवश्यमभ्युपगन्तव्यमिति भेदवादिनो मन्यन्ते, तद् अपरे=ऽभेदवादिनो न सहन्ते इति, तत् इत्यवश्याभ्युपगन्तृत्वमर्थलभ्यं परामृशति। कथकेने-त्येकवचनं खाण्डनिकाभिप्रायेण, तदितरस्य प्रमाणाद्यभ्युपगन्तृत्व-सिद्धेः (१)।

मू० किं तदनभ्युपगच्छद्भ्यां वादिप्रतिवादिभ्यां तदभ्युप-गमसाहित्यनियतस्य वाग्व्यवहारस्य प्रवर्तयितुमशक्य-त्वात्? १, उत कथकाभ्यां प्रवर्तनीयवाग्व्यवहारं प्रति हेतुत्वात्? २, उत लोकसिद्धत्वात्? ३, अथ वा तदनभ्युप-गमस्य तत्त्वनिर्णयविजयफलातिप्रसञ्जकत्वात्? ४। न ताव-दाद्यः, तदनभ्युपगच्छतोऽपि चार्वाकमाध्यमिकादेर्वाग्विस्त-राणां प्रतीयमानत्वात्; तस्यैव (२) वाऽनिष्पत्तौ भवतस्त-न्निरासप्रयासानुपपत्तेः। सोऽयमपूर्वः प्रमाणादिसत्तानभ्यु-पगमात्मा वाक्स्तम्भनमन्त्रो भवताऽभ्यूहितो—

टी० यो यः कथकः स प्रमाणाद्यभ्युपगन्ता? या या कथा सा प्रमाणाद्यभ्युपगन्तृकर्तृका? यत्र वा कथकत्वं तत्र प्रमाणाद्यभ्युपगम? इति प्रथमविकल्पार्थः। प्रमाणादीनामभ्युपगमः कथाकारणम्? इति द्वितीयविक-ल्पार्थः। "प्रमाणादीनामेव कथाकारणत्वं विकल्पितं न तु तदभ्युपगमस्या-पि" इति केषाञ्चिदाक्षेपोऽसङ्गतः, द्वितीयविकल्पदूषणावसरे प्रमाणाद्यभ्यु-पगमस्यैव कथाकारणत्वखण्डनात्। लोकाः प्रमाणाद्यभ्युपगच्छन्तीति कथ-काभ्यामभ्युपगन्तव्यम्? इति तृतीयविकल्पार्थः। अनतिप्रसक्ततत्त्वनिर्णयवि-जयफलाकाङ्क्षया कथकाभ्यां प्रमाणादिसत्त्वमवश्या(३)भ्युपगन्तव्यमिति चतु-

(१) प्रमाणाद्यभ्युपगन्तृत्वसिद्धेः=प्रमाणाद्यभ्युपगन्तृत्वस्य प्रथमत एव सिद्ध-त्वात्।

(२) चार्वाकादिवाग्व्यवहारस्यैवेत्यर्थः।

(३) यदि प्रमाणादिसत्त्वानभ्युपगन्तृणामपि तत्त्वनिर्णयविजयौ स्तस्तदा पामराणा-मपि तौ स्यातामित्यतिप्रसञ्जनभीत्या ऽनतिप्रसक्ततत्त्वनिर्णयविजयफलाकाङ्क्षया प्रमाणा-दिसत्त्वमवश्यमभ्युपगन्तव्यमित्यर्थः।

र्थविकल्पार्थः ॥ "चार्वाक"–इति । यद्यपि चार्वाकस्य प्रत्यक्षाभ्युपगमोऽस्ति तथाप्यनुमानैकगम्यतत्प्रामाण्यस्यानुमानानभ्युपगमेऽनभ्युपगम इत्यभिप्रेत्य तद्व्याव्यवहारे व्यभिचारो दर्शितः । अथवा यत्किञ्चित्प्रमाणाभ्युपगमः सकलप्रमाणाभ्युपगमो वा कथाव्यापकः? आद्ये माध्यमिककथायां व्यभिचारोऽन्त्ये चार्वाककथायाम् । यद्वा प्रमाणादीत्यादिपदेन तर्कादेः परिग्रहः, तथा च–चार्वाकस्य प्रमाणाऽभ्युपगमेऽपि तर्काभ्युपगमो नास्तीति व्यभिचारः । चार्वाकैकदेशी वा चार्वाकः ॥ ननु चार्वाकादेर्वाग्व्यवहार एव नास्ति कुत्र व्यभिचारः? इत्यत आह -"तस्यैवे"ति । त्वद्दर्शने तदुक्तयुक्तिनिराकरणान्यथानुपपत्तिरेव तद्वाग्व्यवहारे प्रमाणमित्यर्थः ॥ सोपहासमाह– ।"सोयमि"ति ।

मू० नूनं, यस्य प्रभावाद्भगवता सुरगुरुणा लोकायतकानि सूत्राणि न प्रणीतानि; तथागतेन वा मध्यमागमा नोपदिष्टाः; भगवत्पादेन वा बादरायणीयेषु सूत्रेषु भाष्यं नाभाषि । *प्रमाणाद्यनभ्युपगम्यापि प्रवर्तयन्तु नाम ते वाचोभङ्गीः, (१) तास्तु साधनबाधनक्षमा न भवन्ति तावता (२) इति ब्रूमः*? इति चेन्न, प्रमाणाद्यनभ्युपगम्य प्रवर्तितत्वं तदीयसाधनबाधनाक्षमतायां न नियामकं, किन्तु सद्वचनाभासलक्षणयोगित्वमित्यवश्याभ्युपेयं भवता,

टी० तथागतेन=बुद्धेन, मध्यमलक्षणा आगमा=मध्यमागमा यदध्ययनान्माध्यमिक इत्युच्यते, भगवत्पादेन=शङ्कराचार्यपादेन, (३) बादरायणो=व्यासः, अत्र सर्वत्र त्वदुक्तव्याप्तेर्व्यभिचार इति भावः ॥ ननु चार्वा-

(१) वाचोभङ्गीः=वाक्प्रकारानित्यर्थः । ताः=वाचोभङ्ग्यः ।

(२) वाग्व्यवहारत्वमात्रेणेत्यर्थः ।

(३) अद्वितीयब्रह्मवादित्वाच्छङ्कराचार्यस्यापि न तात्त्विकप्रमाणाद्यभ्युपगन्तृत्वम् । यच्च प्रत्यक्षादि प्रमाणानां तद्ग्रन्थे स्थाने स्थाने प्रतिपादनं, तद्व्यावहारिकप्रामाण्याभिप्रायेणेत्र ।

कादिव्यवहारो रथ्यापुरुषवाग्व्यवहारवदनुपादेय एव, प्रमाणाद्यभ्युपगमस्तु साधनबाधनक्षमवाग्व्यवहारव्यापकत्वेन मयोपन्यस्तस्तत्र च न व्यभिचारः? इत्याह—। "प्रमाणादी"ति । साधनबाधनयोः फलत ऐक्येऽपि(१)लोकप्रसिद्धिमनुरुध्य भेदेनोपन्यासः ॥ एवमपि माध्यमिकादिवाग्व्यवहारे एव व्यभिचारस्तस्यापि साधनबाधनक्षमत्वात् । * न च "माध्यमिकादिवाग्व्यवहारः साधनबाधनाक्षमः, प्रमाणाद्यनभ्युपगम्य कृतत्वात्, रथ्यापुरुषवाग्व्यवहारवदि"त्यनुमानान्माध्यमिकादिवाग्व्यवहारस्य साधनबाधनाक्षमत्वसिद्धिः *। तस्य सद्वचनाभासलक्षणयोगित्वोपाधिकवलितत्वादित्याह— । "प्रमाणादी"ति । सद्वचनाभासः=स्फुटावभासो व्यभिचारादिस्तल्लक्षणं साध्याऽत्यन्ताभावसामानाधिकरण्यादि, तद्योगित्वमित्यर्थः, तथाच—वाग्व्यवहारसाधनबाधनाक्षमत्वे साधनाभासत्वं दूषणाभासत्वं तन्त्रं, न तु प्रमाणाद्यनभ्युपगन्तृप्रणीतत्वमिति भावः । सद्वचनाभासं निग्रहस्थानं, तल्लक्षणं कथाङ्ग(२)तत्त्वज्ञानाभावलिङ्गं, तद्योगित्वमित्यन्ये ॥

खण्ड० येना(३)भ्युपगम्यापि प्रमाणादीनि प्रवर्तिता मतान्तरानुसारिभिर्व्यवहारा अभ्युपगतप्रमाणादिसत्त्वैर्मतान्तरव्यवहारिभिरपरैरतथाभूता(४)इति कथ्यन्ते। यदि त्वस्मद्वचसि सद्वचनाभासलक्षणं न भवान् दर्शयितुमीष्टे,तदा'ऽनभ्युपगम्य प्रमाणादीनि भवता प्रवर्तितोऽयं व्यवहार' इति प्रतिकृत्वस्त्वयोच्यमानेऽपि नास्माकमादरः। अन्यथा(५)भ्युपग-

(१) यदेव विजयादिलक्षणं फलं स्वोद्भावितहेतौ सद्धेतुत्वव्यवस्थापनेन भवति तदेव तत्र परोद्भावितदोषस्य बाधनेनापि भवत्यतः साधनबाधनयोः फलत ऐक्यम् ।

(२) कथाङ्गं समयबन्धादिस्तेषां तत्त्वज्ञानाभावं प्रति लिङ्गमित्यर्थः ; तद्यथा—चैत्रः कथाकरणसमयबन्धादिज्ञानाभाववान् प्रतिज्ञाहान्यादिमत्त्वादिति, तद्योगित्वं, तादात्म्येन ।

(३) ननु प्रमाणाद्यनभ्युपगम्यप्रवर्त्तितत्वसद्वचनाभासलक्षणयोगित्वयोरविशेषात् कथमाद्यस्याऽप्रयोजकत्वमित्यत आह—येनेति, इति विद्यासागरः ।

(४) साधनबाधनाक्षमा इत्यर्थः । क्वचित्तु 'तथाभूता' इति पाठस्तत्राप्ययमेवार्थः ।

(५) अन्यथा=सद्वचनाभासलक्षणयोगित्वमप्रदर्श्य प्रमाणाद्यनभ्युपगम्यप्रवर्तितव्यवहारस्याऽऽभासत्वकथने इत्यर्थः ।

म्य प्रमाणादीनि भवता प्रवर्तितोऽयं व्यवहार इत्येतावता भवदीयो व्यवहाराभास इत्यस्माभिरपि वक्तुं शक्यते एव । * ननु यदि प्रमाणादीनि न सन्ति तदा व्यवहार एव धर्म्मी(१)कथं सिद्ध्येत्, दूषणादिव्यवस्था वा कथं स्यात्, सर्वविधिनिषेधानां प्रमाणाधीनत्वात् * ? । मैवम्,

टी० ॥ प्रमाणाद्यनभ्युपगमस्य साधनाक्षमत्वे ऽप्रयोजकत्वमेव दर्शयितुमनभ्युपगम(२)पूर्वकत्वसाधनासत्त्वेपि साधनाक्षमत्वसाध्यसत्त्वमाह—। "येने"ति । अन्यथा व्यापकव्यभिचारोपदर्शनमसङ्गतं(३)स्यात् ; नैयायिकमीमांसकयोः कथायां प्रमाणाद्यभ्युपगम्य प्रवर्तितायामपि साधनबाधनाक्षमत्वं तदेकतरेण व्यवस्थाप्यते तत्राभासत्वमेव.तन्त्रं नतु प्रमाणाद्यनभ्युपगम्य प्रवर्तितत्वमिति न तुल्ययोगक्षेमत्वमपीत्यर्थः ॥ वैतण्डिकवाग्व्यवहारे(४)पक्षे एव प्रमाणाद्यनभ्युपगम्य प्रवर्तितत्वं साधनमस्ति, वञ्चनाभासलक्षणयोगित्वमुपाधिर्नास्तीत्युपाधेः साधनाव्यापकत्वमाह—। "यद्वि-त्वि"ति ॥ यथा प्रमाणाद्यभ्युपगमपूर्वकत्वमतन्त्रं साधनबाधनक्षमत्वे(५) तथा प्रमाणाद्यनभ्युपगमपूर्वकत्वमप्यतन्त्रमेवे(६)त्यप्रयोजकत्वमेवानिष्टोपदर्शनमुखेन द्रढयति—। "अन्यथे" ति ॥ ननु प्रमाणादीनि न सन्तीत्यभिमानिनस्तव प्रमाणानभ्युपगम एव चेत्तदा प्रमाणमन्तरेण न कथाप्रवृत्तिर्न वा साधनदूषणनिष्ठा स्यादित्याह—। "ननु यदी"ति ॥

(१) धर्मी=पक्षः ।

(२) प्रमाणाद्यनभ्युपगम्यकृतत्वलक्षणस्य पूर्वोक्तसाधनस्यासत्त्वेपीत्यर्थः ।

(३) साधने साध्याभाववद्वृत्तित्वलक्षणव्याप्यव्यभिचारे दर्शयितव्ये साध्ये साधनाभाववद्वृत्तित्वलक्षणव्यापकव्यभिचारोपदर्शनमसङ्गतं स्यादित्यर्थः ।

(४) यद्यपि माध्यमिकादिवाग्व्यवहार एव पक्षतया प्रागुपन्यस्तो न तु वैतण्डिकवाग्व्यवहारोपि तथापि आदिपदेन तस्यापि तत्र ग्रहीतुं शक्यत्वात्र पौर्वापर्यविरोधः शङ्कनीयः । एतामेव व्याख्याकारस्य शैलीं परिज्ञायाऽग्रेपि यत्र तत्र प्रतीयमानो विरोधः परिहरणीयः ।

(५) "साधनबाधनाक्षमत्वे", इति क्वाचित्कः पाठस्तु प्रामादिकः "येनाभ्युपगम्यापि" इत्यादिमूलोक्तार्थेन, "प्रमाणाद्यनभ्युपगमस्य" इत्यादितट्टीकाग्रन्थार्थेन च विरोधात् ।

(६) साधनबाधनाक्षमत्वलक्षणसाध्ये इति शेषः ।

मू० न ब्रूमो वयं न सन्ति प्रमाणादीनीति स्वीकृत्य कथारभ्येति, किंनाम(१) सन्ति न सन्ति वा प्रमाणादीनीत्यस्यां चिन्तायामुदासीनैः (यथा स्वीकृत्य तानि भवता व्यवह्रियते तथा व्यवहारिभिः(२) एव कथा प्रवर्त्यतामिति । अन्यथा न सन्ति प्रमाणादीनीति मतमस्माकमारोप्य यदिदं भवता दूषणमुक्तं तदपि न वक्तुं शक्यम्, कीदृशीं मर्यादामालम्ब्य प्रवृत्तायां कथायामिदं दूषणमुक्तं? किं प्रमाणादीनां सत्त्वमभ्युपगम्योभाभ्यां वादिभ्यां प्रवर्तितायां कथायाम्? १, उतासत्त्वमभ्युपेत्य? २, अथैकेन सत्त्वमपरेणचासत्त्वमङ्गीकृत्य? ३, । नाद्यः, अभ्युपगतप्रमाणादिसत्त्वंप्रत्येतादृशपर्यनुयोगानवकाशात् । द्वितीये च स्वतो (३) व्यापत्तेः । न तृतीयः, तथैव कथान्तरस्यापि प्रसक्तेः, उभयाभ्युपगमानुरोधित्वाच्च कथानियमस्य ।

टी० ॥ कथापूर्वकाले प्रमाणाद्यभ्युपगमस्याऽप्रयोजकत्वमात्रमाचक्ष्महे न तु प्रमाणादीनि न सन्तीति तदानीमेव वदामो येनेदं (४) देश्यं स्यादित्याह—। "न ब्रूम" इति ॥ "अन्यथे"ति यदि प्रमाणाद्यभ्युपगममन्तरेण कथाप्रवृत्तिर्न स्यात्तदेत्यर्थः ॥ "आरोप्ये"ति। प्रमाणाद्यभ्युपगमः कथाप्रवृत्तावतन्त्रमित्यस्माकं मतं, प्रमाणादिकं विनापि कथाप्रवृत्तिरिति तव तदारोप इत्यर्थः ॥ "दूषणमि"ति। प्रमाणाद्यसत्त्वेपि तदधीनदूषणादिव्यवहारसत्त्वमित्यभ्युपगमे व्याघातलक्षणं दूषणमित्यर्थः ॥ दूषणाभिधान-

(१) किंनाम=किन्तु ।

(२) व्यवहारिभिः=उभयसिद्धव्यवहारनियमेन व्यवहर्तृभिरित्यर्थः । विद्यासागरास्तु अत्र यथाशब्दानुरोधेनैकं तथाशब्दान्तरं प्रकल्प्य "तथा, तथाव्यवहारिभिः=उपेक्षितसदसत्त्वप्रमाणमात्रमूलव्यवहारिभिरित्यर्थमाहुः ।

(३) 'सार्वविभक्तिकस्तसिल्' इति स्वतः=स्वस्य तव दोषापत्तेरित्यर्थः ।

(४) इदं=दूषणं, देश्यं=प्रतिपादनीयं, स्यादित्यर्थः ।

Digitized by Google

स्याघातमत्वं व्युत्पादयति—। "कीदृशीमि"ति । कथायामेव दूषणाभिधा-नप्रोव्याद्वयं विकल्पावसरः ॥ 'एतादृशे"ति । यदि प्रमाणादीनि न सन्ति तदा व्यवहार एव धर्मो न सिद्धेदित्येतादृशपर्य्यनुयोगानवकाशादित्यर्थः ॥ "त्वतोपी"ति । त्वमपि प्रमाणादिसत्त्वमनङ्गीकृत्य प्रवृत्त इति तन्मूलको व्याघातस्तवापि तुल्य इत्यर्थः ॥ "तथैवे"ति । प्रकृतनियहाधिकरणकथा-प्रवृत्तिवत् कथान्तरप्रवृत्तिरपि न दुर्लभेत्यर्थः ॥ नन्वेतावता कथाप्रवृत्तिः समाहिता, व्याघातस्तु न समाहितः? इत्यत आह—। "उभये"ति । प्रमाणा-दिकमन्तरेण व्यवहारासिद्धिलक्षणो यो व्याघातस्त्वया दत्तः स मया नेष्यते इत्यर्थः ॥

खू० अन्यथा स्वाभिप्रायमालम्ब्य तेनापि त्वद्वचसि यत्कि-ञ्चिद्वागात्मनि दूषणे ऽभिहिते कस्य जयो व्यवतिष्ठतां? प्रमाणाद्यभ्युपगन्तुरेव यावन्नियमभरयन्त्रणा मय्यती स्यात् । तस्मात्प्रमाणादिसत्त्वासत्त्वाभ्युपगमौदासीन्येन व्यवहारनियमेन समयं बद्ध्वा प्रवर्तितायां कथायां भव-तेदं दूषणमुक्तमित्युचितमेव तथा सति स्यात् । योयं भवान्स्वाभिप्रायमपि नावधारयितुं शक्नोति दूरतस्तस्मि-न्पराभिसन्धानावधारणप्रत्याशा ।

टी० ॥ ननु त्वदनिष्टोप्ययं दोष एव, नह्यनिष्टत्वमपि दोषत्वे तन्त्र-मित्यत आह—। "अन्यथे"ति । वागात्मनि—वाङ्मात्ररूपे (१) त्वयापादितोपि व्याघातो वाङ्मात्रमेवेति भावः ॥ किञ्च यदुभयाननुमतोपि दोषस्तदा प्रमाणाद्यभ्युपगन्तुस्तव प्रामाणिकदोषानुसरणव्ययता स्यादुद्भावितदोषस्य प्रामाणिकत्वव्यवस्थापनप्रयासश्च भवेदस्माकंतु नेयं व्यापृतिरित्याह—। "प्रमाणाद्यभ्युपगन्तुरेवे"ति ॥ कथातः पूर्वं प्रमाणाद्यभ्युपगमनियमोभय-वाद्यननुमतदोषोद्भावनयोरकर्त्तव्यता (२) मुपसंहरति— । 'तस्मादि"ति ।

(१) तुंफदृग्वदावे। सङ्कुेतितदूषणाभावे इत्यर्थः ।
(२) चकर्त्तुंगतत्तामित्यपि क्वचित्पाठः ।

उचितमेव तथा सति स्यादित्यत्र 'यत्नुभयाभ्युपगतं स्यादि'ति शेषः ॥ उपसंहृत्य परस्याहृदयज्ञत्वमुपपादयति- । "योयमि"ति । प्रमाणाद्यनभ्युपगम्य प्रवर्त्तितायां कथायां व्याघातोऽयं दत्तः, प्रमाणाद्यनभ्युपगम्य कथायामप्रवृत्ति रिति चाभिधत्स्व, इति स्वा(१)भिप्रायानवधारणम्, कथातः पूर्वं प्रमाणाद्यभ्युपगमो न तन्त्रमिति मयोक्तं, प्रमाणादीनि न सन्तीति मदुक्तत्वेन त्वया गृहीतमिति पराभिसन्धानानवधारणम्, इयमस्माकं पैतृकी व्याख्या ॥ व्याख्यान्तरं (२) तु—ननु मदीयस्तावत्रापि प्रमाणाद्यभ्युपगमोऽस्त्येवेति प्रमाणाद्यभ्युपगमपूर्वकत्वं कथायां न व्यभिचरतीत्यत आह— । "उभये"ति । तथा च नान्यतराभ्युपगमोपि तन्त्रं, न चान्यतरसिद्धदोषाभिधानमुचितमित्यर्थः ॥ कथातः पूर्वमवश्यं समयबन्धः स्यात्, अन्यथा तवेदमनिष्टं स्यादित्याह—। "अन्यथे"ति उभयानभ्युपगतदूषणभावस्यापि यदि दूषणात्वं तदा जयपराजयादिव्यवस्था न स्यादित्यर्थः ॥ प्रमाणादिसत्तानभ्युपगन्ताहि प्रमाणाभासेनाप्यभिदध्यात्तदभ्युपगन्ता हि प्रमाणत्वेन निश्चितेनैवेति तस्य महती यन्त्रणेत्याह— । "प्रमाणे"ति । एव-यावदिति निपातद्वयमवधारणे, उचितमेवेति सोपहासम् । तदिदं व्याख्यानमसत्सन्दर्भमिव (३) ॥

मू० *अथ वादीकृत्य दुर्वैतण्डिकं तस्मिन्नुपाधौ (४)बाधो ऽभिधीयते इत्येव नेष्यते, शिष्यादयस्तु तस्य(५)कथानधिकारं

(१) विद्यासागरीकृतस्तु कीदृशीं मर्यादामानम्य प्रवृत्तायां कथायां भवता दूषणमुक्तमिति पृष्टे 'ईदृश्यां कथायां दोषमहमवादिषम्' इति स्वाभिप्रायानवधारणमाहुः ।

(२) 'उभयाभ्युपगमानुरोधित्वाद्व कथानियमस्य' इत्यत आरभ्य निरूपणस्य व्याख्यान्तरमाह—रूपेति ।

(३) उपाधौ=वादिवाग्व्यवहारमूले इत्यर्थ इति विद्यासागराः केषुचित्पुस्तकेषु तु नास्त्येवोपाधाविति पाठः ।

(४) तस्य—वैतण्डिकस्य कथानधिकारंप्रत्यस्माभिः स्वशिष्यादय एव प्राप्यन्ते इत्यन्वयपूर्वकोर्थः ।

(५) असत्सन्दर्भत्वं चास्य व्याख्यानस्य कथाप्रवृत्तेः समाहितत्वेपि व्याघातस्याऽसमाहितत्वादुक्षेयम् । पूर्वोक्तस्यैव व्याख्यानस्य तु व्याघातसमाधानपक्षे वोऽखिलत्वाच्चाऽसत्सन्दर्भत्वम् ।

Digitized by Google

ज्ञाप्यन्ते, अत एव भाष्यकारः "स (१) प्रयोजनमनुयुक्तो यदि प्रतिपद्यते" इत्याहस्म न तु प्रतिपद्यसे इति *। नैवम्, शिष्यादीन्प्रत्यपि 'चार्वाकादे-र्दोषोऽयमि'त्येवाभिधातव्यम्, कथं च तथा स्यात्, तस्य कथाप्रवेशनाऽप्रवेशनयोस्तद्बाधाक्षमत्वात्,

टी० ननु मया त्वयि व्याघातो नोक्तो येन तदनुरोधात्कथाऽभ्युपगमः, सा च कथा प्रमाणाद्यभ्युपगममन्तरेणैव प्रवृत्ता स्यादपितु शिष्या एवं ज्ञाप्यन्ते यद्वैतण्डिकः कथानधिकारीत्याशङ्कते—। "अथे"ति। यदि वैतण्डिकस्य जयाद्युद्देश्यं, तदा तदनुरोधात् प्रमाणाद्यभ्युपगन्तृत्वमपि, अथ किञ्चिदनुद्दिश्यैव कथायां प्रवर्त्तते तदोन्मत्त इवोपेक्षणीय, इति शिष्यशिक्षा 'न तु प्रतिपद्यसे' इत्युपलक्षणं न तु त्वं प्रयोजनमनुयुक्त इत्यपि द्रष्टव्यम्। वादिनि सम्बोध्ये मध्यमपुरुषप्रयोग उचित इति भावः॥ शिष्योऽपि हि वैतण्डिकस्यायं दोष इति बोधनीयो, दोषश्च कथायामेवेति सा कथा प्रमाणाद्यभ्युपगममन्तरेणैवेति स्वीकार्य्यमित्याह—। "शिष्यादीनि"ति। प्रयोजनसत्ता न प्रवर्त्तिका किन्तु तज्ज्ञानं, तच्च वैतण्डिकस्यापीति न तस्य कथानधिकारोऽपीति हृदयम्॥

मू० कथायामेव हि निग्रहः। नापि द्वितीयः, तथाहि-स्या(२) दप्येवं यदि कथकप्रवर्त्तनीयवाग्व्यवहारंप्रति प्रमाणादीनां हेतुता तत्सत्त्वानभ्युपगमे निवर्त्तेत, नत्वेवं सम्भवति तथा सति तत्सत्त्वानभ्युपगन्तॄणां वाग्व्यवहा-

---

(१) स=दुर्वैतण्डिकः, अनुयुक्तः=पृष्टः सन् यदि प्रयोजनं प्रतिपद्येत यद् एतादृशं विजयादिकं फलमुद्दिश्याहं कथायां प्रवृत्तस्तदा प्रतिपद्येतैव प्रमाणमपि तदधीनत्वात्प्रतिपत्तेः, अथ न, तदोन्मत्तवदुपेक्षणीय इति न्यायवात्स्यायनभाष्यार्थः।

(२) कारणत्वं ह्यन्वयव्यतिरेकाभ्यामेव गृह्यते तथा च—प्रकृते व्यतिरेकाभावान्न प्रमाणाद्यभ्युपगमस्य वाग्व्यवहारंप्रति कारणत्वमित्याह—स्यादपीति, स्यादप्येवं कथकप्रवर्त्तनीयवाग्व्यवहारं प्रतिप्रमाणादीनां (अभ्युपगतप्रमाणानां, वा प्रमाणादीनामभ्युपगमस्य) हेतुता, यदि तत्सत्त्वाऽनभ्युपगमेनिवर्त्तेत वाग्व्यवहार इत्यन्वयः।

रस्वरूपमेव न निष्पद्येत इत्यनुपपत्तेः, उक्तश्चायमर्थो यन्माध्यमिकादिवाग्व्यवहाराणां स्वरूपापलापो न शक्यते इति। अथ मन्यसे *कथकवाग्व्यवहारं प्रति हेतुत्वात् प्रमाणादीनां सत्त्वं, सत्त्वाच्चाभ्युपगमो, यत्सत्तदभ्युपगम्यते इति स्थितेः *इति। नैवम्, कयापि नियमस्थित्या प्रवृत्तायां कथायां कथकवाग्व्यवहारं प्रति हेतुत्वात् प्रमाणादीनां सत्त्वं, सत्त्वाच्चाभ्युपगमो भवता प्रसाध्यः,

टी०। "कथायामेवे"ति। सर्वापह्नताहङ्कारेण पराहङ्कारखण्डनस्य कथाकारणसम्यक्ज्ञानाऽभावस्य वा नियतत्वादिति भावः॥ 'प्रमाणाद्यभ्युपगमो वाग्व्यवहारहेतुः' इति द्वितीयं पक्षं निराचष्टे—। "नापी"ति। वाग्व्यवहारंप्रति प्रमाणादीनां हेतुत्वं सम्भाव्येतापि नत्वभ्युपगमस्यापि, माध्यमिकादिवाग्व्यवहारे व्यभिचारादित्यर्थः॥ *ननु प्रमाणादीनां हेतुत्वं यदि मनुषे तदा तदभ्युपगमस्यापि हेतुत्वं मंस्यसे, यतो नियतपूर्वसत्त्वं त्वयाऽवश्याभ्युपेयमित्यवर्जनीयसिद्ध एव प्रमाणाद्यभ्युपगम—इति शङ्कते (१)—। "अथे"ति। यद्यदा सत्तया ज्ञायते तत्तदाऽभ्युपगम्यते इति व्याप्तेरुभयसिद्धत्वादिति भावः॥ 'प्रमाणादीनि सन्ति हेतुत्वात् ब्रह्मवत्, प्रमाणादीन्यभ्युपगमविषयः सत्त्वात् ब्रह्मवत्, इति यस्यां कथायां त्वया साधनीयं तद्वदेव कथान्तरमपि स्यात्, अथ सापि प्रमाणाद्यभ्युपगमादेव प्रवृत्ता तदा तस्यां प्रमाणाद्यभ्युपगमहेतुत्वसाधनानर्थक्यम्, अथ तस्यामेव कथायां प्रमाणाद्यभ्युपगमस्य हेतुत्वं प्रसाध्य तत्कथाप्रवृत्तिस्तदाऽन्योन्याश्रय (२) इत्याह—। "कयापी"ति। अये वक्ष्यमाणयेत्यर्थः। नियमस्थितिः=समयबन्धः॥

(१) शङ्कते=पूर्वपक्षिणमुक्तिद्वयस्वयं शङ्का समर्पयतीत्यर्थः। शङ्का तु 'कथक—इत्यारभ्यैव।

(२) तत्कथाप्रवृत्तौ प्रमाणाद्यभ्युपगमस्य हेतुत्वसिद्धिः, तत्सिद्धौ च कथाप्रवृत्तिरिति।

मू० कथातः पूर्वं तत्त्वावधारणं वा परपराजयं वाऽभिलषद्भ्यां कथकाभ्यां यावता विना तदभिलषितं न पर्य्यवस्यति तावदनुरोद्धव्यं, तच्च व्यवहारनियमसमयबन्धादेव द्वाभ्यामपि ताभ्यां सम्भाव्यते इति व्यवहारनियमसमयमेव बध्नीतः (१) । स च ‘प्रमाणेन तर्केण च व्यवहर्तव्यं वादिना, प्रतिवादिनापि कथाङ्गतत्त्वज्ञानविपर्य्ययलिङ्गप्रतिज्ञाहान्याद्यन्यतमनिग्रहस्थानं तस्य दर्शनीयं, तदुत्पादने प्रथमस्य भङ्गो व्यवहर्त्तव्यः, अन्यथा तु द्वितीयस्यैव, तादृशेतरौ च जेतृतया व्यवहर्त्तव्यौ, प्रामाणिकः पक्षस्ताात्त्विकतया व्यवहर्त्तव्यः’इत्यादिरूपः । अत (२) एव ‘व्यवहारनियमसमयबन्धेऽपि हेतुर्वक्तव्यः तथाच सोऽपि हेतुः कथायां प्रवृत्तायामभिधातुं युक्त’ इति प्रमाणसत्त्वाभ्युपगमहेत्वभिधानवत् प्रत्यवस्थानमनवकाशम्,

टी० ननु प्रमाणाद्यभ्युपगमवत्समयबन्धोऽपि कथायामतन्त्रमेवेत्यत आह—“कथातः पूर्व”मिति ॥ ननु प्रमाणादिसत्तापि तथैवानुरुध्यतामित्यत आह— । “तच्चे”ति । समयबन्धस्यावश्यकत्वात् तन्मात्रमनुरोध्यं नतु प्रमाणाद्यभ्युपगमोपीत्यर्थः ॥ अनुरोध्यं समयबन्धं दर्शयति— । “सचे”ति । कथाङ्गतत्त्वज्ञानविपर्ययो ऽज्ञानमसम्यग्ज्ञानं वा ॥ कथाव्यवस्थामुक्त्वा फलव्यवस्थामाह—“तदुत्पादने” इति । उद्भावितनिग्रहव्यवस्थापने प्रथमस्य भङ्गः तदव्यवस्थापनेनिरनुयोज्यानुयोगात् द्वितीयस्यैव भङ्ग इत्यर्थः ॥ “तादृशेतरावि”ति । समर्थितनिग्रहा(३)शक्यसमर्थननिग्रहभङ्गप्रयोजकरूपरहितावित्यर्थः ॥ जल्पे वितण्डायां च फलव्यवस्थामभिधाय

(१) वादिप्रतिवादिनौ, इति शेषः ।
(२) अत एव=वक्ष्यमाणादेव हेतोरित्यर्थः ।
(३) समर्थितो यो निग्रहोऽशक्यसमर्थनश्च यो निग्रह एतदुभयं भङ्गप्रयोजकं रूपं, तद्रहितावित्यर्थः ।

वादे तामाह– । "प्रामाणिक"इति । व्यवहारश्च वस्तुसत्त्वं विनापीति भावः ॥ ननु समयबन्धस्यापि कथाहेतुत्वे विप्रतिपन्नः कथायामेव प्रबोध्य इति तत्कथावत् कथान्तरमपि स्यादित्यत आह– । "अत एवे"ति । अत एवेत्यस्यातिदेश्यमाह– । "द्वाभ्यामपी"ति । यद्यपि समयबन्धस्वेच्छापरिगृहीतत्वे विप्रतिपन्नः कथायामेव प्रबोध्यते इत्यत्रापि दोषस्तदवस्थ एव, तथापि समयबन्धमात्रेण कथाप्रवृत्तौ प्रमाणाद्यभ्युपगमस्य कथाङ्गत्वकल्पना गौरवपराहतेति भावः ॥

मू० द्वाभ्यामपि वादिभ्यां विचारप्रवृत्त्याभिलष्यमाणतत्त्वव्यवस्थाजयमूलत्वेन व्यवहारनियमस्य स्वेच्छयैव परिगृहीतत्वात् । * नचैवं प्रमाणानुपज्ञ (१) स्वेच्छामात्रपरिगृहीतमूलत्वात् मूलापरिशुद्धिसम्भवेन सर्वविचारविचार्य्यफलविप्लवापत्तिः स्यात् *। अविद्याविद्यमानाऽनादिपारम्पर्य्यायातस्य (२) लोकव्युत्पत्तिगृहीतसंवादस्य (३) च तस्यान्यथाभावासम्भाव्यतालक्षणस्वतःसिद्धिपरिशुद्धत्वात् । * नच प्रमाणादीनां सत्तापीत्यमेवोभाभ्यामङ्गीकर्त्तुमुचिता *। तादृशव्यवहारनियममात्रेणैव कथाप्रवृत्त्युपपत्तेः । प्रमाणादिसत्त्वाभ्युपगमेऽपि तथाविधव्यवहारनियमव्यतिरेके तत्त्वनिर्णयस्य जयस्य वाऽभिलषितस्य कथङ्कयोरपर्य्यवसानात् ।

(शेषमग्रे)

---

(१) प्रमाणेनाऽनुपक्रम्य स्वेच्छामात्रपरिगृहीतो नियमबन्धो मूलं यस्य विचारस्येति विग्रहः "उपज्ञा ज्ञानमाद्यं स्याज्ज्ञात्वारम्भ उपक्रमः" इत्यभिधानात् । प्रमाणेनोपज्ञा=आद्यज्ञानं यस्य नास्तीति, प्रमाणज्ञानशून्येनेति वार्थः ।

(२) अविद्यया विद्यमानश्चासावनादिपारम्पर्येणायातश्चेति तथा, तस्येत्यर्थः । विद्यासागरोक्तरीत्यातु "अविद्यमानादिपारम्पर्यायातस्येति पाठः तदर्थस्तु अविद्यमान आदिर्यस्य परम्पराभावस्य तेनायातस्येति ।

(३) लोकव्युत्पत्त्या=वृद्धव्यवहारेण गृहीतो'ऽन्यथा न भवति' इति संवादो यस्य समयबन्धस्य तस्येत्यर्थः ।

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 584. Vol. VI.)

घुषि कान्तिकरणे ॥ घुंषते। जुघुंषे। घुंषिता। जुघुंषिषते। जोघुंष्यते। जोघुंष्टि। लुटि ढेर्धिभावे ष्टुत्वजश्त्वानुस्वारपरसवर्णेषु जोघुण्ढि। लङि तिप्सिपोर्लोपे ऽजोघुन्। घिषीतीदुपधं पेठतुश्चन्द्रकाश्यपौ। स्वामी घसेति दन्त्यान्तमदुपधं पपाठ। यथा वयं तथा देवमैत्रेयदुर्गाः। षकारान्तोऽप्ययम् ॥ ६३८ ॥

घुषिरविशब्दने ॥ उदात्तधातुसाम्यादिह पठितः, घुषादयन्ता उदात्ता अनुदात्तेतः। घुषिरविशब्दनार्थः। इतो ऽर्हन्त्यन्ता उदात्ता उदात्तेतः। विशब्दनं प्रतिज्ञानं, तच्च शब्देन स्वाभिप्रायप्रकाशनमिति न्यासे। अस्मादन्यस्मिन्नर्थे यथाप्रयोगमयं धातुर्वर्त्ततइति पुरुषकारे। सर्वत्र क्षीरस्वामिधनपालभागवृत्तिकारा घषिं शब्दार्थं पेठुः। चन्द्रदुर्गौ त्वर्थशब्दमपहाय शब्दइत्येवं पेठतुः। घुष शब्द इति पठन् शाकटायनोऽप्यत्रैवानुकूलः। तेन हि यु इति स्थाने अनेनेति न क्रियते। यदि शब्दइत्यर्थः स्यात् तर्हि घुषिरविशब्दमइति द्रढ़ प्रतिषेधेऽपि लघु घुषिरविशब्दइत्येव वाच्यं स्यात् इति घुषिरविशब्दार्थे इति मैत्रेयादिपाठो न्यायान्। घोषति। जुघोष घोषिता। लुङी'रितो वे'ति परस्मैपदेषु च्लेरङादेशविकल्पनात्। अघुषत्। अघुषताम्। अघोषीत् अघोषिष्टाम् इत्याद्युभयं भवति। लुग्वा दुहेत्यत्र न्यासे व्यत्यघुक्षतेति वृत्तौ प्रत्युदाहरणमुपादायानित्यमागशासनमित्यनिट्त्वमुक्त्वा शल इगुपधादिति क्स उक्तः। हरदत्तादयस्तु प्रत्युदाहरणं घुष्यतेरिति मन्वाना इड्भावाय यत्नं कृतवन्तः। घुष्यतिर्हि नित्यानिट्। जुघुषिषति। जुघोषिषति। घुषित्वा। घोषित्वा। रलो व्युपधादिति कित्त्वविकल्पः। जोघुष्यते। जोघोष्टि। लोटि ढेर्धित्वे ष्टुत्वे च जश्त्वे च षकारस्य जोघुड्ढि। लङि तिप्सिपोः अजोघोट्। घोषयति। अजूघुषत्। घुष्टा रज्जुः। 'घुषिरविशब्दन'इति निष्ठायामनिट्त्वं, संपूर्वत्वे तु'रुष्यमत्वरसंघुषास्वना'मिति इटो विकल्पनात् संघुष्टा रज्जुः, संघुषिता रज्जुः, इत्युभयं भवति। घुषिरविशब्दनइति चुरादौ ॥ ६३९ ॥

अक्षू व्याप्तौ ॥ अक्षति । आनक्ष । आनष्ठ । आनक्षिथ । आनक्ष्व । आनक्षिव । उदित्त्वादिड्विकल्पः । इत्यनिट्पक्षे स्कोरिति कलोपे ष्टुत्वे । अक्षिता । अष्टा । अक्षिष्यति । अक्ष्यति । 'षढोः कः सी'ति कत्वे आद्यस्य स्कोरिति लोपः । अक्षतु । आक्षत् । अक्षेत् । अक्ष्यात् । मा भवानक्षीत् । मा भवानक्षिष्टाम् । 'नेटी'ति न वृद्धिः । अनिट्पक्षे वदव्रजहलन्तस्येति वृद्धौ मा भवानाक्षीत् । मा भवानाक्षिष्टामित्यादि । ननु येन नाव्यवधानमिति न्यायेनैकेन वर्णेन व्यवधानमाश्रयितुं युक्तं न त्वनेकेनेति कलोपस्यासिद्धत्वादनेकेन व्यवधानात् कथं वृद्धिः । नैतत् । तत्र हल्ग्रहणं हल्समुदायप्रतिपत्त्यर्थमित्युक्तत्वात् । तथा हि वदव्रजोरिति योगो विभज्यते । तत्रात इति अनुवर्त्तयिष्यते । ततो ऽच इति द्वितीयो योगस्तत्राङ्गेनाचो विशेषणात् अपाक्षीदित्यादावेकेन वर्णेन व्यवधाने वृद्धिसिद्धौ पुनः क्रियमाणं हल्ग्रहणं हल्समुदायप्रतिपत्त्यर्थं भवति । अस्य कर्तृवाचिसार्वधातुकपरत्वे 'अक्षोऽन्यतरस्या'मिति पक्षे श्नुर्भवति । अक्ष्णोति । अक्ष्णुतः । अक्ष्णुवन्ति । अजादावपि श्नुधात्वित्यादिनोवङ् । अक्ष्णोतु । अक्ष्णुहीत्यत्र उतश्च प्रत्ययादिति हिलुङ् न भवति, तत्रैवासंयोगपूर्वादित्युक्तत्वात् । अक्ष्णवानीत्यत्र आटि परत्वादुवङं बाधित्वा गुणः । आक्ष्णोत् । अक्ष्णुयात् । अचिक्षिषति । अनिट्पक्षे पूर्वत्रासिद्धीयमद्विर्वचन इत्युक्तत्वात् असमात्परत्वात् स्कोरिति कलोपे षढोरिति कत्वे च सनः ककारसहितस्य द्वितीयस्यैकाचो द्विर्वचने हलादिशेषे 'सन्यत'इतीत्वे अचिक्षतीति भवति । अक्षयति । चङि णिलोपस्य स्थानिवत्त्वात् क्षिशब्दस्य द्विर्वचने आचिक्षत् । अक्षित्वा । अष्ट्वा । निष्ठायामष्टः । अक्षि । 'इन्'इतीन्प्रत्ययः । अक्ष्णा । 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्त' इति तृतीयाद्यजादावन्तस्यानङादेशे 'अल्लोपोन'इत्यल्लोपः । ङौ 'विभाषा ङिश्यो'रिति विकल्पनात् अक्षणि अक्ष्णीत्युभयं भवति । विशालमक्षि यस्य स विशालाक्षः । 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्'इति षच् । स्वाङ्गवाचिसक्थ्यक्ष्यन्ताद् बहुव्रीहेः षच् । षित्वात् स्त्रियां विशालाक्षी । स्वाङ्गादिति वचनात् स्थूलाक्षा वेणुयष्टिरित्यत्र 'अक्ष्णोऽदर्शनादि'त्यचि टाब् भवति । अदर्श-

अचाच्चयन्तात् स[…]समासाद्वर्जितेति सूत्रार्थः । इह च दर्शनं चक्षुरिति गवाक्षं कूबराक्षमित्यत्राचक्षुर्वचनस्याक्षिशब्दस्याच् भवति । यद्यत्र समुदायो दर्शनसाधनं न तु तदवयवोऽक्षिशब्द इति तस्य दर्शनयोगाभावादअदर्शनादिति निषेधस्य नैव प्रसङ्गः । कूबराक्षमिति सच्छिद्रं यदश्वानां मुखपिधानं तदुच्यते । कथं स्थूलाक्षिरिक्षुरिति, यदि कुष्यते, अनित्यः समासान्त इति निर्वाह्यः । अयं समासान्तः स्वतिपूर्वस्यापि भवति । 'न पूजना'दित्यत्र बहुव्रीहौ सक्थ्यक्ष्णोरनिषेध इत्युक्तत्वात् ॥ ६४० ॥

तक्ष त्वक्षू तनूकरणे ॥ तक्षति । ततक्षेत्यादि । अक्षिवत् । 'तनूकरणे तक्ष' इति पक्षे शब्विषये श्नौ तक्ष्णोति, इत्यादि । अक्ष्णोतिवत् । तक्षा । कनिन्युवृषितक्षीति कनिन् । तक्ष्णोऽपत्यं, ताक्ष्णः । 'शिवादिभ्योऽण्'त्यण् । अत्र 'अन्' इति अन्नन्तस्याण्परत्वात्प्रकृतिभावे प्राप्ते 'षपूर्वहन्धृतराज्ञामणी'ति षपूर्वो योऽन्शब्दो हनश्च तयोर्धृतराजन्शब्दस्य चाणि प्रत्यये ऽल्लोप इत्यल्लोपः । शिवाद्यणा 'सेनान्तलक्षणकारिभ्यश्चे'ति ण्यस्य बाधो नेष्यत इति वृत्तावुक्तत्वात्ताक्षण्य इत्यपि भवति । 'नस्तद्धित'इति लोपो 'ये चाभावकर्मणो'रिति प्रकृतिभावाच्च भवति । सेनान्त इति सेनाशब्दान्ता गृह्यन्ते, लक्षण इति स्वरूपग्रहणं, कारिणः शिल्पिन इति । ग्रामस्य तक्षा ग्रामतक्षः । कुट्यां भवः कौटः, स चासौ तक्षा च कौटतक्षः स्वतन्त्रतक्षोच्यते, 'ग्रामकौटाभ्यां च तक्ष्ण' इति टच् समासान्तः । पञ्चानां तक्ष्णां समाहारः पञ्चतक्षः, पञ्चतक्षी । 'तद्धितलोपश्चे'ति नलोपः । पक्षे स्त्रीत्वं च । द्वितक्षी । 'द्विगो'रिति ङीप् । अन्यदा, 'स नपुंसक'मिति नपुंसकत्वम् । त्वक्षु त्वचन इत्यर्थे तूदित् ॥ ६४२ ॥

उक्ष सेचने ॥ उक्षति । उक्षां चकार । उक्षितेत्यादि पूर्ववत् । उक्षां प्रचक्रुर्नगरस्य मार्गा इति भट्टिप्रयोगमुपादाय सुधाकारादयः । उक्षत इत्युक्षाः, कर्मणि घञ् । उक्षान् प्रचक्रुरिति पाठान्तरं चास्यन् । उक्षा । श्वन्नुक्षन्निति कनिनन्तो निपातितः । उक्ष्णां समूहः औक्षकम् । गोत्रोक्षेत्यादिना वुञ् । उक्ष्ण इदमौक्षम् । 'औक्षमनपत्य' इति निपातनाट्टिलोपः । अपत्ये तु

श्रोक्षणाः । अपूर्वेहविन्यल्लोपः । जातोक्षः । महोक्षः । वृद्धोक्षः । अचतुरेतिकर्मधारयादचि टिलोपो निपात्यते ॥ ६४३ ॥

रक्ष पालने ॥ रक्षति । ररक्ष । रक्षितेत्यादि । निरक्षतीति, निरक्षी । रक्षसूचिपक्षानामिति ग्रहादिपाठाण्णिनिः । रक्षणं, रक्ष्णः । यजयाचेत्यादिना नङ् । रक्षः । असुन् । राक्षसः । 'प्रज्ञादिभ्यश्चे'ति स्वार्थेऽण् ॥ ६४४ ॥

णिक्ष चुम्बने ॥ निक्षति । निनिक्ष । निक्षितेत्यादि । प्रणिक्षणम् । प्रनिक्षणम् । 'वा निसनिक्षनिन्दा'मिति णत्वविकल्पः । अयं विकल्पः कृत्येवेति मिन्दतो प्रतिपादितम् । तेन प्रणिक्षतीत्यादावुपसर्गादिति णत्वं भवति ॥ ६४५ ॥

तृक्ष स्तृक्ष णक्ष गतौ ॥ तृक्षति । ततृक्ष । तृक्षितेत्यादि । तितृक्षिषति । तरीतृक्ष्यते । 'रीगृत्वत' इति रीक् । ततृष्टि । स्कोरिति-ककारलोपस्यासिद्धत्वाल्लघूपधत्वाभावाच्च गुणः । एवं ह्यचिक्षौ । तृक्षयति । अततृक्षत् । तृक्षतीति, तृक्षः । तस्यापत्यं तार्क्ष्यः । 'गर्गादिभ्यो यञि'ति यञ् । स्तृक्षति । तस्तृक्षेत्यादि पूर्ववत् । षोपदेशफलं तरीष्टृक्ष्यत इत्यादौ । नक्षति । प्रणक्षतीत्यादि । नक्षत्रम् । अमिनक्षीत्यत्रप्रत्ययः । नभ्राणित्यत्र नञ्पूर्वात् क्षरतेः क्षीयतेर्वा नक्षत्रमिति निपातितम् ॥ ६४८ ॥

वक्ष रोषे ॥ सङ्घात इत्येके । वक्षतीत्यादि । वक्षः । असुन् ॥ ६४९ ॥

मृक्ष सङ्घाते ॥ मृक्षतीत्यादि । मक्ष इत्यप्येक इति मैत्रेयः । मक्षति । ममक्ष । मक्षितेत्यादि । मक्षिका 'क्वुन् शिल्पिसंज्ञयो'रिति क्वुनि टापि प्रत्ययस्थादितीत्वम् ॥ ६५० ॥

तक्ष त्वचने ॥ त्वचनं संवरणमिति दुर्गकाश्यपमैत्रेयाः । त्वचो ग्रहणमिति स्वामी । तक्षतीत्यादि । अयमुदित्तनूकरणे गतः । अत्रैव पक्ष परिग्रह इत्यप्येक इति । पक्षति । पक्षः । घञ् । पक्षस्य मूलं, पक्षतिः । 'पक्षात्ति'रिति तिप्रत्ययः । पक्षे भवं पक्ष्यं, 'दिगादिभ्यो यदि'ति यत्प्रत्ययः । पक्षः । पक्षीतीच्छतिपर्यायः । वत्सरार्द्धवचनश्च । प सुन् प्रत्ययः ॥ ६५१ ॥

मूर्व आदरे ॥ अनादरइति क्व चित्पठ्यते । तदसत् । सोमेन यक्ष्यमाणे। नमूर्वचर्मिति दर्शनात् सोमेन यक्ष्यमाणे। वसन्ते ब्राह्मणो ऽग्नीनादधीत । उत्तरयोः फल्गुन्योरग्निमादधीतेत्यादिना चोदितनक्षत्राणि नाद्रियेत इति तत्रार्थः । तथा अवहेडनमसूर्वणमिति दृश्यते। मूर्वणमादरः। ततोन्यदमूर्वणमनादरः । मूर्वति । मूर्वितेत्यादि ॥ ६५२ ॥

काचि वाचि माचि काङ्क्षायाम् ॥ काङ्क्षति । चकाङ्क्ष । काङ्क्षिते-त्यादि । चिकाङ्क्षिषति । चाकाङ्क्ष्यते । चाकांक्षि, इत्यादि । काङ्क्षयति । अचकाङ्क्षत् एवं वाङ्क्षति माङ्क्षतीत्यादि ॥ ६५५ ॥

द्राचि धाचि ध्वाचि घोरवासिते च ॥ द्राङ्क्षति । धाङ्क्षति । द्राक्षा । धाक्षा । द्राक्षामत् । ध्वाक्षामत् 'मादुपधायाश्च मतोर्वोयवादिभ्यः' । मकारान्तात् मवर्णोपधात् अवर्णान्तात् अवर्णोपधाच्च परस्य मतुपो मका-रस्य वकार इति प्राप्तं वत्वं यवादिभ्यः परस्य नेति निषेधात् न भवति । द्राक्षाधाक्षाशब्दयोरनुनासिकलोपोपि यवादिपाठादेव । ध्वाङ्क्षति। ध्वाङ्क्षः। तीर्थे ध्वाङ्क्षइव तीर्थध्वाङ्क्षः । 'ध्वाङ्क्षेण क्षेपे' इति सप्तम्यन्तं ध्वाङ्क्षवाचि-ना क्षेपे गम्यमाने नित्यं समस्यतइति तत्पुरुषः । क्षेपोत्रा ऽनवस्थादिना ऽवगम्यते ॥ ६५८ ॥

चूष पाने ॥ चूषति । चुचूष । चूषितेत्यादि । चुचूषिषति । चोचू-ष्यते । चोचूष्टि । चूषयति । अचूचुषत् ॥ ६५९ ॥

तूष तुष्टौ ॥ तूषतीत्यादि पूर्ववत् ॥ ६६० ॥

पूष वृद्धौ ॥ पूषतीत्यादि । पूषी । दीपस्थापनार्थे कुड्यकल्पितो बिल-विशेषः । पचाद्यच्, गौरादित्वात् ङीष् । पूषा । श्वन्नुक्षन्नित्यादिना कनिनन्तो निपात्यते । पूषणौ । 'इन्हन्पूषार्यम्णां शौ'विति उपधाल-क्षणस्य दीर्घस्य शावेव प्रत्यये नियमात्सर्वनामस्थानइति दीर्घो न भवति । सौ च 'सौ चे'ति विधानाद् भवति । अयमसंबुद्धिविषयः । अतिपूषाणि ज्योतींषि इत्यत्र । शिपरत्वात् दीर्घः । अपत्यावाचिणि पौष्णः । अपूर्वे-हनित्यल्लोपः । पुष पुष्टाविति इहैवार्थे दिवादौ क्र्यादौ च । पुष धारण इति चुरादौ ॥ ६६१ ॥

मूष स्तेये ॥ मूषति । मूषकः । संज्ञायां क्वुन् । मूषिका । अजादिपाठात् जातिलक्षणङीषं बाधित्वा टाप् । मुष स्तेयइति ह्रस्वोपधः क्र्यादौ । लूष रूष भूषायामिति सुधाकरः । भूषति । रूषति । रूषिता ॥ ६६२ ॥

शूष प्रसवे ॥ तालव्योष्मादिरिति प्रारार्यषिका इति स्वामी । दृश्यते च तैत्तिरीयके । अनशूषा इति । के चित् दन्त्यादिं पठन्ति । तद्नार्षं, षोपदेशलक्षणविरोधात् । शूषतीत्यादि ॥ ६६३ ॥

यूष हिंसायाम् ॥ यूषति । यूषः मांसरसविशेषः ॥ ६६४ ॥

जूष च ॥ जूषते । जुषी प्रतिसेवनयोरिति चुरादौ । जुषपरिभाषणइति युजादौ ह्रस्वोपधौ ॥ ६६५ ॥

भूष अलंकारे ॥ भूषति । भूषते कन्या स्वयमेव । अभूषिष्ट कन्या स्वयमेव । भूषाकर्मेति यक्चिणोर्निषेधः । भूषाफलं शोभनाख्यं कर्मणि दृश्यतइति कर्मस्थक्रियात्वं कैयटइत्युक्तम् । अङ्गाः सूनाः परिभूषन्त्वश्वमित्यत्र भट्टभास्करः । सूना मांसविकर्षणसाधनान्यश्वहानि अश्वं परिभूषन्तु, परितो भवन्त्विति । भवतेर्लोटि शिपि रूपमुक्त्वा भूषयतेर्वा शप् । 'छन्दस्युभयथे'त्यसार्वधातुकत्वाण्णिलोप इत्याह । तदस्य धातोरस्मरणात् । न चायं नास्तीति शक्यते वक्तुं सर्वेषु व्याख्यानेष्वविवादेनोपादानात् । अयं चुरादौ च ॥ ६६६ ॥

ऊष रुजायाम् ॥ ऊषति । ऊषां चकार । ऊषिषति । मा भवानूषिषत् । णिलोपस्य स्थानिवत्त्वात् षिशब्दस्य द्विर्वचनाम् । ऊषः । घञ् । ऊषरः । 'ऊषशुषिमुष्कमधो रः' मत्वर्थे रः । ऊष्यति । उष दाहइति भ्वादौ ह्रस्वोपधः ॥ ६६७ ॥

ईष उञ्छे ॥ ईषतीत्यादि ऊषिवत् । ईषतइति गतौ गतः ॥६६८॥

कष खष शिष जष झष शष वष मष रुष रिष हिंसार्थाः ॥ तृतीयषष्ठौ तालव्योष्मादी । सप्तमो दन्त्योष्मादिः । कषति । चकाष । कषितेत्यादि । अकषीत् । अकाषीत् । अतो हलादेरिति वा वृद्धिः । सर्वकषम् । 'सर्वकूलाभ्रकरीषेषु कषः'इति खच् । अरुर्द्विषदजन्तस्येति खिदन्तउत्तरपदे

पूर्वपदस्य मुम्। एवं कूलादिषूदाहार्यम्। विकाषी। 'वौ कषलसकत्थस्रम्भ' इति तच्छीलादिषु घिनुण्। आकषः। निकषः। गोचरादिसूत्रे चकारस्यानुक्तसमुच्चयार्थत्वात् अधिकरणे घः। आकषेण चरति आकषिकः। 'आकषात्ष्ठलि'ति तृतीयान्तात् अस्मात् चरतीत्यर्थे ष्ठल्। षित्त्वात्। आकषिकी। आकषे कुशल, आकषकः। 'आकर्षादिभ्यः कनि'ति सप्तम्यन्तात् कुशल इत्यर्थे कन्। निमूलकाषं कषति। समूलकाषं कषति। निमूलं समूलं च कषतीत्यर्थः। 'निमूलसमूलयोः कष'इति णमुल्। उपपदसमासः। कषादिषु यथाविध्यनुप्रयोगइति यस्मात् णमुलो विधानं तस्यैवानुप्रयोगः, कषादयश्च निमूलसमूलयोः कष'इत्यारभ्यो'पमाने कर्मणि चेत्येतदन्तेषूपात्ता धातवः। अत्रानुशब्दो नानन्तर्येऽपि तु धात्वर्थानुवादेन पश्चाद्भावे, तेन व्यवहितपूर्वप्रयोगोऽपि द्रष्टव्यः। तथा च वृत्तिः। धातुसंबन्धेप्रत्ययविधानादनुप्रयोगः सिद्ध एव यथाविध्यनुप्रयोगार्थं वचनमिति। तथा यथाविध्यनुप्रयोगः पूर्वस्मिन्नित्यत्र हरदत्तः। अनुशब्दो धात्वर्थानुवादेन पश्चाद्भावे न त्वानन्तर्ये, तेन पूर्वप्रयोगो व्यवहितप्रयोगोपि भवतीति। न्यासे च अथ पूर्वप्रयोगस्य व्यवहितप्रयोगस्य च निवृत्त्यर्थं कस्मान्न भवति यथा कृञ् चानुप्रयुज्यते लिटीत्येतत्। तच्च एतयोरिष्टत्वात्। पादौ कषितुं शीलमस्य पत्काषी। सुप्यजातौ णिनिस्ताच्छील्य'इति णिनिः, 'हिम काषिहतिषु चे'ति हिमाद्यावुत्तरपदे पादस्य पद्भावः। कष्टं व्याकरणम्। कृच्छ्रसाध्यमित्यर्थः। कष्टानि गतानि। सुप्रवेशानीत्यर्थः। 'कृच्छ्रगहनयोः कष' इति निष्ठायामनिट्त्वम्। अन्यत्र कषितो देवदत्तः। कष्टाय कर्मणे क्रामति, कष्टायते। 'कष्टाय क्रमण'इति चतुर्थ्यन्तादनार्जवे क्यङ्, क्रमणमिहानार्जवः। कष्टं चिकीर्षति,कष्टायते। अत्र सत्रकक्षेत्यादिना द्वितीयान्तात्करणचिकीर्षायां क्यङ्। कक्षः। वृतिवक्षीत्यादिना सप्रत्ययः। 'षढोः कः सी'ति कत्वं तितुत्रेतीणिनषेधः। कक्षायते। सत्रकक्षेत्यादिना क्यङ्। खषतीत्यादि पूर्ववत्। खष्यः। बलात्कारः। खष्यशष्यबाष्पपर्पेक्ष्पकूर्पशिल्पा इति पप्रत्ययान्ता निपात्यते। शिषति। शिशेष। शिशेषिथ। शेष्टा

शेष्यति । शेषतु । अशेषत् । शेषेत् । आशिषि । शिष्यात् । अशिषत् । हल-न्तादुपधेति क्सः अनिट्त्वं च शिषिं पिषिं शिलष्यतिपुष्यती त्विषिमिति व्याघ्र-भूतिवचनात् । तदुक्तं पुरुषकारे । शिषेरसर्वोपयोगे ऽपि । शेषयति । शेष-तीत्युभौ, लुङ्यङ्भावादव्यशेषत् इति देवमुपादायाशेषीदित्युक्तं, श्लिषिं पुषि-मित्यनिट्कारिकामाभाष्याच्छिषिमात्रस्यानिट्त्वेन क्से सति अशिक्षदिति युक्तम् । तथा मैत्रेयोऽपि शेष्टेत्यनिटमुदाजहार । एवं च लिटि सेट्त्वं क्रादिनियमात्सिद्धम् । एवं चास्य सेटां मध्ये पाठो यथा शिषिमात्रस्या-निट्त्वेन शलइगुपधेति षान्तसाम्यात् षान्तपरस्मैपदिसाम्याच्च द्रष्टव्यः । शिशिक्षति । 'हलन्ताच्चे'ति सनः कित्त्वम् । शेशिष्यते । शेशेष्टि । शेष-यति । अशीशिषत् । शिष्ट्वा । शिष्टः । शिष्टवान् । शिष्यं कालयोगः । अध्यशिष्येति यप्रत्यये निपातितम् । जषति । जजाष । जेषतुः । जेषि-तेत्यादि कषिवत् । किति लिटि सेटि थलि चेत्वाभ्यासलोपौ । एवं झष-ति झषतीत्यादि । शष्यं पूर्ववत्यः । शष आदानसंवरणयोरित्यये स्वरितेत् । वषति । ववाष । ववषतुः । वषितेत्यादि । वादित्वान्नैत्वाभ्यासलोपौ । मषतीत्यादि । रोषति । रुरोष । रुरोषिथ । रोषिता । रोष्टा । रोषिष्यति इत्यादि । तकारादौ 'तीषसहलुभरुषरिष' इतीड्विकल्पः । रुषित्वा । रुष्ट्वा । इट्पक्षे रलो व्युपधेति कित्त्वविकल्पः । 'निष्ठायां रुष्यमत्वरसंघुषास्वना' मितीटो विकल्पना'द्यस्य विभाषे'ति निषेधो भवति । रुष्टो, रुषितः । 'मतिबुद्धिपूजार्थेभ्यश्चे'त्यत्र चकारस्यानु'क्तसमुच्चयार्थत्वाद्वर्तमाने'क्तः । इट्पक्षे 'उदुपधाद्भावादिकर्मणोरन्यतरस्या'मिति कित्त्वविकल्पनात्पक्षे गुणः । रोषितमनेनेत्यादि भवति । रुष रोषइति दिवादौ चुरादौ च । रेषतीत्यादि रोषतिवत् । निष्ठायां 'यस्य विभाषे'तीटो निषेधात् रिष्टः । रेषतइति शब्दे गतः । अत्र दण्डके मुषिरपि धातुः कोशे पठ्यते । स्तेया-र्थोऽयं पूर्ववच्चैव पठित इतीह पाठे नाभिनिवेष्टव्यम् । हिंसार्थत्वं यदि दृश्यते तदा धातूनामनेकार्थत्वाद्भविष्यति ॥ ६७८ ॥

(शेषमये)

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

अथ पाशुकपदार्थानां नामान्युच्यन्ते ।

(*Continued from page* 594. Vol. VI.)

७८ अग्निर्होतेत्यादीनि पञ्चवाक्यानि पञ्चहोतृपदवाच्यानि ॥

७९ यजमानेनासन्नाभिमन्त्रणे कृते स्रुगादापनमन्त्रगतघृतवतीशब्दं श्रुत्वा ऽध्वर्युर्जुहूपभृतावादायात्याक्रम्याश्राव्य प्रत्याश्राविते मैत्रावरुणं प्रत्याह । स्वाहा कृतीभ्यः प्रेष्येति अयमुत्तमप्रयाजप्रैषप्रैष उच्यते ॥

८० मैत्रावरुणेन प्रेषितो होता एकादशीं प्रयाजयाज्यां पठति । होत्रा वषट्कृतेऽध्वर्युरुत्तमप्रयाजेन प्रचरति । तत उदङ्ङत्याक्रम्य प्रयाजशेषेण ध्रुवामभिघार्य पृषदाज्यमभिघार्य दक्षिणतो गत्वा वपामभिघार्य यथागतं प्रतिनिवृत्य चतुर्वारं ध्रुवाया आज्यं गृह्णान आह । अग्नय आज्यस्यावदीयमानस्यानुब्रू३हीति । ततोऽत्याक्रम्याश्राव्य प्रत्याश्रावित आह । अग्नय आज्यं प्रस्थितं प्रे३ष्येति । ततो मैत्रावरुणप्रेषितो होता यजति । होत्रा वषट्कृतेऽध्वर्युः प्रकृतिवत्प्रथमाज्यभागेन प्रचरति । एवं द्वितीयाज्यभागेन । तत्र सोमायाज्यस्यावदीयमानस्यानुब्रू३हि सोमायाज्यं प्रस्थितं प्रे३ष्येति प्रैषयोर्विशेषः । उभयत्र याजमानं प्रकृतिवत् । अथापूर्वाज्येन जुह्वामुपस्तीर्य तदुपरि हिरण्यशकलमवधाय वपामेकीकृत्य स्रुवेणादादान आह । इन्द्राग्निभ्यां छागस्य हविषो वपाया मेदसोनुब्रू३हीति । अयं वपानुयाज्यप्रैष उच्यते ॥

८१ वपां स्रुचि निधाय तदुपरि हिरण्यशकलं निधायापूर्वोज्येना-
भिघार्यापूर्वोज्यस्थालीं सस्रुवामाहवनीयसकाशे निधायात्याक्र-
म्यास्राव्य प्रत्याश्रावितआह । इन्द्राग्निभ्यां छागस्य वपां
मेदः प्रस्थितं प्रेऽष्येति अयं वपायाज्याप्रैष उच्यते ॥

८२ स्वाहा देवेभ्य इतिमन्त्रेण पुरस्तात् स्रुवेणाज्याहुतिं जुहोति ।
देवेभ्य इदमिति यजमानस्य त्यागः । अध्वर्युर्होतुर्याज्याया
उपक्रमकाले जातवेदो वपयेत्यृचं स्वाहाकारान्तां पठन् वष-
ट्कारसमकालं स्रुङ्मुखेन वपां जुहोति । याजमानं प्रकृति-
वत् । देवेभ्यः स्वाहेति मन्त्रेणोपरिष्टात्स्रुवाहुतिं जुहोति ।
याजमानं पूर्ववत् । आज्यभागानन्तरमेतावत्कर्म वपायाग इति
वपाप्रचार इति चोच्यते ॥

८३ ततो विशाखां वपाश्रपणीं प्रागग्रामविशाखां वपाश्रपणीं प्रत्यगग्रां
च कृत्वाऽऽहवनीये स्वाहोर्ध्वनभसमित्यादृचा सस्वाहाका-
रयानुप्रहरति । इदं वपाश्रपण्यनुप्रहरणमुच्यते ॥

८४ ऊर्ध्वनभसे मारुतायेदमिति यजमानस्य त्यागः । वपाश्रपण्यो-
रुपरि संस्रावेणाभिजुहोति । तत उदङ्कुत्याक्रम्य यथायतनं
स्रुचौ सादयित्वा षडृत्विजो यजमानः पत्नी च चात्वालदेशं
गत्वा परस्परस्याह्वानं कुर्युः । तद्यथा । पत्न्येहि । होतरेहि ।
ब्रह्मन्नेहि । प्रतिप्रस्थातरेहि । प्रशास्तरेहि । अग्नीदेहि ।
यजमान एहि । इत्यध्वर्युराह्वयति । ततः पत्नी होत्रादी-
नध्वर्य्वन्तानुत्तरीत्याह्वयति । एवं होतृब्रह्मप्रतिप्रस्थातृप्रशा-
स्त्रग्नीद्यजमानाः क्रमेण आत्मानं वर्जयित्वा सर्वेषामुत्त-
रीत्याह्वानं कुर्युः । तत इदमापः प्रवहतेति निमुञ्चामि यप-

थादिति च द्वाभ्यामृग्भ्यां चात्वाले सर्वे मार्जयन्ते । यजमानः सुमित्रा न आप ओषधयः सन्त्विति मन्त्रेणाञ्जलिनापो गृह्णाति । दुर्मित्रास्तस्मै भूयासुरित्यादिमन्त्रेण नैर्ऋत्यां दिशि ता अपो निरस्यति । सर्वे अपः स्पृष्ट्वा स्वेस्वे स्थाने उपविशन्ति । इदं वपामार्जनमित्युच्यते ॥

८५ अथाध्वर्युराह । अग्नीत्पशुपुरोडाशं निर्वप प्रतिप्रस्थातः पशुं विशाधि इति । अयं पशुपुरोडाशनिर्वापप्रैष उच्यते ॥

८६ तत आग्नीध्रः पाणी सम्मृश्य शालामुखीयस्य पुरस्ताद्दर्भेषु पात्राणि सादयति । स्फ्यमेकादशकपालानि शूर्पं कृष्णाजिनं उलूखलं मुसलं दृषदमुपलां मेक्षणं पिष्टोद्वपनीं प्रणीताप्रणयनं दारुपात्रीं मदन्तीं च । प्राकृत आहवनीयः शालामुखीय इत्युच्यते ॥

८७ ततो ब्रह्मोपवेशनादि प्रकृतिवत् । निर्वापादिषु अग्निपदस्य स्थाने इन्द्राग्निपदम् । शालामुखीयस्य पश्चादाज्यलेपनिनयनान्तं करोति । प्रतिप्रस्थाता हविष्कृदन्ते आज्यनिनयनान्ते वा सम्प्रैषमाह । शमितर्हृदयं जिह्वां वक्षस्तानि साधु कुरुतात्तनिममतस्तो तानि साधु सव्यं दोरेकचरं कुरुतान्नानापार्श्वे अवद्यताद्दक्षिणं श्रोणिमध्युद्धिं कुरुताद्दक्षिणं दोः सव्याश्श्रोणिमणिमद्गुदस्य तानि अङ्गानि कुरुताद्वनिष्ठुं च जाघनीं चावद्यताद्धस्तूः कुरुतात्त्रिः पशुं प्रच्यावयतात्त्रिः प्रच्युतस्य पशोर्हृदयमुत्तमं कुरुतादिति । अयं पश्वङ्गप्रहणप्रैष इत्युच्यते ॥

८८ अध्वर्युः शामित्राग्नौ पशुकुम्भीमधिश्रयति द्यौरसि पृथिव्यसीत्यादिमन्त्रेण । वसूनां पवित्रमसीत्यादिमन्त्रेण पशुकुम्भ्यां शाखापवित्रमुदग्रं निदधाति तस्यां प्रभूतमुदकमानीय सर्वाण्य-

Digitized by Google

ङ्गानि निक्षिप्य सुशृतानि यथा स्युस्तथा श्रपयति । पश्वङ्गेषु शृतेषु-
सत्सु आग्नीध्रो दक्षिणेनाज्यस्थालीं स्रुवं सव्येन दारुपात्रीं
वेदमित्येतत्समादायान्तर्वेदि पुरोडाशासादनान्तं करोति ।
यजमानेनासन्नाभिमन्त्रणे कृते ऽध्वर्युर्जुहूपभृतोरुपस्तीर्य पुरो-
डाशस्य पूर्वार्धादवद्यन्नाह । इन्द्राग्निभ्यां पुरोडाशस्यावदीयमा-
नस्यानुब्रू३हीति अयं पशुपुरोडाशानुवाक्याप्रैष उच्यते ॥

८९ जुह्वां प्रकृतिवदवदाय प्रत्यञ्जनान्तं कृत्वोपभृति स्विष्टकृदर्थं पुरो-
डाशस्योत्तरार्धात्सकृदवदाय द्विरभिघार्य न प्रत्यनक्ति अत्याक्र-
म्याश्राव्य प्रत्याश्रावित आह । इन्द्राग्निभ्यां पुरोडाशं प्रस्थितं
प्रे३ष्येति । अयं पशुपुरोडाशयाज्याप्रैष इत्युच्यते ॥

९० वषट्कृते जुहोति । इन्द्राग्निभ्यामिदमिति यजमानस्य त्या-
गोनुमन्त्रणं च प्राकृतम् । अध्वर्युरुपभृत्स्थं पुरोडाशं जुह्वां
समावपमान आह । अग्नये नुब्रू३हीति । अयं पशुपुरोडाश-
स्विष्टकृदनुवाक्याप्रैष उच्यते ॥

९१ ततोऽत्याक्रम्य प्रत्याश्रावित आह अग्नये प्रे३ष्येति । अयं पशु-
पुरोडाशस्विष्टकृत्प्रैषप्रैष उच्यते ॥

९२ वषट्कृते प्रकृतिवज्जुहोति प्राकृताग्नेययागवद्यजमानस्य त्याग-
नुमन्त्रणे । ततो हविरुच्छिष्टोद्वासनान्तं प्रकृतिवत् । ततः
स्रुचि चतुर्गृहीतं गृहीत्वाऽन्वाहार्यपचने इध्मप्रव्रश्चनान्यभ्या-
धाय फलीकरणहोमं कृत्वा प्रणीतानिनयनान्तं प्रकृतिवत् ।
अथ संप्रैषमाह । आग्नीदुत्तरं बर्हिरुपसादय प्रतिप्रस्थातः पशोः
संवदस्वेति । अयं पाशुकहविरासादनप्रैष इत्युच्यते ॥

९३ तत आग्नीध्रः स्रुचां दक्षिणतो बर्हिरास्तीर्य तदुपरि यूपाहव-

Digitized by Google

नीययोरन्तरेणोडमूनुमाहृत्य कृष्णशाखायामुपगूहति । प्रतिप्रस्थाता आज्यस्थालीं स्रुवं चादाय पूर्वगृहीतात्पृषदाज्याज्जुह्वां गृहीत्वान्तरेण चात्वालोत्करावुदङ्ङुपनिष्क्रम्य शमितारं पृच्छति । शृतꣳहवी:३शमित: इति । शमिता हृदयशूलं पुरतो धारयन् शृतं इति प्रत्याह । प्रतिप्रस्थाता पुन: किंचिद्गत्वा पूर्ववत्पृच्छति । शमिता तथैवप्रत्याह पुन: किंचिद्गत्वा तथैव तृतीयप्रश्नोत्तरे । इमे प्रश्नोत्तरे शमितृप्रश्नोत्तरे इत्युच्येते ॥

६४ अथ प्रथमगमने पूषा मा पशुपा: पात्विति मन्त्र: । पूषा मा पथिपा: पात्विति द्वितीयगमने मन्त्र: । तृतीयगमने पूषा मा धिपा: पात्वितिमन्त्र: । अथ वा तूष्णीमेव गमनत्रयम् । एते हविरानयनार्थगमनमन्त्रा इत्युच्यन्ते ॥

६५ प्रतिप्रस्थाता उक्तरीत्या शामित्राग्निसमीपं गत्वा शमितुर्हस्ताच्छूलमादाय तेन शूलेन हृदयरूपमवदानं भित्वा तच्छूलं शमितुर्हस्ते दत्वा पृषदाज्येन हृदयादीन्येकादशावदानानि युगपदभिघारयति सन्ते मनसा मन इत्यादिना स्वाहाकारान्तेन मन्त्रेण । पुनराज्यस्थाल्याज्येन स्रुवगृहीतेन सर्वाण्यवदानान्यभिघार्योद्गुद्वास्य पुनराज्येनाभिघार्य एकादशावदानानि प्रत्येकं यस्तआत्मा पशुष्वित्यादिमन्त्रेणालङ्करोति । उक्तमन्त्रेणाभिघारणं हविरलङ्करणमित्युच्यते ॥

६६ ततो विपू: कृत्वा हरतेति परिकर्मिण: प्रतिप्रेष्यति अयमङ्गाहरणप्रैष उच्यते ॥

६७ अध्वर्युर्जुह्वामुपभृति च ध्रुवाज्येनोपस्तृणाति । इडापात्रे चा-

व्यस्थाल्याज्येनोपस्तृणाति वसाहोमहवन्यामपूर्वाज्येनोपस्तृणाति स्वयं यूपस्य बहिर्मार्गेण गच्छन् जुहूं उपभृतं वसाहोमहवनीं स्वडापात्रं प्राशित्रहरणं च यूपाहवनीययोरन्तरेणाहृत्य दक्षिणतो हविषः सादयति । परिकर्मिणस्तु अङ्गानियूष्णः पृथक् कृत्वा यूषं पात्रान्तरे गृहीतं स्थापयन्ति । पश्वङ्गानि यूपाहवनीययोरन्तरेणाहरन्ति । अध्वर्युस्तान्यङ्गानि स्रुचां दक्षिणतः प्लक्षशाखासमीपे पश्वङ्गहोत्रासादयति । ततः पात्रान्तरस्थं यूषं यूपाहवनीययोरन्तरेणाहृत्याङ्गानां दक्षिणतः सादयति । आसन्नानि हवींषि यन्मे अग्नइत्यृचा यजमानोनुमन्त्रयते । इदं पाशुकहविरासादनमित्युच्यते ॥

६८ ततोऽध्वर्युः प्लक्षशाखायां हृदयं निधाय स्वधितिना तस्याग्रे छिन्नप्रदेशादवद्यन्नाह । मनोतायै हविषोवदीयमानस्यानुब्रूहीति । अयमङ्गावदानप्रैषइत्युच्यते ॥

६९ हृदयाज्जुह्वां द्विरवद्यति ततो जिह्वायाः सकाशात् द्विरवद्यति । ततो वक्षसस्तनिम्नश्च वृक्कयोर्मेदसी पृथक् स्थापयित्वा दक्षिणवृक्यात्सव्यवृक्यात्सव्याद्दोष्णो दक्षिणात्पार्श्वात्सव्यात्पार्श्वाद्दक्षिणश्रोण्या अध्युध्याऊर्ध्वप्रदेशाद्गुदं त्रेधा कृत्वा मूलमुपयड्भ्योऽग्रं स्विष्टकृदर्थं निधाय मध्यं द्वेधा कृत्वा जुह्वामवद्यति । पूर्वस्थापितदक्षिणवृक्यमेदोयूष्णि निधाय प्रसार्य तेन जुहूं प्रच्छाद्य यूष्णोपसिच्य ध्रुवाज्येन पूरितेन यूपाहवनीययोर्मध्याहृतेन स्रुवेण जुह्वां गृहीतान्यङ्गान्यभिघारयति । सर्वाण्यङ्गानि द्विर्द्विरवद्यति । सर्वेषामुपस्थानाभिमर्शनप्रत्यञ्जनानि न भवन्ति । तत उपभृति सकृद्दक्षिणस्य दोष्णः सकृत्सव्य-

श्रोणेः पिशितमवदाय पूर्वनिहितं गुदस्याग्रं निधाय यूषमानीय तदुपरि सव्यवृक्ष्यमेदो निधाय प्रसार्य तेनोपभृतं प्रच्छाद्य यूष्णोपसिच्य पूर्ववद्द्विरभिघारयति । अवत्तावशिष्टेभ्योऽङ्गेभ्यः प्राशित्रमवदायाज्यस्थाल्याः सकाशाद्गृहीताज्येन स्रुवदण्डेन जुह्ववदानवत् द्विरभिघार्य निदधाति । इडापात्र्यां अवदानकाले ऽवशेषितान् हृदयजिह्वावक्षोभागान् तनिममतस्नु वनिष्ठुं च द्विर्द्विरवदाय अन्येभ्योऽप्यनुक्तेभ्योऽस्थिवर्जितेरङ्गैरिडां वर्धयित्वा यूष्णोपसिच्य जुह्वङ्गवदाज्यस्थाल्याज्येन स्रुवेणाभिघारयति । वसाहोमहवन्यां वसां गृहीत्वा यूष्णोपसिच्य जुह्वङ्गवदपूर्वाज्येन स्रुवेणाभिघारयति इदं कर्म पश्वङ्गावदानमुच्यते ॥

१०० तत ऐन्द्रः प्राणो अङ्गे अङ्ग इत्यादिमन्त्रेणावदानान्यभिमृशति । अयं मन्त्रोऽवदानाभिमर्शनमन्त्र इत्युच्यते ॥

१०१ अथ दक्षिणपार्श्वस्य मांसवत्प्रदेशेन वसाहोमहवन्यां गृहीतां वसां मिश्रयति श्रीरस्यग्निस्त्वेत्यादिमन्त्रेण । जाघनीं यथाहृतं प्रत्याहृत्य पश्चान्नीत्वा शालामुखीयस्य समीपे निदध्युः । पश्वङ्गानि जुहूं उपभृतं इडापात्रीं वसाहोमहवनीं प्राशित्रहरणं च यथाहृतं पर्याहृत्य यथास्थानं निदध्युः । अध्वर्युर्यथागतं प्रत्येत्य जुहूपभृतावाददान आह । इन्द्राग्निभ्यां छागस्य हविषोऽनुब्रूहीति । अयं पश्वङ्गानुवाक्याप्रैष उच्यते ॥

१०२ अत्याक्रम्याश्राव्य प्रत्याश्रुते आह । इन्द्राग्निभ्यां छागस्य हविः प्रस्थितं प्रेष्येति । अयं हविर्याज्याप्रैषप्रैष उच्यते ॥

१०३ प्रतिप्रस्थाता आहवनीयस्योत्तरतस्तिष्ठन् याज्याया अर्धर्चे होत्रा पठिते वसाहोमं घृतं घृतपावानः पिबतेत्यृचा जुहोति ।

Digitized by Google

अन्तरिक्षायेदमिति यजमानस्य त्यागः । अयं वपाहोम इत्युच्यते ॥

१०४ होतुर्वषट्कारे अध्वर्युर्जुह्वा जुहोति । यजमान इन्द्राग्निभ्यामिदं न मम । इन्द्राग्नियोरहं देवयज्ययेन्द्रियावी भूयासमिति त्यागानन्तरमनुमन्त्रयते । अयमङ्गयाग इत्युच्यते ॥

१०५ ततः प्रतिप्रस्थातोपविश्य वपाहोमशेषेण दिशो जुहोति दिशः प्रदिश इत्यादि मन्त्रेण । दिग्भ्य इदमिति यजमानत्यागः । अयं दिग्घोम इत्युच्यते ॥

१०६ ततोऽध्वर्युः प्रदक्षिणमावृत्य जुह्वामुपस्तीर्य स्रुवेण पृषदाज्यं सकृद् गृहीत्वाऽऽह । वनस्पतये नुब्रूहीति । द्विरभिघार्य प्रसव्यमावृत्याश्राव्य प्रत्याश्रावित आह । वनस्पतये प्रेष्येति । वषट्कृते पूर्वा आहुतीरतिहाय जुहोति । वनस्पतय इदमिति यजमानस्य त्यागः आयुष्मानित्यनुमन्त्रणञ्च । अयं वनस्पतियाग इत्युच्यते ॥

१०७ अध्वर्युरुपभृति गृहीतान्यङ्गानि जुह्वां समावपमान आह । अग्नये स्विष्टकृतेनुब्रूहीति । आश्राव्य प्रत्याश्रावित आह । अग्नये स्विष्टकृते प्रेष्येति । वषट्कृते पूर्ववज्जुहोति । संक्षालननिनयनानन्तरं होत्रङ्गुलिपर्वाञ्जनादि करोति । उपहूतायामिडायां वनिष्ठुमग्नीधे षडवत्तं संपाद्य ददाति । इडाभागमपि ददातीति केषाञ्चिन्मते । षडृत्विजो यजमानश्चेडां भक्षयन्ति । इदं पाश्वडाभक्षणमुच्यते ॥

(शेषमग्रे)

सटीकसंक्षेपशारीरकम् ।

(*Continued from page* 540. Vol. VI.)

मू० ॥ लक्ष्यस्वरूपमुपलभ्य तदेकनिष्ठं
दृष्ट्वा च लक्षणमनेन तदेव लक्ष्यम् ॥
व्यावर्त्य बोधयितुमुत्सहते जनोऽयं
तत्त्वान्तरादिति यतः प्रतिपन्नमेतत् ॥ ५२४ ॥

टी० ॥ किं च चक्षुषः साक्षाद्विशिष्टं बोधयतस्तद्द्वारा व्यावृत्तिबोधः प्रयोजनं दृष्टम्, एवं लक्षणवाक्यस्यापि तदेव युक्तमित्याशयेन प्रथमं दृष्टान्तमाह । लक्ष्यस्वरूपमिति । उपलभ्य चक्षुषेति शेषः । अयं व्यवहर्ता ॥ ५२४ ॥

मू० ॥ संज्ञासंज्ञिसमन्वयावगतये नेष्टं क्व चिल्लक्षणं
व्यावृत्तिप्रतिपत्तिमात्रजनकं लक्ष्ये भवेदन्यतः ॥
लक्ष्यं लक्षणवर्त्मना हि जगति व्यावर्तयन्तोऽन्यत-
स्तल्लक्षणमादरेण महता संगृह्णते वादिनः ॥ ५२५ ॥

टी० ॥ उक्तनिषेधानुवादपूर्वकं दार्ष्टान्तिकमाह । संज्ञासंज्ञीति । गवादिपदस्य लक्ष्यस्य च वाच्यवाचकरूपो यः समन्वयस्तदवगतय इत्यर्थः । एतच्च प्रागुक्तस्वरूपकथनाय नेत्यस्योपलक्षणम् । किं च संज्ञासंज्ञिसमन्वयाय लक्षणवाक्यं वदन्नपि व्यावृत्तिप्रतिपत्तिप्रयोजनं तस्याङ्गीकुर्यादेवान्यथाऽनतिप्रसक्तस्वरूपेण संज्ञिनोऽनवगमे तत्रैव संज्ञासंबन्धस्य दुरवगमत्वात्, अतस्तदेव प्रयोजनमित्याशयेनाह । व्यावृत्तिप्रतिपत्तीति । तस्माल्लोके गवादिलक्षणानामेतदेव प्रयोजनं वृद्धसंमतमित्युपसंहरति । लक्ष्यं लक्षणवर्त्मनेति । लक्षणवर्त्मनेत्यनेन लक्षणवाक्यस्य लक्षणया व्यावृत्तिबोधप्रयोजनकत्वं सूचितम् । तत्तल्लक्षणं तस्य तस्य गोघटादेर्लक्षणम् ॥ ५२५ ॥

मू० ॥ तस्माद् ब्रह्मणि वाच्यवाचकयुजासिद्धौ श्रुतिर्नाभ्यधा-
ज्जन्माद्यस्य समीक्षितस्य जगतो यद् ब्रह्मणो लक्षणम् ॥

Digitized by Google

नापीदं स्वरूपबोधनपरं संकीर्तितं ब्रह्मणः
किं त्वब्रह्मपदार्थतोऽस्य सकलाद् व्यावृत्ततासिद्धये ॥ ५२६ ॥

टी० ॥ एवं लोकेऽस्वरूपलक्षणानां व्यावृत्तिमात्रप्रयोजनकत्वमुक्तम्, एवं सृष्टिवाक्यार्थजगत्कारणत्वमपि ब्रह्मणस्तदितरव्यावृत्तय एव श्रुत्यानूद्यते, किं चाश्रुतव्यवहारादिकल्पनाप्रसङ्गाच वाच्यवाचकसंबन्धसिद्धिस्तत्प्रयोजनं नापि ब्रह्मस्वरूपसिद्धिस्तस्याखण्डैकरसस्य जगत्कारणत्ववैशिष्ट्यविषयवाक्यप्रतिपाद्यत्वायोगादित्याशयेनोपसंहरति । तस्मादिति । अस्य समीक्षितस्य जगतो जन्मादि जन्मस्थितिभङ्गतत्कारणत्वं यद्ब्रह्मणो लक्षणं तच्छ्रुतिर्ब्रह्मणि वाच्यवाचकयुक्तासिद्धै नाभ्यधात् । नापीदं लक्षणवाक्यं ब्रह्मणः स्वरूपबोधनपरं तदर्थं सत्संकीर्तितं किं त्वस्य ब्रह्मणः सर्वस्मादब्रह्मपदार्थतो व्यावृत्ततासिद्धय इति संबन्धः । एतच्च ग्रन्थकारेण "व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजन"मिति परोक्तमेकं पक्षमाश्रित्योक्तं न तु स्वमतम्, प्रकृष्टप्रकाशादिलक्षणवाक्यस्य चन्द्रस्वरूपार्थतायाः प्रागुक्तत्वाल्लक्षणवाक्यमात्रस्य सिद्धान्तिभिरखण्डार्थताभ्युपगमाच्च । किं च लक्षणवाक्यं मुख्यवृत्त्या न व्यावृत्तिं प्रतिपादयितुं शक्नोति । नापि लक्षणया तद्बीजानुपपत्तेरभावात् । लक्षणयाऽपि लक्ष्यस्वरूपमप्रतिपाद्य कस्येतरव्यावृत्तिं प्रतिपादयेद्धर्मिविशेषविशिष्टतयैव तस्या ज्ञातुं शक्यत्वात् । न च लक्षणवाक्यं गवादिकं बोधयदेव तदन्येतरव्यावृत्तिं बोधयतीति वाच्यम् । आवश्यकत्वाच्छब्दस्य विरम्य व्यापाराभावाच्च तस्य तत्रैव व्यापारो न तु व्यावृत्तावपि । न च लक्षणवाक्येन लक्षणसंसर्गे प्रतिपादिते लिङ्गादितरत्र व्यावृत्तिसिद्धिरिति वाच्यम् । विशिष्टस्वरूपाभिधानमात्रस्यैव शब्दव्यापारतया व्यावृत्तेः प्रमाणान्तरव्यापारसाध्यत्वप्रसङ्गेन व्यावृत्तमेतदखिलादित्यादिना प्रक्रान्तविरोधात् । अर्थादपि सिद्धान्त्यास्तस्याः शब्दव्यापारगोचरत्वायोगाच्च । संज्ञासंज्ञिसंबन्धार्थत्वनिराकरणं तु युक्तमेव । एतच्च सर्वं प्रागुपपादितमप्याचार्याणामेतत्संमतमिति भ्रमापनोदनायास्माभिरुक्तम् ॥ ५२६ ॥

मू० ॥ परिच्छिन्नवस्तुव्यवच्छेदसिद्धे
जगादश्रुतिर्लक्षणं ब्रह्मणस्तत् ॥
परिच्छिन्नता प्रापिता पूर्वपक्षे
परब्रह्मणस्तन्निषेधार्थमेतत् ॥ ५२७ ॥

टी० ॥ एवं च ब्रह्मतटस्थलक्षणवाक्यं सांख्यादिकल्पितपरिच्छिन्नप्रधानाद्यसंभविलक्षणकथनमुखेन तल्लक्षितस्य सत्यादिवाक्यसिद्धाखण्डस्वरूपे पर्यवस्यति । न हि प्रपञ्चस्योपादानाभिन्नचेतनकारणे बुद्धिसन्निहिते सति सत्यादिविधिनिषेधवाक्यानां तत्त्वमस्यादिवाक्यानां च समन्वयनिरूपणं संभवति निरालम्बनतन्निरूपणायोगात्तत्र चार्थात्परभ्रमविषयपरिच्छिन्नप्रधानादिव्यावृत्तिरपि सिद्ध्यति न तु सा लक्षणवाक्यस्य साक्षात्प्रयोजनमित्याशयेनाह । परिच्छिन्नेति । वस्तुतः परिच्छिन्नं यज्जगत्कारणं सांख्याद्यभिमतं तद्व्यवच्छेदसिद्ध्या इत्यर्थः । लक्षणमभिन्ननिमित्तोपादानत्वरूपम् । न हीदं लक्षणं सांख्याद्यभिमते जगदुपादाने पातञ्जलाद्यभिमतेश्वरे वा संभवति । ब्रह्मणि तु तदबाधितमिति तल्लक्ष्यस्य ब्रह्मणः प्रधानादिव्यावृत्तिरर्थात्सिध्यतीति भावः । नन्वर्थादपि परिच्छिन्नताव्यावृत्तिः कथं लक्षणवाक्यप्रयोजनं न ह्यनादिसिद्धा श्रुतिरादिमत्पुरुषभ्रमसिद्धव्यावृत्तये स्वार्थं प्रतिपादयतीति युक्तमितिचेन्न । तेषामपि पक्षाणामसत्त्ववादपक्षस्येवाऽनादिपूर्वपूर्वभ्रमसिद्धतयाऽनादित्वेन श्रुत्यैव निराकार्यत्वादित्याशयेनाह । परिच्छिन्नतेति । परब्रह्मणो जगत्कारणस्य । एतदभिन्ननिमित्तोपादानत्वं लक्षणम् ॥ ५२७ ॥

मू० ॥ कालस्वभावपरमाणवसुभृत्प्रधान-
स्कन्धप्रतीत्यखिलशून्यकथाप्रसङ्गे ॥
जन्मादिसूत्रमवतीर्णमियं श्रुतिश्च
तस्मादिदं परमिदं द्वितयं प्रवृत्तम् ॥ ५२८ ॥

टी० ॥ जगत्कारणे परिच्छिन्नत्वप्रसञ्जकं पूर्वपक्षं विवृण्वतस्तन्निवृत्त्यर्थत्वं श्रुत्यादेराह । कालस्वभाव इति । वसन्तादिकाल एव नियमेन

Digitized by Google

कार्यविशेषदर्शनात्काल एव कारणमिति केचित् । कारणं विनैव कार्यं भवतीति स्वभाववादिनः । सूक्ष्मेभ्यस्तन्त्वादिभ्यः स्थूलस्य पटादेरुत्पत्तिदर्शनात्सूक्ष्मं स्थूलस्य कारणमेवं तन्त्वादेरपि तदवयवाः सूक्ष्माः कारणमिति यतोऽन्यच्च सूक्ष्मं संभवति ते निरवयवाः परमाणवो जगन्मूलकारणमिति वैशेषिकादय आहुः । असुभृज्जीवः स्वकर्मद्वारा कारणमिति मीमांसकाः । त्रिगुणात्मकस्य जगतः कार्यस्य सदृशं त्रिगुणात्मकं प्रधानमेव कारणमिति सांख्याः । स्कन्धवादी बाह्यार्थास्तित्ववादी सौत्रान्तिकादिर्बौद्धः । स हि परमाणुसङ्घातरूपं पृथिव्यादि रूपविज्ञानवेदनासंज्ञासंस्कारात्मकपञ्चस्कन्धात्मकमाध्यात्मिकं जगदित्याह । प्रतीतिः क्षणिकविज्ञानम् । तत्र कल्पितमेव जगदिति विज्ञानमात्रतत्त्ववादी बौद्धः । अखिलशून्यवादी सर्वं शून्यमिति वदति माध्यमिकः । स हि शून्यमेव पूर्वपूर्वालीकवासनावशाद्विचित्रप्रपञ्चाकारेण प्रथत इत्याह । एतेषां कालादीनां या कथा चर्चा तत्प्रसङ्गे जगत्कारणस्य परिच्छिन्नत्वप्रसक्तौ तन्निवृत्तये जन्मादिसूत्रमियं श्रुतिश्च । तस्मादिदं श्रुतिसूत्रात्मकं द्वितयमिदं परमार्थादेतत्प्रयोजनकं प्रवृत्तमिति संबन्धः । एतदुक्तं भवति । न हि कालादिः सर्वोऽपि प्रपञ्चस्य निरपेक्ष उपादानकारणं भवति चेतनानधिष्ठितस्याचेतनस्य कारणत्वादर्शनात् । अस्तु तर्हीश्वरोऽधिष्ठाता तदधिष्ठिताः परमाणव उपादानमिति चेन्न । कार्यस्य स्वापेक्षयाऽल्पपरिमाणजन्यत्वनियमाभावेन परमाणवसिद्धेः । न हि दीर्घेभ्यस्तन्तुभ्यो दुकूलः पटो न भवति न चातिविस्तृतदीर्घदुकूलद्वयेनैकारज्जुर्न क्रियते निरवयवसंयोगासंभवेन द्व्यणुकादिकार्यासंभवाच्च । न हि स्वाभावसमानदेशः संयोगो निष्प्रदेशे परमाणौ संभवति तस्येश्वरसंबन्धासंभवेन तदधिष्ठानं चानुपपन्नम् । लाघवेनोपादानाधिष्ठात्रोरेकत्वे संभवति तद्भेदायोगाच्च लोकेऽपि तयोर्भेदो न संप्रतिपन्न इत्युक्तम् । लोके प्रेक्षावतां नियमेन कार्यविशेषमुद्दिश्य विशिष्टकारणोपादानदर्शनाच्च स्वभाववादः प्रामाणिकः सर्गाद्यकालेऽशरीरिणो जीवस्य ज्ञानासंभवेन विश्वनिर्माणायोगात् । किं बहुना यद्यत्परिच्छिन्नं तत्तत्कार्यमेवेति न कस्यापि कारणमतः सर्वज्ञं सर्वशक्ति ब्रह्मैव

सर्वजगदुपादानं कर्तृ चेति जन्मादिसूत्रन्यायतो यत इत्यादिश्रुतिप्रतिपाद्यं सिद्धमिति ॥ ५२८ ॥

मू० ॥ अधिष्ठात्रधिष्ठेयभावेन योनि-
निमित्तं च यत्कारणं जन्मभाजाम् ॥
परिच्छिन्नताऽथापि संभावितेव
प्रतीचोऽस्य भेदे परैरुच्यमाने ॥ ५२९ ॥

टी० ॥ ननु श्रुतिसूत्राभ्यामेवंविधकारणे सिद्धेऽपि तस्य जडप्रपञ्चपरिच्छेद एव वारितः स्यात्त्वात्मनानात्वमपि । संभवति हि तादृशस्यापि कारणस्य परैरुच्यमानो जीवाद्भेद इत्याशङ्कते । अधिष्ठात्रधिष्ठेयेति । अधिष्ठात्रधिष्ठानम् अधिष्ठेयमध्यस्तं तद्भावेन विवर्ताधिष्ठानत्वेनेत्यर्थः । योनिरुपादानं निमित्तं कर्तृ च अथ वा तदात्मानं स्वयमकुरुतेति स्वस्यैव स्वगोचरकृतिशालित्वं स्वाश्रितकृतिविषयत्वं च यच्छ्रुतं तदधिष्ठात्रधिष्ठेयभावः । तेन इत्थंभावे तृतीया अधिष्ठातृभावेन निमित्तमधिष्ठेयभावेन योनिश्चेत्यर्थः । शेषं स्पष्टम् ॥ ५२९ ॥

मू० ॥ ततस्तन्निषेधार्थमेतद्बभाषे
श्रुतिर्ब्रह्म तद् भिन्नता तस्य कस्मात् ॥
प्रतीचोऽपि हि ब्रह्मता नित्यसिद्धा
दृशो भेदसिद्धिर्निरालम्बनेव ॥ ५३० ॥

टी० ॥ तद्दूषयति । तत इति । यत एवं कारणस्य जीवात्परिच्छेदः परोक्तः संभावितस्तत इत्यर्थः । एतत्प्रपञ्चस्याभिन्ननिमित्तोपादानं ब्रह्म । फलितमाह । तदिति । तस्मादित्यर्थः । तस्य ब्रह्मणः । कस्माद्भिन्नता न कस्मादपीत्यर्थः । एतदेवोपपादयति प्रतीचोऽपीति । प्रपञ्चोपादानस्यैकवचनेतरश्रुतिभ्यां तत्कर्तृचेतनाभेदेनाभेदसिद्धे तदुपादानब्रह्मणश्चेतनस्य जीवादपि चेतनाद्भेदो निरस्त एव । दृशो दृगन्तरप्रतियोगिकभेदसिद्धेर्मिथ्याभेदविषयत्वात् । न हि ज्ञानं ज्ञानान्तरमविषयीकृत्य ततः स्वस्य भेदं विषयीकर्तुं शक्नोति न वा ज्ञानं ज्ञानान्तरं विषयीकर्तुं विषयस्य

Digitized by Google

जडत्वापत्तेर्विषयविषयिणोर्वस्तुतः संबन्धासंभवाच्च विषयित्वे तस्य कल्पितत्वे च विषय्येव ज्ञानमिति न ज्ञानभेदसिद्धिरतश्चिद्रूपस्य प्रतीचश्चिद्रूपब्रह्मता नित्यसिद्धेत्याशयः ॥ ५३० ॥

मू० ॥ जगत्कारणत्वं पुनर्यच्च दृष्टं
न तल्लक्षणं तत्स्वरूपप्रसिद्ध्यै ॥
स्वरूपे यतो लक्षणे दृश्यमाने
प्रसिद्धं ततो लक्ष्यवस्तुस्वरूपम् ॥ ५३१ ॥

टी० ॥ एवं लक्षणवाक्यं विशिष्टलक्षणाभिधानद्वारा समन्वयनिरूपणालम्बनार्पणेन सत्यादिवाक्यार्थे पर्यवस्यति । अर्थाच्च जगत्कारणस्य परिच्छेदव्यावृत्तिरित्युक्तम् । नन्वस्त्वेवमितरव्यावृत्तेरार्थिकत्वं तथापि जगत्कारणत्वं यस्य धर्मस्तत्सिद्ध्यर्थमेवेदं लक्षणमस्तु । न तु सत्यादिवाक्यैक्येन तदर्थाखण्डवस्तुसिद्ध्य इत्याशङ्क्याह । जगत्कारणत्वमिति । यच्च चेतनसामान्ये दृष्टमुक्तानुमानेनैतच्छ्रुतेश्चावगतं तत्स्वरूपप्रसिद्ध्यै । तस्य चेतनसामान्यस्य कारणत्वविशिष्टस्वरूपनिश्चयाय कुतो नेत्यत आह । स्वरूप इति । धर्मिण्यवगत एव हि तस्यैवं लक्षणमित्यवगन्तुं शक्यमेवं च यतः स्वरूपे दृश्यमाने लक्षणं तदीयतया प्रसिद्धं भवति । लक्षणाच्च लक्ष्यवस्तुरूपप्रसिद्धावन्योन्याश्रयः । न चानुमानादेव तत्सिद्धमितिवाच्यम् । तत्सिद्धये लक्षणानुपयोगप्रसङ्गात् । श्रुतिश्चात्र केवलानुवादिनी स्यादिति ॥ ५३१ ॥

मू० ॥ निमित्तं च योनिश्च यत्कारणं त-
त्परं ब्रह्म सर्वस्य जन्मादिभाजः ॥
इति स्पष्टमाचष्ट एषा श्रुतिर्नः
कथं सिद्धवल्लक्षणं सिद्धिबाह्यम् ॥ ५३२ ॥

टी० ॥ एवं प्रपञ्चस्याभिन्ननिमित्तोपादानत्वं ब्रह्मलक्षणमित्युक्तम् । ननु लक्षणमन्यतः प्रसिद्धमेव श्रुत्यानूद्यत इति वाच्यम् । अन्यथा तस्यापि श्रुतिप्रतिपाद्यत्वप्रसङ्गेनाखण्डार्थत्वक्षतेः । न चैकस्योभयरूपं कार-

त्वं लोके प्रसिद्धमस्तीति शङ्कते। निमित्तं चेति। नः अस्मान्प्रत्येषा यतो वेत्यादिरूपा श्रुतिः सर्वस्य जन्मादिभाजो यत्कारणं निमित्तं योनिश्च भवति तत्परं ब्रह्मेति सिद्धिग्राह्यं लोकाप्रसिद्धं लक्षणं सिद्धवत् प्रमाणसिद्धमिव कथं स्पष्टमाचष्टेति संबन्धः॥ ५३२॥

मू०॥ न खल्वीदृशं कारणं लोकसिद्धं
यतोऽनूद्य तल्लक्षणं तेन लक्ष्यम्॥
व्यवस्थापयन्ती प्रवृत्तेवमेषा
विधत्ते नु वक्तीति चेतद्विरुद्धम्॥ ५३३॥

टी०॥ सिद्धिग्राह्यमित्येतदेव प्रपञ्चयन्नाह। न खल्विति। नन्वियमेव श्रुतिरवान्तरतात्पर्येणोभयविधं कारणत्वं ब्रह्मणो वदत्विति चेत्तत्राह। यतोऽनूद्येति। यत इति यच्छब्दयुक्तेयं श्रुतिस्तादृशं कारणत्वमनूद्याद्वैतं ब्रह्म व्यवस्थापयन्ती प्रवृत्तेति तत्प्रागेव तत्सिद्धिर्वाच्येत्यर्थः। तर्हीयं स्वसामर्थ्यसिद्धमेवार्थमनुवदत्वित्याशङ्क्याह। विधत्त इति। अज्ञातमर्थं प्रतिपादयति। अनुवक्ति ज्ञातमर्थं बोधयतीति चैतदुभयमेकस्य विरुद्धमन्योन्याश्रयप्रसङ्गादित्यर्थः॥ ५३३॥

मू०॥ अनुवददिदमेव वाक्यमर्था-
दुपनयतीदृशकारणं प्रसिद्धम्॥
अनुवदनमशक्यमन्यथा स्या-
दवगतगोचरमेव हीदमिष्टम्॥ ५३४॥

टी०॥ सिद्धान्ती यत इति वाक्यस्य यच्छब्दप्रयोगादनुवादत्वे स्थिते तत्सामर्थ्यादेव तादृशं कारणत्वमपि तद्विधास्यति। अन्यथाऽनुवादत्वायोगात्। न चैवमन्योन्याश्रयः। अनात्मनुवादसामर्थ्यलभ्यविधानस्याप्यनादित्वादित्याशयेनाह। अनुवददिति। प्रसिद्धमिति स्वसामर्थ्यप्रसिद्धमित्यर्थः। इदमेव वाक्यं प्रसिद्धमीदृशं कारणमनुवददर्थादुपनयति विधत्ते। तत्सामर्थ्यमेव व्यनक्ति। अनुवदनमिति। अन्यथा तद्विध्यभावे

अनुवदनमशक्यमेव स्यात्, कुतः यत इदमनुवदनमवगतगोचरमेवेष्टमन्यथा सर्वस्यानुवादत्वापत्तेः । नचैवमुक्तरीत्याप्ययं दोषः समान इति वाच्यम् । निर्णीतानुवादत्व एव वाक्यस्यैवंविधत्वादिति भावः ॥ ५३४ ॥

मू० ॥ यथा विशिष्टस्य विधानतोऽर्था-
द्विशेषणानां घटते विधानम् ॥
स्थितेऽनुवादेऽपि तथेह योज्य-
मनूद्यमानेऽपि जगन्निदाने ॥ ५३५ ॥

टी० ॥ श्रुतिः स्वाभिधानसामर्थ्यसिद्धमेवार्थमाश्रित्य प्रवृत्तेत्येतन्मीमांसकानामपि संमतमिति दृष्टान्तेनाह । यथा विशिष्टस्येति । यथा सोमेन यजेतेत्यादिसोमादिविशिष्टयागविधानस्य सामर्थ्याद्विशेषणानां सोमादीनामपि विधानं घटते श्रूयमाणशब्दस्यैव तत्रापि तात्पर्यं वाक्यभेदप्रसङ्गात् । विशेषणाधीनसिद्धेर्विशिष्टस्य, तद्विधानं विना विध्यसंभवात्, एवमिह यतो वेत्यादिवाक्येऽनुवादत्वे स्थितेऽनूद्यमाने जगन्निदाने जगतोऽभिन्ननिमित्तोपादानेऽर्थाद्विधानं योज्यमिति संबन्धः ॥ ५३५ ॥

मू० ॥ अथ वाऽनुवादमुपलभ्य ततो-
ऽनुपपद्यमानवपुषः प्रमितेः ॥
अपरं निमित्तमिह कल्प्यमिति
प्रवदन्ति केचिदभियुक्ततराः ॥ ५३६ ॥

टी० ॥ इदानीं दार्ष्टान्तिके प्रागुक्तानुमानसिद्धमेवार्थं श्रुतिरनुवदतीत्याशयेनाह । अथ वेति । अनुवादात् । अनुपपद्यमानवपुषः पूर्वसिद्धिं विनानुपपद्यमानस्वरूपात्पूर्वप्रमितेरपरमनुमानमभियुक्ततरा उक्तानुमानेऽतिप्रवीणाः ॥ ५३६ ॥

(शेषमग्रे)

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google